

शोध-प्रभा

श्रीमती-इन्दिरा-गान्धी-

श्रद्धाञ्जलि-विशेषाङ्कः

अनुसन्धान-प्रकाशन-विभागीया

त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

तस्या अयं

श्रीमती-इन्दिरागान्धी-श्रद्धाञ्जलि-विशेषाङ्क।

प्रस्तावना-लेखका: —

म० म० श्रीरामस्वामि-वेङ्कटरामन्महोदयाः

उपराष्ट्रपतयः भारतस्य

प्रधान-सम्पादक: —

डा० मण्डनमिश्रः, प्राचार्यः

सम्पादकः —

डाॅ० रुद्रदेवत्रिपाठी, आचार्यः

'शास्त्र-चूडामणि'-प्राध्यापकः

□

श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठम्

नई दिल्ली-११००१६

१९८६ ई०

प्रकाशकः —
डा० मण्डनमिश्रः, प्राचार्यः
श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठम्
शहीदजीतसिंहमार्गः, कटवारिया सराय, नई दिल्ली-११००१६
दूरभाषाङ्कः —६५०८३१

चैत्रतः फाल्गुनान्ता मासाः, सं० २०४२ वि० (अप्रैल १९८५ तो मार्च १९८६ ई० पर्यन्तम्)

वार्षिक-मूल्यम् ४०-०० चत्वारिंशद् रूप्यकाणि
अस्याङ्कस्य मूल्यम्

मुद्रक—पङ्कज प्रिण्टर्स, मौजपुर, दिल्ली-११००५३

विद्यापीठस्य संस्थापकाः



भूतपूर्वप्रधानमन्त्रिणः श्रद्धेयाः श्रीलालबहादुरशास्त्रिमहाभागाः

विद्यापीठ-विषयका विचाराः

हर्षस्येयं वार्ताऽस्ति यद् भारतस्य राजधान्यां दिल्ली-नगर्यां संस्कृत-भवनस्य निर्मितेस्तथै-कस्यादर्शरूपस्य संस्कृत-विद्यापीठस्य स्थापनायाः प्रयासं सम्मेलनं कर्तुमभिलषति । इदमेकं शुभं कार्यं, यस्य सम्पन्नतया राजधान्या जीवन एकस्य महतोऽभावस्य पूर्तिर्भविष्यति । मम विश्वासोऽस्ति यदनयोर्योजनयोर्जनतायाः सर्वकारस्य च सहयोगोऽवश्यं प्राप्स्यति ।

सम्मेलनस्य कलकत्ताधिवेशने
दिनाङ्क—२ जुलाई १९६१ ई०

—डॉ० राजेन्द्रप्रसादः
(भू० पू० राष्ट्रपतिः, भारतस्य)

भवन्तो जानन्ति यद् दिल्लीनगर्याम्—अखिल-भारतीय-संस्कृत-विद्यापीठस्य स्थापना श्रीशास्त्रिभिः कृताऽऽसीत् तथा तैरन्ताराष्ट्रिय-संस्कृत-संस्थानस्य स्वरूपेणास्य विकासस्य घोषणां विधायैका योजनाऽपि निर्मापिताऽऽसीत् ! साम्प्रतमिदमुचितं भविष्यति यदनया संस्थया तेषां नाम योजयित्वा तेषां सेवानामेकः स्थायी स्मारको निर्मीयेत । अनयैव दृष्टयाऽहं सम्मेलनस्य तथा विद्यापीठस्य सभापते रूपेणाद्यप्रभृति संस्कृत-विद्यापीठस्याभिधानं 'श्रीलालबहादुर शास्त्री राष्ट्रिय-संस्कृत-विद्यापीठं दिल्ली'-ति विधानस्य घोषणां करोमि ।

अस्मिन्नेव प्रसङ्गे इदं घोषयन्त्यप्यहं प्रसीदामि यद् भारतसर्वकारेण दिल्लीस्थं संस्कृत-विद्यापीठमिदं केन्द्रीयसंस्थानस्वरूपेण स्वीये सञ्चालने नेतुं निर्णीतमस्ति । तथा शिक्षामन्त्रालयो विद्यापीठस्य सम्मेलनस्य च पदाधिकारिभिः परामृश्य शीघ्रमेव विद्यापीठस्य व्यवस्थां स्वकीये हस्ते गृहीतुमुद्यतोऽस्ति । मम विश्वासोऽस्ति यच्छिक्षामन्त्रालयोऽस्याः संस्थाया विकासस्य पूर्णं प्रयत्नं विधास्यति ।

सम्मेलनस्य स्वर्ण जयन्ती समारोहे
दिनाङ्क—२ अक्टूबरः १९६६

—स्व० श्रीमती-इन्दिरा-गान्धी

विषयानुक्रमणिका

द्वितीयो विभागः — "विचारालोकः"

तृतीयो विभागः — "श्रद्धांलोकः"

पञ्चमो विभागः — "ग्रन्थालोकः"

प्रस्तावना

भारतवर्षस्य विविधतायां निलीना 'एकता' अस्माकं राष्ट्रस्य वैशिष्टच-मस्ति। वयं बंगाली-पञ्जाबी-गुजराती-हिन्दू-मुसलमान-सिख-जैन-बौद्धास्तु भवाम एव, परं तेन सह वयं सर्वे भारतीयाः स्मः। अमृतसरेस्थितं स्वर्ण-मन्दिरं, तिरुपतौ विराजितो भगवान् वेङ्कटेशः, मद्रासस्य सेंथोम-गिरिजागृहं तथा दिल्ल्या लालकिला-समक्षं सुशोभितं जामामस्जिदं देशस्य जन-जनानामास्थायाः स्तम्भाः सन्ति। इदमेव सर्वमवलोक्य 'इकबाले'नोक्तमासीत्—"सारे जहां से अच्छा हिंदोस्तां हमारा"।

महात्मगान्धिना स्वकीयाश्रमस्य प्रार्थना-स्तोत्रेषु गीतोपनिषत्-कुरान-बाईबिलानां तथा पारसीकसमाजस्य आवेस्टा-याः समाहारः कारितः।

'स्वर्गीया श्रीमती-इन्दिरा-गान्धी' देशस्यास्याः समरसतायाः समानाया आस्थायास्तथा भावात्मकैकतायाः साक्षात् प्रतिमूर्तिरासीत्। ता अस्य देशस्य वैविध्ये निलीनामेकतां सदाऽपश्यन्नेव नैव, अपि तु तदनुकूलमाचरणान्यप्यकुर्वन्। ता यदा यात्रायां कुत्रापि गच्छन्ति स्म तदा तत्रत्यानि मन्दिराणि गुरुद्वाराणि मस्जिदानि चर्चाणि जैन-मन्दिराणि बौद्धस्तूपादीनि चैकया भावनया द्रष्टुमवश्यं गच्छन्ति स्म तथा तत्र गत्वा प्रसादमाशीर्वादञ्च गृह्णान्ति स्म। अहं स्मरामि यद् दिल्लीनगर्याः स्वामि-मलय-मन्दिरस्य प्रतिष्ठा-समारोहे ताः सर्वैर्जनैः सह भक्ति-भावेन परिपूर्णा भूत्वा भागमगृह्णन्।

ता आचार्यविनोवाभावे—आनन्दमयीमां-स्वर्गीया-श्रीजिद्दूकृष्ण-मूर्ति-काञ्चीपरमाचार्येभ्यस्तथाऽन्येभ्यः सद्भ्यः परामर्शाय गच्छन्ति स्म।

कलायाः सुरक्षायै तथा समृद्धये तासां प्रयत्नोऽवर्तत। पुरातत्त्वं प्रत्यगाधा-ऽऽस्था तासु स्वाभाविक्यविद्यत।

संस्कृत-विद्यापीठेन सह तासां संस्मरणीयाः सम्बन्धा अवर्तन्त। संस्कृत-गद्यैः पद्यैश्च तासां जीवन-चरित्रम् **'इन्दिरा-कीर्ति-कौमुदी'** नाम्नाऽत्र संयोजितमस्ति, यस्य रचनां विद्यापीठस्याचार्यः **श्रीरुद्रदेवत्रिपाठी** व्यदधात्। डा० त्रिपाठी, अस्यै रचनायै वर्धापनामर्हति।

इन्दिरा-कीर्ति-कौमुद्या संयुक्त एव प्रकाशितः **"शोध-प्रभा'याः श्रीमती-इन्दिरा-गान्धी-श्रद्धाञ्जलि-विशेषाङ्कः"** तासां सर्वधर्म-समभावाय संस्कृत-संस्कृत्योर्जगत्पक्षतस्ताः प्रति कृतज्ञताया ज्ञापनं वर्तते। अस्मिन् सर्वेभ्यो धर्मेभ्य-स्ताभिः प्रदत्तस्यादरस्य तथाऽध्यात्मं प्रति निष्ठायाः स्मृतयः प्रस्तुताः सन्ति।

अहमस्मै उत्तमप्रयासायास्य विशेषाङ्कस्य प्रधानसम्पादक-डा० मण्डनमिश्रस्य तथा तेषां सहयोगिनामभिनन्दनं करोमि। मम विश्वासो विद्यते यदयं साहित्यिकः श्रद्धाञ्जलिर्भारतीयसंस्कृते राष्ट्रभक्तेः कर्तव्यनिष्ठायाश्च सञ्चारे सहायको भविष्यति।

रामस्वामी वेङ्कटरामन्
(उपराष्ट्रपतिः, भारतस्य)

फरवरी २४, १९८६ ई०

प्रधान-सम्पादकीयम्

अस्माकं देश एको विलक्षणो देशः। अस्मिन् देश एकस्मिन् काले सर्वेषाम् ऋतूनां विलक्षणा शोभाऽवलोकयितुं शक्यते। यदा भद्राचुर्यां जना विद्युद्व्यजनं विना स्थातुं न शक्नुवन्ति तस्मिन्नेव समये काश्मीर-वासिनः कम्बलावृता अपि प्रतापकाश्रयं गृह्णन्ति। कन्याकुमारीस्थले त्रयोऽपि समुद्राः स्वेषां सङ्गमस्य रमणीयं दृश्यमुपस्थापयन्ति तर्हि हिमालयस्य पर्वत-शृङ्खलाः श्वैत्येन दर्शकानां मनांसि मोहयन्ति। यस्मिन् काले चैरापूंजी-क्षेत्रे मुशलाधारा वर्षा वर्षन्ति तस्मिन्नेव काले राजस्थानस्य भू-भागः प्रतपति। एकस्मिन्नेव काले देशेऽस्मिन् सर्वेषामेव प्रकाराणां कृषिः सम्पाद्यते। अत्र सर्वविधाः पशवः पक्षिणो वृक्षाश्चोपलभ्यन्ते।

प्राकृतिक-वैलक्षण्यवदेवात्रत्या नागरिका अपि मिथो विलक्षणा वर्तन्ते। गौराः कृष्णाः, वामनाः प्रांशवश्च। अत्रत्या मानवा अनेका जातीर्धर्मान् भाषा आचार-विचारान् वेष-भूषाश्चात्मसात्कृताः सन्ति।

भारतस्य महापुरुषैर्यच्चिन्तनं दर्शनं वाङ्मयं सहिष्णुतोदारतादीनि चास्मभ्यं दत्तानि तान्येवैतां विविधतामेकतायां परिणमनस्य तत्त्वानि विद्यन्ते। एतेष्वेवास्माकमेकता सुस्थिराऽस्ति, वयमनेके सन्तोऽप्येके स्मः। भवामो नाम वयमुत्तरस्था अथवा दक्षिणस्थाः, पूर्ववासिनः पश्चिमवासिनो वा; अस्माकं तीर्थयात्रा तदैव सम्पन्ना भवति यदा वयं देशस्य चतसृषु दिशासु स्थापितानां चतुर्णामपि धाम्नां द्वारका-जगन्नाथपुरी-रामेश्वर-बदरिकाश्रमाणां यात्राः कुर्मः।

नैतावदेव; भवतु नाम प्रणाल-सलिलेनैवास्माकं स्नानं, परं पात्रस्थे जले—

"गङ्गे च यमुने चैव गोदावरि सरस्वति!।
नर्मदे सिन्धु कावेरि! जलेऽस्मिन् सन्निधिं कुरु॥"

मन्त्रेणानेन सर्वस्यापि देशस्य नदीरावाह्य स्नानानि कुर्मः। मान्यतां नाम समस्ताय राष्ट्राय भेद-भावैर्विना जीवन (जलदानां वा)-प्रदात्रीभ्य एताभ्योऽद्भ्यो वयमात्मनोऽभिषेचयन्तः सर्वत्र समानाया आस्थाया आत्मीयताया एकतायाश्चात्मनो गायका अस्य पद्यरूपस्य मन्त्रस्य स्मरणं विधाय प्रान्त-भाषादीनां भेद-भावेभ्य उच्चैरुत्थाय राष्ट्रियैक्येन प्रतिदिनमनुप्राणिता भवामः। किञ्चास्माकं हेमाद्रि-सङ्कल्पः किमस्ति? राष्ट्रस्य विशाले शरीरे एकस्यात्मनो दर्शनमेव तु विद्यते।

'सङ्गच्छध्वं संवदध्वम्' 'समानो मन्त्रः समितिः समानी समानं मनः' तथा **'समानी व आकूतिः समाना हृदयानि'**—प्रभृतीन्यार्षवाक्यान्यपि विविधतायामेकताया दृष्टेरेव तीव्रताविधातृणि वर्तन्ते। समस्तं राष्ट्रमेकया भावनया द्रष्टारः—**"व्यास-वाल्मीक्यश्वघोष-कालिदासाद्याः कवयः, शङ्कर-रामानुज-बुद्ध-महावीर-विवेकानन्दारविन्द-दयानन्द-त्यागराज-पोतन्ना-चैतन्यमहाप्रभु-कबीर-गुरुनानक-रहीम-रसखान-तुलसी-सूर-दादू"**—प्रभृतयो महात्मानः सर्वत्राभेदबुद्ध्या वर्तनस्य तथैकस्य विराजः स्वरूपदर्शनस्य प्रवृत्तिमस्मभ्यं व्यतीतरन्। एतेषां मूले सा राष्ट्रस्योदारा दृष्टिरस्ति या कालिदास एतैः शब्दैरभिव्याञ्जयत्—

बहुधाऽप्यागमैर्भिन्नाः पन्थानः सिद्धि-हेतवः।
त्वय्येव निपतन्त्यौघा जाह्नवीया इवार्णवे॥

—यथा बङ्गेषु विविध-प्रवाहेषु विभक्ता गाङ्गधाराः पद्मादि-नामानि धारयित्वाऽपि

मूलत एकस्या एव गङ्गाया धारायां विविधानि रूपाणि सन्ति किञ्चान्ततो गत्वा स्वीया आपस्त्वयैव (समुद्रेण) मेलयन्ति, तथैव विविधा भाषा जातयो धर्मा दर्शनान्युपासना-पद्धतयश्चैकस्यैव राष्ट्रस्य चेतनाया विभिन्नधाराः सन्ति तथैताः सर्वा एकेनैव विराजा ब्रह्मणा मेलयन्ति।

अस्माकं देशस्येमां संस्कृतिं सर्वात्मना रक्षितुकामा श्रीमती-इन्दिरागान्धी-महाभागा देशस्यास्थाः समरसतायाः समानाया आस्थायास्तथा भावनात्मकैकतायाः साक्षात् प्रतिमूर्तिरासीत्। साधवो महापुरुषा भवन्तु नाम कस्या अपि जातेर्धर्मस्य वा, तान् प्रति श्रद्धाया आदरस्यैकरूपताया निदर्शनं तस्यां महाभागायां नितान्तं व्यराजत्। सा हि त्यागिनां तपस्विनां चरित्राणि वचनानि चैकं स्थायिनं सांस्कृतिकं निधिममन्यत। कला हि वैदिकस्यं पौराणिकस्य वा युगस्यास्तु, गुप्तकालिकी भवत्वथवा जैन-बुद्धयुगयोर्भवतु किंवा मुस्लिमकलाकाराणामेवावदानमस्तु सर्वासां सुरक्षायै समृद्धये च सा सर्वदा प्रायतत। पुरातत्त्वानि प्रति तस्या अगाधाऽऽस्था स्वाभाविक्यवर्तत। ईदृशानामेव गुणानां कारणात् समग्रमपि राष्ट्रं तां महाभागामात्मनः प्रतिनिधिं तथा सर्वस्वममानयत्।

प्राचीन-दार्शनिक-चिन्तने तथा भाषाविज्ञानेऽस्य देशस्य ख्यातिस्तु सर्वत्रास्त्येव, परन्त्वस्य प्राचीनं युगं खगोल-विज्ञानेऽपि समृद्धमासीद्। इदं सूचयितुं तया महाभागया नभसि विसृष्टस्य नवीनस्योपग्रहस्याभिधानं खगोल-विज्ञानस्य मनीषिणो नाम्ना 'आर्यभट' इति घोषितम्। इयं तस्याः प्राचीनतां प्रत्यास्थायास्तथा तया सहैव नवीनचिन्तनं संयोज्यं द्रष्टुं वाञ्छैव त्वासीत्।

सर्वासां भाषाणां साहित्यस्य विदुषाञ्च समानभावेन समादरस्तदीयः स्वभाव एव सम्पन्नोऽभूत्। राष्ट्रिय-पुरस्कार-वितरणस्य सूची तस्य प्रमाणमस्ति। स्वर्गीय-प्रधान-मन्त्रि-श्रीमतीन्दिरागान्धी-महाभागाया ईदृश्या प्राचीन-नवीनयोः समन्वयप्रवृत्त्यैवात्रत्याय सांस्कृतिकनिधये कला-साहित्य-योगक्षेमाः (उपलब्धस्य सुरक्षार्थमनुपलब्धस्य च गवेषणायै) सर्वतोमुखा अवसराः प्राप्ताः। तदीयाभिरुदारता-दूरदृष्टि-समरसता-विविधतायामेकतानां प्रवृत्तिभिरेवास्य देशस्य जनतां महात्मगान्धिभिः प्रदर्शिते पथ्यग्रेसरी विधायैका राष्ट्रहितोन्मुखी व्यधीयत। इदमेव कारणमस्ति यत्तदीये कार्यकाले प्रत्येकं व्यक्त्या वर्गेण च सम्भूय कर्म विहितम्। खाद्यस्य प्रसङ्गे राष्ट्रमात्मनिर्भरमभूत्, विदेशिमुद्राणामभूतपूर्वो लाभः समजायत, नव-नवा आविष्काराः सम्पन्नास्तथा राष्ट्राय समस्ते विश्वे समादरः प्राप्तः। साऽऽसीत्-'**सत्यमेव जयते**'-'श्रम एव जयते'-इत्यनयोः साक्षात् प्रतिमा।

अस्याः कार्यसिद्धेर्मूले तस्या महाभागाया तदीयो मानवतावादी दृष्टिकोणो विद्यते यं सा स्वस्या वंशपरम्पराया अत्रत्याद् वाङ्मयात् तथा शान्तिनिकेतने श्रीरवीन्द्रनाथटैगोरमहानुभावैः प्रतिष्ठापिताद् वातावरणाल्लब्धासीत्। स्वर्गीया श्रीमती गान्धी—'**न जातु कामान्न भयान्न लोभाद् धर्मं त्यजेज्जीवितस्यापि हेतोः**' इति व्यासवचनं स्वीये जीवनेऽवतार्य यथा राजधर्मं निर्व्यूढवती तादृशमुदाहरणमन्यत्र दुर्लभम्।

स्वर्गीयायाः प्रधानमन्त्रि-श्रीमतीन्दिरागान्धीमहाभागाया इममेवैकं सांस्कृतिकं पक्षं—यो हि राष्ट्रियताया मूलाधारो वर्तते, प्रत्येकं जनस्य मनसि पूरणायायं लघु-प्रयासोऽस्ति विहितः। ईदृशस्य गुणस्य प्रकाशनमध्ययनं मननं परिशीलनं तदनुकूलाचरणस्य निर्माणमेवैतस्य राष्ट्रस्य

सुरक्षाया-समृद्धेश्चैकमात्रमुपायो भवितुमर्हति । "नान्यः पन्था विद्यतेऽयनाय ।"

भारतप्रधानमन्त्रिणः स्वर्गीयायाः श्रीमत्याः इन्दिरागान्धीमहाभागायाः सम्बन्धः भारतीयसंस्कृत्या कलया सभ्यतया सह अतिमधुरः संरक्षणात्मकश्चासीत् । महतः पितुः सन्तानत्वात् तस्या जीवने भारतीयतायाः प्रभावोऽविच्छिन्न आसीत् । विशिष्य प्रधानमन्त्रिपदप्राप्त्यनन्तरं यथैव विश्वस्मिन् तस्याः सम्मानोऽवर्धत तथा भारतीयतायाः संरक्षणे तस्याः प्रयासोऽनुदिनं दृढोऽभवत् । सैकाऽऽसीन् महनीया प्रधानमन्त्री याऽस्मै राष्ट्राय गतिशीलं नेतृत्वमदात् । उच्चतमवैज्ञानिकोपलब्धयः विशालतमौद्योगिकविकासेन साकं नैतिकाध्यात्मिक-सूक्ष्मतमपरिणतिश्च त्रिश्वेनानेन तस्याः प्रत्येकं निर्णये दृष्टा आसन् । स्वविचारेषु साऽऽधुनिकी वैज्ञानिकी तथा पूर्णहृदयेनाध्यात्मिकी चासीत् । तादृशी राजनीतिकी नेत्री सा या सर्वथाऽस्य राष्ट्रस्य कृते दत्तचित्ताऽऽसीत् । कारणेनानेन तस्या जीवनं राष्ट्रस्यास्यामूल्यनिधिरभवत् । भारतस्य समृद्धिरखण्डता च तस्या जीवनसर्वस्वमास्ताम् । त्यागेन बलिदानेन राष्ट्रसेवया च तस्या जीवनमध्यात्मसत्त्वस्य प्रतीकं सञ्जातम् । शनैः शनैरेतेषां गुणानां समन्वयस्तां राष्ट्रमातृरूपेण विकासयामास । तस्या निधनानन्तरं रूपमेतन् मनसि निधाय भारतीयजना हृदयपूर्णं श्रद्धाञ्जलिं समार्पयन् । परम्परामिमामनुसृत्य **श्रीलालबहादुर-शास्त्री-केन्द्रीय-संस्कृत-विद्यापीठस्य त्रैमासिकानुसन्धान-पत्रिकायाः शोध-प्रभायाः**—श्रद्धाञ्जलि-विशेषाङ्केनानेन तस्याः स्मरणरूपेण संस्कृतजगतः श्रद्धापुष्पाञ्जलयोऽर्प्यन्ते ।

इदम्प्रथमतया महानस्मत्प्रधानमन्त्री पण्डितजवाहरलालनेहरूः संस्कृतस्य विकासायाऽऽधारशिलां स्थापयामास । तस्य नेतृत्वे संस्कृतस्य प्रगतिं प्रति भारतसर्वकारो विशेषानुयोज्यः कृतः । संस्कृतायोगस्थापना च कृता यतो वर्तमानविकसित—स्वरूपस्य प्रारम्भः सञ्जातः, तदनन्तरं स्वर्गत—श्रीलालबहादुरशास्त्रिणः पूर्वोद्दिष्टनीत्यनुसारेण दिशयस्यां विशिष्य प्रयतितवन्तः, यैर्दिल्लीनगरेऽस्मिन् **संस्कृतविद्यापीठं** स्थापितम् यस्यान्ताराष्ट्रियस्वरूपं तैः सङ्कल्पितमासीत् । तेषामेव काले प्रदेशान्तरेष्वपि विद्यापीठानां स्थापनार्थं योजनाः कारिताः । यदैवैषां कार्यक्रमाणां प्रारम्भो जातस्तदानीमेव दैवेन ते परलोकं गमिताः । विषयान्तरेष्विव संस्कृत-विकासेऽपि भारोऽयं प्रधानमन्त्रिणं श्रीमतीन्दिरागान्धिमाश्रयत् । शास्त्रिमहाभागानां निधनादूर्ध्वं डा० सम्पूर्णानन्दस्यानुरोधेनाखिलभारतसंस्कृतसम्मेलनस्य, दिल्लीसंस्कृतविद्यापीठस्य च सभापतिपदं श्रीमतीन्दिरागान्धिः स्वीचकार । एतयोः संस्थयोः सा साभिनिवेशाऽऽसीत् । तस्याः परिषदो महामन्त्रित्वकाले कार्यसमित्या अधिवेशनमेकं तस्याः निवासस्थाने समायोजितमासीत् । सम्मयेऽस्मिन् संस्कृतजगतः समानरूपेण तस्या अभिनन्दनाय विशेषाङ्क एकः प्रकाशितः ।

संस्कृत-साहित्यसम्मेलनस्य स्वर्णजयन्तीसमारोहे सा दिल्ली-विद्यापीठं श्रीशास्त्रिणां स्मरणाय समार्पयत् तस्य 'श्रीलालबहादुरशास्त्री-संस्कृतविद्यापीठ'मितिनामकरणं विधाय भारतसर्वकारस्य शिक्षामन्त्रालयाधीन्ये सञ्चालनाय निर्देशश्च कृतः । भाषणसन्दर्भेऽस्मिन् विद्यापीठस्यास्य श्रीशास्त्रिमहोदयानां सङ्कल्पानुसारेणान्ताराष्ट्रियसंस्थारूपेण परिणन्तुमाश्वासनञ्च प्रदत्तम् । निर्णयेनानेन भारतीयजनानां मस्तकाः श्रद्धयाभिभूताः सन्तः प्रणता अभवन् । यतः प्रकारेणैकेन संस्कृतविद्यापीठस्य स्थिरविकासाय तद् भारतसर्वकाराधीनस्थं कृतवती । द्वितीयेन प्रकारेण स्वर्गत-श्रीलालबहादुरशास्त्रिणः प्रति श्रद्धाञ्जलिश्चार्पित आसीत् ।

एतदनन्तरमेवंभूता अनेकेऽवसराः प्राप्ताः, येषु संस्कृतस्य भारतीयसंस्कृतेश्च तस्या अनन्यतम आश्रयः प्राप्तः । तस्या एव कार्यकाले राष्ट्रिय-संस्कृत-संस्थानस्य स्थापना सञ्जाता । संस्कृतविकासाय क्रियमाणासु योजनासु वित्तव्ययतालिकायां सूचितः कतिपयलक्ष-मुद्रापरिमितो राशिः क्रमेण कोटिभिर्मुद्राभिः संवर्धितोऽभूत् । तस्या भाषणैः सन्देशैश्च संस्कृतेन लब्धो महानवलम्बः । संस्कृतजगतः सम्मानमर्पयितुं **वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन** सा वाचस्पति-विरुदेन विभूषिता । तस्याः कार्यकाल एव **'विश्वसंस्कृतसम्मेलन'**स्य स्थापना कृता, यस्याधिवेशनद्वयं देहल्यां वाराणस्यां च सम्पन्नमभूत् । **'अन्ताराष्ट्रिय-प्राच्यविद्या-सम्मेलन'**-मप्यत्र देशे समभूत् तथा विगतस्याक्टोबरमासस्य दशमे दिनाङ्केऽन्ताराष्ट्रियबौद्धसम्मेलनोद्घाटनं विधाय बौद्धविषयेऽपि स्वश्रद्धां प्रकटितवती ।

निजरक्षिणामधिकारिणां प्रतिषेधे सत्यपि सा प्रत्येकं विदुषा सम्भूय तान् सभाजयति स्म । तस्या जीवनधर्मस्य व्यापकरूपस्य देदीप्यमानं स्वरूपमासीत् । भारतीयधार्मिकास्थाभ्यः सा स्वव्यवहारेण मान्यतामदात् । यां कामपि परम्परां प्रत्याश्रितं प्रत्येकं देशस्यास्य तीर्थस्थानमुपासनास्थलं वा सा स्वश्रद्धाभक्तिभ्यामर्चितवती । प्रसिद्धसंन्यासिनां महात्मनाञ्च समक्षं सा स्वयं गत्वा नमाम ।

भारतीयेतिहासे सम्राड्भिर्धार्मिकपरम्पराभ्यो यः सम्मानः प्रदर्शितस्तस्य दृष्टान्तोऽस्यां शताब्द्यां प्रत्यक्षरूपेण तया प्रदर्शितः, येन धार्मिकसांस्कृतिक-क्षेत्रयोः कर्मनिरतानां मठ-मन्दिरदेवस्थानमस्जिद-गुरुद्वारादि-धार्मिक-स्थानानां गौरवमवर्धत तत्रत्य-कर्मकरैर्गरिमा लब्धस्तथा धर्मेणाप्युच्चतमप्रतिष्ठा प्राप्ता । स्व-व्यवहारेण सा तान् सर्वानस्तम्भययद् यैर्धर्मनिरपेक्षताया अर्थो धर्माद् दूरवर्तनमिति घोषितम् ।

श्रीकाञ्ची-श्रीशृङ्गगिरि-शङ्कराचार्ययोरभिनन्दनसमारोहयोस्तां प्रत्युद्गन्तुमवसरो मया लब्धः । प्रतिवर्षं तस्या निवासस्थाने श्रद्धेयश्रीकाञ्चीशङ्कराचार्याणां श्रीचन्द्रशेखरेन्द्रसरस्वतीपादानां जन्मदिनोत्सवस्तद् भक्तै-संस्थाभिश्चानुष्ठीयमान आसीत्, यस्मिन् सा स्वयं भागं गृहीतवती । शृंङ्गगिरि-श्रीअभिनव-विद्यातीर्थस्वामिपादानां स्वर्णजयन्ती-समारोहे सा मुख्यातिथिरासीत् तत्र स्वयमागत्य सा स्वामिपादानां विषये स्वभक्तिमर्पितवती । वर्षद्वयात् पूर्वमपि श्रीशृङ्गगिरिस्वामिनां सान्निध्ये समायोजिते विद्वत्-सदसि सा विद्वद्भ्यो राङ्कव-पुरस्कारादिकं व्यतरत् । यस्य समारोहस्य संयोजनसौभाग्यं मया लब्धमासीत् । एवं प्रकारेण विदुषामादरप्रदर्शने तस्य विशेषरुचिरासीत् । आदरणीय-पण्डित-कमलापतित्रिपाठिमहोदयानामाध्यक्ष्ये स्वगृह आयोजिते समारोहे सा वाराणसेयविद्वत्प्रकाण्डानामाचार्य-श्रीपट्टाभिरामशास्त्रिणामभिनन्दनग्रन्थमुद्घाटच तेभ्यः प्रादात् ।

भारतस्य प्रतिष्ठितबुद्धिजीविभिः सह तस्याः साक्षात् सम्बन्ध आसीत् । विगतवर्षीयनवम्बरमासस्य सप्तमदिनाङ्के सौभाग्यवशान् मया समायोजिते राष्ट्रियस्तरशालिनि बुद्धिजीविसम्मेलने, आध्यक्ष्यं श्रीपट्टाभिरामशास्त्रिभिः कृतं, तस्योद्घाटनं च स्वयं श्रीमत्या इन्दिरागान्धिमहाभागया कृतं, यस्मिन् तया कृतं भाषणमेकमैतिहासिकं लेख्य-पत्रमभवत्, यस्माद्वयं सर्वे बुद्धिजीविनः प्रेरणां प्राप्नुमः । केवलं पञ्चचत्वारिंशद् निमेषपर्यन्तं तस्या निश्चितकालिकः कार्यक्रम आसीद् यत उत्तरत्र तस्यै, नासीदवकाशः । तथाऽपि तान् सर्वान् कार्यक्रमान् विहाय सार्धघण्टाद्वयं यावद् बुद्धिजीविनां कार्यक्रमेऽस्मिन् सा सन्निहिताऽऽसीत् । विद्यायाः कलायाश्चाद्वितीयमभिनन्दनमिदं सञ्जातं यदस्मद्-राष्ट्रस्य महनीयया नायिकया विहितम् ।

इदमस्मद्-दौर्भाग्यं यदस्माभिरनुभूता तया दत्ता च रक्षा तस्या निधनेन क्षयं नीता। मातुर्वात्सल्येन विहीनं राष्ट्रं संवृत्तम्। विशिष्य भारतीय-संस्कृति-संस्कृत-सभ्यता-क्षेत्रेषु कर्म-निरता जना आत्मन आश्रयहीनतयाऽवगच्छन्ति।

एवम्भूतायै तपस्त्यागशौर्यनैपुण्यादिगुणगणमण्डितायै पुण्यनामधेयायै स्वर्गीय-प्रधान-मन्त्रिणे श्रीमती-इन्दिरागान्धि-महाभागायै श्रीलालबहादुरशास्त्री केन्द्रीय-संस्कृतविद्यापीठस्य **'शोध-प्रभा'**-पत्रिकाया श्रद्धाञ्जलिविशेषाङ्कं 'डा० रुद्रदेवत्रिपाठिविरचितेन' 'इन्दिरा-कीर्ति-कौमुदी' नामक-चारु-चरित्रचित्रित-चम्पूकाव्येन समुदञ्चितं, वृद्धस्वच्छन्द-तन्त्रप्रोक्तेन भारत-भाषानुवादयुत-टिप्पण-पञ्चकविजृम्भित-**'श्रीबहुरूपगर्भस्तोत्र'**रत्नेन विभूषितं श्रीमद्बोधानन्द-स्वामि-विरचित-**'विज्ञान-बीज-प्रकाशिका'**ख्य-संस्कृतव्याख्या-डॉ० हरिहरत्रिवेद-विहित-हिन्दी-भावार्थ-संस्कृत-रूपान्तर-समन्वितेन **'साखी-बसन्त-चर्चरी-हिण्डोला-वल्ली-विरहुली-सङ्गतेन 'कबीर-वाणी'**ग्रन्थेन च समुल्लसितम् ऋष्यर्चना-प्रभा-विभासित-नाना-निबन्धबन्धुरं समर्प्यतां प्रति महतीं कृतज्ञतामनु भवामि।

तस्या महाभागाया ईदृशानेव महत आदर्शान् जनं जनं यावत् प्रापयितुं तथा ततः प्रेरणां नीत्वा स्वदेशस्यान्तरङ्ग-परिष्करणदिशि ये प्रयासा विधीयन्ते तेषु नव-दिल्लीस्थ—श्रीलालबहादुर शास्त्रीकेन्द्रीय-संस्कृतविद्यापीठ'स्य शोध-पत्रिकायाः **'शोध-प्रभा'या** विशेषाङ्करूपेण प्रकाशितोऽयं **'श्रीमती-इन्दिरागान्धी-श्रद्धाञ्जलि-विशेषाङ्कः'** सर्वेषां राष्ट्रिवासिनां साहित्योपासकानां च प्रमोदाय सम्पत्स्यते। श्रीमती-इन्दिरागान्धी संस्कृतस्य संस्कृतेश्च विकासाय सदा स्वयं दत्ताव-धानाऽवर्तिष्ट किञ्च सर्वसम्भवैः प्रयासैस्तयोरभ्युत्थाने सहयोगमकार्षीत्। तस्या एव महा-भागाया दूरदर्शित्वस्यायं परिणामोऽस्ति यद् भारतस्य राजधान्यामन्ताराष्ट्रियतया ख्याति प्राप्नुवदिदमुपर्युक्तं विद्यापीठं निर्मितम्, अग्रे प्रवृद्धं तथाऽधुना 'संस्कृत-विश्व-विद्यालय'स्य स्वरूपं प्राप्तुमासन्नकाल एव सन्नद्धमस्ति।

अस्माकमुपराष्ट्रपतयो महामहिम—श्री आर० वेङ्कटरामन्-महोदयाः संस्कृतस्य भारतीय-संस्कृतेश्च शाश्वताः संरक्षकाः सन्ति। देशस्य प्रतिकोणं स्वीयानां यात्राणां तथा विभिन्नानां कार्यक्रमाणां माध्यमेन नैतिक-मूल्यानां देशस्याखण्डतैकतयोः स्थापनायां च तेषां योगदानं प्रेरणाया विषयोऽस्ति। अस्य ग्रन्थस्य प्रस्तावनां विलिख्य तेऽस्माकमिमं विनम्रप्रयासं सुषमया मण्डितमकार्षुस्तदर्थमहं तान् प्रत्याभारी वर्ते। **माननीय-प्रधानमन्त्रि-श्रीराजीवगान्धि-महाभागानां** सन्देशोऽस्मभ्यं स्फूर्तिं प्रायच्छत्, तेषामयं सन्देशोऽस्या वार्तायाः प्रतीकमस्ति, यत् ते मान्यायाः श्रीमतीन्दिरागान्धीमहाभागाया इवैव संस्कृतेः सम्पोषणाय जागरूका वर्तन्ते।

श्रीमतीन्दिरागान्धी-महाभागाया देहावसानात् परं विद्यापीठाय तस्याः पार्थिवदेहस्य निकटे निरन्तरं गीतापाठस्य माध्यमेन प्रत्यक्षं श्रद्धाञ्जलि-समर्पणस्यावसरोऽप्युपलब्ध आसीत्। श्रीराजीवगान्धिमहाभागैः स्वीयेन समग्रेण परिवारेण सह वैदिकेन विधिनैकस्य सुपुत्रस्य रूपेण तस्या (राष्ट्रमातुः) श्रीमतीन्दिरागान्धी-महाभागाया य और्ध्वदैहिकाः संस्कारा आहितास्तैरस्य राष्ट्रस्य तान् प्रति निष्ठायां वृद्धिरभूत् तथा तेषां नेतृत्व आस्था दृढतां प्राप्ताः। मानवसंसाधन-विकासमन्त्रिणः श्रद्धेयाः श्री वी० पी० नरसिंहमहानुभावाः, शिक्षासंस्कृति-राज्यमन्त्रिपदासीना आदरणीयाः **श्रीमती सुशीला रोहतगी**-महाभागास्तथाऽन्ये मान्या नेतारो मनीषिणश्च विशेषा ङ्कस्यास्य पूर्णतायै यं सहयोगमदुस्तदर्थं महमाभारं प्रकटयामि। **—डॉ० मण्डनमिश्रः**

मूलत एकस्या एव गङ्गाया धारायां विविधानि रूपाणि सन्ति किञ्चान्ततो गत्वा स्वीया आपस्त्वयैव (समुद्रेण) मेलयन्ति, तथैव विविधा भाषा जातयो धर्मा दर्शनान्युपासना-पद्धतयश्चैकस्यैव राष्ट्रस्य चेतनाया विभिन्नधाराः सन्ति तथैताः सर्वा एकेनैव विराजा ब्रह्मणा मेलयन्ति।

अस्माकं देशस्येमां संस्कृतिं सर्वात्मना रक्षितुकामा श्रीमती-इन्दिरागान्धी-महाभागा देशस्यास्याः समरसतायाः समानाया आस्थायास्तथा भावनात्मकैकतायाः साक्षात् प्रतिमूर्तिरासीत्। साधवो महापुरुषा भवन्तु नाम कस्या अपि जातेर्धर्मस्य वा, तान् प्रति श्रद्धाया आदरस्यैकरूपताया निदर्शनं तस्यां महाभागायां नितान्तं व्यराजत्। सा हि त्यागिनां तपस्विनां चरित्राणि वचनानि चैकं स्थायिनं सांस्कृतिकं निधिममन्यत। कला हि वैदिकस्यं पौराणिकस्य वा युगस्यास्तु, गुप्तकालिकी भवत्वथवा जैन-बुद्धयुगयोर्भवतु किंवा मुस्लिमकलाकाराणामेवावदानमस्तु सर्वासां सुरक्षायै समृद्धये च सा सर्वदा प्रायतत। पुरातत्त्वानि प्रति तस्या अगाधाऽऽस्था स्वाभाविक्यवर्तत। ईदृशानामेव गुणानां कारणात् समग्रमपि राष्ट्रं तां महाभागामात्मनः प्रतिनिधिं तथा सर्वस्वममानयत्।

प्राचीन-दार्शनिक-चिन्तने तथा भाषाविज्ञानेऽस्य देशस्य ख्यातिस्तु सर्वत्रास्त्येव, परन्त्वस्य प्राचीनं युगं खगोल-विज्ञानेऽपि समृद्धमासीद्। इदं सूचयितुं तया महाभागया नभसि विसृष्टस्य नवीनस्योपग्रहस्याभिधानं खगोल-विज्ञानस्य मनीषिणो नाम्ना 'आर्यभट' इति घोषितम्। इयं तस्याः प्राचीनतां प्रत्यास्थायास्तथा तया सहैव नवीनचिन्तनं संयोज्यं द्रष्टुं वाञ्छैव त्वासीत्।

सर्वासां भाषाणां साहित्यस्य विदुषाञ्च समानभावेन समादरस्तदीयः स्वभाव एव सम्पन्नोऽभूत्। राष्ट्रिय-पुरस्कार-वितरणस्य सूची तस्य प्रमाणमस्ति। स्वर्गीय-प्रधान-मन्त्रि-श्रीमतीन्दिरागान्धी-महाभागाया ईदृश्या प्राचीन-नवीनयोः समन्वयप्रवृत्त्यैवात्रत्याय सांस्कृतिकनिधये कला-साहित्य-योगक्षेमाः (उपलब्धस्य सुरक्षार्थमनुपलब्धस्य च गवेषणायै) सर्वतोमुखा अवसराः प्राप्ताः। तदीयाभिरुदारता-दूरदृष्टि-समरसता-विविधतायामेकतानां प्रवृत्तिभिरेवास्य देशस्य जनतां महात्मगान्धिभिः प्रदर्शिते पथ्यग्रेसरी विधायैका राष्ट्रहितोन्मुखी व्यधीयत। इदमेव कारणमस्ति यत्तदीये कार्यकाले प्रत्येकं व्यक्त्या वर्गेण च सम्भूय कर्म विहितम्। खाद्यस्य प्रसङ्गे राष्ट्रमात्मनिर्भरमभूत्, विदेशिमुद्राणामभूतपूर्वो लाभः समजायत, नव-नवा आविष्काराः सम्पन्नास्तथा राष्ट्राय समस्ते विश्वे समादरः प्राप्तः। साऽऽसीत्-**'सत्यमेव जयते'**-'श्रम एव जयते'-इत्यनयोः साक्षात् प्रतिमा।

अस्याः कार्यसिद्धेर्मूले तस्या महाभागाया तदीयो मानवतावादी दृष्टिकोणो विद्यते यं सा स्वस्या वंशपरम्पराया अत्रत्याद् वाङ्मयात् तथा शान्तिनिकेतने श्रीरवीन्द्रनाथटैगोरमहानुभावैः प्रतिष्ठापिताद् वातावरणाल्लब्धासीत्। स्वर्गीया श्रीमती गान्धी—**न जातु कामान्न भयान्न लोभाद् धर्मं त्यजेज्जीवितस्यापि हेतोः'** इति व्यासवचनं स्वीये जीवनेऽवतार्य यथा राजधर्मं निर्व्यूढवती तादृशमुदाहरणमन्यत्र दुर्लभम्।

स्वर्गीयायाः प्रधानमन्त्रि-श्रीमतीन्दिरागान्धीमहाभागाया इममेवैकं सांस्कृतिकं पक्षं—यो हि राष्ट्रियताया मूलाधारो वर्तते, प्रत्येकं जनस्य मनसि पूरणायायं लघु-प्रयासोऽस्ति विहितः। ईदृशस्य गुणस्य प्रकाशनमध्ययनं मननं परिशीलनं तदनुकूलाचरणस्य निर्माणमेवैतस्य राष्ट्रस्य

सुरक्षाया-समृद्धेश्चैकमात्रमुपायो भवितुमर्हति । "नान्यः पन्था विद्यतेऽयनाय।"

भारतप्रधानमन्त्रिणः स्वर्गीयायाः श्रीमत्याः इन्दिरागान्धीमहाभागायाः सम्बन्धः भारतीयसंस्कृत्या कलया सभ्यतया सह अतिमधुरः संरक्षणात्मकश्चासीत् । महतः पितुः सन्तानत्वात् तस्या जीवने भारतीयतायाः प्रभावोऽविच्छिन्न आसीत् । विशिष्य प्रधानमन्त्रिपदप्राप्त्यनन्तरं यथैव विश्वस्मिन् तस्याः सम्मानोऽवर्धत तथा भारतीयतायाः संरक्षणे तस्याः प्रयासोऽनुदिनं दृढोऽभवत् । सैकाऽऽसीन् महनीया प्रधानमन्त्री याऽस्मै राष्ट्राय गतिर्शलं नेतृत्वमदात् । उच्चतमवैज्ञानिकोपलब्धयः विशालतमौद्योगिकविकासेन साकं नैतिकाध्यात्मिक-सूक्ष्मतमपरिणतिश्च विश्वेनानेन तस्याः प्रत्येकं निर्णये दृष्टा आसन् । स्वविचारेषु साऽऽधुनिकी वैज्ञानिकी तथा पूर्णहृदयेनाध्यात्मिकी चासीत् । तादृशी राजनीतिकी नेत्री सा या सर्वथाऽस्य राष्ट्रस्य कृते दत्तचित्ताऽऽसीत् । कारणेनानेन तस्या जीवनं राष्ट्रस्यास्यामूल्यनिधिरभवत् । भारतस्य समृद्धिरखण्डता च तस्या जीवनसर्वस्वमास्ताम् । त्यागेन बलिदानेन राष्ट्रसेवया च तस्या जीवनमध्यात्मसत्त्वस्य प्रतीकं सञ्जातम् । शनैः शनैरेतेषां गुणानां समन्वयस्तां राष्ट्रमातृरूपेण विकासयामास । तस्या निधनानन्तरं रूपमेतन् मनसि निधाय भारतीयजना हृदयपूर्णं श्रद्धाञ्जलिं समार्पयन् । परम्परामिमामनुसृत्य **श्रीलालबहादुर-शास्त्री-केन्द्रीय-संस्कृत-विद्यापीठस्य त्रैमासिकानुसन्धान-पत्रिकायाः शोध-प्रभायाः**—श्रद्धाञ्जलि-विशेषाङ्केनानेन तस्याः स्मरणरूपेण संस्कृतजगतः श्रद्धापुष्पाञ्जलयोऽर्प्यन्ते ।

इदम्प्रथमतया महानस्मत्प्रधानमन्त्री पण्डितजवाहरलालनेहरूः संस्कृतस्य विकासायाऽऽधारशिलां स्थापयामास । तस्य नेतृत्वे संस्कृतस्य प्रगतिं प्रति भारतसर्वकारो विशेषानुयोज्यः कृतः । संस्कृतायोगस्थापना च कृता यतो वर्तमानविकसित—स्वरूपस्य प्रारम्भः सञ्जातः, तदनन्तरं स्वर्गत—श्रीलालबहादुरशास्त्रिणः पूर्वोद्दिष्टनीत्यनुसारेण दिश्यस्यां विशिष्य प्रयतितवन्तः, यैर्दिल्लीनगरेऽस्मिन् **संस्कृतविद्यापीठं** स्थापितम् यस्यान्ताराष्ट्रियस्वरूपं तैः सङ्कल्पितमासीत् । तेषामेव काले प्रदेशान्तरेष्वपि विद्यापीठानां स्थापनार्थं योजनाः कारिताः । यदैवैषां कार्यक्रमाणां प्रारम्भो जातस्तदानीमेव दैवेन ते परलोकं गमिताः । विषयान्तरेष्विव संस्कृत-विकासेऽपि भारोऽयं प्रधानमन्त्रिणं श्रीमतीन्दिरागान्धिमाश्रयत् । शास्त्रिमहाभागानां निधनादूर्ध्वं डा० सम्पूर्णानन्दस्यानुरोधेनाखिलभारतसंस्कृतसम्मेलनस्य, दिल्लीसंस्कृतविद्यापीठस्य च सभापतिपदं श्रीमतीन्दिरागान्धिः स्वीचकार । एतयोः संस्थयोः सा साभिनिवेशाऽऽसीत् । तस्याः परिषदो महामन्त्रित्वकाले कार्यसमित्या अधिवेशनमेकं तस्याः निवासस्थाने समायोजितमासीत् । सम्मयेऽस्मिन् संस्कृतजगतः समानरूपेण तस्या अभिनन्दनाय विशेषाङ्क एकः प्रकाशितः ।

संस्कृत-साहित्यसम्मेलनस्य स्वर्णजयन्तीसमारोहे सा दिल्ली-विद्यापीठं श्रीशास्त्रिणां स्मरणाय समार्पयत् तस्य 'श्रीलालबहादुरशास्त्री-संस्कृतविद्यापीठ'मितिनामकरणं विधाय भारतसर्वकारस्य शिक्षामन्त्रालयाधीन्ये सञ्चालनाय निर्देशश्च कृतः । भाषणसन्दर्भेऽस्मिन् विद्यापीठस्यास्य श्रीशास्त्रिमहोदयानां सङ्कल्पानुसारेणान्ताराष्ट्रियसंस्थारूपेण परिणन्तुमाश्वासनञ्च प्रदत्तम् । निर्णयेनानेन भारतीयजनानां मस्तकाः श्रद्धयाभिभूताः सन्तः प्रणता अभवन् । यतः प्रकारेणैकेन संस्कृतविद्यापीठस्य स्थिरविकासाय तद् भारतसर्वकाराधीनस्थं कृतवती । द्वितीयेन प्रकारेण स्वर्गत-श्रीलालबहादुरशास्त्रिणः प्रति श्रद्धाञ्जलिश्चार्पित आसीत् ।

एतदनन्तरमेवम्भूता अनेकेऽवसराः प्राप्ताः, येषु संस्कृतस्य भारतीयसंस्कृतेश्च तस्या अनन्यतम आश्रयः प्राप्तः । तस्या एव कार्यकाले राष्ट्रिय-संस्कृत-संस्थानस्य स्थापना सञ्जाता । संस्कृतविकासाय क्रियमाणासु योजनासु वित्तव्ययतालिकायां सूचितः कतिपयलक्ष-मुद्रापरिमितो राशिः क्रमेण कोटिभिर्मुद्राभिः संवर्धितोऽभूत् । तस्या भाषणैः सन्देशैश्च संस्कृतेन लब्धो महानवलम्बः । संस्कृतजगतः सम्मानमर्पयितुं **वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन** सा वाचस्पति-विरुदेन विभूषिता । तस्याः कार्यकाल एव **'विश्वसंस्कृतसम्मेलन'**स्य स्थापना कृता, यस्याधिवेशनद्वयं देहल्यां वाराणस्यां च सम्पन्नमभूत् । **'अन्ताराष्ट्रिय-प्राच्यविद्या-सम्मेलन'**-मप्यत्र देशे समभूत् तथा विगतस्याक्टोबरमासस्य दशमे दिनाङ्केऽन्ताराष्ट्रियबौद्धसम्मेलनोद्घाटनं विधाय बौद्धविषयेऽपि स्वश्रद्धां प्रकटितवती ।

निजरक्षिणामधिकारिणां प्रतिषेधे सत्यपि सा प्रत्येकं विदुषा सम्भूय तान् सभाजयति स्म । तस्या जीवनधर्मस्य व्यापकरूपस्य देदीप्यमानं स्वरूपमासीत् । भारतीयधार्मिकास्थाभ्यः सा स्वव्यवहारेण मान्यतामदात् । यां कामपि परम्परां प्रत्याश्रितं प्रत्येकं देशस्यास्य तीर्थस्थानमुपासनास्थलं वा सा स्वश्रद्धाभक्तिभ्यामर्चितवती । प्रसिद्धसंन्यासिनां महात्मनाञ्च समक्षं सा स्वयं गत्वा ननाम ।

भारतीयेतिहासे सम्राड्भिर्धार्मिकपरम्पराभ्यो यः सम्मानः प्रदर्शितस्तस्य दृष्टान्तोऽस्यां शताब्द्यां प्रत्यक्षरूपेण तया प्रदर्शितः, येन धार्मिकसांस्कृतिक-क्षेत्रयोः कर्मनिरतानां मठ-मन्दिरदेवस्थानमस्जिद-गुरुद्वारादि-धार्मिक-स्थानानां गौरवमवर्धत तत्रत्य-कर्मकरैर्गरिमा लब्धस्तथा धर्मेणाप्युच्चतमप्रतिष्ठा प्राप्ता । स्व-व्यवहारेण सा तान् सर्वानस्तम्भयद् यैर्धर्मनिरपेक्षताया अर्थो धर्माद् दूरवर्तनमिति घोषितम् ।

श्रीकाञ्ची-श्रीशृङ्गगिरि-शङ्कराचार्ययोरभिनन्दनसमारोहयोस्तां प्रत्युद्गन्तुमवसरो मया लब्धः । प्रतिवर्षं तस्या निवासस्थाने श्रद्धेयश्रीकाञ्चीशङ्कराचार्याणां श्रीचन्द्रशेखरेन्द्रसरस्वतीपादानां जन्मदिनोत्सवस्तद् भक्तै-संस्थाभिश्चानुष्ठीयमान आसीत् यस्मिन् सा स्वयं भागं गृहीतवती । शृङ्गगिरि-श्रीअभिनव-विद्यातीर्थस्वामिपादानां स्वर्णजयन्ती-समारोहे सा मुख्यातिथिरासीत् तत्र स्वयमागत्य सा स्वामिपादानां विषये स्वभक्तिमर्पितवती । वर्षद्वयात् पूर्वमपि श्रीशृङ्गगिरिस्वामिनां सान्निध्ये समायोजिते विद्वत्-सदसि सा विद्वद्भ्यो राङ्कव-पुरस्कारादिकं व्यतरत् । यस्य समारोहस्य संयोजनसौभाग्यं मया लब्धमासीत् । एवं प्रकारेण विदुषामादरप्रदर्शने तस्य विशेषरुचिरासीत् । आदरणीय-पण्डित-कमलापतित्रिपाठिमहोदयानामाध्यक्ष्ये स्वगृह आयोजिते समारोहे सा वाराणसेयविद्वत्प्रकाण्डानामाचार्य-श्रीपट्टाभिरामशास्त्रिणामभिनन्दनग्रन्थमुद्घाटय तेभ्यः प्रादात् ।

भारतस्य प्रतिष्ठितबुद्धिजीविभिः सह तस्याः साक्षात् सम्बन्ध आसीत् । विगतवर्षीयनवम्बरमासस्य सप्तमदिनाङ्के सौभाग्यवशान् मया समायोजिते राष्ट्रियस्तरशालिनि बुद्धिजीविसम्मेलने, आध्यक्ष्यं श्रीपट्टाभिरामशास्त्रिभिः कृतं, तस्योद्घाटनं च स्वयं श्रीमत्या इन्दिरागान्धिमहाभागया कृतं, यस्मिन् तया कृतं भाषणमेकमैतिहासिकं लेख्य-पत्रमभवत्, यस्माद्वयं सर्वे बुद्धिजीविनः प्रेरणां प्राप्नुमः । केवलं पञ्चचत्वारिंशद् निमेषपर्यन्तं तस्या निश्चितकालिकः कार्यक्रम आसीद् यत उत्तरत्र तस्यैं, नासीदवकाशः । तथाऽपि तान् सर्वान् कार्यक्रमान् विहाय सार्धघण्टाद्वयं यावद् बुद्धिजीविनां कार्यक्रमेऽस्मिन् सा सन्निहिताऽऽसीत् । विद्यायाः कलायाश्चाद्वितीयमभिनन्दनमिदं सञ्जातं यदस्मद्-राष्ट्रस्य महनीयया नायिकया विहितम् ।

इदमस्मद्-दौर्भाग्यं यदस्माभिरनुभूता तया दत्ता च रक्षा तस्या निधनेन क्षयं नीता। मातुर्वात्सल्येन विहीनं राष्ट्रं संवृत्तम्। विशिष्य भारतीय-संस्कृति-संस्कृत-सभ्यता-क्षेत्रेषु कर्मनिरता जना आत्मन आश्रयहीनतयाऽवगच्छन्ति।

एवम्भूतायै तपस्त्यागशौर्यनैपुण्यादिगुणगणमण्डितायै पुण्यनामधेयायै स्वर्गीय-प्रधानमन्त्रिणे श्रीमती-इन्दिरागान्धि-महाभागायै श्रीलालबहादुरशास्त्री केन्द्रीय-संस्कृतविद्यापीठस्य **'शोध-प्रभा'**-पत्रिकाया श्रद्धाञ्जलिविशेषाङ्कं 'डा० रुद्रदेवत्रिपाठिविरचितेन' 'इन्दिरा-कीर्ति-कौमुदी' नामक-चारु-चरित्रचित्रित-चम्पूकाव्येन समुदञ्चितं, वृद्धस्वच्छन्द-तन्त्रप्रोक्तेन भारत-भाषानुवादयुत-टिप्पण-पञ्चकविजृम्भित-**'श्रीबहुरूपगर्भस्तोत्र'**रत्नेन विभूषितं **श्रीमद्बोधानन्द-स्वामि**-विरचित-'विज्ञान-बीज-प्रकाशिका'ख्य-संस्कृतव्याख्या-डॉ० **हरिहरत्रिवेद**-विहित-हिन्दी-भावार्थ-संस्कृत - रूपान्तर-समन्वितेन **'साखी-बसन्त-चर्चरी-हिण्डोला-वल्ली-विरहुली-सङ्गतेन 'कबीर-वाणी'**ग्रन्थेन च समुल्लसितम् ऋष्यर्चना-प्रभा-विभासित-नाना-निबन्धबन्धुरं समर्प्यतां प्रति महतीं कृतज्ञतामनु भवामि।

तस्या महाभागाया ईदृशानेव महत आदर्शान् जनं जनं यावत् प्रापयितुं तथा ततः प्रेरणां नीत्वा स्वदेशस्यान्तरङ्ग-परिष्करणदिशि ये प्रयासा विधीयन्ते तेषु नव-दिल्लीस्थ—श्रीलालबहादुर शास्त्रीकेन्द्रीय-संस्कृतविद्यापीठ'स्य शोध-पत्रिकायाः **'शोध-प्रभा'**या विशेषाङ्करूपेण प्रकाशितोऽयं **'श्रीमती-इन्दिरागान्धी-श्रद्धाञ्जलि-विशेषाङ्कः'** सर्वेषां राष्ट्रिवासिनां साहित्योपासकानां च प्रमोदाय सम्पत्स्यते। श्रीमती-इन्दिरागान्धी संस्कृतस्य संस्कृतेश्च विकासाय सदा स्वयं दत्ताव-धानाऽवतिष्ट किञ्च सर्वसम्भवैः प्रयासैस्तयोरभ्युत्थाने सहयोगमकार्षीत्। तस्या एव महा-भागाया दूरदर्शित्वस्यायं परिणामोऽस्ति यद् भारतस्य राजधान्यामन्ताराष्ट्रियतया ख्याति प्राप्नुवदिदमुपर्युक्तं विद्यापीठं निर्मितम्, अग्रे प्रवृद्धं तथाऽधुना 'संस्कृत-विश्व-विद्यालय'स्य स्वरूपं प्राप्तुमासन्नकाल एव सन्नद्धमस्ति।

अस्माकमुपराष्ट्रपतयो महामहिम—श्री आर० वेङ्कटरामन्-महोदयाः संस्कृतस्य भारतीय-संस्कृतेश्च शाश्वताः संरक्षकाः सन्ति। देशस्य प्रतिकोणं स्वीयानां यात्राणां तथा विभिन्नानां कार्यक्रमाणां माध्यमेन नैतिक-मूल्यानां देशस्याखण्डतैकतयोः स्थापनायां च तेषां योगदानं प्रेरणाया विषयोऽस्ति। अस्य ग्रन्थस्य प्रस्तावनां विलिख्य तेऽस्माकमिमं विनम्रप्रयासं सुषमया मण्डितमकार्षुस्तदर्थमहं तान् प्रत्याभारी वर्ते। **माननीय-प्रधानमन्त्रि-श्रीराजीवगान्धि-महाभागानां** सन्देशोऽस्मभ्यं स्फूर्तिं प्रायच्छत्, तेषामयं सन्देशोऽस्या वार्तायाः प्रतीकमस्ति, यत् ते मान्यायाः श्रीमतीन्दिरागान्धीमहाभागाया इवैव संस्कृतेः सम्पोषणाय जागरूका वर्तन्ते।

श्रीमतीन्दिरागान्धी-महाभागाया देहावसानात् परं विद्यापीठाय तस्याः पार्थिवदेहस्य निकटे निरन्तरं गीतापाठस्य माध्यमेन प्रत्यक्षं श्रद्धाञ्जलि-समर्पणस्यावसरोऽप्युपलब्ध आसीत्। श्रीराजीवगान्धिमहाभागैः स्वीयेन समग्रेण परिवारेण सह वैदिकेन विधिनैकस्य सुपुत्रस्य रूपेण तस्या (राष्ट्रमातुः) श्रीमतीन्दिरागान्धी-महाभागाया य और्ध्वदैहिकाः संस्कारा आहितास्तैरस्य राष्ट्रस्य तान् प्रति निष्ठायां वृद्धिरभूत् तथा तेषां नेतृत्व आस्था दृढतां प्राप्ताः। मानवसंसाधन-विकासमन्त्रिणः श्रद्धेयाः **श्री वी० पी० नरसिंहमहानुभावाः**, शिक्षासंस्कृति-राज्यमन्त्रिपदासीना आदरणीयाः **श्रीमती सुशीला रोहतगी**-महाभागास्तथाऽन्ये मान्या नेतारो मनीषिणश्च विशेषाङ्कस्यास्य पूर्णतायै यं सहयोगमदुस्तदर्थं महमाभारं प्रकटयामि।

—डॉ० मण्डनमिश्रः

विमर्श-वेदिका

—सम्पादकीया

"राष्ट्रकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रेणैवास्मै राष्ट्रमवरुन्धे राष्ट्रमेव भवत्यात्मने होतव्या, राष्ट्रं वै राष्ट्रभृतो राष्ट्रं प्रजा राष्ट्रं पशवो राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमवरुन्धे वसिष्ठः समानानां भवति, ग्रामकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रं सञ्जाता राष्ट्रेणैवास्मै राष्ट्रं सञ्जातानवरुन्धे ग्राम्ये ।।"

(तैत्तिरीय०, काण्ड०३, प्र०४, अनु० ८-९)

भगवत्याः श्रुतेरयं राष्ट्रिय उद्घोषो राष्ट्रं प्रति सर्वानपि मानवान् सञ्जीवनमन्त्ररूपेण निष्ठायै प्रेरयति कर्तव्यं प्रत्युत्साहयति, राष्ट्रियैर्विचारनिचयैरन्तरङ्गं रञ्जयति काम्यभिनवां स्फूर्तिमुद्भावयति च। प्राचीना महर्षयोऽहर्निशं यानि पुण्यानि कर्माणि साधयन्ति स्म तानि केनापि स्वार्थेन सङ्कुलितानि नाभूवन्, ते तु राष्ट्रायैव यज्ञ-दान-तपः-स्वाध्यायेज्योपासनादीनि सर्वाणि संसाध्य समर्पयन्ति स्म। 'वसुधैव कुटुम्बक'मित्युद्घोषं को न वेत्ति? 'यत्र विश्वं भवत्येकनीड'मिति वा को न जानाति? एतादृश्येव वचनानि राष्ट्रियता-सम्पोषणाय भवन्ति सम्बल-प्रदायीनि।

भारतीया राष्ट्रियताऽन्येभ्यो राष्ट्रेभ्यः स्वीयां कामपि विशिष्टतां बिभर्ति सा च संस्कृति संवलतिता विद्यते। भारतीया संस्कृतिर्विश्ववारा संस्कृतिरस्ति। अत एव संस्कृतौ संस्कारा-आचारा विचाराश्च सम्भूय विकसिता भवन्ति। उदात्तानादर्शान् संस्कृतिरेव निर्दिशति, सत्याहिंसासहिष्णुतालोककल्याणनिष्ठाकर्तव्यभावनाप्रभृतय आदर्शाः प्राणिमात्रं प्राणवद् विदधति। सैव प्राणवत्ता रक्तधारेव नाडीषु प्रवहन्ती मानवं च राष्ट्रियं कुरुते। तदैव **'राजत इति राष्ट्र'**मिति व्युत्पत्तिः साधीयसी भवति।

यदाऽस्माकं देशो वैदेशिकानां यवनानामाङ्लानां चाक्रमणैः कूटनीत्या च दासतापाशे निबद्धस्तदाप्रभृत्येव भयाक्रान्ता भारतीया राष्ट्रियत्वभावनावन्तोऽपि कालं प्रतीक्षमाणा आसन्। न हि सर्वः समयः सर्वदा समानस्तिष्ठति, परिवर्तत एव कालचक्रम्। अत एवात्रापि वैदेशिकानामुत्पीडनान्यसहमाना भारतीया भूयोऽपि जागरिताः। कर्तव्ये पथि निर्भयं प्रचलिताः। स्वातन्त्र्यप्राप्तये यो हि महान् सङ्घर्ष आहितः, यानि महान्ति बलिदानानि कृतानि, याश्च विपत्तयः सोढाः, यावतीनां सम्पत्तीनां विनाशो दृष्टस्तत्सर्वं राष्ट्रियतायाः पुनःप्रबोधनस्यैव फलमभूत्। तदानीं संस्कृती राजनीतिश्च परस्परं समाने अभूताम्। एकदा श्रीमतीन्दिरागान्धीमहाभागाऽप्येवं स्वीयाभिमतं प्राकाशयत्—

"मम विचारे राजनीतिः संस्कृतिश्च पृथक् पृथङ् न स्तः। अहं मन्ये, यदस्माकं दैनिके जीवने दैनिकानां कार्याणां प्रत्येकं कोणं संस्कृतेरङ्केन भूषितं भवेत्, इदं च तदैव सम्भाव्यते यदा वयं तां यथेच्छं त्रोटयितुं योजयितुं वा न प्रभवेम, न चेदं कथयितुं शक्यते यद् नववादनात् पञ्च-

वादनं यावत् कार्यं ततः परं पञ्चवादनान्नववादनं यावत् संस्कृतिरिति । **"संस्कृतिस्तु जीवनस्यैका पद्धतिर्विद्यते जीवनं प्रत्येको दृष्टिकोणो विद्यते ।"**[१]

यदा राजनीतिः संस्कृत्या साम्यं भजन्ती प्रवर्तते तदा सा महनीयतां प्राप्नोति । यथा संस्कृतिः सर्वैरपि समादरणीया भवति तथैव राजनीतिरपि समादरार्हा भवति । इत्थं राजनीतौ सांस्कृतिके पावित्र्ये सति सा सर्वैरपि स्वीक्रियते, तस्यां जनता विश्वसिति । श्रीमती गान्धी तादृशं राजनीतिकं पावित्र्यं कामयमाना सर्वत्र सर्वदा व्यवहरति स्म ।

तस्या अन्तरङ्गं सदा सत्येन राजनीतौ वर्तनस्य सिद्धान्तं प्रकाश्य सामयिकान् तथाविधं व्यवहारं कर्तुं प्रेरयति स्म । भारतस्य राजनीतिके तथा सामाजिके स्वरूपे क्रान्तिपूर्णं परिवर्तनमानेतुं काङ्ग्रेसदलेन भारतीयपृष्ठभूमौ समाजवादस्य दर्शनं दत्त्वा नवीनः पन्था दर्शितः। तमेव पन्थानं परिष्कृत्य पुरो वर्धनाय येषां साधनानामावश्यकता आसँस्तासां व्यवस्थितया पद्धत्योपलब्धये शासनपक्षतः सर्वा व्यवस्थाः श्रीमत्या प्रधानमन्त्रिमहाभागया सम्पादिताः । तत एव क्रमेण देशः प्रगतिमकरोत् । अद्यापि तस्या एव प्रयासात् प्रवर्तितानां कार्यकलापानां सम्पादनेनास्माकं देशः सर्वत्र समुचितं सम्मानं प्राप्नोत्येव । श्रीमतीन्दिरागान्धी महाभागा लोकतन्त्रस्यास्तित्वं न्यायतन्त्रे निर्भरं मत्वा तस्य सौलभ्याय संविधानेऽपि संशोधनानि कारयितुं सङ्कोचं नान्वभूत् । किञ्च धैर्य-साहस-मनोयोग-तन्मयत्वात्मविश्वास-सुदृढ-पुरुषार्थैर्भारतस्य नेतृत्वं साधयन्ती स्वर्गीया प्रधानमन्त्रि-श्रीमतीन्दिरागान्धी वस्तुतो भारतीय-राजनीतेर्महत्युपलब्धिरासीत् । स्वस्यान्तरात्मन आह्वानमनुसरन्ती सा सत्यं, सामाजिकं न्यायं, प्रजातन्त्रं, समाजवादं, धर्मनिरपेक्षतां श्रमञ्च स्वकीय-जीवनस्य ध्येयं निरचिनोत् । महाभागायास्तस्या जीवन-दर्शनं प्राच्यावाच्योः संस्कृत्योः सङ्गमवदभवत् तत्रापि च यत् स्वच्छं जन-मङ्गलकारि विश्वशान्तिविधायि तथा भारतीयसंस्कृतेरादर्शानुरूपं ग्राह्यमासीत् तदेव सांस्कृतिकं सार-सर्वस्वं साऽगृह्णात् ।

महात्मनां श्रीगान्धिनां पं० जवाहरलालनेहरूणां तथा गुरुदेव-श्रीरवीन्द्रनाथटैगोरमहाभागानां प्रभावैः परिष्कृतं श्रीमतीन्दिरागान्धीमहाभागाया व्यक्तित्वं भारतस्य सांस्कृतिकसूर्यस्य देदीप्यमानेन प्रकाशेनोद्योतितं सर्वतो विसारि प्रभावकारि चावर्तत । भारतस्याध्यात्मिकतायास्तथा पाश्चात्यानां यथार्थवादस्य समन्वयं कामायमाना सा तद्द्वयमपि साम्प्रतिकाय युगायावश्यकं मनुते स्म, यतो हि—'भारतीयाध्यात्मिकता मानवस्य वैयक्तिकप्रयासेभ्य उत्साहदात्री तथा पाश्चात्यो यथार्थवादो मानवस्यार्थिक-सामाजिक-राजनीतिकोन्नतिकरोऽस्तीति ।'

श्रीमतीन्दिरागान्धी महाभागा साम्प्रतमस्माकं मध्ये वर्तमाना नास्ति परं तस्याः श्रेयांसि कर्माणि मङ्गलानि प्रस्थानानि चात्र चिरं जीवितानि विद्यन्तेऽस्मांश्च तानि निरतं प्रेरयन्ति । संस्कृतभाषां प्रति स्नेहं धारयन्ती सा श्रीलालबहादुरशास्त्रिणां दिवः प्रस्थानानन्तरं भारतस्य प्रधानमन्त्रिपदममण्डयत्, तदाप्रभृत्येवाखिल-भारतीयसंस्कृतसाहित्य-सम्मेलनस्याध्यक्ष्यमन्यासां बह्वीनां संस्थानां सम्मेलनानामाध्यक्ष्याणि च सम्पाद्य स्वीयं संस्कृतानुरागं प्राचीकटत् । 'श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठं' च तस्या एव महाभागायाः संस्कृतं प्रत्यनुरागस्य फलमस्ति । विद्यापीठस्याधिग्रहणे तथा श्रीलालबहादुरशास्त्रिणां नाम्ना तस्य प्रख्यापनेऽपि सैव महाभागा श्रेयस्वती समपद्यत । तस्याः स्वःप्रस्थानोत्तरं प्रथमे वार्षिकश्राद्धे विद्यापीठपक्षतः श्रद्धाञ्जलिमर्प-

यितुं विहितविचाराः श्रीमन्तः **प्राचार्या डॉ० मण्डनमिश्रमहाभागा** अनुसन्धान-विभागात्-प्रवर्तमानायास्त्रैमासिकानुसन्धान-पत्रिकायाः 'शोध-प्रभायाः' **श्रद्धाञ्जलि-विशेषाङ्कं** प्रकाशयितुं निरचैषुः । तस्मिश्च पूर्वविशेषाङ्कवदेव मान्यायाः स्व० श्रीमतीन्दिरागान्धीमहाभागायाश्चरित्रकाव्यनिर्माणायापि मां प्रैरयन् । अहं च सेवा-निवृत्तिकालस्य नैकटयाद् दोलायितमस्तिष्कोऽपि महनीयं कार्यमिदं सपरिश्रमं विधायात्मनः साहित्यिक-श्रद्धाञ्जलिरूपं श्रीमतीन्दिरागान्धी-महाभागाया उदात्तं मुख्यत्वेन सांस्कृतिकं स्वाधीनता-सङ्ग्रामस्य पूर्वापरेतिवृत्ताभ्याञ्च समञ्चितं चरित्रं पूर्वनिर्मित **'श्रीराजेन्द्र-चन्द्रोदय-चम्पू'**वदेव निर्मिमित्सया सन्नद्धोऽभवम् । भवन्त्येव विघ्न-बहुलानि श्रेयांसि कर्माणि । तथैव बाह्या आभ्यन्तराश्च विघ्ना अव्यथयन्त एव । सत्यामपि बहुशो हताशायां भगवत्या इष्टदेवताया अनुकम्पया पूरितमेवेदम्—**"इन्दिरा-कीर्ति-कौमुदी"** नामकं चम्पूकाव्यम् । तदनुसारमेवायमङ्कः क्रमेण-**इन्दिराकीर्तिकौमुदी-विचारालोक-श्रद्धालोक-ऋष्यर्चनालोक-ग्रन्थलोक**'-नामक-विभाग-पञ्चकैः सञ्चितः **'श्रीमती-इन्दिरागान्धी-श्रद्धाञ्जलि-विशेषाङ्क'** इत्याख्यया प्रकाश्यते ।

अस्य सम्पादने सामग्री-सङ्कलन-चित्र-प्रतिकृति-सङ्ग्रहण-मुद्रण-प्रकाशन-कर्मसु च मामकीनं साहाय्यं विदधानाः-डॉ० **श्रीमती-जयजैन**महाभागा (प्रवाचिका—प्रशिक्षणविभागस्य), **डॉ० अमिता-शर्म**-महाभागा (व्याख्यात्री-शोधविभागस्य), डॉ० **देवदत्तशर्म**-महाभागः (व्याख्याता—शोधविभागस्य) तथा **श्रीमदनमोहनसती** (शोधप्रकाशनविभागस्य प्रकाशन-विक्रय-सहायकः) सर्वात्मना मामन्वगृह्णन्नित्येतेभ्यः सर्वेभ्यो हार्दिकमाभारमभिव्यज्य धन्यवादैः सभाजयामि ।

पुनश्च प्राचार्य—डॉ० मण्डनमिश्रमहाभागानां प्रधानसम्पादकानामुदारं सौहार्दं स्मारं स्मारं स्नेहाभिभूतस्तेषामुपकारभरं बिभर्मि यैः सर्वविधेन सौविध्येनाहम् **'इन्दिरा-कीर्ति-कौमुदी'**-नामक-चरित्राञ्चित-चम्पूकाव्य-निर्माणाय तथाऽन्येषां **१-बहुरूपगर्भस्तोत्र-२-कबीरवाणी-३-गायत्री-वरिवस्या**' ग्रन्थानां सुसम्पादनायोत्साहितः । भगवती पराम्बा परिपूरयेदीप्सितानि सर्वेषां सहकर्तॄणामिति च कामयमानस्तस्या एव चरणयोः कृतिमिमां सश्रद्धं समर्पयामि—

विदुषां वशंवदः
—रुद्रदेव-त्रिपाठी
सम्पादकः

सत्यमेव जयते

प्रधान मंत्री

सन्देश

यह सराहनीय प्रयास है कि इन्दिरा जी की स्मृति में श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ अपनी पत्रिका "शोध प्रभा" का विशेषांक निकाल रहा है। इसके सफल प्रकाशन के लिए मेरी शुभकामनायें।

राजीव गांधी

नई दिल्ली,
4 नवम्बर, 1985

मानव संसाधन विकास मंत्री

साम्प्रतिक-भारतस्य निर्मितौ दिवंगतायाः प्रधानमन्त्रि-श्रीमती-इन्दिरागान्धी-महाभागाया नाम स्वर्णाक्षरैरुल्लेखनीयमस्ति । विभिन्न-क्षेत्रेषु तासामवदानानि स्वीकुर्वन्तो विश्वस्य राजनेतारो मनीषिणश्च ताः प्रति स्वीयानि श्रद्धा-प्रसूनानि तथा भिन्न-भिन्नाः संस्था लेखकाश्च तासां स्मृतावनेकान् ग्रन्थान् समर्पितवन्तः । अयं प्रसन्नताया विषयोऽस्ति यत्तस्यामेव श्रृंखलायां "श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठ" मपि स्वस्या अनुसन्धान-पत्रिका-"शोध-प्रभा"-या विशेषांकेनैकामन्यां योजक-श्रृंखलां योजयति ।

स्वर्गीया श्रीमती-इन्दिरागान्धी श्रीलालबहादुरशास्त्रीकेन्द्रीय-संस्कृतविद्यापीठस्य सभापतिपदमप्यशोभयत् । विद्यापीठस्य वर्तमानं विकसितं रूपं तासामेव नेतृत्वस्य दायोऽस्ति । अतो विद्यापीठद्वारा ताः प्रति निष्ठा-भक्ति-श्रद्धानां समर्पणं स्वाभाविकमेव विद्यते ।

श्रीमती गान्धी स्वीयेऽत्यन्तं व्यस्ते समयेऽपि कला-संस्कृति-साहित्यानां विशिष्य च संस्कृतस्य क्षेत्रेभ्यः सततं प्रेरणा अदात् । ता विदुषीं सर्वदा समादरमकार्षुः । जीवनस्यान्तिमेषु वर्षेषु ताश्चिन्तनस्यातिशयोत्कृष्टतां यावद्गमन् । तासां जीवनं भारतीय-संस्कृति-सभ्यता-सर्वधर्म-समभावानां मूर्तिमत् प्रतीकमभूत् । प्रस्तुते विशेषांके तासामयं पक्षो विशिष्योपस्थापितः -अतोऽहमस्य प्रकाशनस्य साफल्याय शुभकामनां वितरामि ।

--पी.वी. नरसिंहरावः

MINISTRY OF HUMAN RESOURCE DEVELOPMENT
SHASTRI BHAWAN, NEW DELHI-110001

सुशीला रोहतगी
शिक्षा एवं संस्कृति राज्य मन्त्री

नई दिल्ली
१३ जनवरीं, १६८६

स्वर्गीय प्रधानमंत्री श्रीमती इन्दिरा गांधी पूरे गुटनिरपेक्ष विश्व की नेता थीं, इसलिए उनके निधन की पीडा भारत और विश्व के हर कोने में महसूस की गई। भारतीय जन-जीवन की तो वे आत्मा ही थीं। जिन्होंने जिस धैर्य, साहस, लगन, मनोयोग, विश्वास और कठोर पुरुषार्थ के साथ ही अपूर्व आत्मीयता से हमारे देश को सजाया, संवारा तथा प्रगति और प्रतिष्ठा की उपलब्धि में अग्रसर किया, वह हमारे लिये चिरस्मरणीय है। उनके राजनीतिक विचार एवं आदर्श भारत के जन-मानस पर सदा सर्वदा के लिए अंकित रहेंगे और सत्य, सामाजिक न्याय, प्रजातन्त्र, समाजवाद, धर्मनिरपेक्षता एवं श्रमरूपी जीवन के सुदृढ लक्ष्यों को प्राप्त करने के लिये प्रत्येक भारतीय को युग-युग तक प्रेरणा देते रहेंगे।

श्रीमती इन्दिरा गांधी का वैयक्तिक एवं राजनीतिक जीवन-दर्शन भारत को पुनर्जीवन देने की क्षमता रखता है। वे नवीनतापूर्ण और स्फूर्तिदायिनी भारत को प्रथम महिला प्रधानमंत्री थीं। उनका राजनीतिक चिन्तन भारतीय राजनीति की अमूल्य धरोहर है। उनके द्वारा दिया गया मानवीय श्रम, जीवन और कर्म की महिमा का सन्देश भावी पीढ़ी के लिये एक महान् पथप्रदर्शक प्रकाशपुंज सिद्ध होगा।

नई दिल्ली स्थित श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ के शोध विभाग से प्रकाशित होने वाली त्रैमासिक अनुसन्धानपत्रिका "शोध-प्रभा" के एक विशेषांक का प्रकाशन स्वर्गीय श्रीमती इन्दिरा गांधी को संस्कृतजगत् की ओर से श्रद्धाञ्जलि है। आशा करती हूं कि आपके द्वारा प्रकाशित यह "श्रद्धाञ्जलि-विशेषांक" आदरणीय श्रीमती इन्दिरा गांधी के उच्च आदर्श, राष्ट्रानुराग, त्याग-भावना एवं कर्त्तव्यनिष्ठा को उजागर करते हुए संस्कृत-समाज को एक नई जागृति का सन्देश प्रदान करेगा।

मैं पुन: विद्यापीठ के इस प्रयास की सराहना करती हूं तथा सफलता की कामना करती हूं।

सुशीला रोहतगी

सत्यमेव जयते

कमलापति त्रिपाठी
(सदस्य-राज्यसभा)

१ जनपथ, नई दिल्ली
९-११-१९८५

प्रिय मिश्र जी,

मुझे यह जानकर प्रसन्नता हुई कि 'श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ' अपने शोध-पत्र "शोध-प्रभा" का 'श्रीमती इन्दिरा गांधी विशेषांक' प्रकाशित करने जा रहा है।

श्रीमती इन्दिरा गांधी बहुमुखी प्रतिभा की धनी थीं। वे शोषितों, पीडितों और पिछड़े हुए वर्गों के हित-साधन के लिये सदैव सचेष्ट रहीं और निडरता के साथ राष्ट्रीय और अंतर्राष्ट्रीय मंच पर अपना पक्ष प्रस्तुत किया। श्रीमती इन्दिरा गांधी अपने सिद्धान्त से कभी नहीं डिगीं, यहां तक कि सिद्धांतों के लिए उन्होंने अपनी जान भी कुर्बान कर दी। आगे आनेवाली पीढ़ियों के लिए वे प्रेरणा-स्रोत बनी रहेगीं।

प्रकाशन के लिए मेरी शुभकामनाएँ।

आपका
कमलापति त्रिपाठी

डा० बलराम जाखड़
अध्यक्ष-लोकसभा

नई दिल्ली
दिनांक ३१-१०-१९ ५

अत्यन्त प्रसन्नता का विषय है कि 'श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ' श्रीमती इन्दिरा गांधी की स्मृति में "शोध-प्रभा" का विशेषांक प्रकाशित कर रहा है।

श्रीमती इंदिरा गांधी का समस्त जीवन राष्ट्रीय मुक्ति-संघर्ष की भावनाओं और उसके उदात्त संकल्पों से ओत-प्रोत रहा है। उनका पूरा पारिवारिक वातावरण आजादी के लिए संघर्ष करने का था। स्वतन्त्रता-प्राप्ति के पश्चात् उन्होंने अपने पिता श्री पंडित जवाहरलाल नेहरू से भावी भारत के निर्माण का स्वप्न संजोया और अंत तक एकता, भाईचारा, सर्वधर्मसमभाव तथा देशप्रेम के अपने उद्देश्यों को पूरा करने में लगी रहीं। उन्होंने भारतीय संस्कृति तथा आदिम जनजाति की लोक-कलाओं और लोक-नृत्यों को पुनरुज्जीवित करने के लिए भरसक प्रयत्न किए। मुझे विश्वास ही नहीं अपितु पूर्ण आशा है कि भारतवासी उनके द्वारा भारत की उन्नति तथा प्रगति की जलाई ज्योति को निरन्तर प्रभावान् रखेंगे तथा उनके सभी स्वप्नों को साकार करने का पूरा प्रयत्न करेंगे।

दिवंगत श्रीमती इंदिरा गांधी की स्मृति में "शोध-प्रभा" का विशेषांक प्रकाशित करने के लिए 'श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ' को मेरी शुभकामनायें तथा बधाई।

बलराम जाखड़

सत्यमेव जयते

नारायण दत्त तिवारी
उद्योग मन्त्री

नई दिल्ली
२८ अक्टूबर, १९८५

यह हार्दिक प्रसन्नता का विषय है कि 'श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ' स्वर्गीया प्रधानमन्त्री श्रीमती इंदिरा गांधी की स्मृति में अपने शोध-पत्र "शोध-प्रभा" का विशेषांक प्रकाशित कर रहा है। स्वर्गीया इन्दिरा जी के नेतृत्व में भारत ने चहुंमुखी प्रगति की है। कृषि, विज्ञान, शिक्षा, उद्योग, वाणिज्य आदि सभी क्षेत्रों में भारत अन्य विकसित देशों के साथ-साथ प्रगति की ओर अग्रसर है।

"शोध-प्रभा" के 'श्रीमती इंदिरा गांधी विशेषांक' के सफल प्रकाशन के लिए मेरी शुभकामनाएँ।

नारायण दत्त तिवारी

बलिराम भगत
विदेश मन्त्री

नई दिल्ली
दिनांक २० नवम्बर, १९८५

प्रिय डा० मिश्र,

आपका २२ अक्तूबर, १९८५ का पत्र मिला। यह बड़ी प्रसन्नता की बात है कि 'श्री लाल बहादुर केन्द्रीय संस्कृत विद्यापीठ' स्वर्गीय प्रधानमन्त्री श्रीमती इंदिरा गांधी की स्मृति में "शोध-प्रभा" का विशेषांक निकालने जा रहा है। राष्ट्र के लिए और अन्तर्राष्ट्रीय स्तर पर मानव के उत्थान के लिए श्रीमती इंदिरा गांधी का योगदान निःसन्देह अविस्मरणीय है। उन्होंने भारतीय संस्कृति में गहरी दिलचस्पी लेकर इसे जीवित बनाए रखने के लिए अनेक महत्त्वपूर्ण कदम उठाए और परिणामतः भारत की संस्कृति में विदेशों की दिलचस्पी निरन्तर बढ़ रही है। संस्कृत भारत की ही नहीं, विश्व की प्राचीनतम भाषा है। मुझे इस बात की भी खुशी है कि विद्यापीठ इसके प्रसार की दिशा में महत्त्वपूर्ण कार्य कर रहा है।

मुझे विश्वास है कि "शोध-प्रभा" का यह विशेषांक अपने उद्देश्य में सफल होगा और पाठकों के लिए अत्यन्त लाभप्रद साबित होगा। इसके लिए मेरी हार्दिक शुभकामनाएँ स्वीकार करें।

आपका,
बलिराम भगत

अर्जुन सिंह
राज्यपाल

राजभवन, पंजाब,
चण्डीगढ़

दिवंगत प्रधानमन्त्री श्रीमती इंदिरा गांधी जी का जीवनवृत्त देश की स्वतन्त्रता एवं इसकी प्रगति के इतिहास के साथ अन्तिम रूप से जुड़ा हुआ है। बाल्यावस्था से लेकर अन्तिम सांस तक उन्हें देश और देशवासियों की ही चिन्ता रही। विरासत में मिली देशभक्ति की जन्मघूंटी के बलबूते पर देश की आजादी की लड़ाई में तथा आजादी प्राप्ति के बाद इसकी अखण्डता एवं सार्वभौमिक प्रगति में उनका अद्वितीय योगदान सुनहरी अक्षरों में लिखा जाएगा। देश को विकास पथ पर अग्रसर करने हेतु अपने पिता स्वर्गीय प्रधानमन्त्री पण्डित जवाहर लाल नेहरु द्वारा रेखांकित की गई योजनाओं को इन्होंने न केवल साकारात्मक रूप ही प्रदान किया अपितु बैंकों का कौमीकरण कर, राजाओं के प्रिवीपर्स बन्द कर तथा बीस-नुकाती प्रोग्राम जैसे क्रान्तिकारी कार्यक्रमों द्वारा देश में सच्चे समाजवादी प्रजातन्त्र की स्थापना कर विश्वभर में भारतीयों के सम्मान को ऊंचा उठाया। उनके कार्यकाल में विज्ञान, टेक्नालोजी, शिक्षा, कला एवं सांस्कृतिक क्षेत्र में प्रगति के साथ-साथ अन्तरिक्ष एवं ऐटमी क्षेत्र में भी विश्व के प्रमुख देशों की अग्रिम पंक्ति में भारत को ला खड़ा करने का श्रेय भी उन्हीं को जाता है। विश्वभर में शांति का संदेश फैलाने हेतु उनके सराहनीय योगदान की आज भी विश्व के अनेक राष्ट्र प्रशंसा करते नहीं थकते। कठिन परिस्थितियों में भी मुस्कराते रहना उनके निडर व्यक्तित्व एवं अदम्य साहस का प्रतीक था। वह देश को प्रगतिशील, सशक्त एवं अखण्ड देखना चाहती थीं, अपने इस उद्देश्य की पूर्ति के लिए वह अन्तिम सांस तक संघर्ष करती रहीं और देश की मजबूती तथा खुशहाली के लिए शहीद हो गईं।

हमारी अपनी महान् नेता श्रीमती इंदिरा गांधी जी के प्रति यही सच्ची श्रद्धांजलि होगी कि हम उनके दर्शाए पथ पर चलकर देश को मजबूत एवं खुशहाल बनाएँ।

अर्जुन सिंह

MOHD. USMAN ARIF
Governor

Raj Bhavan
Lucknow

I am glad to know that Shri Lal Bahadur Shastri Kendriya Sanskrit Vidyapeeth is bringing out a special issue of its journal 'Shodha Prabha' on Smt. Indira Gandhi to pay tribute to the memory of its late chairman.

The dedication, pledge and resolve to live up to her ideals will be the most appropriate tribute to the memory of our outstanding leader.

I extend my best wishes for the special issue.

Mohd. Usman Arif

सत्यमेव जयते

K. PRABHAKARA RAO
Governor

Raj Bhavan, Bombay
7 November, 1985

The progress that India has made in manifold spheres and the present stature it has achieved in the comity of nations is mainly due to the significant contribution made by the late Shrimati Indira Gandhi. Although her major time was taken in nation building activities, development of our ancient culture and literature, including Sanskrit literature, also found her attention. This was manifest in her personal interest in fostering Shri Lal Bahadur Shastri Kendriya Sanskrit Vidyapeeth which achieved the status of a deemed University under her guidance and inspiration as its Chairman.

The Vidyapeeth is bringing out a special issue of its research journal 'Shodha Prabha' as a tribute to the memory of the late Shrimati Indira Gandhi, a befitting tribute indeed. I congratulate the staff of the Vidyapeeth for their thoughtfulness and wish the Vidyapeeth every success.

K. Prabhakara Rao

सत्यमेव जयते

वीरभद्र सिंह
मुख्यमन्त्री, हिमाचल

शिमला

मुझे यह जानकर अतीव प्रसन्नता हुई है कि 'श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ, नई दिल्ली,' अपनी पत्रिका "शोधप्रभा" का एक विशेषांक माननीया श्रीमती इंदिरा गांधी की स्मृति में प्रकाशित करने जा रही है।

श्रीमती इंदिरा गांधी विश्व-बन्धुत्व की पक्षधर थीं। भारतीय जनमानस पर उनके व्यक्तित्व का पूर्ण प्रभाव रहा है। विश्वशान्ति के लिये किये गये उनके प्रयास मानव-कल्याण के कार्यों के लिये प्रेरणा स्रोत हैं।

देश के सामाजिक-आर्थिक विकास के क्षेत्र में तो उनके द्वारा आरम्भ किया गया बीस-सूत्री कार्यक्रम निर्धनतम लोगों के उत्थान के लिये उनकी चिन्ता का परिचायक है ही, राजनीतिक और सांस्कृतिक क्षेत्र में उनका योगदान भी ऐतिहासिक महत्त्व का है। उनमें एक योगिनी का सन्तुलन था और वह धैर्य की जीवन्त मूर्ति थीं।

श्रीमती इंदिरा गांधी ने अपने जीवन को सुख-दुख के साथ आत्मसात् कर लिया था। उन्होंने कहा था, 'कोशिश मेरी यही है कि भारत की आम जनता की सेवा जिस तरह पहले करती रही, अब भी करती रहूं। मेरा जीवन भारत से मिला हुआ है।' उनकी समझदारी का परिचय इससे ही मिलता है कि वह 'जोन आफ आर्क' को अपना आदर्श बनाये हुए थीं।

सांस्कृतिक धरोहर के सूक्ष्मता से अध्ययन, उसे स्वाध्याय का साधन बनाने तथा उसके विकास पर उनका बल था। मुझे विश्वास है कि विशेषांक उनके व्यक्तित्व और कृतित्व के विविध पक्षों को प्रस्तुत करने का प्रेरक कार्य सफलता पूर्वक करेगा।

मैं अपनी हार्दिक शुभ कामनाएँ भेजता हूं।

वीरभद्र सिंह

K. KARUNAKARAN
Chief Minister

Trivandrum
7.11.1985

I am glad to know that Vidyapeeth is bringing out a Special issue of its research journal 'Shodha Prabha' to pay tribute to the memory of its former Chairman the late Smt. Indiraji. Her contribution to the proper recognition of Sanskrit language and her keen and abiding interest in Indian culture is well known.

It is most appropriate that you have decided to bring out this special issue so as to enable people to know her contribution in this field.

K. Karunakaran

सत्यमेव जयते

मोतीलाल वोरा

मुख्यमन्त्री सचिवालय, वल्लभ भवन
भोपाल

२५ नवम्बर, ८५

कला, संस्कृति और संस्कृत-भाषा ने प्राचीन काल से देश को एकता के सूत्र में बांध रखा है। इस बात को ध्यान में रखकर श्रीमती इन्दिरा गांधी ने अपने ओजस्वी नेतृत्व के द्वारा जहां देश को विज्ञान और तकनालाजी के क्षेत्र में संसार के राष्ट्रों के बीच अग्रणी पंक्ति में पहुंचाया वहीं देश के गौरवशाली अतीत को विस्मृत नहीं होने दिया।

पण्डित नेहरू के द्वारा सांस्कृतिक विभिन्नता में एकता की झांकी प्रस्तुत करने की जो परम्परा शुरू की गई, उसे इन्दिरा जी ने और आगे बढ़ाया तथा संस्कृत-भाषा को अपनी पूर्व गरिमा प्राप्त करने के लिए प्रोत्साहन भी दिया।

यह प्रसन्नता का विषय है कि 'श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ' इन्दिरा जी की स्मृति में अपने शोधपत्र का 'श्रीमती इन्दिरा गांधी श्रद्धाञ्जलि-विशेषाङ्क' प्रकाशित करने जा रहा है।

मुझे आशा है कि इस शोधपत्र में इन्दिरा जी के बहुआयामी व्यक्तित्व पर प्रकाश डालने का प्रयास किया जायेगा।

मोतीलाल वोरा
मुख्यमन्त्री

MADHURI R. SHAH
Chairman

Vishwavidyalaya Anudan Ayoga,
New Delhi

Late Shrimati Indira bandhi, who left us a year back, was not only a great leader and an outstanding statesman of the world combining in her love for liberty, equality and fraternity of all mankind, but was also an emb)diment of truth, unfailing courage and unflagging energy. She was a true educationist deeply concerned with the development of total personality of the individual, was a guiding spirit behind the attainment of highest standards in the field of education and had dreamt of a strong and unified India despite religious, social and cultural diversities of its people.

Indiraben was passionately in love with the ancient heritage of this country. Its rich languages, varied cultures and colourful people always provided her a source of great strength and inspiration. She always came forward to do, whatever was possible, for the preservation, development of this rich heritage and only with this spirit she had extended her valued patronage and wholehearted support to Shri Lal Bahadur Shastri Kendriya Sanskrit Vidyapeeth. New Delhi.

The best tribute to Indiraben in my opinion, would be to work with dedication for the growth and development of this Vidyapeeth, by all of us, whether directly or indirectly concerned.

Madhuri R. Shah

जगपत दुबे
सदस्य-सचिव

खादी और ग्रामोद्योग आयोग, बम्बई
३० अक्तूबर, १९८५

हिब्रू भाषा-शास्त्र के इतिहास की दृष्टि से सबसे प्राचीन भाषा मानी जाती है। तथापि संसार की तीन भाषाएँ ऐसी हैं, जिन्हें हम मातृभाषा या मूल भाषाएँ कह सकते हैं। संस्कृत उनमें से एक है। अन्य दो भाषाएँ लेटिन और ग्रीक मानी जाती हैं। जहां तक संस्कृत का भारतीय-संस्कृति एवं सभ्यता से सम्बन्ध है, मैं यह समझता हूं कि सभी भारतीय भाषाएँ, किसी न किसी रूप में संस्कृत की ऋणी हैं। हमारी राजभाषा हिन्दी तो संस्कृत से सबसे ज्यादा प्रभावित है। सच तो यह है कि संस्कृत के बिना न केवल हिन्दी का बल्कि भारतीय संस्कृति और सभ्यता का ज्ञान भी अधूरा ही रह जाता है।

'श्री लालबहादुर शास्त्री केन्द्रीय विद्यापीठ' संस्कृत के प्रचार-प्रसार में अमूल्य योगदान कर रही है। स्वर्गीय प्रधानमन्त्री श्रीमती इंदिरा गांधी द्वारा विद्यापीठ की अध्यक्षता स्वीकार करना ही इस कथन का सबसे बड़ा प्रमाण है। वस्तुतः इंदिराजी का भारतीय संस्कृति, सभ्यता और संस्कृत के विकास में अटूट विश्वास था और यही कारण है कि राष्ट्रीय एवम् अंतर्राष्ट्रीय क्षेत्रों में उनके अत्यधिक व्यस्त रहने पर भी विद्यापीठ जैसी संस्थाओं के विकास में वे प्रगाढ रुचि लेती थीं।


ऐसी महान् आत्मा की स्मृति में **"शोध-प्रभा"** जैसी शोध-पत्रिका के विशेषांक का प्रकाशन मेरी दृष्टि से **"स्वर्गीय आत्मा के प्रति सही रूप में सच्ची श्रद्धाञ्जलि होगी।** मुझे पूर्ण आशा और विश्वास है कि विद्यापीठ अपने महान् कार्य में पूर्ववत् सतत प्रयत्नशील रहेगी।

मैं इस पुनीत कार्य में विद्यापीठ की सफलता की कामना करता हूं।

जगपत दुबे

भारत-प्रधान-मन्त्र-श्रीराजीवगान्धि-महाभागेभ्यः

शुभाभिशंसनात्मकः कमलबन्धः



लोक-शोभन-राजीव-

राज्यमिन्दीवरं महत् ।

इन्दिरा-नयने रुच्यं,

द्रक्ष्यामश्च सुमे सुमम् ॥

—रामचन्द्रः पाद्मनाभिः

।। ॐ ऐं ह्रीं श्रीं ह्रींङ्कार-कमलेन्दिरायै नमः ।।

श्रीमती-'इन्दिरा-गांधी'-महाभागाया

जीवन-सुषमा-समलङ्कृता

इन्दिरा-कीर्ति-कौमुदी

□□

या राष्ट्रगौरव-वर्द्धिनी शुचि-कर्म-मर्म-विमर्शिनी,
या त्यागमूर्तिरपूर्वपूर्तिरभूद् भुवः 'प्रियदर्शिनी'।
या मानवत्व-समत्व-शान्ति-प्रीति-रीतीः सन्ततं,
वर्द्धयन्ती बलिमदात् स्वां सा जयतु सुयशा 'इन्दिरा' ।।

नेहरू-वंश-गगनात्, प्रसृता भुवि भासताम् ।
आचन्द्र-तारकं भव्या !, 'इन्दिरा-कीर्ति-कौमुदी' ।।

□□

—डॉ० रुद्रदेवत्रिपाठी

मङ्गल-मालिका

□

सुधा-मधुर-बोधनैरमितदोष-संशोधनैः,
कुमार्ग-गति-रोधनैः सततमेव निष्क्रोधनैः।
वचोभिरतिमञ्जुलैस्तिमिरमान्तरं संहरन्-
महः किमपि संश्रये हृदि मुदाऽऽनतः श्रीगुरोः ॥१॥

.वघ्नौघवारण-परायणमाश्रितानां, कल्याण-कारणमहं करुणा-निधानम्।
ग्लौङ्कारबीजमयमूर्जितशक्तियुक्तं, क्षिप्रप्रसादनगणाधिपतिं नमामि ॥२॥

चञ्चच्चन्द्रकलावतंस-विलसज्ज्योत्स्नाप्रकाशोर्जित-
स्वर्णस्वर्णिम-रत्नराजिखचितं मातुः किरीटं नुमः।
यस्याभा-प्रसराद् विनिःसृतजगज्जीवातुभूताः प्रभा,
जीवानां बहिरन्तरास्तृततमोराशीन् पराकुर्वते ॥३॥

नेत्राणां त्रितयं रवीन्दु-दहनोद्दीप्तं सदप्येकलं,
दीनेभ्योऽमृतरूपमेव नितरां यत् साधु दत्ते फलम्।
तत्कारुण्य-रसार्द्र-पुण्यमसृणं मातुः शरण्यं नृणां,
संसारार्णवतारणाय निपुणं सद्यो भवेच्छ्रेयसे ॥४॥

या माता ममतामयैः शुचितमैः सम्मण्डिता मन्दिरै-
र्यस्या जीवन-धारयेव विमला व्याप्ता विचारा भुवि।
विश्वासा अपि यत्र शादहरिताः प्रेम्णां कलैः कोकिला,
यां नित्यं प्रणमन्ति भारतमही सा भूतले भासते ॥५॥

अध्यात्मं विमलं स्थिरं प्रतिजनं प्रेम प्रकृत्या श्रितं,
शुश्रूषा च विनेर्ष्यया हृदि दया विश्वास ईशे सदा।
कर्तव्ये पथि निर्भयं प्रचलनं तुष्टिः स्वकीये धने,
येषां वास्तविका गुणा इह जनास्ते कैर्न वन्द्याः क्षितौ ? ॥६॥

निःस्वार्थं निजशासनाय विमलां याच्ञां पुरस्कुर्वता-
मस्मद्-भारतवासिनां समुचितां ये संव्यधुर्नेतृताम्।
मार्गं कण्टकपूर्णमात्महविषा सन्दीप्य याता दिवं,
ते धन्या धवलात्मकीर्तिनिवहा आदर्शरूपा जनाः ॥७॥

राष्ट्र-गौरव-रक्षिण्याः प्रेरणाऽऽनन्दचन्द्रिका।
'रुद्रेण' रचिता राजेद्-'इन्दिरा-कीर्ति-कौमुदी' ॥८॥

—डॉ० रुद्रदेवत्रिपाठिनः

[१]

सृष्टि-कला

वन्दे भारत-मातरम्

सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ।
दैवीं नावꣳ स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥

—तैत्तिरीयसंहिता १-५, ११

□

नियति-समर्पित-सुषमा-चर्चित-सुर-नर-कृत-वरिवस्यां,
धरणितल-स्थित-मणिमय-मन्दिर-मूर्तिरिवाप्त-नमस्याम् ।
सरस-सरित्-सृत-सलिलसुधावृत-पूति-प्रथित-यशस्यां,
गर्वोन्नत-गुरु-गिरिवर-रक्षण-वर्धित-परम-रहस्याम् ।
यस्याः शौर्यमयी शुचिगाथा, शूरं कुरुते कातरम् ।
तामिह वरदां जनगण-सुखदां, वन्दे भारत-मातरम् ।।१।।

□ प्राचीनं भारतभुवः स्वरूपम्

स्वस्ति श्रीश्रीचक्रनगरसाम्राज्ञी-कृपापारावार-परिषिक्ता, सत्य-तपो-जनमहः-स्वर्भुवोभूलोकच्छत्रच्छायाच्छादिता पाताल-रसातल-महातल-सुतल-वितलातलानामुपरि विराजिता, देव-ग्रह-नक्षत्र-राशि-नाग-वृक्षाप्सरः-सिद्धमुनीश्वर-यक्षरक्षोगन्धर्व-किन्नर-गायक-गजेन्द्राश्वादि-सभाजिताऽनन्तब्रह्माण्ड- मण्डलान्तर्वर्तिनी वरुणालयाङ्के तरणिरिव सन्तरन्ती गगनाङ्गणगतचन्द्रमण्डलमिव मण्डयन्ती पूर्वोत्तरगोलार्धाभ्यां स्वकीयं भौतिकं स्वरूपं प्रकटयन्ती प्रभूतान् देशान् प्रदेशान् पर्वतान् नदीर्नदान् वनान्युपवनानि क्षेत्राणि जननिकायान् भूयसो जीवाँश्च स्वान्तः पोषयन्ती रम्या सचित्रा विचित्रा विधातुरनुपमा पृथुला पृथ्वी राजतेतमाम् ।

तस्यामेव पूर्वार्धगोलस्य प्रायो मध्यभागेऽङ्गुलीयकान्तः-खचितमहार्हरत्नवदलङ्कृता रत्नसानोर्मूलात् पयोधेः कूलं यावद्विलसन्ती विश्वस्य विश्वासभूमिरिवोपमहाद्वीपपदवीं प्राप्ता व्याप्ता च विविध-ज्ञान-विज्ञान-प्रज्ञानशालि-

महापुरुष-संसेविता कल्याणामृतवर्षिणी सकल-जीवलोक-प्रहर्षिणी भारत-भूमिर्विराजते । या हि —

अध्यात्मं प्रति जिज्ञासया साहित्यं प्रत्यनुरागेण वीरतां प्रति सम्मानेन च विश्वेषां शिरोभूषणायमाना भारतधरणी प्रकृतेरुदात्ततत्त्वोपदेशानां भाष्याणीव विस्तीर्णा मौनमुखरया भाषया मानवतायाः पन्थानं दर्शयति । अत्रैव भगवान् शेषशायी बालमुकुन्दरूपेण सृष्टेर्विलयानन्तरं निखिलां सृष्टिं बीजरूपां धृत्वा वटपत्रे शेते । प्रतिकणमस्या ज्ञानेनोतप्रोतम् । अत्र हि हिमालयस्य प्राङ्गणे सर्वप्रथमं विश्वसंस्कृतेस्तूर्यघोषोऽगुञ्जत् । न केवलं ज्ञानधर्माविवास्या वैशिष्ट्यं व्यङ्क्तोऽपि तु 'रीति-नीति-भुक्ति-मुक्ति-वैराग्य-भक्ति'-प्रभृतयोऽप्यत्र करान् बद्ध्वा सश्रद्धं मानवतायाः सेवार्थं सन्नद्धाः सन्ति । इयं सर्वतो महती परमोपदेशिका विद्यते । सन्ततेः सन्ततिं यावद् यथावज्ज्ञानं वितरन्तीयम्-'एकया गत्या, एकया मत्या, एकेन रूपेण, एकया सहजतया, एकया समरसतया एकया साधारणीकरणप्रक्रियया च दैविकजीवनस्यैकांशभूतं परमात्मनो निःश्वसितेन सह प्रकाशितं समन्ततः सर्वानैक्यं बोधयति, शक्ति-गुण-विशेषता उद्भावयति रूपं वर्णं च ददाति, आकारप्रकारौ यच्छति तथा तानेकीकरोति ।

अनया लक्षशो वत्सराणां स्वकीयेतिहासे प्राक्तनकालस्य शक्तिशालिन्यः सभ्यता उन्नमयन्त्योऽवनमयन्त्यश्चावलोकिताः, किन्तु, ताभिः सह नेयं विनष्टा, अपि तु स्वीययोर्नेत्रयोः पुरतस्ताः सभ्यता धराशायिन्यो दृष्टास्तथोत्तमानुत्तमानि सर्वविधानि दिनानि पश्यन्ती स्वीयमस्तित्वं स्थिरमरक्षत् । इत्थम् —

अनन्त-कालाद् विततं स्वरूपं, सम्प्राप्य विभ्राजित-मूर्तिमत्याः ।
भुवो हृदब्जे मधुकोशरूपाऽराजच्छुभा भारतभूमिरेषा ॥२॥

☐ मध्यकालिकं मातृभुवः स्वरूपम्

इयं भूमिरतीतेषु वत्सरेषु वैदेशिकानां मनांस्याकर्षन्ती तेषां लोभदवानलदग्धा सती तदीयाक्रमण-परितप्ता मध्येकालं खिन्नखिन्नाऽवर्तत । उत्पत्स्यते कोऽपि निजमातुः कष्टजिहीर्षुरिति ध्यायन्ती यथा-कथमपि दुष्कालमिव दुःखकालं व्यत्यगमयत् । प्रथमं यवनानां क्रूरैराक्रमणैस्ततः परं चाङ्ग्लानां वैदेशिकानां व्यापारमुखेन प्रवेशाद् भृशं भारतीयानां दासता-पाश-निगडनेन च नितान्तं व्यथमानाऽपि स्वात्मगौरवं न व्यस्मार्षीत् । आयातः स कालः । भारतपुत्राः पुत्र्यश्च मातुर्वास्तविकं कष्टं विज्ञाय तन्निवृत्तये कृतसङ्कल्पा उदतिष्ठन् । स्वातन्त्र्यायोन्मत्ता दास्यपीडाप्रपीडिताः पर-शासनदोषापवारणाय सर्वस्वमपि विहातुमुत्काः पूर्वं विद्रोहभावनया समुत्थिताः सम्भूय सैनिकान् विद्रोहानाचरन्तः शासकैर्निर्दयं ताडिता मारिताश्च । हविषा कृष्णवर्त्मेव जनानां बलिदानेन प्रवृद्धः स्वातन्त्र्य-सङ्गराग्निः सुतरां व्याप्तः । भारतीयानां हृदयानि रक्तानि च

प्रतप्तानि भूत्वा शौर्येण वैदेशिकान् परास्तुमग्रेसराण्यभूवन्। यतस्तदानीम्—

आसीत् कोऽपि न मानवोऽत्र सततं यो भारतीयावनिं,
पाशान्मोक्तुमिमां समर्पणधिया नैच्छत् तदा सर्वथा।
सर्वस्यापि मुखे व्यराजत वरः स्वातन्त्र्यमन्त्रो नवः,
सर्वोऽपि प्रसभं रतोऽभवदहो ! होतुं स्वकीयां तनुम् ॥३॥

शासकानां शस्त्रराशिः क्व क्व च शासितानां शस्त्रसङ्ग्रहः ? सैनिकानां रणकौशलं क्व क्व च जनताया रण-प्रवृत्तिः ? दुष्टानां घातनद्वाराणि कियन्ति कियन्ति च सज्जनानां रक्षणसाधनानि ? महच्छासनं क्व क्व च स्वल्पं राज्य-शासनं ? हस्तिना सह शशकस्य युद्धमिव विद्रोह-सङ्ग्रामो भूयोभूय उद्भूयापि न तावत् साफल्यमवाप यावदासीदभीष्टम्।

तदैव भारतभूमिभक्ता **'यादृशो देवस्तादृशी पूजे'**तिलोक-भणितिं संस्मृत्य बुद्धिकौशनेन वैभवमदमत्तान् विजेतुं चेष्टितवन्तः। जनानां मनोबलं सन्नद्धं, प्रति नगरं, प्रतिजनपदं, प्रतिग्रामं, प्रतिप्रतोलि, प्रतिगृहं प्रतिजनं च स्वातन्त्र्यप्राप्ति-सन्देशाः प्रापिताः। राष्ट्रियाणि सङ्घटनानि सङ्घटितानि। समाचारपत्राणि प्रकाशितानि। अनेके प्रखरा वक्तारः स्वीयैर्व्याख्यानैः परशासनदुर्नीतीः स्वतन्त्र-ताया अनिवार्यताश्च प्रकटितवन्तः। इत्थमेकतो रणनीत्याऽपरतश्च सङ्घटनपूर्वकं बुद्धि-वैशद्येन ते वैदेशिकान् भारतं मोक्तुं बाधितवन्तः। ईसवीय-१८५७ वर्षात् स्वातन्त्र्य-युद्धमिदं दार्ढ्येन प्रवृत्तम्। सकलस्यापि देशस्य मानवा अहर्निशं स्वतन्त्रता-प्राप्तये विकला आतुरा अभिलाषवन्त आस्थावन्त आशावन्त उत्साह-वन्तः सन्तोऽपि वास्तविकं मार्गदर्शकं प्रतीक्षमाणा इवाभूवन्।

तेष्वेव दिवसेषु भारतीयानां राजनीतिकाकाङ्क्षायाः परिपूर्तये **श्रीमती एनीबीसेन्ट-श्रीतिलक-गोखले**-प्रभृतिभिरान्दोलन-प्रवृत्तिः प्रवर्धिता। स्वदेशस्य सौभाग्यात् तदाऽफ्रीकातः **श्रीमोहनदासकर्मचन्दगान्धिनो** भारतमुपागताः। प्रारम्भे ब्रिटिशसर्वकारेण सह सहयोगनीत्या राजनीतिकमान्दोलनं तैश्चालितम्। भारतीयाः क्रान्तिकारिणस्तया नीत्याऽसन्तुष्टा आसन्। शनैः शनैः स्वयं महात्म-गान्धिभिरप्यनुभूतं यदेते 'काष्ठदेवाः पुष्पपूजाया अनर्हाः सन्ति।' नानाविधान् विधेयकान् प्रस्तूय नवनवानधिनियमान् प्रवर्त्य जनताया दमनमेव कुर्वन्ति। अतस्तेऽपि विद्रोहिणः सञ्जाताः प्रतिकर्तुं च विदेशिशासकानां निश्चित्यापि नवीनं कमप्येकमीदृशमस्त्रं गवेषयन्ति स्म येन 'सर्पोऽपि म्रियेत यष्टिकाऽपि न भज्येत।' तदर्थं तैः सत्याग्रहस्य पन्था उद्घाटितः। सत्याग्रहास्त्रेण सङ्गता भारतीयाः शस्त्रहीना अपि विविधैरान्दोलनैरात्मोत्सर्गमय्या दृष्ट्या निष्ठया निर्भयतया सङ्कल्पशक्त्या च स्वयंसेवकाः कर्मकर्तारः श्रीगान्धिनो नेतृत्वे 'सत्यं सत्यादवाप्यत' इति दृढं मत्वा विरोधप्रकटनैः कार्यावरोधनैरसहयोगैश्च सत्याग्रह-साधनायां सन्नद्धा अभवन्।

अहिंसा-पालन-पूर्वकं सर्वकारस्यानुचितानि कर्माणि विरुन्धद्भिरन्यायान् प्रत्यात्मनो बलिदानानि कुर्वद्भिरहोरात्रमेकमेव स्वतन्त्रता-प्राप्तेर्ध्येयं ध्यायद्भिश्चान्ते भारतीयैः स्वातन्त्र्यं प्राप्तमेव। अस्मिन् महायज्ञेऽनेकेऽध्वर्यव आसन्, केचन पुरोहिता आचार्या अप्यवर्तन्त, ऋत्विजां सङ्ख्या तु गणनातीतैवाविद्यत। तेषु मातॄणां भगिनीनां वधूनां दुहितॄणां सङ्ख्यापि श्लाघनीयाऽऽसीत्। न केवलं युवानो युवत्यो वृद्धा एवापि तु बालिका बाला अपि तेषु स्वशक्त्यनुसारं सहयोक्तारोऽभवन्। भारतस्य स्वातन्त्र्य-प्राप्तेरितिहासोऽतीव महानितिहासः, शौर्य-त्याग-तपसामितिहासः, सात्त्विकानां बलिदानानामितिहास इति कथने नातिशयोक्तिः।

सोढ्वा घर्षण-कर्तन-प्रतपना-सन्ताडनादीन्यलं,
कष्टैर्भाति सुवर्णमुज्ज्वलतरं सर्वप्रियं गर्वितम्।
हिंसाऽऽपीडन-वञ्चनादिजनिताँस्तद्वद्बहून् सङ्कटान्,
सोढ्वैव प्रकृतिं श्रितं निजगुणैः शोभारतं भारतम्॥४॥

तत एव च —

स्वतन्त्र-गगनाङ्गणे रविरुदैत् स्वतन्त्रः पुनः,
समस्त-तमसां ततिः परवशा परास्ताऽभवत्।
विदेशिभिरथास्तृता कपट-वागुरा संहृता,
स्वदेश-वशगा कृता सकल-शासन-प्रक्रिया॥५॥

लोकतन्त्रं भारते रक्षितुं तं भूषयितुं दूषणानि दमयितुं च यो महान् भारः कर्तव्यरूपो दायश्च भारतीय-नेतृषु समायातस्तदर्थं बद्धपरिकरा नेतारः सावधाना अभवन्। कूटनीतिकैराङ्ग्लशासकैर्भारतवासिन एव मुस्लिम-सम्प्रदायाभिमानिनः 'पाकिस्तान'-प्रदानेन विभक्ताः। अखण्डा भारतभूमिः कूटनीत्या भ्रातृषु विभेदमुत्पाद्य खण्डिता। १९४७ ई० वर्षस्यागस्ते मासि चतुर्दश-दिवसस्यावसानकाले पञ्चदश-दिवसस्य चागमनकालसन्धौ मध्येरात्रं भारतं स्वतन्त्रमभूत्। तस्मिन्नेव दिने भारतीय-विधानपरिषदः 'सत्ताहस्तान्तरणाधिवेशनं' सम्पन्नम्। **'वन्दे मातरम्'**-इति भारतमातृगीतेन सह स्वतन्त्र-भारतस्य नवीनो युगः प्रारभत।

तदानीं भारत-वसुन्धरा **'तुष्यतु दुर्जन'** इति न्यायदृशा बह्वोः कालात् क्रमशो दुर्जनानाक्रान्तृवर्गान् स्वभूभागांशप्रदानेन यथायथं तोषयन्ती कालमहिमानं बलवन्तमनुभूय स्वीयमतीव विशालं स्वरूपं स्वयं स्वात्मनि सङ्कुचन्तीवावर्तत। 'हिन्दुस्तान-पाकिस्तान'-रूपेण विहितोऽङ्गभङ्गश्च तदाऽभून्नितरामसह्यः पीडाकरश्च। तथापि माता पुत्राणां हितं काङ्क्षन्ती स्वीयानुदारानाधारान् न विस्मरन्ती पूर्वां परम्परां परिरक्षन्ती सत्यमेव मातत्वं व्याञ्जयत्। माता शरीरेण

वृद्धा जर्जरा रुग्णा शिथिला कृशा वा भूत्वाऽपि न कदापि पुत्रान् प्रति श्लथस्नेहा भवति। अत एव सा तेषु दिवसेषु यादृशीं स्थितिं बिभर्ति स्म तस्यामेव पुत्राणां स्वातन्त्र्यमाशंसमानाऽऽशीर्भिरभिषिञ्चन्ती प्रसक्तिमेवान्वभूत्।

तदा प्रभृति साम्प्रतं यावदनवरत-श्रम-साधना-कर्तव्यनिष्ठा-नानाविधयोजनानाञ्चाश्रयणेन भारतमातुर्यत् स्वरूपं भारतीयनेतृभिः संसाधितं समलङ्कृतं सज्जितं संस्कृतं तद् वस्तुतो विश्वस्याग्रतो गर्वोन्नितेन मस्तकेनास्माकं गौरवं वर्द्धयति। साम्प्रतमस्या मातृभुवो विकसद् रूपं किमप्यपूर्वमेवाकलयन्ति तज्ज्ञाः।

□ स्वातन्त्र्योत्तरं मातृभुवः स्वरूपम्

इयं भारतभूमिः संसारस्य सर्वतो विस्तृतमत्यन्तमुर्वरशक्तिसमन्वितं समतल-भूभागं बिभर्ति। एतस्याः सम्पूर्णं क्षेत्रफलं द्वात्रिंशल्लक्ष-वर्गकिलोमिटरमितं विद्यते। विश्वस्य महत्सु देशेषु सप्तमोऽयं महान् देशः। पश्चिमयूरोपस्य चतुर्विंशतिराष्ट्राण्यस्मिन् समाहितानि भवितुं शक्नुवन्ति। अस्या भुवस्त्रिभिर्महतीभिः सरिद्भिर्हिमालयोऽपि जितस्ताः सन्ति सिन्धु-शतद्रुब्रह्मपुत्राभिधानाः। विश्वस्य सर्वतो महदुर्वरक्षेत्रं गङ्गाब्रह्मपुत्रयोरत्रैव विद्यते। शेषादेशियाखण्डादेतस्याः पृथग् वैशिष्टयं वर्तते। हिमालयोऽस्या भुवो विशालो जलभाण्डागारः, यो हि कश्मीरतः कामाख्यां यावत् पिपासितां भूमिं जलेन तर्पयति। अस्याः प्रतिवेशिनो देशाः पाकिस्तानाफगानिस्तान-चीन-नेपाल-बंगलादेशाः सन्ति। अन्ताराष्ट्रिया व्यापारानुकूला स्थितिरेकतः स्वेजकुल्यातो यूरोपदेशैर्मेलयति, अपरतश्च मलक्काजलसन्धित आरभ्य पूर्वभागे चीन-जापानाभ्यां दक्षिणपूर्वभागे चास्ट्रेलियातः सङ्गमयति।

भारतभूमेर्दक्षिणसीमान्तो भागः कन्याकुमार्यन्तरीपः। दक्षिणे भागे निकोबारद्वीप उत्तरे भागे जम्मू-कश्मीरः। भारतस्यार्वो भाग उष्णकटिबन्धवानर्धो भागश्चोपोष्णकटिबन्धवान् वर्तते। अरुणाचलोऽस्याः पूर्वसीमा। एतस्यास्तटरेखाऽरबसागरो बङ्गखातिका च ययोर्लक्षद्वीपोऽण्डमाननिकोबार-द्वीपसमूहावपि सम्मिलितौ स्तः। भौगोलिकेन महत्त्वेन सहैवात्र जल-विद्युदिन्धन-खनिजौषधीनां भाण्डागारा अपि भुवोऽस्याः समृद्धये विकासं प्रापिताः सन्ति। अत एव चाय-इक्षु-ज्वार-बाजाराभिधधान्य-मुद्गफलिका-तिल-सर्षप-लाक्षाणामुत्पादने प्रथमं, तन्दुल-पट्टांशुकोत्तमधान्येषु द्वितीयं, तमालपत्रातस्युत्पादने तृतीयं तथा गोधूम-कार्पास-कार्पासबीज-क्षौमानामुत्पादने च विश्वस्मिन् विश्वे चतुर्थं स्थानं प्राप्य गौरवं वर्धयति। विश्वजनसङ्ख्यायाः षष्ठो भागोऽस्यां भुवि निवसन् परमां मुदमनुभवन्नात्मन औन्नत्याय प्रयतते प्रयतिष्यते च।

स्वातन्त्र्य-समुदयेन साकमेव प्रजातन्त्रस्य वाञ्छितेषु मूल्येष्वास्थावद्‌भिर्नेतृभिः परम्परागताय समाजायाधुनिकं रूपं प्रदातुं मानवता-धर्मनिरपेक्षता-समाजवाद-सामाजिक-राजनीतिकार्थिकदृष्टिभिः प्रयतितम् । सत्यपि विघ्नबाहुल्ये प्राकृतिकोपद्रवे प्रतिवेशि-पाकिस्तान-चीनयोराक्रमणे तथाऽऽन्तरिकासन्तोषे सर्वैः सह यथायथं सङ्घर्षरता विजयं प्राप्नुवन्तः साहाय्यं वितरन्तः समस्याः समाहितवन्तो राजनीतिकानि समाधानानि मैत्रीवर्धकानि कर्माण्याचरन्तो भारतनेतृकर्णधाराः प्रशासनाधिकर्तारः सर्वकार-सञ्चालन-पटवो मन्त्रिप्रवरा अन्ये सदस्याश्च मातृभूमेः सर्वाङ्ग-रमणीयं रूपं प्रास्तुवन् । यतो ह्यत्र —

प्राकृतिकसम्पदां संरक्षणाय भू-विज्ञानदृशा मिश्रितकृषिविकासः, खनिजखननापतटवेधनेन्धनतैलादीनामुपलब्धिः, भूधारणप्रथावरोधपूर्वकं भू-राजस्वसंवर्धनं रासायनिकसंरचना कृष्यभूमेरुत्पादनक्षमताभिवर्धनमन्ताराष्ट्रियव्यापारविधये विश्वव्यापिना दृष्टिकोणेन कौशलाभिवृत्तिभिश्चोद्योगानां प्राथमिक-द्वितीयक-तृतीयकादिक्रमेण निर्धारणं तथा तेषामायात-निर्यातयोः समुचितं व्यवस्थापनं पत्तनानां पोतानां यानानां कार्य-दाक्ष्यसम्पादनं भूयसीनां योजनानां माध्यमेन क्रमिकविकाससाधनं जनसुविधानां सुरक्षाणां सर्ववस्तुसौलभ्यानां नवनिर्माणानां ग्रामोन्नतीनां नगरोन्नतीनां यथासम्भवमात्मनिर्भरतानां सिद्धयोऽहर्निशं वर्धमाना एव लक्ष्यन्ते ।

श्रमः शमः शाश्वतशर्मकामना, हृदो विशालत्वमुदारदर्शनम् ।
परस्परं प्रेम च यत्र राजते, वहन्ति तत्रैव सुखप्रवाहाः ।।६।।

कियत् कथयामः, कियद् दर्शयामः कियद् वा प्रतिपादयामः ? बहुमुखोऽयं विकासो विश्वं साश्चर्यं बलादाकर्षयति हठान्मुखरीकरोति साग्रहं स्तोतुं प्रशंसितुं च प्रेरयति। तस्मादेव वयं सश्रद्धं तान् नेतृगणान् स्मरामस्तेषां चरणेषु श्रद्धापुष्पाण्यर्पयामश्च —

राष्ट्रं नः सुसमृद्धमस्तु जनता सर्वा सुखं जीवतु,
सम्पत् प्राकृतिकी विकासमयतामर्थोन्नतिर्जायताम् ।
उद्योगो भवतु प्रगाढगतिमानैक्यं चिरं तिष्ठतु,
स्वातन्त्र्यं दृढमस्त्वति प्रतिपदं यैर्वाञ्छितं तान् नुमः ।।७।।

☐

□ नारी-नीराजनम्

शक्तिः शाश्वतिकी समस्तजगतः क्षेमाय या द्योतते,
सैवाभाति भुवः प्रशस्तपटले नारीस्वरूपाञ्चिता ।
शौर्यौदार्य-दया-क्षमा-धृति-मति-प्रीति-प्रतीकायिता,
मूर्तिः सा महिलामयी स्वमहसा नीराजिता राजताम् ।।८।।

भारतीय-प्रज्ञायाः प्रथम-किरणस्य भूमाववतरणादारभ्याद्य यावत् प्रवर्तमानमितिवृत्तं साक्षित्वं बिभर्ति यद् वयं सर्वदैव नारीं प्रति नतशिरस आस्म, तस्याश्छायायां लालिताः पालिताः पोषितास्तोषितास्तथा समुन्नता अभूम । प्रजायाः संरक्षणं कुर्वती दुर्वहमुत्तरदायित्वं च निर्वहन्ती माताऽस्माकं समग्रेऽपि जीवने व्याप्ता तिष्ठति स्वीयं प्रन्यासं पदे पदे सा प्रेरयति प्रतिक्षणं किमपि विचक्षणं जीवनोन्नयन-सक्षणं शिक्षणं च वितरति, तत एव तस्या गुरु-पदं 'नास्ति मातृसमो गुरु' रिति शास्त्र-गिरा गौरवेण गीयते ।

मातुः शिक्षामवाप्य ध्रुवो गगनाङ्गणे ध्रुवतामगच्छत् प्रह्लादः सर्वमपि भूमण्डलं प्राह्लादयत्, भूयांस ऋषिपुत्रास्तपांस्याचर्य न केवलं लौकिकमेव, अपि तु पारलौकिकमपि समग्रं जीवनं सफलमकार्षुः । महीयसी मातृशक्तिर्महतां महसां भाजनम् । नवनीतमिव कोमलतमं हृदयं मातुः सर्वास्ववस्थासु विद्यमानं विलोक्यानुभूयैव पूज्याः श्रीशङ्कराचार्या अस्तुवन् —

'कुपुत्रो जायेत क्वचिदपि कुमाता न भवती'ति ।

भारतस्य भावना-शक्तिर्मातृतत्त्वं प्रति यावती विनम्राऽवर्तत तावती विश्वस्य कस्मिन्नपि खण्डे नैवातिष्ठत् । अयमेव देशोऽस्ति यत्र युगेभ्यो **'मातृदेवो भव'**[१] इत्युपदेशोऽदीयत । अस्या एव भावनायाः कारणात् प्रकृतिरूषा चन्द्रिका पृथ्वी दुर्गा गायत्री सावित्री सरस्वती लक्ष्मी देवपत्न्यो यक्षिण्यो नागकन्याश्चोपास्यानां देवीनां रूपैर्नारीणां देवीत्वेनोपासना-काण्डं पुष्णन्ति । अत एव देवा अपि निजगदुः —

विद्याः समस्तास्तव देवि ! भेदाः, स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्, का ते स्तुतिः स्तव्यपरापरोक्तिः ।।[२]

वैदिके वाङ्मये नारी **'ब्रह्मवादिनी-मन्त्रद्रष्ट्री-मेधाविनी-वीरसू'**-प्रभृतिभिरभिधानैः सम्मानिताऽऽसीत् । वैदिकमन्त्रद्रष्ट्रीषु **'रोमशालोपामुद्राऽपाला-विश्ववारा-घोषा-कद्रू-वौलोगी-सिक्तोर्वशी-सावित्री'**-सदृशीनामृषिकाणां पुण्यानि नामानि प्रसिद्धानि विद्यन्ते । **'येनाहं नामृता स्यां किं तेनाहं कुर्याम्'** इत्युद्घोषेण ब्रह्म-

---

१. तैत्तिरीयोपनिषदि । २. दुर्गासप्तशत्याम् ।

वादिनीत्वं स्फोरयद् गार्गी-याज्ञवल्क्ययोराख्यानं वैदिक-नार्या अतीवोन्नतं महनीयं स्वरूपं प्रस्तौत्येव।

पत्युः शुभेषु कर्मसु सहभागिनीत्वात् **'पत्नी'** गृहस्य व्यवस्थासम्पादनत्वाद् **'गृहिणी'** गर्भधारणाद् **'धात्री'** जन्मदाना**'ज्जननी'** जातस्याङ्ग-संवर्धनसहयोगिनीत्वाद् **'अम्बा'** शुश्रूषायां सर्वदा प्रसक्त्या **'शुश्रू'**—रित्यादिनामभिः सम्बोध्या नारी कन्या-वधू-पत्नी-मातृ-दारादि-रूपाणि निर्वाहयन्ती केवलमेतैरेवादरणीयतां न प्राप्नोदपि तु सा जन्मदानात् परं स्वीये कोमलेऽङ्के शिशुं पयः पाययन्ती समग्राममृतायमानां शिक्षामप्यदात्। तस्या दुग्धं केवलं शिशो रक्त-मांसयोः सञ्चयसाधनमेव न भवेदपि तु तस्य प्रत्येकं बिन्दुर्बालकस्य स्वर्णिमं जीवनं सज्जयेदथ च जगत्याः प्राङ्गणे यावन्त्युत्तमानि कर्माणि भवितुं शक्नुयुस्तानि ससुखं सम्पादयेदित्यप्यासीत् तस्या महानभिलाषः।

मातरमद्वितीयस्य गौरवस्य प्रतीकं मत्वा पृथिव्याः प्राकृतिकवस्तूनाञ्च पूजनप्रवृत्तौ नार्या इदमेव लोकमङ्गलं स्वरूपं प्रतिष्ठितमस्ति। अस्मादेव कारणान्नार्या भूमाववतरितानां सकलानां जड-चेतनानां स्वागतमभूद् येषु सरितः पशु-पक्षिणो लतादयश्चापि सम्मानभाजः सन्ति। इयमेवादरास्पदता भारतस्य 'भारतमाता' इति सम्बोधने निदानम्। मातृस्नेहं प्रति परमं सम्मानं समर्पयन्तो भारतीयाः शक्तिरूपेणैव तामामनन्ति प्रथयन्ति च।

साक्षाच्छक्तिरूपं धारयन्तीषु यथावसरं च प्रकटयन्तीषु वैदिकनारीषु विद्युदिव स्फूर्तिद्युतिश्चाभूताम्, तासामिङ्गितमात्रे सृष्टिप्रलयौ सम्भवावास्ताम्, न्यायालयानामधिकरणानि ताभिर्दर्शितेन पथा चलन्ति स्म। सति प्रसङ्गे पत्या सह स्कन्धात् स्कन्धं संयोज्य ता युद्धचन्ति स्मापि।

☐ राष्ट्र-रक्षा-दक्षा नार्यः

ऐतिहासके पक्षे शासनकर्त्र्यो महिला अपि वैदिके कालेऽवर्तन्त। जैमिनीयेऽश्वमेधे प्रमीलाऽभिधानवत्या महाराज्ञ्या राष्ट्रं प्रशासितमिति वर्णितम्। तयाऽर्जुनेन सह युद्धं विहितं पराजित्य च तया सन्धिः कृतो विवाहश्च स्वीकृतः। इतिवृत्तप्रथिताया राज्यश्रियश्चरितमतिशयमुदात्तं वर्तते। सिन्धो राज्ञो दाहरस्य पत्न्या आदर्शः परमोज्ज्वलोऽस्ति, अरबाक्रान्तृभिर्युध्यन् दाहरो दिवङ्गतस्तदा तत्पत्नी सङ्ग्राममकरोत्, भोज्यादीनां समाप्तौ च साऽन्याभिर्महिलाभिः सह चिताप्रवेशमकार्षीत्। इत्थं देशे निरुपद्रव-व्यवस्थायाः सञ्चालनस्य श्रेयोऽपि नारीणां पक्षे बहुधा प्रतिष्ठितं विद्यते।

इयमेव परम्परा भारतीय-संस्कृतेः सुर-सरितायां प्रवहन्ती साम्प्रतं यावदुपागच्छत्। कर्मठा धीराः सेवापरायणा महिलाः स्वीयं गौरवपूर्णं योगदानं व्यदधुः।

प्रवर्तिते' च भारतस्य स्वाधीनता-सङ्गरे साग्रहं सगर्वं सर्वस्वं समर्पयन्तीनां नारीमणीनां संस्मरणानि सत्यमेव बलान्नमयन्ति नः शिरांसि । अस्य देशस्य महतीनां नारीणां गाथाः सुदीर्घा विद्यन्ते । या प्राचीना संस्कृतिः परम्परा चावर्तताऽत्र देशे तां भारतस्य सुपुत्र्योऽस्थिरयन् न्यासरूपेण च ता अङ्कुरायमाणाभ्योऽग्रिमप्रजाभ्योऽपि तामदुः । इतिहासोऽस्य साक्ष्यस्ति यन्नारीभिः प्रत्येकं क्षेत्रे परमश्लाघनीयः सहयोगोऽदायि । यथा हि —

अनाशि दुर्गया द्विषश्च चण्डिका-स्वरूपया,
करे कृपाणिकाद्वयी धृता यथाऽऽजिधीरया ।
अकारि चाँदबीबि-संज्ञयाऽतिशूरवीरया,
प्रतीप-सैन्य-मर्दनं स्वदेश-रक्षण-क्षणम् ॥९॥

रणाङ्गणेऽसिमुष्टिका रराज झाँसि-शासिका,
शिशुं निबद्धय पृष्ठतः स्वदेश-रक्षणातुरा ।
गुरुण्डगण्डखण्डने प्रचण्डशौर्य-मण्डना,
स्वतन्त्रता-महारणे प्रधाननेतृतां श्रिता ॥१०॥

पतिं सुतं धरां धनं स्वकीय-बन्धु-बान्धवान्,
स्वमातृभूहिताय वै सुखेन या व्यसर्जयन् ।
स्वयं प्रियानसूनपि स्वदेश-वेश-रक्षणे,
विहस्य सङ्गरे बलिं व्यधुर्न शीलतामदुः ॥११॥

एतदेव नैव, जीवनस्य सर्वस्मिन् क्षेत्रे नार्या अपूर्वो योगः साहस-शक्ति-तपस्त्याग-विराग-विजृम्भितः प्रत्यभात् । यदा स्वदेशस्यास्य दास्यापास्तये शस्त्रास्त्रयुद्धवृत्तिं विसृज्य भारतीया महात्मगान्धिनो नेतृत्वे सत्याग्रहेण स्वातन्त्र्यसङ्घर्षं उपक्रान्तास्तदा देशस्य नारीशक्तिरपि पृष्ठपदा नातिष्ठत् । शिक्षाविशारदा उदात्तादर्शशालिन्यः परमप्रवीणा अस्य देशस्य नार्यो दुर्गायाः शक्तेः पार्वत्यास्तपसः सीतायाः प्रीतेः सावित्र्याः प्रतीतेर्दमयन्त्या धैर्यस्य तथा शकुन्तलाया दुर्धर्ष-सहिष्णुताया गुणानात्मसात् कृत्यात्मनो बलिदानाय सन्नद्धा अभवन् । धार्मिक-सांस्कृतिक-सामाजिक-परिवेशेषु विद्यमाना अपि राष्ट्रमेवैकं महनीयं लक्ष्यं मन्वाना राष्ट्रियान्दोलने सम्पृक्ताः । निःसन्देहं या महिलाः सुकुमाराः सुकोमलाः स्नेहस्य स्रोतस्विन्य आसँस्ता एवाङ्ग्लानां दुर्दान्तानत्याचारान् सहमानाः कारासु निपातिता दण्डप्रहारैर्जर्जरीकृता घुष्टि-मुष्टिप्रहारैर्नितरां ताडिताः पशुमारं मारिता अपि राष्ट्रस्य स्वातन्त्र्याय सत्याग्रहसङ्गरमात्मसादकुर्वन् । किञ्च —

न देशस्य सीमा न जातेर्विचारो, न वा सम्प्रदायाग्रहस्तत्र कश्चित् ।
न हीनोन्नता दृष्टिरेकं हि लक्ष्यं, पराधीनतापाशमुक्तेर्व्यराजत् ॥१२॥

स्वचिन्ताः समस्ताः पराकृत्य नित्यं, स्वमातुर्महत् कष्टमेव स्मरन्त्यः।
स्वराष्ट्रं समस्तेषु राष्ट्रेषु गर्वोन्नतं मस्तकं वीक्षितुं सप्रयत्नाः ॥१३॥

स्वकीयाधिकारस्य सम्प्राप्तये याः, समालम्ब्य सत्याग्रहास्त्रं वरेण्यम्।
सदा साकमेवात्र पुम्भिः प्रयाताः, स्त्रियोऽप्यस्य देशस्य रक्षार्थमुत्काः ॥१४॥

यदा च देशोऽयं पुनर्जन्मप्राप्त इव नवजीवनदायिनीं स्वतन्त्रतां प्रापत् तदा विशृङ्खलितं छिन्न-भिन्नमिमं देशं सर्वविधया दृष्टया सज्जयितुं संवर्धयितुं जातीयान् भेदभावान् विस्मृत्य विस्मार्य चान्तरात्मना स्वदेशस्य नेतारः संलग्ना अभवन्। विदेशिशासने स्त्रीषु पुरुषेषु बालकेषु च यद् नैर्बल्यं व्याप्तमभूत् तदपहर्तुं तेष्वात्मविश्वासं प्रबोधयितुञ्च सर्वेषु क्षेत्रेषु तत्परा अभूवन्। भारतीय-संविधाने नारीभ्यः 'समानोऽधिकारः' स्वीकृतः। तासां चतुरस्रेण सहयोगेन राष्ट्रमिदं सगौरवं नतमस्तकं विद्यते। अत एव —

धन्यं कन्यात्वमाप्य प्रथिमनि पथि प्रीतिपूर्वं चलन्त्यो,
हृद्या विद्या अधीत्य श्रुतिविषयगुणानात्मसात् कर्तुकामाः।
लोकं शोकप्रहीणं निजकृतिततिभिः संविधाय प्रकामं,
रामा रामाभिरामा नतिविषयगताः सन्ति नीराजनायाः ॥१५॥

इदानीमपि परम्परेयमविच्छिन्नतयाऽऽगच्छन्ती स्वच्छतयाऽस्माकं मातृषु, पत्नीषु पुत्रीष्वन्यासु च सम्बद्धास्वसम्बद्धासु वा महिलासु निरन्तरं वर्धमाना विराजमाना च विलोक्यते। अत एव च वयं कामयेमहि —

निखिल-मनुज-जातेर्जीवनस्योन्नतौ या,
विधृत-विविधरूपा, सर्वतो राति योगम्।
उदधिरिव गभीरा, काश्यपीवत् स्थिरा सा,
वितरतु भुवि भक्तिं राष्ट्रियां मातृशक्तिः ॥१६॥

माता राष्ट्रं राष्ट्रमेतच्च माता,
कश्चिद् भेदो नैतयोरस्ति विज्ञाः!।
तस्माद् राष्ट्रं मातरञ्चापि नित्यं,
श्रद्धा-बद्धाः सादरं पूजयेम ॥१७॥

□

[२]

ऋद्धि-कला

तीर्थराजः प्रयागः

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महेरणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

—यजुर्वेद० ३६।१४-१५-१६॥

आयान्त्यौ ये हिमाद्रेः शुचिशिखरवरात् पावयन्त्यौ वहन्त्यौ,
भिन्नं भिन्नं श्रयन्त्यावथ विकटपथौ प्राप्नुतो यत्र सङ्गम् ।
ते गङ्गा-सूर्यपुत्र्यौ सकलजनगणायैकतां सन्दिशन्त्यौ,
राजेते सङ्गमः स क्षयति कलिमलं तीर्थराजः प्रयागः ॥१॥

भारतं **'नदीनां देश'** इति प्रथितं नामापि धारयति। पर्वतानां पावनेऽभ्योऽङ्केभ्यो निःशङ्कमारङ्कराजं पुनन्त्यः सरितो 'लोकमातर' इति मत्वा समाद्रियन्ते। दैनिकोपयोगादतिरिक्तं कृषिक्षेत्रसेचन-व्यवहारमार्गौद्योगिक-साधन-मत्स्य-समुत्पादन-जलविद्युदुत्पादन-पर्यटन-नौकाविहार-सन्तरणादिषु परमोपयोगितयैतासां लोकमातृत्वं सिद्धमेव। आद्य-मानवसंस्कृतेः पोषणं नदीनां तट एवाभवत्। कतिपय-मरुभागमतिरिच्य प्रत्येकं प्रदेशस्य प्रायः प्रतिशतं सप्ततिमितो भागो नदीनां प्रत्यक्षेण परोक्षेण वा प्रभावेण प्रथितोऽस्ति। आयामाकार-जल-प्रवाहादीनां दृष्ट्या सरितां भौगोलिकं राष्ट्रियमन्ताराष्ट्रियं च महत्त्वमपि वर्धते।

वेदेषु महतीनां नदीनां स्तुतिमन्त्राः सन्ति तेषु 'तिष्ठन्त्यः स्रवन्त्यः स्यन्दमानाः कूप्याः सूद्या धार्या'-प्रभृतीनि सम्बोधनानि महत्त्वपूर्णानि विद्यन्ते। एतेषु नामसु सरांसि निर्झराः प्रपाता ह्रदा अपि गुण-धर्मैः समाविशन्ति। भारतस्य महत्यो नद्यो यद्यपि भूयस्यः सन्ति तथापि गङ्गायमुनयोर्नामनी सर्वविदिते स्तः। इमे द्वे अपि भगिन्यौ हिमालयान्निःसृत्य पूर्वं पृथक्-पृथङ्मार्गमनुसरन्त्यौ भारतभुवं परिषिञ्चन्त्यौ प्रयागे पुनर्मिलिते। अनयोर्मेलनस्थली **'सङ्गम'** इति प्रथितिं जगाम। परःसहस्रवर्षेभ्यो भारतीयाः पुण्यशालिनस्तपस्विनो महर्षयो राजान आस्तिकाश्च पुण्येषु पर्वसु दूरदूरादुपेत्यात्र स्नात्वा चात्मानं कृत्यकृत्यं मन्वते।

कविकुलगुरुः कालिदासो भगवतः श्रीरामचन्द्रस्य मुखेनास्य सङ्गमस्थलस्य कियन्मनोहरं वर्णनमकारयदिति मनाङ् निपीतव्यमेव —

"क्वचित् प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ।।

क्वचित् खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ।।

क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभः-प्रदेशा ।।

क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि ! विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ।।

समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः ।।"[1]इति ।

□ नेहरू-कुल-कीर्तयः

एतादृशेऽतिमहनीये तीर्थराजे प्रयागे—

समृद्धेः सौख्यस्य प्रसृति-रसितं ज्ञान-गरिम-
प्रशस्तं स्वाराज्योदयभुवमिवानन्द — भवनम्
निधानं नीतीनां यदलमभवद् भारतभुवः,
प्रधानामात्यानां त्रितयजनुषो गौरवयुतम् ।।२।।

तच्चानन्दभवनं नेहरू-कुल-कमल-दिवाकरस्य श्रीमतः **पण्डितमोतीलाल-नेहरू**-महाभागस्य निरन्तर-श्रम-साधना-प्रतिभा-साफल्यस्य विमलं परिणति-फलमभूत् ।

नेहरूपरिवारः किल मूलतः कश्मीराभिजन आसीद् यत्र नैसर्गिकी सुषमा स्वच्छन्दममन्देनानन्देन विलसति । समुन्नता हिममण्डिताः पर्वताः, सलिलसीकरैर्नृत्यन्तो निर्झराः, समन्ततो रसयन्तः सरसानि सरांसि, सुमनोभिः सुरभितानि विपिनानि तथा कुङ्कुम-क्षुप-मण्डितान्युपवनानि यत्रानुपमं किमप्यपूर्वं सौन्दर्यं किरन्ति ।

ईशवीयाष्टादश्याः शत्याः प्रारम्भे सारस्वत-साधनासम्पन्नानां सङ्ख्यावतां गौरवेणापि कश्मीरस्य महती ख्यातिरासीत् । सन् १७१६ ई० वर्षस्य नैकटिके काले मुगलसम्राट् **'फर्रुखसियरः'** कश्मीरानागच्छत् । तत्र वसत्सु ब्राह्मण-परिवारेषु

---

१. रघुवंश-महाकाव्यस्य १३ सर्गे, पद्यानि ५४ तः ५८ ।

पण्डितस्य **'राज-कौल'**स्य वैदुष्यं प्रतिभावैशिष्टयञ्च दृष्ट्वा सम्राट् तं प्रत्याचकर्ष। सादरं स्वस्यां राजसभायां सम्मानार्हं पदं दातुं सम्प्रार्थ्य स तं राजधान्यां दिल्ल्यामागन्तुं वस्तुं च निवेदितवान्। आगतवन्तं च महत्त्वपूर्णोच्चाधिकारिपदे नियुज्यावासाय तदानीं नगरस्य मध्यतो गच्छन्त्याः कुल्यायास्तटे भवनमेकं तस्मा अदात्। राजकौलस्य सन्ततयः कश्मीरवास्तव्येषु 'नहर'स्य निकटे निवासकारणात् **'कौल-नेहरू'**-रथवा **'नेहरू'**रितिरूपेण ख्यातिं प्राप्नुवन्। मुगलसम्राजः सकाशाद् राजकौलाय भूस्वामित्वरूपेण केचन ग्रामा अपि प्राप्ता आसन् परं दुर्भाग्यवशात् तेषां संरक्षका बहुदिनानि यावज्जीविता नातिष्ठन्। अग्रिमेषु वर्षेषु सम्राजामधिकाराणां ह्रासेन सहैव भूस्वामिताधिकारा अपि क्षीणतां गता अन्ते च नाममात्रायां भुवि भूधारकाधिकारः सीमितोऽतिष्ठत्। पण्डितस्य राजकौलस्य पौत्रौ **'मोसीराम-कौल-साहबरायकौला'**वेतेषामधिकाराणामन्तिमौ भोक्तारावभूताम्।

मौसीरामकौलस्य पुत्रः **श्रीलक्ष्मीनारायणनेहरू**र्मुगलशासने-**'ईस्टइण्डिया-कम्पन्याः'** प्रथमो वाक्कीलोऽभवत्। तदीयः पुत्रः **श्रीगङ्गाधरो**ऽभूत् स च १८५७ तमेशवीयवर्षस्य विद्रोहकाले देहल्या आरक्ष्यधिकारिपदे कार्यमकरोत्। विद्रोहे तस्मिस्तस्य सर्वाऽपि सम्पदपहृता वृत्तिश्चापगता। यत्र तत्पूर्वजाः प्रायः सार्धशतवर्षेभ्यः कृतावासा आसन्, सा दिल्ली हठान्मोचिता, स हि सौभाग्यशाल्यवर्तत यतः परिवारं संरक्ष्य शरणार्थिभिः सह निःसृत्य सुरक्षाया अन्वेषणायां स **'आगरा'**-नगरं स्थितः। अस्यैकं कारणमिदमप्यासीद् यन्नेहरूपरिवारः स्वस्थः सुन्दरो गौरवर्णवांश्चासीत्, अतो जनास्तमपि विदेशीयं गौराङ्गं मन्वते स्म। वृषभशकटेनागरानगरं गच्छतोऽप्यस्य परिवारस्यैकां बालिकां गौराङ्गीं दृष्ट्वाऽऽङ्ग्लसैनिकास्तामपहृतां मत्वा गङ्गाधरं पीडितवन्तः परमाङ्ग्लभाषाज्ञानवशात्ततो मुक्तिरभूत्। इत्थं पण्डितो गङ्गाधरनेहरूस्तत्र निवासमारभत। आगरानगरे स्वीयं भाग्यं सौभाग्ये परिणमयितुं चेष्टमानस्य श्रीगङ्गाधरस्यासमय एव चतुस्त्रिंशद्वर्षाणामल्पीयस्यायुषि सन् १८६२ तमवर्षस्य प्रारम्भिकेषु दिनेष्वेव मृत्युरभवत्। तदीया धर्मपत्नी **'जियोरानी'**तेनाघातेन भृशं दुःखिता सती 'विपद् विपदमनुधावती'ति भणितिं स्मरन्ती विगतानागतभय-चिन्तनैर्व्याकुलतामनुभवति स्म। विपदियमीदृश्यासीद् यस्या भारेण भुग्ना अनेके प्राचीनपरम्परानुसर्तारः परिवारा विस्मृतिं प्रापिता अभूवन्। सौभाग्यवशात्तस्या ज्यायांसौ पुत्रौ वंशीधर-नन्दलालौ साहसिनौ प्रबुद्धौ चाभूताम्। परिवारस्य पारवश्यात् पितृपादानां चाकाल एव स्वर्गमनात् स्वयं स्वपदयोरुत्थाय तौ किमपि कर्तुमचेष्टताम्।

परेशानुकम्पया श्रीवंशीधरस्तत्रैवागरानगरे स्वप्रतिभाप्रयासयोराधारेण ब्रिटिश-शासने भूराजस्व-सम्बन्धिनि न्यायालये 'निर्णय-लेखक'स्य पदे नियुज्य कार्यमारभत। स चाग्रे स्वस्य श्रमेण कर्मकौशलेन च वर्धमानः सहायक-न्यायाधीश-

पदं यावदुन्नतिमवाप्नोत् । द्वितीयः श्रीनन्दलालश्च पूर्वं राजस्थानस्य **'खेतड़ी'**-राज्येऽध्यापकपदे नियुक्तः सन् कर्माकरोत् ततः परं च राज्ञः **'श्रीफतेहसिंहस्य'** 'नैज-सचिव'पदे नियुक्तः कालान्तरेण च स मुख्य-मन्त्रित्वमप्याप्नोत् ।

यो वै परिश्राम्यति बुद्धियोगात्, कृत्ये प्रयस्यँश्च पुरः प्रयाति ।
कुर्वन् सदा कर्म विना प्रमादं, नाप्नोति किं सोऽत्र पदं प्रशस्यम् ? ॥३॥

श्रीमतो गङ्गाधरस्य दिवङ्गमनान्मासत्रयानन्तरं सन् १८६१ तमेशवीय-वत्सरस्य मईमासीये षष्ठे दिने श्रीमती जियोरानी तृतीयं पुत्रं प्रासूत । अतः श्रीगङ्गाधरः स्वस्यास्य तृतीयपुत्रस्य मुखं द्रष्टुं नापारयत् । जातकस्याभिधानं ज्योतिःशास्त्रानुसारं **"मोतीलाल"** इति निर्धारितम् । अयमेव पण्डितो मोतीलाल-नेहरूः स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रिणः **श्रीजवाहरलालमहोदयस्य** पिता, द्वितीयप्रधानमन्त्रिपदे विराजमानायाः श्रीमत्या **'इन्दिरा गान्धी'**-महाभागायाः पितामहस्तथा तृतीयस्य वर्तमान-प्रधानमन्त्रिणः **श्रीराजीवगान्धिनः** प्रमातामह आसीत् ।

श्रीवंशीधरनेहरूः शासकीयः कर्मचार्यभूत् । अतः स्थानान्तराशङ्कावशात् परिवारस्य दायित्वनिर्वाहस्तस्मै न समभाव्यत । तस्मादेव श्रीनन्दलालः श्रीमतो मोतीलालस्य लालनं पालनं खेतड़ी-नगर्यां स्वसन्निधावेवाकरोत् । अयं खेतड़ी-निवासस्यैव प्रभाव आसीद् यन्मोतीलाले बाल्यादेव वैभव-पूर्णस्य जीवन-यापनस्य तथोत्तमोत्तमवस्तूनामुपयोगस्य भावनाऽतितरां बलवत्यभूत् । मातुः स्नेहोऽपि नासीन्न्यूनः । खेतड़ीराज्ये राज्ञः फतेहसिंहस्याध्यापकः **काजीसदरुद्दीन**स्तमपाठयत् । द्वादशवर्षाणां वयोऽवधि श्रीमोतीलालः केवलमारबीं फारसीं चाध्यगीष्ट । फारसी-भाषायास्तदीयं ज्ञानमियद्विशिष्टमासीद् यत्ततोऽधिकवयःशालिनोऽपि तं सम्मान-यन्ति स्म ।

श्रीनन्दलालनेहरूमहोदयः प्रायो दशवर्षाणि खेतड़ीराज्ये सेवां कुर्वाणः सुयोग्यप्रशासकत्वेन प्रसिद्धिमगच्छत् । सन् १८७० तमवत्सरस्य नवम्बरमासि त्रिंशत्-तारिकायां राजा फतेहसिंहः स्वान् प्राणानत्यजत् । तदा श्रीनन्दलालेनापि खेतड़ी त्यक्ता । आगरानगरमागत्य स विधिशास्त्रमधीतवान् तत्रैव च प्राड्विवाक-व्यवसायमकार्षीत् । यदोच्चन्यायालय इलाहाबादनगरं गतस्तदा तेन सह सोऽपि तत्रैवागच्छत् ।

श्रीमोतीलालः सोत्साहं वर्धमानः श्रीवंशीधरमहानुभावस्य निकटे कर्णपुरे, यत्र स नियुक्त आसीद् एकस्मिन्नुच्चविद्यालयेऽध्ययनमारभ्य प्रथमश्रेण्या उच्च-विद्यालयीयां परीक्षामुदतरत् । अध्ययन-नैपुण्येन सहैव श्रीमोतीलालः क्रीडायां व्यायामे मल्लक्रीडायाञ्चानुरागवानासीत् । आत्मविश्वासेन साहसेन च स वैदेशिकीं

भाषां मनोयोगपूर्वकं पठति स्म। जिज्ञासा तथा जीवनं प्रति तस्याभिरुचिः परिपूर्णाऽवर्तत । इलाहाबादनगरस्य 'म्योर-महाविद्यालये' तदीयं छात्रजीवनं किमपि शैक्षणिकदृष्ट्या महत्त्वपूर्णं नासीत्। उपाधिपरीक्षायां प्रविश्यापि स प्रथमपत्रं प्रत्यसन्तुष्टो भूत्वाऽग्रे परीक्षादानेऽनुत्साहितोऽभूत्। एवं महाविद्यालयस्याध्ययने निरुत्साहवानपि स प्राचार्य**'हेरिसन'**स्य तथाऽन्येषामाङ्ग्लप्राध्यापकानां सम्पर्केण निर्माणकारि-प्रभावेणाभिभूतः सुतरां स्वजीवनं प्रति विवेकपूर्णां तार्किकीं संशयशीलां दृष्टिं तथाऽऽङ्ग्लसंस्कृतिं वैदेशिक-संस्थाः प्रति च गभीर-प्रशंसाभावं सम्प्राप्तवान्। विश्वविद्यालयस्य शिक्षा मोतीलाले पुस्तकीयज्ञानस्य भारमारोपयितुं यद्यपि समर्था नाभवत् तथापि तया पश्चिमस्य व्याप्तायाः संसृतेर्गवाक्षोद्घाटने साहाय्यमवश्यं दत्तम्। यतो हि —

सम्पर्कोऽज्ञजनानामवगमयति मानवं सदा सत्यम्।
सम्पर्कः सुजनानामुन्नयति च जीवनं सत्ये।।४।।

एकस्मै नवयुवकाय, य उत्तराधिकारे न धनं न च भूमिं प्राप्नोत्, तस्मै — स्वाध्ययनं प्रति क्रीडनमिदं समुचितं नासीत्, किन्तु सौभाग्यान्मोतीलाल आत्मानं यथासमयं समधारयत् । स विधिविदो व्यवसाये गन्तुं निरचिनोत्, यतस्तस्मिन् ज्यायसा सहोदरेण श्रीनन्दलालेन साधारणं साफल्यं प्राप्तमासीत्। मोतीलालनेहरूविधिशास्त्रस्याध्ययने कठिनं परिश्रमं कृतवान् फलतः परीक्षायां सफलेषु च्छात्रेषु स प्रथमं स्थानं लब्धवान्। स स्वपरिवारस्य सुहृदस्तथा वरिष्ठस्य विधिशास्त्रज्ञस्य छत्रच्छायायां सन् १८८३ तमे वत्सरे कानपुरनगरे वाक्कीलता-व्यवसायं प्रारभत।

कश्मीरवासिब्राह्मणेषु तदानीं बालविवाहस्य प्रथाऽवर्तत। श्रीमोतीलालस्य विवाहोऽपि तथैव बाल्य एवाभूत् किञ्च विंशति-वर्षायुषि तस्यैकः पुत्रोऽपि समुत्पन्न आसीत् परं तस्य विवाहस्यान्तः दुःखदावस्थायामभवद् यस्मिन् मातुः पुत्रस्य च मृत्युरभूत् । तदनन्तरं श्रीमोतीलालस्य द्वितीयो विवाहोऽपि शीघ्रमेव समपद्यत । **'स्वरूप-रानी'** तस्य द्वितीया पत्नी नेहरू-जनेभ्यो भिन्ना 'ठुस्सू'-परिवारस्यासीद्, यस्तेष्वेव दिवसेषु कश्मीरान् परित्यज्य समतलायां भूमौ प्रवास्यवर्तत। शरीरेण स्वस्थाऽऽकृत्या रमणीया प्रकृत्या मृदुला च सा पूर्णरूपेण मनोहरा सर्वाङ्गेण च समाऽविद्यत।

रमणीयसर्वाङ्ग्याः कोमलाङ्ग्याः स्वरूपरानीमहाभागायास्तथा प्रसन्नचेतसः स्वस्थस्य श्रीमोतीलालस्य युगलमतीव सुखदमभूत्। कियन्तिचिद् वर्षाणि तयोः सुखेन व्यतीतानि। ततः परं स्वरूप-रानी स्वस्या अस्वस्थतायाः कारणाच्चिरं खिन्नेवातिष्ठत्। तस्य प्रथमः पुत्रो जीवनं न प्रापत्। १४ नवम्बर १८८९ तमे वर्षे तस्या द्वितीयस्य शिशोर्जन्माभवत्। तस्याभिधानं **'जवाहरलाल'** इति

निर्धारितम्। हिन्दू-परिवारे पुत्रस्य तथोत्तराधिकारिणो जन्म सुखस्य सर्वाधिकं श्रेष्ठं चिह्नं मन्यते स्म। अतः प्रथमविवाहस्य दुःखदावसानकारणादयमवसरः श्रीमोतीलालायापि प्रसन्नता-वर्धकोऽभूत्।

तेष्वेव दिनेषु कानपुरस्य जनपदीय-न्यायालये त्रिवर्षावधिक-प्रत्याशितायाः कालस्य पूर्तौ तदीया महत्त्वाकाङ्क्षा बलवती समजायत। तदनुसारमेव स इलाहाबादनगरे तत्रत्योच्चन्यायालये स्वव्यवसायं कर्तुं निर्णीतवान्, यत्र ज्येष्ठभ्रातुः श्रीनन्दलालस्य वाक्कीलता-व्यवसायः समुन्नतः समुचितायप्रदश्चासीत्। तत्र गत्वा श्रीमता मोतीलालेन कार्यमारब्धं तथा क्रमश उन्नतिं चाकरोत्। स्वकीयाध्ययन-पटुता-प्रस्तुतिप्रवीणता-स्वाभाविक-निपुणतादीनां वैशिष्ट्याद् मोतीलाल-महाभागस्य वाक्कीलता-व्यवसाये निरन्तरं प्रभावशालित्वमागच्छति स्म। तदैव पुनर्नियत्याः क्रूरप्रहारोऽभवत्। द्वाचत्वारिंशद्वर्षाणां लघीयसि वयसि श्रीनन्दलाल-महोदयस्य सन् १८८७ तमे वर्षे सहसा देहावसानं जातम्। स हि स्वकीयां पत्नीं नन्दरानीं, पुत्रीद्वयं पञ्च पुत्रांश्च विमुच्य दिवङ्गतः। पञ्चविंशतिवर्षायुष्को मोतीलालोऽनेनाघातेनैकवारं पुनरसहाय इवाभूत्। परिवारस्य महद् दायित्वं तस्मिन्नापतत् किन्तु परमेण पुरुषार्थेण कर्तव्यं पालयन् प्रगतिं साधयन् प्रियस्य भ्रातुरभावेऽपि स्वीया महत्त्वाकाङ्क्षाः सफलयन् द्रव्योपार्जनाय स्वं व्यवसायमुन्नमयंश्च भृशं पर्यश्राम्यत्। यतो हि--

श्रम-रुचि-कृतिनिष्ठा आत्मकर्म-प्रतिष्ठा,
समुचित-विधि-बोधः कौशलं नो विरोधः।
प्रतिपदमुदयेच्छा हार्दिकी वृत्तिरच्छा,
मनुजमहरहस्ता उन्नतौ संनयन्ति ॥५॥

तरुणो विधिविशेषज्ञः श्रीमोतीलाल उन्नतिशिखरारोहणे सौभाग्यवानासीत्। दीर्घसङ्घर्षं विनैव स आत्मव्यवसाये परामुन्नतिमलभत। विधिशास्त्रीयाणां नियमानां ज्ञानं तदीयमुत्कृष्टमासीत् तथोत्तराधिकारसम्बद्धानां हिन्दू-विधीनां सोऽद्भुतं प्रावीण्यमधारयत्। लाखन-राज्यस्योत्तराधिकारविषयके व्यवहार[1] एव स पर्याप्तं धनं प्राप्तवान्। सन् १८९० तमे वर्षे प्राचीनमावासं त्यक्त्वा स **'सिविल-लाइन्स'**-स्थिते भवने वस्तुमागच्छत्, यत्र यूरोपीया यूरेशियनाश्चावसन्। सन् १९००तमे हायने श्रीमोतीलालनेहरूमहाभागो विधिशास्त्रव्यवसाये चरमं सीमानमारूढः, आयस्य स्थितिर्या प्रारम्भिके व्यवहारे पञ्चरूप्यकात्मिकाऽऽसीत् सैव तदानीं प्रतिमासं दशसहस्ररूप्यकप्रदायिनी संवृत्ता। तदानीमेव स एकं विशालं प्राचीनं भवनमक्रीणात्। तस्य भवनस्य स्वरुच्यनुसारं परिष्करणं परिवर्धनं च

१. लाखनराज्यात् प्रतिमासं सार्धद्विसहस्रमुद्राः प्राप्यन्ते स्म।

विधाय —**'आनन्द-भवन'**—मित्यभिधानं कृतम् । भरद्वाजाश्रमस्य निकटे राजमानमिदं भवनं सर्वाभिरावश्यकताभिः परिपूर्णं नैसर्गिक-सौन्दर्य-विराजितं गृहारामादिसङ्कुलं राजप्रासाद इवातिरमणीयं सुखकरञ्चावर्तत ।

प्रचुरगुणशालिता वाक्पटुत्वं कार्यकौशलं च धारयद्भिः श्रीमोतीलालमहाभागैरसीमितं धनमुपार्जितं तथा तदनुपातेनैव तैर्व्ययोऽपि विधीयते स्म । आनन्दभवनस्य स्वागत-प्रकोष्ठः कस्यापि राज्ञः प्रकोष्ठान्न्यूनो नाभूत् । प्रत्यहं देशीया वैदेशिकाश्चातिथयस्तत्रागत्य यथेप्सितं स्वागतमुपहारञ्चावाप्य नितान्तं मोदन्ते स्म । आङ्ग्लसभ्यतायामापादमस्तकं निमग्ना आङ्ग्लानां योग्यतायां कार्यक्षमतायां चास्थावन्तस्ते 'जीवनं जीवनाये'ति सिद्धान्तमात्मसात्कृत्य जीवन्ति स्म । द्रव्योपलब्ध्या सन्तुष्टास्ते स्वपुत्रमेकदाऽऽत्मनः साफल्यरहस्यं पत्रद्वाराऽसूसुचन् । तैर्लिखितं यन्मम द्रव्योपार्जनसाफल्यमूलमिदमस्ति —

द्रव्यं वाञ्छन्ति भूयः कतिपयमनुजाः किन्तु ते नैव ताव-
च्चेष्टन्ते कर्म कर्तुं श्रम-दम-सहितं, तेन नेष्टं लभन्ते ।
कार्यं कुर्वन् नितान्तं परमिह मनुजो यः श्रमं साहसञ्च,
स्वायत्तीकृत्य लक्ष्ये व्रजति भवति तत् तस्य साफल्यमूलम् ।।६।।इति ।

आशावाद आत्मविश्वासश्च श्रीपण्डितनेहरूमहाभागानां जीवनस्य महनीयं तत्त्वद्वयमासीत् । परिश्रम-विश्रामयोः कलां जानानास्ते मल्लक्रीडायामश्वारोहणे मनोरञ्जनेऽपि तथैव रसं गृह्णन्ति स्म यथा स्वीयानां विवादोपस्थापकग्राहकाणां विषये पक्षोपस्थापने समर्थने च दत्तचित्ता भवन्ति स्म । स्वाभाविक्या स्वतन्त्रवृत्त्या बहुधा विदेशयात्राः सम्पाद्य वैदेशिकानि सौख्यसाधनानि तथा मृत्तैलयानानि सङ्गृह्य तदानीन्तनेषु प्रसिद्धेषु वाक्कीलेषु प्रथमं स्थानं तेऽलभन्त ।

यद्यपि श्रीमोतीलालमहाभागाः अन्तर्मुखेनाभिजात्येन परितुष्टा आङ्ग्लपद्धतिकजीवनेन सम्पन्नाः स्वजातीयानामत्याचारातङ्कयोरुल्लङ्घनकर्तारश्चावर्तन्त, परं ते भारतीयाया आत्मसंस्थायाः संयुक्तपरिवाराद् वियुक्ता नाभूवन् । तेषां भ्रातुर्नन्दलालस्य यद्ऋणमवशिष्टमासीत् तत् ततोऽप्यधिकरूपेण प्रतिदत्तम् । स्वकीयभ्रातृव्यानां लालन-पालनं स्वसन्ततीनामिवैव विहितम्, तेषां धर्मपत्नी स्वरूपरानी परम्परागतसंस्कारवत्यासीत् सा यूरोपीयान् व्यवहारान् स्वीकृत्यापि रूढिगतान् संस्कारान् कथमपि न व्यसृजत्, सा तीर्थयात्रादिषु सादरमनुरज्यति स्म, परं तां पराकर्तुं कदापि श्रीमोतीलालैर्दुराग्रहो न कृतः । एवमेव तेषां भ्रातृजाया-श्यालिकादीनां पुरातन-विचार-व्यवहारेष्वपि हस्तक्षेपस्तैर्न विहितः । एतदासीत् तेषां स्मरणीयं वैशिष्टचम् ।

सन् १८८९ ई० वर्षे श्रीजवाहरलालस्य जन्मनोऽनन्तरं, १८ अगस्तस्य १९०० ई० दिने स्वरूपरानी द्वितीयां सन्ततिं कन्यां प्रसूतवती, तस्या अभिधानं

'सरूप' इति निश्चितं किन्तु गृहव्यवहारस्य नाम **'नन्नी'** इत्यासीत् तदेव यूरोपीय-संरक्षिकाया आकारणया **'नन'** इति सम्पन्नम्। सन् १९०५ ई० वर्षेऽत्यधिकमानन्दोत्सव आयोजितः, यदा विचित्रसंयोगवशाज्जवाहरलालस्य जन्मतिथावेवैकस्यान्यस्य पुत्रस्य जन्माभूत् किन्त्वयमानन्दश्चिरं नास्थात्, स शिशुरेकमासाभ्यन्तर एव दिवमगच्छत्। वर्षद्वयानन्तरं सन् १९०७ ई० वर्षे नवम्बरमासस्य द्वितीये दिने पुनः कन्याजन्माभवद् यस्या नाम **'कृष्णा'** इति निर्धारितं गृहनाम च "बेट्टी"ति स्वीकृतमासीत्।

विश्वस्तो निजकर्मणि प्रतिदिनं कर्तव्यनिष्ठो जनः,
प्रत्यङ्गं स्वकृतेर्मुदा विमलयन् यो जीवनं जीवति।
तस्येप्सा-रहिताः स्वयं समुदिताः श्रेयोमयाः सर्वतः,
पूर्यन्तेऽत्र मनोरथा अथ वृथा संयान्ति विघ्ना लयम्।।७।।

□ श्रीमोतीलालनेहरूणां राजनीतौ प्रवेशः

स्वान्ते यस्य विजृम्भते निजभुवो भक्तिर्दृढा सन्ततं,
योऽन्यायान् सहते न मौन-मनसा निष्कारणं निन्दितान्।
आत्मानं मनुते मनागपि च यः कर्तव्यकोटौ स्थितं,
दृष्ट्वा सोऽत्र भुवः प्रपीडनमथो तिष्ठेत् कथं निश्चलः?।। ८ ।।

आत्मन उन्नतौ व्यवसाये च संलग्नमानसानां श्रीमोतीलालनेहरूणां तेषु दिनेषु भारतीय-राजनीतिं प्रति कोऽप्युत्साहो नासीत्। तेषां व्यस्ततैवेयत्यभूद् यत्ते तस्यै समयं दातुं नाशक्नुवन्। प्रारम्भे ते यदा-कदा राष्ट्रिय-काङ्ग्रेसस्य केषुचिदुपवेशनेषु भागमगृह्णन् परं तत्र तेषां मनो नारमत।

राष्ट्रिय-काङ्ग्रेसस्य स्थापना सन् १८८५ तमे वत्सरे—**'एलन ह्यूम'**-नामकेनैकेनाङ्ग्लेन (आई० सी० एस०) अधिकारिणा विहिता। ततो लार्डकर्जनोऽप्यस्या आशीर्वादमदाद् यः १८९९ तमे वर्षे भारतस्य महाधिशास्ता नियुक्तः। तस्य सम्मतौ भारतीयानामसन्तोषाभिव्यक्तये संस्थेयमेकमुत्तमं माध्यममासीत्। भारतस्याङ्ग्लभाषाभाषिणो भाषाविदश्च मध्यमवर्गीयाणां संस्थामुचितामन्यन्त। श्रीमोतीलालमहाभागाः १८८८ तथा १८९२ वर्षयोरस्या उपवेशनेषु प्रतिनिधिरूपेणोपातिष्ठन् १९०२ तमे वर्षे च ते कार्यसमितेः सदस्यत्वेन वृताः। १९०५ ई० पर्यन्तं ते मृदुप्रस्तावस्वीकरणं तथा प्रार्थना-पत्रप्रेषणमतिरिच्य विशिष्टां कामपि रुचिं नादर्शयन्। तेषां सम्बन्ध उदारवादिभिरासीदतस्ते समुत्पन्नानां काठिन्यानां समाधानं वैधानिकेन मार्गेणैवावाञ्छन् किञ्चोग्रवादिनां क्रान्तिकारिकर्मणां च प्रबलं विरोधमप्यकुर्वन्।

इत्थं मध्यवर्तिनि दशके काङ्ग्रेसं प्रति सत्यामपि निष्ठायां विशिष्यात्मोन्नतौ यतमानानां पण्डितमोतीलालनेहरूणां सुखिनि जीवने बङ्गविभाजनान्दोलनेन भूयोऽपि राजनीतिकेन तापमानेनोष्णताऽऽनीता। ते सङ्घर्षाङ्गणमवतरिताः। तदानीं मृदु-दले ताः सुप्रसिद्धा विभूतय आसन् याः काङ्ग्रेसस्योद्भवकालादेव सम्बद्धा अभूवन्। **फीरोजशाहमेहतासदृशाः** सङ्घटकाः, **दीनशावाचा**-समाः प्रचारकाः **सुरेन्द्रनाथबनर्जी**-समानाः कुशला वक्तारस्तासु विभूतिष्वशोभन्त। परं राजनीतिकस्य मृदुदलस्य सर्वतो योग्या व्याख्यातारः **श्रीगोपालकृष्णगोखले**महोदया आसन्। श्रीगोखलेमहानुभावा रानाडेमहोदयस्य शिष्याः श्रीगान्धिनां परामर्शदातारस्तथा श्रीमोतीलालमहाशयानामादर्शा अवर्तन्त। काङ्ग्रेसस्य प्रथमवंशधराणां भावनाभ्य आशाभ्यस्तथा कल्पनाभ्यः श्रीगोखलेमहोदया वाणीं ददाना आसन्। ते प्रभुजातये प्रजावर्गं 'केवलं पादपीठं' मन्वानस्य **'सङ्कीर्ण-साम्राज्यवाद'**-स्य स्थानेऽपेक्षाकृतमेकम् **'उदात्तं साम्राज्यवादं'** वाञ्छन्ति स्म तथैव विधातुं च जनान् सम्बोधयन्ति स्म।

बङ्ग-विभाजनस्य घोषणानन्तरं सन् १९०५ ई० वर्षे वाराणस्यां 'भारतीय-राष्ट्रिय-काङ्ग्रेस'स्य प्रथमोपवेशनं श्रीगोखलेमहानुभावानामाध्यक्ष्ये सम्पन्नम्, तत्र तेषामाग्रहेण श्रीमोतीलालमहाशया अपि सम्मिलिताः। आसीत् तत्र मृदूग्रदलयोः सङ्घर्षस्य सम्भावना, परं संयतेनानुशासितेन स्वरेण विहितया कर्जनस्य नीतीनामालोचनया तथा न सम्पन्नम्। ततः परं सन् १९०६ ई० वर्षे कलकत्तानगर्यां काङ्ग्रेसस्याधिवेशनं **श्रीदादाभाई नौरोजी**—महोदयानामाध्यक्ष्येऽभवत्। तत्रापि मृदूग्रदलयोर्विचारवैमत्याज्जायमानं विघटनं रोद्धुं तथा सम्भूय स्वातन्त्र्यान्दोलनप्रवृत्तये प्रवर्तितम्। तदानीं लालालाजपतरायाः श्रीबालगङ्गाधरतिलकास्तथा केचन प्रभावशालिनो नेतार उग्रदलेऽवर्तन्त। तेष्वपि श्रद्धधानाः श्रीमोतीलालमहाभागा आत्मीयां मृदुपद्धतिं परिहातुं नैच्छन्। यतः—

ये बुद्धिमन्तो निजकार्यदक्षाः, स्वयं विमृश्यैव पुरः प्रयान्ति।
पश्चात्पदास्ते न भवन्ति नूनं, न वा कदाप्यत्र पराभवन्ति॥६॥

ईदृश्यां स्थितौ श्रीजवाहरलालः पित्रपेक्षया पूज्या मातुः परमं प्रेम प्रारम्भिकीं शिक्षां पारिवारिकान् व्यवहारान् साधारणं सामाजिकं ज्ञानञ्च लभमानोऽप्येकादशवर्षायुःपर्यन्तं गृह एकमात्रं बालकत्वेन जीवनं व्यतिगमयत्। तथापि स्वस्थावकाशसमयं स क्रीडन-कूर्दयोर्व्यत्यापयत्, ययोः तरणं यष्टि-कन्दुकक्रीडनं फ़लक-चटकिकाखेला अश्वारोहणं च तस्य प्रियाणि क्रीडनान्यासन्। यदा कदा गङ्गास्नाने पारिवारिकेषुविवाहेषु सुदूरे वर्तमानानां नगराणां यात्रासु तथा बहुसंख्याकेषु हिन्दू-संस्कारेषु पर्वसु तस्य मनोऽरज्यत। स्वपितॄन् प्रति सदा समादरकर्त्ताऽऽज्ञापालकश्च सन् स पित्रोरतिशयेनानुरागेण परिषिक्तस्तयोः साह-

सिकता-दक्षता-दृढताश्च स्वस्मिन् स्थिरयितुमचेष्टत। स पितॄणामतिव्यस्ततया पूज्यया स्वरूप-रानी-जनन्या पोषितो बोधितस्तथा स्नेहातिरेकेण तोषितः सुतरां सुखेन शिक्षणे प्रावर्तत तेन च पितरौ भृशमतुष्याताम्।

प्रभूतमैश्वर्यमवाप्य केचिद्, बाला यथार्थाद् विमुखा भवन्ति।
परं न ये स्वां सरणिं त्यजन्ति, सत्यं सुतास्ते भुवि सन्ति धन्याः ॥१०॥

□ श्रीजवाहरलालस्य व्यक्तित्वोदयः

गार्हस्थ्ये समुदारता समुचिता सर्वेषु सत्स्नेहिता,
सर्वेषामनुशासने च दृढता दुःखेष्वनुद्विग्नता।
आज्ञापालन-कर्मणि प्रतिपदं स्वीकारिता नम्रता,
नित्यं यत्र वसन्ति तत्र सकलं व्यक्तित्वमुद्योतते ॥११॥

समुन्नत-विचारणा-समुपादिताः क्रिया नित्यशः,
परिश्रम-समन्विता भुवि जना यदा कुर्वते।
तदैव नियतेरपि स्वसहयोगतः सन्ततं,
भवन्ति सफलाः समे शुभ-मनोरथाश्चिन्तिताः ॥१२॥

श्रीमोतीलालनेहरूणां सङ्कल्प आसीद् यत् परिवारे वर्तमानाः सर्वेऽपि शिशवः श्रेष्ठातिश्रेष्ठां शिक्षां प्राप्य प्रत्न-नूत्नविचारैः परिचिताः भवेयुः। जीवनस्य प्रत्येकं क्षेत्रे तेऽग्रगामिनः स्युः। स्वस्याः संस्कृतेः परिधौ वर्तमाना जगतः सकलमपि श्रेष्ठं तत्त्वमात्मसात् कुर्युः। तेषां परिवारे तदीय एकमात्रं प्रियः पुत्रो जवाहरलाल-स्तु बहूनामाशानां कल्पनानां केन्द्रमेवाभूत्। अतस्ते तस्मै प्राचीनपरम्परापोषितां सामान्येषु विद्यालयेषु प्रवर्तमानां शिक्षां सर्वथाऽपर्याप्तामन्यन्त। सन् १९०४ ई० वर्षे यदा श्रीवंशीधराभिधा ज्येष्ठा भ्रातरो यूरोपं गतास्तदा तेषां पुत्रेण श्रीधरेण सह जवाहरलालं स्थानीये **'सैण्ट मेरी कान्वेण्ट'**-विद्यालये प्रवेशितवन्तः। षण्मासानन्तरं श्रीधरस्येलाहाबादतोऽन्यत्र गमनानन्तरं जवाहरलालं तस्माद् विद्यालयात् पृथक्कृत्यानन्दभवन एवाङ्ग्लाध्यापकैस्तदध्ययनाय निर्णीतवन्तः। ततः पूर्वं श्रीजवाहरलालः १९०२-१९०४ ई० वर्षाणां मध्ये **'फर्डिनेन्ड टी० ब्रुक्स'**-सदृशादध्यापकादपि स्वगृहेऽध्ययनमकार्षीत्। तेष्वेव दिनेषु श्रीमोतीलालनेहरूणां धारणेयं स्थिरतामयासीद् यज्जवाहर आङ्ग्लाध्यापकैरध्ययनानन्तरं क्वाप्याङ्ग्ल-जनता-विद्यालये पठेत् ततः परं च इङ्ग्लैण्डस्यैव विश्वविद्यालये पठनाय गच्छेत्।

अयमभिलाषस्तेषां १९०५ ई० वर्षे पञ्चमवारं पत्नी-पुत्री-जवाहरलालैः सह विदेशयात्रायां सफलोऽभवत्। भाग्यवशात् स्वीयानामाङ्ग्लमित्राणां

साहाय्येन श्रीमोतीलालमहाभागैः श्रीजवाहरस्याध्ययनाय हैरो-स्थिते विद्यालये प्रवेशव्यवस्था सम्पादिता। ततः परमन्यान्यस्थलेषु भ्रान्त्वा ते २९ अक्टूबर-१९०५ वर्षीये दिने मार्सेईनगरे स्वातिथिगृहं प्राप्ताः। जवाहरलालस्य वियोगस्तानतीव व्यथयति स्म। तत्र रात्रावावेगपूर्णेन हृदयेन तैरेकं विदाय-पत्रं लिखितम्। तस्मिँल्लिखितमासीत् —

"त्वयेयं वार्ता मस्तिष्केऽवश्यं रक्षणीया यदस्मिन् संसारे यत् सर्वतोऽधिकं मूल्यवन्निधानमस्माकं निकटे विद्यते तथा कदाचिदागामिषु संसारेष्वपि यदस्माकं समीपे सर्वतो मूल्यशालि भविष्यति, तत्तव रूपे वयमत्रैव त्यक्त्वा गच्छामः। तवात्मनो हिताय वयमस्य पार्थक्यस्य पीडया पीडिता भवामः। इदं त्वत्कृते धनस्य केवलं व्यवस्थापनाय नास्ति, यामहं कदाचिदात्मन एकस्य वर्षस्यायात् कर्तुं शक्नोमि। वस्तुतोऽयं तवैकस्य वास्तविकमनुष्यस्य निर्मितेः प्रश्नोऽस्ति, यत् त्वया सर्वात्मना भवितव्यम्। इयमस्मभ्यमत्यधिकरूपेण स्वार्थपूर्णा वार्ता भविष्यति—अपि त्वियं पापपूर्णा कथनीया विद्यते—यत् त्वामात्मनो निकटे स्थापयेम तथाऽन्तेऽत्यल्पां शिक्षामथवा शिक्षां विनैव केवलं धनं मुक्त्वा व्रजेम।

ममाशयोऽस्ति यदहं स्पष्टतया गर्वोक्त्या कथयितुं प्रभवामि यदहं नेहरू-परिवारस्य वैभवस्याधारशिलायाः संस्थापकोऽस्मि। मम प्रियसूनो ! अहं त्वां तस्या व्यक्ते रूपे द्रष्टुमिच्छामि या मया स्थापितायामाधारशिलायां निर्माणं करिष्यति तथैतस्या वार्तायाः सन्तोषं प्राप्स्यति यद् यशस एकं भव्यं भवनमाकाशे शिर उन्नमय्य स्थितमस्ति।

वयं त्वां शारीरिकरूपेण मुक्त्वा गच्छामः, परं मनसा सदैव तव निकटे स्थास्यामः। दशमासेभ्योऽपि न्यूने समयेऽहं पुनस्त्वन्निकटे भविष्यामि तथाऽनुमानतो द्वयोर्वर्षयोस्त्वमस्यां स्थितौ भविष्यसि यत् त्वमिलाहाबादस्य स्वीये पुरातने परिचिते वातावरणे कतिपयान् मासान् अतिगमयिष्यसि। यद्यप्यहं स्वल्पायैव कालाय पृथग् भवामि, परं त्वत्तो वियोगात् पूर्वं मया कदापि न विचारितमासीद् यदहं त्वामियत् स्निह्यामि। कदाचिदेष मम निर्बलहृदयस्य कारणादस्ति। परं त्वां प्रति कर्तव्यस्य मम बोधस्तावानेव दृढोऽस्ति, यावान् हि पूर्वं कदाचिदासीत्; किञ्च यावन्मम दीनस्य दुर्बलहृदयस्य प्रश्नोऽस्ति, तत् तव समीपे विद्यते। अस्मिन् विषये मम मनागपि संशयो नास्ति, यत् त्वं ममाशानुकूलम्, अपि तु ततोऽप्यधिकमुन्नतो भविष्यसि। तव व्यस्ततायै तव समीपे भूयांसि कार्याणि सन्ति—स्वास्थ्यस्य रक्षाऽपि कार्येष्वेव सम्मिलिताऽस्ति। त्वत्त आत्मनः पृथक् त्रोटनस्य प्रतिदाने वयं केवलमियदेव वाञ्छामो यत् स्वस्य शरीरेण मस्तिष्केन च त्वं पूर्णो भवेति।"

अस्मिन् पत्रे या भावनाः प्रकटितास्ताः श्रीमोतीलालमहाभागानां मनः-

स्थितेर्भाविनो जीवनस्य समुन्नतेस्तथा प्रियस्य पुत्रस्य सार्वत्रिकविकासस्य वास्तविकं तथ्यं प्रस्तुवन्ति।

ततः परं सन् १९०७ ई० वर्षे संयुक्तप्रान्तस्य प्रादेशिकं प्रथमं राष्ट्रियकाङ्ग्रेससम्मेलनमायोजितं तस्याध्यक्ष्यं श्रीमोतीलालेभ्य एवार्पितम्। तदाऽध्यक्षपदात् स्वच्छन्दतया प्रथमवारं स्वीयेऽभिभाषणे तैरात्मनो विचारा मृदुदलीयपद्धत्या प्रस्तुताः। तेषु श्रीगोखलेमहानुभावानां बुद्धिमत्तापूर्णानां शब्दानां स्पष्टमुल्लेखनमप्यभूत्। श्रीगोखलेमहाभागं ते **'सन्तुलितराजनीतेर्मसीहा'** इत्यकथयन्। द्वादशसहस्रशब्दानां तस्मिन्नध्यक्षीये भाषणे भारतीय-राष्ट्रिय-काङ्ग्रेसाय स्वीयः श्रद्धाञ्जलिः समर्पितः कथितञ्च यत् संस्थेयं—'राष्ट्रियराजनीतेर्महान् विश्वविद्यालयोऽस्ति।' तत्रैव प्रसङ्गत उग्रदलीयानामुपहासोऽपि विहितः, यतो हि ते यं मार्गं श्रितवन्त आसन् स नासीत् समीचीनः साफल्यप्रापकश्च। इत्थं तेषां विचाराणां बहुधा समर्थनमेवाभूत्, परमुग्रराष्ट्रवादीनि समाचार-पत्राणि भृशमालोचनमकार्षुः। श्रीजवाहरलालस्तदा केम्ब्रिजनगरे ट्रिनिटी-महाविद्यालये पठन्नासीत् सोऽपि पितरं पत्रद्वारा समालोचयत् तान् 'घोरा उदारवादिनो भवन्तः सन्ती'त्यपि चाकथयत्। तेन ते रुष्टा अप्यभवन्। तेष्वेव वासरेषु श्रीमुन्शीनामष्टादशवर्षीयः पुत्रो 'मञ्जरअलीः' आतङ्कवादिनामान्दोलने सम्मिलितः। तमपि शीघ्रमेव सम्बन्ध-विच्छेदायादिष्टवन्तस्ते। परं स दृढास्थाशाली युवा परिष्कारक आसीद् विदेशिशासनाच्च भारतस्य विमुक्तये दृढं कृतनिर्णयश्चावर्तत। तेन श्रीमोतीलालनेहरूणामादेशो नाङ्गीकृतो गृहं च विहाय सोऽन्यत्रागमत्। एतेनापि पण्डितमोतीलालमहानुभावाः खिन्नतामन्वभवन्।

सन् १९०७ ई० वर्षस्य दिसम्बरमासे 'सूरत'नगरे काङ्ग्रेसस्य त्रयोविंशतितमेऽधिवेशने ते पुनः सम्मिलिताः। तदनन्तरं तु भारतीय-राजनीतेः प्रवाहस्तादृशः प्रवृद्धो यस्मिन् न केवलं प्रबुद्धा भारतीया एव संसक्ता अभूवन् परं विदेशीया अपि भारतवासिभ्यः स्वातन्त्र्यप्रापणाय सहभाज आसन्। विदेशस्था भारतीया अपि वैदेश्यानामन्यायप्रवृत्त्या खिन्नाः सन्तो विविधान्दोलनेषु सुसङ्गताः। श्रीमोतीलालनेहरूणां तथा श्रीजवाहरलालनेहरूणां राजनीति-विषये गहना रुचिः परस्परं पत्राचारैर्विचाराणामादान-प्रदानानि च भाविने जीवनाय राजनीतिमयं वातावरणं स्रष्टुमतीव सहभागीन्यभवन्। मृदूग्रदलयोर्विचारयोः कारणात् पितृपुत्रयोर्मध्ये राजनीतिकः सङ्घर्षोऽपि प्रथमं तदैवाभूत्। पुत्रस्य निरन्तरं वर्धमानां परिवर्तनवादितां प्रति श्रीमोतीलालनेहरूणां प्रतिक्रिया क्रमशः क्रोध-विरोध-सङ्घर्षपरिणतीनामन्ततश्च वीरपूजाया आसीत्।

आत्मा वै तनयो भवत्यविरतं श्रुत्येत्थमाघोषितं,
तद्वत् पुत्रमवेक्ष्य को नु मनुजस्तोषं लभेतात्मनि ?

किञ्च स्वेप्सितकल्पना अपि यदा स्युर्मूर्तिता भाविनी-
स्तस्मिँस्तर्हि सुखस्य या परिणतिस्तस्यास्तदा का कथा ? ॥१३॥

श्रीजवाहरलालस्यार्धसत्रस्याधिकारिकं विवरणमतीव प्रशंसनीयमभवत्। पुत्रस्य शैक्षिकोपलब्धौ सन्तोषमनुभवद्भिर्मोतीलालनेहरूभिरग्रे बहूनि शिक्षादायिन्युत्साहवर्धकानि पत्राणि लिखितानि। क्रीडा-प्रवृत्तेर्वर्धनाय स्वास्थ्याभिवृद्धये च बहवो निर्देशाः प्रदत्ताः। मध्ये मध्ये परामर्शा राजनीतिकाः प्रवृत्तयो भगिनीनां क्रियाकलापाश्च नियमितेन रूपेण प्रैष्यन्त। भारतीयानि वृत्तपत्राण्यपि यथासमयं तत्र प्रेष्यन्ते स्म। इत्थं श्रीजवाहरो यथा स्वीयाध्ययने प्रावीण्यं प्राप्तवान् तेन साकमेव १९०६ तथा १९०७ ई० वर्षयोर्भारते घटितानां घटनानां— यासु पञ्चाम्बुप्रान्ते लालालाजपतरायस्य तथाऽजीतसिंहस्य देशान्निःसारणं, बङ्गविभाजनजन्याऽशान्तिः, तिलकस्य सिद्धान्तवादिनो विरोधाः स्वदेश्यान्दोलनं विदेशिवस्त्राणां निरासादय आसन्—समाचारा अपि तेन गम्भीरतयाऽधीताः।

हैरोतः सत्रपूर्तेः पूर्वमेव स कैम्ब्रिज-विश्वविद्यालयस्य **ट्रिनिटी महाविद्यालये** प्रविष्टः। तदा तस्यायुरष्टादशवर्षाणामासीत्। कैम्ब्रिजे वसन् स विस्तृतं विश्वं पर्यचिनोत्। विविधान् वैज्ञानिकान् विषयानपठत्। संसारस्य महतां साहित्यकाराणां ग्रन्थानवाचयत्। आनन्दस्य मनोमोहकानामनुभवानाञ्च जीवनं वर्षत्रयं यावत् तत्र तेन यापितम्। तेषां सर्वेषामुपरि तेन यदभिलषितं तदासीद् 'भारतस्य राजनीतिके सङ्घर्षे साहसपूर्णायां भूमिकायामवतरणम्।' सन १९०८ ई० वर्षे जवाहरलालः कतिपयदिनेभ्यो भारतमायातस्तथा श्रीमोतीलालमहाभागास्तदैव यूरोपं गताः। पितृ-पुत्राभ्यां स्वीये नूतने वायुयाने 'काउण्टजेपलिन' आगच्छन विलोकितः। पेरिसनगरे च वायुयानानां साहसिकानि कार्याण्यपि ताभ्यां दृष्टानि।

यदा श्रीजवाहरलालः कैम्ब्रिज-विश्वविद्यालयाद् द्वितीयश्रेण्या उत्तीर्य **'आनर्स'** उपाधिं लब्धवान् तदा स विंशतिवर्षायुष्क आसीत्। भारतीय-नागरिक-सेवा (आई० सी० एस०) यास्तदानीमतिमहत्त्वमभूत्, तस्याः प्रशिक्षणार्थं प्रवेशाय पितृपादैः काङ्क्षितमपि, परं वयसो न्यूनत्वात् प्रवेशो न स्वीकृतः। सन् १९१२ ई० वर्षस्य ग्रीष्मर्तौ **'बैरिस्टर'** (इंग्लैण्डदेशस्य वाक्कील) परीक्षाम् उत्तीर्याधिकारं च सम्प्राप्य वर्षसप्तकमिंग्लैण्डे व्यतिगमय्य स भारतं सम्प्राप्तः। सन् १९१२ ई० वर्षस्यागस्ते मासि मसूरीनगर्यां पारिवारिकं पुनर्मिलनमभूत्। माता सत्यामपि रुग्णावस्थायां चमत्कृतिपूर्णया प्रक्रियया स्वस्था सञ्जाता। पिता प्रसन्नो गौरवान्वितश्च दृश्यते स्म। भगिन्यौ सरूप-कृष्णाभिधे चकिते भ्रातुर्मिलनानन्देन पूरिते अभूताम्। तेष्वेव दिवसेषु श्रीमोतीलालनेहरूमहाभागाः स्वकीयानां वादिनां विधिसम्बद्धं कार्यं निरीक्षमाणा इलाहाबादे कियतेचित् कालाय स्थिता आसन्

तथा समस्तः परिवारो मसूर्यामवकाशानन्दं लभते स्म । तदाऽऽत्मनो वादिनो रावमहाराजस्य धनादेशेन पञ्चशतरूप्यकाणि प्राप्तानि, स हि तरुणं नेहरूं स्वीयं वाक्कीलं नियोक्तुमवाञ्छत्, तस्यैव शुल्कमिदमभूत् । एतेनातीव सन्तुष्टाः श्रीमोतीलालमहाभागाः पुत्राय श्रीजवाहरलालाय पत्रं प्रैषयन् लिखितवन्तश्च—
"प्रथमं शुल्कं यत्तव पित्रे प्राप्तमासीत् तत् पञ्चरूप्यकात्मकमासीत् । स्पष्टमस्ति यत् त्वं स्वपितुः शतगुणः श्रेष्ठोऽसि । अहं स्मरामि यदहं स्वयं न भूत्वाऽऽत्मनः पुत्रोऽभविष्यम्……।"

श्रीजवाहरलाल उच्चन्यायालये वाक्कीलतामारभत किन्तु तस्मिन् व्यवसाये तस्य मनस्तावन्तमानन्दं नालभत । दैनिकेन संयतेन कार्येण शैथिल्यमेवान्वभवत् सः । वाक्कीलानां पुस्तकालये तेषां संसदि तथा प्रकोष्ठे सर्वत्रैकैव वार्ता तस्मै नारोचत । मानसिक्या उत्तेजनाया अभावस्तं मनस्येव मनसि किमपि कर्तुं प्रैरयत् । स काङ्ग्रेसे सम्मिलितः सक्रियतायै च कठोरं श्रममप्यकरोत् । श्रीगोखलेद्वारा संस्थापिते 'भारत-सेवक-मण्डले'ऽपि तदीया प्रविविक्षाऽभवत् परं तत्सदस्यानां नीतिर्मृदुदलीयाऽवर्तत, अतस्तस्मिन् न सममिलत् । यतो हि—

तारुण्ये विततात्मतुष्टिरनिशं तेजस्विता सक्रिया-
शक्तिर्बुद्धिविलास-कौशलरुचिः स्वाभाविकी चेतना ।
सङ्घर्षः स्वविचारपोषणकरी वृत्तिश्चिरं चिन्तनं,
सङ्कल्पा युवकोचिताश्च सरसा भावा भवन्त्युद्गताः ॥१४॥

सन् १९१४ ई० वत्सरस्यागस्ते मासि प्रथमं विश्वयुद्धं प्रारब्धम् । यस्मिन् भारतस्य रुचिर्नासीत् किन्तु विनैव स्वीकृतेस्तस्य सहभागित्वं साधितम् । तदानीं राजभक्तेरनेका घोषणा विहिताः परमाङ्ग्लशासकेषु जनानां सहानुभूतिरतीव न्यूनाऽविद्यत । शार्मण्यदेशं प्रत्यपि नावर्तत कश्चनानुरागः । श्रीजवाहरलालस्य सहानुभूतिरभृत् फ्रान्सं प्रति, य आङ्ग्लानां पक्षधर आसीत्, शार्मण्यदेशेन च तदुपर्याक्रमणं विहितमभवत् । भारतीया जनताऽऽङ्ग्लानां साहाय्यमकरोत् किन्तु सा तेषां शासनान्मुक्तिमप्यकामयत । विदेशि-शासनान्मुक्तेर्याच्ञायै श्रीमत्या एनीबीसेण्टमहाभागया **'होमरूललीग'** नाम्ना सङ्घटनमेकं स्थापितम् । समग्रेऽपि देशे प्रभावशालीनि भाषणानि समवर्तन्त । काङ्ग्रेसस्य मुस्लिमलीगस्य च संयुक्तान्यधिवेशनान्यभूवन् तैरतीवोत्तेजना प्राप्ता । वातावरणे पर्याप्ताऽऽकृष्टिरासीत् । तदैव श्रीमती एनी-बीसेण्टमहाभागा दृष्टिकारायां निगृहीता तेन च मृदुदलीया अप्युत्तेजनां गताः ।

श्रीमोतीलालनेहरूमहोदया अपि मृदु-दलीया आसन् । अन्ये तद्दलीयास्तु होमरूल-सङ्घटनात् त्यागपत्राणि दत्त्वा परागताः किन्तु ते तथा नाकुर्वन् । ते स्वभावादेव विद्रोहिण आसन् शनैः शनैश्च राष्ट्रवादिनोऽभूवन् । श्रीमोतीलाल-

नेहरूणामासीत् तर्केषु विश्वासः श्रीजवाहरो युवा भावुकश्चावर्तिष्ट । श्रीमोतीलालमहोदया वैभवशालिपद्धतिका आसन् श्रीजवाहरलालश्च जनतायाः साधारणं जीवनं स्वीकर्तुं वाञ्छति स्म। उभावपि श्रीमती एनी-बीसेण्ट-महाभागया प्रभावितौ। यदा सा मृदुदलीया सम्पन्ना तदा श्रीगान्धिनः प्रभावस्तामात्मसादकार्षीत्।

श्रीजवाहरलालः शनैः शनैः राजनीतिक-गतिविधौ भागमगृह्णात्। जनतायां भाषणे स सङ्कोचमनुभवति स्म, सहैव सोऽनुभवति स्म यज्जनतायां भाष्येत तदाङ्ग्लभाषायां न भवेत्। सन् १९१५ ई० हायने तेन सर्वप्रथममिलाहाबादनगरे नवीनस्यैकस्य नियमस्य विरोधे संक्षिप्तमाङ्ग्लभाषयैव भाषितम्। सभासमाप्तौ प्रमुखा मृदुदलस्य नेतारः **श्रीतेजबहादुरसप्रूमहाभागाः** श्रीजवाहरलालमभिनन्दयन्तस्तं वक्षसाऽमेलयन् चुम्बनेन च प्रीतिमदर्शयन्। पितृ-पुत्रयोर्मिथो मृदूग्रदलवादित्वेन वाद-विवादावपि प्राचलताम्, उभावपि स्वे स्वे पथि च दृढाववर्तताम्।

सन् १९१६ ई० वर्षस्य जनवर्यां यदा लखनऊनगरे काङ्ग्रेसस्याधिवेशनमायोज्यत तदा श्रीजवाहरलालः प्रथमवारं श्रीगान्धिनः साक्षात्कारं प्राप्तवान्। यद्यपि श्रीगान्धिनां ख्यातिरतीव व्याप्तिमगच्छत् परं श्रीजवाहरस्तावद् दूर एवासीत्। कालान्तरेण श्रीमोतीलालजवाहरलालयोस्तैः सह गाढः परिचयोऽभवत्, तैः साकं नैकट्येन च कार्याणि सम्पादितानि। अस्तीदं सत्यं सत्यमेव —

सत्यपि यदि मतभेदे, भुवि नैव भवेन्मिथो मनोभेदः।
कार्ये तर्हि विचार्ये, नैव विपद् बाधते लोकम्॥१५॥
अथ मानसमुल्लसितं, कलयति सत्कर्म कौशलोद्वलितम्।
इष्टं भवति च फलितं, सरति ततो जीवनं ललितम्॥१६॥

यदा श्रीजवाहरलालमहाभागो हैरोस्थे विद्यालये पठति स्म तदा तस्य विवाहसम्बन्धिनी चर्चाऽपि पत्रमाध्यमेन श्रीमोतीलालनेहरूभिर्विहिताऽऽसीत्। यद्यपि ते शीघ्र-विवाहं नेच्छन्ति स्म परं ते वाञ्छन्ति स्म यत् स्वल्पतमे काश्मीरिकसमुदाये कन्याचयनस्य सौविध्यं सीमितमस्त्यतो वाग्दानमावश्यकमस्तीति। अन्यथा जवाहरलालस्य भारते प्रत्यावर्तनकालं यावद् याः काश्चनोपयुक्ताः कन्याः सन्ति तासां वाग्दानानि सम्पत्स्यन्त एव। सौन्दर्यस्य शिक्षायाश्चैकत्र समन्वयं कामयमानाः श्रीमोतीलालमहाशयास्तद्विषये सचेष्टा आसन्। देहल्या एकस्य व्यापारिणः पण्डितजवाहरमल-महोदयस्य पुत्री **'कमला कौल'**-नाम्नी प्रान्तेऽरोचत। सन् १८९९ ई० वर्षे समुत्पन्ना 'कमला' सुशीला सौन्दर्यान्विता स्वस्था समुचिताकार-प्रकारशालिनी चासीत्। नेहरू-परिवारापेक्षया तदीये भवने वैदेशिकः प्रभावोऽल्पोऽभूत् किन्तु स्वस्य वाग्दानावसरे यदा सा प्रयागे स्वेषां

सम्बन्धिनां गृहे स्थिता तदा वरोपयुक्ततायै भाविनो वरस्य भगिनीनां यूरोपीय-संरक्षिकाभिः सह सङ्गमिता ।

८ फरवरी १९१६ ई० दिने वसन्तपञ्चम्यां देहलीनगर्यां श्रीजवाहरलाल-महाभागस्य विवाहः सम्पन्नः । विशेषेण धूम्रयानेन श्रीमोतीलालनेहरूणां मित्राणि सम्बन्धिनो देहलीमुपागताः । सप्ताहं यावद् वारयात्रिका अतीवानन्देन मनोरञ्जन-पूर्वकं सम्मानिताः । विवाहमण्डपं सर्वेषामानन्दानां केन्द्रमभूत् । इलाहाबादनगरं प्रति प्रत्यावर्तनात् परमपि नैकसप्ताहान् यावन्मनोरञ्जन-सामूहिकभोजन-क्रीडोत्सवानां कार्यक्रमाः प्राचलन् । पञ्चपञ्चाशद्वर्षायुष्केभ्यः श्रीमोतीलाल-नेहरूभ्यः स्वस्यैकलस्य पुत्रस्य विवाहस्तदीयजीवनस्य चरमा सिद्धिरासीत् ।

ग्रीष्मकाले समस्तोऽपि परिवारः काश्मीरेष्ववकाशदिवसान् व्यत्यापयत् । अवकाशानन्तरं परिवार इलाहाबादं प्रत्यायातः । श्रीजवाहरलालनेहरूश्च स्वपितुः कनिष्ठसहयोगिनो रूपेणानन्दभवने कार्यमारब्धवान् । न्यायालयस्य प्रकोष्ठानां विधिवित्पुस्तकालयस्य तथा विधिज्ञानां सभायाः प्रवृत्तयः कदाचित् स्थानीया कवोष्णा राजनीतिश्चेति श्रीजवाहरलालमहाभागस्य व्यस्ततायाः साधनान्यभूवन् । किन्तु स्वदेशार्थं तदीया कर्तव्यनिष्ठा तं भूयोभूयोऽनुरुणत्ति स्मैव ।

निश्चेष्टं नहि जीवनं सुखकरं यूनः कृते जायते,
तारुण्याच्च विजृम्भिते मनसि नो शान्ता स्थितिर्युज्यते ।
सामुद्रोर्मिरिवोच्छलद्गतिमते वीराय वीरोचितं,
किञ्चित् कार्यमपेक्षते यदि न तत् स्याच्छान्तिलाभः कुतः ? ।।१७।।

तरुणिमनि तु तितीर्षा वर्धते वारिनाथे,
नभसि च परिमुक्ता उड्डीषा भवन्ति ।
उदयति च कदाचित् पर्वतेष्वारुरुक्षा,
कुह च न शिथिलत्वं रोचते नैव तस्मिन् ।।१८।।

यूनां मनांसि निश्चेष्टं तिष्ठन्ति प्रतिकुर्वते ।
कर्म-मग्नानि संसिद्धिं लभन्ते सर्वतः शुभाम् ।।१९।।

☐ राष्ट्रभक्तेरपूर्वः प्रवाहः

गेहे गेहे प्रगुञ्जन्नभिनवगतिदो भारतीयेभ्य आसी-
दाशानां यः प्रतीकः सपदि सुखकरो 'होमरूला'ख्यशब्दः ।
राजद्रोहस्वरूपः स हि पुनरभवत् किन्तु गौराङ्गकेभ्य-
स्तेनाभूद् राष्ट्रभक्तेः प्रसृतिविलसितः कोऽप्यपूर्वः प्रवाहः ।।२०।।

सन् १९१४ ई० वर्षे श्रीगङ्गाधरतिलकाः षड्वार्षिकं कारादण्डं समाप्य बर्मातो भारतं प्राप्ताः । विदेशेषु स्थिता अनेके भारतीया अपि क्रान्तेरुद्देश्येन

भारतमुपागताः। भारतीयान् सैनिकान् क्रान्तये सन्नद्धान् कर्तुं सैनिकशिबिरेष्वपि ते कथञ्चित् प्रविष्टाः। विदेशेष्ववशिष्टाः क्रान्तिदूता भारते शस्त्रास्त्राणि प्रेषयितुं सयत्नाः सञ्जाताः। जर्मनी-टर्की-देशयोः सहयोगेन **'आजाद-हिन्द-सर्वकार'**स्य स्थापनाऽपि संवृत्ता परं तावत् किमपि साफल्यं नाधिगतम्। अतो जनता कस्यापि नवीनस्यान्दोलनस्य प्रतीक्षां कुर्वाणाऽवर्तत। श्रीतिलकानां समागमनेन नवस्फूर्तेः सञ्चारोऽभवत्।

श्रीमोहनदासकरमचन्दगान्धी १९१५ ई- वत्सरस्यारम्भे दक्षिणाफ्रिकातः साफल्यं प्राप्य भारतं प्रत्यायातः। २ अक्टूबर १८६९ ई०, दिने **गूर्जरत्रा-भूमेः** पोरबन्दरनगरे **'पुतलीबाई-करमचन्द'**योः पुत्रत्वेन प्राप्तजन्मा श्रीमोहनदास-गान्धी पितृभक्तः परिश्रमशील आत्मसम्मानी चासीत्। ४ सितम्बर १८८८ ई० दिवसे उच्चविद्यालायीयाध्ययनं समाप्याग्रिमाध्ययनाय यूरोपं गतस्ततश्च विधिशास्त्र-विशेषज्ञतारूपां **'बैरिस्टर-'** परीक्षामुत्तीर्य जुलाई १८९१ ई० वर्षे भारतं प्रत्या-गतः। प्रसङ्गतो दक्षिणाफ्रीकायां स्वकीयज्येष्ठभ्रातुर्मित्रस्यैकस्मिन्नधिकरणे वैधानिकावेक्षणायामन्त्रितश्चतुर्विंशतिवर्षायुः स तत्रागच्छत्।

दक्षिणाफ्रिकायां स्थितवता श्रीगान्धिमहाभागेन भारतीयानामपमानपूर्णा स्थितिरवलोकिता स च स्वयमपि यातना बहुशस्तिरस्कारांश्चासहत। तैः क्षुब्धः श्रीमोहनदास-करमचन्दगान्धी भारतीयानां हिताय सत्याग्रह-सङ्ग्राममारब्धवान् बहूनि कष्टानि सहमानो निरन्तरं प्रयतमानश्च स सत्याग्रहे साफल्यमवाप्तः। गौराङ्गाणामत्याचाराः कृष्णानि विधानानि च निःशेषतां गतानि। अन्ततो २१वर्षाणि दक्षिणाफ्रिकायां निवासानन्तरं स्वदेशं पुनरायातोऽभवत्।

दक्षिणाफ्रिकायां **'ट्रान्सवाल'**स्य तथा **'नेटाल'**स्य भारतीय-वसतिषु व्यवह्रियमाणाया भेदनीतेर्दुर्व्यवहारस्य च विरोधे जनरल-स्मट्स-शासनस्य विरु-द्धम्—**'अहिंसात्मकं निश्क्रिय-प्रतिरोधकमान्दोलनं'** प्रवर्तितमासीत्। भारत-वासिन्या जनतया तदीयमतितरां स्वागतं व्याहृतम्। भारतीयाः स्वमनस्सु श्रीगान्धिनः कार्यप्रणालीं दृष्ट्वा निश्चयमकुर्वन् यदिदानीं देशाय 'महात्मा गान्धी' एक ईदृशो नेता प्राप्तः; यस्य निकटे वीरतापूर्णेन वर्त्मनाऽन्यायानामत्याचा-राणाञ्च प्रतीकारं कर्तुं राजशक्तेराभिमुख्यायैकममोघमस्त्रं विद्यमानमस्तीति।

अत्रागत्य श्रीगान्धिमहाभागाः श्रीगोपालकृष्णगोखलेमहोदयानात्मनो राजनीतिकान् गुरूनमन्यन्त। तेषामेवाग्रहेण भारतस्य स्थितेः परिचयायानेकेषां स्थानानां ते यात्रा अकुर्वन्, काङ्ग्रेस-नेतृभिः सह स्वीयं सम्पर्कमसाधयन्, उचितं कालं प्रतीक्षमाणाश्च प्रायो वर्षमेकं तटस्थद्रष्टेव मौनमतिष्ठन्।

तदानीं भारतस्य राजनीतौ श्रीमत्या **एनी-बीसेण्ट**-महाभागया सञ्चा-लितस्य होमरूलान्दोलनस्य तीव्रया गत्या प्रयागस्य घटनाचक्रमतितीव्रताम-गृह्णात्। २० जून-१९१७ई० दिनस्य **'लीडर'** पत्रेण घोषितं यन् "माननीयाः

पण्डितमोतीलालनेहरूमहोदयाः, डॉ० तेजबहादुरसप्रू-मुंशीनारायणप्रसाद-अस्थाना-सी. वाई. चिन्तामणिमहाभागास्तथाऽन्ये राष्ट्रवादिनो मद्रास-शासनस्य निरङ्कुशायाः कार्यप्रणाल्या विरोधे होमरूलसङ्घटने सम्मिलिता इति ।" **'लीडर'**-पत्रस्य तस्मिन्नेवाङ्के जूनमासस्य द्वाविंशतितमे दिवसे 'इलाहाबादस्य भारतीय-नागरिकाणामेकस्याः प्रकटसभाया अपि घोषणाऽवर्तत, यस्या आध्यक्ष्यं श्रीमोतीलालमहोदयैः कर्तव्यमासीत् ।

रामप्रसादोद्याने विशाला सभाऽऽयोज्यत तत्र श्रीमोतीलालमहाभागैर्भाषितम्—"अस्माकं देशः साम्प्रतं सङ्क्रान्तिकाले वर्तते। सर्वकारेणास्माकं राष्ट्रियलक्ष्याणि प्रति प्रत्यक्षं युद्धं घोषितमस्ति।...... किं वयमेतेषामधिकारिणामप्रसन्नतायाः समक्षं विनम्रा भविष्यामः ? ...... आगच्छत, वयं सर्वेऽपि होमरूल-सङ्घटनस्य ध्वजमुच्चैरुत्तोलयामस्तथा त्रयस्त्रिंशत्कोटिकण्ठा होमरूलस्य नादमुच्चैर्घोषयामः। वेतनभोक्तृता जन्मनः प्रागेव होमरूलाय मृत्युशय्यां सज्जयति...। आगच्छत, वयं सर्वे दृढैर्हृदयैः सह कवेः साकमिदं कथयन्तोऽग्रे वर्धामहे —

"आगन्तुमिच्छेत् किमपीह यत् तत्,
स्वेच्छं समागच्छतु नैव भीतिः ।
अस्माभिरेषा तरणिः समुद्रे,
निःशङ्क-भावादवतारिताऽस्ति ।।२१।।" इति ।

अग्रिमे दिवसे होमरूल-सङ्घटनस्योपवेशने श्रीमोतीलालनेहरूमहाभागा अध्यक्षा निर्वाचिताः किञ्च तत्पुत्रः श्रीजवाहरः संयुक्तमन्त्रिष्वेकः। स्वपुत्रस्य सहयोगेन श्रीमोतीलालनेहरूभिः स्थानीये सङ्घे नवीनस्य जीवनस्य सञ्चारः पूरितः। उत्तरप्रदेशशासनेन भारतशासनाय प्रहिते विवरणे सूचितमासीद् यद्—इलाहबादस्था होमरूल-सङ्घस्य शाखा 'समर्था शक्तिपूर्णा' च वर्तत इति। ततः परमगस्तमासस्य दशमे दिने लखनऊनगरे प्रान्तीयकाङ्ग्रेसस्य विशेषाधिवेशने ५४८ मिताः प्रतिनिधयः सम्मिलिताः। आध्यक्ष्यं च पण्डितमोतीलालमहोदयैरेव निर्व्यूढम्। अधिवेशनस्य साफल्यं तदा प्रकटितं यदा दशदिनाभ्यन्तरमेव 'माण्टेग्यू-चेम्सफोर्ड-घोषणा' समक्षमुपागता । शासनेन स्वीकृतं यत् प्रशासनस्य प्रत्येकं शाखायां भारतीयानां सहयोगो वर्धेत स्वशासिताः संस्थाश्च क्रमिकान् विकासान् प्राप्नुयुरिति। श्रीमती एनी-बीसेण्टमहोदयाऽपि कारातो विमोचिता। अतीव श्लाघनीयेन स्वागतेन साऽभिनन्दिता। इदमासीत् साफल्यं पण्डितश्रीमोतीलालनेहरूणां तत्पुत्रश्रीजवाहरलालस्य राष्ट्रवादिन्या जनतायाश्च ।

यस्मिन् कर्मणि सात्त्विकी विलसति श्रद्धा तथा स्वात्मनो,
निःस्वार्था प्रकृतिः परोपकृतये सम्प्रेरयत्यञ्जसा ।
विश्वासश्च विराजते जनगणस्यापि स्वयं प्रेरित-
स्तत्रायान्ति नहि द्रुतं सफलताः स्वेच्छानुरूपाः कथम् ? ।।२२।।

[३]

स्मृति-कला

इन्दिरा-प्रियदर्शिनी

एषा शुभ्रा न तन्वो' विदानोर्ध्वेव' स्नाती दृशये' नो अस्थात् ।
अप द्वेषो बाधमाना तमां'स्युषा दिवो दु'हिता ज्योतिषागा'त् ॥

—ऋ० ५।८०।५

सानन्दं नन्दयन्ती परिजनमखिलं मातुरङ्के लसन्ती,
सिन्दूराभां सृजन्ती मृदु-मुदित-मधु-स्मेरवक्त्राब्जकान्तिः ।
सान्द्रा स्वारस्यसिक्ता ह्यचिर-विकसितेन्दीवरश्रीसनाथा,
पीयूषं संस्रवन्ती सुखयति सकलान् सन्ततिः सर्वदैव ॥१॥

गङ्गा-यमुनयोस्तथा पौराणिक्याः सरस्वत्याः सङ्गम-परिसरभूमौ भारतस्य प्रमुखेषु सांस्कृतिकेषु प्रशासनिकेषु च केन्द्रेषु कदाचिन् महनीयं स्थानं प्राप्तवतः **प्रयागापरनाम्न इलाहाबादनगरस्य सुप्रसिद्धम् 'आनन्द-भवनं'** नेहरू-परिवारस्य वैभवेन सहैव राजनीतेः प्रवेशात् समाजस्य सर्वेषु वर्गेषु सम्मानास्पदं भाविनोनामाशानां केन्द्रञ्चावर्तत। समृद्धेः स्वदेशभक्तेश्च सङ्गमायिते तस्मिन् भवने भारतस्य स्वातन्त्र्याय चिन्तयन्तो नेतारः कार्यकर्तारश्च प्रायः प्रत्यहमेव गोष्ठीमुपवेशनं मित्यङ्गं वा संयोज्य योजना निर्णयांश्च कुर्वन्ति स्म। शनैः शनैः सम्पदो मोहं विमुच्य भारतस्वातन्त्र्याय स्वीयं कर्तव्यं प्रति जागरूकता नेहरूपरिवारमात्मसात् कुर्वती व्यलोक्यत ।

श्रीजवाहरलालनेहरूर्विदेशादागत्य स्वपितृपादानां पण्डितश्रीमोतीलालनेहरूणां सांनिध्यादात्मनश्चिरकाङ्क्षितां भावनां मूर्तिमतीं व्यदधात्। विदेशे निवसन् स मातृभूमेः स्वातन्त्र्याय सङ्घर्षयुक्तानि जीवनचरित्राणि पठन् प्रायोऽचिन्तयद् यद् "अहमपि भारतमातुः स्वतन्त्रतायै सुसज्जः सेवकः सन् योत्स्यामि ।" इति । तदनुरूपमेवात्र श्रीमोतीलालमहोदयैः सह भारतस्य महद्भिर्देशभक्तैः स मिलितः सङ्घर्षाणामान्दोलनानाञ्च स्थितेः परिचयं प्राप्नोत्। स्वीयं कर्त्तव्यं व्यचारयत् प्रान्ते सर्वाणि सुखानि विमुच्य भारतमातरं विदेशिशासनान्मोक्तुं स्वाधीनता-यज्ञे स्वीयामाहुतिमर्पयितुं कृतसङ्कल्पोऽभवत् ।

श्रीमती कमला-नेहरूः स्वकीय-स्वभावात् कोमला लज्जावती सरला चावर्तत। श्रीजवाहरश्च तारुण्योचितां वीरवृत्तिं धारयन् विश्वस्य घटनानां तथा देशे प्रवर्तमानायाः स्वातन्त्र्यप्रवृत्तेर्विषये सावधानस्तादृश्य एव वार्ताः श्रुत्वा प्रसीदति स्म श्रीमतीं कमलामपि च श्रावयित्वा स्वदेशसेवायै प्रेरयति स्म। शनैः शनैः साऽपि प्रसुप्तप्रायं स्वदेशाभिमानं प्रबुद्धमिव कृत्वा परिवारेण सह स्वातन्त्र्यसङ्घर्षे वीररमणीव सहयोगिन्यभवत्। सा स्वभावाच्छान्ता सत्यपि समस्ते परिवारे प्रभावशालिनाऽङ्केन सर्वेषां सम्मानभागवर्तत। तस्या हृदये राष्ट्रं प्रति कर्तव्यपालनस्य यावती दृढताऽविद्यत यादृशी च निष्ठाऽवर्तत तस्याः परिचयस्तया बहुधा प्रस्तुतः। यदा श्रीजवाहरलालमहोदयः श्रीगान्धिनामान्दोलने संयुयुक्षुरासीत्, परिवारस्य वैभव-शालि जीवनं परिवर्तयितुमभ्यलषत् तथा स्वीयं वाक्कीलता-व्यवसायमपि त्यक्तुमैच्छत् तदा सर्वेऽपि पारिवारिकास्तदीयं विरोधं कर्तुमुद्यता आसन्, किन्त्वेकैव श्रीमती कमला तादृश्यवर्तत या सोत्साहं तस्मिन् कर्तव्ये कर्मणि पूर्णं सहयोगमदात्। यदा श्रीजवाहरलालस्तथाऽन्ये परिजनाः स्वतन्त्रता-सङ्ग्रामे सक्रिया आसंस्तदा सा महाभागाऽपि कारावासेऽवसत् कष्टान्यसहत किञ्च बहिःस्थिता स्वयंसेवकानां सङ्घटनानां तथा विरोध-प्रदर्शनानां नेतृत्वमपि निरवहत्।

एकतो यूरोपस्य महायुद्धमतीव विस्फोटकं प्रवृत्तमासीत्, समग्रं विश्वं चिन्तायाः पीडाया आशङ्कायाश्च शिखरे स्थितं युद्धस्य विभीषिकां पदश्यदभूत्। अन्यतश्च पराधीनतायाः शृङ्खलास्त्रोटयितुं भारतस्य यौवनमाकुलमवर्तत। विदेशिवस्तूनां बहिष्कारैः स्वदेशि-वस्तूनां स्वीकारैः सह भारतीया देशभक्ताः शिरःसु शवचीराणि बद्ध्वा प्राङ्गणे निःसृता आसन्। क्रान्तेः स्वरः कस्मिन्नप्येकस्मिन् क्षेत्रे सीमितो न भूत्वा नगराणि ग्रामान् यावच्च व्याप्तिमगच्छत्। विदेशिनः प्रति समग्रेऽपि देश आक्रोशोऽविद्यत। स्थाने स्थाने आन्दोलनानि जागरितानि। जनसभा भवन्ति स्म; निग्रहणानि जातानि, काराः पूरयितुं जनता सोत्सुकाऽभूत्। वोल्शेविक-क्रान्तिः साफल्यमासाद्यान्यान् क्रान्तिकर्तॄन् वीक्षते स्म। भारतस्य क्रान्तिकारिषु तस्याः प्रभावः स्पष्टतया दृष्टिपथमायाति स्म। श्रीजवाहरलालः प्रत्यक्षतया स्वाधीनता-सङ्ग्रामेऽवातीतरत्। आनन्द-भवने तदा देशभक्तानां गोष्ठ्यः प्रचलन्ति स्म तस्मात् कारणादानन्दभवनं राष्ट्रमुक्तेरान्दोलनस्य गतिविधीनां प्रधानं केन्द्रमभवत्।

आसीदयं वर्षः १९१७ तम ईशवीयस्य। नवम्बरमासस्यैकोनविंशे दिनाङ्के श्रीमतां मोतीलालनेहरूणां पुत्रवधूः श्रीजवाहरलालस्य पत्नी श्रीमती कमला निशीथे सुकुमारामेकां बालिकां प्रासूत। कमलवत् कोमला तथा पाटलवर्णा सा बालिका कोमलतामान्तरिकीमूर्जाशक्तिं च नीत्वा सर्वेषां ग्रहाणामानुकूल्य-

शालिनि समये जनिमलभत। आनन्दभवनममन्दानन्देन तुन्दिलमभवत्। सर्वेषामपि मुखानि परमोत्साह-संवलितस्मिति-सोदराणि समालोक्यन्त।

सद्योजाताय जातकाय सर्वतः प्रथमं भवनस्थितेषु वृद्धेषु वृद्धतमस्य **'मुबारक-अली'** महाभागस्य शुभाशिषः प्राप्ताः। स हि महाभागो **'बदायूं'** वास्तव्य आसीत्। १८५७ ईशवीये स्वाधीनता-सङ्ग्रामे सक्रियभागग्रहणात् तदीयः परिवारोऽप्याङ्ग्लानां क्रूरस्य दमनस्याखेटतां गत आसीत्। सकलोऽपि परिवारो भङ्क्त्वा विकीर्णः। पं० मोतीलालनेहरूणां स कथनाय तु लिपिकोऽभूत् परं दीर्घकालिकस्नेहसेवावशात् परिजनेषु मान्यः सहोदरकल्प आनन्दभवनस्य व्यवस्थापकश्चासीत्। श्रीजवाहरलालस्य तथा तदीयानामन्यासां भगिनीनां लालनं पालनञ्चापि मुबारकअलीमहाशयस्याङ्के समवर्तत। नेहरूपरिवारस्य शिशवस्तत्सान्निध्येन राष्ट्रिया ऐतिहासिका लौकिकाश्च गाथाः श्रुत्वा वर्धमाना अभूवन्। वार्धक्यविवशस्य-'कैन्सर' रोगाक्रान्तस्य तस्य बलवतीच्छाऽऽसीद् यत् स श्रीजवाहरलालस्य सन्ततिमेकवारमात्मनोऽङ्के पश्येदिति।

श्रीमती कमला शिशुं प्रसूतवती, तदैव स काश्मीरिकोर्णप्रावरणेनाच्छाद्य मुंशी-मुबारकअलीमहाभागस्य समीपमानायिषत। श्रीमोतीलाला अपि सहैवावर्तन्त। शिशुं दृष्ट्वैव तस्य जराजर्जरितयोर्नयनयोर्दीप्तिः प्रास्फुरद् हर्षाश्रुबिन्दव उद्गतास्तथा गद्गदेषु स्वरेषु स आशीर्वचांस्युदचरत्—"भ्रातृवर! (श्रीमोतीलाल!) हार्दिक्यो वर्धापनाः। अयं जातक ईदृश एव योग्यो महाँश्च भवतु यथा हि भवदीयो जवाहरः।" इयत्कथनेन सहैव स सहसा चिर-निद्राया अङ्के व्यलीयत। कोऽपि तावन्तमवकाशं नासादितवान् यः कथयेद्—"श्रीजवाहरस्य सन्ततिरियं नास्ति **'पुत्रः'** परं **'पुत्री'** विद्यत इति।" तदीया आशिषः सत्या एवाभूवन्।

शुद्धो विकाररहितः प्रणयाभिभूतो,
निःस्वार्थभावसुभगः स्वयमन्तरात्मा।
या आशिषो वितरति प्रकृतिः समस्ता—
स्ताः पूरयत्यविरतं परितः प्रशस्ताः॥२॥

प्रातस्तरामेवानन्दभवने सर्वानन्दसंवर्धिन्याः श्रीमोतीलालनेहरूणां पौत्र्याः श्रीजवाहरलालमहोदयस्य पुत्र्या जन्माभूदिति समुदन्तः कस्तूरिकासौरभवत् सततं सर्वत्र प्रासरत्। सकला अपि स्नेहभाजो वर्धापनाभ्य आयातुं प्रवृत्ताः। यदा तेषु वर्धापकेषु केनापि श्रीमती स्वरूपरानी पौत्रीजन्माभिलक्ष्याभिनन्दिता तदा मनाक् खिन्नेव सावादीत्—'अये! अपेक्षितं तु जन्मासीत् पुत्रस्यैव……।' अर्धोदितमिदं श्रुत्वैव मध्येवाक्यं श्रीमोतीलालनेहरूभिर्निरुद्धयोक्तं 'मैवं वोचः।' 'वयं पुत्रे पुत्र्यां वा भेदं न गणयामः। अस्माकं परिवारे सर्वेऽपि समाना एव मन्यन्ते। इति श्रुत्वैव सा मौनमस्थात्।

नाम-निर्धारण-वेलायामपि कश्चिदीदृश एव विचित्रः संयोग उपातिष्ठत्। पितामही-पितामहश्च नवजातायास्तस्या अभिधानम् "**इन्दिरा**" इति निर्धारयितुमकामयतां परं माता-पितरौ तस्याः परमाह्लादप्रदं स्वरूपं दृष्ट्वा '**प्रियदर्शिनी**'इति नाम निश्चेतुमचीकमताम्। स्वल्पोहापोहयोरनन्तरं सर्वेषामपि सम्मिश्रितस्य प्रेम्णः कारणाद् "**इन्दिरा प्रियदर्शिनी**"ति शुभं नाम निरधारि। वस्तुतः सा दर्शनेऽतीव प्रिया वपुषा कोमला कमलवदरुणारुणविग्रहा चावर्तत। आत्मीयानां हितैषिणां सुहृदाञ्च वर्धापनानि सर्वत आपूरयन्ति स्मानन्दोदधिम्। वर्धापनासन्देशेषु श्रीमत्या **सरोजिनीनायडू**-महाभागया पण्डितायाभिनन्दनेन सह लिखितमासीत्—"**कन्येयं भारतस्य नवीन आत्माऽस्ती**"ति। एवमेवान्यैरपि 'क्रान्तिदूती', 'स्वातन्त्र्य-सहचरी' 'स्वाधीनता-सङ्ग्राम-पताका' प्रभृतिभिर्विविधैराशंसनैर्नितरामभिनन्दितः श्रीनेहरूपरिवारः।

भविष्यतो गर्भगतं किमस्तीत्येतत् कथं कः परिवेत्तुमीष्टे ?।
परं परेशस्य कृपा-प्रसादात् सत्यं भवत्यत्र सतामभीष्टम् ॥३॥

'प्रियदर्शिनी' प्रसन्नया मुखश्रिया सर्वान् समाह्लादयन्ती बाल-सुलभेन चापलेन स्फुरन्ती मङ्गलदीपिकेवाभूदानन्द-भवनस्य। दृढाया मनोवृत्तेः पितामह्याः पावनायाः प्रीतेः प्रसवित्र्याः सर्वातिशायिनः सारल्यस्य पितुः साहससम्पृक्तस्य गाम्भीर्यस्य तथा भ्रातृष्वसॄणां मोदमसृणस्य स्नेहस्य प्रभावाश्चातितरां तां प्रभावयितुं प्रारभन्त। तपसस्त्यागस्य निष्ठायास्त्रिवेणीव तीर्थराजेऽपरत्रिवेणीव जन्म प्राप्ता प्रियदर्शिनी सा पितामहेषु सुतरां स्निह्यति स्म। यदा तेऽट्टहासं कुर्वन्ति स्म तदाऽऽनन्दभवनस्य सकलमप्यन्तरङ्गं हासेन गुञ्जितं भवति स्म किञ्च यदा ते कमपि विचारं पुरः स्थापयन्ति स्म तदा तं परमेण दार्ढ्येनोपस्थापयन्ति स्म। इन्दिराया लालनं सामान्य-बालकानामिव केवलं विनोदायाश्वासनायैव वा नाभूत् तस्मिन् हार्दिकेन स्नेहेन सहैव दासतापाशमोचनपूर्वकं स्वतन्त्रता-समवाप्तेश्चिन्तनवीचीनां प्रमेकोऽपि सममेवाभूत्। अत एव तस्याः प्रत्येकमङ्गं देशसेवा-संस्कार-संस्कृतं सत् परिपोषं प्राप्नोति स्म।

बाल्ये सेचयतः शिशोः सुसरणौ पित्रोः कुले भास्वरान्,
संस्कारानथ पारिवारिकगणा अङ्कूरयन्ते गुणान्।
वृत्तिं पल्लवयन्ति तस्य परितः प्राप्तप्रसारा जनाः,
कर्माण्याशु च पुष्पयन्ति सुकृतीस्तैः शोभते बालकः ॥४॥

□

□ शैशव-संस्काराङ्कुरणम्

श्रेष्ठा यत्र परम्परा कुलमथो सर्वात्मना निर्मलं,
शुद्धा दीप्तिमती विचारसरणिः संवेदनोत्कं च हृत्।
आदर्शाः परमोन्नताः प्रतिजनं प्रीतिर्मतिः सात्त्विकी,
तत्रैवावसति स्वयं विकसिता संस्कारिता सन्ततम्॥१॥

इन्दिराया जन्म तस्याः पितामहीपितामहयोर्मातापित्रोः ज्येष्ठ-कनिष्ठ-भ्रातृव्याभ्रातृव्यानां पितृस्वसॄणां तथाऽन्येषां परिजनानां महत आनन्दस्य जनकमभूत्। सर्वेषां मनःसु तस्याः कमनीयं रूपं कमप्यनिर्वचनीयमुल्लासं तनोति स्म। तदीयानि कल-मधुराणि वचांसि मनोमन्दिरे मङ्गलवाद्यानीव नदन्ति स्म। चञ्चले विलोचने निसर्गत एव स्वान्तमाकर्षयन्ति स्म। तस्या मुखाकृतिर्नयन-लोभनीयाऽवर्तत। मन्दस्मितसमुदञ्चितं वदनं मनो मोहयति स्म। गृहेऽतीव स्नहेन सा लालिता पालिता च। लालने पालने च तत्रापि पूज्याया मातुर्विशिष्टं स्थानमासीद् यथा हि प्रायेण मातॄणां भवति।

भारते विदेशि-शासनं प्रति सर्वत्रान्दोलनानि प्रवृत्तान्यभूवन्। यदा प्रियदर्शिनी वयसो द्वितीये वत्सरेऽवर्तत तदैव ब्रिटिश-लोकसभया **"रौलट एक्ट"**-नामकं कृष्णं विधानं स्वीकृतम्। यद्यपि साम्राज्यवादिनीनां शक्तीनां सहयोगः सामाजिकशोषणायान्यायस्य च प्रोत्साहनायैवासीत् परं स्वातन्त्र्यप्राप्तेरभिलाषतो युद्धे सर्वविधः सहयोगो भारतीयैर्विहितः। तथाप्याशाया विपरीतं रौलट-विधानं भारतीयैः प्राप्तं यस्मिन् 'कमपि जनं संशये सति कारायां निपातयितुं तथाऽऽवृते प्रकोष्ठे तस्मिन्नभियोगं चालयितुं शासनं स्वतन्त्रमभूत्।' सहैव **'जलियांवाला'**ऽभिधस्योद्यानस्य क्रूरतम-नरहत्याकाण्डमपि तेनोपहृतम्। दमनचक्रस्य तां चरमां स्थितिं विमृश्य भारतीया अतीव खिन्ना आसन्। श्रीगान्धिनो नेतृत्वेऽसहयोगान्दोलनं प्रवर्तितम्। श्रीमोतीलालनेहरूमहाशया — ये प्रारम्भे सत्याग्रहेण देशस्य स्वतन्त्रता-प्राप्तेः प्रयोगमुपहासास्पदं मन्वते स्म, तेषामेवानन्दभवने प्राय एतादृशीणां घटनानां विचारणाः योजनानां निर्मितयस्तासां क्रियान्वयनानि च प्रस्तूयन्ते स्म।

रौलटविधानेन ब्रिटिशशासकेभ्यो भारते 'राजनीतिक-प्रक्रियाणां दमनस्य निर्बन्धोऽधिकारः' प्रदत्तः। तदाधारेणारक्षिणः स्वतन्त्रतया निग्रहणं कारागारे स्थापनं पूर्वसूचनां विनैव सभानां भञ्जनं तत्र समवेतेषु यष्टिकानां प्रहरणं गुटिका-प्रक्षेपणं चाकार्षुः। तस्य कृष्ण-विधानस्य विरोधाय भारतीयास्तीव्रं सङ्घर्षं प्रारभन्त। श्रीमोहनदासकर्मचन्द्रगान्धिनं सङ्घर्षः स राष्ट्रनेतारं व्यदधात् तथा देशवासिनां महताऽऽदरेण स **'महात्मा गान्धी'**ति संज्ञामलभत।

सम्बन्धिनां गृहे स्थिता तदा वरोपयुक्ततायै भाविनो वरस्य भगिनीनां यूरोपीय-संरक्षिकाभिः सह सङ्गमिता।

८ फरवरी १९१६ ई० दिने वसन्तपञ्चम्यां देहलीनगर्यां श्रीजवाहरलाल-महाभागस्य विवाहः सम्पन्नः। विशेषेण धूम्रयानेन श्रीमोतीलालनेहरूणां मित्राणि सम्बन्धिनो देहलीमुपागताः। सप्ताहं यावद् वारयात्रिका अतीवानन्देन मनोरञ्जन-पूर्वकं सम्मानिताः। विवाहमण्डपं सर्वेषामानन्दानां केन्द्रमभूत्। इलाहाबादनगरं प्रति प्रत्यावर्तनात् परमपि नैकसप्ताहान् यावन्मनोरञ्जन-सामूहिकभोजन-क्रीडोत्सवानां कार्यक्रमाः प्राचलन्। पञ्चपञ्चाशद्वर्षायुष्केभ्यः श्रीमोतीलाल-नेहरूभ्यः स्वस्यैकलस्य पुत्रस्य विवाहस्तदीयजीवनस्य चरमा सिद्धिरासीत्।

ग्रीष्मकाले समस्तोऽपि परिवारः काश्मीरेष्ववकाशदिवसान् व्यत्यापयत्। अवकाशानन्तरं परिवार इलाहाबादं प्रत्यायातः। श्रीजवाहरलालनेहरूश्च स्वपितुः कनिष्ठसहयोगिनो रूपेणानन्दभवने कार्यमारब्धवान्। न्यायालयस्य प्रकोष्ठानां विधिवित्पुस्तकालयस्य तथा विधिज्ञानां सभायाः प्रवृत्तयः कदाचित् स्थानीया कवोष्णा राजनीतिश्चेति श्रीजवाहरलालमहाभागस्य व्यस्ततायाः साधनान्यभूवन्। किन्तु स्वदेशार्थं तदीया कर्तव्यनिष्ठा तं भूयोभूयोऽनुरुणत्ति स्मैव।

निश्चेष्टं नहि जीवनं सुखकरं यूनः कृते जायते,
तारुण्याच्च विजृम्भिते मनसि नो शान्ता स्थितिर्युज्यते।
सामुद्रोर्मिरिवोच्छलद्गतिमते वीराय वीरोचितं,
किञ्चित् कार्यमपेक्षते यदि न तत् स्याच्छान्तिलाभः कुतः ? ॥१७॥

तरुणिमनि तु तितीर्षा वर्धते वारिनाथे,
नभसि च परिमुक्ता उड्डिडीषा भवन्ति।
उदयति च कदाचित् पर्वतेष्वारुरुक्षा,
कुह च न शिथिलत्वं रोचते नैव तस्मिन् ॥१८॥

यूनां मनांसि निश्चेष्टं तिष्ठन्ति प्रतिकुर्वते।
कर्म-मग्नानि संसिद्धिं लभन्ते सर्वतः शुभाम् ॥१९॥

☐ राष्ट्रभक्तेरपूर्वः प्रवाहः

गेहे गेहे प्रगुञ्जन्नभिनवगतिदो भारतीयेभ्य आसी-
दाशानां यः प्रतीकः सपदि सुखकरो 'होमरूला'ख्यशब्दः।
राजद्रोहस्वरूपः स हि पुनरभवत् किन्तु गौराङ्गकेभ्य-
स्तेनाभूद् राष्ट्रभक्तेः प्रसृतिविलसितः कोऽप्यपूर्वः प्रवाहः ॥२०॥

सन् १९१४ ई० वर्षे श्रीगङ्गाधरतिलकाः षड्वार्षिकं कारादण्डं समाप्य बर्मातो भारतं प्राप्ताः। विदेशेषु स्थिता अनेके भारतीया अपि क्रान्तेरुद्देश्येन

भारतमुपागताः। भारतीयान् सैनिकान् क्रान्तये सन्नद्धान् कर्तुं सैनिकशिबिरेष्वपि ते कथञ्चित् प्रविष्टाः। विदेशेष्ववशिष्टाः क्रान्तिदूता भारते शस्त्रास्त्राणि प्रेषयितुं सयत्नाः सञ्जाताः। जर्मनी-टर्की-देशयोः सहयोगेन **'आजाद-हिन्द-सर्वकार'स्य** स्थापनाऽपि संवृत्ता परं तावत् किमपि साफल्यं नाधिगतम्। अतो जनता कस्यापि नवीनस्यान्दोलनस्य प्रतीक्षां कुर्वाणाऽवर्तत। श्रीतिलकानां समागमनेन नवस्फूर्तेः सञ्चारोऽभवत्।

श्रीमोहनदासकरमचन्दगान्धी १९१५ ई- वत्सरस्यारम्भे दक्षिणाफ्रिकातः साफल्यं प्राप्य भारतं प्रत्यायातः। २ अक्टूबर १८६९ ई०, दिने **गूर्जरत्ना-भूमेः** पोरबन्दरनगरे **'पुतलीबाई-करमचन्द'**योः पुत्रत्वेन प्राप्तजन्मा श्रीमोहनदास-गान्धी पितृभक्तः परिश्रमशील आत्मसम्मानी चासीत्। ४ सितम्बर १८८८ ई० दिवसे उच्चविद्यालायीयाध्ययनं समाप्याग्रिमाध्ययनाय यूरोपं गतस्ततश्च विधिशास्त्र-विशेषज्ञतारूपां **'बैरिस्टर-'** परीक्षामुत्तीर्य जुलाई १८९१ ई० वर्षे भारतं प्रत्यागतः। प्रसङ्गतो दक्षिणाफ्रीकायां स्वकीयज्येष्ठभ्रातुर्मित्रस्यैकस्मिन्नधिकरणे वैधानिकावेक्षणायामन्त्रितश्चतुर्विंशतिवर्षायुः स तत्रागच्छत्।

दक्षिणाफ्रिकायां स्थितवता श्रीगान्धिमहाभागेन भारतीयानामपमानपूर्णा स्थितिरवलोकिता स च स्वयमपि यातना बहुशस्तिरस्कारांश्चासहत। तैः क्षुब्धः श्रीमोहनदास-करमचन्दगान्धी भारतीयानां हिताय सत्याग्रह-सङ्ग्राममारब्धवान् बहूनि कष्टानि सहमानो निरन्तरं प्रयतमानश्च स सत्याग्रहे साफल्यमवाप्तः। गौराङ्गाणामत्याचाराः कृष्णानि विधानानि च निःशेषतां गतानि। अन्ततो २१वर्षाणि दक्षिणाफ्रिकायां निवासानन्तरं स्वदेशं पुनरायातोऽभवत्।

दक्षिणाफ्रिकायां **'ट्रान्सवाल'**स्य तथा **'नेटाल'**स्य भारतीय-वसतिषु व्यवह्रियमाणाया भेदनीतेर्दुर्व्यवहारस्य च विरोधे जनरल-स्मट्स-शासनस्य विरुद्धम्—**'अहिंसात्मकं निष्क्रिय-प्रतिरोधकमान्दोलनं'** प्रवर्तितमासीत्। भारतवासिन्या जनतया तदीयमतितरां स्वागतं व्याहृतम्। भारतीयाः स्वमनस्सु श्रीगान्धिनः कार्यप्रणालीं दृष्ट्वा निश्चयमकुर्वन् यदिदानीं देशाय 'महात्मा गान्धी' एक ईदृशो नेता प्राप्तः; यस्य निकटे वीरतापूर्णेन वर्त्मनाऽन्यायानामत्याचाराणाञ्च प्रतीकारं कर्तुं राजशक्तेराभिमुख्यायैकममोघमस्त्रं विद्यमानमस्तीति।

अत्रागत्य श्रीगान्धिमहाभागाः श्रीगोपालकृष्णगोखलेमहोदयानात्मनो राजनीतिकान् गुरूनमन्यन्त। तेषामेवाग्रहेण भारतस्य स्थितेः परिचयायानेकेषां स्थानानां ते यात्रा अकुर्वन्, काङ्ग्रेस-नेतृभिः सह स्वीयं सम्पर्कमसाधयन्, उचितं कालं प्रतीक्षमाणाश्च प्रायो वर्षमेकं तटस्थद्रष्टेव मौनमतिष्ठन्।

तदानीं भारतस्य राजनीतौ श्रीमत्या **एनी-बीसेण्ट**-महाभागया सञ्चालितस्य होमरूलान्दोलनस्य तीव्रया गत्या प्रयागस्य घटनाचक्रमतितीव्रतामगृह्णात्। २० जून-१९१७ ई० दिनस्य **'लीडर'** पत्रेण घोषितं यन् "माननीयाः

पण्डितमोतीलालनेहरूमहोदयाः, डॉ० तेजबहादुरसप्रू-मुंशीनारायणप्रसाद-अस्थाना-सी. वाई. चिन्तामणिमहाभागास्तथाऽन्ये राष्ट्रवादिनो मद्रास-शासनस्य निरङ्कुशायाः कार्यप्रणाल्या विरोधे होमरूलसङ्घटने सम्मिलिता इति ।" **'लीडर'**-पत्रस्य तस्मिन्नेवाङ्के जूनमासस्य द्वाविंशतितमे दिवसे 'इलाहाबादस्य भारतीय-नागरिकाणामेकस्याः प्रकटसभाया अपि घोषणाऽवर्तत, यस्या आध्यक्ष्यं श्रीमोतीलालमहोदयैः कर्तव्यमासीत् ।

रामप्रसादोद्याने विशाला सभाऽऽयोज्यत तत्र श्रीमोतीलालमहाभागैर्भाषितम्—"अस्माकं देशः साम्प्रतं सङ्क्रान्तिकाले वर्तते । सर्वकारेणास्माकं राष्ट्रियलक्ष्याणि प्रति प्रत्यक्षं युद्धं घोषितमस्ति । ...... किं वयमेतेषामधिकारिणामप्रसन्नतायाः समक्षं विनम्रा भविष्यामः ? ...... आगच्छत, वयं सर्वेऽपि होमरूल-सङ्घटनस्य ध्वजमुच्चैरुत्तोलयामस्तथा त्रयस्त्रिंशत्कोटिकण्ठा होमरूलस्य नादमुच्चैर्घोषयामः । वेतनभोक्तृता जन्मनः प्रागेव होमरूलाय मृत्युशय्यां सज्जयति...। आगच्छत, वयं सर्वे दृढैर्हृदयैः सह कवेः साकमिदं कथयन्तोऽग्रे वर्धामहे —

"आगन्तुमिच्छेत् किमपीह यत् तत्,
स्वेच्छं समागच्छतु नैव भीतिः ।
अस्माभिरेषा तरणिः समुद्रे,
निःशङ्क-भावादवतारिताऽस्ति ॥२१॥" इति ।

अग्रिमे दिवसे होमरूल-सङ्घटनस्योपवेशने श्रीमोतीलालनेहरूमहाभागा अध्यक्षा निर्वाचिताः किञ्च तत्पुत्रः श्रीजवाहरः संयुक्तमन्त्रिष्वेकः । स्वपुत्रस्य सहयोगेन श्रीमोतीलालनेहरूभिः स्थानीये सङ्घे नवीनस्य जीवनस्य सञ्चारः पूरितः । उत्तरप्रदेशशासनेन भारतशासनाय प्रहिते विवरणे सूचितमासीद् यद्—इलाहबादस्था होमरूल-सङ्घस्य शाखा 'समर्था शक्तिपूर्णा' च वर्तत इति । ततः परमगस्तमासस्य दशमे दिने लखनऊनगरे प्रान्तीयकाङ्ग्रेसस्य विशेषाधिवेशने ५४८ मिताः प्रतिनिधयः सम्मिलिताः । आध्यक्षं च पण्डितमोनीलालमहोदयैरेव निर्व्यूढम् । अधिवेशनस्य साफल्यं तदा प्रकटितं यदा दशदिनाभ्यन्तरमेव 'माण्टेग्यू-चेम्सफोर्ड-घोषणा' समक्षमुपागता । शासनेन स्वीकृतं यत् प्रशासनस्य प्रत्येकं शाखायां भारतीयानां सहयोगो वर्धेत स्वशासिताः संस्थाश्च क्रमिकान् विकासान् प्राप्नुयुरिति । श्रीमती एनी-बीसेण्टमहोदयाऽपि कारातो विमोचिता । अतीव श्लाघनीयेन स्वागतेन साऽभिनन्दिता । इदमासीत् साफल्यं पण्डितश्रीमोतीलालनेहरूणां तत्पुत्रश्रीजवाहरलालस्य राष्ट्रवादिन्या जनतायाश्च ।

यस्मिन् कर्मणि सात्त्विकी विलसति श्रद्धा तथा स्वात्मनो,
निःस्वार्था प्रकृतिः परोपकृतये सम्प्रेरयत्यञ्जसा ।
विश्वासश्च विराजते जनगणस्यापि स्वयं प्रेरित-
स्तत्रायान्ति नहि द्रुतं सफलताः स्वेच्छानुरूपाः कथम् ? ॥२२॥

[३]

स्मृति-कला

इन्दिरा-प्रियदर्शिनी

एषा शुभ्रा न तन्वो' विदानोर्ध्वेव' स्नाती दृशये' नो अस्थात् ।
अप द्वेषो बाधमाना तमां'स्युषा दिवो दु'हिता ज्योतिषागा'त् ॥

—ऋ० ५।८०।५

सानन्दं नन्दयन्ती परिजनमखिलं मातुरङ्के लसन्ती,
सिन्दूराभां सृजन्ती मृदु-मुदित-मधु-स्मेरवक्त्राब्जकान्तिः ।
सान्द्रा स्वारस्यसिक्ता ह्यचिर-विकसितेन्दीवरश्रीसनाथा,
पीयूषं संस्रवन्ती सुखयति सकलान् सन्ततिः सर्वदैव ॥१॥

गङ्गा-यमुनयोस्तथा पौराणिक्याः सरस्वत्याः सङ्गम-परिसरभूमौ भारतस्य प्रमुखेषु सांस्कृतिकेषु प्रशासनिकेषु च केन्द्रेषु कदाचिन् महनीयं स्थानं प्राप्तवतः **प्रयागापरनाम्न इलाहाबादनगरस्य** सुप्रसिद्धम् **'आनन्द-भवनं'** नेहरू-परिवारस्य वैभवेन सहैव राजनीतेः प्रवेशात् समाजस्य सर्वेषु वर्गेषु सम्मानास्पदं भाविनोनामाशानां केन्द्रञ्चावर्तत। समृद्धेः स्वदेशभक्तेश्च सङ्गमायिते तस्मिन् भवने भारतस्य स्वातन्त्र्याय चिन्तयन्तो नेतारः कार्यकर्तारश्च प्रायः प्रत्यहमेव गोष्ठीमुपवेशनं मित्यङ्गं वा संयोज्य योजना निर्णयांश्च कुर्वन्ति स्म। शनैः शनैः सम्पदो मोहं विमुच्य भारतस्वातन्त्र्याय स्वीयं कर्तव्यं प्रति जागरूकता नेहरूपरिवारमात्मसात् कुर्वती व्यलोक्यत ।

श्रीजवाहरलालनेहरूर्विदेशादागत्य स्वपितृपादानां पण्डितश्रीमोतीलालनेहरूणां सांनिध्यादात्मनश्चिरकाङ्क्षितां भावनां मूर्तिमतीं व्यदधात्। विदेशे निवसन् स मातृभूमेः स्वातन्त्र्याय सङ्घर्षयुक्तानि जीवनचरित्राणि पठन् प्रायोऽचिन्तयद् यद् "अहमपि भारतमातुः स्वतन्त्रतायै सुसज्जः सेवकः सन् योत्स्यामि ।" इति । तदनुरूपमेवात्र श्रीमोतीलालमहोदयैः सह भारतस्य महद्भिर्देशभक्तैः स मिलितः सङ्घर्षाणामान्दोलनानाञ्च स्थितेः परिचयं प्राप्नोत्। स्वीयं कर्त्तव्यं व्यचारयत् प्रान्ते सर्वाणि सुखानि विमुच्य भारतमातरं विदेशिशासनान्मोक्तुं स्वाधीनता-यज्ञे स्वीयामाहुतिमर्पयितुं कृतसङ्कल्पोऽभवत् ।

श्रीमती कमला-नेहरूः स्वकीय-स्वभावात् कोमला लज्जावती सरला चावर्तत। श्रीजवाहरश्च तारुण्योचितां वीरवृत्तिं धारयन् विश्वस्य घटनानां तथा देशे प्रवर्तमानायाः स्वातन्त्र्यप्रवृत्तेर्विषये सावधानस्तादृश्य एव वार्ताः श्रुत्वा प्रसीदति स्म श्रीमतीं कमलामपि च श्रावयित्वा स्वदेशसेवायै प्रेरयति स्म। शनैः शनैः साऽपि प्रसुप्तप्रायं स्वदेशाभिमानं प्रबुद्धमिव कृत्वा परिवारेण सह स्वातन्त्र्यसङ्घर्षे वीररमणीव सहयोगिन्यभवत्। सा स्वभावाच्छान्ता सत्यपि समस्ते परिवारे प्रभावशालिनाऽङ्केन सर्वेषां सम्मानभागवर्तत। तस्या हृदये राष्ट्रं प्रति कर्तव्यपालनस्य यावती दृढताऽविद्यत यादृशी च निष्ठाऽवर्तत तस्याः परिचयस्तया बहुधा प्रस्तुतः। यदा श्रीजवाहरलालमहोदयः श्रीगान्धिनामान्दोलने संयुयुक्षुरासीत्, परिवारस्य वैभव-शालि जीवनं परिवर्तयितुमभ्यलषत् तथा स्वीयं वाक्कीलता-व्यवसायमपि त्यक्तुमैच्छत् तदा सर्वेऽपि पारिवारिकास्तदीयं विरोधं कर्तुमुद्यता आसन्, किन्त्वेकैव श्रीमती कमला तादृश्यवर्तत या सोत्साहं तस्मिन् कर्तव्ये कर्मणि पूर्णं सहयोगमदात्। यदा श्रीजवाहरलालस्तथाऽन्ये परिजनाः स्वतन्त्रता-सङ्ग्रामे सक्रिया आसंस्तदा सा महाभागाऽपि कारावासेऽवसत् कष्टान्यसहत किञ्च बहिःस्थिता स्वयंसेवकानां सङ्घटनानां तथा विरोध-प्रदर्शनानां नेतृत्वमपि निरवहत्।

एकतो यूरोपस्य महायुद्धमतीव विस्फोटकं प्रवृत्तमासीत्, समग्रं विश्वं चिन्तायाः पीडाया आशङ्कायाश्च शिखरे स्थितं युद्धस्य विभीषिकां पदश्यदभूत्। अन्यतश्च पराधीनतायाः शृङ्खलास्त्रोटयितुं भारतस्य यौवनमाकुलमवर्तत। विदेशिवस्तूनां बहिष्कारैः स्वदेशि-वस्तूनां स्वीकारैः सह भारतीया देशभक्ताः शिरःसु शवचीराणि बद्ध्वा प्राङ्गणे निःसृता आसन्। क्रान्तेः स्वरः कस्मिन्नप्येकस्मिन् क्षेत्रे सीमितो न भूत्वा नगराणि ग्रामान् यावच्च व्याप्तिमगच्छत्। विदेशिनः प्रति समग्रेऽपि देश आक्रोशोऽविद्यत। स्थाने स्थान आन्दोलनानि जागरितानि। जनसभा भवन्ति स्म; निग्रहणानि जातानि, काराः पूरयितुं जनता सोत्सुकाऽभूत्। वोल्शेविक-क्रान्तिः साफल्यमासाद्यान्यान् क्रान्तिकर्तॄन् वीक्षते स्म। भारतस्य क्रान्तिकारिषु तस्याः प्रभावः स्पष्टतया दृष्टिपथमायाति स्म। श्रीजवाहरलालः प्रत्यक्षतया स्वाधीनता-सङ्ग्रामेऽवातीतरत्। आनन्द-भवने तदा देशभक्तानां गोष्ठ्यः प्रचलन्ति स्म तस्मात् कारणादानन्दभवनं राष्ट्रमुक्तेरान्दोलनस्य गतिविधीनां प्रधानं केन्द्रमभवत्।

आसीदयं वर्षः १९१७ तम ईशवीयस्य। नवम्बरमासस्यैकोनविंशे दिनाङ्के श्रीमतां मोतीलालनेहरूणां पुत्रवधूः श्रीजवाहरलालस्य पत्नी श्रीमती कमला निशीथे सुकुमारामेकां बालिकां प्रासूत। कमलवत् कोमला तथा पाटलवर्णा सा बालिका कोमलतामान्तरिकीमूर्जाशक्तिं च नीत्वा सर्वेषां ग्रहाणामानुकूल्य-

शालिनि समये जनिमलभत। आनन्दभवनममन्दानन्देन तुन्दिलमभवत्। सर्वेषामपि मुखानि परमोत्साह-संवलितस्मिति-सोदराणि समालोक्यन्त।

सद्योजाताय जातकाय सर्वतः प्रथमं भवनस्थितेषु वृद्धेषु वृद्धतमस्य **'मुबारक-अली'** महाभागस्य शुभाशिषः प्राप्ताः। स हि महाभागो **'बदायूं'** वास्तव्य आसीत् । १८५७ ईशवीये स्वाधीनता-सङ्ग्रामे सक्रियभागग्रहणात् तदीयः परिवारोऽप्याङ्ग्लानां क्रूरस्य दमनस्याखेटतां गत आसीत्। सकलोऽपि परिवारो भङ्क्त्वा विकीर्णः। पं० मोतीलालनेहरूणां स कथनाय तु लिपिकोऽभूत् परं दीर्घकालिकस्नेहसेवावशात् परिजनेषु मान्यः सहोदरकल्प आनन्दभवनस्य व्यवस्थापकश्चासीत्। श्रीजवाहरलालस्य तथा तदीयानामन्यासां भगिनीनां लालनं पालनञ्चापि मुबारकअलीमहाशयस्याङ्के समवर्तत। नेहरूपरिवारस्य शिशवस्तत्सान्निध्येन राष्ट्रिया ऐतिहासिका लौकिकाश्च गाथाः श्रुत्वा वर्धमाना अभूवन्। वार्धक्यविवशस्य-'कैन्सर' रोगाक्रान्तस्य तस्य बलवतीच्छाऽऽसीद् यत् स श्रीजवाहरलालस्य सन्ततिमेकवारमात्मनोऽङ्के पश्येदिति।

श्रीमती कमला शिशुं प्रसूतवती, तदैव स काश्मीरिकोर्णप्रावरणेनाच्छाद्य मुंशी-मुबारकअलीमहाभागस्य समीपमानायिषत। श्रीमोतीलाला अपि सहैवावर्तन्त। शिशुं दृष्ट्वैव तस्य जराजर्जरितयोर्नयनयोर्दीप्तिः प्रास्फुरद् हर्षाश्रुबिन्दव उद्गतास्तथा गद्गदेषु स्वरेषु स आशीर्वचांस्युदचरत्—"भ्रातृवर ! (श्रीमोतीलाल !) हार्दिक्यो वर्धापनाः। अयं जातक ईदृश एव योग्यो महाँश्च भवतु यथा हि भवदीयो जवाहरः।" इयत्कथनेन सहैव स सहसा चिर-निद्राया अङ्के व्यलीयत। कोऽपि तावन्तमवकाशं नासादितवान् यः कथयेद्—"श्रीजवाहरस्य सन्ततिरियं नास्ति **'पुत्रः'** परं **'पुत्री'** विद्यत इति।" तदीया आशिषः सत्या एवाभूवन्।

> **शुद्धो विकाररहितः प्रणयाभिभूतो,**
> **निःस्वार्थभावसुभगः स्वयमन्तरात्मा।**
> **या आशिषो वितरति प्रकृतिः समस्ता—**
> **स्ताः पूरयत्यविरतं परितः प्रशस्ताः॥२॥**

प्रातस्तरामेवानन्दभवने सर्वानन्दसंवर्धिन्याः श्रीमोतीलालनेहरूणां पौत्र्याः श्रीजवाहरलालमहोदयस्य पुत्र्या जन्माभूदिति समुदन्तः कस्तूरिकासौरभवत् सततं सर्वत्र प्रासरत्। सकला अपि स्नेहभाजो वर्धापनाभ्य आयातुं प्रवृत्ताः। यदा तेषु वर्धापकेषु केनापि श्रीमती स्वरूपरानी पौत्रीजन्माभिलक्ष्याभिनन्दिता तदा मनाक् खिन्नेव सावादीत्—'अये ! अपेक्षितं तु जन्मासीत् पुत्रस्यैव……।' अर्धोदितमिदं श्रुत्वैव मध्येवाक्यं श्रीमोतीलालनेहरूभिर्निरुद्धचोक्तं 'मैवं वोचः।' 'वयं पुत्रे पुत्र्यां वा भेदं न गणयामः। अस्माकं परिवारे सर्वेऽपि समाना एव मन्यन्ते। इति श्रुत्वैव सा मौनमस्थात्।

नाम-निर्धारण-वेलायामपि कश्चिदीदृश एव विचित्रः संयोग उपातिष्ठत्। पितामही-पितामहश्च नवजातायास्तस्या अभिधानम् "**इन्दिरा**" इति निर्धारयितुमकामयतां परं माता-पितरौ तस्याः परमाह्लादप्रदं स्वरूपं दृष्ट्वा '**प्रियदर्शिनी**'इति नाम निश्चेतुमचीकमताम्। स्वल्पोहापोहयोरनन्तरं सर्वेषामपि सम्मिश्रितस्य प्रेम्णः कारणाद् "**इन्दिरा प्रियदर्शिनी**"ति शुभं नाम निरधारि। वस्तुतः सा दर्शनेऽतीव प्रिया वपुषा कोमला कमलवदरुणारुणविग्रहा चावर्तत। आत्मीयानां हितैषिणां सुहृदाञ्च वर्धापनानि सर्वत आपूरयन्ति स्मानन्दोदधिम्। वर्धापनासन्देशेषु श्रीमत्या **सरोजिनीनायडू**-महाभागया पण्डितायाभिनन्दनेन सह लिखितमासीत्—"**कन्येयं भारतस्य नवीन आत्माऽस्ती**"ति। एवमेवान्यैरपि 'क्रान्तिदूती', 'स्वातन्त्र्य-सहचरी' 'स्वाधीनता-सङ्ग्राम-पताका' प्रभृतिभिर्विविधैराशंसनैर्नितरामभिनन्दितः श्रीनेहरूपरिवारः।

भविष्यतो गर्भगतं किमस्तीत्येतत् कथं कः परिवेत्तुमीष्टे ?।
परं परेशस्य कृपा-प्रसादात् सत्यं भवत्यत्र सतामभीष्टम्॥३॥

'प्रियदर्शिनी' प्रसन्नया मुखश्रिया सर्वान् समाह्लादयन्ती बाल-सुलभेन चापलेन स्फुरन्ती मङ्गलदीपिकेवाभूदानन्द-भवनस्य। दृढाया मनोवृत्तेः पितामह्याः पावनायाः प्रीतेः प्रसवित्र्याः सर्वातिशायिनः सारल्यस्य पितुः साहससम्पृक्तस्य गाम्भीर्यस्य तथा भ्रातृष्वसॄणां मोदमसृणस्य स्नेहस्य प्रभावाश्चातितरां तां प्रभावयितुं प्रारभन्त। तपसस्त्यागस्य निष्ठायास्त्रिवेणीव तीर्थराजेऽपरत्रिवेणीव जन्म प्राप्ता प्रियदर्शिनी सा पितामहेषु सुतरां स्निह्यति स्म। यदा तेऽट्टहासं कुर्वन्ति स्म तदाऽऽनन्दभवनस्य सकलमप्यन्तरङ्गं हासेन गुञ्जितं भवति स्म किञ्च यदा ते कमपि विचारं पुरः स्थापयन्ति स्म तदा तं परमेण दार्ढ्येनोपस्थापयन्ति स्म। इन्दिराया लालनं सामान्य-बालकानामिव केवलं विनोदायाश्वासनायैव वा नाभूत् तस्मिन् हार्दिकेन स्नेहेन सहैव दासतापाशमोचनपूर्वकं स्वतन्त्रता-समवाप्तेश्चिन्तनवीचीनां प्रमेकोऽपि सममेवाभूत्। अत एव तस्याः प्रत्येकमङ्गं देशसेवा-संस्कार-संस्कृतं सत् परिपोषं प्राप्नोति स्म।

बाल्ये सेचयतः शिशोः सुसरणौ पित्रोः कुले भास्वरान्,
संस्कारानथ पारिवारिकगणा अङ्कूरयन्ते गुणान्।
वृत्तिं पल्लवयन्ति तस्य परितः प्राप्तप्रसारा जनाः,
कर्माण्याशु च पुष्पयन्ति सुकृतीस्तैः शोभते बालकः॥४॥

☐

□ शैशव-संस्काराङ्कुरणम्

श्रेष्ठा यत्र परम्परा कुलमथो सर्वात्मना निर्मलं,
शुद्धा दीप्तिमती विचारसरणिः संवेदनोत्कं च हृत् ।
आदर्शाः परमोन्नताः प्रतिजनं प्रीतिर्मतिः सात्त्विकी,
तत्रैवावसति स्वयं विकसिता संस्कारिता सन्ततम् ।।१।।

इन्दिराया जन्म तस्याः पितामहीपितामहयोर्मातापित्रोः ज्येष्ठ-कनिष्ठ-भ्रातृव्याभ्रातृव्यानां पितृस्वसॄणां तथाऽन्येषां परिजनानां महत आनन्दस्य जनकमभूत् । सर्वेषां मनःसु तस्याः कमनीयं रूपं कमप्यनिर्वचनीयमुल्लासं तनोति स्म । तदीयानि कल-मधुराणि वचांसि मनोमन्दिरे मङ्गलवाद्यानीव नदन्ति स्म । चञ्चले विलोचने निसर्गत एव स्वान्तमाकर्षयन्ति स्म । तस्या मुखाकृतिर्नयन-लोभनीयाऽवर्तत । मन्दस्मितसमुदञ्चितं वदनं मनो मोहयति स्म । गृहेऽतीव स्नहेन सा लालिता पालिता च । लालने पालने च तत्रापि पूज्याया मातुर्विशिष्टं स्थानमासीद् यथा हि प्रायेण मातॄणां भवति ।

भारते विदेशि-शासनं प्रति सर्वत्रान्दोलनानि प्रवृत्तान्यभूवन् । यदा प्रियदर्शिनी वयसो द्वितीये वत्सरेऽवर्तत तदैव ब्रिटिश-लोकसभया **"रौलट एक्ट'**-नामकं कृष्णं विधानं स्वीकृतम् । यद्यपि साम्राज्यवादिनीनां शक्तीनां सहयोगः सामाजिकशोषणायान्यायस्य च प्रोत्साहनायैवासीत् परं स्वातन्त्र्यप्राप्तेरभिलाषतो युद्धे सर्वविधः सहयोगो भारतीयैर्विहितः । तथाप्याशाया विपरीतं रौलट-विधानं भारतीयैः प्राप्तं यस्मिन् 'कमपि जनं संशये सति कारायां निपातयितुं तथाऽऽवृते प्रकोष्ठे तस्मिन्नभियोगं चालयितुं शासनं स्वतन्त्रमभूत् ।' सहैव **'जलियां-वाला'**ऽभिधस्योद्यानस्य क्रूरतम-नरहत्याकाण्डमपि तेनोपहृतम् । दमनचक्रस्य तां चरमां स्थितिं विमृश्य भारतीया अतीव खिन्ना आसन् । श्रीगान्धिनो नेतृत्वेऽसहयोगान्दोलनं प्रवर्तितम् । श्रीमोतीलालनेहरूमहाशया — ये प्रारम्भे सत्याग्रहेण देशस्य स्वतन्त्रता-प्राप्तेः प्रयोगमुपहासास्पदं मन्वते स्म, तेषामेवानन्दभवने प्राय एतादृशीणां घटनानां विचारणाः योजनानां निर्मितयस्तासां क्रियान्वयनानि च प्रस्तूयन्ते स्म ।

रौलटविधानेन ब्रिटिशशासकेभ्यो भारते 'राजनीतिक-प्रक्रियाणां दमनस्य निर्बन्धोऽधिकारः' प्रदत्तः । तदाधारेणारक्षिणः स्वतन्त्रतया निग्रहणं कारागारे स्थापनं पूर्वसूचनां विनैव सभानां भञ्जनं तत्र समवेतेषु यष्टिकानां प्रहरणं गुटिका-प्रक्षेपणं चाकार्षुः । तस्य कृष्ण-विधानस्य विरोधाय भारतीयास्तीव्रं सङ्घर्षं प्रारभन्त । श्रीमोहनदासकर्मचन्द्रगान्धिनं सङ्घर्षः स राष्ट्रनेतारं व्यदधात् तथा देशवासिनां महताऽऽदरेण स **'महात्मा गान्धी'**ति संज्ञामलभत ।

महात्मा श्रीगान्धी रौलट-विधानस्य विरोधाय **'सत्याग्रहसभा'**मस्थापयत् किञ्च तस्याः सदस्यत्वाय जनान् न्यवेदयत्। तस्याः सभायाः सदस्यैरिदं प्रतिज्ञातमभूद् यत् 'तेऽन्यायपूर्णानि विधानानि न स्वीकरिष्यन्ति तथा सविनयावज्ञायै कारावासादपि विमुखा न भविष्यन्ती'ति। इत्थं सन् १९१९ ई० वत्सरे प्रवर्तितस्यान्दोलनस्य विवरणानि वृत्तपत्रेष्वपि प्रकाशितानि तानि च श्रीजवाहरेणापि पठितानि। असहयोगेन राजनीतिक-परिष्कृतेस्तथा सर्वकार-परिवर्तनस्य वार्तया श्रीजवाहरः सुतरामाकृष्टोऽभूत्।

विषमायां परिस्थितावन्ततः पन्था निःसृतः —एकः प्रकारो यः सरल उद्घाटितः समुचितश्चावर्तत। नेहरू-परिवारस्य केचन सदस्यास्तस्मिन्नान्दोलने समावेष्टुमुत्सुका अभूवन्, श्रीजवाहरलालस्तेषु प्रथम आसीत्। श्रीमोतीलालमहाभागानामन्तःकरणमिदं स्वीकर्तुं सज्जितं नाभवद् यन् मुष्टिमेयानां जनानां कारावासाद् देशस्य किमपि हितं भवितुमर्हतीति ? विषयमिममुपनीय पितृ-पुत्रयोः परस्परं विवादाश्चलन्ति स्म येषां कारणाद् गृहस्य शान्तिरपि भग्नप्राया व्यलोक्यत। प्रत्येकं स्थितौ मार्गनिःसारणे प्रवीणाः श्रीमोतीलालनेहरूमहाशयाः समाधानमेकं गवेषयन् यत् सरलं स्पष्टञ्चावर्तत। ते श्रीगान्धिमहाभागान् स्वकीय आनन्दभवन एत्राकारयन्। तैः सह सुदीर्घां चर्चां विधाय भारतस्य समस्यानां विविधानि समाधानानि प्रास्तुवन्। अन्ते तेषां चर्चा श्रीजवाहरे केन्द्रिताऽभवत्, तेऽवाञ्छन् यत् केनाप्यकाट्येन तर्केण जवाहरः सत्याग्रहसभायां प्रवेशाद् निरुध्येत। श्रीगान्धिनोऽपि नेच्छन्ति स्म यत् पितृपुत्रयोर्मध्ये किमपि मनोमालिन्यमागच्छेत्। अत एव ते श्रीमोतीलालनेहरूणां सम्मत्या सहमता अभूवन् यद् "जवाहरेणातुरतया कोऽपि निर्णयो न विधातव्य"इति। परं श्रीगान्धिनामयं परामर्शो निरर्थक एव संवृत्तो यतो हि शीघ्रमेव घटनाक्रमेणेदृशं वलनं प्राप्तं यतः सर्वोऽपि विचारः परिवर्तनं प्राप्नोत्, सा हि घटनाऽभूदतीव लोमहर्षिका पञ्चाम्बुप्रान्तस्यामृतसरनगरे निःशस्त्रेषु भारतीयेषु गौराङ्गशासकानां रक्तपूर्णमाक्रमणम्। तया घटनया न केवलं जवाहरलाल एव सत्याग्रहग्रहिलोऽभूदपि तु स्वयं श्रीमोतीलालमहाभागा अपि श्रीगान्धिनां नीतेः प्रवृत्तेश्च सर्वथाऽनुयायिनः संवृत्ताः। यतः —

दुर्नीति-दुःशासन-दुःखदग्धा, मुग्धा अपि स्फूर्तिमुपाश्रयन्ते।
उद्बुद्धभावा नृपनीतिविज्ञास्तिष्ठन्तु कस्मात् पुनरत्र शान्ताः ॥७॥

श्रीगान्धिनो देहलीं प्रस्थिताः। आन्दोलनं वेगवदभूत्, रौलट-विधानस्य समाप्तेर्याच्ञायाः समर्थने ३१ मार्च १९१९ ई० दिने देशव्यापिनः कर्मावरोधस्य घोषणाऽभवत्। जनतायाः स्फूर्त्या ब्रिटिशशासकाश्चिन्तिता व्याकुलाश्चाजायन्त श्रीगान्धिनश्च तैर्निगृहीताः दिल्ल्यां तथान्येषु नगरेषूपद्रवः प्रारब्धः। सभासु

चलसमारोहेषु च शीघ्रं प्रतिबन्धा घोषिताः । स्वीयं प्रबलं विरोधं प्रकटयितुं 'जलियाँवाला'-नामक उद्याने सभायां २३ अप्रैलदिवसेऽनेकसहस्रसंख्यकाः स्त्रियः पुरुषाश्च सोत्साहमेकीभूताः । सर्वतः समुन्नतेन प्राकारेण परिवृतस्य तस्योद्यानस्य यातायाताभ्यामेकमेव द्वारमवर्तत । **जनरल-डायरस्तां** सभां भङ्क्तुं गुटिकास्त्राणां भीषणं वर्षणमकारयत् । तेन परःसहस्रा जना मृताः । क्षते क्षारं पूरयितुमिव 'इङ्ग्लैण्ड-महिला'-नामकेन केनापि समूहेन शुल्कसङ्ग्रहपूर्वकं स्वर्ण-खड्गोपहारेण च स सत्कृतः । परं तदीयैः क्रूरकर्मभिः स डायरः — **'हिंस्रः स्वपापेन विहिंसितः खल'** इति किंवदन्त्यनुसारमन्ते स्वपदात् त्यागपत्रदानाय स्वयं विवशोऽभूदेव ।

अन्यायिनामुद्धत-शासकानां, क्रूरक्रिया-वर्तनतत्पराणाम् ।
पापानि सम्भूय दुराशयाँस्तानन्ते समूलं विनिपातयन्ति ॥८॥

श्रीगान्धिनोऽप्यतितरां खिन्नाः सत्याग्रहान्दोलनं न्यरुन्धन् परं तस्यैकः सुखदः परिणामोऽयमभूद् यद् भारतीयं राष्ट्रियकाङ्ग्रेसदलं तेषामसहयोगनीतेः पोषकमभूत् । निःशस्त्राया निरीहाया जनताया इत्थं कृतया हिंसया श्रीमोतीलाल-महानुभावानां विचारेष्वामूलं परिवर्तनं विहितम् । ते श्रीगान्धिनां प्रबलाः प्रशंसकाः श्रीजवाहरलालस्य मतं प्रत्यनुकूलाश्चाभूवन् । तेषां विचारपरिवर्तन-मियत्या नाटकीयपद्धत्या सम्पन्नं यत् ते समुचितं प्रचलन्तं वाक्कोलताव्यवसायं परित्यज्य प्राण-प्रणेन राजनीतावंवतीर्णाः । यदा काङ्ग्रेसेन जलियांवालाकाण्ड-स्याधिकृतज्ञप्तये **'परीक्षणसमितिः'** समायोजिता तदा तस्यां श्रीमोतीलालनेहरू-महाशयाः श्रीजवाहरलालस्तथा श्रीगान्धिनः सममेव सदस्यानां रूपेण तत्र गता आसन् ।

श्रीनेहरूपरिवारस्य बालकानां जीवनस्य धारा अपि घटनाक्रमेण सह परिवर्तयितुं प्रारब्धाः । आनन्दभवनस्य वैभव-परिपूर्णं वातावरणमपि सरलायां जीवन-पद्धताववतीर्णम् । न चिरादेव जीवन-प्रवाहः परिवृत्तः । यत्रैश्वर्यस्योन्मुक्तो विलास आसीत् तत्रैव सारल्यस्य निवासोऽभवत् । भोजन-मञ्चकेषु यत्र देशि-विदेशिभोज्यानां सर्वोत्तमाः प्रकाराः पुरस्क्रियन्ते स्म तत्रैवातीव सामान्यता-शालीनि भारतीयानि भोज्यानि स्थालीषु लसन्ति स्म । रोटिका द्विदली द्वित्राः शाका दधीनि चट्टनिका ओदनमन्ते मिष्टान्नमिति भोज्यं सर्वैः स्वीक्रियते स्म । बालिका प्रियदर्शिनी मूकदर्शिनीव परिवर्तनमिदं दर्शं दर्शं किं मनसि व्यचारय-दिति तु न शक्यते गदितुं, परं तस्यां वैभवस्य सामान्यायाः स्थितेश्च शिक्षाऽवश्य-मेव गृहं कृतवती । सर्वास्ववस्थासु समानभावस्य प्रथमः पाठस्तया तत्रैव पठितः किञ्च यत्रानन्दभवने मनोरञ्जनालापा हासपरिहासाश्च भवन्ति स्म तत्रैव प्रपुष्टानां राजनीतिकचर्चाणां गभीरेण वातावरणेन स्थानं प्राप्तमासीत् । अति-

थीनामागमनानि तेषां स्थितयः परस्परमान्दोलनसम्बन्धिनो विचार-विमर्शाश्च राजनीतिकं स्वदेशस्य स्वाधीनतायै त्यागस्य बलिदानस्य च शिक्षणमनायासेनैवाशिक्षयन्।

आगन्तृषु प्राघुणिकेषु तत्र खद्दरवासोधरा. श्रीगान्धिनामनुयायिनो नेतारः कार्यकर्तारः स्वयंसेवका राजनीतिविशारदा उत्तमोत्तमकोटिकाः सामान्या असामान्याश्च सर्वेऽप्यभूवन्। तेषां सर्वेषां वैचारिकाः प्रभावा बालिकाया इन्दिराया जीवनं घटयितुं मनोभूमिं सज्जयितुं तथा कर्तव्यबोधं परिणमयितुमुपयोगिनोऽभवन्। तदानीमिन्दिराया बाल्यं संरक्षिकां धात्रीं विना निर्बन्धमेवावर्तत, तस्मात् स्वच्छन्दतया भ्रमन्ती गभीरेण भावेन महतां वार्ताः सकुतूहलं शृण्वती व्यराजत्। देशस्येतिवृत्तनिर्मितौ महत्त्वपूर्णां भूमिकां निर्वोढुं संलग्नमानसानां तासां वार्तानां महदङ्कनमिन्दिराया मानसेऽपि गभीरतया स्थिरतामलभत। पितामहाः स्वस्यां पौत्र्यामतीव गर्वमावहन्ति स्म। ते तामतितरां मन्वते स्म किञ्च सर्वेषामतिथीनामग्रे तस्या भूयसीं प्रशंसामप्यकुर्वन्।

एकदैकस्याधिकरणस्य प्रसङ्गेन कलकत्तानगर्या यात्रायां श्रीमोतीलालमहाशयाः स्वस्या द्विवार्षिक्याः पौत्र्या इन्दिरायाः कृते 'मैसर्स व्हाइट्वे लेडला'-विपण्यै बाल-शकटिकायाः क्रयादेशमदुः। तदा स्वीये पत्रे ८ मार्च १९२० ई० दिने तैर्लिखितमासीत् —

"अहं सदैवेन्दिराया विषये चिन्तयामि। निश्छलताया मूर्तिमत्यास्तस्या विचारः सदा मां सान्त्वयति। अतीव सारल्येनेयं प्रवृत्तिर्मूर्तिपूजां प्रति तथा ताः सर्वा वार्ताः प्रत्याकर्षयति या आधुनिकी सभ्यता बुद्धिरहितेष्वन्धविश्वासेषु गणयति। इन्दिराया विशिष्यावधानमपेक्षितं विद्यत" इति। एतेन तेषामिन्दिरां प्रति कियान् दृढोऽनुराग आसीदिति स्पष्टं प्रतीमहे।

श्रीगान्धिमहाभागानां प्रखरा बुद्धिर्नैतिकी संवेदनशीलता न्यायोन्मादः सुदृढेच्छाशक्तिः सचेतना विनम्रता विवाद-प्रचारयोर्विवेकश्चेत्यादयो गुणा विचित्राः किन्तु प्रभावशालिन आसन्। इदं सम्भवं नासीद् यत् ते 'वायवीय-स्वप्नद्रष्टार' इति कथयित्वोपेक्ष्येरन्। तेषां मस्तिष्कस्य धार्मिक्या रचनया तदीय-व्यावहारिक-बोधस्य निर्बलकारणापेक्षया सबलत्वमेव सम्पादितमासीत्। १९१९ ई०. वर्षस्य प्रारम्भे श्रीजवाहरलालः प्रागेव महात्मगान्धिनां वर्गीकरणे स्थानं प्राप्त आसीद् वर्षस्य समाप्तिं यावच्च तदीयाः पितृपादा अपि श्रीगान्धिभ्यः सम्पूर्णरूपेणादरभावान् व्यकासयन्। इदमेव कारणमभूद् यत् पुत्रः पिता चोभावेवैकस्यां पङ्क्तौ समानत्वेनोपागच्छताम्।

पञ्चाम्बु-प्रान्ताय श्रीमोतीलालमहाभागाः राष्ट्रियसेवादृष्ट्या वैधानिकं

राजनीतिकं च महत्त्वपूर्णं कार्यं समपादयन् तत्परिणतिरूपेण च तेऽमृतसर-काङ्ग्रेसस्याध्यक्षा निर्वाचिताः। महता समारम्भेण ते राष्ट्रियनेतॄणां गौरवपूर्णायां मण्डल्यां मण्डिता अध्यक्षीयं भाषणमदुः। तस्मिन्नेव भाषणे श्रीमद्भिर्मोतीलालनेहरूभिः 'श्रीगान्धिनस्तदानीन्तनेषु भारतीयेषु सर्वाधिकमादरणीया भारतीया' अथ च तेषां सत्याग्रहान्दोलनं 'प्रचुरसम्भावनाशालिन्येका नवीना शक्ति'रस्तीति प्रोक्तमासीत्। तरुणो नेहरूः प्रायो महात्मगान्धिभिः सहावालोक्यत तदीया ख्यातिश्च वासन्तिकसौरभवत् सर्वत्र प्रसृतिं लब्धुं प्रावर्तत। श्रीगान्धिभ्यः सोऽसाधारणं लालनं स्नेहञ्च प्राप्नोत्।

१९२० ई० वत्सरस्य शरत्कालिकेऽधिवेशने श्रीगान्धिनामसहयोगनीतेरङ्गीकारानन्तरम् असहयोगस्य कार्यक्रमे-सर्वकारीय-पदवीनां, सर्वकारीयाणामथवा सहायताप्राप्तानां विद्यालय-महाविद्यालयानां न्यायालयानां विधानसभानां तथा विदेशिवस्तूनां बहिष्काराः सम्मिलिता आसन्। अन्यायपूर्णानां विधानानां विरोधस्तथा शान्तिपूर्वकं कारायात्राणां सज्जतया घोषणाऽपि स्वीकृताऽभूत्। सा घोषणा नेहरूपरिवारं सहसाऽऽत्मसाद्विधायात्मानं साक्षादुपास्थापयद्। बहिष्कारः कारावासश्च द्वावेव परिवारे प्रवेशं प्राप्य तस्य जीवनपद्धतिमेव परिवर्तन-पथे प्रेरितवन्तौ। यतो हि —

यस्मिन् रज्यति मानसं वितनुते वृत्तिं तथाऽऽमज्जति,
प्राशस्त्यं मनुतेऽङ्कपालयति यं यत्रात्मना मोदते।
यञ्च स्वीकुरुते प्रतीच्छति धिया यस्मै चिरं स्पर्धते,
तत्प्राप्तौ च समं विहाय मनुजस्तत्रैव विश्राम्यति ॥९॥

□ परिवर्तनस्य पराकाष्ठा

यत्र त्यागमयी मतिः कृतिरथो निःस्वार्थभावाञ्चिता,
चारित्र्यं च समुज्ज्वलं शुचियुतं सौहार्दसम्पन्नमयम्।
भव्ये मानसमन्दिरे सुवितते यत्रास्ति सिंहासनं,
सत्यस्य प्रतिमा विराजतितरां तत्रैव पुण्योर्जिता ॥१०॥

श्रीमतां गान्धिमहात्मनां धीरा गभीरा सत्योपासन-सरणिः सरला सारावगाहिनी विस्मयकारिणी चावर्तत। दर्शनेन चिन्तनेन च सा जनान् स्वयमाकर्षयति स्म, परं तस्या जीवनेऽवतारणमतिक्लिष्टमेवासीत्। यतस्तेषां महामनस्विनां ज्ञानाग्निदग्धकल्मषाणां कुशल-कर्मयोग-विजृम्भितानां नैतिका आदर्शा अहिंसा-सत्यास्तेय-शौचेन्द्रियनिग्रह-प्रभृतीनाध्यात्मिकसिद्धान्तानधिकृत्यैव राष्ट्रजीवनधारायामुपास्यन्ते स्म। विच्छिन्नरूपतां प्राप्ताया भारतीयजनतायाः प्रतिरोध-

शक्तेस्त्रोटन-स्फोटन - मारण-दारण - प्रवृत्तीरसहयोग-सत्याग्रहयोरभिनव-प्रणाल्या संयोज्य श्रीगान्धिनो वास्तविकान् राष्ट्रियतायाः साधकान् दीक्षयन्ति स्म। तथा-विधेषु दीक्षितेषु प्रयागस्थः काश्मीराभिजनो विद्यावैभवविभूषितः श्रीनेहरू-परिवारोऽपि सश्रद्धं सुपरीक्ष्य विना कदाग्रहं स्वात्मप्रेरणया दीक्षितोऽभूत्।

राष्ट्र-सेवा-व्रतमाराधयतां श्रीमतां मोतीलालनेहरूणां वाक्कीलता-परित्यागान् महानायोऽवरुद्धस्तथा सर्वेऽपि परिवारसदस्याः आडम्बरविरह्रितया स्थित्या वस्तुं प्रवृत्ताः। भृत्यानां सङ्ख्या न्यूनीकृता। अतिमहर्घाणि काच-पात्राणि चीनीयानि मृत्पात्राणि वाजिशालायाः श्रेष्ठा अश्वाः श्वानस्तथा विविधप्रकारिका मदिराप्रभृतयो विलास-सामग्र्यो विक्रीताः, श्रीमतीस्वरूपरानी श्रीमती कमला च स्व-स्वसमीपे यानि महर्घशालीनि हीरक-मुक्ता-माणिक्यादिरत्नैः खचितानि सौवर्ण्याभरणान्यासन्, तेषु कानिचिदत्युपयोगीनि स्वस्वसमीपे संरक्ष्य शेषाणां विक्रयाय सहमते अभूताम्।

श्रीमोतीलालमहाभागाः स्वीयमानन्दभवनं काङ्ग्रेसाय समार्पयन् नवीनं किन्तु लघु भवनं यावन्निर्माय सज्जं नाभवत् तावत् तस्मिन्नेव पूर्वभवने स्थित्वा पश्चात् तत्रावासाय गताः। तस्य भवनस्याप्यभिधान'मानन्दभवन'मित्येव प्रतिष्ठापितम्। ततः पूर्वतनस्यानन्दभवनस्य **'स्वराज्यभवन'**मिति नाम प्रवर्तितम्।

स्वाधीनतायै तथा स्वदेशाय सर्वस्वमुत्स्रष्टुकामाः श्रीनेहरूणां सर्वेऽपि स्वजनाः सारल्य-संयम-साधनासु लीना अभूवन् तत एव च हस्तनिर्मितानां खादीवस्त्राणां धारणेऽपि तेषां रुचिरवर्धत। इन्दिराऽपि समग्रमिदं परिवर्तनं दर्शयन्ती बहुधा तथैव वर्तयितुमवाञ्छत् परं परिवारस्य ज्येष्ठास्तथा कर्तुं निषेधयन्ति स्म। लघीयस्या बालिकायास्तथाविधं परिवर्तनं तेभ्यो नारोचतानावश्यकं च तेऽमन्यन्त तस्यै। तथापि तत्रानन्दभवनस्य जीवने सम्पन्नमाकस्मिकं रूपान्तरणं प्रियदर्शिनी न व्यस्मरत्।

यदीय-मतिरुज्ज्वला विगत-भेद-भावं मनः,
क्वचिच्च नहि चिन्तनं ह्यनुचितं विचारेष्वपि।
सदा स्फटिकवद् भवेद् हृदयमप्यलं निर्मलं,
तदा न किमुताङ्कितं भवति नैव जातं पुरः॥११॥

सन् १९१९ ई० वर्षस्यान्तिमेषु सप्ताहेषु लाहौर-प्रवासे श्रीमतां मोतीलालनेहरूमहोदयानां श्रीगान्धिनां च मध्ये यत् सम्पर्कसूत्रं स्थापितमभूत् तदेवोक्तस्य परिवर्तनस्य साहजिकः परिणाम आसीत्। आनन्दविलासानां तथा शारीरिक-सुखानामुपभोक्तारः श्रीमोतीलालमहोदयाः साधुवृत्तीनां विराग-भाजां धर्मात्मनां जीवनेऽतिसाधारणतया सुखदुःखेष्वनुद्विग्नमानसानां श्रीगान्धि-

महाभागानां सांनिध्येन पारस्परिकेण श्रद्धाभावेनेयन्तः प्रभाविता आसन्, येनानन्दभवनस्य स्थितिराश्रमरूपतामेवाश्रयत् । तत्रेलाहाबादजनपदवासिनां केषाञ्चित् सम्भ्रान्तजनानां सायङ्कालिकमनोरञ्जनस्थान(क्लब)स्यापेक्षया खादीधारिणां राष्ट्रसेवाव्रतिनां यात्रायाः काले 'विश्रामस्थल'-रूपतैवाधिक्येनादृश्यत ।

तत्र भूयोभूयः काङ्ग्रेसदलस्य कार्यकर्तॄणां गतागतैर्विभिन्नानां समितीनामुपवेशनादिभिश्च सम्पूर्णा गार्हस्थ्य-व्यवस्थाऽपि विपरिणतिं प्राप्तवती । परिवारस्य महिलाभ्य इदं कष्टकरं त्ववर्ततैव । ता अनुभूतवत्यो यत् सहसा तासां सुखानि विच्छिन्नतां गतानि येषां ता अभ्यस्ता आसन्, ययाः शान्त्यात्मभावेन च तासां नैरन्तर्यमासीत् तदखिलमपि ताभ्यो हृतमभूत्, परं हिन्दूनारीत्वस्य च्छायायां विद्यमानायास्त्यागवृत्तेरेव प्रभावात् स्वरूपरानी पुत्र्यः कमला च तत्परिवर्तनं प्रति शीघ्रमेव सामञ्जस्यमस्थापयन् । सामञ्जस्यस्यास्याः प्रक्रियाया मूले कारणमिदमभूद् यदस्य परिवर्तनस्य प्रेरक एको 'महात्मा'ऽवर्तिष्ट ।

धनं प्रत्यनासक्तिं धारयतां श्रीमोतीलालनेहरूणां विचार आसीद्-'यदद्य यावदहं धनेन गवेषयन्नासं परमिदानीं मया बलात् तस्मै द्वारं पिहितमस्ती'ति । खद्दर-वस्त्रस्य शाटिका-कञ्चुकदुकूलानि वसानानां श्रीमोतीलालानां स्वजीवनप्रवृत्तेर्विषये सन् १९२१ ई० वर्षस्यैकस्मिन् पत्रे श्रीगान्धिमहाभागेभ्यो लिखितंमासीत् तैः —

"द्वयोर्भोजनालययोः स्थानमेकेन पैत्तलिकेन स्वयम्पाचनसाधकेन (कुकराभिधेन) प्राप्तमस्ति, एको भृत्यो विद्यते सोऽपि पूर्वभृत्यानामपेक्षयाऽकुशलः, अश्वानां पृष्ठेषु समूह्यागच्छतां तन्दुल-द्विदलीवेसवाराणां स्थाने केवलं त्रीणि सम्भरणसाधनानि सन्ति । प्रातराश-मध्याह्नभोजन-रात्रिभोजनानां वैदेशिक्या व्यवस्थायाः स्थाने विशुद्धं भारतीयं भोजनमास्वाद्यते तदप्येकवारमेव । आखेटस्य स्थाने भ्रमणं क्रियते । भुशुण्डीनां गुटिकास्त्राणां च स्थानं पत्र-पत्रिकाभिस्तथा पुस्तकैरुपलब्धम् । मम प्रियं पुस्तकं (सांगसेलेशितल) देवीगानमस्ति यस्याहं तृतीयवारं पारायणं करोमि । इदं विचित्रं परिवर्तनं विद्यते परं सत्यमेव मयेतः पूर्वं जीवनस्येयानितश्च श्रेष्ठ आनन्दः कदापि नैवानुभूत"इति ।

इदं लेखनं समुचितमेवासीत् तेषाम् । यतः —

हर्म्याणां रचनात् सुरत्नखचितालङ्कार-सन्धारणाद्,
बाह्याडम्बरतः प्रदर्शनविधेर्मिथ्या-प्रचारादपि ।
आनन्दः किल शक्यते न न चिरात् प्राप्तुं जनैर्भूतले,
प्राप्तोऽपि क्षणकस्तथा स वितथो दत्ते सुखं नो चिरम् ॥१२॥

इत्थमेव ५ फरवरी १९१९ ई० दिने स्थापितस्य **"इण्डिपैण्डेण्ट" नाम्नः समाचार**पत्रस्य सञ्चालन-व्यवस्थाया अपि काठिन्यं श्रीमोतीलालमहाशयानव्यथयत् । निर्धारितोद्देश्यानां पूर्तये प्रवर्तितमिदं वृत्तपत्रं नियतं प्रकाशयितुं तेऽतीव चिन्तातुरा अभूवन् । सम्पादकस्य स्थैर्यं धैर्यं, व्ययभारस्य व्यवस्थां, लेखानामुद्देश्यानुकूलतां प्रबन्धगतसुलभतां च व्यवसाययितुं कैश्चन सम्पादकैः सह श्रीजवाहरलालनेहरुणाऽपि सहयोगोऽदायि । यथाकथञ्चित् सा व्यवस्था प्रवृत्ता, अन्ते वृत्तपत्रं तदवरुद्धमेव, परं तस्य सम्पादनेन श्रीजवाहरलालस्य साहित्यिकीभ्यो राजनीतिकीभ्यश्च रुचिभ्य उत्तमोऽवसरः प्राप्तः । एकोपयोगिनी महत्त्वपूर्णा चाभिव्यक्तिर्मिलिता । १७ सितम्बर १९२० ई० दिने श्रीमोतीलालनेहरूभिः सगौरवं श्रीगान्धिभ्यो लिखितमासीद्—"भारते इदमेकमात्रमाङ्ग्लभाषाया दैनिकं पत्रं विद्यते यदसहयोगस्य पूर्णं समर्थनं करोति" इति । श्रीजवाहरलालस्य सम्पादकीयान् विचारपूर्णान् लेखांश्च पठित्वा श्रीमोतीलालमहानुभावा अतीवानन्दमनुभवन्तः प्रशंसा अप्यकुर्वन् ।

एतदन्तराल एव तरुणनेहरूः श्रीजवाहरलालः शासनस्यैकस्मिन् कुचक्रे पतितः। यदा स स्वीयां पितामहीं तथा धर्मपत्नीं रुग्णतायाः कारणाच्चिकित्सकपरामर्शानुसारं नीत्वा मसूरी-स्थले पर्यटितुं गतोऽभूत् तदाऽस्य 'सेवाय-विश्रामालय' एवैकमफगानशिष्टमण्डलमप्येकस्य कस्यापि सामान्यस्याफगान-ब्रिटिश-विवादस्य समाधानाय रात्रावसत्। शासकीयेन गुप्तचरविभागेन तद्विषये किमप्याशङ्क्य श्रीजवाहरलाल आदिष्टो 'यत् स स्पष्टरूपेणेदं प्रतिवचनं दद्याद्-यदह'मफगानप्रतिनिधिभ्यो न मिलिष्यामि न च कमपि सम्बन्धं स्थापयिष्यामीति ।' तस्यादेशस्यास्वीकृतौ तत्कालमेव निर्वासनाऽऽज्ञाप्रदानस्याप्युल्लेखस्तत्रावर्तत । श्रीजवाहरेण कथितं—अहं तेषु प्रतिनिधिषु कमपि न जानामि न वा मम तैः सह सम्बन्धस्थापनस्यापीच्छा विद्यते । परं सिद्धान्तत एवंविधप्रतिवचनदानस्याहं विरुद्धोऽस्मि ।' तदनन्तरं तत्रत्यां स्थितिं समीक्ष्य मध्यमं मार्गमाश्रित्य स इलाहाबादं प्रत्यागच्छत् ।

तेष्वेव दिवसेषु निकटस्थाः प्रतापगढजनपदस्य शताधिकाः कृषकाः स्वीयानां कष्टानां विनिवेदना-विषये जनताया ध्यानाकर्षणायेलाहाबादनगरमागत्य यमुनायास्तटे स्थितिं विधायातिष्ठिपन् । श्रीजवाहरलालस्तेषां कष्टं ज्ञातुं तैर्मिलितः । ते सर्वेऽपि तमन्वरुन्धन् न्यवेदयँश्च जनपदमागत्य स्थितेः साक्षात्काराय । यतो हि तेषां ग्रामा राजनीतिकानां घृष्टेभ्यः कुट्टितेभ्यो मार्गेभ्यः पृथगवर्तिषत । न पत्रप्रेषालयाः, न चिकित्सालयाः, न धूम्रशकटीविरामस्थानानि न च यातायातसौविध्याय व्यवस्थिताः पन्थानः । प्रार्थनया द्रवीभूतस्तथा वास्तविकं ज्ञातुं समुत्सुकः श्रीजवाहरलालो भीषणे ग्रीष्मे शिरस्यार्द्रं प्रोञ्छनवस्त्रं निधायावधस्य ग्रामेषु पदयात्रयैव गतः । श्रीमतां मोतीलालमहोदयानां विदेशेषु शिक्षितं तरुणं पुत्रमा-

त्मनां मध्ये सम्प्राप्तं दृष्ट्वा कृषकाः पुलकिताः कृतज्ञाश्चाभूवन्।

श्रीजवाहरेण तैः सह भोजनं कृतम्, मृन्निर्मितेषूटजेषु तेषां दुरवस्थायाः शासनस्य दुर्नीतिस्तदीयानां दैन्यस्य चालोकनाद् हृदये महती वेदना समुदभूत्। कृषकाणां प्रेम्णा कार्तज्ञ्येन चात्मनः संशयं विच्छिद्य स स्वकीयान् विचारान् भाषणेन प्राचीकटत्। ग्रामेषु विहितमिदं साहसिकं कार्यं श्रुत्वा तदीयाः पितरस्तं प्राशंसन् स्वयञ्चान्वभवन् यत् —

कृषका एवास्माकमन्नदातारः। यदि नाम ते सुखिनो न भवेयुस्तदा प्राप्यमाणेऽन्नेऽन्यस्मिंश्च भरण-पोषणात्मके साधने सौख्यं कुतो लभ्येत? अस्माकं देशे कृष्युद्योगयोः सम्पन्नताया अभावो नास्ति किञ्च जलसाधनैः सुसम्पन्नत्वेऽपि कृषका धनिकानाम् ऋणभारेण भुग्ना वैदेशिकानां दुर्नीत्या पीडिताः सन्ति। तस्मादेव ते स्वयमुत्थातुं स्वोन्नतिं कर्तुं च सर्वथाऽक्षमा एव विद्यन्ते। अत एव —

यावन्नः परतन्त्रतावरणजाद् दुष्पञ्जरात् सत्वरं,
मुक्तिः स्यान्नहि तावदत्र कृषका अन्ये च सामाजिकाः।
सम्प्राप्यापि सुसाधनानि नियति प्रत्तानि पीडान्विता,
ग्रामीणाः स्वविचार-चार-रहिताः किञ्चिन्न कर्त्तुं क्षमाः ॥१३॥

किञ्च विलोक्यात्म-देशस्य दैन्यं च दास्यं,
बुभुक्षामवस्थाञ्च नग्नां जनानाम्।
मनः कस्य दूयेत नो, मातरं कः,
सुतो द्रष्टुमीष्टेऽथवा शोकमग्नाम्? ॥१४॥

निदानं दास्यमेवास्य तन्निरस्तुं प्रयस्यताम्।
क्रियेत यावती शंसा, साऽल्पैवाद्य भविष्यति ॥१५॥ इति॥

□

[४]

मेधा-कला

साहजिक-शिक्षायाः शुभारम्भः

मे॒धाम्मे॒ वरु॑णो ददातु मे॒धाम॒ग्निः प्र॒जाप॑तिः ।
मे॒धामिन्द्र॑श्च वा॒युश्च॑ मे॒धान्धा॒ता द॑दातु मे॒ स्वाहा॑ ॥

—यजु० ३२।१५

प्रकृतिः परिवेशजा स्थितिः, शिशु-शिक्षार्थमुभे सुसाधने।
स्वयमेव पुरस्कृते क्षितौ, ददतः शिक्षणमुत्तमं मुदा ।।१।।

प्रकृति-जनन्या भवने सकला अपि व्यवसाया आनन्दमया वर्तन्ते । प्राकृतिक्यां शालायां प्राप्यमाणं दुःखमपि वस्तुतोऽनुभवैः परिपूरितं भवति तत एव तदप्यानन्दरूपमेव जायते तेनैव च यौवने यानि वस्तूनि त्रासप्रदानि वैरस्योत्पादकानि किं वा भयावहानि प्रतीयन्ते तदपेक्षया तानि बालकेभ्यो विशिष्यानन्दोत्साहदायकानि सम्पद्यन्ते। एवमेव परिवेशस्यापि ज्ञानोपलब्धौ महान् दायोऽस्ति। यत्र गृहे पारिवारिकाः सर्वेऽपि ज्ञानसम्पन्नाः स्युः, ज्ञानप्राप्तये संलग्नमानसाः श्रमशीलाः स्वच्छाचाराः सद्व्यवहाराः परिजना भवेयुस्तत्र ज्ञानं स्वयमेव मस्तिष्के प्रवेष्टुं चेष्टते। यत्र च दैन्यं दारिद्र्यं पीडा तर्जनानि भर्त्सनानि च नरीनृत्यन्ति तत्राज्ञानाद् ऋते को वस्तुमीहेत ? इत्थं स्पष्टमेव प्रकृतिः परिवेशश्च शिक्षागुरू स्तः । किञ्च —

क्रीडा ज्ञानं च नैव क्वचिदपि भजतः साधु पार्थक्यभावं,
क्रीडातो ज्ञानलाभः क्वचन च भवति ज्ञानतः क्रीडनं वै।
भाषैवैकाऽत्र विघ्नं जनयति यदि सा नो भवेत् र्तर्हि बाला,
निर्विघ्नं सर्वबोधं नियति-वितरितं प्राप्तुमीशा भवेयुः ।।२।।

बाल्ये यावज्ज्ञानमपेक्षितं भवति नतमां तावता न्यूनं क्रीडनमपेक्षितं मन्यते। अन्योन्याश्रयवती ज्ञान-क्रीडने बालकेभ्यः सुतरां सापेक्षे विद्येते। ये नामेमे द्वे अपि पृथक् पृथङ् मन्यन्ते न तत्रौचित्यं प्रतिभाति। भाषा ज्ञानप्राप्तौ विघ्नरूपतां बिभर्ति बालाश्च भाषां न विदन्ति तस्मादेव ते प्रकृति-परिवेशाभ्यां निःसङ्कोचं ज्ञानमर्जयितुं क्षमा भवन्ति।

प्रियदर्शिनीन्दिराऽपि प्रकृति-परिवेशाभ्यां ज्ञानमर्जयितुं प्रारभत। एकत आनन्द-भवनस्य समक्षं सङ्गमाय विकलतामनुभवन्तो गङ्गायमुनयोर्वीचिनिचयास्तयोस्तटयुगलं सेवमानास्तरुराजयो जलकेलिरिवाचरन्त्यो नौकाः फल-

पुष्प-पत्र-मण्डिता गृहारामा ऋतवः सूर्याचन्द्रमसोर्गतागते सन्ध्ययोः सुषमाश्च बालाया इन्दिराया मनसि किमपि चित्रं विचित्रमङ्कनं विदधानास्तदीयमौत्सुक्यं जिज्ञासां वर्धयन्ति स्म । अन्यतश्च तत्रैव जन्मनः प्रभृति विराजमाना वैभवविलासाः सुखसौविध्यसंसक्ताः सम्भारा महिलानां पुरुषाणां व्यवहारा आत्मनीनानां स्नेह-प्रवृत्तयश्च तदीयं हृदयमानन्देनोल्लासयन्ति स्म । तस्याः क्रीडनाय देश-विदेशेभ्य आनीतानि क्रीडनकानि पुत्तलिका अवर्तन्तः । धारणाय बहुविधानामभिनव-वाससां नासीन्नैयून्यम् । तत्सर्वं तस्या मनोरञ्जनाय ज्ञानप्रदानाय चालमभूत् । तया विधीयमानाः खेलाः, पितामह-पितामही-जननी जनक-जनकस्वसृ-प्रभृतिभिस्तत्प्रश्नानामुत्तररूपेण वोधितानि वचांसि च तदीयज्ञानोपबृंहणाय सहयोगीन्यजायन्त । अत एव प्रियदर्शिन्या बाललीलैव वस्तुतस्तदानीमुत्कृष्टजीवन-नैसर्गिक-पोषण-पूर्ण-शिक्षणानामाधारभुवः संस्थापने दृढीकरणे च साधीयस्यभवत् । अस्तीदं सत्यमपि —

उत्कृष्टं जीवनं च प्रकृति-विरचितं पोषणं शिक्षणं वै,
पूर्णं बाला लभन्ते सुसरलविधिना बाललीलाभ्य एव ।
अभ्यासानां क्रमस्याप्यथ नहि भवति क्लिष्टता तत्र, तस्मात्,
सर्वेऽप्यायान्ति मौनं क्षितितलविषयाः शिक्षणे निर्विरोधम् ॥३॥

अयं प्राथामिक-ज्ञानस्य प्रथमसोपानारोहणमङ्गलारम्भो गुरूणां मौनाख्यानरूप एवासीत् शिष्या च प्रियदर्शिनी छिन्नसंशया सती प्रयोगपक्षेण तज्ज्ञानं द्रढयितुं विह्वलेवावर्तिष्ट । आनन्दभवनस्य राजनीतिकं वातावरणं प्रत्यहं सम्पद्यमानानां स्वयंसेवकानां कार्यकर्तॄणां क्रियाश्चलसमारोहास्तथा विरोधसभानां विवरणाकर्णनानि यथाज्ञानमिन्दिराया मनस्यसामान्यानपूर्वान् विचारानुत्पादयन्ति स्म । परिवारे सर्वथैकाकिन्या बालिकायाः कारणात् सा स्वीयाभिः पुत्तलिकाभिः सह राजनीतिकानि क्रीडनानि क्रीडति स्म । काष्ठमञ्चके सा कदाचिद् बहुवर्णानि कदाचिच्च निराडम्बराणि वस्त्राणि धारयित्वा पुत्तलिकानामेकां पङ्क्तिं यष्टिका-गुटिकास्त्रयष्टीश्च धृतवतां पुत्तलकानां पङ्क्तेः पुरतोऽस्थापयत् । कृषकवेषधारिणीनां पुत्तलिकानां हस्तेषु कर्गदस्य पताका अभवन् नेत्रीत्वं विभावयन्तीन्दिरा च तेषामग्रे भाषणमकार्षीत्— 'स्वीयान् पितॄन् पितामहान् श्रीगान्धिमहात्मनश्चैवमेव भाषणं ददानान् साऽवलोकयति स्म । सत्याग्रहिणः सा कथयति स्म "अग्रे वर्धध्वम्, काङ्ग्रेसस्य ध्वज उन्नतस्तिष्ठेत्, ब्रिटिशशासकस्य सैनिकेभ्यो मनागपि न बिभ्यत ।" आनन्दभवनस्योन्नतैर्गवाक्षैरवलोकितानां काङ्ग्रेसध्वजधारितानां श्वेतखद्दराम्बरधराणां स्वयंसेवकानां चलसमारोहादीनामेव स प्रभाव आसीत् ।

पितामही स्वरूपरानी-इन्दिरायामतितरामस्निह्यत । श्रीजवाहरो बहुधा

तां निवारयति स्म यदियल्लालनमनुरञ्जनञ्च नोचितमस्ति; परं सा श्रुतमश्रुतमेवाकरोत्। इन्दिरा पितामहीं **'डोलअम्मा'**—पदेन सम्बोधयति स्म तस्य च कारणमासीन् मिष्टान्नस्थापनस्य जालिकावती काष्ठमञ्जूषिका, या हि 'डोल' इति कथ्यते तस्यां स्थापितस्य मिष्टान्नस्योपलब्धिं कामयमानेन्दिरा तथैव सम्बोधयति स्म।

असहयोगान्दोलनस्योत्साहो यथायथाऽवर्धत तथैवाधिकारिवर्गः कुण्ठितोऽजायत। नेहरूपरिवार इदमान्दोलनं धार्मिक-प्रेरणास्पदं मत्वा श्रीमतीस्वरूपरानी वधूः श्रीमती कमला तदीयाः सुताश्चातीव प्रेरिताः सत्यः शाकाहारिण्यः सञ्जाताः। स्वयं श्रीमोतीलालमहाशया अपि मद्यपानमत्यजन्, गीतापाठमकुर्वन्, स्वयं श्रीजवाहरलालेनापि स्वीये जीवनपरिचये स्वीकृतं यत् 'सन् १९२१ ई० वत्सरे धार्मिक-विचाराणामियन्नैकट्यं स लब्धवान् यावद् हि बाल्यदारभ्य तदवधि पूर्वं कदाऽपि नाभवत्।

तस्या नवीनस्थितेः परिणतिः १० मई १९२१ ई० दिनेऽवालोक्यत यदा श्रीमोतीलालस्य ज्येष्ठायाः 'स्वरूपा' (सरूपा)याः परिणयो 'राजकोट'स्थैर्विधिशास्त्रनिष्णातैस्तथा संस्कृतभाषाविद्भिः 'श्रीरणजीतपण्डितैः' सह सम्पन्नः। उभाभ्यां परिवाराभ्यामतिरिक्तं विवाहोत्सवे श्रीगान्धिनः सपत्नीकास्तथान्ये बहवः काङ्ग्रेसनेतारः सदस्याश्च समवेताः। नववध्वा 'श्रीमतीकस्तूरबागान्धि'—कर्तितसूक्ष्मसूत्रनिर्मिता खादीशाटिका धृताऽऽसीत्। परिवर्तितायां स्थितौ यावान् व्ययः सम्भव आसीत्, श्रीमोतीलालनेहरूभिरुन्मुक्तेन हृदयेन विहितः। तदानीमप्यारक्षिणो बहिः साशङ्काः सावधानाः स्थिता अवर्तन्त। तद्दिनमान्दोलनस्य वर्षदिनमभूदतस्ते हिंसाया आशङ्कया भीता अभवन्, परं सा कल्पना कल्पनैवाविद्यत। विवाहोत्तरं स्वरूपायाः श्वसुरालये नवीनमभिधानं 'विजयलक्ष्मी'रिति प्रतिष्ठापितं सा चाग्रे 'विजयलक्ष्मी-पण्डित' इत्याख्यया प्रसिद्धिमगमत्।

सुविचार-परम्परैव तं, मनुजं प्रोन्नमयत्यलं भुवि।
य इह स्वकृतौ दृढात्मना, परिणम्याचरति स्वयं तथा ॥४॥

आनन्दभवने राजनीतिकं वातावरणमाबालवृद्धं तन्मयं विदधाति स्म। महात्मश्रीगान्धिनां विचारधारा प्रत्यङ्गं प्रविश्य प्रस्फुरन्तीव प्रसरति स्म। बाल्ये वयसि वर्तमानाऽपि प्रियदर्शिनी विचारैस्तारुण्यमञ्चन्तीव प्रत्यभात्। एकदा सा स्वकीयान् पारिवारिकान् सर्वानपि सदस्यान् बहुमूल्यवन्ति वस्त्राणि सञ्चिन्वानानवलोक्य विस्मयं प्राप्नोत्। तस्या मनसि कौतूहलमजागरीद् यदिमे किमिदमाचरन्तीति ? तस्याः पितामहा एव तदीयाः सहयोगिन आसन्, तस्याः

सर्वेषामपि प्रश्नानां ते समाधानानि विदधति स्म, अतः सा मन्दं मन्दं तन्निकटं सम्प्राप्य पृष्टवती ! किमिदं भवति पितामहाः ? किं करिष्यन्ति सर्वाणि वस्त्राण्यत्रैकीकृत्य ? मृदुभिर्वचनैर्बोधयन्तस्तेऽकथयन्—"अद्य प्रभृत्यस्माभिः स्वदेशिवस्तूनां व्यवहारस्य व्रतमङ्गीकृतमस्ति। इतः परं किमपि वैदेश्यं वस्तु नैव प्रयोक्ष्यामः। एतानि वस्त्राणि ज्वालयिष्याम" इति। इन्दिराऽपि सत्वरमन्तर्गृहं प्रविश्य मञ्जूषातः स्वीयानि विदेशनिर्मितानि कञ्चुकादीन्यानीय तस्मिन् सञ्चये प्राक्षिपत्। महतोत्साहेन ज्वालितायां विदेशिवस्त्रहोलिकायां साऽपि स्वीयानि कमनीयानि वस्त्राण्यज्वालयत्। स्वाधीनताया समुन्नतध्येयं प्रति तदीये बालहृदयेऽपि तादृशा भावा व्यराजन्।

अन्तर्बाह्यविकारदूषितहृदो भावान् समूलं तिरः-
कर्तुं फाल्गुनमासपूर्तिदिवसे होला यथा ज्वाल्यते ।
तद्वत् सर्वविदेशिशासनविधेः पूर्णान् बहिष्कारजान्,
भावाञ्ज्वालयितुं विदेशिवसनान्यारात् समज्वालयन् ॥५॥

इन्दिरायाः स्वीयं दैनन्दिनं जीवनं स्वाधीनता-सङ्ग्रामादविच्छिन्नरूपेण संयुज्य सुदृढं भवति स्म। एकदा तस्या मातुः काऽपि सम्बन्धिनी पेरिसतस्तस्या उपहर्तुं विदेशिवस्त्रनिर्मितमतिरमणीयं कञ्चुकमानीतवती, माता श्रीमती कमला स्थितिं परिचाय्य तां न्यषेधीत् परं सा नामन्यत। तदा स्वयमिन्दिराऽऽहूता साऽपि तस्या आग्रहमनङ्गीकृत्य स्वीयां स्वदेशिवस्तुव्यवहारप्रतिज्ञां व्याहरत्। तदुत्तरेण खिन्ना सा वृद्धा सोपालम्भमिन्दिरां विदेशनिर्मितानां पुत्तलिकानामुपयोगमाक्षिप्तवती। इन्दिरा तेनाक्षेपेण खिन्ना सती गतायां तस्यां किमपि मनसि विनिश्चित्य सहसा प्रकोष्ठं प्रविष्टा। सर्वाणि वैदेशिकानि क्रीडनकानि सङ्गृह्य प्रकोष्ठस्योर्ध्वभागे गता दीपशलाकया च वह्निमुत्पाद्य रुदती तानि तस्मै समार्पयत्। तेष्वतिस्नेहवशात् तान्यविस्मरन्ती सा ज्वराक्रान्ताऽप्यभूत्, परं धैर्येण साहसेन च स्वीयासु भावनासु विजयं प्राप्नोदेव।

हस्तैः सूत्रितानि वयितानि च स्थूल-खादी-वासांसि धारयन्तः सर्वेऽपि परिवारसदस्या अतीव संयमवन्त आडम्बरहीनाश्च नवीनायां जीवन-पद्धतौ विश्वसन्तो देशसेवासु तत्परा अभूवन्।

६ दिसम्बर १९२१ तमेशवीयदिने तृतीये प्रहरे यदाऽखिलभारतीय-काङ्ग्रेससमितेः कार्यालयसचिव आनन्दभवने पं० मोतीलालमहोदयान् कतिपयानि पत्राणि दर्शयति स्म तदैव कस्यचनारक्षिण आगमनस्य सूचना कर्मचारिणा दत्ता। आरक्षी प्रविश्यौपचारिकतानन्तरमानन्दभवनस्यावेक्षणादेशमदर्शयत्।

तैरनुमतिः प्रदत्ता किन्चेदमपि विनोदपूर्वकं संसूचितं यत् पूर्णस्य भवनस्य सूक्ष्मावेक्षणे मासषट्कं व्यत्येष्यतीति। आदेशपत्रं पुनर्वाचयित्वा च तैः पृष्टं—'किं शासनमपराधविधानसंशोधनाधिनियमस्य सप्तदशखण्डस्य द्वितीयस्या धाराया अन्तर्गतमभियोगं प्रवर्तयितुमभिलषति ? सततं तेनोत्तरितं, आम् श्रीमन् ! मत्सविधे निग्रहणादेशोऽपि विद्यते । श्रीपण्डिताः प्रसन्ना अभूवन्, तेऽकथयन्—धन्योस्मि, अहं तदर्थं सज्जोऽस्मि। सहैव तेनारक्ष्यधिकारिणा श्रीजवाहरलालस्य निग्रहणादेशायापि कथितम्।

पिता च पुत्रश्चोभावेवातिप्रसन्नतया मित्रैः शंस्यमानौ मृत्तैल्लयानमध्यारुहताम् । श्रीमोतीलालाः स्वदेशवासिनां नाम्ना विदाय-सन्देशमलेखयन्—'भवतां पर्याप्तं सेवाया अनन्तरं, ममेदं सौभाग्यमस्ति यदद्याहं स्वमातृभूमेः सेवायै, स्वस्यैकमात्र-पुत्रेण सह, कारायां गच्छामि ।' तस्मिन्नवसरे केनापि संवाददात्रा श्रीमती स्वरूपरानी पृष्टा, तदा तयोक्तम्—"मम हृदये वियोगस्य कष्टं मनागपि नास्तीति तु कथयितुं न पारयामि, परमहम् 'इमं गौरवपूर्णमुनुभवं कुर्वत्यतिप्रसीदामि यन् मम प्रियाः स्वामिनस्तथकैलः पुत्रोऽद्य करायां व्रजतः। 'एकलः पुत्र'इति कथयन्त्यास्तस्या हृदयमापूरितं किन्तु कथञ्चिदात्मानमवरुध्याग्रेऽवदत्—'श्रीगान्धिमहात्मभिर्मह्यमेकवारं कथितमासीद् यत् संसारेऽन्येषामप्येकलाः पुत्रा भवन्ती'ति ।

आरक्षिणां यानं यथैव गृहादग्रे वर्धितं तथैव वयोवृद्धाया दुर्बलायाः श्रीमती-स्वरूपरानी-महाभागाया नयनाभ्यामश्रूणि प्रावहन् । तासां द्वाविंशतिवर्षीयया वध्वा श्रीमत्या कमलयाऽतिप्रयस्यात्मा धारितः । विगतस्यैकवर्षस्यान्तराले ताभ्यामतीव किमपि द्रष्टव्यं सोढव्यञ्चाभूत्, सकलं जीवनमेव परिवर्तितमासीत् तथाऽद्य को वेत्ति स्म स्वस्व-पत्युः कियते कालाय वियोगः सहनीय आसीत् । आशङ्का एकाकिता व्याकुलता एव तदानीं शिष्टे जीवने तयोः साहचर्यायोपस्थिता अवर्तन्त ।

यस्मिन् भारत-भूतले युग-युगात् स्वातन्त्र्यमासीच्चिरं,
सर्वेऽप्यात्मनियन्त्रिताः समवसन्नारङ्कराजं जनाः ।
तेऽत्रानार्य-विदेशिशासनवशाद् दास्यं गता यद् बलात्,
तस्मै चित्र-विचित्र-निर्मितिकृते कालाय किं ब्रूमहे ? ।।६।।

अग्रिमे ७ दिसम्बर १ २१ ई० दिने करायां स्थापित एकस्मिन् न्यायालयप्रकोष्ठे श्रीमोतीलालमहोदयानामधिकरणमारब्धम् । श्रीमोतीलालाः काङ्ग्रेसस्य स्वयं सेवकाः सन्तीति साधयितुं नासीत् कस्यापि प्रमाणस्यावश्यकता यतस्तेषाम् 'इण्डिपैण्डेण्ट'-नाम्नि वृत्तपत्रे सूच्यां सर्वोपरि तेषामभिधानं मुद्रितमभूदेव, तथापि

नाटकीयपद्धत्या कश्चन साक्ष्युपस्थापितः स च निरक्षरोऽपि हस्ताक्षराणि प्रामाणयत्। आत्मनः पक्ष-संरक्षणाय श्रीमोतीलालाः प्रार्थिता अपि न्यषेधयन्। तेभ्यो मासषट्कस्य कारावासस्तथा पञ्चशतमुद्राणामार्थिको दण्डोऽश्राव्यत। श्रीजवाहरलालोऽप्येतावतैव दण्डेन सम्बोधितः। तदीयोऽपराधस्तु कर्मविरोधकानां वैदेश्यवस्तुबहिष्काराणां प्रचारपत्राणां वितरणमासीत्। एतत् सकलमपि वृत्तजातं चतुर्वर्षीया बालिका प्रियदर्शिनीन्दिरा स्वेषां पूज्यपितामहानामङ्के स्थिताऽद्राक्षीत्। ततः परावृत्त्य तया पुत्तलिकानां समवाय एकीकृतः, भाषणं च दत्तं, सर्वाश्च क्रीडाभावेन कारायां प्रवेशिताः। आर्थिकदण्डस्य च राशेर्दानं निषेधितवतोः पितृ-पुत्रयोर्द्रव्याप्तये स्थानीया आरक्षिण आनन्दभवनं गत्वा विनिमये वस्तूनि गृहीतुमचेष्टन्त। तदैव परमेण क्रोधेन पूर्णा बालिकेन्दिरा तानरौत्सीत्। क्रोधाच्चरणं पातयन्ती साऽवोचत्—"यूयमेतानि वस्तूनि नेतुं न प्रभवथ। इमान्यस्माकं विद्यन्ते।" मुष्टिकां बद्ध्वा साऽऽरक्ष्यधिकारिणं प्रहर्तुमप्याक्राम्यत्। अतिकाठिन्येन सा पितामह्यादिभिर्वारिता ततः पराकृत्य च शान्तिं प्रापिता। अयमासीदिन्दिरायाः प्रथमो दीक्षासंस्कारोऽन्यायानां प्रतीकारस्य सात्त्विक-तेजिस्वितायाश्च।

इन्दिराया जीवननिर्मितौ बाल्ये सर्वाधिकः प्रभावस्तस्याः पितामहस्यावर्तिष्ट। कतिपय-वर्षाणामनन्तरं तान् प्रति स्नेहं सम्मानञ्च व्यञ्जयन्त्या तयोक्तमासीत्—

"पितामहानां शक्तिसम्पन्नत्वेन मदीयौ तेष्वतीव श्रद्धा तथा स्नेहश्चाभवताम्। यतो हि जीवनं प्रत्युल्लासस्तेषु प्रस्फुटन्नवर्तत। तदनुरूपमेवाग्रे मम पितृपादेष्वपि तद्विकसितम्। किन्तु सर्वतोऽधिकमहं स्वपितामहानां महत्त्वेन प्रभाविताऽभवम्, मम तात्पर्यं तेषां शारीरिकस्थित्या नैव, अपि तु तेषां महत्तया वर्तते। त इयन्तो विशाला आसन्, यत् समग्रं विश्वं तेषां भुजयोराबद्धमिवाभूत्। तेषां हासस्य प्रकारोऽपि मह्यमत्यरोचत।" इति।

पितामहानां पितॄणाञ्च कारावासानन्तरमानन्दभवने वातावरणं शून्यतामिश्रं शान्तमभूत्। अतः सर्वेऽपि बालिकामिन्दिरां नीत्वाऽहमदाबादनगरे श्रीगान्धिनां साबरमतीतटे स्थापितमाश्रमं गताः। काङ्ग्रेसस्य वार्षिकमधिवेशनं तत्रैवासीत्। श्रीगान्धिनो वाञ्छन्ति स्म यत्तस्मिन् तेऽपि सम्मिलिताः भवेयुस्तैः सहैव तिष्ठेयुरिति। आश्रमस्य जीवनं कठोरं संयमपूर्णञ्चाभवत्। लवणविहीनं निराडम्बरं भोजनं, स्वस्य वस्त्राणामावासस्य स्वयमेव मार्जनं, भूतले शयनं प्रातश्चतुर्वादने निद्रात्यागात्परं साबरमत्यास्तटे प्रार्थनायामुपस्थितिरित्यादि सर्वं प्रारम्भे कठिनं प्रत्यभासत परमन्ते कियत्कालानन्तरं सर्वेषामभ्यासः शनैः शनैरजायत। तत्रत्ये तपस्यामये जीवने संयमस्य यः पाठस्तैः शिक्षितः सोऽग्रे सत्या-

ग्रहदिवसेषु सर्वथोपयोगी समपद्यत । इन्दिरायै समग्रमिदमद्भुतमिव प्रतीतम्। साऽतितरां स्वीयेनोत्साहेन प्रसन्नेन चेतसा भागं गृह्णाति स्म । श्रीगान्धिनो बालकानत्यधिकं स्निह्यन्ति स्म तस्मात् साऽपि शीघ्रमेव तेषां सांनिध्यं प्राप्या-मोदत। श्रीगान्धिनां सांनिध्यसौभाग्यमिदमिन्दिरा स्वजीवनस्य षष्ठे वत्सर एव प्राप्नोत्।

सौभाग्याद् भवति जनिः कुले पवित्रे,
लभ्येते इह पितरौ च पुण्यभाजौ।
आदर्शा अथ परिवारजा भवन्ति,
सन्मार्गं तदनु विशन्ति दिव्यदेहाः ।।७।।

साबरमत्याश्रमात् प्रत्यागतो नेहरूपरिवार आनन्दभवनं शून्यशून्य-ममन्यत। श्रीमोतीलालनेहरूणां श्रीजवाहरलालस्य चानुपस्थितौ परिवारस्य सर्वा महिला राजनीतिकेष्वान्दोलनेषु सक्रिया अभूवन्—ताः काङ्ग्रेसस्य सभासु चलसमारोहेषु च सममिलन् । श्रीमती कमला कृष्णा च स्वदेशिवस्त्रनिर्मितं कञ्चुकं पादयामं शिरसि गान्धिटोपिकां च धारयितुं प्रवृत्ते। इन्दिराऽपि तादृशा-न्येव वासांसि धारयितुमनुरुणद्धि स्म, यतो हि साऽऽत्मानं काङ्ग्रेसस्य स्वयं-सेविकामेव मनुते स्म। एवं तु सा गृह एव पितामह्या मातृश्वसुश्च निकट एव तिष्ठति स्म किन्तु राजनीतिकीश्चर्चाः श्रुत्वा तस्या मनसि धारणेयं दृढतां श्रिता यद् 'भारतीयजनतायाः स्वाधीनतायै कार्यकरणं तस्या अपि कर्तव्य'मस्तीति ।

यदि नाम निगद्येत चेदिन्दिरया सर्वसाधारणं बालकानामिव बाल्यकालस्य परिज्ञानं प्राप्तमेव नैव। तस्याः क्रीडासहचारिणो बालका अपि नासन्, यद्यपि केचन तस्याः सम्बन्धिनां शिशव आसन् किन्तु परिजनानां राजनीतिककार्याणां कारणात् ते सम्बन्धिनो बिभ्यन्ति स्म तथा स्वीयान् बालकान् दूर एव रक्षन्ति स्म।

☐ शालेयशिक्षा-ग्रहण-प्रवृत्तयः

मातुः पितुः स्वात्मजनेभ्य आद्यां, शिक्षां लभन्ते गृह एव बालाः।
शालेय-शिक्षास्तदनु प्रकाममावश्यिका एव भवन्ति तेभ्यः ।।८।।

शिक्षां गेहाद् गृहीत्वा विदधति च निजं प्राकृतं ज्ञानमादौ,
तस्यैवाग्रे विकासं क्रम-नियमयुतं कुर्वते स्वेष्टपूर्तौ।
भिन्ना भिन्ना ददन्ते विविध-विषयकं ज्ञानमध्यापका ये,
शालासु स्पष्टतायै प्रभवति भुवि तद् बालकानां हिताय ।।९।।

इन्दिरा वपुषाऽतीवकृशा क्षीणा चासीत्। तस्याः स्वास्थ्याय श्रीजवाहर-लालमहाभागो नितरां चिन्तितोऽभूत् । नेहरूद्वयं लखनऊस्थे जनपद-कारागारे

स्थापितमवर्तत। तत एव १९१२ ई० वत्सरे पुत्र्यै प्रियदर्शिन्यै लिखितेषु पत्रेषु श्रीजवाहरलालस्य गहनं प्रेम, उत्कटा दिदृक्षा च व्यराजताम्। यथा—'श्वस्तस्या अवलोकनोत्तरं त्रयो मासाः पूर्णा भविष्यन्ति। साऽतीव दुर्बला कृशशरीरा चावर्तत। अहमभिलषामि यत् तस्या अध्ययनस्य काऽपि व्यवस्था भवेत्। अहं विश्वसिमि यत् कार्यमिदमवश्यमेवाहमकार्षं—परमधुना त्वहं बन्दीगृहस्य चतुर्थे प्रकोष्ठेऽस्मि।' स महाशयोऽलेखीत्—

'पितुः स्नेहाशिषः। शीघ्रं स्वस्था भव, पत्रलेखनं शिक्षस्व तथा कारायां मां मिलितुमागच्छ। अहं त्वां द्रष्टुं विकलोऽस्मि। पितामहास्त्वदर्थे यत् तर्कु-यन्त्रमानयँस्तत् त्वं चालयसि किम्? स्वकर्तितं सूत्रं मह्यं प्रेषय। मात्रा सह नित्यं प्रार्थनां करोषि न?'

एकस्मिन्नपरे पत्रे—

"प्रियायै पुत्र्या इन्दिरायै पितुः स्नेहाशिषः। किं कलिकाता तुभ्यमरोचत? किं मोहमय्याः सुन्दरं विद्यते? अपि कलकत्तास्थितः पशु-पक्षि-सङ्ग्रहालयोऽवलोकितः? तत्र त्वयैको विशालः पादपोऽपि दृष्टो भवेत्! इलाहाबादं प्रत्यावर्तनात् पूर्वं त्वया पर्याप्तं स्थूलया शक्तिसम्पन्नया च भाव्यम्।" इति।

एकाऽन्यापि चिन्ता श्रीजवाहरलालमहोदयं व्याकुलयति स्म, सा चावर्तत 'इन्दिराया नियमितशिक्षायाः'। पितामहा अपि चिन्तयाऽनया विमुक्ता नावर्तन्त। परमिन्दिरायाः शिक्षाक्रमस्य नैरन्तर्यं व्यवस्थापयितुं किमपि तावन्निश्चितं नाभवत्। यदा सा षष्ठे वर्षे प्रविष्टा तदा तस्या अध्ययनाय श्रीमोतीलालनेहरू-भिस्तथा श्रीमत्या कमलया विचार-विमर्शं विधायेलाहाबादस्य **'सेसीलियोच्च-माध्यमिक-विद्यालये'** सा प्रवेशिता। कुमारी कृष्णाऽपि स्वस्याः संरक्षणसेविकायाः परिणयानन्तरं तस्मिन्नेव विद्यालये प्रविष्टाऽभूत्। **'केमरोन'**-नाम्न्यस्तिस्रः कुमार्यो भगिन्यस्तं विद्यालयं चालयन्ति स्म। तत्र बालका बालिकाश्च सहैवा-पठन्। विद्यालयस्याध्ययनस्तरेण श्रीजवाहरलालस्य मनसि तुष्टिर्नाभूत् तथाऽपी-न्दिरायाः पितामहाः 'समवयस्कानां बालानां तत्र साहचर्यं प्राप्स्यत' इति विचारेण तां प्रावेशयन्।

तस्मिन् विद्यालयेऽध्ययनेन सह जीवनस्य शिक्षाया अभाव एवासीत् किन्त्वान्यदप्येकं काठिन्यं तत्रागतमासीत्—तेषु दिनेषु नेहरूपरिवारस्य सर्वेऽपि सदस्या हस्तनिर्मितानां खादी-वाससामेव धारणं कुर्वन्ति स्म। तान्यतीव स्थूलानि शणवस्त्र(टाट)-समानि भवन्ति स्म। अन्यतश्च विद्यालये बालकबालिकाः सुर-म्याणि चित्र-विचित्रवर्णमयानि विदेशनिर्मितान्याकर्षकाणि वस्त्राणि धृत्वाऽऽगच्छ-न्ति स्म। बालकानां मनस्सु स्वसहयोगिनां समानानि वस्त्राणि धारयितुं प्रवृत्तिर्भव-

त्येव । कोऽपि बालकः स्वसहपाठिभिर्विपरीतं वस्त्रधारणं नावाञ्छत् । कारणादस्मादिन्दिरा यदा कदा विद्यालयं गन्तुमपि निषेधति स्म । श्रीजवाहरलालमहाभागायापि स विद्यालयः शुद्धयूरोपीयपद्धत्याऽध्यापनस्य कारणादधिकं नारोचत । 'देशभक्तेः शिक्षां विना दीयमाना शिक्षा न भवति वास्तविकी शिक्षे'-त्यासीत् तस्यावश्यकं तत्त्वम् ।

इन्दिरा राजनीतिके वातावरणे पालनं पोषणं च सम्प्राप्नोति स्म । कारायां निवसन्तस्तदीयाः पितृपादास्तस्या एकाकिनीत्वस्य शिक्षाया नियमिततायाः अभावस्य तथा तत्स्वास्थ्यस्य विषये चिन्तिता आसन् । तस्मादेव ते नियमित-रूपेणेन्दिरायै पत्राणि लिखन्ति स्म किञ्च तेषु देश-विदेशानां रोचमानानां घटनानां ज्ञान-विज्ञानवार्तानां च वर्णनानि विलिख्य तत्तद्विषयकज्ञानसम्पादनाय पुस्तकानां क्रयायाप्यादिशन्ति स्म । बाल-सुलभाः कथाः शेक्सपीयर-डिकेन्स-बर्नार्डशॉ-प्रणीतानां कृतीनां बालसंस्करणानि च पठितुं प्रैरयन् । अन्यसाहित्येन सह कलासम्बन्धि-साहित्यमप्यध्येतुं सा प्रावर्तयत् ।

आनन्द-भवनस्य सुसमृद्धे पुस्तकालये विद्यमानानि पुस्तकानि मासिक-साप्ताहिक-दैनिक-पत्र-पत्रिकाश्च पठन्त्यो भवनस्य बालिकाः स्वयमात्मनः श्रमेण शिक्षणे संलग्नाः सत्यः पुस्तकानुरागेणाभिभूता इव दृश्यन्ते स्म । मिथः पुस्तकानामुपहार-समर्पणस्य परम्परापि प्राचलत् । भ्रातृश्वसृभ्यां क्रीतानि साहित्यिकानि पुस्तकान्यपि सुबहून्यवर्तन्त । इत्थं प्रियदर्शिन्याः पुस्तकदर्शनानुरागः पठनानुरागश्च सन्ततं वर्धमानस्तस्या ज्ञान-भवनस्य भूमिकां द्रढयितुं मनोराज्ये सङ्कल्पान् सङ्कलयितुञ्च भूयांसं सहयोगं व्यदधात् ।[1]

पुस्तकानि पठन्त्याः कानिचित् पुस्तकानि तेषां पात्राणि काश्चन घटनाश्च प्रियदर्शिन्या मानसेऽतितरामन्वरज्यन्त । **'जॉन आफ आर्क'**स्य कथानिकाऽप्येता-दृश्येका तस्याः प्रियासु कथानिकास्ववर्तत । एकदा तां पठन्ती सा तस्यामियती तल्लीनाऽभवद् यत् सा स्वयमेवात्मानं 'जौन आफ आर्क' इति बुध्द्वा प्राङ्गणस्य प्रावृतेर्निकटे स्वीयमेकं हस्तं दृढतया प्रस्तरभित्तावपरं हस्तं च मुष्टिबद्धमुन्नतं विधाय किमपि किमपि मन्दं मन्दमुच्चरन्ती श्रोतृगणं कस्मैचिन्महत उद्देश्याय प्रेरयन्तीवास्थात् । परिवारजनैस्तस्यामवस्थायां तां विलोक्य यदा सा पृष्टा 'किमिदं क्रियते प्रियदर्शिनि ?' तदा तयोत्तरितम्—"अहं जान आफ आर्क"—भवितुमभ्यस्यामि । अहमप्येकस्मिन् दिने तस्या इवैव स्वातन्त्र्याय योत्स्यामि स्वदेशञ्च स्वतन्त्रं करिष्यामीति ।"

---

१. इदं सकलं बाल-साहित्यं सम्प्रति दिल्ली-स्थिते 'त्रिमूर्तिभवन'स्थे नेहरू-सङ्ग्रहालयस्य 'बाल-पुस्तकालये' संस्थापितं विद्यते ।

पठितायाः कथानिकाया अभिनयं कुर्वत्या तयाऽनुभूत यत् सा स्वदेशस्य स्वाधीनतासङ्ग्रामस्याह्वाने सम्मिलिताऽस्ति, तत एवाग्रेऽपि सा पूर्णया निष्ठया तस्मिन् सङ्घर्षे भागमगृह्णात् ।

यज्ज्ञानं प्रथमं शिशोः सुविमले स्वान्ते स्थितिं विन्दते,
तद् बीजायितमुर्वरां भुवमथासाद्याङ्कुरत्यञ्जसा ।
संस्कारैः क्षुपतामितं सुविहितैः संवर्धितं कर्मभिः,
काले सत्तरुवद् विराजति च तच्छाया-फलादिप्रदम् ॥१०॥

इन्दिरा 'जान आफ आर्क'तोऽत्यधिकं प्रभाविताऽऽसीत् । तस्य कारणमभूद् यत् 'फ्रान्सदेशस्य मुक्तये साऽऽङ्ग्लानां विरुद्धं सङ्घर्षमकार्षीत् । सैका कन्याऽभूदतोऽपि तां प्रत्यन्येषां स्वातन्त्र्यसङ्घर्षशालिनामपेक्षया विशिष्य नैकट्यं प्राप्नोत् ।' स्वसंस्कारानुरूपं स्वातन्त्र्येण सम्बद्धा प्रत्येकं वार्ता प्रियदर्शिन्यै पूर्णरूपेणानुरागभागवर्तत, भवेन्नाम सा पुनः कस्यापि देशस्य । 'श्रीजवाहरलालनेहरूभिरिटलीदेशस्य 'गैरीबल्डी'-विषयिणी, दक्षिणामेरिकाया'—बोलीवार'-विषयिणी तथाऽन्येषां जनानां कथानिकाः श्राविता आसन्, तस्मादेवेन्दिरा स्वीयां जीवनदृष्टिं स्थिरयितुमचेष्टत । पुस्तकानामध्ययनेनापि सा बहूनां विचाराणां निर्धारणे क्षमाऽभूत् । तस्याः प्रिय उपन्यास आसीत्—'ला मिजरावेल्स' इति । तस्य प्रभावात् सा दैन्यं परिचेतुं समर्था सती तन्नैकट्यप्राप्तयेऽवसरमलभत ।

श्रीजवाहरलालस्य प्रथमा कारायात्रा १९२२ ई० वत्सरस्य मार्चमासे सूचितावधेः पूर्वमेव पूर्तिमिता । स पितुः सकाशात् सखेदं विदायमग्रहीत् । विमुच्य स श्रीगान्धिनां निकटेऽहमदाबादनगरमगमत् तत्र च महात्मगान्धिनामैतिहासिकमधिकरणं विलोकितम् । ततः परावृत्य भूयोऽपि तेनासहयोगान्दोलनं द्रढयितुं जनानामुद्बोधनकार्यं प्रारब्धम् । विदेशिवस्त्राणां विक्रयावरोधाय व्यापारिणः प्रबोधितास्तदाधारेणैवाभियोगपूर्वकं भूयोऽपि स एकविंशतिमासानां कारादण्डं प्राप्नोत् । लखनऊ-कारायां गत्वा तेन ज्ञातं यत् ततः स्वकीयाः पितरः पं० मोतीलालमहाभागाः परिवर्त्य नैनीतालकारायां स्थानान्तरिता विद्यन्ते । खिन्नेन मनसा स तत्र दिनान्यत्यवाहयत् । तदैव ३१ जनवरी १९२२ ई० दिने ततः स मध्येकालमेव कारातो मुक्तिमवाप्नोत् ।

श्रीजवाहरलालः सन् १९२३ ई० वर्षे देहल्यां सम्पन्ने काङ्ग्रेसस्य विशिष्टेऽधिवेशने समम्मिलत् ततश्च नाभां गन्तुमैच्छत् । तत्राकालिप्रदर्शनकारिणामारक्षिणां च मध्ये सङ्घर्षः प्रावर्तत । एकस्मै दिवसाय तत्र गन्तुमनाः स यदा स्वीयाभ्यां द्वाभ्यां काङ्ग्रेसमित्राभ्यां सह नाभाराज्यस्य सीम्नि स्थितं 'जैतो' नामकस्थानं प्राप्तस्तत्—समकालमेवैक आदेशोऽदायि यत्— 'सत्वरमेव राज्यस्य

सीमप्रदेशं परित्यज्य गच्छेयुः। उपेक्षया तैस्तद्विषये ध्यानं न दत्तं तत्कारणादेव ते निगृहीताः। विरोधाभावाच्च शृङ्खलया निगडय्यापणे भ्रान्त्वा रैलयानेन नाभाराज्यस्य राजधान्यां नीतास्तत्र चैकस्मिन् लघीयसि प्रकोष्ठे बन्दीकृताः। श्रीजवाहरलाल-गिडवानी-सन्तानम्-महाशयेभ्यः सार्धद्विवर्षाणां कारादण्ड उद्घोषितः। यद्यपि घटनयाऽनया चिन्तिताः श्रीमोतीलालमहाभागा महता प्रयासेन पुत्रं द्रष्टुं तत्र गताः परं नाभा-प्रशासकेन सद्य एव स्वयं तेषां कारादण्डो निरस्तः, किञ्च ते त्रयोऽपि नाभाराज्याद् बहिर्गन्तुमाज्ञप्ताः।

'इन्दिरा' राजनीतौ प्रविविक्षया श्रीमहात्मगान्धिनामसहयोगान्दोलनस्य प्रवृत्तिषु संसक्ता भवितुमारभत। सा मान्यान् महात्म-गान्धिनोऽपृच्छत्—'अहं देशसेवायै किं करवाणि ?' तदा तैः सा चरखा-सङ्घाय किमपि कर्तुमादिष्टा। तदनुसारं तया सूत्रकर्तनमपि प्रारब्धम्। श्रीगान्धिनस्तस्या राजनीतिं प्रति वलनं विज्ञाय विस्मिता भवन्ति स्म, परं मनसि प्रसन्नाः सन्तः शुभाशिषोऽपि प्रयच्छन्ति स्म। नेहरूपरिवारस्यानुवंशिक्यां परम्परायां तृतीया वंशधराऽपि देशसेवार्थमुद्युक्ता विद्यत इति विलोक्य श्रीगान्धिनां हृदयमतीव प्रसन्नतामनुभवति स्म।

स्वदेशसेवाव्रतमादृतानां पितामहानाञ्च तथा पितॄणाम्।
राष्ट्रानुरक्तिः शुचिकर्मनिष्ठा, सुता-हृदब्जेऽप्यचिरं व्यराजत् ॥११॥

☐ विदेशयात्रा प्रथमा प्रशस्ता

श्रुतं श्रुतिभ्यामथ लोचनाभ्यां, दृष्टं सदा बोधयते शुभाय।
तत्रापि दृष्टस्य महन्महत्त्वाद् विदेशयात्रा प्रथमा प्रशस्ता ॥१२॥

जीवनस्य प्रवहन्तीनां धाराणां भाव-प्रवणा विचार-वीचयः सामयिकानां बौद्धिक-वाद-विवादानां शान्तये किमपि निर्णायकं तत्त्वं गवेषयितुं सन्नद्धा भवन्ति। चिरस्थायिनीनां समस्यानां समाधानानि प्राप्तुं सर्वथा प्रयतन्ते तथा सामाजिकदर्शनस्याध्यात्मिकेन ध्वनिनाऽऽत्मानं शान्तयितुं समुचितं क्षेत्रमिच्छन्ति।

श्रीजवाहरलालनेहरूर्देशस्य प्रचलन्तीनां घटनानामाकलने चिन्तान्वित आसीत्। तस्य हृदये सङ्क्रमणकाले व्रजतो यूरोपस्य परिवर्तमाना मनोवृत्तयो विचार-प्रवाहा राष्ट्रभक्तिषु प्रवर्तिताः सङ्घर्षास्तथा राजनीतिक्यो नैतिकताः कथं किं स्वरूपं प्राप्ता इति विलोक्य तासां सन्तोषपूर्णमुत्तरमुपलब्धुं महत्युत्सुकता तं विदेशेषु गत्वा स्वयं द्रष्टुमपि प्रेरयति स्म। तादृशः प्रसङ्गोऽपि नचिरादेवोपस्थितः कारणता च तदीयाया धर्मपत्न्या अस्वास्थ्येन प्राप्ता। सा चैवमभूत्—

इन्दिराया जन्मकालादेव तदीया जननी श्रीमती कमलानेहरूरस्वास्थ्यव-

शाद् दुर्बलाऽभूत्। शक्तिरपि क्षीणक्षीणा भवति स्म। १९२४ ई० वर्षे सा पुत्रमेकं प्रसूतवती, परं दौर्भाग्यात् स केवलं दिनत्रयमेवाजीवत्। ततः परमपि सा रोगाक्रान्ताऽजायत। दीर्घकालं यावच्चिकित्साया अनन्तरं स्वस्थतामगच्छत्। पं० मोतीलालमहोदयाः स्वस्कीय-पुत्राय यां स्वस्थां कन्यां निर्वाच्यानीतवन्तः सा हि निरन्तरं रुग्णाऽतिष्ठत्। अन्ते निदानं कारितं तदा ज्ञातं यत् सा क्षयरोगग्रस्तावर्तत इति। कारणादस्माद् रोगस्योपचाराय चिकित्सकाः स्विट्जरलैण्डं गन्तुं सम्मतीः प्राचीकटन्।

१९२६ ई० वर्षस्य मार्चमासे श्रीमतीं कमलां स्विट्जरलैण्डस्य 'माण्टेन सेनेटोरियमा'ख्य आरोग्यधामनि चिकित्सार्थं नीत्वा श्रीजवाहरलालमहोदयाः स्वपुत्र्या प्रियदर्शिन्या सह यूरोपं प्रस्थिताः। तदानीमिन्दिरा पर्याप्तं प्रबुद्धाऽऽसीत्। तत एव तस्या अनुभवोपलब्धेः क्रमोऽपि प्रारब्धः। सलिल-प्रवहणेन गच्छन्ती सा पित्रोर्नैकटयस्य सुखमनुभवन्त्यपि मातू रुग्णतया खिन्नेवावर्तत। पितरः श्रीपण्डिताः स्वीयां तनूजां यत्ते जानन्ति स्म, बोधयितुं वाञ्छन्ति स्म। अत एव तेषां प्रयासो भवति स्म यदिन्दिरा यथासम्भवं तेषां समीप एव तिष्ठेत्। तस्यां यात्रायां स योग उपागतः। ते प्रियदर्शिन्यै महापुरुषाणां विषये रमणीयान् प्रसङ्गानश्रावयन्।

इन्दिरायाः मनोऽतितरां प्रासीदत्। साऽद्भुतानि शौर्यकार्याणि कुर्वतां देशसेवकानां सेविकानां चरित्राणि, विस्मयकारीणि विश्वप्रसिद्धानि स्थानानि प्रकृतेरनुरञ्जनपूर्णानि चित्र-विचित्राणि स्थलानि च श्रोतुं विलोकितुं चातीव समुत्सुकाऽवालोक्यत। जिनेवानगरस्य निकटवर्तिन्या **'मोनटाना'**-पर्वतिकायाः क्षयचिकित्सालये श्रीमत्याः कमलायाः समुचितामुपचारव्यवस्थां सम्पाद्य श्रीजवाहरलालमहोदयाः स्वपुत्रीमिन्दिरां जिनेवास्थिते **'ला इकोले इन्टरनेशनल'**-विद्यालये प्रावेशयन्। ततः परं च सा पार्वतिके परिसरे वेक्सरस्य **'ईकोल नूवेल'**-विद्यालयेऽध्येतुं प्रवेशिता। इन्दिराया यूरोपेणायं प्रथमः सम्पर्क आसीत्। सा फ्रेञ्चभाषाया एकमपि शब्दं न परिचिनोति स्म। आङ्लभाषाज्ञानमपि साधारणमेवाभवत्। माता रोगाक्रान्ता चिकित्सां लभते स्म। तस्यां स्थितौ सा स्वयं स्वबुद्धियोगेन फ्रेञ्चभाषाज्ञानं प्राप्तवती। आपणे वस्तूनां क्रयणावसरेऽन्येषु वैयक्तिकेषु व्यवहारेषु च प्रयुज्यमानान् शब्दान् श्रुत्वा साऽशिक्षत। एवं सति काठिन्येपि जीवनपद्धतेः प्रवर्तनं तथाविधायामवस्थायाञ्चागच्छता काठिन्येन सह सन्धिभावस्तथा स्वतन्त्ररूपेण गृहव्यवस्थादि-सम्पादनप्रक्रियायाः कौशलञ्च तयाऽधिगतम्। तस्मिन्नवसरे तदीया भ्रातृष्वसा 'कृष्णा'ऽपि तत्साहाय्यार्थं तत्रैवासीत् परमिन्दिरैव तत्र प्राधान्यमभजत्।

इन्दिरा बाल्यादेव प्रकृतिं स्निह्यति स्म, स स्नेह **'इन्टरनेशनल-विद्यालये'**

प्रोत्साहनं प्राप्तः। तत्र सा दलानां लघुपत्रिकाणां, कीटानामन्येषां सामान्य-जन्तूनां तथा प्रत्येकं वस्तूनां गभीरमध्ययनं विहितवती। तस्य प्रभावस्तस्याः सकलेऽपि जीवने चिरमतिष्ठत्। सा परिश्रमेणाध्ययनं मातुः शुश्रूषां लौकिकं व्यवहारं तथाऽऽत्मोन्नतेः साधनेन सहैव कर्म प्रत्यनुरागं न व्यस्मरत्। यतस्तस्याः पितामहैरेकवारं सा बोधिताऽभूद्, यद् —

भवन्ति भूमौ द्विविधा मनुष्याः, केचित् प्रसक्ता अपरे ह्यसक्ताः।
कुर्वन्ति कार्यं प्रथमे परे तु, श्रेयो लभन्तेऽत्र विनैव कार्यम्॥१३॥
सुते ! भवेस्त्वं निजराष्ट्रसेवा-परायणा कर्मसु सुप्रसक्ता।
फलाभिलाषेण विनैव सर्वं, कर्म प्रकुर्याश्चिरमत्र जीव्याः॥१४॥

एतानि वचनानि शिरसा स्वीकुर्वती प्रियदर्शिनीन्दिरा विदेशेऽपि स्वदेशी-यानामिवात्मसाद् विधाय सर्वैरात्मभावमसाधयत्। पादोनवर्षद्वयं यावत्तत्र विद्यालये तयाऽधीतम्। परावर्तनात् पूर्वं श्रीजवाहरलालमहोदयाः स्वकीयां प्रियां तनयामिमां पेरिस-लन्दन-हालेण्ड-जर्मन्-बेल्जियम-बर्लिनानां यात्रासु स्वेन सहानैषुः। पश्चिमदेशानां सुखसम्पदं विलोक्येन्दिराऽतीव प्रासीदत्।

विश्वस्य महापुरुषाणां साक्षात्कारेष्वपि सा पितृभिः सहैवासीत्। 'स्वत-न्त्रता-फासिज्म-समाजवाद'-प्रभृतीनां विषयाणां तथाऽन्यासां विश्वसमस्यानां चर्चाः श्रावं श्रावं तद्विषयेऽपि ज्ञानं प्राप्नोत्। तस्यामेव यात्रायां सा स्वतन्त्र-राष्ट्राणाञ्च स्थितौ व्याप्तमन्तरमपि पर्यचिनोत्। तेष्वेव दिवसेषु प्रियदर्शिन्या 'जान आफ आर्क'नाम्न्याः फ्रांसदेशदर्शनस्याप्यवसरः सम्प्राप्तः। तत्र गमनात् तस्या आनन्दः सुतरां प्रवृद्धः। सा तस्या 'जान आफ आर्क'-महिलाया देशेऽवर्तत, यस्या विषये तया पूर्वं पठितमासीत् तथा तत्समा भवितुञ्च स्वमनसि स्वप्नं सज्जयति स्म। पितृवरैः सह सा तस्य देशस्य महतो लेखकस्य **'रोमां रोला'**-महा-भागस्य गृहमपि विलोकितुमगच्छत् तथा तदीयवार्तानां श्रवणस्य सौख्यमनुभूत-वती। एतदतिरिक्तं विश्वस्य महतां पुरुषाणां—येषु **बर्नार्ड शॉ-आइंस्टाइन-अर्नेस्ट टालर-चार्लीचैप्लिन'**-महाभागा विशिष्यावर्तन्त—दर्शनान्यपि तया कृतानि।

तस्मिन् प्रवासे श्रीजवाहरलालनेहरूणामधिकः समयो जिनेवायामेव व्यतीतः, परं यदा ते बर्लिनेऽवसँस्तदा 'ब्रूसेल्स'-नगरे "साम्राज्यवाद-विरोधि सम्मेलनं" प्रवर्तितमभूत्। सन् १९२७ ई० वर्षस्य फरवरीमासे श्रीजवाहरलाल-महोदया 'भारतस्य राष्ट्रिय-काङ्ग्रेस'स्य प्रतिनिधित्वेन तस्मिन् सम्मिलिताः। तत्रैव ते साम्यवादि-समाजवादिभिरेशियाऽफ्रीकादेशयो राष्ट्रवादिभिश्च मिलित्वा तन्मा-ध्यमेनान्ताराष्ट्रियक्षेत्रे प्रवेशमकुर्वन्। सम्मेलने तस्मिन् ते कम्यूनिष्टैरत्यधिकं प्रभाविता आसन्। ततः परं तैः **'आत्मकथा'**-ग्रन्थे लिखितमभूद् **यत्** —"मम

समाजवादं (कम्यूनिज्म) प्रति विचारस्तस्मादेव श्रेष्ठमभवद् यतस्तस्मिन् कियन्तोऽपि दुर्गुणा भवेयुः परं समाजवादिनो न्यूनातिन्यूनं साम्राज्यवादिनः पाखण्डिनस्तु नाभूवन् ।"

ततः परं श्रीजवाहरलालमहाभागाः 'क्रान्तेर्दशम्यां वर्षग्रन्थौ' **'सोवियत रूस'**-देशं गताः। त्रिदिवसीयायां तस्यां यात्रायां पण्डिताः श्रीमोतीलालमहानुभावाः, कनीयसी भगिनी कृष्णा तथा श्रीमती कमलाऽप्यवर्तन्त । इन्दिराऽप्यस्यां यात्रायां तैः सह गन्तुमकामयत परं कस्माच्चित् कारणाद् गन्तुं नापारयत् तस्मात् सा मनाक् खेदमप्यन्वभूत्। पण्डिताः श्रीजवाहरलालमहाशयाः सोवियतरूसस्य व्यवस्थया प्रसन्ना आसन्। ततः प्रत्यागत्य ते स्वपुत्र्यै सर्वं वृत्तजातं कथितवन्तः। तेऽकथयन्—'रूसदेशे भेदभावानां सर्वथाऽभावो विद्यते । जाति-पङ्क्तिसम्बद्धा भेदा निराकृताः सन्ति। सर्वे मानवीयदृष्ट्या विलोक्यन्ते । सामाजिकं सौविध्यं सर्वेभ्योऽपि समानेन रूपेण सुलभं विद्यते। एकोऽन्यं **'त्वारिश्कोव'** (सहयोगी)इति कथयित्वा सम्बोधयती'ति। तत् सर्वं श्रुत्वा दशवर्षदेशीयाया इन्दिराया मानसेऽपि तादृशाः संस्कारा दृढतां प्राप्ताः। यतो हि --

निरन्तरं श्रेष्ठजनैः प्रदिष्टैः, श्रेष्ठैर्विचारैः क्रमशः प्रबुद्धाः।
साक्षाद् विलोक्याथ दृढत्वमाप्ताः, स्वच्छा विचाराः स्थिरतां लभन्ते।।१५।।

इन्दिराया विचार-सरणिर्विद्यालये स्वसमानवयोभ्यो बालकेभ्यः सर्वथा भिन्नैवावर्तत। नैरन्तर्येण राजनीतिके वातावरणे वर्धमाना सा प्रौढावस्थावतीनामिव चिन्तयति स्म। राजनीतिक-स्वतन्त्रतायै सङ्घर्षस्य तात्पर्यं सा पर्यचैषीत्। तथा यूरोपस्य राजनीत्या अपि सामान्यः परिचयस्तयाऽधिगतः। तस्याः सहपाठिनां रुचिः केवलं क्रीडन-कूर्दनयोरेवाविद्यत, राजनीत्या तेषां स्वल्पोऽपि सम्बन्धो नाभूत्। अत एव सा परस्परं तावदैक्यं नालभत। तथापि सौभाग्यात् पितॄणां पितृश्वसॄणामिवैव शीतकालिकेषु क्रीडनेषु रुचिमधारयत्। बहुशः स्खलन-पतनानामनन्तरं तया हिम-क्रीडन 'स्को-स्केट'-प्रभृतीनि धावन-कूर्दन-क्रीडनानि च शिक्षितानि तथा महत्या रुच्या सा तेषु भागमगृह्णात्।

जिनेवास्थिते भवने प्रियदर्शिनी स्वस्याः कर्मकर्त्र्या **'मारग्यूराइट'** नामिकायाः साहाय्येन गार्हस्थ्यजीवन-सञ्चालनस्य तत्त्वानि पर्यजानात्। फ्रेञ्चभाषाऽवबोधेऽपि सा साहाय्यमकार्षीत्। इण्टरनेशनलग्रीष्मकालीनविद्यालये विभिन्नानां देशानां प्रसिद्धा वक्तारो, राजनेतारः कलाकारा वैज्ञानिका लेखका विविध-क्षेत्रीया विद्वांसः स्त्रीपुरुषाश्चागच्छन्ति स्म तथा ते रोचकानां भाषणानां माध्यमेन भाषाज्ञानं कारयन्ति स्म। तेषां सर्वेषां साहजिकः प्रभाव इन्दिराया दृष्टिकोणं विशालं साधयितुं किञ्च राष्ट्रियजीवनस्य भूमिकायाः स्थिरत्वं विधातुं पूर्णतयो-

पयोगी समपद्यत। इन्दिरायां ज्ञानार्जनस्य प्रवृत्तिरतीव श्लाघनीयाऽऽसीत् तथा विदुषां नेतृणाञ्च संल्लापान् सा पूर्णया गम्भीरतयाऽशृणोत्। यतः —

श्रवणेन समर्जितमिष्टतमं, सुजनैर्गदितं प्रथितं स्वगुणैः।
निधिवत् स्थिरतामुपलभ्य पुनः, समये समये सुखयत्यतुलम्॥३६॥

इत्थं विविधदेशानां प्रवासान् विधाय भारतं प्रत्यावर्तयितुं जलयान-प्राप्तिकामनया सर्वेऽपि **'मार्सेलीज'**मुपागताः, केवलं पण्डितश्रीमोतीलालमहाभागा यूरोपस्यान्येषां कतिपयानां देशानां दिदृक्षया स्वल्पाय कालाय तत्रैवावरुद्धाः। सन् १९२७ ई० वर्षस्य दिसम्बरमासे ततः प्रस्थाय ते 'कोलम्बो' (श्रीलङ्का) नगरं प्राप्तास्ततश्चावतीर्य सत्वरं मद्रासनगराय प्रस्थिताः। आसीत् तत्र काङ्ग्रेसस्य वार्षिकाधिवेशनावसरः। भारते सर्वत्र परमोत्साहस्तथा स्वाधीनतायै सर्वस्वसमर्पणभावना देशवासिषु व्याप्ताऽभूत्।

यूरोपे समाजवादि-विचारकाणां सम्पर्केण श्रीजवाहराणां हृदयं विपुलां प्रेरणामलभत। आदर्शवादेनानुप्राणितास्ते स्वाधीनतान्दोलने प्राणपणेन संयुक्ताः। मद्रपुर्या अधिवेशने तेषां विचारधाराऽतीव समर्थनं प्राप्तवती। युवभिः पूर्णस्वाधीनतायास्तथा साम्राज्यवादविरुद्धाः प्रस्तावाः सोत्साहं स्वीकृताः। परं श्रीगान्धिनस्तैः सन्तुष्टा नाभूवन्। तैः श्रीजवाहरलालानुद्दिश्य लिखितमासीत् —

"त्वं भूयसा वेगेन पलायसे। चिन्तनाय विचारणाय तथा तदीयस्थितेः परिज्ञानायापि स्वल्पः समयो देय आसीत्।" इति।

परं तेन श्रीजवाहरलालनेहरूमहाभागा मनागपि विचलिता नाभूवन्। ते राष्ट्रवादिनस्तरुणान् समघटयन्। तदा तेषां राष्ट्रियः स्वरो भूयोऽपि प्रखरतामासादितः। स्वीयेषु भाषणेषु ते नवयुवकान् सम्बोधयन्तः 'पूर्णस्वराज्य-स्वतन्त्रता-समाजवादोद्योगीकरण-सिद्धिपूर्वकं साम्राज्यवाद-द्रव्यवाद-समापन'-सदृशान् विचारान् भूयो भूय आवर्तयन्। पितृपादानां तानि वचनानि प्रियदर्शिन्या अन्तरङ्गे निर्विलोपनीयान्यङ्कनानि प्रास्तुवन्, यानि तस्या अन्तिमसमयावधि वर्तिताभ्यो नीतिभ्यः स्पष्टं प्रत्यायन्त। तस्यां साम्राज्यवाद-साम्प्रदायिकता-द्रव्यवाद-सामाजिक-विषमतादीनतादीनां विरुद्धं सातत्येन समादृतः सङ्घर्षस्तेषामेव प्रभावादवर्तत।

मद्रपुर्याः कार्यक्रमानन्तरं दक्षिण-भारतस्य यात्रा अपि तैः सपरिवारं विहिता। यात्रायां यद्यन्नवीनं जिज्ञासितव्यमाश्चर्योद्भावकमिन्दिराया मनसि प्रश्नरूपेणोपातिष्ठत् सा पितृचरणान् साग्रहं पृष्ट्वा तस्य समाधानं लभते स्म। एकदा सा 'संसारस्य तथा मानवानामारम्भस्य' प्रश्नं तेषां पुरः स्थापितवती।

तस्मिन्नेवावसरे श्रीजवाहरलाल-महानुभावैर्धारावाहिकरूपेण पत्राणां लेखनायापि निर्णीतं यस्य परिणतिरग्रे समपद्यत। एकवारं श्रीगान्धिनामाकारणया प्रियदर्शिनीन्दिरा तेषां साबरमतीस्थ आश्रमेऽप्यगच्छत्, कियन्तिचिद् दिनानि सा तत्रैवावसच्च। तत्रत्या दिनचर्या तस्या मनोऽमोहयत्, परं दीर्घकालं यावदाश्रमे स्थितिर्नासीत् सम्भवाऽतः सा प्रत्यागता। आश्रमस्य प्रभावात् काङ्ग्रेस-कार्यकर्तृणाञ्चोत्साहावलोकनाच्च साऽपि स्वयंसेवकेषु सम्मिल्य तेषामिवैव स्वतन्त्रताऽऽन्दोलने भागं ग्रहीतुमुत्सुकाऽऽसीत्।

सन् १९२८ ई० वर्षे लन्दनस्य ब्रिटिशशासनेन **'साइमन आयोगः'** प्रेषितः। भारतीये संविधाने परिवर्तनाधिकारं प्राप्यागतवतस्तस्यायोगस्य बहिष्कारोऽक्रियत। अयं साइमन-आयोग ३० अक्टूबर-दिने यदा लाहौरं प्राप्तस्तदा धूम्रयान-विश्रामस्थलस्य समक्षं प्रदर्शनकर्तरि जनसमूहे यष्टिका-प्रहाराः कृताः। प्रान्तस्य लोकप्रियनेतृणां श्रीलाजपतरायाणां वक्षसि द्वौ यष्टि-प्रहारावभूतां, १७ नवम्बर-दिने ते दिवङ्गताः। लखनऊनगरे साइमनायोगस्यागमनावसरेऽपि महत् प्रदर्शनमभवत्। तस्मिन् विहिते यष्टि-प्रहारे श्रीजवाहरलालानां पृष्ठेऽपि जीवने प्रथमवारं यष्टिप्रहारा अभवन्। एवमेव द्वितीयवारं धूम्रयानविश्रामस्थल एवाश्वारोहिभिरारक्षिभिर्दण्डप्रहारा अक्रियन्त यैः श्रीजवाहरलाला अपि प्रहृताः। श्रीमोतीलालाः स्वयं लखनऊनगरं प्राप्य तत्सर्वं विलोक्य चाखिद्यन्त। श्रीगान्धिमहात्मभिरपि सान्त्वना-श्लाघोत्साहवर्धिन्य आशिषः पत्रेण प्रेषिताः।

ततः परं 'नेहरू-समिति'-नाम्ना 'संविधान-निर्मापक-समितेः' संयोजनेऽखिल-भारतीय-काङ्ग्रेस-समितेः प्रधानमन्त्रित्वेन कार्यं कुर्वतां श्रीजवाहरलाल-महानुभावानां तत्परता प्रावीण्यं विवाद-समाधानानि चातीव महत्त्वपूर्णानि सम्पन्नानि येषु हिन्दू-यवनयोः पार्थक्यनीतेरपि समाधानमासीत्। तैः प्रस्तुतं प्रतिवेदनमपि सर्वैरन्यनेतृभिः प्रशंसितम्।

१९२८ ई० वत्सरे कलकत्ता-महानगर्यां सम्पद्यमानस्याऽखिलभारतीय-काङ्ग्रेसाधिवेशनस्याध्यक्षतायै महता काठिन्येन श्रीमोतीलालनेहरूणां स्वीकृतिः प्राप्ता। सम्मेलनेऽतिमहत्त्वपूर्णाः प्रस्तावाः स्वीकर्तव्या आसन्। उग्रवादिनां यूनां तथोदारवादिनां विचारेषु साम्य-व्यवस्थापनाय श्रीगान्धिनो भूयोभूयः सम्प्रार्थ्य सम्मेलन उपस्थातुं कथञ्चिदनुकूलाः कृताः। तस्मिन् सम्मेलने भारतस्य सर्वेऽपि राष्ट्रिया नेतारः समवेताः। कुमारीन्दिराऽपि स्वपरिवारेण सह कलकत्तामगमत्। अध्यक्षस्य शोभायात्राममलोकितवत्या तया सानन्दं दृष्टं यत् तस्याः पूज्याः पितामहाश्चतुस्त्रिंशत्संख्यकाश्वानां रथे स्थिता आसन्। निखिलो जनगण आनन्दातिरेकेण जयजयारावं कुर्वन्नासीत्। तत्र सम्मेलने श्रीमोतीलालनेहरूभिरतीव सारपूर्णा विचाराः प्रस्तुताः।

यद्यपि तत्र मृदूग्रदलयोर्विचाराणां वैमत्यमभूदेव किन्च तत्र श्रीजवाहरलाल-सुभाषचन्द्रवसु-महानुभावानां नेतृत्वे कानिचित् तत्त्वानि वाञ्छन्ति स्म यत् 'काङ्ग्रेससमितिः स्वतन्त्रतायाश्चरमं लक्ष्यं स्वीकुर्यात्' किन्तु श्रीगान्धिनां माध्यस्थ्येन सन्धि-साफल्यमभूत्। काङ्ग्रेससमित्य ब्रिटिशशासकेभ्यो भ्राम्यत्-पत्र-प्रेषणाय प्रस्तावः स्वोकृतस्तस्मिन् निर्णीतं यत् 'सर्वदलीय-प्रतिवेदनद्वारा दर्शितं संविधानं यद्येकस्मिन् वर्षाभ्यन्तरे न स्वीकृतं तदा काङ्ग्रेससमित् स्वतन्त्रताया अध्येषणायां प्रसिता भविष्यतीति।' इदमीदृशमन्तिमेत्थंरूपं निवेदनमासीद् येन श्रीमोतीलाल-जवाहरलालयोर्मध्ये वर्तमानं वैमत्यमपि विनष्टम्। परमाङ्ग्ल-शासकास्तं प्रस्तावं निरर्थकं मत्वा दमयितुं प्रवृत्तास्तत एव—

कर्मावरोधाः श्रमिकेष्वशान्तयो, वर्गप्रभावाः सुतरां प्रवर्तिताः।
विदेशजाः शासन-कर्म-साधका, अत्याचरंस्तत्प्रतिरोधकाम्यया ॥१७॥
मुख्यास्ततो नेतृवरा निरुद्धाः, कारासु चाराद् विनिपात्य तुष्टाः।
दुर्दान्तिभावैर्जनतां विमृद्य, स्वं शासनं बृंहितुमायतन्त ॥१८॥

सन् १९३० ई० वर्षीय—काङ्ग्रेसाधिवेशनस्य समयो यथायथा निकट-मायाति स्म तथैवाध्यक्षस्य निर्णयाय समित् त्वरति स्म। १९२९ ई० वर्षस्य ग्रीष्म-शरद्-ऋत्वोः काङ्ग्रेससमितेरुपवेशने सम्पन्ने। सर्वे महात्म-श्रीगान्धिनोऽ-ध्यक्षत्वमवाञ्छन्, परं ते कथमपि सम्मता नाभूवन्। स्वयं ते श्रीजवाहरलाल-नेहरूणां नाम प्रास्तावयन्, प्रबलानुरोधेन च तदीयान् गुणान् कर्मठतां पटुतामा-वश्यकतां च प्रत्यपादयन्। सर्वसम्मत्या श्रीजवाहरलालमहानुभावा अध्यक्षाः स्वीकृताः। श्रीमोतीलालमहाभागा अपि सम्मतिमदुर्यत् तरुणानां प्रतीकत्वेन पदमिदं स्वीकरणीयमिति। प्रपञ्चेभ्यो दूरे स्थातुमभिलषद्भिस्तरुणनेहरूभिरपि तद्-विरोधायचेष्टितं परं ते श्रीगान्धिनां पितृपादानां तथाऽन्येषां सदस्यानामनुरोध-माज्ञां चान्ततः स्व्यकार्षुः।

□ पूर्ण-स्वातन्त्र्य-घोषणा

दासता-पाश-बद्धस्य, स्वदेशस्य विमुक्तये।
अभूद् रावी-नदी-तीरे, "पूर्ण-स्वातन्त्र्य-घोषणा" ॥१९॥

काङ्ग्रेसाधिवेशनस्याध्यक्षतायै सन् १९२९ ई० वत्सरीय-दिसम्बरमासस्य २५ तमे दिनाङ्के श्रीजवाहरलालनेहरू-महाभागा लाहौरनगरं प्राप्ताः। तत्र तेषां स्वागतमीदृशं भव्यमभूद् यद् भूपतिभ्योऽपीर्ष्योत्पादकमासीत्। पञ्चाम्बुप्रान्तस्य सा राजधानी विविधवर्णवतीभ्यः पताकिकाभ्यो विद्युद्दीपिकाभ्यश्चातीवोल्ला-समयी व्यराजत। चलसमारोहस्य शोभाऽपूर्वैवावर्तिष्ट। श्रीजवाहरलालाः प्रथमे सभापतय आसन् ये सितेऽश्वे समारुह्याग्रतःप्राचलन्, तेषां पृष्ठतोऽन्येषामश्वारोहिणां

दलमासीत्। लाहौरस्य सङ्कुचिताभ्यो वीथिभ्यो निःसृत्य शोभायात्रा यदा प्रशस्ते पथि समायाता तदा जनसमूहोऽतितरां विशालः सन्नवालोक्यत। गवाक्षेषु चन्द्रशालासु वृक्षेषु च दर्शकानामपारो जनपारावारो व्याप्नोत्। श्रीमोतीलालमहोदयास्तेषां धर्मपत्नी श्रीमती स्वरूपरानी च 'अनारकली'-स्थितायाः 'भल्ला-शू-कम्पन्या' ऊर्ध्वभागात् तद्दृश्यमलोकितवन्तस्तथाऽन्यदर्शकाणामिवैव, तावपि स्वपुत्रस्य स्वागते पुष्पवृष्टिमकुर्वन्त।

भारतीय-राष्ट्रिय-काङ्ग्रेसे कदापि कोऽपि पुत्रः स्वपितुरनन्तरं काङ्ग्रेसस्याध्यक्षतां न प्राप्त आसीत्। यदा श्रीमोतीलाल-महाभागैः स्वपुत्राय श्रीजवाहरलालाय कार्यभारो दत्तस्तदा तैः पारसीक-भाषायाः पद्यमेकमिदं पठितमासीत्—

'हिमचे के पिदर नतवानद, पिसर तमाम कुनद"
(पिताऽशक्नोन्न यं प्राप्तुं, प्राप्नोत् तत्तनयः स्वयम्।)

पितृणां कामनेयं सत्याऽभूत् —

इच्छेत् पराभवं पुत्रादिति यद् कथ्यते जनैः।
तस्मिँस्तदीयोत्कर्षस्य, भावनाऽऽस्ते बलीयसी॥२०॥

लाहौर-काङ्ग्रेसेनोद्घोषितं यद् 'नेहरू-प्रतिवेदन' उपनिवेश-पदाद् या सहमतिः प्रकटिताऽभूत् तस्या अवधिः समाप्तिगमत्। इतः परं स्वराज्यस्य तात्पर्यं भविष्यति 'पूर्णस्वाधीनता'। केन्द्रीय-प्रान्तीय-विधानसभानां काङ्ग्रेससदस्यास्त्यागपत्रप्रस्तुतय आदिष्टाः। ३१ दिसम्बरस्य मध्यायां रात्रौ रावी-महानद्यास्तटे स्वातन्त्र्यस्य ध्वजमुत्तोलितम्। काङ्ग्रेसस्य शिविरेष्वपूर्वं उत्साहोऽदृश्यत। श्रीजवाहरलालमहाभागाश्च ध्वजं परितो नर्तितुं प्रवृत्ताः।

१९३० ईशवीयहायनस्य नवीनं दिनं न केवलं नेहरू-परिवाराय; अपि तु श्रीजवाहरलालमहानुभावानां मुखारविन्दात् स्वाधीनताया घोषणां श्रोतुं समुपस्थिताय विशालाय जनसमूहायापि स्मरणीयमासीत्। काङ्ग्रेसस्वयंसेवकदलस्य गणवेशे सुसज्जिताया इन्दिराया हृद्युत्साहः सीम्नि स्थातुं नापरयत्। पूर्वं तस्याः पितृचरणा यदा तद् घोषणापत्रं लिखितमासीत् तदा सा तेषां समीप एवासीत् सर्वप्रथमं पठित्वा तानश्रावयच्च। तदैव प्रथमवाचनेन सहैव पितृभिः कथितमभूद् यत्—'प्रियपुत्रि! त्वयेदं घोषणा-पत्रं सर्वप्रथमं पठितम्, अतोऽत्र सूचिताः प्रतिज्ञास्त्वया प्रतिज्ञातव्याः सन्ति तदुत्तरे च सहर्षं तया प्रतिज्ञातमप्यासीत्।'

तदानीं तत्र रावीनद्यास्तटे पूज्यानां पितृपादानां, सभायामुपस्थितान् लक्षशो जनाननुप्राणयतो देशभक्तिपर्णान् गभीरांस्तान् शब्दान् कुमारीन्दिराऽपि सोत्साहं

तल्लीनतापूर्वकमश्टृणोत् —

"वयं भारतीयाः प्रजाजना अपि, अन्येषां राष्ट्राणामिवेमं स्वीयं जन्मसिद्धमधिकारं मन्यामहे यद् वयं स्वतन्त्रा भूत्वा वसेम, स्वकीयस्य परिश्रमस्य फलानि स्वयं भुञ्जेम तथाऽस्मभ्यं स्वेषां निर्वाहायापेक्षितानि सौविध्यानि लभ्येरन्।……वयमिदमपि मन्यामहे यत् किञ्चन शासनं जनताया एतानधिकारान् प्रत्यादत्ते किञ्च तां पीडयति, तर्हि जनता तच्छासनं परिवर्तयितुं पराकर्तुमपि चाधिकरोति। भारतस्याङ्ग्लशासनेन भारतीयानां केवलं स्वतन्त्रतैव न प्रत्याहृताऽपि तु तस्य मूलशिलैव दीनानां शोषणे निहिताऽस्ति तथा तेनार्थिक-राजनीतिक-सांस्कृतिकाध्यात्मिक-दृष्टिभिरपि भारतं विकलं कृतमस्ति। अतो वयं विश्वसिमो यद् भारतेनाङ्ग्लैः सह सम्बन्ध-विच्छेदपूर्वकं पूर्णस्वराज्यमथवा स्थायिस्वातन्त्र्यमासादितव्यमिति।…

येन शासनेनास्माकं देश इत्थं व्याकुलीकृतस्तथा विनाशितस्तस्याधिकारे निवासोऽस्माकं सम्मतौ मनुष्यमीश्वरञ्चोभौ प्रत्यपराधो विद्यते। किञ्च वयमेतदपि स्वीकुर्मो यदस्मभ्यं स्वस्य स्वातन्त्र्यस्योपलब्धेः समुचितः पन्था हिंसा नास्ति। अतो वयं ब्रिटिशशासनेन, यावच्छक्यं, स्वेच्छया कीदृशमपि सहयोगं न कर्तुं प्रयतिष्यामहे तथात्मानं सविनयावज्ञायै किञ्च शुल्कावरोधायापि सज्जयिष्यामः। एतदर्थं वयं शपथपूर्वकं सङ्कल्पयामो यत् पूर्णस्वराज्यस्य स्थापनायै काङ्ग्रेसदलं समये समये या आज्ञा दास्यति ताः पूर्णस्वरूपेण पालयिष्याम" इति।

काङ्ग्रेसेनेयं घोषणा राष्ट्रिय-ध्येयरूपेण स्वीकृता। २६ जनवरी-दिने 'स्वाधीनता-दिवसोत्सवं' मानयितुं जनानामाह्वानं कृतम्। तस्मिन् दिने ग्रामेषु नगरेषु च लक्ष-लक्षजनैः प्रतिज्ञातं यद् -'ब्रिटिशशासने निवासो मनुष्यं तथा भगवन्तं प्रत्येकोऽपराधोऽस्ति' इति। स्वतन्त्रता-प्राप्तेरीदृशं महोत्साहं भारतीयेषु विलोक्य श्रीगान्धिनः सम्प्रेरणां लब्धवन्तः। तैः फरवरीमासे लवण-सत्याग्रहाय जनाः प्रेरिताः स्वयञ्च सुप्रसिद्धां दाण्डी-यात्रां विधायाप्रैलमासस्य पञ्चमे दिने लवण-निर्माणारम्भो विहितः। प्रारम्भे तु सविनयावज्ञायाः स कार्यक्रम उपहासास्पद एव प्रतीतः परं तद्रहस्यं विज्ञाय स्वातन्त्र्य-प्रतीकताञ्चाऽनुभूय श्रीमोतीलाल-जवाहरलालादयोऽपि सम्मिलिताः।

आङ्ग्लशासका अपि प्रारम्भे बाललीलावदेवेमं सत्याग्रहं मत्वोपेक्षितवन्तः परं भविष्यतः सङ्कटस्याशङ्कनं विमृश्य निर्ममं दमनं, चल-समारोहाणामवरोधायाध्यादेशप्रसारणं, जनसमूहे यष्टिका-प्रहरणादेशं गुटिकास्त्रसञ्चालनादेशञ्च प्रासारयन्। नृशंसं तदाक्रमणं भारतीयां जनतां —स्त्री-पुरुष-बालकादीन्—क्रोधोन्मत्तामकरोत् तेनैव च भारतीया जनता शासनं विरोद्धुं दृढं निरचैषीत्।

यत्र स्वातन्त्र्यलब्ध्यै समुचित-विधिना शस्त्रहीना नितान्तं,
सत्याः सत्याग्रहेण ह्यभिमत-कथनं कुर्वते स्म प्रशान्ताः।
तेऽपि क्रूरैर्यथेच्छं प्रहरण-दमनैर्मारणैः पीडिता यै—
स्तेषामुन्मादलीला प्रसभमधिकृता हन्त ! वर्ण्येत केन ? ॥२१॥

श्रीगान्धि-श्रीमोतीलाल-श्रीजवाहर-सहिता अनेके ज्येष्ठाः श्रेष्ठाश्च नेतारो निगृह्य कारासु बन्दीकृताः। तस्मिन्नवसरे मान्याः श्रीगान्धिन एकां विज्ञप्तिं प्रासारयन्, यस्यां भारतस्य महिलानां समाह्वानमभूत्। तैः कथितमासीद् यद्— "भारतीया महिला अपि पुरुषैः सहात्मनो वास्तविकं समुचितञ्च स्थानं गृह्णीयुः। स्वतन्त्रतायाः सङ्ग्रामः केवलमेकलैः पुरुषैरेव जेतुं शक्यो न विद्यते। महिला या मनुष्यजातेरर्धभागरूपाः सन्ति, स्वीये सदने समारोपितादेकान्तवासाद् बहिरागच्छेयुः, पुरुषैः सह स्कन्धैः स्कन्धान् मेलयित्वा स्थिता भवेयुः, किञ्च स्वातन्त्र्यस्य सङ्ग्रामे स्वीयां साम्यपूर्णां भूमिकां निर्वहेयुः।"

तस्या विज्ञप्तेरपूर्वोऽनुकूलः प्रभावोऽभूत्। ताः सोत्साहं पुरुषाणां साहाय्यमाचरितुं सचेष्टा अभूवन्। चलसमारोहेषु भागानगृह्णन्। यष्टि-घुष्टि-मुष्टि-गुटिकादि-प्रहारानप्यसहन्त। वीराङ्गनानामभिनवं स्वरूपं व्यञ्जयन्त्यस्ता निर्भीकतया राष्ट्रस्य स्वाधीनतायै पुर उपागच्छन्। श्रीमत्यः कमला-विजयलक्ष्मी-कृष्णा अपि नेहरूयुगलस्य कारावासावधौ सभाः सम्बोधयन्त्यः काङ्ग्रेसस्यादेशान् पालयन्त्यः सविनयावज्ञान्दोलनं वर्धयन्त्यस्तथा सुतरां सन्नद्धा अभूवन्। स्वयं स्वरूपरानी महाभागाऽपि जरावस्था-दौर्बल्या स्वास्थ्यदशायामपि जनावचयन-निरोध-सङ्घटनादिकर्माण्याचरत्। चलयात्राणां नेत्रीत्वमकरोत् तथा दण्डप्रहारानपि साऽसहत। इत्थमेव श्रीमती कमला, या—'इलाहाबाद-जनपद-काङ्ग्रेसस्याध्यक्षाऽप्यवर्तत'—स्वकीयामस्वस्थतां विस्मृत्य सविनयावज्ञान्दोलनस्य प्रवृद्ध्यै निरन्तरतायै चाहोरात्रं ग्रामाद् ग्रामं परिभ्रमणं विधाय जनान् सङ्घटयितुं सपरिश्रमं सोत्साहं च कार्याण्यकरोत्।

पूर्वं वीराङ्गना याः प्रथितिमुपगता भारतीयेतिहासे,
याश्चाध्यात्मस्य भक्तेरपि पथि विहृताः साधयन्त्यः सुसाध्व्यः।
तासामेव स्वरूपे निजकृतिकुशला राष्ट्रसेवासु मग्नाः,
स्वातन्त्र्यार्थं सुशान्ताः परमदृढतयाऽकार्षुरान्दोलनानि ॥२२॥

कृष्णा नेहरूस्तदानीं 'तरुण-भारत-सभा'याः सचिवपदे नियुक्ताऽऽसीत्। आन्दोलनस्यैकस्मिन् समारोहे शासन-विरुद्धं भाषमाणां तां निगृह्य कारावासेऽपातयन्। सैवासीत् प्रथमा महिला नेहरूपरिवारस्य या राष्ट्रियान्दोलनप्रसङ्गेन कारां न्यषेवत। इन्दिरामहाभागायै तदानीं कारातो बहिःस्थितिर्नारोचत। सा

स्वयंसेवकदले कार्यं कर्तुं न्यवेदयत् परं तदानीं तस्या वयसो न्यूनतया प्रवेशो नाभूत्। आसीत् सा द्वादशवर्षदेशीया। तस्मात् खिन्नाऽपि सा काङ्ग्रेसस्य कार्यप्रणालीषु भाग-ग्रहणार्थं कृतनिश्चया स्वकीयया पद्धत्या स्वानुरूपं कार्यं कर्तुं प्रायतत।

इन्दिरा परितः प्रतिवेशिनः सर्वान् दीनानां धनिकानां बालकान् बालिकाश्चाकार्यावादीद् यत् परिसरस्य सर्वानपि बालकानेकीकृत्य पृष्ठभागस्थे प्राङ्गणे सभाया आयोजनं कुरुत। तस्मिन्नहमेकामतीव श्रेष्ठां योजनां दर्शयिष्यामि। द्वितीये दिने स्वराज्यभवनस्य पृष्ठवर्तिनि भागे शतशो बालका एकीभूताः। इन्दिरा कुशलनेत्रीव तत्र भाषणमदात्। तया प्रस्तावितं यत् काङ्ग्रेसदलं देशस्य स्वातन्त्र्याय युद्ध्यति तस्मिन् कार्यं कर्तुं बालानामेकं सेवादलं स्थाप्येत। काङ्ग्रेसस्य कार्येषु सहयोगाय यावन्तोऽपि रहस्यपूर्णाः प्रकारास्तया चिन्तिता आसँस्तान् बालश्रोतॄनकथयत्। तयोक्तम् —

"यत् किञ्चिदप्यहं कथयामि तस्मिन् भीतिस्तु विद्यत एव। यद्यारक्षिणोऽस्मान् निग्रहीष्यन्ति तदा ज्येष्ठानामिव कारावासं न दास्यन्ति परं सम्भाव्यते वेत्रेण ताडयित्वा मुञ्चेयुः।"

किञ्चान्ते सा सर्वानपृच्छत्—किं यूयं सर्वेऽप्यस्यै सेवायै सज्जाः स्थ ? तत्रोपस्थितानां सकलानां बालक-बालिकानां स्वातन्त्र्ययुद्धे प्रवेशार्थमिदमाह्वानमभूत्। परितो यत् किमपि भवति स्म तद्विषये बालाः स्वल्पपरिचिता आसन्नेव तथा तेषां मातरः पितरश्चापि स्वयमाभिमुख्यं कुर्वाणा एवावर्तन्त। अतः सर्वेऽपि स्वीकृतिमदुः। तेभ्यो भयस्यापि स्वस्मिन्नेकं महदाकर्षणमभूत् तथा गृहाणां प्रौढ-वृद्धानामिव ते स्वयमपि सङ्कटं स्वीकर्तुं व्याकुला आसन्।

इन्दिरा तस्य सङ्घटनस्याभिधानं रामायणस्य कथाया आधारेण **'वानर-सेना'** इत्यकार्षीत्। सीताया मुक्तये वानरसेनायाः साहाय्यं प्राप्यैव श्रीरामेण विजयः प्राप्तस्तथैव भारतमातुर्मुक्तये बालसेवकानां सैन्यमिदं सहयोगि भविष्यति विजयं च लम्भयिष्यतीति बलवती भावनैव 'वानर-सेना'-नाम-निर्धारणायेन्दिरामुदसाहयत्। स्वाधीनतासङ्ग्रामे रामायणकथाया इन्दिरया यो व्यावहारिक उपयोगः कृतो यश्च सेतुर्निर्मितः स तेषु बालकेष्वेकतायाः सेतुरासीत्। सहस्रशो बालाः वानर-सेनायां प्रविष्टाः। सा तान् शारीरिकं व्यायाममकारयत् सर्वान् पृथक् पृथक् कार्यं च व्यतारयत्। बालकाः पताका-निर्माणैः, कर्गदप्रावरणेषु प्राप्ति-सङ्केतलेखनैश्चलसमारोहेषु स्वयंसेवकेभ्यो जल-वितरणैरन्यैश्चावश्यकैः कार्यजातैः काङ्ग्रेस-साहाय्यं व्यदधुः। केचन निर्भीकाः साहसिनो बालका रात्रौ सभानां चलयात्राणां सूचकानि भित्ति-पत्राणि समश्लेषयन्। केचनैकस्य दलस्य सन्देशमपरस्मै दलायातिगुप्तरीत्या सावधानतया च प्रापयन्। तेषामिमानि कार्याणि भूमिगतपद्धत्या वीरतापूर्णान्युदाहरणान्यवर्तन्त। आरक्षिणो यदा निग्रहणाय गृहानावेष्टयन्ति स्म

तदा बालकाः कियदेतिकया सानन्दं भ्रमन्तः सन्देशान् महत्त्वपूर्णाः सूचनाश्चेतस्ततो नयन्ति स्म।

बालक-बालिकानां सङ्घटन-पूर्वकं बहुविध-प्रयासैः काङ्ग्रेसकार्यकर्तॄणां सौकर्य-सम्पादनं गुप्तचर-रूपेण सन्देशप्रापणं भाविनामातङ्कानां सूचनमारक्षिणां योजनानां प्रत्याहरणमित्यादीनि महत्त्वपूर्णानि कर्माणीयत्या सरलया प्रणाल्या सम्पादने वानरसेनायास्तेषु सङ्क्रान्तदिनेषु यो महान् योग आसीत् तस्य सर्वं श्रेय इन्दिराया एव गच्छति। इदमेव सङ्घटनकौशलं व्यवस्थापननैपुण्यं सेवा-सातत्यं नैष्ठिकं दाक्ष्यञ्च भविष्यति तस्यै प्रधाननेत्रीत्वाय विकसितमभूत्।

श्रीरामेण निशाचरोर्जितचमूनाशाय यत्नाद् यथा,
युक्त्या वानरसैनिकैः सह कृतं सख्यं च लब्धो जयः।
एकीकृत्य तथैव बालनिचयं वैदेशिकानिन्दिरा,
जेतुं वानरसेनयैच्छदिति तद्बुद्धेरभूत् कौशलम्॥२३॥

स्वाधीनता-सङ्घर्षः प्रतिदिनमुग्रादुग्रतरो भवितुं प्रवृत्तः कारावासेषु गच्छतां देशभक्तानां सङ्ख्याऽपि क्रमशो वृद्धिं गच्छति स्म। श्रीमोतीलाल-जवाहरलाला-वपि **'नैनी'**स्थे कारागृहे दृष्टि-निग्रहेऽवर्तताम्। काङ्ग्रेसस्य कार्यकारिण्यवैधानिकी घोषिता। ये नेतारो निगृह्यन्ते स्म ते स्वस्वपदेषु समितेः सदस्यान् नियुञ्जन्ति स्म तथाऽऽरक्षिवर्गस्तानपि यन्त्रयति स्म। इत्थं श्रीमती कमलानेहरूस्तथाऽन्या बह्व्यो महिलाः कार्यकारिण्याः सदस्या अभूवन्। यस्य नवीनस्य भारतस्याविर्भावः सम्पद्यते स्म तस्मिन् महिलाः स्वकीयानामुपयुक्तानि स्थानानि प्राप्नुवन्ति स्म तदर्थं पुरुषाश्च तासां स्वागतं प्रशंसनञ्चाकुर्वन्। स्वयं श्रीजवाहरलालमहानुभावा अपि स्वस्याम् 'आत्मकथा'यां महिलानां तत्कार्यं प्रति कार्तज्ञ्यं प्रादर्शयन् —

"वयं स्वस्यां जनतायां तथा विशिष्यास्माकं महिलावर्गे गर्वं कुर्वाणा आस्म। अहं मम मातुः, पत्न्याः, भगिनीनां तथाऽनेकासां भ्रातृव्य-भगिनीनां किञ्च महिला-मित्राणां कार्यैरतीव सन्तुष्टः प्रसन्नश्चाभूवम्।···एकस्मिन् महति कार्ये सहभागि-त्वस्याभिनवया भावनया संयुक्ता वयं मिथोऽतीव नैकट्यं प्राप्ताः। एवमनुभूयते स्म यत् परिवार एकस्मिञ्ज्यायसि समूहे व्यलीयत तथा ततोऽपि स्वीयं पुरातनं सौहार्दं घनिष्ठताञ्च सुस्थिरयन्नवसदिति।"

इत्थं नेहरूपरिवारस्य सर्वेऽपि लघिष्ठा ज्येष्ठाश्च सदस्याः सविनयावज्ञा-न्दोलने स्वीयानि योगदानान्यकार्षुः। तेषां तादृशस्य कार्यस्य समाचारान् श्रीमोती-लालनेहरूमहाशया अपि कारागारेऽश्रौषुः। तैः १६ जुलाई १९३० ई० दिने परि-वारायैकं भ्राम्यत्-(गश्ती) पत्रं लिखितम्। (बन्दिभ्य एकस्मिन् मासे केवलमेकस्य पत्रस्य लेखनानुमतिरासीदतस्ते सर्वेभ्यः सहैवैकं पत्रमलिखन्।) तस्मिन् सविनोदं— वृद्धायै गृहसेविकायै, भ्रातृजायायै, कमलायै, विजयलक्ष्म्यै, कृष्णायै तथेन्दिरायाः

कृते पत्राण्यासन्। इन्दिरायै तेऽलिखन् —

"इन्दु (इन्दिरे); वानर-सेनायां तावकीना स्थितिः काऽस्ति ? मम सम्मतिरस्ति यत् प्रत्येकं सदस्यस्य लाङ्गूलेन भवितव्यं तथा च तत् पदानां दृष्ट्या लघु दीर्घं वा भवेत्। परिचार्यिनि पदके हनुमतो मुद्रा समीचीनाऽस्ति किन्तु हनुमतो हस्ते गदाया अभाव एव श्रेयान् विद्यते। इदं स्मर्तव्यं यद् गदायास्तात्पर्यमस्ति हिंसा, वयञ्चाहिंसकाः सैनिकाः स्मः। युष्मभ्यं शारीरिक-व्यायामस्य शिक्षकः कोऽपि विद्यते न वा ? अयमत्यावश्यकोऽस्ति। त्वया स्वस्थया भाव्यम्। धावनस्य व्यायामः करणीयः। तव पितरः प्रत्यहं मीलद्वयस्य धावनं कुर्वन्ति। (अनेन सहैव धावनस्य व्यवस्था-विषयेऽपि सा प्रतिबोधिता)।"

कारा-जीवनस्य मानसिकीनामाकृष्टीनां कष्टानाञ्च परिणत्या श्रीमोतीलालनेहरूणां स्वास्थ्यं द्रुततयाऽह्रसत्। श्रीजवाहरलाला निरन्तरं तेषां सेवा-शुश्रूषासु संलग्ना एवावर्तन्त (यतो हि तेषां प्रकोष्ठौ निकटावेवास्ताम्।) अस्वास्थ्यकारणात् ते (श्रीमोतीलालमहाभागाः) मोचिताः। श्रीमती स्वरूपरानी, श्रीमती विजयलक्ष्मीः पण्डिता तथा कृष्णा तान् स्वास्थ्य-संवर्धनाय मसूरीमनयन्। श्रीमती कमला तत्रैवेलाहाबादनगरे काङ्ग्रेसस्य गतिविधिषु तत्पराऽवसत् तस्मादेव कारणादिन्दिराऽपि तत्रैव न्यवसत्। कतिचित्-सप्ताहानन्तरं यदा श्रीजवाहरलालानामपि बन्दीगृहान्मोचनमभूत् तदा ते (इन्दिरा-कमला च) अपि मसूरीं गते किन्तु ततः प्रत्यावर्तनात् प्रागेवैकस्य भाषण-प्रदानस्यापराधे श्रीजवाहरलालाः पुनर्निगृह्य तेभ्यः सार्धद्विवर्षात्मको दण्डः श्रावितोऽभूत्।

समस्तेऽपि भारते तस्या दण्डघोषणाया निग्रहणस्य च विरोधे सभा आयोजिताः। एकस्यां सभायां नेहरूपरिवारस्य महिला अपि सममिलन्। श्रीमती कमला तत्र तत्समग्रं भाषणं वाचयित्वाऽश्रावयद् यदर्थं श्रीजवाहरलालेभ्य इयान् दीर्घकालिको दण्डोऽदीयत। तस्य फलस्वरूपं कमलाऽपि निग्रहं प्रापत्।

मनो-वाक्-कर्माद्यैः श्रुतिमनुसरन्ती स्मृतिरिह,
प्रशस्याऽऽस्ते तद्वत् पतिपथमयन्ती प्रियतमा।
सदा श्लाघ्या पत्नी भवति परितो निर्मलयशाः,
शुभं पातिव्रत्यं जगति च तदीयं विजयते॥२४॥

सन् १९३१ ई० वत्सरस्य जनवर्याः समाप्तेरासन्नेषु दिवसेषु श्रीमोतीलालनेहरूणां स्वास्थ्यमतीव क्षीणमभूत्। तेऽद्यश्वस्तना अतिथयोऽवालोक्यन्त। श्रीमती कमला-श्रीजवाहरलाल-श्रीगान्धि-रणजीत(श्रीमत्या विजयालक्ष्म्या भर्तारः) — महोदयास्तथा काङ्ग्रेस-कार्यकारिण्याः सर्वेऽपि कार्यकर्तारः सदस्याः कारातो विमोचिताः। श्रीमोतीलालमहाभागा उपविश्य सर्वेषां स्वागतमकार्षुः। यद्यपि तेऽतितरां व्यथमाना अवर्तन्त परमपारेणात्मबलेन ते सर्वैः सह शक्तिपूर्वकं सम्भाषणान्यकुर्वन् तथा तदा ते पूर्णतया सचेतना आसन्।

न पुरो देवदूतानामग्रे मृत्योश्च मानवः।
शिरो नमयते किन्तु क्षीणेच्छा नमयत्यरम् ॥२५॥
यावत् स्वस्थः सशक्तो भवति हि मनुजः पूर्णरूपेण तावत्—
तस्याग्रे देवदूतः स्वयमपि च यमो हन्त! तुच्छत्वमेति।
इच्छाशक्तेः श्लथत्वान्नमयति सहसा स्वं शिरः क्षीणकायो,
नो चेत् स स्वीयशक्त्या कथमपि मनुते नो पराभूतिमन्तः ॥२६॥

१९३० ई० वर्षस्य फरवरीमासे षष्ठे दिने श्रीमतां मोतीलालनेहरूणां स्वर्गमनमभूत्। तस्मिन् महति शोके श्रीगान्धिमहाभागाः श्रीमतीं स्वरूपरानीमसान्त्वयन्। सर्वोपि नेहरूपरिवारस्तेषां महीयसां पितॄणां पितामहानां राष्ट्रस्य परमभक्तानां साहसशालिनां कर्मठानां विद्या-वैभवसम्पन्नानां चिर-वियोगाद् भृशं दुःखितोऽभूत्। आनन्द-भवनस्य स आनन्दो यस्तेषामुन्मुक्तेनाट्टहासेनाभूत्, कदापि न गुञ्जनं प्राप्स्यतीति स्मारं स्मारं स कमप्यनिर्वचनीयं विषादमनुभवति स्म। आसीदवश्यमियान् सन्तोषो यत् ते नेहरूपरिवाराय तथा सकलेभ्यो देशवासिभ्यः साहसस्य तथा दुर्बलतायाः समक्षमनवनत-शिरस्कत्वस्यातीवगौरवशालिनीमुत्तराधिकारसम्पदं विमुच्य प्रयाताः।

श्रीजवाहरलालनेहरूमहाभागा २९ अप्रैल १९३१ ई० दिने प्रियायै पुत्र्या इन्दिरायै तां सान्त्वयन्तः पत्रमेकमलिखन् —

"वयंताननुशोचामस्तथा प्रतिपदं तेषामभावमनुभवामः। दिनानि व्यतीयन्ते, परं न तु दुःखं न्यूनं सत् प्रतीयते न वा तेषां वियोगस्यासहनीयता। किन्तु पुनरहं विचारयामि यदस्माकमीदृशमाचरणं कदापि तेभ्यो नारोचिष्यत। ते कदाप्येतेन प्रसन्ना नाभविष्यन् यद् वयं दुःखेन शिथिला भवेम। ते त्विदमेवान्वभालयिष्यन् यद् यथा तैः स्वेषां काठिन्यानां साम्मुख्यं विहितं, वयमपि तथैव कुर्याम तथा तेषु विजयं प्राप्नुयाम। त इदमेवावाञ्छिष्यन् यद् वयं तेषामपूर्णानि मुक्तानि कार्याणि प्रवर्तितानि रक्षेम। यथा कार्यमस्मानाह्वयति तथा भारतस्य स्वतन्त्रताया विषयोऽस्माकं सेवा अपेक्षते, वयं मौनाः कथं स्थातुं शक्नुमः, किञ्च व्यर्थस्य शोकस्य समक्षं शिरांसि कथमवनमयितुं प्रभवामः? अस्मा एवोद्देश्याय तैः प्राणा उत्सृष्टाः। अस्मा एवोद्देश्याय वयं जीवनं धारयिष्यामः प्रयस्यामश्च, किञ्च यद्यावश्यकता भविष्यति तदा प्राणानपि दास्यामः। अन्ततो वयं तेषां सन्ततयः स्मस्तथाऽस्मासु तेषां तत्परतायाः शक्तेर्दृढनिश्चयस्य च कश्चनांशः स्थितोऽस्त्येव।"

इदं सन्ततेरुज्ज्वलं सन्ततित्वं, सदा पूर्वजानां श्रयेत् साधुमार्गम्।
तथा तैः समारब्धकार्यस्य पूर्त्यै, स्वकं जीवनं योजयेत् सर्वथैव ॥२७॥

[५]

कान्ति-कला

निष्ठा-श्रमाभ्यां विलसन्ति कान्तयः[1]

काण्डा॑त् काण्डात् प्ररोह॑न्ती परु॑षः परुषस्परि॑।
एवा नो॑ दूर्वे॒ प्रत॑नु सहस्रे॑ण श॒तेन॑ च ॥ (यजु० २०।१३)

स्वच्छे मानस-मन्दिरे सरुचि या शिक्षाऽर्ज्यते शैशवे,
सा स्थैर्येण समग्रजीवन-विधौ दत्ते सहायं सदा।
सैवान्तः प्रतिबोधनेन परितो जिज्ञासितुं प्रेक्षितुं,
प्राप्तुं चिन्तयितुं परीक्षितुमपि[2] प्रेरत्यलं मानवम् ॥१॥

यतः कुतोऽपि सम्प्राप्तं, ज्ञानं ज्ञानाय कल्पते।
पितृभिः प्रियदर्शिन्या, पत्राचारात्तदर्जितम् ॥२॥

इन्दिरा कतिचिद् दिनानि देहलीस्थिते **'कान्वेण्ट-विद्यालये'**ऽपठत्। ततः परं भूयोऽपीलाहाबादस्यैकस्मिन् विद्यालये पठितुमारभत। एवं सत्यपि तस्याः शिक्षणे नैरन्तर्यं नासीत्। श्रीजवाहरलालमहाभागाः कारागृहात् पत्राण्यालिख्येन्दिरायाः शिक्षा-पूर्तेः प्रयासमकुर्वन्। तस्या विचारेभ्यो ज्ञानाय च दिग् दर्शितुं तैरिन्दिराया दशमवर्षग्रन्थेर्दिनादेव पत्रलेखनं प्रारब्धम्। तेषां पत्राणां सङ्कलनं **'पिता के पत्र, पुत्री के नाम'** इति नाम्ना पुस्तकरूपेण प्रकाशितम्। तेषु पत्रेषु जीवनस्य व्यावहारिकं तथा सैद्धान्तिकं पक्षद्वयमाश्रित्य शिक्षाप्रदानाय प्रयतितम्।

यदा च श्रीजवाहरलालमहोदया गृहे निवसन्ति स्म तदा प्रामुख्येन भूयांसं कालमिन्दिरया सहैव यापयन्ति स्म। यदेन्दिरा कमपि प्रश्नमुपास्थापयत् तदा तस्यै ते यदावश्यकममन्यन्त तस्य वर्णनं विवेचनं च कर्तुं प्रवर्तन्ते स्म। तेषां भूयसीषु वार्तासु काश्चन स्मृतावतिष्ठन् काश्चन च विस्मृता अप्यभवन्। इयमेव स्थितिः पुस्तकानां वाचनेऽप्यासीत्। सा यानि पुस्तकान्यवाचयत् तेषां स्वज्ञानानुसारं सारमजानात् किन्तु वास्तविकमर्थं तदीयाः पितरः पत्रैरबोधयन्। तस्याः पितामहास्तथा पितर उभावपि यादृशी शिक्षा तस्यै दीयते स्म तया सन्तुष्टा नासन्, अतस्ते स्वाध्यायार्थं भूयोभूयोऽकथयन्। यदा कदा तु समग्रोऽपि परिवारः समूहशोऽपठत्। कदाचिन्नाटकवाचनमचलत तदा प्रत्येकं जनः पृथक् पृथक् पात्रस्य संवादमश्रावयत्। पुस्तकेषु प्रत्येकं जनो भिन्न-भिन्नमध्यायं प्रकरणं वाऽवाचयत्।

श्रीजवाहरलालाः प्रायः सायङ्कालेषु गृह एव स्थित्वा प्रत्यहं रामायण-महाभारतादीनां वाचने रुचिमवर्द्धयन्। **तेषां संस्कृतभाषां प्रति गभीरा रुचि-**

---

१. कान्तिरूपाः सात्त्विका अलङ्काराः। २. प्र+ईरतीत्यस्य रूपम्।

रासीत्, श्रीमती कमला तु तां शिक्षितुमपि प्रावर्तत ।

स्वाध्यायात् समुदेति भूरि-विषयज्ञानं समन्तात् स्वतः,
स्वात्मा बोद्धुमपोहते स्वयमथो ज्ञात्वा निदिध्यासति ।
अन्तर्बोध-समन्वितस्य पठितुः शस्ता मतिर्जायते,
दृष्टिर्व्यापकतां भजत्यविरतं क्षुद्रा मतिर्नश्यति ।।३।।

इत्थमेव तस्याः पितरो दैनिके व्यायामे श्रद्धावन्तोऽप्यवर्तन्त तस्मादेव त इन्दिरां धावनाय, सलिले तरणायाश्वारोहणायान्येभ्यः शारीरिकव्यायामेभ्यश्च प्रैरयन् । यदा सा विश्रामक्षणेष्वस्थात् तदा कृषि-महाविद्यालयस्य प्राचार्यं **'सैम हिगिन वाटम'**महोदयस्य गृहे तेषां पत्न्या सहामरीकातोः भारतीयबालकेभ्यः प्रेषितानि वस्त्राणि क्रीडनकानि पुस्तकानि च व्यवास्थापयत् । तेष्वेव दिवसेषु यदा-कदा मिलितुं **श्रीलालबहादुरशास्त्रिणो**ऽप्यानन्दभवनमागच्छन्ति स्म ।

श्रीजवाहरलालमहोदयाः स्वां पुत्रीमितिहासस्य रसमास्वादयितुं वाञ्छन्ति स्म तस्मात् कारणाद् विश्वस्य सर्वासां प्रमुख-घटनानाम्—'आदिमानवादारभ्य वर्तमानसभ्यतां यावत्' सकलं वर्णयन्ति पत्राणि द्वितीय-भागरूपेण 'नैनी'-स्थात् कारागाराल्लिखितुं प्रावर्तिषत । संसारेण कथं शनैः शनैः परं निश्चितेन रूपेणौन्नत्यं प्राप्तम्, विश्वस्य प्रारम्भिकाणां सरलानां जीवानां स्थानेऽधिकमुन्नता जटिला जीवाः कथमायाताः कथञ्च सर्वान्ते जीवानां शिरोमणिर्मनुष्य उत्पन्नस्तथा स्वस्या बुद्धेः शक्त्या विजयं प्राप्नोद्-इति सर्वं तस्यै लिखितम् ।

इन्दिरा पितृपादानामिमानि पत्राण्यतितरां स्नेहेन वाचयित्वा ज्ञानं कर्मप्रेरणां च लभते स्म । तेष्वेव पत्रेषु तस्यै पुस्तकालयस्य पुस्तकानां वाचन-प्रेरणाऽप्यभवत् । यदा-कदा यथाप्रसङ्गं तस्यै भाविनो जीवनस्य विषय उपदेशाः कदाचिज्जन्मदिनादि-प्रसङ्गेषु शुभकामनाः कर्तव्योपदेशाः स्वास्थ्यसंरक्षण-सन्देशा अपि तेष्वदीयन्त । इयं प्रवृत्तिः १९३० ई० वर्षादारभ्य १९३३ ई० वर्षपर्यन्तं प्राचलत् । तस्मिन्नन्तराले तैः १९६ पत्राणि लिखितानि यानि वास्तविकरूपेण मार्गदर्शकान्यभूवन्, येषां च प्रकाशेन प्रियदर्शिन्या भाविजीवनं न केवलमालोकितमेवाभूदपि तु तस्मिन् सिन्धु-तुल्यं गाम्भीर्यं तथा हिमालय-समानं स्थैर्यं धैर्यञ्चापि पूरितम् । तानि सर्वाणि पत्राणि हिन्द्यनुवादरूपाणि **'विश्व इतिहास की झलक'**-नाम्ना मुद्रितानि ।

कारा-प्रकोष्ठाल्लिखितानि तानि, पत्राणि पुत्र्यै प्रहितानि नूनम् ।
आसन् क्षितावद्भुतरूपकाणि, शिक्षाप्रवातॄणि शुभावहानि ।।४।।

श्रीजवाहरलालमहाभागानां देशप्रेम, कर्तव्यपरायणता, सूक्ष्मं चिन्तनं, प्रियदर्शिन्याः सुताया इन्दिराया विषये च भाविन्य आकाङ्क्षाः कीदृश्य आसन्निति

परिज्ञानाय पत्रमेकं परिशीलनायेत्थं विद्यते —

प्रिये तनये,

'यस्मिन् वर्षे त्वदीयं जन्माभूत्—'अर्थात् १९१७ ई० वर्षे' स इतिहासस्यैकः प्रसिद्धो वर्षो विद्यते। अस्मिन्नेव वर्षे एकेन महता नेत्रा, यस्य हृदये दीनेभ्यो दुःखितेभ्यश्चातीव स्नेहः समवेदना चावर्तताम्, स्वकीयदेशवासिनां हस्तैरीदृशमुन्नतं कार्यं कारितं, यदितिहासेऽमरं भविष्यति। तस्मिन्नेव मासे, यस्मिन् त्वमुत्पन्ना, लेनिनस्तां महतीं क्रान्तिमारभत, यथा रूसस्य साइबेरियादेशस्य च काय-परिवर्तनमभवत्। किञ्चाधुना भारतेऽप्येकेनान्येन महता नेत्रा, यस्य हृदये सङ्कटे निपतितेभ्यस्तथा दुःखितेभ्यो जनेभ्यो वेदनाऽस्ति तथा च यस्तेषां साहाय्यार्थं विकलो विद्यते; अस्माकं देशवासिषु महते प्रयत्नायोच्चबलिदानाय च नवीनाः प्राणाः पूरिताः सन्ति, येनास्माकं देशः पुनः स्वतन्त्रो भवेत् तथा क्षुधिता दीनाः पीडिताश्च जनाः स्वेष्वारोपितेन भारेण मुक्ति प्राप्नुयुः।……भारतेऽद्य वयमितिहासं रचयामः। वयं तथा त्वम्, अतीवसौभाग्यशालिनः स्मो यत् सर्वा घटना अस्माकं नेत्राणां समक्षमेव सम्पद्यन्ते किञ्चास्मिन् महति नाटके वयमपि पात्रतां भजामः।…

'अहं गदितुं न शक्नोमि यत्—अस्माकं दायित्वे कीदृशं कार्यमागमिष्यति ?; परं यदपि कार्यमागमिष्यति तदाऽस्माभिरिदं स्मर्तव्यं यद् वयमीदृशं किमपि न करिष्यामो येनास्माकमुद्देश्येषु कलङ्क आपतेदस्माकं राष्ट्रस्य च दुष्कीर्तिः प्रसरेत्। सत्यं किमस्ति किञ्चासत्यं विद्यत इति निर्णयस्य कार्यं न भवति सरलं कर्म। अतो यदापि त्वं शङ्किता भवेस्तादृशे समयायाहं त्वामेकां स्वल्पीयसीं निकषोपलिकां दर्शयामि। सम्भावये तया तुभ्यं साहाय्यं मिलेत्!, किमपि कार्यं त्वं गुप्तं मा कार्षीः किञ्च नैतादृशं किमपि कार्यमकार्षीर्यदन्यैर्गोप्यं प्रतीयेत; यतो हि गोपनेच्छायास्तात्पर्यं भवति यत् त्वं बिभेषि तथा भीतिर्नामातीवारुचिपूर्णा वार्ताऽस्ति किञ्च तव सम्मानेन विपरीता वर्तते…।

प्रियसुते ! सम्प्रत्यहं त्वत्तो विदायं गृह्णामि, शुभकामनाञ्च करोमि यत् त्वं युवतिर्भूत्वा भारतस्य सेवार्थमेका शूराऽऽरक्षिका भवेः।"

हृदयेन यदीप्स्यते मुदा, स्वजनैरुन्नतिकामनान्वितम्।
विषमेऽवसरेऽपि सर्वथा, सफलं तद् भवतीह निश्चितम् ॥५॥

"तत एवेन्दिरा तारुण्यकाले भारतस्य सेवार्थमेका शूरवीराऽऽरक्षिकाऽभूत्।" इति।

अनुकूलानां परिस्थितीनामभावे सत्यपि प्रयासे इन्दिराया विद्यालयीया शिक्षा नियतरूपेण न प्राप्नोति स्म, तेन चिन्तिताः श्रीनेहरूमहाभागाः स्वकीयस्य

वकीलाभिधस्य मित्रस्य सम्मत्या तथा श्रीगान्धिमहाभागानां प्रेरणयाऽऽग्रहेण च पुण्यपत्तनस्थ एकस्मिन् राष्ट्रियभावनाशालिनि **'प्यूपिल ऑन स्कूल'**-नाम्नि विद्यालये प्रियां पुत्रीमिन्दिरां प्रावेशयन् । तत्र साऽध्ययनेन सहैव सांस्कृतिकेषु कार्यक्रमेषु तथा क्रीडा-प्रवृत्तिषु भागं गृह्णाति स्म । नाटकेष्वभिनयमपि करोति स्म । प्रारम्भादेव सङ्घटनवृत्त्या नेत्रीत्वस्य गुणैश्च विद्यालयस्य संसदः प्रधानत्वमपि तया प्राप्तम् । बहुश्रुतत्वं बहुभाषावित्त्वं तथा कुशाग्रबुद्धिमत्त्वं च तां शिक्षकेषु तथा छात्रच्छात्रासु प्रियतां प्रापयन् । सन् १९३२ ई० वर्षे यरवदा-कारागारे स्वीयाभिः पितृष्वसृसुताभिः सह सा महात्मभिः श्रीगान्धिभिरपि मिलितुमगमत् । श्रीगान्धिनश्चतसृणामपि कन्यकानां स्वास्थ्य-सौमनस्ययोर्विषये श्रीजवाहरलालेभ्यस्तडित्सन्देशमपि प्रैषयन् । सन् १९३३ ई० वर्षस्यारम्भे श्रीमती विजयलक्ष्मीः कृष्णा च कारातो विमुक्ते । प्रथमं ते मात्रा सह कलकत्तानगर्यामुपचाराय स्थितवतीं श्रीमतीं कमलां द्रष्टुं गते । ततः परमिन्दिरां कन्यकाश्च विलोकयितुं पुण्यपत्तनमपि गतवत्यौ ।

९ अगस्त १९३३ ई० दिने श्रीजवाहरलालनेहरूभिर्वर्षद्वयस्य दण्डावधेरासन्नसमाप्ताविन्दिरायै शिक्षामालाया अन्तिमं पत्रं प्रेषितं किञ्च तस्योत्साहपूर्णायां पूर्णाहुतौ तैर्विश्वसौन्दर्यस्य प्रशंसा साहसस्य सहानुभूतेर्भावना विचारैः सह कर्मणोऽपि दासत्वस्वीकृतिरित्यादयो विषयाः प्रबोधिताः ।

□ न मातुः पर-दैवतम्

मातुः कृपामृतसरित् परमोपकर्त्री, हर्त्री समस्तविपदां मनुजस्य नित्यम् ।
या जीवनस्य विपिनं परितोऽभिषिच्य, सर्वांस्तरून् दल-सुमैः सफलीकरोति ।।६।।

निष्ठा-वीरता-कष्ट-सहिष्णुतानां प्रतिमूर्तिः श्रीमती कमला स्वदेश-सेवायामियती तत्पराऽवर्तत यत् सा रुग्णावस्थायामपि कर्तव्यमविस्मरन्ती सत्याग्रहेषु सहभागितां नाजहात् । जनपद-समितेराध्यक्ष्यं वहन्ती प्रायो ग्रामाद् ग्रामं भ्रान्त्वा जनानुदबोधयत् । कारासु दीयमानानि कष्टानि निर्विरोधं तानि स्वाभाविकानीति मत्वाऽसहत । इत्थं तस्या रोगं प्रत्युपेक्षा स्वास्थ्यं प्रत्यनुत्साहिता तथा कर्तव्यं प्रति जागरूकता निरन्तरश्रमनिष्ठा चान्तरेवान्ता रोग-विवृद्धेः कारणतां प्राप्नुवन् । श्रीजवाहरलालनेहरूणां च प्रायः कारावासादुपचारेऽपि शैथिल्यमेवाभवत् ।

सन् १९३३ ई० वर्षस्य तृतीये चरणे द्विवार्षिकं कारावासावधिं समाप्य गृहमागतैः श्रीनेहरूमहाभागैः पारिवारिक्या एकस्या नवीनायाः समस्यायाः समाधानं विहितम् । ते भगिन्याः कृष्णायाः रुच्यनुसारं निर्णीतस्य भाविनः पत्युः

श्रीहठीसिंहाभिधस्य सर्वां स्पृहणीयां समुचितां स्थितिं विज्ञाय तेन सह कृष्णाया विवाहविधानमानन्द-भवने २० अक्टूबर १९३३ ई० दिने सम्पादितवन्तः।

श्रीमत्याः कमलाया उपचार-प्रसङ्गेन १९३४ ई० वर्षस्य प्रथमे मासे चिकित्सकैः परामष्टुं श्रीजवाहरलालनेहरूणां तया सह कलकत्तानगर्यां गमनमभूत्। कलकत्तातस्ते श्रीरवीन्द्रनाथठाकुर-महाभागैर्मिलितुं तथा तैः स्थापितं विश्व-विद्यालयं च द्रष्टुं शान्तिनिकेतनं गताः। तत्रत्यां व्यवस्थां वातावरणं राष्ट्रियता-ञ्चालोक्य ते कुमारीमिन्दिरां तत्रैव प्रवेश्य पाठयितुं निरचैषुः।

पुण्यपत्तनस्य 'प्यूपिल्स ओन विद्यालय'स्यास्यावासेन्दिरा वर्षत्रयं याव-न्नियमितमधीत्य पूर्णतो लाभान्विताभवत्। १९३४ ई० वर्षे सा दशमीं कक्षा-मुत्तीरितवती। शान्तिनिकेतने प्रविश्य सा तस्यान्ताराष्ट्रियस्वरूपानुरूपं साहित्य-सङ्गीत-कलानृत्येषु विशिष्याकृष्टाऽभवत् समस्तस्य विश्वस्य छात्रा-श्छात्र्यश्च तत्राध्ययनार्थमायान्ति स्म। संयतं सारल्यपूर्णं च तत्रत्यं जीवन-मासीत्। विद्यार्थिनः स्वयं मार्जनमन्यानि च गृहकार्याणि कुर्वन्ति स्म। इन्दिराया अभिरुचिः कलायां नृत्ये चावर्तत। तया श्रीरवीन्द्रमहाभागानामेकस्यां नाटिकाया-मेकाकि-नृत्यमपि तेषामुपस्थितौ वसन्तोत्सवे वासन्तिकानि वस्त्राणि परिधाय विहितम्। नृत्य-चित्रकलयोर्गुरवः श्रीनन्दलालवसुमहोदया आसन्। इत्थं साहित्य-सङ्गीत-कलादिभिः सहाध्ययन इन्दिराया मनोऽन्वरज्यत। यतः—

साहित्यं विविधाभिरुन्नतविधा-विद्याभिरालोकितं,
साकं तेन च नृत्य-गीत-रचना-वाद्यादिभिः सङ्गतम्।
कौशल्यं कलयाऽन्वितं यदि भवेच्छिक्षाविधौ प्रोन्नतं,
तेनात्राशु विकासमेति पठितुः सार्वत्रिकं जीवनम् ॥७॥

शान्तिनिकेतनेऽधीतवत्या इन्दिरायाः प्रथमवर्षावधिपूर्तेः पूर्वमेव सहसा-ऽध्ययन-त्यागस्य कारणमुपेतम्। श्रीमत्याः कमलायाः स्वास्थ्यमतीव चिन्तनीय-मभूत्। चिकित्सकाः शार्मण्यदेशस्य 'बेडनवीलर'-नाम्न्यारोगधाम्न्युपचाराय सम्मतिमदुः। श्रीजवाहरलालास्तदा बन्दीगृह आसन्। अत एव मात्रा सहेन्दिराया विदेशगमनमत्यावश्यकमभूत्। मातुः परिचर्यायै सन् १९३५ ई० वर्षे शान्ति-निकेतनस्य सुखदं वातावरणं विमुच्येन्दिरा यदाऽगमत् तदा श्रीनेहरूभ्यः पत्रेण सन्दिशद्भिः श्रीगुरुवर्यैर्लिखितम्—

"खिन्नेन मनसैवास्माभिरिन्दिरायै विदायो दत्तः, यतः साऽत्रास्मभ्यमती-वोपयोगिनी सिद्धा भवति स्म। अहं तामतीव ध्यानेनावालोकयं किञ्च भवद्भि-र्येन प्रकारेण तस्या लालनं पालनञ्च विहितं तदतीव श्लाघ्यं विद्यते। तस्याः सर्वेऽपि शिक्षका एकेन स्वरेण तां श्लाघयन्ति तथा छात्रसमुदायस्यापि साऽत्यन्तं

स्नेहभाजनमभूत्। आशासे यत् सर्वं शुभमेव भविष्यति सा चात्र शीघ्रं प्रत्यागमिष्यति।" इति

स्वीये जीवने शान्तिनिकेतनस्य योगदानमिन्दिराऽङ्गीकुरुते स्म, यतः श्रीरवीन्द्रनाथमहाभागास्तां कलया कवितया च स्नेहसम्पादनमशिक्षयन्।

सन् १९३६ ई० वर्षस्य २८ फरवरी-दिने श्रीमती कमला **'लोजान'**स्यैकस्मिन्नारोग्यसदने स्वीयं नश्वरं शरीरं विहाय दिवमगमत्। लोजान एव तस्या दाहसंस्कारोऽभूत्। मृत्योः समये श्रीजवाहरलालमहोदया इन्दिरा श्रीफीरोजश्च तस्या निकटेऽवर्तन्त।

इन्दिरा मातृ-वियोगशोकं सोढुं पार्येत, अनया दृष्ट्या श्रीजवाहरलालास्तां सुरम्य-कुल्याभिः सम्भूषिते 'माण्ट्रयू'-स्थलेऽनैषुस्तत्र च कियन्तिचिद् दिनानि स्नेह-सिक्तैरालापैर्बोधयन्तस्तस्या मनोऽसान्त्वयन्। ततः परं 'बेक्स'-स्थिते विद्यालये साऽध्येतुं गतवती श्रीजवाहराश्च भारतं वायुयानेन परावृत्ताः।

कालः स्वां कलनां विधाय विषमां हंहो! विधत्ते स्थितिं,
लोकानां न विलोकते विषमतां नो वा हितं वाञ्छति।
इत्थम्भाविनि तादृशेऽपि समये कर्तव्यमार्गे रता,
नो मुञ्चन्ति गतिं रतिञ्च पुरतो वर्धन्त एवानिशम् ॥८॥

☐ चलाचला जीवन-सागरोर्मयः

जीवनं मानवस्यास्ति, विशालं सागरोपमम्।
ऊर्मयस्तस्य खेलन्ति कृतिरूपाश्चलाचलाः ॥९॥

'बेक्स'स्थिते विद्यालये पठन्तीन्दिरा विद्यालयस्यैकस्यां शैक्षणिकयात्रायाम्-**'इटली'** देशं गता। सा यात्रा 'कलाया इतिहास' इति पाठ्यविषयस्यैकाऽङ्गभूता यात्राऽवर्तत। तत्र सा प्रमुखानि तत्रत्यानि नगराणि, सङ्ग्रहालयांस्तथाऽन्यानि दर्शनीयानि स्थलान्यवालोकयत्। ततः परावृत्य च सा स्वस्य भविष्यतः प्रश्नमचिन्तयत् –'अहं पठनाय क्व गच्छेयं **'सारबोन'**-नगरमथवा- **'आक्सफोर्ड'**-विश्वविद्यालयम्? श्रीजवाहर-महाभागानां विचारोऽभूद् यत् सा स्वपरिचित इङ्लेण्ड-देशं गच्छेद् यतस्तत्र तेऽधिकान् जनान् परिचिन्वन्ति स्म, तेन तस्याः सौविध्य-सम्पादने सारल्यं भविष्यतीति। एवं सत्यपि साऽऽक्सफोर्ड-विश्वविद्यालय एवाध्येतुं मनसि निरचैषीत्। तस्य विश्वविद्यालयस्य परीक्षार्थमध्ययनमपि तया स्वयमेव प्रारब्धम्। इङ्लेण्डं गन्तुं निर्णीतवत्यास्तस्याः परिचयः कुमार्या **'बेकार'** महोदयया सञ्जातः। सा हि **ब्रिस्टलस्थस्य 'बैडमिण्टन-विद्यालय'**स्य प्रधानाध्यापिकाऽऽसीत्। तस्या एव सम्मत्यनुसारमिन्दिरा तत्र गता तस्मिन् विद्यालये प्रविश्य च आक्सफोर्डस्य परीक्षायामपि सा प्राविशत्।

तेषु दिवसेषु **श्रीफीरोजगान्धी'** इङ्लेण्ड एवावात्सीत् । अध्ययनार्थमिन्दिराया आक्सफोर्डस्य चयने कारणमिदमप्यासीत् । सा तं मित्रममन्यत । स चेन्दिराया भारतस्य नेहरूपरिवारस्य च मध्य एकं योजकशृङ्खलाङ्गमवर्तत। इन्दिरा व्यचारयद् यद् यद्यहं पेरिसनगरे स्थास्यामि तदा सर्वैर्विच्छिन्नेव भविष्यामि तदपेक्षया भारतस्य घटनानां ज्ञानमिङ्ग्लैडे विशिष्य प्राप्स्यामीति ।

श्रीफीरोजगान्धिना सहेन्दिरायाः परिचय इलाहाबाद एवाभवत् । तस्मै काङ्ग्रेस-सेवाया दीक्षां श्रीमोतीलालनेहरूमहाभागा एवादुः । स हि राष्ट्रियान्दोलने सम्मिलितः सन् प्राय आनन्दभवनमागच्छत् । यदा श्रीमती कमलानेहरूर्जनपद-समितेरध्यक्षत्वेन प्रचाराय विभिन्नेषु ग्रामेष्वटति स्म तदा तदीय-सेवा-गुणगणाभिभूतभक्त इव स तस्यै प्रतप्तपेय-प्रातराशादिसाधनसमन्वितां करण्डिकां नीत्वा तया सह व्रजति स्म । पारसीक-परिवारस्यायं किशोरः श्रीमत्याः कमलाया उपचारार्थं यूरोपस्थितिसमयेऽपि सहायकोऽवर्तिष्ट। मातुश्चिन्तया व्याकुलत्वमनुभवन्त्या इन्दिरायै स महानाश्रयरूपः समपद्यत । मातुर्निधनानन्तरं प्राय एकवर्षाविधिक-कालस्यान्तराले विंशति-वर्षदेशीयायाः कुमार्या इन्दिराया मैत्रीसम्पर्कः श्रीफीरोज-गान्धिना सह क्रमशो वृद्धिमगमत्। तदानीं श्रीफीरोजगान्धी **'लन्दन स्कूल आफ इकनामिक्से'** पठन्नासीत् ।

ब्रिस्टलानन्तरमिन्दिरा आक्सफार्डस्य **'समरविले'**-महाविद्यालयेऽध्येतुं प्रावर्तत। परं तस्याः शोणिते राजनीतिः संश्लिष्टाभूदतः सा तस्याः पृथगात्मानं रक्षितुं नाशक्नोत्। सा यदापि लन्दनं गच्छति स्म तदा **'इण्डिया-लीग'**- सम्बद्धं कार्यमकार्षीत् । 'इण्डिया-लीग'स्य सञ्चालकस्तदानीं श्री'कृष्ण मैनन्'-महोदय आसीत्। इन्दिरा स्वपितॄणां मित्रत्वेन श्रीमन्तं कृष्णमैनन्महोदयं स्वस्याः सम्मान्यं परामर्शकं मनुते स्म । इङ्ग्लैण्ड एव सा **'लैबरपार्टी'**तः सम्बद्धाऽभवत् तथा तस्याः समारोहेषु सम्मिलितुं प्रावर्तिष्ट । इन्दिरायाः परिचयस्तत्र—**'अर्नेस्ट वेविन'**-महोदयेन तथा प्रसिद्धेन राजनीतिक-चिन्तकेन **'हेराल्ड लास्की'**-महोदयेनाप्यभूत्। तत्रैवेन्दिरा कदाचिद् भारतस्य **'स्पेन-सहायता-समितये'** कदाचिच्च **'चीन-सहायता-समितये'**—(ययोरध्यक्षाः श्रीजवाहरलालमहाभागा एवासन्) —साहाय्यद्रव्य-सङ्ग्रहणमकार्षीत् । सा स्पेनवासिन्याऽभिनेत्र्या **'लापेशोनारिया'**-महाभागया मिलितुमपि लन्दनं गच्छति स्म ।

विश्वस्मिञ्जगतीतले विचलिता देशा भृशं पीडिताः,
शास्तॄणाञ्च निरङ्कुशां दमनकृद्वृत्तिं विनाश्यात्मनः ।
स्वातन्त्र्याय निरन्तरं कृतधियः सज्जा यदा तन्वते,
युद्धं तत्र हि राजनीतिपथगस्तिष्ठेत् कथं निश्चलः ? ॥१०॥

इंग्लैण्डे **'अगाथा हैरिसन'** कुमार्या इन्दिराया अभिभाविकाऽवर्तत सा हि

तस्या आवश्यकतानां पूर्तेर्दायित्वं निरवहत्। एवमेव **'हैराल्ड लास्की'**—महोदयोऽपि तस्याः सौविध्यान्यपश्यत्। इंग्लैण्ड एवेन्दिराया द्वितीया सखी **'शान्ता गान्धी'**-नाम्नी भारतीया कन्याऽऽसीद् या हि पुण्य-पत्तनस्य 'प्यूपिल्स ऑन विद्यालये' तदीया सहपाठिन्यासीत्। उत्कटाद् राष्ट्रानुरागादतिरिक्तं तयोरन्येषु बहुषु विषयेषु साम्यमभूत्। इन्दिरावदेव शान्तापि भारतीयं नृत्यमजानात् तथा स्पेनदेशस्य साहाय्यार्थं विधीयमानेषु कार्यक्रमेषु सा प्रायेण नृत्यति स्म। इन्दिरा तदा शुल्क-पत्राणां विक्रयणे तथाऽन्येषु साहाय्यकर्मसु तस्याः सहयोगमाचरति स्म।

अनेकैर्यूरोपवासिभिः सह श्रीजवाहरलालनेहरूणां मैत्र्यवर्तत तस्माद्-इन्दिरया सहापि स्वं सम्बन्धं वर्द्धयितुं भूयांसो ज्येष्ठाः श्रेष्ठाश्च जनास्तत्रायान्ति स्म। आक्सफोर्ड एव पठन्तीन्दिरा **'अर्न्स्ट टालर'** महोदयेन तदीयया पत्न्या श्रीमत्या **क्रिस्टाइन**-महोदयया सह (याभ्यां पुरा सा १९२७ ई० वत्सरे स्विट्जरलैण्डे मिलितासीत्) स्वीयं परिचयं पुनर्नव्यं व्यदधात्। श्रीटालरस्य विचारा गहनया मानवतया स्वातन्त्र्यप्रेम्णा चोतप्रोता अवर्तन्त। तदीये **'मनुष्यो जनता च'** (मैन एण्ड दी मासेज) नाम्नि नाटके हिंसाया विरुद्धं मानवात्मनां सङ्घर्षोऽङ्कितो विद्यते। हिटलरस्यातङ्काज्जर्मनीतः पलाय्य शरणार्थित्वेन समायातस्य तस्य नेत्रयोर्गहना पीडा व्याप्नोत्। इन्दिरां प्रति तयोः प्रेमातितरां दृढमासीत् तच्च श्रीमद्भ्यो जवाहरलालेभ्यः क्रिस्टाइनमहोदयया लिखितात् पत्रात् प्रकटितं भवति। तस्मिंल्लिखित-मासीत्।

न सुन्दरी केवलमिन्दराऽस्ति, साऽऽस्ते पवित्राऽपि तथैव हृद्या।
मनः प्रसत्तिं भजते नितान्तमालोकनादेव सुखेन तस्याः॥११॥
सा दृश्यते कोमलपुष्पतुल्या, यद् वायुरुड्डाययते सहेलम्।
मदीयचित्ते किल चिन्तयेऽहं, न सा ततः किन्तु बिभेति वायोः॥१२॥

श्रीजवाहरलालनेहरूणां मनः पूर्णतया काङ्ग्रेसस्य गतिविधिषु प्रसक्त-मासीत्। १९३९ ई० वत्सरे ते पुनरप्यध्यक्षा निर्वाचिताः। ब्रिटिशशासनं भारताय नवीनमेकं संविधानं निरमाद् यस्मिन् प्रान्तीयसभाभ्योऽत्यन्तं सामान्या अधिकारा अदीयन्त परं केन्द्राय कोऽप्यधिकारो नादीयत। काङ्ग्रेसेन तत् संविधानं न स्वीकृतं किन्च निर्वाचनमाध्यमेन विजित्य बहुमते सति प्रान्तेषु स्वीयानां मन्त्रि-मण्डलानां निर्मितये निर्णीतम्। तदनुसारमेव समग्रेषु प्रान्तेषु भ्रामं भ्रामं श्रीजवाहरलालैर्निर्वाचनयात्रा विहिताः। तादृश्यां व्यस्ततायामपि ते स्वीयामात्मीयां परमप्रीतिपात्रीं पुत्रीं न विस्मरन्तः स्वीयेषु भाषणेषु महता स्नेहेन तस्या उल्लेख-मप्यकार्षुः। एकदा पठान-वंश्यानामग्रे भाषमाणैस्तैरुक्तमासीत् —

"ममैका विंशतिवर्षीया पुत्री विद्यते, या सम्प्रत्यतिदूरमिङ्ग्लैण्डे वर्तते। सा ममैकाकिनी सन्ततिरस्ति किन्च तामहमतितरां स्निह्यामि। साहसात्मविश्वास-

निर्भीकतादिविषयांस्तां शिक्षयितुमहं प्रायतिष्ट। यदीदानीं सा मया सहावत्स्यत् तदा निःशङ्कमहमकथयिष्यं यत् सा भवतां प्रभागेषु गच्छेत् तैः सह मिलेत् सौहृदं च वर्धयेत्। अहमित्थमेतदर्थमेवाकथयिष्यं यदहं तस्यां विश्वसिमि किञ्च भवत्स्वपि विश्वासं धारयामि।"

श्रीजवाहरलाला निरन्तरं द्विवारं काङ्ग्रेसाध्यक्ष्यं निरवक्षन्, अतः १९३७ ई० वर्षान्ते कार्यकालसमापनानन्तरं तेऽध्यक्षपदान्निवृत्ताः।

१९३८ ई० वर्षस्यारम्भे भारतव्यापिन्या निर्वाचनयात्राया निर्वृत्त्य श्रीजवाहरलालमहानुभावा इलाहाबादं प्रत्यायाताः। श्रीमती कृष्णाऽपि स्वीयाभ्यां शिशुभ्यां सह तत्रायाता। इन्दिरा च विदेश एव पठन्त्यासीत्। श्रीमती विजया तदीयाः स्वामिनोऽपि स्वसन्तत्या सह तत्रागच्छन्। परमिन्दिराया अभावं पदे पदे स्मरन्तः पारिवारिकाः सर्वे नाति प्रसन्ना अवर्तन्त। तेष्वेव दिवसेषु श्रीमती स्वरूपरानी सर्वेषां सम्मिलनेनानन्दमनुभवन्त्यपि दुर्दैववशादेकस्मिन् दिवसे सायङ्काले सर्वैरालपन्त्येव सहसा मूर्च्छिताऽभूत्। शीघ्रमेव चिकित्सक आकारितः। तेनोक्तं यद् भीषणं हृदयरोगाक्रमणं सञ्जातमस्ति। समग्रायां निशि जवाहर-मातृश्वसृ-विजया-कृष्णा-प्रभृतयस्तस्याः सविधेऽतिष्ठन्। प्रातस्तस्याः स्वः प्रयाणमभूत्।

ततः परं दुःख-विह्वलायाः श्रीमत्याः कृष्णायाः समाश्लेषं प्राप्ता तदीया मातृष्वसा (बीबी अम्मा)ऽपि तस्याः शिरसि हस्तमावर्तयन्त्यकथयद् यत्—"केवलं तव मातुः कृत एवाहं जीवन्त्यासं साम्प्रतं मम कार्यं पूर्णम्" इति कथयन्ती साऽपि श्रीमत्याः स्वरूपरानी महाभागाया मृत्योरनन्तरं चतुर्विंशतिघटिकानामन्तराल एव नश्वरं कलेवरं विहाय दिवं प्रस्थिता।

शाखाप्रभेदेन भिदां श्रितापि, परस्परं सेचनसम्प्रवृद्धा।
सहैव ताभ्यां परिशोषमाप्ता, लोके प्रशस्यास्त्यनुरागवल्ली ॥१३॥
सांसारिकैर्दुःखशतैर्विपन्ना, विघ्नैरपि प्राप्तमनोऽवसादाः।
कुतोऽपि कस्माच्चिदपीह कष्टान्न कर्मनिष्ठा विरतिं भजन्ते ॥१४॥

औदासीन्यमेकाकित्वञ्चानुभवतां श्रीजवाहरलालानां मन इन्दिरां द्रष्टुमकामयत। ते जूनमासस्य द्वितीये दिने स्पेनदेशाय समुद्रमार्गेण प्रस्थिताः। ततश्च लन्दनं गता इन्दिराञ्च स्वेन सह नीत्वा यूरोपस्य सुखयात्रायै निःसृताः। यूरोपस्य तस्यां यात्रायां यत्रापि तेऽगच्छँस्तत्र, सर्वत्र हिटलरस्यातङ्को भयञ्च व्यापृते अदृश्यताम्। यहूदीनां दयनीया दशा जर्मनदेशस्य च राजनीतिक-विरोधिनां स्थितिस्तैरवलोकिता। त्रिंशल्लक्षजर्मनजनवसतिशालि **'चेकसुडेटनलैण्डं**, स्वाधीनं कुर्वाणो हिटलरोऽपि दृष्टस्तथा २९-३० सितम्बर-१९३८ ई० दिवसयोः सम्पन्नाया म्यूनिख-कान्फ्रेन्सस्यापि विलोकनं विहितम्। नवम्बरमासे श्रीजवाहर-

लालमहाभागा इन्दिरां नीत्वा भारतं प्रत्यावृताः।

नवम्बरस्यान्त्यदिवसेष्विन्दिरायाः स्वास्थ्यं विकृतमभूत् तस्य कारणं यूरोपस्य सुदीर्घाः कठिनाश्च यात्राः समभाव्यन्त। पितृचरणानां सम्मत्या सा स्वास्थ्यलाभाय हिमालयस्य **'अलमोड़ा'** नगरमगच्छत् तया सह तस्याः पितृष्वसा श्रीमती कृष्णाऽपि पुत्राभ्यां सहावर्तत। पर्वतानां शान्त एकान्ते वातावरणे सुखं निवसन्ती हिमेषु क्रीडन्ती पुस्तकानि पठन्ती महापुरुषाणां विचारेषु चर्चन्ती समागतैः स्वदेश-विदेशजैः सह मिलन्ती च सा शीतकालं तत्रैव व्यत्यापयत्।

१९३९ ई० वर्षस्य मार्चमासे त्रिपुरायां काङ्ग्रेसस्याधिवेशनं समपद्यत यस्मिन् सर्वोऽपि नेहरूपरिवारः सङ्गतः। अप्रैलमासे पुनरपीन्दिराऽध्ययनार्थमाक्स-फोर्डाय प्रस्थिता तत्र च सा स्वस्याध्ययने तथा महाविद्यालय-जीवनस्य सङ्गिषु सहपाठिषु च तन्मयत्वमाप्नोत्। परं १९४० ई० वर्षे तत्रत्ययोर्नीर-समीरयोरनानु-कूल्याच्छैत्याधिक्याच्चेन्दिरा (प्लूरिसी) **'उरोग्रह'** नामक रोगेणाक्रान्ताऽभूदतश्चि-कित्सकानां परामर्शानुसारं स्विट्जरलैण्ड उपचारायागमत् तत्र च शनैः शनैः स्वास्थ्यं रुचिरमजायत। तदानीमेवैङ्ग्लैण्डस्य नगरेषु सर्वत्र जर्मनानां प्रक्षेपास्त्रपातनैर्वि-पन्मयीं स्थितिं विलोक्य तत्र गन्तुमना अपि सा मनो निरुद्ध्य भारतमागन्तुं निरचिनोत्।

इतश्च भारते भारतीयजनतायाः परामर्शं विनैव वैदेशिकेन भारताधि-शासकेन भारतस्य पक्षतो युद्धघोषणा कृता तद्विरुद्धं च काङ्ग्रेसेन वैयक्तिकः सत्याग्रहः प्रारब्धः। श्रीगान्धिनां निर्देशानुसारं श्रीजवाहरलाला द्वितीयसत्याग्रहि-त्वेन सार्वजनिकसभायां भाषितुं निर्णीताः किन्तु सर्वदावत् ते प्रागेव निगृहीता दण्ड-स्वरूपेण तेभ्यो वर्षचतुष्टयस्य कारावासो दत्तः। इत्थं भूयोऽपि देहरादूनस्य कारायां ते प्रापिताः।

इन्दिरा स्वनिर्णयानुरूपम् 'एण्टिबेस-बार्सीलोना-लितन'—मार्गेणागच्छन्ती-ङ्ग्लैण्डं प्राप्ता यत्र फीरोजगान्धिना तस्यां एकस्मिन् सैनिकपोते स्थानं लम्भितं यश्च पोत **उत्तमाशाऽन्तरीपस्य** भ्रमणं विधाय भारतमागच्छन्नासीत्। मार्गे तस्याः पोतः सप्ताहं यावद् **'डरबन'** नगरे रुद्धः। दक्षिणाफ्रीकाया रङ्गभेदनीतिं जानन्ती-न्दिरा पोत एव स्वस्याः स्थितिमुचिताममन्यत, परं डरबनस्था भारतीयाः श्रीजवाहरलालनेहरूणां पुत्रीं पोतस्थां ज्ञात्वा तस्याः सार्वजनिकं सम्मानं विधातु-माग्रहमकार्षुः। इन्दिरया निषिद्धे सति नगरदर्शनस्य व्याजेन तामनैषुः। सा स्व-चक्षुर्भ्यां रङ्गभेदनीतेः कारणादाखेटतां-प्राप्तानां जनानां दुर्दशां विलोक्य दुःखिता-भूदत एव सा स्वागतनिमन्त्रणं स्वीकृत्य तत्र महत्त्वपूर्णं भाषणमकरोत्। सा रङ्ग-भेदनीतेर्निन्दनेन सहैव जातीयोत्पीडनकारिणोऽपि धिगकार्षीत्। भारतीयानपि सा

समबोधयद् यदस्या भुवो मूलनिवासिभिर्नीग्रोजनैः सह नैकटिकः सम्बन्धोऽवश्यमेव वर्धनीय इति ।

जून-मासे सा महाम्बापुरीं प्राप्ता। ततः सर्वप्रथमं पितृदर्शनाय देहरादून गता ततश्चानन्दभवनमुपेता। तस्याः स्वास्थ्यचिन्तया श्रीजवाहरलालमहाभागा मसूर्यां विरामाय तां प्रैरयन् सा च ग्रीष्मकालं तत्रैव सानन्दं व्यत्यगमयत् ।

□ वैवाहिकं मङ्गलम्

अम्भोधिं सरिता तरुं सुलतिका चन्द्रं चिरं चन्द्रिका,
पर्जन्यं जलवालिका च भुवने संश्रित्य राराजते।
फीरोजं श्रयितुं वरं वृतवती स्वान्ते तथैवेन्दिरा—,
ऽराजत् तज्जनका व्यधुश्च्च मुदिता वैवाहिकं मङ्गलम् ।।१५।।

मसूर्यां विरामं कुर्वतीन्दिरा स्वास्थ्यलाभेन सहैव देहरादूनस्य कारागारे वर्तमानान् स्वपितॄन् द्रष्टुं तथा तेषां नैकट्येनात्मनो विचारानवगमयितुं भावि कर्तव्यञ्च बोधयितुं प्रावर्तत। प्रसङ्गादेकदा सा श्रीफीरोजगान्धिनमात्मनो जीवन-सङ्गिनं विधातुं तेन सह विवाहं वाञ्छतीति प्राकटयत् । कुलनाम्नोपनाम्ना वा गान्धीति पदेन भूषितः श्रीफीरोजः पारसीकः प्रबुद्धो राष्ट्रसेवी स्नेहशीलस्तथा कर्तव्यनिष्ठोऽभूत् । इन्दिरा-फीरोजयोर्वैचारिकव्यावहारिक-साम्यादेव परस्परं तयोर्मैत्री प्रारम्भादेव प्राचलत्। इन्दिरायाः शान्तिनिकेतनेऽध्येतुं गमनात् प्रागेव श्रीमता फीरोजेन परिणयस्य प्रस्तावस्तदग्रे कृत आसीत् किन्च तद्विषये तेन श्रीमत्या कमलयाऽपि वार्ता प्रवर्तिताऽभूत् परमिन्दिरया तदा स न स्वीकृतः। इन्दिरा स्वपितृभ्यां प्रसङ्गेऽस्मिन् किमपि न न्यवेदीदिति कारणात् फीरोजः कि-ञ्चिच्चिन्तितोऽप्यासीत् । यदेन्दिरा विदेशात् प्रत्यावर्तमाना पेरिसत आगच्छति स्म तदा श्रीफीरोजः पेरिसे तां मिलितुमायातः। तत्रैव 'मौं मार्त्रे'स्य सोपानेषु श्रीमतः फीरोजस्य वैवाहिकं प्रस्तावमिन्दिरा स्व्यकार्षीत् किन्तु सा तद्विषये कस्मा अपि किमपि नाकथत् ।

श्रीजवाहरलालमहाभागा एतद्विषये सर्वं ज्ञात्वा मनाक् चिन्तयाना आसन् । चिन्तायाः कारणं फीरोजस्य जातेर्धर्मस्य राष्ट्रियताया वा नाभूद् यतो हि नेहरू-परिवारः प्रारम्भादेव स्वतन्त्रविचारशीलोऽवर्तत । परिवारस्य भगिन्यौ सरूप-कृष्णे काश्मीरकातिरिक्ताभ्यां विप्र-जैनाभ्यां विवाहिते आस्ताम् । पितृव्यसुते यवनाभ्यां तथैका च हंगेरियनेन परिणीता अभूवन् । किन्तु श्रीजवाहरलालानां विरोधस्य कारणानि कानिचिदन्यान्येवावर्तन्त। तत्र प्रामुख्येन प्रथमं फीरोजस्य पारिवारिक-पृष्ठभूमेस्तथाऽपरं भारताद् बहिर्निवसन्त्या इन्दिराया भारतस्या-न्यैर्युवकैः सह सम्पर्काभाव आस्ताम् । अत एव तेऽवाञ्छन् यत् सा स्वीयं निर्णयं

सम्प्रति स्थगयित्वाऽन्यान् युवकान् बोद्धुं प्रयतेत। परमिन्दिरा स्वीयं निर्णयमेव निश्चलं प्राकाशयत्। अन्ततः श्रीमत्या विजयलक्ष्म्याः श्रीमत्याः कृष्णायाश्च परामर्शेण श्रीनेहरूभिरपि स्वीकृतिः प्रदत्ता।

४ दिसम्बर १९४१ ई० दिने श्रीजवाहरलालाः कारातो विमुक्ताः। तेषां विमुक्तेः समकालमेवेन्दिरायाः फीरोजस्य च परिणयवार्त्ता बलवत्यभूत्। तयोरन्तर्जातीयं विवाहमभिलक्ष्य विरुन्धद्भिः परम्परावादिभिर्हिन्दूभिः पारसीकैश्च बहुशोऽहितसूचकानि पत्राणि प्रहितानि। श्रीजवाहरलालनेहरूभिः स्वस्याः स्थितेः स्पष्टतार्थमेकं सार्वजनिकं वक्तव्यं दत्तं यस्मिन् 'स्वीया विवाहसम्बद्धा विचाराः स्पष्टीकृताः किञ्च स्वपुत्र्या इन्दिरायाः श्रीफीरोजस्य च मिथो विहितस्य निर्णयस्यौचित्यं मत्वा स्व-स्वीकृतेराशीर्वादप्रदानस्य मन्तव्यमपि स्फुटं निगदितम्।'

महात्मनां श्रीगान्धिनां परामर्शेण प्रकृष्टोत्सवपूर्वकं परिणयस्य दिवसः २६ मार्च १९४२ ई० निश्चितः। आनन्दभवनं तद्दिने प्रसन्नताभिः पूरितमभूत्। तदतितरां सज्जितम्। श्रीजवाहरलालमहाभागाः स्वयं निरीक्षण-परीक्षणयोर्व्यस्ता आसन्। अतिविशालं पटमण्डपं वितानितम्। समग्रदेशतः प्राघुणिकाः समवेताः। के चन विदेशिनोऽपि सम्मिलिताः। इन्दिरा केशरवर्णवतीं खादीशाटिकां—या तत्पितृभिः कारावासकाले कर्तितेन सूत्रेण निर्मिताऽऽसीत् तां धृत्वा विवाहमण्डपमुपागता। शाटिकायां सङ्ग्रथितानि लघुलघूनि राजतपुष्पाणि परमरमणीयान्यवर्तन्त। स्वर्ण-रजतादीनामाभरणस्थाने सा पुष्पैरेवालङ्कृताऽऽसीत्। शान्ता गभीरा च सा मुखमण्डलेनातीव दीप्तिमती स्वर्णिमाभया मण्डिताऽत्यन्तं मनोज्ञाऽवालोक्यत। श्रीफीरोजगान्धी श्वेतां खादीटोपिकां शेरवानीसंज्ञकं खादीनिर्मितं कञ्चुकं तथा सङ्कुचतपादयामं धृत्वा विवाहवेद्यामुपविष्टः। वैदिकेन विधिनोद्वाहविधाने श्रीजवाहरलालनेहरूभिः कन्यादानेन सहेन्दिरायाः करकमलं श्रीफीरोजस्य हस्ते समर्पितम्। परस्परं हस्तं धृत्वा मन्त्रोच्चारणपूर्वकं प्रतिज्ञानामुच्चारणं कुर्वन्तौ सप्तपदीं विधायाग्नेः परिक्रमणविधिं समपादयताम्।

तदानीं सर्वत्रानन्दमये वातावरणे प्रसृतेऽपि श्रीमत्याः कमलामहाभागाया अभावं सर्वेऽप्यन्वभवन् यतो हि सा सौमङ्गल्यदिनमिदं वीक्षितुं जीविता नासीत्।

परिणयानन्तरं किशोरयुगलमामोदाय काश्मीरानगमत्। कियन्ति चिद् दिनानि तत्रैव यापितानि। श्रीमती-इन्दिरागान्धी पितृणामेकलत्वं विचार्य पत्या सह यथाशीघ्रं ततः प्रत्यायाता। इलाहाबादे तौ नवीनस्य गार्हस्थ्यस्य मङ्गलारम्भाय **'टैगौरटाउन'** स्थाने भवनमेकं नीत्वा सुखेनावसताम्।

१९४२ ई० वर्षे ब्रिटेनस्य युद्धकालिकेन मन्त्रिमण्डलेन भारतीयकाङ्ग्रेसस्य मनो जेतुं तथा देशवासिनां दृष्टिं मित्रराष्ट्राणां पक्षे विधातुं ब्रिटिशलोकसभायाः

कर्मकर-सदस्यः **'श्रीस्टैफर्ड क्रिप्स'** महोदयो भारते प्रेषितः। स हि भारतस्य समक्षं युद्धसमाप्त्यनन्तरं प्रवर्तनीयान् कांश्चित् प्रस्तावानस्थापयत्, परं तेषु कीदृशस्याप्यधिकार-प्रदानस्य वार्तैव नासीत् किञ्च तादृशप्रस्तावस्वीकृतौ सत्यां कालान्तरेण भारतस्य विभजनमपि सम्भावितमभूत् । अतः काङ्ग्रेसदलं तान् नाङ्ग्यकार्षीत्।

महात्मभिः श्रीगान्धिभिर्देशवासिनां स्थितिं विज्ञाय समुचितं कालं च विचार्य 'सत्याग्रह-घोषणा' विहिता। **'हरिजन'** नाम्नि स्वीये वृत्तपत्र आङ्लशासकानुद्दिश्य तेऽलिखन् —

"भवन्तोऽत्र चिरमुषिता अस्माकञ्च किमपि हितं न विहितम्। साम्प्रतं विष्टरादीन् बद्ध्वा प्रतिष्ठत। वयं भवद्भिः कमपि सम्बन्धं नाभिलषामः। अस्मान् भगवत आश्रये विमुच्य भवन्तोऽवश्यमेव व्रजत। इति।"

७ अगस्त १९४१ ई० दिने मुम्बापुर्यामखिलभारतीय-काङ्ग्रेसमहासमितेरधिवेशने श्रीगान्धिनां **'भारत-मुक्ति'**-सम्बद्धस्य विचारस्य समर्थनं काङ्ग्रेसेनापि स्वीकृतम्। श्रीजवाहरलाला अपि परिस्थितिं विमृश्य महात्मगान्धिनां नेतृत्वं स्व्यकुर्वन्। तस्मिन्नधिवेशने श्रीजवाहरलालाः श्रीफीरोजः श्रीमतीन्दिरा तथान्ये नेहरूपरिवारसदस्या अपि समवेताः। तत्रैव काङ्ग्रेस-महासमितौ **'भारतं मुञ्चत'** इत्याख्य आन्दोलन-प्रस्तावः सर्वसम्मत्या स्वीकृतस्तथा भारतीयजनतायै सङ्घर्षारम्भायादेशो विहितः।

अगस्तस्य नवमे दिने शासनेन श्रीगान्धिसहिताः प्रायः सर्वेऽपि महान्तो नेतारो बन्दीकृताः। तेन रुष्टा भारतीयाः स्वस्वबुद्ध्यनुसारमान्दोलनं प्रवर्तयितुं कृतनिर्णयाः क्वचिद्धूम्रयानपङ्क्तीरुदपाटयन्, क्वापि तडित्-संवेदनसाधनानि दूरभाषोपकरणानि विच्छेदितानि, यत्र तत्रारक्षिकार्यालयेषु प्रैषालयेषु चाधिकारानपि जना अकार्षुः।

श्रीमन्तो जवाहरमहाभागाः श्रीहठीसिंह-महानुभावाश्च मुम्बापुर्यामेव निगृहीताः। श्रीमतीन्दिरा रैलयानेनेलाहाबादं प्राप्ता। तत्रापि द्वितीय एव दिने रक्षाकर्मचारिण आनन्दभवनमागत्य श्रीमतीं विजयलक्ष्मीं निगृहीतवन्तः। श्रीफीरोजस्तु तदान्दोलनं गुप्तरूपेण चालयितुं भूमिगतोऽभूत्। स हि गुप्तरीत्यैव लखनऊनगरं गतवान्। ततः परं श्रीमतीन्दिराऽपि स्वां निग्राहयितुमभिलषन्ती कालं प्रत्यैक्षत। यतो हि —

> **राष्ट्रस्योन्मुक्तियज्ञेऽरणिमथनसमुद्भूतवह्नौ समन्तात्,**
> **मुक्तेर्मन्त्रान् पठन्तो निजनिजहविषामाहुतीर्दातुकामाः।**

यत्र स्यू राष्ट्रभक्ताः कथमथ च तदा तत्र तिष्ठेत् स मौनं,
सर्वस्वं यस्य राष्ट्रार्पितमिह समभूद् देशरक्षार्थमेव ॥१६॥

एकस्मिन् दिवसे 'ईविंग क्रिश्चियन-महाविद्यालयस्य' च्छात्राः स्वीये महाविद्यालये त्रिरङ्गध्वजमुत्तोलयितुमायोजयन् तत्र श्रीमतीन्दिराऽप्यामन्त्रिता। सा जानाति स्म यद् ध्वजोत्तोलनं शासनेन निरुद्धमस्ति तथा तस्मिन् भागं गृह्णञ्जनो निगृहीतुं शक्यते। एवं सत्यपि तत्र सम्मिलिता। ध्वजमुत्तोलयत्सु च्छात्रेषु रक्षाकर्मचारिणो दण्डप्रहारान् कर्तुं प्रवृत्ता आसन्। तत्र ध्वजधारक एकश्छात्र आरक्षिणां दण्डाघातेन रक्तलिप्ताङ्गो यदा पतन्नासीत् तदैव श्रीमतीन्दिरा ध्वजं स्वहस्तेऽगृह्णात्। आरक्षिणस्तामपि प्रहर्तुं प्रावर्तन्त किन्तु तया त्रिरङ्गध्वजः स्वयमुतोलित एव।

अनया घटनया सा मनागपि व्याकुलतां नाप्नोत्। सा सार्वजनिकसभां सम्बोधयितुमपि निरचिनोत्। स निर्णयोऽपि नासीद् विपदा विहीनः; यतो हि तादृश्यां सभायामपि प्रतिबन्ध आसीत्। तथापि सा महति जनसमुदाये भाषितुं गता। सशस्त्रा आरक्षिणः सभां न्यरुन्धन्। भाषणस्यारम्भ एवैको गौराङ्गक आरक्षी गुटिकाप्रहारभीतिं घोषयन् तां निरोद्धुमचेष्टत तदैव स्वीयान् प्राणान् हस्ते निधाय श्रीफीरोजः शरवज्जनसमुदायान्निःसृत्य तमारक्षिणमरौत्सीत्। आरक्षिणस्तमप्यताडयन्। ततः परं परःशतैर्जनैः सह ते श्रीमतीमिन्दिरां श्रीफीरोजञ्च निगृह्य नैनीस्थायां कारायां न्यवेशयन्। इत्थं विवाहानन्तरं प्रायः पञ्चमासाभ्यन्तरमेव किशोरयुगलमिदं राष्ट्रस्य परतन्त्रताविमुक्तये कारावासं समाश्रयत्।

इन्दिराया इयं प्रथमा कारायात्राऽवर्तत। यदा सा कारायां प्रविष्टा, तदा सामान्येन ज्वरेण पीडिताऽऽसीत्। कारायाश्चिकित्सकस्तां परीक्ष्यौषधाङ्कनमकरोत् परं काराराक्षिणस्तस्या उपचाराय किमपि नैच्छन्। इयमेव नहि; ते तु श्रीमत्या इन्दिराया आनन्दभवनात् प्रेषितान्याम्रफलानि तथाऽन्यानि खाद्यवस्तून्यपि बहिरेव खादन्ति स्म ताञ्च व्यथयितुमन्तरागत्यकथयन्ति स्म यदानन्दभवनादागतानि फलानि स्वादून्यासन्निति। कारायामिन्दिरायै प्रथमश्रेणीकं स्थानमपि नादीयत। साऽन्यैर्द्वाविंशत्या बन्दिभिः सहावसत्। केनापि सह सम्मिलनस्य सौविध्यमपि नासीत्, पत्रव्यवहारेऽप्यङ्कुशोऽभूत्। तादृश्यां परिस्थितावपि साहसेन सा त्रयोदश मासान् व्यत्यापयत्। १३ मई १९४३ ई० दिने द्वावपि तौ मोचितौ।

कारागारस्यानुभवान् वर्णयन्ती श्रीमतीन्दिरा कालान्तरेणाकथयद् यत् "तदानीं वैदेशिका आरक्षिणो भारतीयान् घृणयाऽपश्यन्। कारागारस्य प्रकोष्ठेषु सर्वत्र दुर्गन्धस्य साम्राज्यमभवत्। अनेकानि कष्टानि दीयन्ते स्म। सौविध्यस्य नामापि नावर्तत। बाह्यजीवनात् तु वयं पृथक् कृता आस्म सहैव प्रकृतेर्नैसर्गिकात् सौन्दर्यात् सर्वविधायाः कोमलतायाः कमनीयताया अपि वञ्चिता अभूम।

कारागारस्य मलिना भित्तयोऽस्माकं पुरोऽवर्तन्त। मलिनानि वस्त्राणि, नीरसं भोजनं, पशु-समो व्यवहारः, शीतातपवर्षाणां प्रकोपा एवास्माकं जीवनस्य पाथेयान्यासन्। कारायाः स्थितेर्बहिराकर्णने तथाऽन्तः स्थित्वा व्यत्यापितानां दिनानामनुभूतौ प्रभूतमन्तरं भवति। तत्र स्थित्याऽऽत्मा कियान् शून्यो भवति तत्सर्वं दीर्घकालं यावत् स्थितिं विना कल्पितुमपि न शक्यते। यथा हि— **आस्कर बाइल्डेनो**क्तम्—'प्रत्येकं दिनमेकैकं वर्षमिव व्यत्येति, दीर्घदीर्घाणां दिवसानां वर्षम्।' कारायाः प्रत्येकं दिनं वैकल्यपूर्णं भवति; **'पैथिक लारेंसः'** सत्यमेवावोचत् 'एकस्य बन्दिनो जीवनस्य सत्यमिदमस्ति यत् स हीनां स्थितिं स्वीकरोतीति।'

एवं सत्यपीन्दिरा तत्र प्रसन्नावसत्। पठने च सम्पृक्ता, बाह्यजीवनं प्रत्यनासक्ता कष्टानामपमानानां सहने सुदृढा तथा तत्रत्ये वातावरणे स्वामनुसारयितुं प्रसक्ताऽतिष्ठत्। यतो हि —

ये नाम लक्ष्यं प्रति वर्धमानाः, स्वयं प्रवाहाभिमुखं व्रजन्ति।
ते वै पुरो रोधयतस्तरङ्गान्, विच्छिद्य शौर्येण नदाँस्तरन्ति॥१७॥

□ शुभोदर्क-परम्परा अन्या घटनाश्च

मातृत्वं परिपूर्णताऽस्ति भुवने सीमन्तिनीजीवन-
स्यैकाऽतिप्रथिता ह्यभिनवः प्राणी यतो जायते।
तल्लावण्यनिरीक्षणं च नितरां तद्भाविनः कल्पनं,
कस्मिँश्चिद् विरलेऽवगाहयति तां सौख्याम्बुधौ सन्ततम्॥१८॥

दाम्पत्यस्य विमला परिणतिः पुत्रस्य जन्मना परिपूर्णतां प्राप्नोति। नारीजीवनस्य यथार्थता पुत्रप्राप्त्यैवानुमीयते। भारतीयमहर्षीणां निर्देशानुसारं पुत्रशब्दस्य व्युत्पत्तौ 'पुंनाम्नो नरकात् त्रायत' इति भावनाऽपि संसारे बलीयसी विद्यत एव। श्रीरवीन्द्रनाथस्तु नवीनयैव पद्धत्या पुत्रोत्पत्तिं व्याख्यातवान्। तेन लिखितमस्ति यत्—'प्रत्येकं शिशुरिमं सन्देशं नीत्वाऽऽगच्छति यन् मनुष्यो वर्तमानोऽस्ति तथेश्वरस्य विश्वासो नापगत इति।'

श्रीमतीन्दिराऽपि भारतीया वनिताऽवर्तत। तस्या मनोऽपि मानवीययाऽऽकाङ्क्षयाऽऽकुलितमभूत्। संसारे वर्तमानाऽपि सा गार्हस्थ्यस्य परमां परिणतिं प्रेक्षितुमैच्छत्। जनवरीमासादेव सा दोहदलक्षणैरलङ्कृताऽवालोक्यत। मार्चमासे सा गर्भावस्थायाः कालं गमयितुं तथा प्रसूतिहेतवे मुम्बापुर्यामगमत्। तत्र श्रीमत्याः कृष्णाया भवन एवास्थात्। श्रीफीरोजगान्धी भूयोऽपि कारागारमगच्छत्। मुम्बापुर्यां गमनस्य तु तस्या एकमन्यदपि कारणमासीत् तच्चेदं यत् तदीयामस्वस्थतामनुभूयेलाहाबादस्य चिकित्सका एवममन्यन्त यत् सा मातृत्वस्य

भारं वोढुमसमर्थाऽस्ति। स तस्याः स्वास्थ्याय घातको भविष्यतीति। दुर्भाग्याच्चिकित्सकेनैकेन सर्वास्ता वार्ता लिखित्वाऽपि प्रदत्ता आसन्।

मुम्बापुर्यां प्रसिद्धस्य स्त्रीरोगविशेषज्ञस्य निरीक्षणेन सा चिन्तामुक्ता भूत्वा 'माथेरान'-नाम्न्यां पर्वतिकायां कतिपयान् मासान् सुखेन व्यत्यगमयत्। प्रसूतिसमयस्य नैकट्यं विज्ञाय सा पुनर्मुम्बापुर्यामागता। कारातो विमुच्य श्रीफीरोजगान्ध्यपि तत्रैवायातः। २० अगस्त १९४४ ई० दिने डा० शिरोडकरस्योपचर्यागृहे श्रीमतीन्दिरा पुत्ररत्नं प्रासविष्ट। सर्वेऽप्यपारमानन्दमन्वभवन्। श्रीजवाहरलालेभ्योऽपि कारायां तडित्सन्देशः प्रेषितः। बन्दिनां कृते स्थापितेन प्रतिबन्धेन त्वरितसन्देशः प्रैषपत्रं च सममेवामिलताम्। तेन शुभसमाचारेण तेऽपि मुदिता अभवन् परं गाम्भीर्येण ते श्रीमतीं कृष्णामुद्दिश्यालिखन् —

"समाचारं प्राप्याहं मुदितोऽभवम्। तव सदृश उत्साहोऽवश्यमेव नाभूद्, यतो हि भावनासु प्रवहणं मम स्वभावे न्यूनमेव विद्यते। परिवारे कस्यापि नवीनस्य सदस्यस्य जन्म सदैव प्राचीनाः स्मृतीरुद्बोधयति। तथा स्वबाल्यस्याथ च परेषां जन्मग्रहणस्य वार्ताः स्मृतावायान्ति।···किञ्च यदा यदाऽपि कस्यापि जन्म भवति सा स्वयं स्वस्मिन् सर्वथा नवीना वार्ता भवति, अन्येषामिव तथा पुनरप्यात्मन इवैवापूर्वा। प्रकृतिः स्वात्मानं समानरूपेणावर्तयति, तस्या अनन्तस्य वैविध्यस्य किमप्यन्तमेव नास्ति। तथा प्रत्येकं वसन्त एकः कायाकल्पो विद्यते, प्रत्येकं नवं जन्मैको नवीन आरम्भः। मुख्यत्वेन यदा तज्जन्मास्माभिर्घनिष्ठरूपेण संयुक्तं भवेत् तदस्मभ्यं पुनर्जीवनं सम्पद्यते किञ्चास्माकं सर्वासां पुरातनाशानां केन्द्रं सम्पद्यत" इति।

जातकस्याभिधानविषये पितृभिः सह पत्र-व्यवहारः प्राचलत्। श्रीमतीन्दिरा केषाञ्चिन्नाम्नां सूचीं प्रैषयत् श्रीजवाहरलालमहाभागा अपि कानिचिन्नामानि समसूचयन्। एकेन मित्रेणापि काचित् सूची प्रेषिता। इत्थं सूचितेषु नामसु **'राजीव'** इति नाम सर्वेभ्योऽरोचत यतस्तस्मिन् श्रीमत्याः कमलाया नामसाम्यमासीत्। इत्थमेव श्रीजवाहरलालमहाभागानां नाम्नोऽपि साम्यमिच्छद्भिः सर्वे राजीवशब्देन सह 'रत्न' पदस्यापि संयोजनं कृत्वा जातकस्य **'राजीव रत्न'** इति नामकरणं कृतम्। **'यथा नाम तथा गुणा'** इति किंवदन्त्यद्य श्रीमतो **'राजीवगान्धिनः'** स्वदेशस्य प्रधानमन्त्रित्वेन सार्थतां गच्छतीति महतः प्रमोदस्य विषयः।

मासद्वयं स्वास्थ्यलाभं सम्प्राप्य श्रीमतीन्दिरा लखनऊं प्राप्ता। १९४५ ई० वर्षे श्रीजवाहरलालमहानुभावाः कारातो विमोचिताः। तदानीं **'ब्रिटिशमन्त्रिमण्डलदलं'** भारत एवासीत्। श्रीजिन्ना एकस्य सार्वभौमिकस्य पाकिस्तानस्य निर्मितये दुराग्रहग्रहिलोऽभूत काङ्ग्रेसदलञ्चोपमहाद्वीपस्यैक्यसंरक्षणाय तन्निष्ठमवर्तत। तेषु

दिनेषु श्रीमतीन्दिरा कस्मिन्नप्यन्यस्मिन् कर्मणि व्यापृता न भूत्वा केवलं पत्न्या मातुश्च भूमिकामेव निरवहत्। दाम्पत्यस्य सुखावहानि तानि दिनानि वस्तुतस्तस्या जीवने स्वर्णिमान्यभवन्।

काठिन्यानि समागतान्यथ पुरो निर्यापितुं यत्नतः,
स्थित्वैवात्मगृहे निजोर्जितविधौ साफल्यमासाद्यते।
अक्लेशं स्फुरितां मनोमुदमपि प्रीत्याऽलमालम्भितुं,
दाम्पत्यं मधुमत् तदा वितनुते साहाय्यमुद्योतितम्॥१९॥

ब्रिटिश-मन्त्रिमण्डलस्य योजनायाः कार्यान्वयनं दीर्घकालिक-प्रस्तावानां कारणादसम्भवमिवाभवत्। काङ्ग्रेसदलञ्च मौनमुपवेशनं नोचितममन्यत। ब्रिटिशमन्त्रिमण्डलस्य पुनर्गमनात् पूर्वम्—'**एटली**'महानुभावेन कथितमासीद् यद् 'ब्रिटिशशासका इदं न सहिष्यन्ते यदल्पसङ्ख्यका बहुसङ्ख्याकानां प्रगतौ बाधका भवेयुः।" तेषां शासनमिदमपि न वाञ्छति स्म यद् बहुसङ्ख्यकाः स्वेच्छानुसारमल्पसङ्ख्यकेषु स्वाभीष्टमारोपयेरन्। अन्ततः इदं तैः सम्भावितं यद्—'अन्तरिमसर्वकार'स्य घटनेन परस्परमेते नैकट्यं प्राप्स्यन्तीत्याशया श्रीजवाहरलालस्याग्रे भारतस्य महाधिशास्त्रा'**ऽन्तरिमसर्वकार**'-निर्मितये प्रस्तावितम्। पूर्वं तु तैर्निषिद्धं किन्तु सर्वकारस्य स्थितेः शक्तेश्च स्पष्टतानन्तरं निमन्त्रणं स्वीकृतम्।

२ सितम्बर १९४६ ई० दिने श्रीजवाहरलालनेहरूणां नेतृत्वेऽन्तरिमसर्वकारस्य निर्माणमभूत्। श्रीनेहरूमहाभागा उपाध्यक्षास्तथा परराष्ट्र-राष्ट्रमण्डलीय-सम्बद्धस्य विभागस्य सचिवा अभूवन्। '**मौलाना आजाद—सरदार-पटेल—डा० राजेन्द्रप्रसाद**—प्रभृतयोऽपि विभिन्नेषु पदेष्ववर्तन्त। मुस्लिमलीगसदस्यास्तस्मिंस्तु सम्मिलिताः परं संविधान-सभायां न सम्मिलिताः। लीगस्य मन्त्रिणः कोङ्ग्रेसविरोधिनीं नीतिमनुसरन्तः "शक्त्या पाकिस्तानं प्राप्स्याम"इति घोषयन्तो व्यचरन्। तेषां निर्देशानुसारमेव देशे साम्प्रदायिका उपद्रवा उत्पाता अभवन्। बङ्गप्रदेशे विशिष्याक्रमणानि हत्याश्चाक्रियन्त। श्रीगान्धिनां नौआखाली-यात्रा तथा श्रीनेहरूणां बिहारयात्राऽन्येषां नेतॄणाञ्चोपद्रवस्थानानां यात्राः समपद्यन्त। यथायथं मुस्लिमा हिन्दवश्च निन्दिताः प्रतिबोधिताश्च।

दीर्घात् कालाज्जन-धन-हृतिं क्लेशतोऽप्यन्न सोढ्वा,
स्वातन्त्र्यं ये कथमपि पुनः प्राप्तुमेताः समीपम्।
तस्मिन् काले कलहकरणं किं न तन्मौर्ख्यमासीद्,
यद्-दुर्दैवाद् विभजनमभूद् भारतस्यापि हन्त! ॥२०॥

अन्तरिम-सर्वकारेण प्रारम्भिकेषु दिनेषु प्रत्यग्रधिया स्फूर्त्या च कार्यं विहितम्। समुन्नतजीवनस्य साम्प्रदायिकसामञ्जस्यस्यास्पृश्योद्धारस्य सर्वेभ्या

जनेभ्य उपनिवेशवादस्य तथा जातीयभदेभावविरहितस्य स्वातन्त्र्यस्य, सत्तावादि-समूहनिरपेक्षतायाः संयुक्तामेरिका-सोवियतसङ्घाभ्यां मित्रताया राष्ट्रमण्डलेन सह मैत्रीसम्बन्धस्य शिष्टेशियाखण्डेन सह च विश्वबन्धुत्वस्य लक्ष्याणि निर्धार्य तदानीं तैर्नेतृप्रवरैर्या नीतय उद्घोषितास्ताः परस्सहस्रवर्षावधि भारतस्य स्वतन्त्रताया अक्षुण्णतार्थमतीव सुखदायिन्योऽभूवन् ।

एतस्मिन् सकलेऽपि समय इन्दिरा तस्याः शिशू राजीवः श्रीफीरोजश्चानन्दभवन एवावसन्। इन्दिरा तु स्वसुतस्य लालने पालने च संसक्ताऽऽसीत् श्रीफीरोजमहाभागश्च सचित्रासु पत्रिकासु लेखान् विलिख्य यूरोप-प्रवासे गृहीतानां सुन्दराणां चित्राणां सदुपयोगमकार्षीत्। किञ्चिद् बीमा-सम्बन्धि कार्यमपि सोऽकरोत्। तस्यैव श्रीमतो निरीक्षण आनन्दभवनस्योद्यानमतीव सुन्दरं पुष्पैः सुरभितमभूद् यत् सर्वान् प्रासादयत्। १९४६ ई० वर्षस्य नवम्बरमासे श्रीफीरोजः **'नेशनल हेराल्ड'** पत्रस्य प्रबन्धसम्पादको भूत्वा लखनऊनगरं प्रातिष्ठत्। तत्र स एकं गृहं नीत्वाऽतीव सौहार्दन तत् सज्जयित्वा परिष्कृत्य च स्वपरिवारेण सह वस्तुमारभत। गृहोपकरणानि स्वरुच्यनुरूपाणि निरमापयत् तथा स्वकीयमुद्यानानुरागमपि तत्र सफलमकरोत्। निरन्तरं श्रमेण निष्ठया स तत्पत्रं शीघ्रमेवात्मनिर्भरं व्यदधात्। अहरोत्रं कर्मनिष्ठो मुद्रण-यात्रानुरागी कर्मकराणां स्नेहभाजनं तथा सम्पादकस्य शब्देषु 'सामान्यानां विशेषतानां मानवः' श्रीफीरोज आसीत्।

श्रीमतीन्दिरा गार्हस्थ्यस्य कार्येभ्योऽतिरिक्तं काङ्ग्रेसस्य गतिविधिषु तथा समाजकल्याणकर्मसु व्यवसिताऽभवत्। श्रीफीरोज इन्दिरा च द्वावपि प्रगतिशील-समाजवादिविचारशालिनावभूतां तस्मादनेके तरुणा राजनीतिकाः कार्यकर्तारो नेतारश्च प्रायस्तयोर्गृहमागच्छन्ति स्म, परं द्वयोः स्वभावयोरन्तरमासीत्—इन्दिरा सङ्कोचशालिनी मितभाषिणी चावर्तत श्रीमान् फीरोजश्च बहिर्मुखो निःसङ्कोचश्चासीत्। उभावपि दम्पती परस्परं स्नेहशीलौ समानविचारवन्तौ तथा मिथः साहाय्याय समुत्सुकावास्ताम्।

परस्परं प्रेम विचार-साम्यं, तथा च शील-व्यसने समाने।
मनः प्रसादश्च भवन्ति यत्र, वसन्ति दाम्पत्य-सुखानि तत्र ॥२१॥

अस्थायिसर्वकारस्य प्रधानमन्त्रित्वस्य कारणात् पं० श्रीनेहरूमहाभागानां नवदहल्यां निवास आवश्यक आसीत्। तत्र वसतां तेषां सौविध्याय श्रीमती विजयलक्ष्मीः श्रीमती कृष्णा श्रीमतीन्दिरा च भूयोभूय आयान्ति स्म, समागतानामतिथीनां स्वागत-सत्काराणां व्यवस्था ताभिरेव व्यवसीयते स्म । श्रीमतीन्दिरा यथासम्भवं पितृपादानां सहायतार्थमायाति स्मैव किञ्च यदा सा गर्भवत्यभूत् तदा तस्या द्वितीयप्रसूतये नवदेहल्यामेव निवासो निश्चितः कारणं च तत्र चिकित्सा-सौविध्योपलब्धिरासीत्।

यथा यथा प्रसूतिसमयो निकटमागच्छति स्म, श्रीमतीन्दिरा कस्या अपि संरक्षिकायाः सामीप्याभावाच्चिन्तिताऽवर्तत, परं तदैव श्रीमती कृष्णा तत्र समायाता। सा हि स्वभर्त्रा सह भाषणयात्रार्थममेरिकायां गमनात् पूर्वमिन्दिरया स्वभ्रात्रा च मिलितुं तत्रागच्छत् । तत्रैव तस्याः पुत्रौ सिन्धिया-विद्यालयतः श्रीफीरोजमहानुभावश्च लखनऊतः समागताः। १३ दिसम्बर १९४६ ई० दिवसस्य रात्रौ सर्वेपि श्रीमतां जवाहरलालानां वार्तालापेन प्रासङ्गिक-घटनानां श्रवणेन विनोदवचोभिश्च भृशमानन्दिता अभूवन्। तस्यामेव रात्रौ श्रीमतीन्दिरा पीडामन्वभूत्, चिकित्सालयञ्च प्रापिता। तत्र सा **द्वितीयं पुत्रमजीजनत्**। प्रसववेदना दुःसहाऽऽसीत्। रक्तमपि बहु प्रस्रुतम्। साऽतीव दुर्बला क्षीणरक्ता श्वेतशरीरा चादृश्यत। दूरभाषेण स्वस्य दौहित्रस्य जन्म श्रुत्वा तं प्रेक्षितुं श्रीजवाहरलाला अपि शीघ्रमेव रुग्णालयं समागताः। दौहित्रं दुहितरं च विलोक्य सुखमन्वभवन्। श्रीमतीन्दिरा द्वितीयपुत्रस्याभिधानं **'सञ्जय'** इति निरधारयत्।

प्रसूति-समये भ्रातृस्वसुः श्रीमत्याः कृष्णाया उपस्थितिं साहाय्यं सान्त्वनं च सम्प्राप्य श्रीमतीन्दिराऽधमर्णतां व्यञ्जयितुं श्रीमत्यै कृष्णायै पत्रं प्राहिणोत् तस्मिंश्च कृतज्ञतां प्राकटयत्। यतः —

येनापि केनापि हितं कृतं भवेद्, हृदस्तदीयोपकृतिं न विस्मरेत्।
हार्दं ततस्तस्य चिरं विवर्द्धते, 'कृतज्ञता-ज्ञापन'मस्ति सद्गुणः ।।२२।।

साम्प्रदायिक-विद्वेषादरेण नौआखाल्यां हिन्दूनां, बिहारे च यवनानां नृशंसहत्याकाण्डेन कुण्ठिताः श्रीगान्धिमहाभागास्तथाऽन्ये भारतीयनेतारो नितरां खिन्नखिन्नाः सत्वरं जनतां सान्त्वयितुं कर्तव्ये कर्मणि योजयितुं तथा शान्तिमवलम्बयितुं न्यवेदयन्। हिन्दू-मुस्लिमयोरेकतां वर्द्धयितुं स्थिरयितुं च श्रीमहात्मानो नोआखालीयात्रामप्यकार्षुः। प्रेम्णो मैत्र्याश्च सन्देशं दातुं ग्रामेषु भ्रमन्तो नेतारोऽपि तथैव यात्रा अकार्षुः। १९४७ ई० वर्षस्यारम्भे **लार्ड वेवलस्य** स्थाने **लार्ड माउण्टबेटनः** समायातः। श्रीएटलीमहाभागस्य सर्वकारेण जून १९४८ ई० यावद् भारतात् प्रतिगमनस्य निर्णय-घोषणा विहिता। ३ जून १९४७ ई० दिने श्रीमाउण्टबेटनेन भारत-विभाजनस्य योजना प्रस्ताविता। मुस्लीमलीगस्तु सत्वरमेव योजनां तां स्व्यकरोत् परं काङ्ग्रेसेन तथा श्रीजवाहरलाल-प्रभृतिभिर्नेतृभिर्बहु विचारितं परामृष्टञ्च। अन्ततोऽराजकता-वारणाय तथा शान्त्यै स्वाधीनतायै च विवशीभूय विभाजनं स्वीकृतम्। १८ जुलाई दिने लोकसभया ब्रिटिशशासनस्य समाप्तेर्विधेयकः पारितो यश्च १५ अगस्त १९४७ ई० दिने प्रभावशीलोऽभूत्।

स्वातन्त्र्यलक्ष्म्या अभिनन्दनाय १४ अगस्त १९४७ ई० दिवसस्य निशीथे भारतीय-स्वतन्त्रतायाः प्राप्तेरुत्सव आयोजितः। ब्रिटिशशासनस्य पताकाऽवतारिता

स्वतन्त्रराष्ट्रपताका चोत्तोलिता। त्रिरङ्गराजिता भारत-राष्ट्र-पताका द्यां भारतीयानां शौर्यगाथां लिखन्तीवानन्तबलिदानैरपारकष्टैः परिपूर्णस्य स्वातन्त्र्य-सङ्घर्षस्य समाप्तेः शुभसन्देशान् वितरन्तीवात्मनः पटाञ्चलेन नृत्यन्तीव व्यराजत्। सर्वे हर्षेण परिपूर्णा अभवन् प्रीत्याऽवाञ्छँश्च—

त्रिरङ्ग-राजि-राजितं स्वदेश-भक्ति-पुञ्जितं,
मनस्सरस्सु कञ्जितं जयध्वनि-प्रगुञ्जितम्।
अशोक-चक्र-चिह्नितं स्वतन्त्र-मन्त्र-शिञ्जितं,
विभातु राष्ट्रियं ध्वजं समस्त-लोक-रञ्जितम् ॥२३॥

श्रीमतीन्दिरा राजनीतिक-सङ्घर्षाणां कारणात् स्वीयं बाल्यकालं सामान्यायामेकाकितायां व्यत्यापयत्, तस्मादेव सा स्वीययोः पुत्रयोर्लालने पालने च सम्पूर्णं समयं गमयितुं चेष्टते स्म। साऽमन्यत यत्—

क्षुपस्य कस्यापि सुपोषणाय वै, जलातपौ स्तः सुतरामपेक्षितौ।
तथा शिशूनामपि साधु पुष्टये, ह्यपेक्षते मात्रनुराग उज्ज्वलः ॥२४॥

मात्रा स्वकीय-पुत्राणां लालने पालने तथा।
प्राथम्यं सर्वदा ध्येयं, बाल्यकाले विशेषतः ॥२५॥

श्रीमत्या इन्दिराया अपि जीवनं सार्वजनिकजीवनकारणाद् व्यस्तं त्वासीदव परं सा सार्वजनिकजीवनस्य परिवारस्य बालकयोश्च दायित्वेषु साम्यं संस्थाप्य कथञ्चिदात्मनः कर्तव्यानि पूरयति स्म। यदा राजीव-सञ्जयौ विद्यालये गन्तुं प्रवृत्तौ तदा सा तयोरनुपस्थितावेव यथासम्भवं सार्वजनिकं कर्म सम्पादयितुमचेष्टत। सा कियत्यामपि व्यस्ततायां सत्यां सुताभ्यां सह क्रीडनस्याथवा ताभ्यां साकं तयोः पुस्तकपठनस्यावकाशं निरसारयदेव। यतः सा जानाति स्म यत् —

भवत्यसाधारणरूपतः स्थितं, बालेषु तत्त्वग्रहणस्य कौशलम्।
तदन्यथा व्याहरणात् कुतोप्यपाकर्तुं न शक्येत मृषा प्रसङ्गतः ॥२६॥

शनैः शनैस्तौ वृद्धिङ्गतौ। आवासीय-विद्यालये तौ प्रवेशितौ। तदानीमेव सा देशस्य परिभ्रमणमारभत। यदा तौ विद्यालयावासे निवसतस्तदा साधिकाधिकं परिभ्रमणमकार्षीद् यतोऽवकाशवासरेषु ताभ्यां सह पूर्णरूपेण वस्तुं पार्येत। सा वाञ्छति स्म यत्— तौ मस्तिष्केण शरीरेण च स्वस्थौ सन्तुलितौ भूत्वा परिस्थितेरनुरूपमात्मानं वर्तयितुं सन्नद्धौ भवेताम्। पुस्तकीयज्ञानेन सहैव जीवने वास्तविकं प्रेमानुशासनं च तयोर्विकसेतां समुन्नतं चरित्रं व्यक्तित्वस्य निर्माणं च तयोर्भवेदिति।

१९४७ ई० वर्षस्य सितम्बरमासे देहल्यां भारतविभाजनस्य कारणादु-

पद्रवा अभवन्। तदानीं श्रीमतीन्दिरा मसूरीनगर्यामवर्तत। बालकावपि तत्रैवास्ताम्। दिल्लीतो दूरभाषेण तस्यै सन्दिष्टं यत् सा देहलीं सर्वथा नागच्छेत्, तदा सा व्यचारयद् यद् ग्रीष्मस्य कारणादेवं सन्दिष्टाऽस्मि। अन्ये केऽपि समाचारास्तत्र नागच्छन्ति स्म। सा सन्देहैरावृताऽभूत्। अन्ततः श्रीफीरोजेन सह वार्तालापः सञ्जातः स्थितिं विज्ञाय च सा भूयो भूयो निषिद्धाऽपि कर्तव्यपालन-व्याकुला सेवा-शुश्रूषाचिकीर्षया द्रुतमेव देहलीमागमत्।

देहल्यां श्रीमहात्मभिः श्रीमतीन्दिराऽपि सङ्घर्षग्रस्तानां स्थानानां विलोकनाय पीडितानां साहाय्याय चादिष्टा। तत्कालमेव सा तेषामादेशं पालयितुं निःसृतवती। काभिश्चिन्महिलाभिः सार्धं सा मुस्लिमानामावासपरिसरे तान् वीक्षितुं स्थितिं च विज्ञातुमगच्छत्। तदानीं तत्र महामार्याः प्रकोपोऽवर्तत तथापि तत्र निवसन्तो मुस्लिमजनास्ते ततोऽन्यत्र गन्तुं नैच्छन्। ते हिन्दूनां हस्तैर्मरणापेक्षया महामार्या मरणं श्रेष्ठममंसत। श्रीमती गान्धी तेषां दुःखगाथां निशम्य दुःखिताऽभूत्। तेभ्य आश्वासनं ददती सा चिकित्सा-भोजनादीनां सौविध्यं प्रापयितुं प्रयस्य सान्त्वनामददात्। मुस्लिमानां मनोभ्यो भयं निवारयितुं साम्प्रदायिकं सद्भावं च वर्धयितुं हिन्दू-यवनयोः परस्परं भ्रातृभावमानाययत्। उभयोर्वर्गयोः प्रायः पञ्चशतं जनाः साकं स्थित्वा भोजनमप्यकार्षुः।

मनसा कर्मणा वाचा देशसेवार्थमुद्यताः।
सम्मान्यन्ते समाजेन सभाजन-पुरस्सरम् ॥२७॥
सेवा अपूर्वाः प्रबलाश्च निष्ठास्त्यागानपूर्वान् विरलाः प्रवृत्तीः।
आलोक्य भक्त्या जनतार्पयन्ती पत्राणि पुष्पाणि मुदं व्यतानीत् ॥२८॥

श्रीजवाहरलालनेहरूमहाभागाः सर्वसम्मत्या स्वतन्त्रभारतस्य प्रथमे प्रधानमन्त्रिणो निर्वाचिताः। तेषां तपस्त्यागसंयमौदार्यगाम्भीर्य-शौर्यसाम्मनस्य-पाण्डित्यप्रागल्भ्यादिगुणान् प्रति समादरं व्यञ्जयन्ती भारतीया जनता भाविशासनं सुचारुरूपेण प्रवर्तयितुं स्वतन्त्रस्य भारतस्य विश्वस्मिन्नपि विश्वे गौरवमयीं प्रतिष्ठां वर्धयितुं च सम्मानिते प्रधानमन्त्रिपदे तानमण्डयत्। यदा ते तस्मिन् पदे कार्यं कुर्वाणा**स्त्रिमूर्ति**-भवने वस्तुमायातास्तदा श्रीमतीन्दिरा गान्धी-महाभागा मनस्यैवं व्यचारयद् यत्-'पितृपादानां कार्यव्यग्रताऽतीव विपुला वर्तते। प्रतिक्षणं देशस्यानेकाः समस्याः समाधातुं ते चिन्तितास्तिष्ठन्ति। तादृश्यां स्थितौ तादृशस्य कस्यचित् सहायकस्यावश्यकता तेभ्यो विद्यते, यः सहायकस्तत्रैव वसेद्, वास्तविकेन रूपेण तेषां साहाय्यमाचरेद् यश्च तानात्मनाऽभिलषेत् सम्मानं च तेभ्यः प्रयच्छेत्।' तदर्थमितस्ततः परिवारे दृष्टिनिक्षेपं विदधती साऽऽत्मनश्चित्रमेव तदनुकूलमपश्यत्। तदनन्तरं श्रीमतः फीरोजगान्धिनोऽनुमत्या यदा तदा तत्रोपेत्य साहाय्यं सम्पादयति स्म, किन्तु तथाविधेन प्रयासेन सन्तोषमननुभवन्ती साऽग्रे

स्वीयं वैयक्तिकं जीवनं गौणं विधाय राष्ट्रसेवायां तल्लीनानां श्रीजवाहरलाल-नेहरूणां शुश्रूषार्थं त्रिमूर्ति-भवन एव स्थातुं निरधारयत्। नासीत् तत्र पितृसेवैव कारणमपि तु भारतीयजनताया एकमात्रमाशाकिरणस्य प्रकाशविस्तृतये सौविध्य-सम्पादनमप्यासीत्। यतः—

ये राष्ट्राय समर्पिताः प्रतिपदं तद्रक्षणे तत्परा,
ये वै स्वात्मसुखानि दूरत इह त्यक्त्वा रता वर्धने।
ये च प्राप्य पदानि नैव समदा जाताः परं सर्वदा,
कर्तव्यप्रतिपालनाय निश्चितधियस्ते सेवनीयाः सदा ॥२६॥

साम्प्रदायिकानामुपद्रवाणां प्राबल्यमनुभूय महात्मगान्धिभिस्तच्छान्तयेऽन-शनमारब्धम्। तस्मिन्ननशनावधौ महात्मानः पाकिस्तानस्य तुष्टये च तैरपेक्षितं द्रव्यराशिं दातुमपि वाञ्छन्ति स्म। स्वजनानां क्रूरेण विनाशेन क्रुद्धा हिन्दवस्तां पाकिस्तानस्य तुष्टेर्नीतिं मत्वा तद्विरोधाय यतमाना आसन्। २० जनवरी १६४८ ई० दिने महात्मनां प्रार्थनासभायां घातको विस्फोटोऽप्यजायत। तेनान्ये प्रमुखा नेतारोऽत्यन्तं चिन्तिता अभूवन् परं श्रीगान्धिनोऽविचलिता निर्भीकाः परमात्मनि विश्वासभाज एवावर्तन्त। ३० जनवरी १६४८ ई० दिने सायं यदा ते प्रार्थना-सभायां गच्छन्ति स्म, तदैकेन हिन्दूयुवकेन गुटिकास्त्रद्वारा तिस्त्रो गुटिकास्तेषु प्रहृताः, 'राम ! राम ! राम !' इत्युच्चरन्तश्च ते तत्रैव प्राणानत्यजन् !!!

समग्रोऽपि देशस्तेषां निधनेन खिन्न-खिन्नोऽभूत्। तेषां बलिदानेन यज्ज्योति-र्व्याप्तं तेन भूयसां मानवानामन्तःस्थितं साम्प्रदायिकविषोत्थं तमो नष्टम्। श्रीनेहरूमहाभागा गङ्गायां तेषामस्थिविसर्जनानन्तरं विशालं जनसमुदायं सम्बोध-यन्तोऽकथयन्—

"तेषां जीवने तथा मरणेऽप्येकं तेजोऽस्ति — एकः प्रकाशो विद्यते, य आ-गच्छतो युगान् यावदस्माकं देशमालोकयन् स्थास्यति। तदा वयं तेभ्यः कस्माच्छोकं कुर्याम। शोकस्त्वस्माभिः स्वयं स्वेषु, स्वासु दुर्बलतासु, स्वासु हृदय-व्याप्तासु दुर्भावनासु, स्वेषु मतभेदेषु तथा पारस्परिकेषु विद्वेषेषु करणीयो विद्यते। स्मर्तव्यं यदेतेषां सर्वेषामनौचित्यानामपाकरणार्थमेव श्रीमहात्मभिः स्वीयाः प्राणाः उत्सृष्टाः।"...

ये देशस्य हिताय नैजमखिलं सर्वस्वमेवार्पयन्,
येषां प्रेरणया स्वदेशविषये जागर्तिरेता ध्रुवा।
दीनानां दलितात्मनां च सहजाः संरक्षका येऽभवन्,
दत्त्वा ते बलिदानमव्ययमितास्तेभ्यो महद्भ्यो नमः ॥३०॥

महात्मनां श्रीगान्धिनां स्वःप्रस्थानात् पूर्वं केवलं चतुःपञ्चघटिकाऽभ्यन्तर-मेव श्रीमतीन्दिरागान्धी-महाभागा स्वकीयेन पुत्रेण राजीवेन तथा कतिपयान्याभिः

सहयोगिनीभिः सह सुखेन वार्तालापानकार्षीत्। श्रीराजीवः श्रीगान्धिनां दुकूलेन क्रीडन् मन्दं मन्दं तेषां चरणयोर्निकटं प्राप्य पुष्पमालामेकां पदयोर्बद्धुं प्रावर्तत, तदैव तत्कर्णं गृहीत्वा तेऽकथयन्—"किमिदमाचरसि ? किं जीवितस्य जनस्य पदयोरपि कश्चन पुष्पाण्यर्पयति ?" कोऽजानात् तद्दिन एव ते दिवोऽतिथित्वेनामन्त्रिता आसन् !

महात्मनां सहसैवेदृशी हत्या न केवलं राष्ट्रिय आघात एवासीत् किन्तु श्रीमत्या इन्दिरागान्धी-महाभागाया अप्येकाऽतीवगभीरा वैयक्तिकी च पीडाऽवर्तत। ते नेहरूपरिवाराद्—भारतादियन्तोऽभिन्ना आसन् यत्तैर्विना सा भारतस्य कल्पनामपि शून्यशून्याममन्यत। त ईदृशा एके नेमिभूता अभूवन् येषां परितः स्वदेशस्य प्रत्येकं जनः सर्वाः संस्थाः सर्वेऽपि राजनीतिज्ञा दीना दलिताः शोषिताः पीडिता रङ्का राजानश्च भ्रमन्तोऽवालोक्यन्त। श्रीमतां जवाहरलालानां स्थितिरप्यतीव पीडाजनिका शून्या संरक्षकविहीनेव प्रत्यभात्।

बुद्ध्या जनास्तानवबोद्‌धुमन्न, यथा यथा सूक्ष्मतयाऽयतन्त।
धीराः प्रवीराः सरला विचित्रा, महाह्रदस्ते ह्यभवन् गभीराः॥ ३१॥
न जीविताः सम्प्रति ते जगत्यां, परं तदीया उपदेशवाचः।
पदे पदे मार्गनिदर्शनाय, स्फुरन्ति नन्दन्ति गदन्ति सत्यम्॥ ३२॥

□ अनुभूतिपथे सततं प्रगतिः

स्वातन्त्र्य-प्राप्तेरनन्तरं दीर्घकालाद् दास्ये स्थितानां भारतीयानां भारतस्य च संस्काराय नेतृवर्गेण बहु प्रयतितम्। ५६२ राज्यानां सरदारश्रीवल्लभभाईपटेलमहानुभावानां नैपुण्येन दूरदर्शितया च भारतसङ्घे सम्मेलनं तथा जूनागढ़हैदराबाद-काश्मीर-समस्यानां समाधानं सम्पन्नम्। सन् १९४७ ई० तः १९४९ ई० वर्षीय-नवम्बर-मासस्य २६ दिनाङ्कं यावत् संविधानसभानामुपवेशनोत्तरं लोकतन्त्रस्य स्थापकं भारतस्य संविधानं स्वीकृतं यत्र वयस्कमताधिकारस्य, सदनद्वयवत्याः संसदः, प्रधानमन्त्रिणस्तथा मौलिकाधिकारादीनां प्रावधानान्यासन्। २६ जनवरी १९५० ई० दिने भारतमेकं सार्वभौम-सम्प्रभु-सत्ता-सम्पन्नं गणतन्त्रमभूत्। तथा ब्रिटिश-राष्ट्रमण्डलस्य सदस्यत्वं च प्राप्नोत्।

श्रीमतीन्दिरा त्रिमूर्तिभवने श्रीजवाहरलालनेहरूमहाभागानां सौविध्याय निवसन्त्यपि प्रतिमासं लखनऊ-नगरं प्रायः पञ्चदशदिनेभ्यो गच्छति स्म। कालान्तरेण यदा श्रीफीरोजगान्धिनोऽपि लोकसभायाः सदस्यत्वेन निर्वाचितास्तदैव सा सातत्येन दिल्ल्यां स्थातुमपारयत्। प्रधानमन्त्र्यावासे समागतानामतिथीनामातिथ्य-सम्पादनेषु प्रावीण्यं भजन्तीन्दिरांमहाभागा समागतै राजनयिकैर्महापुरुषैर्देश-विदेशेभ्य उपागतैर्विशिष्टजनैः सह परिचयमपि प्राप्नोति स्म। आगन्तु-

कानामातिथ्यविधाने तेषां रुचीनां सौक्ष्म्येण परिज्ञानं तथा यथाकालं यथेच्छं भोज्यादिव्यवस्थापनं च विदधतीन्दिरागान्धीमहाभागा नितरां व्यस्ताऽपि नानाविधाननुभवान् प्राप्य मोदते स्म। ईदृशं व्यावहारिकं प्रशिक्षणं तया स्वानुभवादेव सम्प्राप्तं तस्मिंश्च सर्वहृदयहारि नैपुण्यञ्चासादितम्।

स्वयं प्रयासादुपलब्धबोधाः कुत्रापि तान्ति न भजन्ति लोकाः।
सर्वास्ववस्थासु समानभावास्ते सर्वदैवानुभवन्ति सौख्यम् ॥३३॥

१९४९ ई० वर्षस्याक्टूबरमासे श्रीजवाहरलालमहाभागाः श्रीमत्येन्दिरामहानुभावया सह प्रथमवारममेरिकायात्रायै गताः। तत्रास्माकं प्रधानमन्त्रिणो राष्ट्रपतिश्रीट्रूमैनमहाभागै राजकीयातिथिरूपेणामन्त्रिता आसन्। श्रीमतीन्दिरा तत्र व्याख्यानयात्राप्रसङ्गादागतवत्या श्रीमत्या कृष्णाहठीसिंहमहाभागया सह स्वतन्त्ररूपेणामेरिकाया दर्शनीयानि स्थलानि तथा विशिष्टान् राजकीयान् सांस्कृतिकान् कार्यक्रमान् विलोकयन्ती तत्रत्यैः कैश्चिद् विशिष्टजनैः सह मैत्रीं सम्पाद्य प्रासीदत्। तदानीं तस्या अपूर्व-निरीक्षण-क्षमत्वस्य कारणादेव सा यदा कदापि पुनस्तानि दृष्टचराणि स्थानानि तथा दृष्टपूर्वाञ्जनान् पश्यति स्म तदा तत्क्षणमेव पूर्णतया तान् परिचिनोति स्म।

श्रीमतीन्दिरैका वत्सला माताऽवर्तत। स्वकीययोरुभयोरपि पुत्रयोः पालनाय पोषणाय च यावच्छक्यं समयं प्रददाति स्म। सा स्वस्या एकाकिनो बाल्यजीवनस्य वार्तां न व्यस्मार्षीत् तस्मादेव राजीव-सञ्जयौ कदाप्येकाकित्वमनुभावयितुं नैवावाञ्छत्। श्रीफीरोजमहाभागोऽपि स्वीयौ पुत्रौ हृदयेन वाञ्छन् समर्पितः पिताऽऽसीत्। स ताभ्यां क्रीडनकानि निर्माय तन्माध्यमेन तयोरभियन्त्रविषयिणीं रुचिमुद्बोधयति स्म। प्रत्येकं वस्तुनो वियोजनस्य संयोजनस्य च कर्मणि स तौ निरन्तरं प्रोत्साहयति स्म। स हि स्वीयावुभावपि पुत्रावभियन्तारौ भवेतामित्यभ्यलषत्, तदीयाभिलाषानुरूपमेव च तौ (राजीव-सञ्जयौ) युवत्वमाप्याभियान्त्रिकव्यवसायमेव स्व्यकुरुताम्।

भारतस्य समस्यानां समाधानाय सन्ततं प्रयत्नशीलाः श्रीजवाहरनेहरूमहाभागाः काङ्ग्रेसनेतृषु बहूनां मृत्योः कारणादेकाकितामनुभवन्तः प्रायः श्रीमत्येन्दिरागान्धी-महाभागया सह परामर्शनकार्षुः। देशे विदेशे च याः सन्धिवार्ता भवन्ति स्म, तासां कूटनीतिकचर्चाणां प्रसङ्गेषु पर्यवेक्षिकात्वेन निरन्तरमुपस्थित्याः परिणामात् तस्याः परिज्ञानमतीव परिष्कृतं प्रौढं विकसितं तथा स्पष्टमभूत्, तदर्थमेव श्रीजवाहरलालमहाभागास्तस्यां निर्णये विश्वसन्ति स्म।

१९५० ई० वर्षादेव सङ्घनिरपेक्षता-नीतेः कारणाद् भारताय विश्व एकैदृशी प्रतिष्ठोपलब्धाऽभूद् या हि सम्भवतस्तस्य सञ्चितशक्तेस्तथाऽऽर्थिकसंसा-

धनानामुपगतेर्दूरेऽवर्तिष्ट । तस्या नीतेः कारणादेव विश्वस्य विभिन्नै राष्ट्रै-स्तन्नेतृभिश्च साकं भिन्न-भिन्नया रीत्या सम्पर्कसाधनमावश्यकमभूत्। तदाधारे-णैव श्रीमतीन्दिरागान्धी कूटनीतेः सर्वोत्तमपक्षानन्तरङ्गतयाऽवलोकितुमवसरानल-भत। **श्रीसुकर्णो-हट्ट-च्यांगकाईशेक-दम्पती-ट्रूमैन-दम्पती**-प्रभृतयो महत्यो विभूत-यस्तस्याः परिचय-परम्परायां प्राथम्यमभजन्। १९५१ ई० वत्सरे भारतीयानां जीवनस्तरस्याभ्युन्नयनाय तथा समाजवादपद्धत्याः कल्याणकारिणि राज्ये विश्व-सतां श्रीजवाहरलालनेहरूणां प्रभावात् प्रयासाच्च पञ्चवर्षीयाणां योजनानां प्रारम्भोऽक्रियत तथा च महता परिमाणेनोद्योग-कृषि-परियोजनादयोऽपि तासु प्राचलन्। तासां परियोजनानां विलोकनाय श्रीमतीन्दिराऽपि गच्छति स्म तथा तथ्यमिदं हृदयङ्गमं विदधाति स्म यद् देशस्य केन प्रकारेण कायाकल्पो भवतीति। तादृशेभ्यः कार्येभ्य इन्दिरागान्धीमहाभागाऽपि तेषामादर्शाणामनु-रूपाणि कार्याणि कर्तुं प्रेरणा अगृह्णात्।

नवीनसंविधानानुसारं प्रथमं महानिर्वाचनं १९५२ ई० वर्षे सम्पन्नम्। स्वदेशस्य सेवायां सङ्घर्षकालादेव तत्परस्य काङ्ग्रेसदलस्य विजयाय स्वयं श्रीजवाहरलालनेहरूमहाभागास्तथा श्रीमतीन्दिरागान्धीमहाभागाऽहर्निशं निर्वा-चनयात्रा अकुर्वन्। यत्र तत्र स्वतन्त्रप्रत्याशिनामाग्रहाच्छ्रीमतीन्दिराऽपि निर्वाच-नोपयोगीनि भाषणान्यकार्षीत्। निर्वाचनारम्भात् पूर्वमेवोत्तरप्रदेशस्य प्रदेश-काङ्ग्रेससमित्या श्रीमतीन्दिरा राज्यविधानसभायै प्रत्याशित्वाय निवेदिता परं तया स्वयमेव निषिद्धम्। सा समाजसेवा-कर्मण्येवानुरक्ताऽऽत्मनि सुखमविन्दत्। श्रीमतीन्दिरा भारतीय-सङ्गीत-नृत्ययोः कृते तथा विशिष्य भारतीयबालचल-चित्राणां विकासाय च विशिष्टानां संस्थानां स्थापनामप्यकरोत्। सहैव सा **'भारतीय-बाल-कल्याण-परिषद'**स्तथा भारतशासनस्य **'केन्द्रीय-समाज-कल्याण-सङ्घस्य'** सदस्याऽप्यासीत्। श्रीजवाहरलालनेहरूमहाभागानां कृतेऽपि सा तदानीं प्रत्यक्षतो राजनीतौ प्रवेष्टुं नैच्छद् यतस्तेषामावासे समागच्छतामतिथीनां स्वागत-सत्काराणां व्यवस्थां सैव निर्वहति स्म।

निर्लोभं जनता-जनार्दन-जगत्-सेवार्थमेवानिशं,
स्वात्मानं सुसमर्प्य किञ्चिदपरं सौख्यं हृदा नेच्छताम्।
सत्यानि श्रयतां हितं विदधतां सेवासु लीनात्मनां,
शश्रूषा-सरणिः परेव विरला धन्या क्षितौ राजते ॥३४॥

श्रीमतां नेहरूणां श्रीमतीन्दिरा तदानीमेकाकिनी विश्वस्ता सहायिका, जन-सम्पर्काधिकारिणी तथा सौविध्यप्रेक्षिका सेविकाऽऽसीत्। १९५२ ई० वर्ष एव यदा **श्रीमती रूजवेल्ट** समागता तदा श्रीमतीन्दिरा स्वीयेन समुचितव्यवहारेण तामममोहयत्। विश्वस्य महान्तो नेतारस्तदा त्रिमर्तिभवनमागच्छन्ति स्म। नेहरू-

परिवारस्य विश्वेन सह सम्पर्कः सुतरां वर्धमान आसीत्। १९५३ ई० वत्सरस्य मईमासे श्रीनेहरूभिस्सह श्रीमतीन्दिरा **महाराज्ञ्या एलिजाबेथ**—द्वितीयस्या राज्यारोहणसमारोहे लन्दनमगच्छत्। तत्रापि सा स्वीयेन प्रभाविना व्यक्तित्वेन शालीनतया च तामप्यमोहयत्। ततः प्रत्यावर्तनकाले श्रीमतीन्दिरा स्वतन्त्ररूपेण प्रथमवारं **सोवियतसङ्घस्य** तथा **स्कैण्डिनेबियाई**-देशानां यात्रामकरोत्। यत्र तया श्रीनेहरूणां भाविन्या यात्रायाः पृष्ठभूमिः सज्जिता। तदानीं सा यया विधया रूसवासिनां मनांस्यमोहयत् तद्विषये समुल्लेखयता रूसदेशे भारतस्य तात्कालिकेन राजदूतेन श्रीमता के० पी० एस० मैनन्-महाभागेन लिखितमासीद् यद्—"श्रीमतीन्दिरैकेदृशी व्यक्तिरस्ति यस्याः सौन्दर्यं वैयक्तिकमप्यस्ति तथा समष्टिगतमपि ; सा च स्वीयं सम्मोहमपि न जानाति।"

१९५४ ई० हायने सा श्रीजवाहरलालैः सह चीनदेशस्य यात्रामकरोत्। ततः परमिण्डोनेशियायां सम्पद्यमाने बाण्डुंग-सम्मेलनेऽप्यगमत् तत्र च सा पितृभिः सह स्वयं विश्वस्य प्रतिनिधिभिः परिचयमकार्षीत्। तदानीमेशियाऽफ्रीका-देशयोरनेके नेतारोऽन्ताराष्ट्रियेषु प्रसङ्गेषु श्रीमत्या इन्दिरागान्धी-महाभागायाः परिज्ञानेन निग्रहणशक्त्या च भृशं प्रभाविता अभूवन्। वस्तुतस्तत् सम्मेलनमिन्दिराया अन्ताराष्ट्रियेषु विषयेषु तस्याः परिज्ञानस्य दीक्षान्तसमारोह आसीत्। तदनन्तरं सा पुनरपि रूसदेशस्य यात्रामकरोत्। तत्र षोडशदिनानि स्थित्वा तत्रत्यं जनजीवनं यान्त्रिकं विकासं जनप्रदर्शनानि निकटवर्तीनि क्रीमिया-जार्जिया-ताशकन्द-समरकन्द-प्रभृतीनि स्थलानि नगराणि चालोकयत्। तस्या यात्राया अनन्तरमेव तयाऽनुभूतं यद् रूसदेशो भारतस्य महत् सत्यं च मित्रमस्तीति।

१९५५ ई० वर्ष एव श्रीमतीन्दिरा काङ्ग्रेसकार्यकारिण्याः सदस्यात्वेन वृता किञ्च ततः परं काङ्ग्रेसनिर्वाचनसमितेः सदस्या तथा भारतीय-काङ्ग्रेस-समिते राष्ट्रियैकतापरिषदोऽध्यक्षाऽपि निर्वाचिता। काङ्ग्रेसस्य राजनीतौ श्रीमतीन्दिरागान्धी पितृभ्यः श्रीजवाहरलालनेहरूभ्यः किञ्चिदधिका वामपथस्यानुयायिन्यासीत् तदनुसारमेव सा स्वीयं समर्थनमपि करोति स्म। १९५७ ई० वत्सरे सा 'इलाहाबाद-काङ्ग्रेस-समिते'रध्यक्षाऽभूत्। तस्मिन्नेव वर्षे तया व्यापिने निर्वाचनाय समग्रस्य देशस्य निर्वाचनयात्रा अपि विहिताः। श्रीलालबहादुरशास्त्रिणस्तदानीं रेलमन्त्रिणो निर्वाचन-प्रभारिणश्चावर्तन्त। श्रीशास्त्रिणः श्रीजवाहरलालमहाभागानां कार्यभारं बहुधा स्वयं स्वीकृत्य निर्वहन्ति स्म। प्रत्याशिनां विषये श्रीमतीन्दिराऽपि तैस्सहातिनैकट्येन कार्याण्यकरोत्।

□

[६]

लक्ष्मी-कला

दायित्व-पूर्णस्य पदस्य गौरवम्

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्म-मालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

—श्रीसूक्त० १२ ।

पूर्वैर्वंश्यजनैः पवित्रधरणौ न्यस्ता पुरा या शिला,
तत्राग्र्यैः स्वपराक्रमैः सुरुचिर-प्रासाद आरच्यताम् ।
सर्वेषामियमेव भाति रुचिराऽऽकाङ्क्षा हृदब्जे यतः,
'सन्तत्या इदमेव सात्त्विकसुखं यत्सा यशोऽर्जयेत्' ॥१॥

काङ्ग्रेसदलस्याध्यक्ष्यपरम्पराऽपि नेहरूपरिवारस्यैकाऽपूर्वा घटना मन्यते । स्वस्य बुद्धिवैशद्येन राष्ट्रसेवानिष्ठया त्यागेन तथा कार्यनिर्वहणक्षमत्वेन क्रमशः पं० मोतीलालमहाभागास्तथा श्रीजवाहरलालमहानुभावाः काङ्ग्रेसाध्यक्षपदमं-मण्डयन् । १९५१ तः १९५४ ई० वत्सरपर्यन्तं प्रधानमन्त्रिपदेन सहैव काङ्ग्रेस-दलस्य नेतृत्वमप्यध्यक्षरूपेण श्रीजवाहरलालमहाभागैरेव निर्व्यूढम् । १९५५ तः १९५८ ई० पर्यन्तं श्रीढेबरमहाभागा आध्यक्ष्यं स्वशोभयन् । १९५९ ई० वर्षस्या-रम्भे श्रीढेबरमहोदयाः काङ्ग्रेसाध्यक्षपदमत्यजन् । जनवरीमास एव काङ्ग्रेसस्य नागपुरेऽधिवेशनं सम्पन्नं यस्मिन् सहकारिकृषेः प्रस्तावः स्वीकृतस्तथा समाजवाद-प्रजातन्त्रे काङ्ग्रेसदलं स्वलक्ष्यरूपेणाङ्ग्यकरोत् । तदानीं नवीनं रक्तमानेतुं बहुशश्चर्चितम् ।

काङ्ग्रेसस्यानेके नेतारः श्रीमत्या इन्दिरागान्धीमहाभागाया नाम काङ्ग्रेस-दलस्याध्यक्षतायै प्रास्तुवन् । श्रीजवाहरमहाभागाः प्रस्तावमिमं श्रुत्वा किञ्चिद् विस्मिताः परमन्ते तैर्निर्णीतं यदस्मिन् विषये ते स्वप्रभावस्याल्पमप्युपयोगं न करिष्यन्तीति । महता काठिन्येन श्रीमती गान्धी प्रसादिता यत्ता नियोजनपत्रं पूरयेयुः । तेषु दिवसेषु नेतॄणां जनसम्पर्काय पदयात्राः प्रवर्तिता आसन् । श्रीमती-न्दिरा स्वपितॄणां निर्वाचनक्षेत्रस्य यात्रायां व्यस्ताऽऽसीत् । तदैव २ फरवरी १९५९ ई० दिने साऽज्ञासीद् यत् सा काङ्ग्रेसाध्यक्षाय निर्वाचितेति । स्वपितृ-पादानामिवैव साऽपि केवलं द्वाचत्वारिंशद्वर्षाणामपरिपक्वे वयसि तादृशे महति पदेऽभिषिक्ताऽभूत् । नेहरूपरिवारस्य सा तृतीयाकाङ्ग्रेसाध्यक्षावर्तत तथा महिला-

ध्यक्षासु सा चतुर्थी महिलाऽऽसीत् । इतः पूर्वं **'सरोजिनी-नायडू-एनीबेसेण्ट-नेलीसेनगुप्ता'**श्चेदमध्यक्षपदमशोभयन् ।

श्रीमत्या इन्दिरामहाभागायाः साफल्येन सर्वेऽपि नितरां प्रासीदन् । फरवरीमासस्य नवमे दिने यदा काङ्ग्रेसस्य संसदीय-समित्या सर्वैः श्रीमतीन्दिरागान्धी महाभागा सम्मानिता तदा श्रीनेहरूमहोदयाः स्वस्याः स्नेहभागिन्याः सुतायाः साफल्यं वीक्ष्य मनस्याह्लादेन परिपूरिताः । तत्र तदीयस्वागते भाषमाणास्तेऽकथयन्—

"इन्दिरा मम पुत्री विद्यते तथाऽहं तस्यै स्निह्यामि । सम्भाव्यते यद्यहं तद्विषये स्वीयां सम्मतिं दद्यां तर्हि सा पक्षपातपूर्णा मन्येत, किन्त्वहं तस्या उत्तमे स्वभावे कार्यकरणशक्तौ सद्विचारे तत्परतायाञ्च गर्वमनुभवामि । सा मत्त उत्तराधिकारे कान् संस्कारान् प्राप्तवतीत्येतत् तु नाहं जाने; परं मम विचारोऽस्ति यत् सा सर्वान् सत्संस्कारान् स्वस्या मातुरेव प्राप्नोत् ।"

भारतीयराष्ट्रिय-काङ्ग्रेसाध्यक्षपदं विभूषयन्तीन्दिरा स्वकीयप्रतिभायाः कर्तव्यपरायणतायास्तथा स्वदेशस्यावश्यकतानां प्रपूर्तेरवसरानलब्ध । यद्यपि तदानीन्तना विचारकास्तादृशसमुन्नतपदप्राप्तिमभिलक्ष्य कांश्चित् प्रश्नानुदभावयन्, तथापि सा **'क्रिया केवलमुत्तर'**मिति मन्वाना **'यत् स्वीकृतं तत्कथं सम्पादयेय'**-मित्येवं मनसि निर्णीय कर्मणि संलग्नाऽभूत् । सा प्रत्यहं कार्यालयं प्रातर्नववादनकाले गच्छति स्म, मध्याह्ने सार्धद्विवादनसमये गृहं परावर्तते स्म । स्वीये कार्ये नावीन्यमानयन्त्या तया प्रथमवारं सर्वेभ्यः काङ्ग्रेस-कार्यालय उद्घाटितः । प्रायः पञ्चाशत्सङ्ख्यातोऽप्यधिकाः सांसदा ईदृशा आसन् ये सायाह्ने तथा रविवासरेषु तत्रागत्य काङ्ग्रेसस्य कार्याणि साधयितुं सहभागिनो भवन्ति स्म ।

यत्र स्वयं मान्यजनो विधत्ते, कार्यं तदा तत्र समेऽपि चान्ये ।
कार्ये विना प्रेरणया प्रसक्ताः, कुर्वन्ति कर्माणि न तत्र चित्रम् ।।२।।

आडम्बर-विहीने जीवनयापने श्रद्धधाना श्रीमतीन्दिरा गान्धी काङ्ग्रेसं प्रति जनताया विश्वासं दोलायमानमनुभूय तथा सन्तोषपूर्णां प्रगतिमानेतुं निश्चित्य काङ्ग्रेसस्य कार्यकारिण्यां परिवर्तनाय स्वार्थपूर्णैर्विवादैश्च पृथग्भूय कार्यं विधातुं सयत्नाऽभूत् । कार्यकारिण्यां तत एव तया प्रगतिशीलविचारवन्तस्तरुणा आनीताः । निःसङ्कोचं सा पं० श्रीनेहरूनपि कार्यकारिण्यां नाग्रहीत् । काङ्ग्रेसाध्यक्षपदग्रहणानन्तरं शीघ्रमेव श्रीमतीन्दिरागान्धीमहाभागा समग्रस्य भारतस्याकर्षणकेन्द्रतां प्राप्नोत् । तदीयैः कार्यैर्वामिपथस्यानुयायिनः काङ्ग्रेसनेतारः श्रीकृष्णमैननप्रभृतयश्चापि विस्मितिमवाप्नुवन् । तद्वर्षस्यारम्भे यदा तिब्बत-प्रदेश उपद्रवा अभूवन् तदा सा दलाईलामा-महानुभावस्य महत्स्वागतमकार्षीत् किञ्च चीन-शासनस्य

दमननीतेः प्रत्यक्षरूपेणालोचनं तथा निन्दनमप्यकार्षीत् । जून-जुलाईमासयोः सा केरलस्य कम्यूनिस्ट-प्रशासनस्यापवारणायापि महान्तं योगमदात् । अन्ततश्च ३१ जुलाईदिने संविधानस्य ३५६ तमधाराया अनुसारं नम्बूदिरिपादशासनं समाप्तम् । तदनन्तरं तदीयप्रयासादेव केरलेषु काङ्ग्रेस-मुस्लिमलीगयोर्मैत्री साधिता काङ्ग्रेसाय च विजयश्रियः किरीटं प्रापितम् । यदा काङ्ग्रेस-मुस्लिम-लीगयोः समालोचनमभवत् तदा सा महाभागा स्पष्टतयाऽवादीद् यत् 'केरलेषु सकलाः साम्प्रदायिकाः सन्ति । तत्र नायराः सन्ति, यीशुधर्मानुयायिनो विद्यन्ते, एझावा वर्तन्ते तथा मुस्लिमा विद्यन्ते । अतो मुस्लिमदलं साम्प्रदायिकं नास्तीति ।'

तेष्वेव दिनेष्वेकं पारिवारिकं काठिन्यमपि श्रीमती गान्धी प्रापत् । श्रीफीरोज-गान्धीमहोदयः सहसैव हृद्रोगेणाक्रान्तोऽभूत् । श्रीमतीन्दिरा सर्वाणि कार्याणि विसृज्य पत्युः सेवायां संलग्ना । शीघ्रं स्वास्थ्यलाभाय सा तं महाभागं काश्मीराननयत् । अत्यधिकमुत्तरदायित्वपूर्णानां कार्यभाराणां स्थितावपि श्रीमतीगान्धी पितृन् प्रति पतिं प्रति च कर्तव्यानि विस्मर्तुं नाशक्नोत् । एतदतिरिक्तं सैकस्या स्नेहमय्या मातुरिव स्वीयौ पुत्रावपि निरीक्षितुं समुचितं निदर्शयितुं च न व्यस्मार्षीत् ।

श्रीफीरोजमहानुभावः स्वास्थ्यमलभत । ततः परं भूयोऽपि सा काङ्ग्रेस-दलस्य कार्ये सन्नद्धाऽभवत् । श्रीफीरोजमहोदयोऽपि संसदः कार्येषु प्रावर्तत । श्रीमतीन्दिरा तेषु दिनेषु प्रधानमन्त्रिण आवास एव वसति स्म किञ्च साऽभिलषति स्म यत् फीरोजमहाभागोऽपि तत्रैव वसेत्, परं स्वतन्त्रतन्त्रानुरागिणे तस्मै तथा नारोचत । सांसदेभ्यः प्राप्यमाणे भवने स वस्तुं प्रवृत्तः केवलं भोजनार्थं तत्रावश्यमायाति स्म । स हि महानुभावः सिद्धान्तप्रिय आसीत् तदीयमभिधानं समग्रेऽपि देशे कर्मठतायै तथा निःस्वार्थचर्यायै प्रसिद्धमभूत् । श्रीमतां नेहरूमहाभागानां स हृदयेन सम्मानं करोति स्म तथा श्रीमत्येन्दिरया पुत्राभ्यां च परमं प्रेमाधारयत् । काङ्ग्रेसदलस्य स एकल एवैतादृशः सदस्य आसीद् यो हि काङ्ग्रेसस्य नीतीनां स्वयं श्रीमतां नेहरूणाञ्चालोचनेऽपि निःशङ्कतामेव व्यकार्षीत् ।

काङ्ग्रेसाध्यक्षपदे वर्तमानायाः श्रीमतीगान्धीमहाभागायाः कार्यभारोऽतितरां प्रवृद्ध आसीत् । सा पितुः पत्युः पुत्रयोरात्मनः समाजस्य देशस्य च कार्येषु संलग्नमानसा निरन्तरं स्वीयया प्रतिभया श्रमेण चावश्यकानि कार्याणि साधयति स्म । नवनवा आयोजनाः कार्यकलापा अपि तया काङ्ग्रेसस्य माध्यमेन स्वदेशहिताय प्रवर्तिताः । विस्थापितानां व्यवस्थापनाय, मुस्लिमानां समस्याः समाधानाय, विदेशिनामत्यल्पसङ्ख्यकानाञ्च काठिन्यवारणाय, पत्रकाराणां सम्पर्काय च विभिन्नाः कार्यालयास्तयोद्घाटच सर्वेषां सुव्यवस्थाः सम्पादिताः । उड़ीसामतिरिच्य प्रायः सर्वेषां राज्यानां सम्पर्कयात्राः साऽकरोत् । यदा साऽत्यधिकं पीडाकारिणा रोगेण भृशं पीडिताऽवर्तत तदाऽपि तया विश्रान्तिर्नैप्सिता ।

अश्मरीरोगस्य परिज्ञानमपि तदीयनिर्वाचनाद् द्वित्रदिनपूर्वमेवाभूत्। काङ्ग्रेसस्याग्रिमायोजनाय विचारगोष्ठ्या आयोजनं, कार्यकर्तॄणां प्रशिक्षणं, सम्पर्काभिवृद्धये पदयात्रास्तथा काङ्ग्रेस-दले वर्तमानस्यर्णस्यापाकरणं धनादिसङ्ग्रहाश्चेत्यादयस्तस्या ईदृशाः प्रयासा आसन् ये स्वल्पकाल एव तां विश्वस्तां कार्यक्षमां बुद्धिमतीं बहुमुखप्रतिभासम्पन्नां परमोच्चनेत्रीं च प्रमाणयितुमलमभूवन्।

१५ अगस्त १९५९ ई० दिने स्वतन्त्रतादिवसमुपलक्ष्य तया सन्दिष्टं यत्—"पर्वतारोहणे जनो यावदूर्ध्वं गच्छति, यात्रा तावत्येव दुस्तरा भवितुं प्रवर्तते तथा मार्गः सङ्कुचितोऽभिमुखारोहवांश्च भवति।" दुर्भाग्यवशात् तदा साऽप्यनुभूतवती यत् काङ्ग्रेसदलं तया सहारोढुं सम्मतं नासीत्। सा हि महाभागा तदानीमान्तरिक-विषयाणां समाधानेषु तथा राष्ट्रियेषु प्रकरणेष्वपि ध्यानमदात्, यथा—'उपनिवेशवादविरोधिन आन्दोलनाय काङ्ग्रेसस्य समर्थनं, अफ्रीकार्थं भारतीयपरिषदो निर्माणं, दक्षिणाफ्रीका-ब्रिटिशन्यासालैण्डयोर्जातिवादस्य भर्त्सनं च।

एवं सत्यपि चीनस्याक्रमणेन तिब्बतस्य च बलान्निगरणेन दलाईलामामहोदयेन साकमागतानां परस्सहस्राणां तिब्बतवास्तव्यानामावासव्यवस्थया चीनस्य भारतेन सह विरुद्धप्रवृत्त्या चाहतानां श्रीजवाहरलालनेहरूमहाभागानां तादृश्यां स्थितौ श्रीमतीन्दिरा तेषां साहाय्यमावश्यकमाकलय्य निरन्तरं तैः सह स्थातुं निर्णीय च काङ्ग्रेसाध्यक्षपदमत्यजत्।

श्रीफीरोजगान्धि-महोदया अपि रक्तचाप-रोगेण पीडिता आसन्। ते चिकित्सकैः प्रेरिता अपि विश्रामं न गृह्णन्ति स्म। सर्वदा लोकसभायां वादाय स्वाध्यायपूर्वकं सज्जा भूत्वा गच्छन्ति स्म। एकदा पूर्ववदेव संसद्युपस्थिताय प्रकरणाय तर्कानुपस्थापयितुं विषयसामग्रीमधीत्य च शयनमकार्षुः। प्रातर्वक्षसि काचित् पीडाऽजायत, परं तामुपेक्ष्य यथावत् कार्याण्यकुर्वन्। २ सितम्बर १९६० ई० दिने चिकित्सकाय सूचितं तदापि तेन विश्रामाय निवेदितं किन्तु तदप्युपेक्षितम्। पञ्चदिवसानन्तरं पीडाया आधिक्येन स्वयं मृत्तैलयानं सञ्चाल्य ते चिकित्सावासं गतास्तत्र च हृद्रोगेणाक्रान्ताः। श्रीमती गान्धी तदा केरलेष्ववर्तत। वृत्तं श्रुत्वा सद्य एव परावृता शुश्रूषायां च संलग्ना। परं ८ सितम्बर १९६० ई० दिनस्योदयात् पूर्वमेव तस्या हस्तं स्वहस्ते गृहीता एव ते प्राणानत्यजन्। इत्थमेकः स्पष्टवक्ता निर्भीको भारतस्याभ्युदयाय समर्पितः कुशलः प्रशासको नवोदितस्य राष्ट्रस्य हितचिन्तकोऽसमय एव प्रयातः।

श्रीमत्या इन्दिरायाः हृदयमेव त्रुटितम्। श्रीनेहरूमहाभागा भृशं खिन्ना अभूवन्। सर्वेऽपि शोकाकुला आसन्। अहो दैवगतिश्चित्रा!!!

सत्यं श्रित्वा शुचितमपथे केवलं राष्ट्रसेवां,
कर्तव्यं स्वं मनसि नियतं मन्यमानान् विधाता ।
नित्यं नीत्याऽखिलमपि निजं जीवनं याप्यमाना—
नीर्ष्याग्रस्तः स हि न सुखितान् प्राणिनो द्रष्टुमीष्टे ॥३॥

'शोकाकुलं मानसं मुहुर्मुहुरन्तरेवान्तर्व्यथयति । प्राचीनाः स्मृतयो वीचय इवोच्चावचतां प्राप्य विचारान् दोलायन्ते । निश्चेष्टतया तु ता अतितरां प्रवर्द्धन्ते । तस्यामवस्थायां किङ्कर्तव्यताया विमूढता शरीरं दुनोति ।' अत एव यथा-कथञ्चिदात्मानं धारयन्ती श्रीमतीन्दिरा गान्धी सचेष्टतामेवैकं शरणं मत्वा वर्षा-भ्यन्तर एव स्वां व्यस्तयितुं पुना राष्ट्रसेवायां निरताऽभूत् । सर्वेऽपि पूर्वे राजनीतिका गतिविधयः प्रारब्धाः । श्रीफीरोजस्य देहावसानात् कतिपयमासानन्तरं सा **'मेक्सिको'**-यात्रां व्यदधात् । ततः साऽमेरिकायामगच्छद् यत्र सा **'येल-विश्व-विद्यालये'** हालैण्ड-स्मृति-व्याख्यानान्यददात् ।

१९६२ ई० वर्षे भारते महानिर्वाचनानि सम्पन्नानि, तेषु सा दलाय च्छन्दाकलनप्रचारमकरोत् । आसीत् सा तदानीं काङ्ग्रेसदलस्य 'राष्ट्रियैकता-परिषदोऽध्यक्षा ।' सा साम्प्रदायिक-सद्भावस्य धर्मनिरपेक्षतायाश्च नीत्यै महत्त्वं दिशन्ती जबलपुरस्य साम्प्रदायिकोपद्रव-पीडितेभ्यः शान्तिपूर्वकं समन्वयाय तत्रा-गच्छत् । तस्मिन्नेव वर्षे पितृभिः सहाफ्रीकादिराज्यानां यात्रामकार्षीत् । अय-मेवावसर आसीद् यदा सा यथा-प्रसङ्गं 'जोयोकेन्यास-मिल्टनओबोटे-जूलिय-सन्येरेरे—कैनेडी'-प्रभृतिभिः शासनप्रमुखैरपि मिलिता । १९६२ ई० वर्षे श्रीमती-न्दिरा गान्धी यूनेस्कोस्थस्याधिशासिमण्डलस्य सदस्याऽभवत् ।

१९६२ ई० वर्षस्याक्तूबरमासे तिब्बतस्य कारणात् प्रायो विंशतिसहस्र-मिताश्चीनसैनिकाः सेला-दर्रा-मार्गतो भारतं प्रविष्टास्तत्राक्रमणेन ते भारतस्य पूर्वोत्तर-सीमप्रदेशस्य चतुर्दशसहस्रवर्गमीलमितं क्षेत्रं स्वायत्तमकुर्वन् । भारतीय सैनिक-पराजयस्य तथा घोराया विपदः कारणात् प्रधानमन्त्रिणो भृशमाहताः । चीनानां विश्वासघातेन दुःखितास्ते स्वकर्तव्यं पालयन्तः समग्रं राष्ट्रमेकताबद्धतया शत्रोः साम्मुख्याय प्रैरयन् । तदैवेन्दिरामहाभागाया आध्यक्ष्ये 'नागरिकसुरक्षा-समितिः' संयोजिता तद्वदेव च सर्वत्र स्थानीयाः सुरक्षासमितयोऽपि सङ्घटिताः । श्रीमतीन्दिरा सङ्कटग्रस्तेषु क्षेत्रेषु तेजपुर-जहालपुरादिषु गत्वा जनानां सैनिका-नाञ्च मनोबलं विश्वासञ्चावर्धयत् साहाय्यार्थं च खाद्यसामग्रीमूर्णवस्त्राण्यो-षधय आवश्यकान्युपकरणानि च प्रेषयितुं सन्नद्धाऽभवत् ।

◻ श्रीनेहरूणां महाप्रयाणम्

पूज्येभ्यः स्वपितृभ्य आप्य बहुशो देशानुरागाश्रितान्,
संस्कारान् परमोच्चनैष्ठिक-तपस्त्यागादिभिः सन्ततम् ।

ये सम्पाल्य ततोऽधिकं शुभयशःस्तोमं श्रिताः संसृतौ,
मान्यास्तेऽत्र जवाहराऽभिधवरा देशार्थमेवार्पिताः ॥४॥

न जाने केन कारणेन चीनाः सहसैकपक्षीयं युद्धविराममघोषयँस्तथा विजितात् क्षेत्रात् सेनां प्रत्याहरन् । किन्त्वसामयिकेन च्छलेन विश्वासघातेन खिन्नाः श्रीजवाहरलालमहाभागा अत्यन्तं चिन्तितास्तथा प्रत्यहं नव-नवानामागतानां समस्यानां समाधानाय संलग्नाः स्वास्थ्यं प्रति निरपेक्षतया चान्तरेवान्ता रोगाक्रान्ता अभूवन् । श्रीमती गान्धी तदानीं स्वपितृपादानां सेवा-शुश्रूषासु सर्वात्मना सन्नद्धासीत् तथा गार्हस्थ्यस्य भारमपि सा यथावन्निरवहत् । अप्रैलमासे सा न्यूयार्कस्य विश्वमेलके सम्मिलितुमगात् । तेषु दिनेषु **'कामराजयोजना'**या अपि प्रभाव आसीत् । श्रीनेहरूणामस्वास्थ्यस्यान्यानि कारणान्यप्यासन् येषु "श्रीकृष्णमेनन्‌महोदयस्य रक्षामन्त्रिपदाद् विमोचनं, सर्वकारीयकर्मसु शैथिल्यं, महात्मनां श्रीगान्धिनां नीतेर्दूरे वर्तनं, सत्यामपि स्वतन्त्रतायां वैदेशिकपद्धत्यैव भारतीयानां जीवनयापनार्थमाग्रहस्तथा वास्तविक-समाजवादार्थिकनीतिभ्यां परा व्यवहरण"-मित्यादीनि मुख्यान्यभूवन् । नानाविधाभिरालोचनाभिरुत्तेजितास्ते काङ्ग्रेसस्य भाविन्यधिवेशने स्वासामार्थिकयोजना-सम्बन्धिनीनां नीतीनां समर्थनाय दृढं निश्चित्य च १९६४ ई० वर्षस्य जनवरीमासे भुवनेश्वरे सम्पद्यमानेऽधिवेशने पठनाय भाषणमलिखँस्तत्र गत्वा चापठन् । भाषणस्य समुचितः प्रभावो व्याप्तः परं तत्पूर्तेः प्रागेव ते सहसा पक्षाघातेन पीडिता अभवन् । देहल्यामानाय्योपचारात् ते शनैः शनैः स्वस्थतां प्राप्ताः ।

आसीत् तेष्वक्षयः शक्तेर्भाण्डागारस्त तथा साहसस्यापि नाभून् नैयून्यम् । तथाऽप्यन्तशैथिल्यं तु वर्तत एव । अप्रैलमासारम्भे ते भाषणप्रदानमप्यारभन्त । मोहमय्यां काङ्ग्रेसस्यैकस्यामुपवेशन्यामिन्दरया सह ते गत्वा १८ मई दिवसे ततः परावृत्ताः । ततः परं ते देहरादूनं प्रस्थितास्तथा पूर्ववदेवान्यप्रवृत्त्या सहैव सम्मान्याया **आनन्दमय्या** मातुर्दर्शनार्थमपि द्वित्रवारमगच्छन् । ततः २६ मई दिने देहलीमायाताः । 'पालम'वायुयानावतरणस्थले श्रीलालबहादुरशास्त्रिणस्तेषां स्वागतं व्याहरन् । २७ मई दिने प्रातस्ते जागृताः परं किञ्चिद्वैकल्यमनुभवन्तः पुस्तकपठने प्रवृत्ताः शैथिल्यमनुभूय च विष्टरे शयिताः । चिकित्सका उपेताः । श्रीमतीन्दिरा-गान्धीमहाभागा तेषां प्राणरक्षार्थं स्वीयं रक्तं दातुमपि प्रार्थितवती, किन्तु दैवं किमप्यन्यदेव चेष्टते स्म । मध्याह्ने द्विवादनासन्ने काले तेषां रक्षणप्रयासा वैफल्यं गताः । ते महायात्रायै प्रयाताः···एकः प्रकाशपुञ्जो निर्वाणं प्राप्तः··· । देशस्य विदेशस्य च सर्वोऽपि नेतृवर्गः प्रशासकगणस्तेषां परिचितवर्गश्च कोऽपीदृशो नावर्तत यस्तेषां महाप्रयाणमाकर्ण्य हार्दं दुःखमनुभवन् प्रवहन्नश्रुनेत्रो नाभूत् ।

व्यक्तित्वस्य बलेन पूर्ण-निचितान् विद्या-विवेकाञ्चितान्,
सामञ्जस्य-समन्वितान् दृढमतीन् कर्म-प्रभावादिभिः ।

नीत्या स्पष्टतरान् प्रशासनपटून् श्रीनेहरून् विद्वरान्,
श्रुत्वा हन्त ! दिवङ्गताञ्जगदभून्मग्नं विषादाम्बुधौ ॥५॥
राष्ट्रेऽभूद् वज्रपातो नृपनयकुशलाः कर्मठा दीप्तिमन्तो,
नक्षत्रा देशभक्ताः प्रतिपदमुदिताः सर्वदा जागरूकाः।
कालस्याङ्के प्रसुप्ताः सकलमपि जगच्छोकसिन्धौ विमुच्य,
प्रेयांसस्त्यागनिष्ठाः सुविमलयशसो हन्त ! नेतृप्रवीणाः ॥६॥

श्रीजवाहरलालनेहरूमहाभागानां महायात्राया अन्तिमानि दर्शनानि प्राप्तुं भारतीया अत्यन्तं व्याकुलास्त्रिमूर्तिभवने पयसां पूर इवोपागच्छन् । विश्वस्य राष्ट्रनायकाः प्रमुखा नेतारोऽप्यात्मनः प्रियाय सुहृदेऽन्तिमं श्रद्धाञ्जलिमर्पयितुमुपातिष्ठन्। सम्पूर्णं राष्ट्रं स्तब्धमासीत्। सप्तदश-वर्षाणि भारतस्य प्रधानमन्त्रिपदं विभूषितवतां श्रीनेहरूणां दूरदर्शिता, स्वदेशं प्रत्यगाधोऽनुरागः, कुशलं नेतृत्वं निरन्तरं परिश्रमं च संस्मरन्तस्तेभ्योऽन्तिमं विदायमदुः । दाहसंस्कारः श्रीमता **'राजीवगान्धि'**ना विहितः । तेषां भस्मावशेषः प्रयागे गङ्गायां तथा राष्ट्रस्य कृषिक्षेत्रेषु तेषामिच्छानुसारमेव विसर्जितः। तेषां दाहस्थलं 'शान्तिवन'-नाम्ना राष्ट्रतीर्थमिव सर्वैः श्रद्धेयं तथा वन्दनीयं देहल्यां यमुनायास्तट-निकट-वर्तिनि क्षेत्रं चिरं विराजते ।

श्रीमतां जवाहरलालनेहरूणां स्वर्गप्रयाणानन्तरं मन्त्रिमण्डलस्यापातिकमुपवेशनमाकारितं तथा वरीयस्त्वक्रमं विचिन्त्य **'श्रीगुलजारीलालनन्दा'**-महाभागः कार्यवाहकप्रधानमन्त्रिपदे ससम्मानं प्रतिष्ठापितः।

श्रीमतीन्दिरागान्धीमहाभागा पूज्यानां पितृचरणानामसामयिकेन स्वर्गप्रस्थानेनातितरां शोकाकुलाऽवर्तिष्ट । तस्याः परमस्नेहभाजां पितॄणां सहसा स्वःप्रयाणेनासह्यं कष्टमनुभवन्त्यपि श्रीलालबहादुरशास्त्रिणां सम्मत्यनुसारं सर्वाण्यप्यौर्ध्वदैहिकानि कर्माणि समसाधयत्। श्रीनेहरूमहाभागैः स्वीये 'मृत्युपत्रे' यत् सूचितमासीत्तस्यापि पूर्णरूपेण पालनं तया विहितम्। श्रीमत्या इन्दिरायाः कष्टं न केवलं तस्या एवापि तु सकलस्यापि भारतस्याभूद् यतः स्वयं श्रीनेहरूमहाभागा अपि भारतीयेभ्य आत्मानं कदापि पृथङ्नामन्यन्त । तैः स्पष्टमेवात्मनोऽन्तिमे पत्रे लिखितमासीद्—

"अहं, तस्मिन्नुत्तराधिकारे योऽस्माकं विद्यते, गर्वमनुभवामि तथाऽहं वार्तामिमां जानामि यदस्मासु प्रत्येकमिवाहमपि तस्या अविच्छिन्नायाः शृङ्खलाया योजकाङ्गमस्मि यस्य प्रारम्भो भारतस्याविस्मरणीयेऽतीते इतिहासस्य प्रातः कालेऽभूत्। तां शृङ्खलामहं विच्छेत्तुं नाभिलषामि, यतोऽहं प्रेरणां गृह्णामि। किञ्च मम मनसाऽस्या इच्छायाः साक्ष्यरूपे तथा भारतस्य सांस्कृतिकन्यासाय ममान्तिम-श्रद्धाञ्जलिरूपेऽहमनुरुणध्मि यन्मम भस्मन एका मुष्टिका प्रयागे (इलाहाबादे) गङ्गायां प्रक्षिप्येत, यतः सा तस्मिन् महासागरे गच्छेद् यो भारतस्य चरणं स्पृशति।

परं मम भस्मनोऽधिको भागोऽन्येन प्रकारेण समापनीयः। अहमभिलषिष्यामि यत् स व्योमयानेन नीत्वोर्ध्वमाकाशतस्तेषु केदारेषु विकिरणीयो यत्र भारतस्य कृषकाः परिश्राम्यन्ति, यतो हि स भारतस्य धरित्र्या धूलिना च सम्मिलितो भवेत् तथा भारतस्यैक ईदृशो भागः सम्पद्येत यस्य पार्थक्य-परिज्ञानं कथमपि कर्तुं न शक्येत।"

☐ श्रीशास्त्रिणां नेतृपदेऽभिषेकः

मौनं मान्यजनानुयान-निरता निःस्वार्थनिष्ठान्विताः,
सूक्ष्म-प्रज्ञ-नयाः स्वचिन्तन-धनाः स्वाधीनता-सैनिकाः।
कर्तव्येषु परायणाः प्रथित-वाग्वैदुष्य-सम्भूषिताः,
श्रीला 'लालबहादुरा'ख्य-विबुधा नेतुः पदे स्थापिताः ॥७॥

स्वभावेन कोमलाः प्रतिज्ञया कठोरास्तन्वा लघवस्तथा मनसा विशालाः श्रीलालबहादुरशास्त्रिणः श्रीनेहरूणामतीव स्नेहभाज आसन्। तेषां स्थितौ ते निर्विभागीया मन्त्रिणोऽभूवन्। श्रीमतीन्दिरागान्धीमहाभागाऽपि तान् श्रद्धया वीक्षते स्म। तेषां निरन्तरं सामीप्यात् कौशलं दूरदर्शित्वं निःस्वार्थत्वं कर्मपटुत्वं तथा सद्विचार-सत्स्वभाववत्त्वञ्च काङ्ग्रेस-सदस्येषु विख्यातमासीत्। यदा प्रधानमन्त्रिपदाय निर्वाचनप्रश्न उपस्थितस्तदा कामराजमहानुभावः श्रीमतीमिन्दिरागान्धीमहाभागां प्रधानमन्त्रिपदे प्रतिष्ठापयितुमैच्छत्, परं सा स्वयं कस्मैचिज्ज्येष्ठाय तत्पदं दातुमुचितममन्यत, अतस्तया स्पष्टरूपेण निषिद्धम्। तस्मै पदाय तदीयां सम्मतिं कामयमानाः श्रीकामराजादयश्च यदाऽपेक्षितं नाम प्रस्तोतुं न्यवेदयँस्तदा सा श्रीलालबहादुरशास्त्रिणां नामासूचयत्। संसदोऽग्रे त्रीणि नामानि प्रस्तुतान्यवर्तन्त-**श्रीमोरारजीदेसाई-श्रीगुलजारीलालनन्दा-श्रीलालबहादुरशास्त्रिणां** च। श्रीमोरारजीदेसाईमहोदयस्तु नियमतश्छन्दाकलनमप्यवाञ्छत्, परमन्ते काङ्ग्रेसप्रतिष्ठायाः संरक्षणाय तथा दलविच्छेदभयान्मौनमस्थात्। श्रीकामराजेन विचारितं यत् साम्प्रतिक्यां विषमायां स्थितौ श्रीलालबहादुरशास्त्रिण एवैतस्मै पदाय समुचिता भविष्यन्ति, तेषां सर्वेऽपि दलस्य सदस्याः सम्मानं कुर्वन्ति, तेषु विश्वसन्ति तथा ते बहुमतं निश्चयेन प्राप्स्यन्तीति, तदनुसारं तेषां नाम प्रस्तावितम्, २ जून १९६४ ई० दिने च ते सर्वसम्मत्या काङ्ग्रेसदलस्य नेतारो निर्वाचिताः। ते सर्वकार-निर्माणायामन्त्रितास्तथा सप्ताहानन्तरं प्रधानमन्त्रिणः पदस्य ते शपथमगृह्णन्।

दृढव्रताः सत्यपथानुयायिनः, प्रशासने तत्प्रगतौ च तत्पराः।
श्रीशास्त्रिणो लालबहादुराभिधाः, प्रधानमन्त्रित्वममण्डयँस्ततः ॥ ८ ॥

स्वदेशं निरन्तरं प्रगतिपथे नेतुं प्रवृत्ताः श्रीनेहरूणां सांनिध्यमविस्मरन्तस्ते तन्नैयून्यं पूरयितुं श्रीमतीन्दिरागान्धीमहाभागां मन्त्रिमण्डले समाविश्य सहयोग-

प्रदानायाभ्यार्थयन् विदेशमन्त्रिपदं च स्वीकर्तुं न्यवदेयन्। पूर्वं तु सा निषेधमेवाकरोत् परं श्रीशास्त्रिणामाग्रहं सम्मानयितुं तथाऽऽत्मानं कर्मसु नियोज्य शोकं विस्मर्तुं **'सूचना-प्रसारण-मन्त्रिपदं'** स्व्यकार्षीत्। तस्मिन् महति पदे वर्तमानया तया पूर्णया निष्ठया सत्येन जागरूकतया च स्वीयं दायित्वं निर्व्यूढम्। पितृणामिवैव सर्वाणि कार्याणि यथाशीघ्रं निर्वर्तयितुं साऽवाञ्छत्। तस्याः पुरः काऽपि पञ्चिका निर्णयायाग्रिमं दिनं प्रतीक्षितुं नावाशिष्यत। स्वीयैः पूर्वानुभवैः सा सकलमपि कार्यविधिं पूर्णेन कौशलेन विदधती सर्वेषामपि समादरं प्राप्नोत्।

श्रीमतीन्दिरागान्धी स्वीये मन्त्रालये यत्किमपि नावीन्यं प्रयोगशीलमर्थवच्च कार्यमासीत् तस्मै महत्त्वं दत्त्वा शिक्षां मनोरञ्जनं च परस्परमन्योन्याश्रितं मत्वा तदनुकूलमाकाशवाणीतः प्रवर्तयितुं निरदिशत्। दूरदर्शनस्य प्रवर्तनं तस्या एव दूरदर्शितायाः परिणाम आसीत्। तस्याः सूचना-प्रसारण-मन्त्रित्वकाल एव नवीनेभ्यश्चेष्टाचित्रेभ्यः स्वीकृतिः प्राप्ताः, प्रयोगधर्मवद्भ्यश्चलचित्रेभ्य ऋणसाहाय्यदानस्य निर्णयो विहितस्तथा नियन्त्रक-मण्डलस्य स्वरूपं व्यापकं विधाय नीतावौदार्यमानीतम्। १९६४ई० वर्षे श्रीमतीन्दिरामहाभागाया उत्तरप्रदेशाद् राजसभायै निर्वाचनमभूत्। श्रीनेहरूणां 'फूलपुर'—क्षेत्राल्लोकसभायै निर्वाचनार्थमपि सा निवेदिता किन्तु तया तद्विषये निषिद्धम्। मन्त्रिपदे वर्तमानया तया नैकेषां देशानां सद्भावनायात्रा विहिताः। यत्रापि साऽगच्छत् तत्र तत्कर्म-कौशलेन सहैव श्रीजवाहरलालनेहरूमहोदयानां पुत्रीत्वेनापि संपूर्णः सम्मानस्तस्या अदीयत। तदग्रिमे वर्षे मद्रासनगरे भाषाविवादमाध्यमेनोपद्रवाः सञ्जातास्तदाऽपि सा स्वस्वभावानुसारं तत्र गत्वा तत्रत्यान् प्रत्यबोधयत्। स्पष्टमेव सा भीषणस्य झञ्झावातस्य चरमे बिन्दौ विद्यमानाऽपि नाबिभ्यत्।

सुदृढा निजकर्मपालने, करुणामूर्तिरथापदां विधौ।
निरहङ्कृतिरुन्नताऽपि सा विरताऽवर्तत देशसेविका॥९॥

नाटकानां नृत्यकलानां क्षेत्रे प्रोत्साहन-प्रदानेन स्वीयां कलाभिरुचिं प्रकटय्य चान्ताराष्ट्रियचलचित्रसमारोहं सैव प्रारभत। भारतशासनस्य प्रतिनिधित्वेन मास्कोतः प्राप्तेन निमन्त्रणेन सोवियतसङ्घस्य यात्रां विधाय तत्र तद्देशीयनेतृभिर्भारतशासनस्य मैत्र्याः सुदृढत्वं तथा भारतायार्थिक-सैनिक-साहाय्यादानाय यथावन्निर्णयं समसाधयत्। ततः परं श्रीनेहरू-स्मारक-प्रदर्शिन्या उद्घाटन-समारोहस्याध्यक्ष्यं निर्वोढं न्यूयार्कमप्यगच्छत्। श्रीमतीन्दिरामहाभागा स्वपदे वर्तमानाऽपि समाज-कल्याणकार्येषु नितरां ध्यानं दत्ते स्म। मन्त्रिपदप्राप्त्यनन्तरं तस्यै स्वीकृते शासकीये (१ सफदरजंगमार्गस्थे) भवने स्थिता सा श्रीनेहरूणामिवैव प्रतिदिनं प्रातरागतानां जनानां काठिन्यान्यावश्यकताश्च श्रुत्वा तेभ्यो यथाशक्यं साहाय्यमपि प्रादात् सहैव तेभ्यो वार्तालापान् विधाय प्रासीदत् प्रेरणा अगृह्णात् तथा शक्तिं प्राप्नोत्। जनास्तद् विनिमये स्वीयान् स्नेहाननुरागान् श्रद्धाश्चादुः।

जनहितनिरतेभ्यो सर्वदा स्नेहभाग्भ्यो,
विपदि च सहभाग्भ्यो राष्ट्रचिन्तापरेभ्यः।
वितरति जगदेतत् स्नेह-सम्मान-शक्तीः,
प्रथयति च तदीयां सर्वतोदिक्षु कीर्तिम् ॥१०॥

श्रीशास्त्रिमहाभागानां प्रतिष्ठा लोकप्रियता च तेषां शासनकाले नितराम-वर्धताम्। ९ जून १९६४ ई० तः १९ जनवरी १९६६ ई० पर्यन्तं तैः प्रधानमन्त्रिपदं मण्डितम्। ते सुदृढा गान्धिवादिन आसन्। भारतीयजनतायां नैके निष्ठावन्त-स्तेषामनुयायिनोऽप्यवर्तन्त ये पाकिस्तानयुद्धस्य तथा ताशकन्द-सम्मेलनस्यातीव प्रशंसामकुर्वन्। ते मन्त्रिमण्डलीयासु विचार-परिषत्सु सदस्यान् सदैव विचार-विनिमयेन प्रोदसाहयन्, निर्णयानां प्रसङ्गेषु सर्वेषां सम्मतीरनयँस्तथा नीति-निर्धारणविषये उच्चकोटिक-परामर्शदातॄणां विचारान् परिज्ञाय सर्वतोभावेन विमृश्य च नीतीर्निरधारयन्। कच्छस्य मरुभुवमाश्रित्य पाकिस्तानेन सह यो विवाद आसीत् तस्यापि शान्तिपूर्णं समाधानं तैर्गवेषितमभूत्। शान्तिप्रिया विनम्राश्च ते स्वदेशरक्षार्थं स्वप्राणानपि होतुं सर्वदा सन्नद्धा आसन्।

ते यदा प्रधानमन्त्रिपदं भूषितवन्तस्तदानीं देशोऽपि दुर्दैवच्छायया विपन्न एवासीत्। युद्धस्य वर्धमानेन व्ययभारेण तथाऽनावृष्टेः कारणादार्थिकी व्यवस्था दोलायमानेव प्राचलत्, अहरहश्चिन्तातान्तास्ते स्वदेशायैव जीविताः स्वदेशायैव च मृता अपि। युद्ध-सङ्कटस्य तथाऽन्नसङ्कटस्यापवारणाय ते—'**जय जवान-जय किसान**' इति नादमपि प्रावर्तन्त। संस्कृति-संस्कृत-संस्कार-सदाचार-सेवा-सद्विचार-परम्पराभिः संसिक्तानां तेषां प्रभावश्चातितरां समैधत।

कतिपय-मासेभ्यः पाकिस्तानीया गुप्तप्रवेष्टारो भारतं प्रविश्य गुप्तरूपेणैव सेतूनां भञ्जनस्य सञ्चारव्यवस्थाया ध्वंसनस्य च योजनाः साधयितुं प्रसक्ता आसन्, पाकिस्तानेन विचारितमासीद् यत् काश्मीरवासिनो विद्रोहमाचरिष्यन्ति तथाऽऽक्रामकाणां सहयोगिनो भविष्यन्तीति। परमभूत् ततो विपरीतमेव। काश्मीर-सर्वकारेण सहस्रशो गुप्तरूपेण प्रविष्टाः पाकिस्तानस्य चरा निगृहीतास्तथा बहु-शस्तेषु निहता अपि। इत्थं भारतशासनं प्रति सर्वथा निष्ठावद्भिः काश्मीरशासकै-स्तथा नागरिकै राष्ट्रभक्तेरपूर्वमुदाहरणं प्रस्तुतम्।

१९६५ ई० वत्सरे पाकिस्तानेन भारतमाक्रान्तम्। जनता जागरिता। श्रीशास्त्रिणः प्रशस्तशिलेव सुस्थिरा आसन्। श्रीमतीन्दिरागान्धी स्वस्वभावानुसारं शीघ्रमेव रणभूमावाक्रमणस्थल्यामुपागच्छत् सैनिकानामुत्साहानावर्धयत् तथा स्वीयैर्भाषणैर्देशवासिषु स्फूर्तिं जागरूकताञ्चोदपादयत्। शत्रवः पराभूताः युद्धं च निरुद्धम्। सन्धिवार्तायै श्रीलालबहादुरशास्त्रिणस्ताशकन्दं गताः किन्तु त एवं गता यत् पुनरागता एव नैव। केवलं तेषां शून्यं शरीरं महान्तं विषादं नीत्वा भारतमागमत्। तस्याघातस्य सूचनाऽपि सर्वप्रथमं श्रीमतीन्दिरागान्धी-

महाभागैव प्राप्नोद् यतः सा सूचना-प्रसारण-मन्त्रि-पदेऽधिष्ठिताऽऽसीत्। श्रीशास्त्रिणः स्वदेशाद् दूरे स्वदेशाय ११ जनवरी १९६६ ई० वर्षे स्वीयान् प्राणान् समार्पयन्।...

स आघातो भारतमस्तभ्नात्। देशः स्वकीयस्य द्वितीयस्याप्यद्वितीयस्य प्रधान-मन्त्रिणो मृत्योः शोके न्यमज्जयद् यः केवलमष्टादशमासानेव तस्मिन् पदे स्थातुम-शक्नोत्। इयति स्वल्पे समयेऽपि श्रीलालबहादुरशास्त्रिणः स्वदेशवासिनां हृदयानि जित्वा तेषां सम्मानं प्राप्नुवन्। तस्मादेव तदभावदुःखदुःखिता जनताऽपृच्छत्—

"जय जवान्-जय किसान" वचोऽत्र यस्य गुञ्जितं,
प्रमुच्य वैर-भावनाः स्वराष्ट्रमत्र पुञ्जितम्।
स लोक-शोक-मोचनः सदा प्रदीप्त-लोचनः,
स्वदेश-शत्रु-शोचनः क्व विद्यते क्व विद्यते' ?॥११॥
स शारदाप्रसादसूः सरस्वती-प्रसादभाक्,
प्रबुद्ध-बुद्धिरिद्धवाक् सुसिद्धगीर्विशुद्धधीः।
स संस्कृतस्य संस्कृतेश्च भक्ति-भाव-भावितः,
स्वनेतृ-मालिका-मणिः क्व विद्यते क्व विद्यते ?॥१२॥
यदीयवाचि सत्यता कृतौ न काऽप्यनित्यता,
हृदि स्थिरा धृतिः परा परेषु साहस-स्वराः।
अकम्पनीय - धैर्यवानलोलुपः सुकर्मठः
स शान्तिमार्ग-शोधकः क्व विद्यते क्व विद्यते ?॥१३॥
न निर्धनत्वमात्मनोऽपनोदनाय जायते,
प्रमाणयन्निदं प्रधान-मन्त्रितामममण्डयत्।
स राजनीति-सिन्धुरः स्वराष्ट्र-नीति-बन्धुरः,
स्व—तन्त्रता-धुरन्धरः क्व विद्यते क्व विद्यते ?॥१४॥
प्रमाद-मार्ग-संश्रितान् प्रबोद्धुमेव योऽदिशत्,
'पुरः पदं निधीयतां स्व-रक्षणं विधीयताम्।'
स्वदेश - रक्षणार्थमुत्सृजन्नसून् दिवङ्गतः,
स शास्त्रि-सत्तमोत्तमः क्व विद्यते क्व विद्यते ?॥१५॥

तथा स्वयं भारतमातुरपि स्थितिस्तदा खिन्न-खिन्नैवावर्तत। यतः सा हि—

सञ्जाता भरतावनिः क्षतहृदा पुत्रं स्वकीयं दृशो,
दूरीभूतमवेक्ष्य हा विकलिनी खिन्नानना चिन्तिता।
पृच्छन्ती च जनान् प्रसह्य तनुजो 'लालः' क्व यातोऽधुना ?,
ब्रूते मूर्च्छति वेपते विलपति क्रन्दत्यलं निन्दति ॥१६॥
हन्त! यातो दिवं श्रीमान् 'शास्त्री लालबहादुरः'।
भारतं भा-रतं कर्तुं, तस्मै सन्तु नमांसि नः ॥१७॥

□

[७]

द्युति-कला

शुभे प्रधान-मन्त्रिणः पदे विराजितेन्दिरा

इयं ते राट् यन्तासि यमनोऽसि ध्रुवोऽसि धरुणः।
कृत्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा॥

—शतपथब्रा० ५।२।१।२५

स्वसंस्कृतेः समुच्चयाय सद्विचार-चञ्चुरा,
स्वराष्ट्रमन्नतं विधातुमुद्यता यता सदा।
समाजवाद-पोषिका महामतिर्महीयसी,
शुभे प्रधान-मन्त्रिणः पदे विराजितेन्दिरा॥ १॥

यदा श्रीमतां शास्त्रि-महाभागानां दिवङ्गमनस्य सूचना स्वदेशमागता तदैव विधानानुसारं कार्यवाहक-प्रधानमन्त्रिणो भारः **श्रीगुलजारीलालनन्दा**-महोदयाय प्रदत्तः, यतो हि मन्त्रिमण्डले स एव महाभागो वरिष्ठ आसीत्। इत्थं द्वितीयवारं श्रीनन्दामहोदयः प्रधानमन्त्रिणः पदं स्वल्पाय कालाय न्यभालयत्। वस्तुतो भारतस्य संविधानानुसारं संसदो बहुमतशालिदलं स्वीयं नेतारं निर्वाचयति तथा स एव मन्त्रिमण्डलं निर्मातुमामन्त्र्यते। निर्वाचितो नेतैव स्वस्य मन्त्रिमण्डलस्य सदस्यान् नियोजयति। अनया पद्धत्या पुनर्नवीनं नेतारं निर्वाचयितुं सर्वेऽपि तत्परा अभूवन् किन्तु प्रश्नोऽयमियताऽऽकस्मिकेन रूपेण पुर उपस्थितोऽभूद् यत् काङ्ग्रेसे परस्परं कर्षाकर्षित्वं भवितुं प्रारभत। काङ्ग्रेस-कार्यकारिण्या नेतृषु महान् मतभेद आसीत् तथा राज्यशासनानि स्वायत्ततताया अधियाचनाः प्रस्तुवन्ति पृथगेवानयन्ति स्म।

तदानीं प्रधानमन्त्रिपदस्यानेकेऽधिकर्तार आसन्, येषु **श्रीमोरारजी देसाई-श्रीयशवन्तरावचह्वाण- गुलजारीलालनन्दा-जगजीवनराम-सादोबा-पाटिलप्रभृतयो**ऽवर्तन्त किन्तु सर्वेषु किमपि नैयून्यं, कश्चन संवादः काचनानुपयोगिताऽवश्यमेव प्रस्फुटिताऽदृश्यत। **श्रीकामराज**-महाभागोऽपि काङ्ग्रेसदलस्य नेतृत्वाय स्वं प्रत्याशित्वमुद्घोषयितुमैच्छत् परं स स्वयमेवाजानाद् यदहमस्मै पदाय योग्यो नास्मि, यतः स केवलं मातृभाषां तमिलमेवावेदीत्। भारत-सदृक्षे बहुभाषा-भाषिणि देशे कस्यापि हिन्दीविदो वैदेश्यभाषाविदश्च सहैव भारतीयानां जनानां विश्वास-सम्पादनक्षमस्य निर्वैरिणो जनस्यैवावश्यकतां सर्वेऽकामयन्त। बहुशो बहुषु दृष्टिपातानन्तरं 'श्रीमतीन्दिरागान्धी महाभागा तादृशाय सर्वोच्चपदाय समुपयुक्ता विद्यत' इति

सर्वैरनुभूतम्। देशे विदेशे च तस्याः प्रचुरा ख्यातिरासीदेव। तस्या अजातशत्रुत्वं तथाऽखिलभारतीय-नेत्रीरूपेण सम्मान्यत्वमपि विदितमेवासीद्, अतः श्रीकामराज-महाभागैः कार्यकारिण्यां तस्या अभिधानं प्रस्तावितं किञ्चेदमपि कथितं यन्नेतुर्निर्वाचनं निर्विरोधं सर्वसम्मत्या सम्पादनीयं यदुत्तमं गरिममण्डितं च भविष्यतीति। किन्तु श्रीमोरारजीमहाभागा व्यक्तं छन्दाकलनं विधातुमकथयन्, कारणं तस्य तेऽसूचयन् यदिन्दिरापेक्षयाऽन्येऽपि बहूपयुक्ता जना विद्यन्ते। यदा विषयेऽस्मिन् श्रीमतीन्दिरा पृष्टा तदा सा केवलमियदेवाकथयद् यद् निर्णयः सदस्यैरेव करणीयोऽस्ति यत् ते कं प्रधानमन्त्रिपदे स्थापयितुं वाञ्छन्ति ?।

निर्वाचनव्यवस्था समजायत। सर्वेपि स्वस्वशक्त्यनुसारं स्वस्वप्रत्याशिनं जयमालया भूषयितुं प्रयत्नशीला आसन्। श्रीकामराजः सर्वात्मना श्रीमत्या इन्दिरायाः पक्षेऽवर्तत। ये पुरातनवादिन आसँस्ते श्रीमोरारजीदेसाई-महाभागानां पक्षे सङ्घटनोद्युक्ता आसन् निर्वाचनतिथिश्च १९ जनवरी १९६६ ई० निर्णीताऽभूत्। १९६६ ई० जनवरीमासस्य द्वितीये दिने श्रीमतीन्दिरा सम्मान्याया आनन्दमयीमातुर्दर्शनार्थमपि गता तया च साशीर्वादमेकमुखरुद्राक्षस्य मालाऽपि तस्यै दत्ता। साशीर्वादं च सूचितं यदियं माला यावद् भवत्या ग्रीवायां स्थास्यति, तावद भवत्याः सर्वत्र विजयो भविष्यतीति। १९ जनवरी-दिने प्रातस्तरां यदा समग्रमपि नगरं कुज्झटिकाया आवरणिकामावृत्य प्रसुप्तमभवत् तदा साऽऽत्मनोर्द्वयोराराध्यस्थानयोरगच्छत्—प्रथमं सा राजघट्टे यमुनायास्तटे महात्मनां श्रीगान्धिनां समाधिस्थलं प्राप्ता। तत्र तेषां समाधेः समक्षमुपस्थाय प्रार्थना विहिताऽऽशीश्च याचिता। ततः सा शान्तिवनं गता यत्र श्रीजवाहरलालनेहरूणां पार्थिव-शरीरस्य दाहसंस्कारोऽक्रियत। यदा सा स्वेषां पितृपादानां समाधेरग्रतः स्थिताऽऽसीत् तदा तेषां तत्पत्रमस्मरद्—यत्तैस्तस्यास्त्रयोदशे जन्मदिवसे लिखितमासीत् —

ईदृक् कार्यं किमपि न कदाऽप्यत्र कार्यं निगूढं,
यत् स्यादन्यैर्भवदभिमतं गोपनीयं प्रयत्नात्।
इच्छा तादृश्यथ भवति चेद् भूरि भीतेः प्रमाणं,
तन्नो योग्यं, त्यज भुवि ततस्त्वं भवेः शूरवीरा ॥२॥

शूरा भव त्वं तनये ! तदा स्वयं, प्राप्स्यन्ति वस्तूनि ततस्तवान्तिके।
त्वच्छूरतायां न भयं भविष्यति, कार्यं न लज्जाजनकं करिष्यसि ॥३॥

सूर्येण मैत्री सम्पाद्या, कार्यमस्माभिरुत्तमम्।
कार्यं प्रकाशे येन स्याद्, गोप्यं किञ्चिदपीह न ॥४॥

इमां निकष-पट्टिकां यदि पुरो निधायात्मनो,
विधास्यसि समाः क्रिया विगतभीश्च शान्ता तदा।
प्रकाशतनया भविष्यसि मनः प्रसन्नं च ते,
स्वराष्ट्रजन-सेवनेऽनवरतं रतं स्थास्यसि ॥५॥

इत्थं स्थैर्य-धैर्याभ्यामात्मप्रेरणां लब्ध्वा ततः सा त्रिमूर्तिभवनमध्यगात्। तत्र पितॄणां प्रकोष्ठे यथावद् विष्टरस्य निकटवर्तिनि लेखनपटले लेख्यपत्र-पञ्जिकायां लिखिता 'राबर्ट फास्ट' कवेः सा कविताऽपि तदीय-स्मृतिमुपेता —

गहनं किल कान्तारं, रम्यास्तरवः सुशीतला च्छाया।
प्रणपूर्त्यै किन्तु मया, शयनात् प्रागस्ति यातव्यम्॥६॥

सकलमिदं विचारयन्त्यपि **'यद् भावि तद् भविष्यती'**ति विश्वस्य, संसदः केन्द्रीये प्रकोष्ठे मतदानाय परिणामज्ञानाय तथा वार्ताः प्रसारणाय समुपस्थिते जनसमूहे निखिलैः सदस्यैः सह श्रीमतीन्दिरागान्धीमहाभागाऽप्यतिष्ठत्। अपराह्णे प्रायस्त्रिवादनसमये निर्वाचनाधिकारी मतगणनायाः परिणामं श्रीकामराजस्य हस्तेऽर्पयत् तेषां प्रसन्ना मुखमुद्रैव परिणामस्यानुकूल्यं सूचयति स्म। तैः पूर्वं तमिल-भाषया परिणामो घोषितस्ततः परमाङ्ग्लभाषयाऽनूद्य श्रावितः। तत्र श्रीमती-इन्दिरागान्धी-महाभागा पञ्चपञ्चाशदुत्तर-त्रिशतमितानि मतानि प्राप्नोत् तथा श्रीमोरारजीदेसाई-महोदयः केवलमूनसप्तत्युत्तरैकशतमितानि मतानि लब्धवान्। श्रीमतीन्दिरा संसदः काङ्ग्रेसदलस्य नेत्री निर्वाचिता। सर्वेऽपि तस्यै वर्धापनान्य-र्पयितुमुत्सुका आसन्। सा संसदत्सदस्यैः सह पृष्ठभागे स्थिताऽवर्तत। विनम्र-भावेन तत उत्थाय प्रथमं मोरारजीभ्रातुर्निकटे गत्वाऽऽशिषोऽकामयत। प्रणम्य साऽवदत्—'दीयतामाशीर्वादा मोरारजीभ्रातः! यत् पुर उपागतवतां दायित्वानां भारोद्वहने क्षमा भवेयम्।' ते स्मितिं विनाऽकथयन् —'अहं तुभ्यमात्मन आशीर्वा-दान् ददामि।'

ततः परं मञ्च उपस्थायात्मानं देशसेविकात्वेन वृतां मत्वा दलस्य समक्षं भाषमाणया श्रीमत्या गान्धीमहाभागया निगदितमासीत् —

"अद्य मम स्वान्तं सम्भृतं विद्यते तथा नाहं वेद्मि यत्कथं भवतां धन्यवादं कुर्याम्? एतस्मिन्नवसरेऽस्माकं महतां नेतॄणां— महात्मगान्धिनां, येषां चरणयोः स्थित्वा मया शिक्षणस्यावसर उपलब्धस्तथा मम पितुः पण्डितमहाभागानां श्रीलालबहादुरशास्त्रिणां च स्मरणमायाति। श्रीशास्त्रिणस्तथा पण्डितश्रीपन्त-महाभागा एव मां स्वतन्त्रता-प्राप्तेरुत्तरवर्तिन्यां राजनीतावानयन् किञ्च यदा यदैव मया राजनीतेस्त्यागवार्ता विचारिता, ते मां राजनीतौ स्थितये प्रैरयन्। एते नेतारोऽस्मान् मार्गमदर्शयन् साम्प्रतं मार्गेऽस्मिन्नेव चाहमग्रे वर्धितुमभिलषामि। श्रीलालबहादुरशास्त्रिणः शान्तये स्वजीवनस्य बलिदानमकुर्वन्। अस्माभिः शान्ति-स्थापनायाः प्रयासैः सह स्वकीयो देशः शक्तिशाल्यपि सम्पादनीयः किञ्चास्य सुरक्षायाः सम्पूर्णव्यवस्था विधातव्या।

अहमात्मानं सदैवैकां देशसेविकाममानयम्, यथा मम पितर अत्मानं देशस्य प्रथमं सेवकं मानयन्ति स्म, अहमप्यात्मानं दलस्यास्य देशस्य च महत्या जनतायाः सेविकामवगच्छामि।

अस्माकं देशोऽतीव प्राचीनोऽस्ति तथास्य महत्यः परम्पराः सन्ति। अस्त्यत्र देश ईदृशं किमपि यद् यस्य कारणान्निरक्षरतायां पश्चाद्वर्तितायां च सत्यामपि, अस्य जना महतां महतां प्रत्याह्वानानामाभिमुख्यायोत्थिता भवन्ति। अहं सर्वथाऽऽशावत्यस्मि यद् वयमेकत्वेन प्रत्येकं समस्याया आभिमुख्यं कर्तुं शक्नुमः।

अहं विशिष्य श्रीमोरारजि-देसाई-महाभागानां धन्यवादं चिकीर्षामि यतस्त एकतायै कार्यं कर्तुं समकल्पयन्। राजनीतौ निर्वाचनं सामान्या वार्ता विद्यते, परमेकवारं निर्वाचने निष्पन्ने सतीदमेव वास्तविकमुचितं च भवति यन्मतभेदान् विस्मृत्य वयं सर्वे संयुज्य कर्माणि सम्पादयेम विशेषतस्तस्मिन् समये यदा देशस्याग्रे भूयांसि काठिन्यानि वर्तन्ते।

अहमाशासे यद्भवद्भिर्मयि यो विश्वासो विहितः, अहमात्मानं तदनुरूपं साधयितुं शक्ष्यामि। अहं पुनरेकवारं भवतां सर्वेषां धन्यवादं विदधामि।"

साभिवादं संक्षिप्यैवं निवेद्य सदनाद् बहिः प्रतीक्षामादधानां राष्ट्रियकार्य-कर्तॄणां जनानाञ्च वर्धापनाः स्वीकर्तुं श्रीमतीन्दिरागान्धी संसद्भवनाद् बहिरायाता। प्रायो दशसहस्र-जनानां समवायेन तस्या जय-जयघोषैः स्वागतञ्च विहितम्। श्रीनेहरूणां नीतिषु विश्वसन्ती श्रीमतीन्दिरा गान्धी भारतीयानां हृदयेषु महान्तं समादरं तथा तेषां स्वातन्त्र्यसङ्ग्रामस्य नेहरूपरिवारेण कृतानां त्यागानां परम्परां प्रति कृतज्ञतावशात् पर्याप्तं सौहार्दं सम्प्राप्ताऽऽसीत्। प्रारम्भे श्रीनेहरूणां सांन्निध्येन राजनीतौ प्रविष्टा, क्रमशः प्रावीण्यं प्राप्य काङ्ग्रेसदलस्याध्यक्षतां भूषयित्वा भारतस्य प्रधानमन्त्रि-पदं सा समभूषयदिति ज्ञात्वाऽपारमानन्दमनुभवन्तो भारतीया अतीव हर्षनिर्भरा आसन्।

ततः परं सा सर्वेषामभिनन्दनानि वर्धापनानि शुभाशंसनानि शुभाशासनान्याशीर्वचनानि माल्यार्पणानि स्वागतानि च सविनयं सादरभरं स्वीकुर्वती राष्ट्रपतिभवने श्रीमद्भिर्महामहिमराष्ट्रपति-श्रीराधाकृष्णन्महाभागैः सम्मिलितुमगच्छत्। राष्ट्रपतयः साभिनन्दनं सर्वकार-निर्माणाय न्यमन्त्रयन्। सायं सप्त-वादनवेलायां सफदरजंगमार्गस्य समक्षं धवल-निवासस्थानस्योद्याने समायोजिते संवाददातृ-सम्मेलने, दीप्तिमतीं शाटिकां धृत्वा कर्बुरवर्णवतीमूर्णा-प्रावरणीं चावृत्य श्रीमती गान्धीमहाभागा प्रायेण द्विशतमितानां संवाददातॄणां प्रश्नानुत्तरयन्ती भावि-नीति-सम्बद्धानादर्शान् विचारांश्च यथायथं प्राकाशयत्। यद्यपि साऽत्यन्तं सावधानतया कयाऽपि प्रमुखया नीत्यात्मानं नैव समबध्नात् तथापि तार्किकाणां प्रश्नानामतीव कौशलेनोत्तराण्यदात्। ये प्रश्ना असम्बद्धा निरर्थका वासँस्तान् मधुरस्मित्याऽमोचयत्'। तत्रैव कैश्चन पृष्टस्य "प्रधानमन्त्रिपदे निर्वाचनोत्तरं तत्रभवत्या महिलात्वेन तत्रभवती कीदृशमनुभवती'ति-प्रश्नस्योत्तरे सा स्पष्टमवादीद् "अहमस्मै कार्यायात्मानं महिलां न वेद्मि। यदि नाम कस्या अपि महिलायाः समीपे कस्यापि व्यवसायस्य योग्यता विद्यते तर्हि तस्यै तस्य व्यवसायस्य

सम्पादनायानुमतिर्दातव्यैव। किञ्चाहं नास्मि नारी-स्वातन्त्र्यस्य समर्थिका। अहं मनुष्योऽस्मि। स्वीये कर्मावसरे स्वां नारीं नाकलयामि। भारतीय-संविधानानुसारं लिङ्ग-भाषा-राज्यादिभेदभावेभ्यः परे सर्वे नागरिकाः समानाः सन्ति। अहं भारतस्य नागरिकमात्रमस्मि। अहं देशस्य प्रथमा सेविकाऽस्मि---देश-सेविका।"

विश्वस्य सर्वाधिक-विस्तृतस्य, देशस्य सर्वोत्तम-शासनस्य।
सत्तां समर्प्यातितरां प्रमोदं, प्राप्ताः स्वदेश्या महिला-कराब्जे॥ ७॥

निर्वाचितां सर्वगुणैः सुशोभितां, पदे प्रशस्ते महिलां महीयसीम्।
विज्ञाय सर्वोऽपि जनश्चमत्कृतो, जगच्च नूनं बहु विस्मितिं गतम्॥ ८॥

२४ जनवरी १९६६ ई० दिने श्रीमतीन्दिरा गान्धी प्रधानमन्त्रि-पदस्य शपथमगृह्णात्। शपथग्रहण-समारोहे सा महाभागा राजतेन तन्तुसन्तानकर्मणाऽलङ्कृतां सितां शाटीं परिधाय शान्तया स्पष्टया वाचा श्रीराधाकृष्णन्महोदयैरुच्चारितान् शब्दान् पुनरावर्तयत्। तस्मिन् समारोहे श्रीमती विजयलक्ष्मी-कृष्णमैनन्-प्रभृतयोऽपि समवेता आसन्। श्रीमती गान्धी पदस्य गरिमाणं प्राप्यापि सहजां विनम्रतां नात्याक्षीत्। तस्मादेव सा सर्वेषां सद्भावना अभावयत्। निर्वाचने प्रतिप्रत्याशिनः श्रीमोरारजीभ्रातॄनपि सा स्वीये मन्त्रिमण्डलेऽग्रहीत्। देशस्य स्वाभिमानाय तथा काङ्ग्रेसदलस्य सिद्धान्तान् प्रति निष्ठायै सा प्रधानमन्त्रिपदे वर्तमाना मनागपि शिथिलतां नाङ्ग्यकार्षीत्। सेदमप्यजानाद् यदिदं पदं **'कण्टक-मुकुट'**मिव विद्यते तथापि सा साहसेन स्वदेशसेवार्थमात्मानं समार्पिपत्। सा तु स्पष्टमेव मनुते स्म यत्---

पञ्चाशत्कोटिसङ्ख्यावति जननिवहे सन्ति या याः समस्या—
स्तासां सङ्ख्याऽस्ति तावत्यनुपदमुदिता भारते व्यात्तवक्त्रा।
शय्या नेयं प्रशास्त्रे कुसुमविरचिता वेद्मि तत् सर्वमेतत्---
सेवार्थं राष्ट्रमातुर्नुदति परमिदं मुख्यनेत्री-पदं माम्॥९॥

अत एव सा २६ जनवर्यां गणतन्त्रदिवसमुपलक्ष्याकाशवाण्या राष्ट्राय प्रथमं सन्देशं प्रसारयन्त्यकथयत्—"त्रिंशद्वर्षेभ्यः पूर्वमद्यतन एव दिवसे मया हृदयानि झङ्कुर्वत्सु शब्देषु परःसहस्रैर्जनैः सह स्वतन्त्रतायाः शपथं गृहीतमासीत्। १९४७ ई० वर्षे तच्छपथं पूर्णतामगच्छत्। निखिलेन विश्वेन स्वीकृतं यज्जनतन्त्रे धर्मनिरपेक्षितायाञ्चाधारिताया एकस्याः प्रगतिशीलशक्तेरुदयोऽभूदिति। श्रीजवाहरलालनेहरूणां प्रधानमन्त्रित्वस्य सप्तदशवर्षेषु धर्म-समुदाय-भाषाणां समस्ताभिर्विभिन्नताभिः साकमस्य देशस्यैक्यमेकं तथ्यं सम्पन्नं तथा जनतन्त्रस्य जन्माभूत्, तेन मूलानि गृहीतानि।

अस्मदीय-जनानां जीवनं समुचितं विधातुमस्माकं प्रथमं चरणमासीत् नियोजित आर्थिकविकासः। पराधीन-जनेभ्यः स्वातन्त्र्यप्रदानाय भारतं सदा स्वीयं

स्वरं समुदनयत्। यस्मादनेकेभ्य आशाऽमिलत्, साहसः प्राप्तः। भारतस्य सीमभ्यो बहिः स राष्ट्रेषु मैत्र्याः शान्तेश्च स्वरविस्तारकरूपेण श्रुतः।

अस्माकं पुरतो या महत्यः समस्याः सन्ति, ता अहं विनम्रतापूर्वकं समाधातुमभिलषामि। महात्मगान्धिना मम जनकेन च प्रवर्तिताः परम्परास्तथा भारतं प्रति स्वीयं विश्वासं विलोक्य मह्यं शक्तिर्विश्वासश्चोपलभ्येते। भारतेन स्वस्यापराजेयत्वस्य प्रमाणानि नैकशो दत्तानि। पूर्ववद् विगतेषु वासरेष्वपि तेन स्वस्य साहसस्य तथा नवीनानामाह्वानानामाभिमुख्यस्य क्षमतायाश्च परिचयः प्रस्तुतः। अत्र भारतीयताया एकः सुदृढ आधारो विद्यते यः कीदृश्या अपि परीक्षायाः साम्मुख्ये प्रभवति।

आगामिनो मासा कठिनाः सन्ति। अस्माकं समक्षमगणिताः समस्याः सन्ति याः प्रति तत्कालं ध्यानदानमावश्यकं विद्यते। वर्षाया अभावे बहुषु भागेषु दुष्काल आपतितः। परिणामतस्तत्र कृष्युत्पादनं न्यूनमभवत्। विदेशादार्थिकसाहाय्यस्य तथा निर्यातान्लाभस्य यावत्याशाऽवर्तत तावती नाभूत्। विदेशि-मुद्राणां नैयून्येनौद्योगिकोत्पादनेऽपि प्रभावः सञ्जातः। अस्माभिरेतानि काठिन्यानि दृष्ट्वा न सन्तप्तव्यं किञ्च साहसोऽपि नापाकरणीयः। अस्माभिः ससाहसं सम्मुखीनैर्भवितव्यम्, अस्माभिः स्वस्खलितैः शिक्षितव्यं तथा भूयस्तानि न भवेयुस्तथा वर्तितव्यम्।

अकालस्यास्मिन् वर्षेऽस्माभिरात्मजनेभ्योऽन्न-सङ्ग्रहः कर्तव्य एव। तच्छासनस्य प्रथमं कर्तव्यम्। आयाततिस्य तथा देशस्यान्नव्यवस्थां तस्योचितवितरणं प्रति च तत्कालमस्माभिर्ध्यानं दातव्यमस्ति। अन्नस्य व्यवस्थां तथा वितरणस्यास्माकं सर्वा योजनाः प्रवर्तयितुं वयं राज्यसर्वकाराणां तथा सर्ववर्गीयाणां जनानां पूर्णं सहयोगमाशास्महे। केरलसदृशानि क्षेत्राणि प्रति, यत्राभावस्य स्थितिरतीव गम्भीरा विद्यते, विशिष्य ध्यानं दास्यते। अकालस्य क्षेत्रेषु मातृणां बालानामाहारं प्रति विशिष्य ध्यान-प्रदानाय वयं यतिष्यामहे, यतस्तेषां स्वास्थ्यं स्थायिनः सङ्कटस्योपागमनाद् रक्षितुं शक्येत।

केवलमधिकमुत्पादनमेवास्माकं खाद्यसमस्यां समाधातुं शक्नोति। कृषकान् यावज्जलं रासायनिकमुर्वरकं, सुबहूत्पत्तिकराणि बीजानि, यान्त्रिकं साहाय्यमृणञ्च प्रापयितुं रुचिरा योजनाऽस्माकं समीपे वर्तते। कृषेः क्षेत्र आत्मनिर्भरत्वं सर्वतः प्रथममावश्यकमस्ति। एतेन न केवलमस्माकं महत्यास्तथा निरन्तरं प्रवर्धमानाया जनसंख्याया आवश्यकता पूरणीयाऽपि तु निर्यातायाप्यधिकमुत्पादनं कर्तव्यं विद्यते। आर्थिकोन्नतेरस्माकं नीतौ सार्वजनिकक्षेत्रे सुदृढोद्योगस्य विद्युतो यातायातस्य गतिशीलाया विस्तृतेर्महत्त्वपूर्णा भूमिका वर्तते। अस्मादृशीषु स्थितिष्विदं केवलमिदं वाञ्छनीयमेव नास्ति परमावश्यकमप्यस्ति। एतया सार्वजनिके क्षेत्रे नवीनानुद्यमानारभ्य तेषां सुचारुरूपेण प्रवर्तनं तथाग्रिमविनियुक्तद्रव्याय पर्याप्तलाभप्रापणमप्यनिवार्यं भवति। अस्माकं योजनानां स्वरूपे सार्वजनिकस्य स्वात्मनः क्षेत्रस्य

मध्ये परस्परं न किमपि वैमत्यम्। अस्माकं मिश्रिताऽर्थव्यवस्थायां नैजोद्योगः फलितः पुष्पितश्च तथा सर्वकारपक्षतस्तस्मै साहाय्यमपि प्राप्तम्। वयं तस्याभिवर्धनं तस्मै सहायता-प्रदानं च न रोत्स्यामः।

साम्प्रतिकीभिर्घटनाभिरस्मभ्यं तान्त्रिक्या आत्मनिर्भरतायाः पूर्णाः सम्भावना गवेषयितुमनिवार्याः कृताः सन्ति। वयं विदेशाद् यस्याः सामग्र्या आयातं कुर्मोऽभियान्त्रिक्याः क्षेत्राय याः सेवाः स्वीकुर्मस्तथा यद्यद्ज्ञातव्यं वयं बहिर्भागात् प्राप्नुमस्तदस्माकं देशीयस्रोतोभ्यः कथमुपलब्धुं शक्यते ? अस्माकमुन्नतिरस्माकमाविष्कृतेः परिष्कृतेः परिवर्तनस्य संरक्षणस्य च क्षमतया संयुक्ताऽस्ति। अस्माकं समीपे गुणवतां वैज्ञानिकानामभियन्तॄणां तन्त्रकर्मिणां च नास्ति नैयून्यम्। अस्माभिस्तेषां समीचीन उपयोगः कर्तव्य एव।

अन्येषां क्षेत्राणामिवार्थिके विकासेऽपि कामनायास्तस्याः क्रियान्वयनस्य च मध्ये महती खातिका विद्यते। एतां खातिकां पूरयितुं प्रशासने यान्यपि परिवर्तनान्यावश्यकानि भवेयुस्तान्यस्माभिः ससाहसं सम्पादनीयानि। अस्माभिर्व्यवस्थापनस्य तथा प्रशासनस्य नवा आधुनिकाश्च प्रकारा आत्मसात् करणीया एव। सर्वकारतन्त्रेऽधिकं कार्यक्षमताऽऽनेतव्या। आवश्यकताऽनुभवितव्या यतस्सा जनानावश्यकता अत्यधिकं जागरूकाः कर्तुं शक्येत।

अस्माकं परम्परां स्मृतौ धारयद्भिरस्माभिः सर्वानेव देशान् प्रति शान्तेमैत्र्याश्च नीतिः स्वकृताऽस्ति, स्वीतन्त्रयाः सम्मतेरधिकारोऽवश्यमेवात्मनो निकटे रक्षितः। स्वस्या विदेशनीतेः स्थिरीकरणसमयेऽस्माभिर्येषां सिद्धान्तानां पालनं कृतमस्ति, तेऽस्माकं देशस्य परम्परानुसारिणः सन्ति तथा राष्ट्रियेण हितेन सम्मानेन चापि साम्यं भजन्ते। मम पितृपादानां मौलिकाः सिद्धान्ता, येषां कृते ते शास्त्रिणश्च समर्पिता आसन्,अस्माकं मार्गदर्शनं कुर्वन्तः स्थास्यन्ति। अहं शान्तेरन्ताराष्ट्रियसहयोगवर्धनस्य च दिशि कार्यं करिष्यामि, येन सर्वेषु स्थलेषु जना निर्भयं समानतया स्थातुं शक्नुयुः।

वयं शान्तिं वाञ्छामः, यतो ह्यस्माभिरेकमन्यद् युद्धं कर्तव्यमस्ति—दीनताया रोगस्याज्ञानस्य च विरुद्धं युद्धम्। कार्यमन्नं वस्त्रं गृहं स्वास्थ्यं शिक्षा चेत्येषां विषयेऽस्माकं देशस्य निर्बलमथ चाल्पाधिकारवन्तं वर्गं, यस्मै सामाजिक-सुरक्षाया आधिक्येनावश्यकता विद्यते, अहं प्राथमिकतायां प्रथमं स्थानं ददामि।

युव-वर्गायाधिका अवसरा उपलब्धव्याः। भारतस्य तरुणैरिदं ध्यातव्यं यद्य देशाय ते यद्ददति, तदेव श्वो देशस्तेभ्यः प्रतिदास्यति। देशोऽभिलषति यत् त उन्नता भवेयुः। विज्ञापनस्य कलाया विचारस्य क्रियायाश्च विश्वं तानाह्वयति। अस्माभिर्नूतनाः सीमा उत्तरणीयाः सन्ति, नवीनानि क्षितिजानि स्प्रष्टव्यानि तथा नवान्युद्देश्यानि साधनीयानि सन्ति।

अस्माकं धर्मा भाषा राज्यानि च यानि कानि वा भवन्तु, वयमेकस्यैव देशस्य जनाः स्मः। वयं सर्वे कृषकाः कर्मकराः शिक्षकाश्छात्राः, वैज्ञानिकास्तान्त्रिकाः, उद्यमिनो व्यवसायिनः, राजनीतिज्ञा जनसेवकाश्च स्वपक्षतः पूर्णतया प्रयतेमहि। अस्माभिः सुदृढैः सहनशीलैरनुशासितैश्च भवितव्यं यतो हि सहनशीलताऽनुशासनञ्च लोकतन्त्रस्याधारभित्तिभूते स्तः। वयं यं प्रगतिशीलं समाजं यां न्यायपूर्णां सामाजिकव्यवस्थाञ्च निर्मातुमिच्छामः, लक्ष्यस्यैकेन परिश्रमेण सहयोगेनैव ते सम्भाव्येते।

अद्याहं स्वमात्मानं स्वदेशस्य निर्मातॄणामादर्शाणां लोकतन्त्रस्य धर्मनिरपेक्षतायाश्च नियोजितायाः सामाजिकार्थिकोन्नतेस्तथा देशस्य मध्ये शान्ति तथा मैत्रीं प्रति वचनबद्धां भावयामि।"

एतेन सन्देशेन समग्रमपि भारतं राष्ट्रं श्रीमत्या इन्दिरा-महाभागाया वास्तविकीं कर्तव्यभावनां स्वदेशस्य स्थितिमावश्यकतां च ज्ञातुं प्राभवत् स्वदेशाय कथं केन वर्तितव्यमिति च स्पष्टमबोधत।

स्पष्टा स्थितिर्व्यक्तविचारपूर्णा भाषा तथा भावनिबद्धदृष्टिः।
छलं विना वस्तु-विधाननीतिः प्रीतिं समुत्पादयतीह लोके ॥१०॥

□ स्वदेशस्य नेतृत्वं सङ्घर्षश्च

स्वदेशस्य नेतृत्वमुद्योतयन्ती, महत्त्वप्रपूर्णं पदं शोभयन्ती।
जनान् सेवमानाऽसमाना स-माना व्यराजत् सदैवेन्दिरा भासमाना ॥११॥

श्रीमत्या इन्दिराया भारते प्रधानमन्त्रिरूपेण चयनं समसामयिकेतिहासे स्वपद्धतेः प्रथमैव घटनाऽऽसीत्। तस्याश्चयनञ्चाभवत् स्वस्य प्रगतिशीलस्याधुनिकदृष्टिकोणस्य कारणात् स्वस्या जन-सेवायाः कारणाद् राजनीतेस्तथा राज्यकार्यस्यात्मनो मूल्यवतामनुभावानां कारणात्। १ मार्च १९६६ ई० दिने सा प्रधानमन्त्रिरूपेण संसदि प्राविशत्। वैदेशिकास्तु श्रुत्वैव विस्मयं प्राप्नुवन् यत् पञ्चाशत्कोटिजनवसतिशालिनो राष्ट्रस्य प्रशासनसूत्रमेकस्यै महिलायै समर्पितम्। सर्वतोऽधिकमाश्चर्यं त्वमेरिकावासिनोऽन्वभवन्, यतस्तेषां राष्ट्रे राष्ट्रपतिपदाय महिलाया निर्वाचनस्य कल्पनाऽपि दुःशकैवासीत्।

विश्वस्य राजकीययात्रासु प्रथमां यात्रां श्रीमती गान्धी राष्ट्रपतेः श्रीमतोजॉनसन-महोदयस्य निमन्त्रणेन २७ मार्च १९६६ ई० दिने वाशिंगटन-नगरं प्राप्यामेरिकाया राजकीयायात्रातः प्रारभत। तत्रत्येषु वार्ताहरेषु प्रश्नानुत्तरयन्ती सा भारतस्य महिलानां स्वतन्त्रता-सङ्ग्रामे, राजनीतौ, सार्वजनिके जीवने प्रामुख्येन स्थितीरनुरक्तीस्तथाऽभियान्त्रिक - राज्यपाल-राजदूत-न्यायाधीश-राजनयिकादिपदेषु सफलतापूर्वकं कार्याणि कुर्वतीनां साफल्येन प्रत्यपादयत् तथैव प्रशासकीयेषु

पदेष्वपि महत्त्वपूर्णां भूमिकां ता निर्वहन्तीति प्रत्याय्यात्मनो महिलात्वेन निर्वाचने न किमपि वैचित्र्यमस्तीत्यवा बोधयत्। भारते तदानीं १९६६ ई० वत्सरे संसद्यूनषष्टि-मिता महिलासदस्या आसन्, सप्तदशराज्यानां विधानसभासु तु भूयस्यो महिला-सदस्या विधायिका अवर्तन्त। श्रीमती सुचेता कृपलानी च भारतस्य सर्वतो महतो राज्यस्योत्तरप्रदेशस्य मुख्यमन्त्रिपदे विराजमानाऽभवत्। इत्थं भारतीयैरावैदिक-कालात् स्वीकृतो महिलानां सम्मानभावः साम्प्रतं यावद् यथावत् प्रवर्त्यत इति स्पष्टतया कथनेन सा भारतस्य गौरवमप्यवर्धयत्।

अमेरिकायां श्रीमतीन्दिरागान्धी सर्वातिशायि-सम्मानं प्राप्नोत्। राष्ट्रपति-महाभागास्तेषां पत्नी चातीव सौहार्दं प्राकटयताम्। तत्र विहितानां वार्तानां परिणत्या तस्मै वर्षायातिरिक्तसाहाय्यरूपेण पञ्चाशत्कोटिडालरमुद्राणां साहाय्य-राशौ वर्धनं प्रतिज्ञातम्। भारतामेरिकयोः परस्परं सद्भाव-मैत्री-संवर्धिन्या मनः-स्थितेर्वातावरणं सम्पाद्य श्रीमती गान्धी ततो लन्दन-पेरिस-मास्को-नगराणामपि यात्रामकरोत्। सर्वत्र साऽऽत्मानंराष्ट्रपति-श्रीजॉनसन-महोदयस्य कथनानुसारं 'पूर्णा स्वाभिमानिनी, अत्यन्तं शालीना योग्या च महिला विद्यत इत्येव नासाध-यदपि तु पूर्णतः स्वीय-पद्धतेर्निर्णयवती स्वाधीनचित्ता प्रशासिका'ऽस्तीत्यपि पूर्णतया प्राचीकटत्।

श्रीमतीन्दिरागान्धी महाभागा यस्मिन् वर्षे प्रधानमन्त्रिपदाय निर्वाचिताऽऽ-सीत् स वर्षो वस्तुतोऽनेकासां समस्यानां वर्ष आसीत्। १९६५ ई० वर्षे पाकिस्तानेन सह प्रवृत्तस्य युद्धस्य समाप्त्यनन्तरं १९६६ ई० वत्सरे युद्धे जातानां क्षतीनां पूरण-मत्यावश्यकमभूत्। देशे यानि विकासकार्याणि प्रवर्तितान्यासन् तेषामभिवृद्धये सुदृढस्य प्रयासस्यापेक्षाऽवर्ततैव। केरलेषु तस्मिन्नेव वत्सरे खाद्यान्नस्य सङ्कटो ऽपि भीषणतां प्राप्तः, मिजोक्षेत्रस्था नागाविद्रोहिण उत्पातेन जनान् भीषयन्ति स्म, बङ्गेषु कृष्णापणिका भ्रष्टाचाराश्च व्यापारिणोऽन्नसङ्ग्रहेण कलकत्तानगर्यामन्ना-भावं समुदपादयन्। वामपथानुसर्तारः पश्चिमबङ्गप्रशासका असहयोगेन केन्द्रशासनं निन्दन्ति स्म। इत्थं प्रायः सर्वासु दिक्षु मुखानि व्यादाय समस्या उपस्थिता आसन्। तथापि धैर्येण साहसेन च सर्वासां समाधानाय श्रीमतीन्दिरा गान्धी दिवा-निशं प्रयस्यन्ती सम्पूर्णेन विवेकेन तत्पराऽभूत्। समाहिताश्च भूयस्यः समस्याः। तया महाभागया खाद्यान्ननीतौ पुनर्विचारं कर्तुं तथा १९६२ ई० त आरब्धाया **राष्ट्रस्यापात-स्थितेरपवारणाय** वचनं दत्तम्। एको नवीन आर्थिकः कार्यक्रमः प्रस्तावितः। भारतीय-रूप्यक-मुद्राया ३६ प्रतिशतमवमूल्यनं विहितम्। सर्वकारीय-प्रयासाः प्रोत्साहिताः। प्रथमदुष्कालानन्तरं केरलेषु पश्चिमबङ्गेषु च खाद्यान्न-प्रेषणायादिष्टम्। उत्कल-मध्यप्रदेश-महाराष्ट्राणामभावग्रस्तक्षेत्रेषु भ्रमणं विधाय राज्यसर्वकारा व्यापिन्याः संहायतायाः कार्याणि खाद्यान्नवितरणस्य

व्यवस्थाश्च विधातुं प्रबोधिताः। सघनायाः कृषेः कार्यक्रमः समर्थितः। उपलब्धस्य खाद्यान्नस्य सत्वरतया यत्र तत्र प्रेषणं कृतम्। पर्याप्तरूपेण वास्तविकमूल्यवतीनां विपणीनां व्यवस्था सम्पादिता। द्वितीयवारमापतितस्य दुष्कालस्य स्थितौ बिहार-पश्चिमबङ्गाल-केरलेषु काङ्ग्रेसेतरसर्वकारेभ्यो यथासम्भवं सहयोगः प्रदत्तः। इत्थं सा महाभागा सङ्कटापन्नायामवस्थायां स्वल्पात् स्वल्पतरं काठिन्यं कष्टं चानुभूय पारमुत्तरणेनात्मानमेव धन्याममन्यत।

किञ्चाक्तूबर १९६६ ई० मासि देहल्यामेकं **त्रिपक्षीय-सङ्घनिरपेक्ष-शिखरसम्मेलन**'मायोजितम्। **मिस्र-यूगोस्लावियाभ्यां** सह भारतस्य नैकटिक-सम्बन्धाय पुनर्जीवनदानाय च भारतस्य विदेशनीतावुपनिवेश-विरोधिनीनां प्रवृत्तीनां पुनः संस्थापनाय च प्रयतितम्। राष्ट्रपति-**श्रीटीटो-राष्ट्रपतिश्रीनासर-**महोदयाभ्यां साकं सम्मन्त्र्य संयुक्तरूपेणोत्तरवियतनाम-प्रदेशेऽमरीकाया अग्न्यस्त्रवर्षणं पणं विनाऽवरोद्धुं निवेदितम्। एता उपलब्धयो वस्तुत एकस्मै देशायैकस्यै प्रशासिकायै महत्त्वपूर्णा एवावर्तन्त। भारतीय-संस्कृतेरयमेव सिद्धान्तोऽत्र तया स्वीकृत आसीद्, यत्—

अकृत्वा पर-सन्तापमगत्वा खल-मन्दिरम्।
अक्लेशयित्वा चात्मानं यत् स्वल्पमपि तद् बहु ॥ इति।

इयदेव नैव; तेष्वेव दिवसेषु भाषाणामाधारेण पञ्जाब-प्रान्तस्य विभाजन-प्रश्नोऽपि तीव्रतां प्राप्तः। तस्य दीर्घकालादागतवतो विवादस्य समाप्त्यै १-११-६६ ई० दिने प्रधानमन्त्रिमहाभागया विभाजनस्यापि स्वीकृतिर्दत्ता। तया स्वीकृत्या हरियाणावासिनो विकासस्य समुचितानवसरानलभन्त। विपक्षा विरोधमप्यकार्षुः। केचन हरियाणा-पञ्जाब-दिल्लीषूपद्रवा अप्यभूवन्। गोरक्षान्दोलनमपि तदैवारब्धम्। श्रीगुलजारीलालनन्दामहोदयोऽपि त्यागपत्र-मदात् कारणं च तस्य स्वीयानां सहयोगिनामदूरदर्शितां व्यावृणोत् तस्यान्दोलनस्य प्रतिक्रिया-स्वरूपं च १९६७ ई० वत्सरे सम्पन्नेषु महानिर्वाचनेषु काङ्ग्रेसदलेन पूर्ववद् बहुमतं नाधिगतम्। केवलं २८२ स्थानानि जित्वैव सन्तोषं प्राप्नोत्। गोरक्षान्दोलनप्रभावाज्जनसङ्घेन देहल्यां बहुमतेन विजयः प्राप्तः। मद्रास-प्रान्ते **'डी० एम० के०'**-दलेन तथोत्कलप्रदेशे **'स्वतन्त्रदलेन'** शासन-सत्ता स्वायत्ती कृता। तदा श्रीमतीन्दिरा गान्धी मनागपि मानसीं व्यथां चिन्तां वा नैवानुभवन्ती यथाकालं यथाप्राप्तं स्वीकृतवती, यतस्सा निश्चितरूपेण मनुते स्म यद्—

यत्र स्वेष्टं प्रतिनिधिमथ स्वेच्छया वीतभीका,
लोकाश्छन्दाकलन-विधिना साधु निर्वाचयेयुः।

जित्वा कुर्यात् प्रतिनिधिरपि स्वीय-कर्त्तव्यरक्षां,
तस्याख्याऽऽस्ते भुवन-विदिता वस्तुतो लोकतन्त्रम् ॥१२॥

किन्तु निर्वाचन-प्रचारकालस्य मासद्वयावधिकदिवसेषु तत्रभवतीन्दिरा-गान्धीमहाभागा पञ्चदशसहस्रोत्तरद्विशत-मीलमितां यात्रामकरोत् किञ्च षष्ट्युत्तरैकशतमितासु जन-सभासु भाषणान्यकरोत्। तदातनीं स्थितिं विवृण्वानेनैकेन लेखकेन लिखितमासीत्—

"तासामाभिजात्यवर्गीये सौष्ठवे, —यदधिसङ्ख्य-भारतीय-जनतायाः प्रेम्णः प्रशंसायाश्च कारणतां प्राप्तमभूत्, कियता चिदंशेनैकस्या गृहिण्याः स्वस्थं मातृत्वमपि सम्मिश्रितमासीत्। आभिजात्य-स्वरूपेण सह जनवादस्य समन्वयस्तासां राजनीतिक-सफलतानां रहस्यमवर्तिष्ट।"

श्रीमतीन्दिरागान्धी-महाभागा स्वयमेवैवमात्मन्यमंस्त, यत्—

सत्यं प्रभावयति पूर्णतया जनौघं, कृत्वा त्रुटीरपि जनो न जहाति चेत् तत्।
सोऽप्यत्र वेत्ति सकलां स्थितिमत्र पुंसः, सङ्गं करोति च ततः परमादरेण ॥१३॥

तथाविधायां स्थितावपि काङ्ग्रेसदलं प्रति निष्ठावतां नासीदल्पत्वम्। स्वाधीनतायै विहितानां त्यागानां बलिदानानां कथा धूसरिता नाभूवन्। वास्तविकं तत्त्वं जानानानां विवेकात् काङ्ग्रेसस्य प्रशासनादेव देशः प्रगतिमेष्यतीति विश्वसतां जनानां सौहार्दबाहुल्यात् तथा श्रीमत्याम् इन्दिरागान्धीमहाभागायां सर्वतोभावेन विश्वसनात् केन्द्रे तु काङ्ग्रेसदलेन बहुमतं प्राप्तमेव। श्रीमतीन्दिरा रायबरेलीतो लोकसभायै निर्वाचिता तथा १२ मार्च, १९६७ ई० दिने भूयोऽपि सा प्रधान-मन्त्रित्वाय निर्णीता। उपप्रधान-मन्त्रिपदं च श्रीमोरारजीभ्रात्रे दत्तम्। इत्थं काङ्ग्रेसस्य शासनं तु सञ्जातं परं देशे तस्य दलस्य यादृशमेकच्छत्रं साम्राज्यमासीत् तद्विच्छिन्नम्। अष्टसु राज्येषु विरोधिदलानां शासनमभूत्। तेष्वेव दिनेषु नवीनस्य राष्ट्रपतेर्निर्वाचनप्रसङ्गोऽप्युपागतः। श्रीमती गान्धी तस्मै पदाय धर्मनिरपेक्षतां विमृश्य श्रीमतो डा० **जाकिर हुसेन**-महोदयान् प्रत्याशित्वेन प्रास्तावयत्। विरोधिनामत्यन्तं विरोधे सत्यपि डा० **जाकिरहुसेनमहोदया** एव राष्ट्रपतिपदे निर्वाचिताः। एतेनेदं सिद्धमभूद् यत् प्रधानमन्त्रिमहाभागायास्तस्या भारतीयेषु कियानासीत् समादरः प्रभावः स्नेहश्च?

देशं सेवितुमुद्यता गतभया निःस्वार्थभावान्विताः,
कर्मस्वेव सदा निजामधिकृतिं मत्वा गृहीतव्रताः।
सत्कार्यैर्जनमानसेषु नियतं पूर्णानुरागं श्रिताः,
सर्वत्रैव जयन्ति वैर-बहुला अप्यत्र निष्ठायुताः ॥१४॥

किन्तु स्वयं श्रीमतीन्दिरागान्धी महाभागा स्वदेशस्य रक्षार्थं निरन्तरं चिन्तिता सती प्रच्छन्न-शत्रुभ्यो भारतं संरक्ष्य तदुन्नतये तत्पराऽवर्तत। सा ६ जून, १९६७ ई० दिने लोकसभायां पश्चिमेशियायाः सङ्कटार्थमिजरायलमुत्तरदायि व्यावर्णयत्। महत्या अक्तूबर-क्रान्तेः स्वर्णजयन्त्यां समवेतुं सा मास्को-नगरमगच्छत्। २२ अगस्त १९६८ ई० दिने चैकोस्लोवाकियातः सोवियत-सैन्यस्य परावर्तनाय सोवियतसङ्घं प्रभावयितुं वचनमदात्। १४ अक्तूबर १९६८ ई० दिने सा संयुक्तराष्ट्र-सङ्घस्य सामान्य-सत्रं समबोधयत्। तस्मिन् वत्सरे दल-परिवर्तकानां प्रवाहोऽपि वर्धमान आसीत्। काङ्ग्रेसस्य कार्यकारिण्यामिन्दिरागान्धी-महाभागायास्तथा नियुक्ति-पूरकेषु स्थानेषु दक्षिणमार्गवतां प्राबल्यमभूत्। अत एव राज्यसभाया द्विवार्षिकनिर्वाचनेष्ववकाशग्राहिणां काङ्ग्रेससदस्यानां स्थाने केवलं चतुःस्त्रिंशत्स्थानान्येव काङ्ग्रेसदलेन प्राप्तानि। भाषा-विवादा अपि प्राचलन्नेव। राजस्थानेऽनावृष्ट्याः कारणाद् बाड़मेर-क्षेत्रे भीषणो दुष्काल आपतत्। हिंसका उपद्रवास्त्रोटनस्फोटन-घटनाः सततं यत्र-तत्र प्रावर्तन्तैव। पत्रकारकर्मचारिणां केन्द्रीयकर्मचारिणाञ्च वेतनवृद्धये कार्यावरोधा अप्यक्रियन्त।

बङ्गाल-बिहारोत्तरप्रदेश-पञ्जाब-प्रदेशेषु काङ्ग्रेसातिरिक्त-सर्वकाराणां पतनं तथा तत्र सर्वत्र राष्ट्रपति-शासन-स्थापनेन सहैव हरियाणाप्रदेशे मध्यावधि-निर्वाचने काङ्ग्रेसाय तदा स्पष्टबहुमतप्राप्तिकार्याणि श्रीमत्या इन्दिरायै गौरववर्धकान्येवाभवन्। तदा पाकिस्तानेन सहान्तरिकसङ्घर्षभावना वर्धमानाऽऽसीत्, ततस्तेन चीनदेशेन साकं संयुज्य पूर्वसीमान्तस्य मिजोविद्रोहिभ्यः सैन्यप्रशिक्षणं शस्त्रप्रदानं चारब्धम्। तेषां दमनाय दार्ढ्येन प्रवर्तितं तथोत्तरपूर्वक्षेत्राणां समस्याः समाधातुं, मेघालयस्य पृथग् राज्यं विधातुं मिजोरमञ्चासमप्रदेशात् पृथक्कृत्य पूर्वसीमान्तायारुणाचल-नामप्रदानाय च विचारितम्। विश्वन्यायाधिकरणेन 'राजनीतिक-कारणेभ्यः' **कच्छक्षेत्रस्य** मरुभुवो विवाद-विस्तृत्या **'कंजरकोट-छाड़बेट'**-सहिता ३३० वर्गमीलमिता भूमिः पाकिस्तानाय दत्ता। सत्यपि प्रतिकूलेऽस्मिन् निर्णये विश्वन्यायाधिकरणस्य प्रत्यर्पण-पणानुसारं स निर्णयो भारतेन स्वीकृतः। अस्मिन् संवत्सरे श्रीमतीन्दिरागान्धी-महाभागा दक्षिण-पूर्ववर्तिनामेशिया-देशानां तथा लातीन्यमरीकादेशैः साकमेव विश्वस्य 'कैरोनियन-द्वीपसमूहामरीका-इङ्गलैण्ड-पश्चिमजर्मन-राष्ट्राणां' सद्भावना-यात्रा अप्यकार्षीत्।

काङ्ग्रेस-दले वर्तमाना वैचारिकमतभेदास्त्वरितया गत्यैधन्ते स्म। के चन दलस्य कार्यकारिण्यां श्रीमतीन्दिरामहाभागाया विरुद्धमाचरणानि विधायान्ये च **'स्वतन्त्रदल-जनसङ्घ'**—सहयोगेन संयुक्त-सर्वकार निर्मितयेऽपरे च धनिनां

पक्षग्रहणेनेतरे च समाजवादपुष्टये समागृह्णाना अवालोक्यन्त । एवं सत्यपि—

धृत्वाऽद्भुतं धैर्यमपूर्वसंयमं, मनो नियम्याथ समग्र-साहसात् ।
बाधाः पराकृत्य पुरः प्रयान्ति ये, त एव सिद्धिं तरसाऽऽप्नुवन्ति ॥१५॥

इति किंवदन्तीं मनसि निधाय कदापि सा मानसं वैचारिकं वा शैथिल्यं नाप्नोत् तत एव च सा सर्वत्र विजयिनी समवर्तत ।

स्वदेशस्य जनता पूर्णरूपेणेयं जानाति स्म यदत्र श्रीमतीन्दिरागान्धी-महाभागा यतः प्रभृति प्रधानमन्त्रिपदेऽतिष्ठत् तत एव देशे प्रगतिशीलानि कार्याणि सम्पन्नानि तैश्च देशास्यार्थिक-स्वरूपपरिवर्तनेन सहैव सामान्या जनताऽप्यत्यन्तं प्रभाविताऽभवत् । प्रधानमन्त्रिपदग्रहणात् पूर्वमिन्दिरामहाभागाया मनसि या या भावना आसंस्तासां साकारतायै स्वैच्छिकोऽवसरोऽपि तया तदैव प्राप्त आसीत् । सा महाभागा स्वपितॄणां चरणचिह्नेषु चलन्ती तेषां नीतीरेव सर्वथाऽन्वसरत् । सा स्वीया आलोचनाः प्रति सर्वदा सहिष्णुरवर्तत परं दलस्य नीतिविषये यदा मिथ्याऽऽरोपाः क्रियन्ते स्म तदा कथमपि मौनं नास्थात् । किन्तु वास्तविकीं स्थितिं ज्ञातुमालोचकानवश्यमागृह्णात् ।

श्रीमत्या इन्दिरा-गान्धी-महानुभावाया आन्तरिकेण विरोधेन तया प्रवर्तितानां प्रवर्त्स्यतान्च कार्याणां साफल्ये विघ्नीभूता अनेके दलीयाः कार्यकर्तारोऽपि यतमाना अभूवन् । १९६९ ई० वर्षस्य १३ जनवरी-दिने मन्त्रिमण्डले परिवर्तनं विधाय सा **'विदेश-व्यापारापूर्ति'**-संज्ञकमेकं नवीनं मन्त्रालयं न्ययोजयत् । संसदि स्वीयेनाल्पीयसा बहुमतेन सा किञ्चिद् भीताऽत्यन्तं सावधाना चावर्ततत तया दृढतया देशस्य निर्धनाया जनतायाः स्थितेः समुन्नयनायैको दशसूत्रीयः कार्यक्रमो घटितः । दक्षपथानुयायिनां विरोधे सत्यपि सा महासमितौ स्वप्रस्तावितं कार्यक्रमं स्व्यकारयदेव यस्मिन् धनागारिकाणां जीवन-बीमा-निगमस्य च राष्ट्रियत्वकरणं, भूतपूर्व-महाराजानां राज्ञां च वार्षिक-देयधनस्य समाप्तिरेकाधिकारिष्वौ-द्योगिक-परिवारेष्वङ्कुशो भूमेः परिष्कारः सार्वजनिकोद्योगानामभिवर्धनञ्चे-त्यादिसूत्राण्यप्यासन् । इत्थं दार्ढ्येनोत्थापितस्य समाजवाद्युपक्रमस्य कारणाद् दक्षपक्षानुसर्तारो दत्तावधाना अभवन् । तैश्चिकीर्षितं यत् कथमप्यस्या वर्धमान एकाधिकारो जनतासु प्रभावश्च श्लथनीयः किञ्च यथा कथञ्चिदियं सत्ताया अपाकरणीयेति ।

दले वामपथानां दक्षिणपथानाञ्च विचारधारायाः सङ्घर्षो १९६९ ई० वर्षस्याप्रैलमासे काङ्ग्रेसस्य फरीदाबादाधिवेशनावसरे दल-विभाजनस्य सङ्केतान् दातुं प्रावर्तिष्ट । काङ्ग्रेसाध्यक्षस्य श्रीनिजलिङ्गप्पामहोदयस्य

तथा एस० के० पाटिल-मोरारजीभ्रातॄणां जनसङ्घ-स्वतन्त्रदल-डी० एम० के०-प्रभृति-साम्प्रदायिकानां प्रतिक्रियावादिनाञ्च पक्षं प्रति वलनं तेषां दक्षिण-पथविचारान् प्रकटीकुरुते स्म। तेषां कर्तव्येष्वेकाधिकारवादस्य गन्ध आयाति स्म यं श्रीमतीगान्धी दूरीकर्त्तुं वाञ्छति स्म। तस्मिन्नधिवेशने तस्या मनसीदं निश्चितमिवाभासत यदधुना दलस्य विभाजनं कथमपि रोद्धुं न शक्ष्यत इति' परं केनापि नाटकीयेन विधिनाऽधिवेशनेऽग्निर्लग्नः। परिणाम-तश्चाधिवेशनमपूर्णनिर्णयैः सहैव समाप्तम्।

ततः परं मईमासे सहसा **राष्ट्रपति-श्रीजाकिरहुसेन-महाभागानां देहावसानमभूत्।** राष्ट्रं पुनरेकस्य महतो देशसेवकस्य राष्ट्रकर्णधारस्य मृत्युना दुःखितं शोकाग्नि-सन्तप्तं चाभूत्। श्रीमतीन्दिरागान्धी तेषां पूर्णं समादरं करोति स्म; तस्मात् सा तेषां निधनेन खिन्ना सचिन्ता चासीत्। नवीनस्य राष्ट्रपतेश्चयनप्रश्ने काङ्ग्रेसस्यान्तर्निरुद्धो मतभेदः प्रत्यक्षीभूतः। श्रीमती-न्दिरागान्धी समाजवादि-विचारधारावतां **श्रीवराहवेङ्कटगिरिमहाभागानां** नाम प्रास्तौत् परं समाजवाद-विरोधिनः स्वस्य प्रत्याशिरूपेण **श्रीसञ्जीवरेड्डीमहानुभावानां** नाम प्रास्तुवन्। परस्परं शक्तिपरीक्षणं सम्पन्नम्, परं 'देशस्य जनता येन साकं भवति तस्यैव विजयो भवती'ति सुनिश्चितमासीत्। अन्ततो जनताया एव विजयोऽभूत्। **श्री वि० वि० गिरिमहाभागा** एव बहुमतेन विजयं प्राप्ताः। आसीदयं विजय इन्दिराया एव। हतप्रभाः सर्वे विरोधिनस्तेन पराजयेन पीडिताः श्रीमत्या इन्दिरायाः समर्थकयोः **श्रीजगजीवनराम-श्रीफखरुद्दीनअली-महोदययोरुपरि** ततः परं च श्रीमत्यामिन्दिरागान्धीमहाभागायामप्यनुशासन-सम्बद्धं व्यवहारमकुर्वन्।

७ जुलाई १९६९ ई० दिने काङ्ग्रेसमहासमितेरधिवेशनं पुनः 'बंगलौर'-नगरे प्रारब्धम्। श्रीमत्या इन्दिरागान्धीमहाभागाया दृढनिश्चयि व्यक्तित्वं तस्मिन्नधिवेशने प्रत्यक्षीभूतम्। आसीत् तदधिवेशनं काङ्ग्रेसदलस्य समग्रेऽपि जीवने महत्त्वपूर्ण-भूमिकात आरब्धं तथा महत्त्वपूर्णैर्निर्णयैः सह काङ्ग्रेस-विघटनेन समाप्तम्।

ये स्वीकृतं मार्गमनुव्रजन्तो, रुन्धन्ति नो विघ्नभयेन भूयः।
बाधास्तिरस्कृत्य पुरश्चलन्तस्त्व्युट्यन्ति ते किन्तु, नमन्ति नैव ॥१६॥

श्रीमतीन्दिरा स्वीयामर्थनीतिं प्रभावयितुं श्रीमोरारजीभ्रातॄन्वित्तविभागात् पृथगकरोत् तेन खिन्नास्ते स्वपदात् त्यागपत्रमदुः। ततः परं वित्तविभागो-ऽपि श्रीमत्येन्दिरागान्धीमहाभागयाऽऽत्मनिकट एव रक्षितः किञ्च चतुर्दश-प्रमुख-द्रव्यागारिकाणां राष्ट्रियकरणमपि विहितम्। राष्ट्रियकरणनीत्या सन्तुष्य

जनताऽत्यन्तमुत्साहेन तदीयमभिनन्दनमकार्षीत् । श्रीस्वर्णसिंहेऽनुशासनकार्य-प्रक्रियां कुर्वति काङ्ग्रेसदलस्य प्रतिशोधे श्रीमतीन्दिरायाः समर्थकाः श्रीसुब्रह्मण्य-महाभागं काङ्ग्रेसस्यान्तरिमं सभापतिं न्ययुञ्जन् । परतश्च पृथक् 'तैलंगाना'-प्रदेशस्य कामनायाऽन्ध्रप्रदेशस्य दीर्घकालिकमुग्रञ्चान्दोलनमकार्षुः । तेषां याच्ञां सा न स्वीकृतवती । मध्यप्रदेशे सं-वि-द-सर्वकारस्य पतनं जातम् । गुर्जरप्रदेशे झञ्झावातो जलोत्प्लवनं च, उत्तरप्रदेशे तथा पश्चिमबङ्ग-प्रदेशेऽपि नदीषु पयसामुत्प्लवनानि, पश्चिमबङ्गप्रदेशे 'बङ्गाल-बन्द'संज्ञकमान्दोलनं चायपत्रिकोद्यान-वस्त्रयन्त्रालय-शण-यन्त्रालयादि-कर्मचारिणामान्दोलनानि विविधाः कर्मविरामाश्च नितरां प्रवृद्धा भूत्वा देशस्यार्थिकीं सामाजिकीं च स्थितिं विकर्तुं तत्परा इव प्रत्यायन्त । तथापि धृतधीरा कर्मवीरा श्रीमती-न्दिरागान्धी मनागपि विचलिता नाभून्न वा सा स्वीयेषु सङ्कल्पेषु शिथिल-विचाराऽवर्तिष्ट । सत्यमेवेदमस्ति यत्—

सङ्कल्पान् कल्पयित्वा पुनरथ लघु तत्पूर्तये दत्तचित्ता,
दृष्ट्वा विघ्नानुपेतान् हृदि कथमपि ये नैव भीतिं भजन्ते ।
दैवं तेभ्योऽनुकूलं भवति जनगणश्चात्र सिद्धौ सहायो,
भूत्वा सर्वाणि कर्माण्यनवरतपरिश्रान्तितः संविधत्ते ॥१७॥

वर्षेऽस्मिन्नेवामेरिकाया राष्ट्रपतयः श्रीनिक्सनमहानुभावा, ईरानस्य शाहमहाभागा, रूमानियादेशस्य राष्ट्रपतयः, बुल्गारिया-न्यूजीलैण्डयोः प्रधान-मन्त्रिणस्तथेण्डोनेशियादेशस्य विदेशमन्त्रिणो भारतमायाताः । श्रीमतीन्दिरा च—अफगानिस्तान-जापानेण्डोनेशिया-बर्मादिदेशानां सद्भावना-यात्रार्थं गता । परस्परमेतैर्गमनागमनैस्तैः सह व्यापारिकाः सांस्कृतिकाश्च सम्बन्धा अपि दृढतां प्राप्ताः ।

□ नवं सङ्घटनं नवा गतिविधयः

विस्मृत्य वृत्तं घटितं पुरातनं, दुर्नीतिपूर्णं बहुधा प्रवर्तितम् ।
ध्येयं स्वकीयं प्रति गन्तुमुत्सुका, नूत्नानि कार्याणि समाचरन्त्यरम् ॥१८॥

काङ्ग्रेसस्य विभाजनानन्तरमिन्दिरा-समर्थकानां दलं 'नवीनकाङ्ग्रेस'-'सत्ता-काङ्ग्रेस'-'इन्दिरा-काङ्ग्रेस'-नाम्ना च ख्यातिमगच्छत् परेषां च 'सङ्घटन-काङ्ग्रेस' इति संज्ञा प्रावर्तत । ८ जनवरी १९७० ई० वर्षे संसदि राज्ञां विशेषाधिकाराणां तथा राजाधिदेयानां समाप्तिघोषणाऽक्रियत । राष्ट्रिय-करणवदेवास्य विधेयकस्यापि वैधता-विषये प्रत्याहूतिरदीयत, लोकसभायां पारिते सत्यपि राज्यसभायामेकस्य मतस्य न्यूनतया च तदस्वीकृतमभूत् तदा राष्ट्रपतीनामध्यादेशेन नरेशानां मान्यता निरस्ता । वित्तमन्त्रित्वाधिकारेण

श्रीमतीन्दिरा १९७०-७१ ई० वर्षयोराय-व्ययकं संसदि प्रास्तौद् यत् पूर्ववर्तिभ्यो भिन्नं प्रगतिमत् सामान्य-जनानामाकाङ्क्षापूरकञ्चासीत्। सामाजिक-न्यायस्य तथार्थिकविकासस्य समन्वयकारि तदायव्ययकमतीवोपयोगि सर्वेषां हितकृदुपेक्षितक्षेत्राणामुन्नतिकृच्चावर्तत।

पाकिस्तानेन सह विवादः, शेखमुजीबुर्रहमानस्यावामी-लीगस्य पाकिस्तानीये महानिर्वाचने स्पष्टा बहुमतप्राप्तिः, आन्ध्रोत्तरप्रदेशयोर्जलोपप्लवाः, भिवण्डी-चन्द्रनगरयोः साम्प्रदायिकोपद्रवाः, पञ्जाब-हरियाणा-प्रदेशाभ्यां समस्या-समाधानं, बङ्गाल-केरलोत्तरप्रदेशेषु राष्ट्रपति-शासन-प्रवर्तनं केरल-प्रदेशस्य मध्यावधिकनिर्वाचने काङ्ग्रेसाय स्पष्टबहुमतोपलब्धिः, मेघालयाय पूर्णराज्यस्य स्वरूप-प्रदानघोषणा तथा राज्यसभाया द्विवार्षिक-निर्वाचनेषु नवीन-काङ्ग्रेसस्य स्थितेरवरोहश्चेति घटनास्तदानीन्तनीनां राजनीतिकारोहावरोहस्थितीनां परिचयायालम्भवन्ति।

विशालस्य भारतस्य प्रधानमन्त्रिपदे विराजमाना श्रीमतीन्दिरागान्धी-महाभागा सर्वासामायान्तीनामायास्यन्तीनां समस्यानां स्थितीनां गभीरेण चिन्तनेन स्फुरन्त्या मनीषया विमलेन विवेकेन समाधानं विदधती दृढेन विश्वासेनाग्रे वर्धमाना **मारीशस**-संयुक्तराष्ट्रसङ्घस्य रजतजयन्त्यां भागं गृह्णती सा भारतस्य समूह-निरपेक्षतायास्तात्कालिकेन सन्दर्भेण व्याख्यामप्यकरोत्। तस्मिन् वत्सरे वैदेशिकेष्वतिथिषु—बेल्जीयमस्य सम्राजः, पश्चिमजर्मनदेशस्य विदेशमन्त्रिणः, पोलैण्डदेशस्य राष्ट्रपतयस्तथा जापानस्य विदेश-मन्त्रिणा-प्रभृतयः प्रमुखा आसन्।

एवं सत्यप्यान्तरिकी देशस्य स्थितिः सुदृढा नासीत्। विरोधिनो निरन्तरं विभिन्नैः प्रकारैस्तां प्रच्यावयितुं चेष्टन्ते स्म। संसदि स्वीयां ह्रसीयसीं शक्तिमनुमायान्ते २९ दिसम्बर १९७० ई० दिने मध्यावधिकच्छन्दाकलनाय श्रीराष्ट्रपतिभ्यः परामर्शं प्रदाय घोषणामकारयत्। काङ्ग्रेसेऽन्तः प्रविष्टस्य दुर्गन्धस्य पराकरणायदेशस्य दूषितवातावरणस्य स्वच्छतायै च निर्वाचनमेवासीदेकं निदानम्। श्रीमती गान्धी स्वीयानां समाजवादिनां लक्ष्याणां पूर्तेरुद्देश्येन जनतायाः सहमतिं प्राप्तुं जनताया राजसभायां निःसङ्कोचमागमत्। यतः सैवं व्यचारयद् —

यल्लोकस्य सदेप्सितं यदुदितं यत् सर्वतः शर्मदं,
यत्र स्वार्थपरा न काऽपि रचना नो वञ्चनं किञ्चन।
यत्सर्वैरनुमन्यते प्रथमतो देशार्थमावश्यकं,
न स्याद् यर्हि तदेव तर्हि वितथं किं लोकतन्त्रं न तत् ॥१९॥

छन्दाकलन-घोषणामाकर्ण्य सर्वाणि दलानि नैर्वाचनिकसन्धि-सन्धानाय संलग्नाः। 'सङ्घटन-काङ्ग्रेस-स्वतन्त्र-दल-जनसङ्घाः सम्भूय नवीनं काङ्ग्रेसदलं पराभवितुमेकं 'महासहयोगि-सङ्घटन'मकार्षुः। १३ जनवरी, १९७१ ई० तः ५ मार्च, १९७१ ई० यावन्निरन्तरं निर्वाचन-यात्रासु व्यस्ता श्रीमतीन्दिरागान्धी वायुमार्गेण त्रिशत्सहस्रमीलमिताया भुवो यात्रां व्यधात् किञ्च चतुःशताधिकासु सभासु भाषणन्यकरोत्। प्रतिदिनमष्टादश होरावधि नैरन्तर्येण विहितः श्रमस्तस्यै विजयश्रियमदात्। पञ्चाशदुत्तर-त्रिशतमिताः प्रत्याशिनः श्रीमतीगान्धी-महाभागाया नवीन-काङ्ग्रेसदलस्य प्रातिनिध्येन जित्वा संसदि स्थानान्यलभन्त। कृतेऽपि महासहयोगि-सङ्घटने प्रतीपविचारवन्तः पराजयं प्राप्ताः। 'इन्दिरां पराकुरुत स्वदेशं रक्षते'त्युद्घोषकाः स्वयं पराभूताः। श्रीमतीन्दिरागान्धी-महाभागा भूयोऽपि दलस्य नेत्रीत्वेन वृता। पुनः प्रधानमन्त्रिपदे प्रतिष्ठिता। तदा १८ मार्च, १९७१ ई० दिने सा विधिवत् स्वकीयस्य मन्त्रिमण्डलस्य घोषणामकरोत्।

परिहरति विवादान् स्फोरयत्यात्मनीतिं,
प्रहरति परवादान् सत्यतत्त्वं धिनोति।
विहरति च यथेच्छं मानवानां निकाये,
विकिरति भुवि सौख्यं कर्मनिष्ठः पटिष्ठः ॥२०॥

भूमौ नैति गतिं कदापि विषमां कल्याणकृन्मानवो,
गीतायं किल गीतमस्ति नियतं कृष्णेन सर्वात्मना।
तस्मात् सत्यपरास्त्यजन्ति न मुदा श्रेयःपथं श्रीजुषः,
कामं सन्तु पुनः पथीह विपदः किं वा शिवाः सम्पदः ॥२१॥

□

[८]

स्थिरा-कला

कर्तव्य-निष्ठा विरलश्च साहसः

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं
स्वऽरस्माकं यज्ञोऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ॥

—अथर्व० का० १६, सू० ८, मं० १।

स्वीयोन्निनीषाश्रित-भूरि-चिन्तना, व्यर्थं प्रयस्यन्ति विदन्ति नैव ते।
नूनं जगत्युन्नयतोऽत्र मानवं, 'कर्तव्यनिष्ठा विरलश्च साहसः' ॥१॥
मत्वात्मनीनं जननं हि सन्ततं, देशार्थमेवार्पितमत्रयो जनः।
संस्पर्धते कर्मसु वर्धतेऽग्रतो जित्वा स लोके लभते शुभं यशः ॥२॥

श्रीमत्या इन्दिराया नवीने मन्त्रि-मण्डले श्रीचह्वाणस्य निकटे वित्त-विभागः, श्रीफखरुद्दीनअलीअहमदमहोदयस्य समीपे खाद्य-कृषि-विभागौ, श्रीजगजीवनरामस्याधीनं सुरक्षाविभागस्तथा श्रीस्वर्णसिंहस्यान्तिके विदेश-विभाग आसीत्। देशेनानुमितमभूद् यत् सत्वरमेव साम्प्रतं समाजवादस्य स्वप्नः साकारतां प्राप्स्यतीति, परं पाकिस्तानमेका विपुला बाधा भूत्वा मध्य आगत्योपस्थितम्।

सङ्घर्षस्याभासस्तु पूर्वंत एव भवति स्म। द्वौ तस्करावेकं भारतीयं व्योमयानमुत्प्लाव्य पाकिस्तानं नीतवन्तौ तत्र च तद्दग्धं तथा पाकिस्तान-शासनेन तौ तस्करौ परावर्तनायापि निषिद्धौ। समग्रेऽपि देशे क्रोधस्य वीचि-र्व्याप्ता परं श्रीमतीन्दिरा संयमेन स्थिराऽतिष्ठत्। पाकिस्तानस्य महानिर्वाचने पूर्व-पाकिस्तानस्य विधानसभायाः सर्वेषु नव-स्थानेषु श्रीमुजीबुर्रहमानस्य **'अवामीलीग'**स्य विजयोऽभूत्। तेन व्यग्रो **राष्ट्रपतिः श्रीयाह्याखाँ** ढाकायां प्रवर्तमानं राष्ट्रिय-विधानसभाया अधिवेशनमनिश्चिताय कालायारुणात्। तद्विरुद्धं शेखमुजीबुर्रहमानः शान्तिपूर्णमसहयोगान्दोलनं प्रावर्तयत् तदा तं निगृह्य इस्लामाबादं नीतवन्तस्तत्र च सैनिकन्यायालयेऽभियोगं प्रचाल्य मरणदण्डः श्रावितः। सहैव पूर्व-बङ्गालप्रदेशस्य जनतायां कठोरं पाशविकं सवेगं दमन-चक्रं प्रवर्तितम्। प्राणभयादातङ्किता जनाः शरणोपलब्धये भारत-मायातुं प्रवृत्ताः। स्वल्पेनैव कालेन सार्धसप्तकोटि-सङ्ख्यावतो देशात् प्राय एककोटिमिता हिन्दवो मुस्लिमाश्च शरणार्थिनो भारतमागमन्।

क्रूराणां कुटिलात्मनां च मनसां या वञ्चना-वृत्तयो,
वर्तन्ते नहि ताः कथञ्चिदपि सद्भावा विदन्ति प्रजाः।
सत्यं ते न समाश्रयन्ति नहि वा कुर्वन्ति ते प्रत्ययं,
दुष्कृत्यैः परिपीडयन्ति च मुधा दीनाञ्जनान् नित्यशः॥३॥

भरतावनिजन्मभृतां प्रथिता, शरणागतवत्सलताऽस्ति भुवि।
कथमीदृशि सङ्कटजे समये, पुनरत्र विलुप्यतु सा प्रथितिः॥४॥

इति मनसि निधाय प्रत्यहं पीडितानां,
शरणमुपगतानां चिन्तया क्लान्तिमाप्ता।
निखिलमपि जगत् तत्-कष्टनाशाय बोद्धुं,
विविध-विषय-यात्रा इन्दिरा देव्यकार्षीत्॥५॥

ये वै देशाः कुटिल-मतयः स्वार्थपूर्णा अभूवन्,
मौनं धृत्वा त इह निपुणा नो सहायं ह्यकार्षुः।
सन्धिं तस्मादवन-विषयं रूसदेशेन कृत्वा,
तस्मिन् काले स्थितिमतिदृढां सा व्यधाद् भारतस्य॥६॥

किञ्च—

शरणार्थिषु मानवतावशतो विवशा सकृपं सततं व्यदधात्।
वसनाशनभेषजजाः सुविधास्तत एव तदाक्रमणं कृतवत्॥७॥

अथवा—

पूर्वबङ्ग-प्रदेशे या पाकिस्ताने च या स्थितिः।
ताभ्यां ध्यानं पराकर्तुमिदमाक्रमणं कृतम्॥८॥

वस्तुतस्तु—

पाकिस्तानस्य भारतं प्रतीदृशी दुर्नीतिः कियतश्चित् कालादवर्ततैव। तेन हि पूर्वं १९४७ तथा १९६५ ई० वर्षयोर्द्विवारं महती आक्रमणे अपि कृते अभूताम्। मध्ये च तेन कच्छक्षेत्रस्य मरुभूमावपि गुप्तः प्रवेशो विहित आसीत्। १९७१ ई० वत्सरे पुनस्तच्छान्तं न भूत्वा 'भारतं पूर्वबङ्गप्रदेशस्य साहाय्यं विदधाती'ति मिथ्याव्याजं मनसि निधाय ३ दिसम्बर १९७१ ई० दिने सायं सार्धपञ्चहोराऽवधिके समये भारतस्य पश्चिमसीमोल्लङ्घनं विधाय —"श्रीनगर-पठानकोट-अमृतसर-उत्तरलाई-आगरा-चोहटन-जोधपुर-अवन्तीपुर-अम्बाला-" नगरवर्तिषु विमानावतरणस्थलेषु वायविकाक्रमणेन विस्फोट-गोलकानवर्षयत्। आसीदिदं तस्यैकवारं पुनर्भारताय रणायाह्वानम्।

तद्दिने श्रीमतीन्दिरागान्धी राजधान्यां नासीत्। आसीत् सा कलकत्ता-नगर्याम्। तत्रैवास्याक्रमणस्य सूचना तत्रभवत्यै प्रापिता सा च स्वीयान्

सर्वान् कार्यक्रमान् निरस्य दिल्लीमागच्छत् । ४ दिसम्बर, १९७१ ई० दिने च प्रातरेव राष्ट्राय सन्देशं प्रासारयत् । भारतीयान् सैनिकांश्चाक्रमण-प्रतिकारायादिशत् ।

ततः परं बांगलादेशस्य स्वातन्त्र्यसैनिकैर्मुक्तिवाहिनीसङ्घटकैर्भारतीयसीमग्रामे सम्भूय घोषिता स्वतन्त्रबाङ्गलादेशाय ६ दिसम्बर, १९७१ ई० दिने विधिवन्मान्यताऽपि प्रदत्ता। श्रीमतीन्दिरागान्धी यद्यप्यशान्तेः पक्षे नावर्तत, परं बलादापतितं युद्धं तु कर्त्तव्यमेवाभूत् । १० दिसम्बर-दिने दिल्ली-विश्वविद्यालये समायोजितायामेकस्यां सभायां भाषमाणा साऽवोचत्— "अद्य यदा युद्धमायातमेव तदा तु स्पष्टमेवास्ति यदस्माकं प्रथमं कार्यमस्ति युद्धे विजयप्राप्तिः। विजयोऽस्माकमवश्यं भविष्यति, कारणञ्चास्यास्ति यदस्माकं सेना सुदृढा वर्तते, शूरवीरा च विद्यते किञ्च सैका नवीन-प्रकारिका सेनाऽस्ति । तथा या जनता सेनायां नास्ति साऽपि देशस्यास्यातिमहती सेनाऽस्तीति।"

भारते पाकिस्तानाक्रमणस्योत्तरं भारतीयसैनिका यददुस्तदसाधारणमवर्तत। स्थलसेना-वायुसेना-नौसेना युगपत् सम्मिल्य परस्परं सहयोगमाचरन्त्यो यया पद्धत्या चतुर्दश दिनानि यावद् युद्धमकुर्वन्, तस्मिन् भारतेन पाकिस्तानस्य युद्धसाधनेषु २४४ टैंकयानानि, ९४ वायुयानानि, ४ युद्धपोताः, २ सबमैरीन-नावो १६ अस्त्रवर्षिका नावश्च सर्वथा विनाशिताः। पाकिस्तानेनास्मिन् युद्धे भारतस्य ७४ वर्गमीलमितायां भूमावधिकारः कृतो भारतेन च पाकिस्तानस्य प्रायः ३५०० वर्गमीलमिता भूमिः स्वाधीनीकृता। तस्मिन् युद्धे पूर्वपाकिस्तानस्य विजयरूपेणापि भारतेन प्रायश्चत्वारिंशत्सहस्रोत्तरैकलक्षवर्गमीलमितायां भूमावधिकारः कृत आसीत् । इदं सर्वं भारतस्य सेनायाः पूर्वपाकिस्ताने ढाकानगरं यावत् प्रवेशात् पाकिस्तानसैनिकानामात्म-समर्पणस्य बाध्यत्वाच्च सम्भवमभूत् । १६ दिसम्बर १९७२ ई० दिने जनरलनियाजीः सायं सार्धचतुर्वादनसमये प्राय एकलक्षमितैः सैनिकैस्सहात्म-समर्पणमकार्षीत् । तेन महता विजयेन भारते भारतस्य मित्रदेशेषु पूर्वपाकिस्तान-वासिषु च महानानन्दोऽभवद् भारताय कृतज्ञस्य घनिष्ठस्य मित्रस्य सहयोगिनः समर्थकस्य चैकस्य नवीनस्य बाङ्गलादेशस्य समुदयोऽभूत् पाकिस्तानञ्चार्धं विभक्तम्।

तेन भारतस्य विजयेन श्रीमत्या इन्दिरायास्तथा भारतस्य, द्वयोरपि प्रतिष्ठायां चन्द्रचतुष्कं जटितम् ।

शौर्यञ्च धैर्यञ्च समे विधाय, कौशल्यपूर्णेन नयेन नित्यम् ।
यो दृप्तशत्रूननुशास्ति सोऽत्र, श्रेयः श्रियां विन्दति वै जयस्य ॥९॥

पूर्वपाकिस्तानं 'बांगला-देशं' निर्मातुं शेखमुजीबस्य नेतृत्वाय तथा तस्य देशस्य जनताया बलिदानाय यावच्छ्रेयोऽस्ति, भारतस्य जनतायै, भारतस्य सैनिकेभ्यस्तथा भारतस्य प्रधानमन्त्रि-श्रीमतीन्दिरागान्धी-महाभागाभ्यस्तस्मात् कथमपि न्यूनं श्रेयः कस्यामपि स्थितौ दातुं न शक्यते। इदमपि परेषां जनानां कथनं सत्यं नासीद् यद् 'बांगला-देशे' यत् किमपि घटितं तस्य पृष्ठभागे भारतस्य हस्तमासीत्। एवं कथनं बांगलादेशवासिनां भावनानां बलिदानानाञ्चापमानमस्तीति लोकसभायां श्रीमती गान्धी स्पष्टमघोषयत्। भारतस्य समर्थने तात्पर्यमासीत् १-शरणार्थिनां भारान्मुक्तिः, २-मानवीयदृष्ट्या नैतिकं समर्थनं तथा ३-सामाजिकसङ्घर्षस्य समाप्तिः। विजयप्राप्तेरनन्तरं सत्वरमेव सेनाध्यक्षैर्मन्त्रिमण्डलेन विपक्षनेतृभिश्च परामृश्य १७ दिसम्बर-दिने सार्धाष्टवादन-वेलायामाकाशवाण्या श्रीमतीन्दिरागान्धी पश्चिम-युद्ध-स्थल्यामेकपक्षीयस्य युद्धविरामस्य घोषणामप्यकरोत्।

प्रधानमन्त्रिमहाभागा विजयस्यास्य सर्वं श्रेयो भारतीयेभ्य एव दत्त्वा तेषां सर्वतोभावेन कृतज्ञतां व्याञ्जयत्। भारतीय-जनमानसस्य शक्तेरुत्साहस्य च श्लाघां प्रकटयन्त्या तया निगदितमासीत्— "यदिमं सर्वं सङ्कट-सागरं तीर्त्वा वयमुद्धृताः स्मस्तत्र सर्वेषां भारतीयानां भवतां शक्तेराभिमुख्यस्य विश्वासस्य साहसस्याशायाश्च विशिष्टः सहयोग आसीत्। तस्मादेव वयं काठिन्यादुत्तीर्णाः स्मः। भारतीयाः सैनिका भारतीया वैज्ञानिका अभियान्त्रिका बुद्धिजीविनः कर्मकरा धनिनो निर्धनाः सर्वेऽपि समानेन भावेन पारस्परिकं विचार-वैमत्यं विस्मृत्यैकस्मिन् राष्ट्रिये सूत्रे निबद्ध्य यामेकतां प्राकटयन् सा सर्वथाऽभिनन्द-नीयाऽस्ति। अहमभिलषामि यत् सर्वैर्नीतिरेषा समाश्रयणीया। यतः —

लघुरपि समवायं प्राप्य सामर्थ्ययुक्तो,
भुवि वशयितुमीष्टे दृप्तशक्तीन् प्रकृष्टान्।
मदमुदित-गजानां बन्धने लब्धसिद्धि-
स्तृण-गुणन-समिद्धा रज्जुरत्र प्रमाणम्॥१०॥

बहुमुख-कृतिमन्तो भिन्न-भिन्नं वदन्तः,
पथि-पथि च विकीर्णा आत्म-दर्पण-जीर्णाः।
कुमति-तति-विशीर्णा नैव शान्ति लभन्ते,
तत उरु-जन-शस्तामेकतां संश्रयन्तु॥११॥

श्रीमतीन्दिरा गान्धी विजयोत्तरमपि विविधाभिश्चिन्ताभिर्व्याप्ता सती क्रमशः शरणार्थिनां पाकिस्तानस्य युद्धबन्दिनां च व्यवस्थायास्तथा पाकिस्तान-स्य कारागारे स्थापितानां बांगला-देशस्य स्वतन्त्रता-सङ्गरस्य सूत्रधाराणां

श्रीमुजीबुर्रहमानमहानुभावानां मुक्तेश्च प्रयासेषु पूर्णतया तत्परा भूत्वा सर्वाः समस्याः समादधात्। अस्यैव वर्षस्याभ्यन्तरिके काले सा चतुर्णां नवीन-राज्यानां— **१- हिमाचलप्रदेश-२- मणिपुर-३- मेघालय-४- त्रिपुरा**प्रदेशानां निर्माणमकरोत्। **१- अरुणाचल- २- मिजोरम**' —नामकौ द्वौ स्वायत्तप्रदेशावपि सा निरमात्। त्रीणि संवैधानिकानि संशोधन-विधेयकान्यपारयद् येषु- '२४ तम-संशोधनेन भारतीयजनतायै संविधान-संशोधनस्याधिकारः प्राप्तः। २५ तम-संशोधनेन राष्ट्रियाय हिताय सम्पदधिग्रहणे कृते सति विनिमयदानस्य बाध्यता समापिता। किञ्च २६ तम-संशोधनेन भूतपूर्वनृपतीनां विशेषाधिकारराज्यदेय-सौविध्यादीनां समापनं कारितम्। तेनैव—

अन्ताराष्ट्रिय-राजनीति-फलके चित्रं समुद्योतितं,
स्वीयान्तः क्रिययाऽङ्कितं सफलता-पूर्णं सुचित्रं च यत्।
आसीत् तत् परिपक्वदृष्टिलसितं देवीन्दिरायास्तथा,
तस्यास्तद्गत-कूटनीति-पटुताऽऽटोप—स्फुटत्वं श्रिता ॥१२॥

पाकिस्ताने याह्याखानः स्वीयं पराजयं स्वीकृत्य स्वपदात् त्यागपत्रं दत्त्वा मुक्तस्ततः परं राष्ट्रपतिपदे **'श्रीजुल्फिकार अली भुट्टो'**-महोदय आसीनः। श्रीमत्या गान्धी-महाभागाया निरन्तरप्रयासेन ७ जनवरी १९७२ ई० दिने श्रीमुजीबः पाकिस्तानस्य बन्धनाद्विमुक्तः। ११ जनवरी-दिने भारतीया जनता स्वदेशस्य राजधान्यां देहल्यां तस्य महाभागस्य हार्दिकं स्वागतमकार्षीत्। पाकिस्तानस्य युद्धे विजयप्राप्त्या श्रीमत्या इन्दिराया यशोनादः सर्वत्रागुञ्जत्। विजयप्रभावाद् भारतस्य सम्मानोतीवोन्नतोऽभूत्। निखिलमपि जगदजानाद् यदेशियाखण्डस्य राष्ट्रेषु भारतेन महत्त्वपूर्णं स्थानं प्राप्तमस्तीति। श्रीमतीन्दिरा-महाभागाया देशस्य सेवाः प्रति सम्मानं प्रकटयितुं राष्ट्रस्य सर्वोन्नतेनालङ्करणेन 'भारत-रत्न'मित्युपाधिना **महामहिम-राष्ट्रपति-श्री वी० वी० गिरि-महाभागा**स्तां सममानयन्। सा हि महाभागा स्वीयानां राजनीतिक-कौशल-सङ्घटन-प्रावीण्य-दूरदर्शिता-जनपरीक्षण-क्षमता-सूक्ष्मदृष्टि - सुदृढात्मविश्वास-प्रोर्जस्विता-ऽदम्योत्साह-गहनमानवप्रेमादिगुणैर्भारतस्य सर्वमान्या जननेत्र्येव नाभूदपि तु सर्वत्रान्ताराष्ट्रियस्तरस्य राजनेत्रीरूपेणापि महतीं प्रतिष्ठां प्राप्नोत्। वस्तुतः —

शान्ति सहस्थितिमुदार-विचार-वृत्तिं,
निःस्वार्थ-भावममलां करुणा-प्रवृत्तिम्।
यः सेवते स पदमुन्नतमाप्य विराजतेऽत्र,
सेवा-फलानि मधुराणि भवन्ति लोके॥१३॥

दृष्टिं विचार-सरणिं स्वमतिं च सूक्ष्मां,
स्थाने प्रयुज्य तनुते सकलेषु मैत्रीम्।

शुश्रूषयात्मसुखमाप्नुवतो जनस्य,
सम्मान एव भवति प्रथितः प्रकामम् ।।१४।।

श्रीमतीन्दिरागान्धीमहाभागा विनम्रतया राष्ट्रवासिभिर्विहितां सभाजनां स्वीकृत्य भूयोऽपि कर्तव्यपथे वर्धमाना नेहरूवंशस्य परम्परागतान् प्रख्याता-नश्रान्त-परिश्रमशीलता-गुणानविस्मरन्ती प्रतिवेशिदेशैः सह मधुरं सम्बन्धं स्थापयितुं १७ मार्च-दिने शेखमुजीबुर्रहमानमहानुभावस्य जन्मदिनोत्सवमभिलक्ष्य ढाकानगर्यामगच्छत् तत्र बांगला-देशजनताऽपि सजोषं कृतज्ञताभाव-समुल्लसितमतिप्रशस्तं तस्या हार्दिकं स्वागतं व्याहार्षीत् । २० मार्चदिने च भारत-बांगला-देशयोः प्रधानमन्त्रिभ्यां भारतीयद्वीपे शान्ति-सुरक्षा-स्वतन्त्रता-क्षेत्रीय-सम्प्रभुतानामक्षुण्णत्वस्योद्देश्येन ढाकानगर्यामेकस्मिन् संयुक्त-घोषणापत्रे हस्ताक्षरे विहिते। मार्च-मास एव भारते विजयोल्लासस्य वातावरणे मद्रासोत्तरप्रदेशादीन् काँश्चित् प्रदेशान् विहायान्यत्र सर्वत्र विधानसभानां महानिर्वाचनान्यपि श्रीमतीन्दिरा गान्धी-महाभागाऽकारयत्। तस्मिन् निर्वाचने तयोद्घोषकद्वयं प्रचारितमासीत्—'१- आत्मनिर्भरता २- दैन्यापाकरणं च' । निर्वाचन-विजयाय सा प्रत्येकं प्रत्याशिनं योग्यताया आधारेण स्वयमवचित्य यत्र तत्र च दक्षिणपथानुयायिभिः कम्यूनिष्टैः सह संयोजनमपि व्यदधात् । तस्मिन् निर्वाचने महान् विजयस्तद्-दलेन प्राप्तः । सर्वेषु २५२९ स्थानेषु सत्ताकाङ्ग्रेसदलेन १९२६ स्थानानि जितानि । नैके विपक्षाः पराजिताः ।

'सम्पत् सम्पदमनुधावती'ति लौकिकी किंवदन्ती तदानीं सत्याऽभूत्। मध्यप्रदेशे दस्यूनामात्मसमर्पणं, श्रमिकैक्याय गान्धिवादिदलेषु पारस्परिकैक्य-सम्पादनं, संयुक्तराष्ट्रसङ्घस्य 'ह्यूमैन इन्वायरमैन्ट-कान्फ्रेन्स'स्य प्लिवरीसत्रे सम्बोधनं, शिमलासन्धिस्तथा तदनुसारं पाकिस्तानस्य विजितक्षेत्रस्य प्रत्यावर्तनं च क्रमशः सम्पादयन्ती महामात्या श्रीमती गान्धी यादृशं प्रशासनकौशलं प्रादर्शयत् तत्तस्या देशं प्रत्यगाधानुरागस्य फलमासीत् । १४-१५ अगस्तस्य मध्यरात्रौ संसदोऽधिवेशने भाषमाणा सा स्पष्टमवादीत् —

"आगच्छत, वयं न केवलं भारतस्य तथा तस्या महत्या जनतायाः सेवार्थमेकवारं पुनरात्मानं समर्पयेम, परं ततोऽप्यग्रे विश्व-शान्तये मानवकल्याणाय समर्पयेम । येन भविष्यत्यागन्तुका वंश्या विशालस्य विश्व-परिवारस्याङ्गरूपेण सम्मानस्य तृप्तेश्च जीवनं जीवितुं शक्नुयुः ।"

श्रीमतीन्दिरागान्धी महाभागा वस्तुतो देशस्य नेत्र्यपेक्षया देशसेविकात्वेनात्मानं मन्यमानैव देशस्य वास्तविकीं स्थितिं प्रति पूर्णतया सावधानाऽवर्तत। सा विपक्षनेतॄणां कूटं सूक्ष्मया दृष्ट्या वीक्षमाणा कदाचित् खेदमनुभवन्त्यपि सेवाविधौ शैथिल्यं नाभजत्। सा जानाति स्म यत्—

श्रेयो मार्गे विघ्नबाहुल्यमेति, श्रेयःप्राप्तिर्वस्तुतः कष्टसाध्या।
ये वै प्राप्तान्यत्र कष्टान्यपास्य, वर्धन्तेऽग्रे ते जयं प्राप्नुवन्ति ॥१५॥

ततः साऽगस्तमासस्याष्टाविंशतितमे दिनाङ्के भारत-बांगला-पाकिस्तानानां मध्ये पारस्परिकं सन्धिमकार्षीद् यस्मिन् निर्णीतं यत् सर्वाः समस्यास्तथा युद्ध-बन्दिनां परावर्तनं मानवीय-धरातलेन समाधेयमिति। ६ सितम्बरदिने श्रीमती-न्दिरागान्धी निर्व्यूह-राष्ट्राणां चतुर्थेऽधिवेशने सम्मिलितुमल्जीरियादेशं गता। १४ अक्टूबर-दिने च सा सेवाग्रामेऽखिल-भारतीय-राष्ट्रिय-शिक्षासम्मेलनमुद्-घाटयत्। तस्मिन्नेवावसरे महात्मनां श्रीगान्धिनां कुटीरेऽप्यगच्छत्। २७ तो २९ अक्टूबर-दिनेषु सा महाभागा 'भूटान'-देशस्य यात्रामकरोत्। २ नवम्बर-दिने मोहमय्यां 'नेहरू-केन्द्रस्य' शिलान्यासं विधाय ३ नवम्बरदिने तृतीयस्यैशियास्था-न्ताराष्ट्रिय-व्यापारमेलकस्योद्घाटनं व्यदधात्।

□ प्रतीपगानां विरलैव नीतिः

मार्गे शुभे शान्तधिया प्रयान्तं, संवीक्ष्य सद्यः कुहना द्विषन्तः।
मिथ्या-प्रवादैः परिदूषयन्ति, प्रतीपगानां विरलैव नीतिः ॥१६॥

श्रीमतीन्दिरागान्धी-महाभागायाः समुत्थान-पतनयोः समीक्षणं विदधत एकस्य पत्रकारस्य विचारैषु स्पष्टमिदं प्रतिपादितमासीद् यद् 'भारतस्य राज-नीतिकीं स्थिरतां विश्वे वर्धमानां प्रतिष्ठाञ्चालोक्य तदानीमनेके देशा विद्वेष-भावनाग्रस्ता अभूवंस्तथा शान्तिपूर्णाणविकविस्फोटानन्तरं तु ब्रिटेनामरीका-जर्मन-देशास्तु विशिष्य भारताद् रुष्टा आसन् किञ्च तेषां गुप्तचरसंस्था भारतेऽतीव सक्रियतया कार्यं कुर्वाणा अवर्तन्त। यद्यपीमाः संस्थाः प्रारम्भात् स्वतन्त्रताकालादेव गतिशीला आसन् परं तेषु दिवसेषु स्व-देशस्य सामाजिकार्थिकस्वरूपं समीक्ष्य तच्छ्लथं विधाय राजनीतिकीमस्थिरतामानेतुं सक्रिया अभवन्। ता वाञ्छन्ति स्म यद् भारत-श्रीलङ्का-बाङ्गलादेश-पाकिस्तानेषु या तेषां प्रतिकूला स्थितिः शासने-ष्वासीत् सा परिवर्त्यैवेति। तस्या वाञ्छायाः पूर्तयो, १-जनताया मानसेष्वात्म-हीनता-भावनोदयाय भ्रष्टाचारवर्धनेन, २- सर्वकार-विरुद्ध जनमतस्य सुसज्ज-तार्थं गुप्तधनसंग्रह-जनान्दोलन-प्रवृत्तिवर्धन-मिथ्याप्रचार-सत्ताप्रवर्तितव्यवस्था-भङ्गार्थिकव्यवस्थाहानिश्चेत्यादिना कार्यसाधनेन, ३- प्रत्यक्ष-विरोधाय जनताया उत्तेजनाय प्रशासनस्य करदानावरोधैनौद्योगिक-प्रतिष्ठानेषु कर्मावरोधेन हिंसा-प्रवर्तन-शिक्षण-संस्थास्वशान्त्युद्भावनपूर्वकं युवसु विद्रोह-जागरणेन तथा ४- पूर्व-विहिताशान्तेर्माध्यमेन प्रत्यक्षक्रान्तेराह्वानेन शासनस्य सत्तोच्चाटन-प्रयासैर्विधी-यन्ते स्म। तथेयं स्थितिः केनापि कूटनीतिकेन षड्यन्त्रेणैव सम्पाद्यते स्म।

एककोटिमितानां शरणार्थिनां भारेण प्राय एकलक्षमितपाकिस्तानस्य बन्दिनां संरक्षणव्ययेन तथा केवलं युद्ध एव द्विशतकोटिमुद्राणामतिरिक्तेन व्ययेन

संयुज्य भारतीयजनता सर्वकारस्यार्थिकस्थितिश्च प्रभाविते एव। तस्मिन्नेव समये प्रधानमन्त्रिपदासीनायाः श्रीमत्या इन्दिरागान्धी महाभागाया अपि प्रगतिमभिलक्ष्यासहना विपक्षा अर्धसत्याभिः स्वीयाभिर्युक्ति-प्रतियुक्तिभिः श्रीमतीमिन्दिरां तद्दलञ्च दूषयितुं मिथ्याऽऽरोपैः कलङ्कयितुञ्च प्रावर्तिषत। 'निर्वाचनेषु शासकीय-साधनानां दुरुपयोगस्यापारस्य धनराशेर्व्ययस्य चारोपौ तत्र प्रमुखावास्ताम्।' सन् १९७१ ई० वर्षे रायबरेली-क्षेत्रतो लोकसभायै श्रीमतीन्दिरागान्धी यदा निरवाच्यत तदा तदीयेन प्रतिद्वन्द्विना श्रीराजनारायणेन तद्विरुद्धमुच्चन्यायालये प्रस्तुता याचनाऽपि सत्यस्य न्यायस्य च प्राप्त्यपेक्षया तस्यामारोपिता विभिन्ना आरोपा जनतायां समाचारपत्रेषु च चर्चा-विषया भवेयुरिति राजनीतिकोद्देश्येनैव प्रेरिता अभूत्।

पूर्वोक्तानामारोपाणां माध्यमेनापि यदा विपक्षाः श्रीमतीन्दिरामहाभागां सत्तायाः प्रच्यावयितुमक्षमा अभूवँस्तदाऽऽर्थिककाठिन्यस्य राजनीतिकं लाभमवाप्तुं तैरौद्योगिकसंस्थानानां कर्मचारिणो माध्यमीकृताः। तेभ्यः सम्प्राप्तस्य शान्ति-पूर्णस्यान्दोलनस्य कर्म-विरामस्य च दुरुपयोगं साधयद्भिर्विपक्षस्थैस्ते जन-समाचार-यातायातसाधनादीनां खण्डनाय प्रेरिताः। आसीत् तल्लोकतन्त्राय कलङ्कपूर्णं कृत्यम्! नैतावदेव; विरोधिदलानीन्दिरादलस्यासन्तुष्टान् सदस्यानपि विभक्तुमारभन्त। निष्ठावतामारक्षि-कर्मचारिणां हिंसात्मकान्दोलनाय धूम्रयान-कर्मचारिणां याचनाभ्योऽपि च तेषां समर्थनमासीत्। तदा छात्रा अप्युत्प्रेरितास्तेषां क्रोधस्यापि च पूर्णो लाभस्तैरवाप्तः। यतो हि—

परस्य दोषानपि सर्षपोपमान्, विविच्य मालूरफलोपमान् सदा।
प्रकाशयन्ते, न निजाँश्च दुर्गुणान्, गृणन्ति दृप्ता महतोऽपि दुर्जनाः ॥१७॥

तदानीं स्वपराजयेन खिन्ना विपक्षवादिनः स्वीयानां याच्ञानां पूर्तये हिंसायामप्यवतरिताः, सर्वकारसम्पदो विनाशं त आत्मनां न मन्वाना एव तत्कृत उद्युक्ता अभवन्। तादृशं विध्वंसं विलोक्यैव राष्ट्रपति-श्रीगिरिमहानुभावाः स्वकीय एकस्मिन् राष्ट्रिये सन्देशे हिंसायाः सार्वजनिक-सम्पदां विनाशस्य च निन्दनमकार्षुः। विविधैर्दुरुपायै राजनीतिकं लाभमवाप्तुकामानां जालादुन्मुच्य स्वदेशस्यौद्योगिकार्थिक-ह्रासस्य परिहरणाय तादृश-संस्थानानामधिपक्षतः कर्मचारिणश्च सामूहिकरूपेणापि तैर्निवेदिताः। मई १९७३ ई० मास उत्तरप्रदेशस्यारक्षि-विद्रोहस्तस्मिश्च-लखनऊविश्वविद्यालयच्छात्राणामाहुतिदानमन्ते च तदानीन्तनमुख्यमन्त्रि-'श्रीकमलापतित्रिपाठि'महोदयैः स्वीयमन्त्रिमण्डलेन सह त्यागपत्रदानं चेति सर्वा घटना विस्मयावहा एवावर्तन्त। तादृश एव विषमे समये विमान-सेवाकर्तॄणां कर्मचारिणोऽपि तैः कर्मविरोधायोत्प्रेरिताः।

इत्थं सत्यपि महति साफल्ये श्रीमतीन्दिरागान्धीमहाभागा शान्त्या शासनं कर्तुं नाशक्नोत्। यद्यपि देशोऽस्माकमन्नसङ्कटादुन्मुच्यात्मनिर्भरतां प्राप्नोत् तथापि बाङ्गलादेशस्य शरणार्थिनां कारणात् पाकिस्तानेन सह युद्धस्य कारणाच्चार्थिका दुष्परिणामा प्रकटितुं प्राभवन्। देशे त्रयोदश-प्रतिशतमिताया महर्घतायास्तथा व्यापारिवर्गेषु भ्रष्टाचार-बाहुल्याज्जनता त्रस्यन्तीवावालोक्यत। नैतावदेवापि तु स्वयं तदीये प्रशासने नेतृवर्गे चापि भ्रष्टाचाराभिवृद्धेश्चिह्नानि दृष्टिगोचरतामायातुं प्रवर्तितानि। देशस्य प्रतिप्रान्तं विघटन-वातावरणं प्रसृतमिवालोक्य श्रीमतीन्दिरागान्धी सर्वानपि सुघटितान् वस्तुं राष्ट्रियैकतां संवर्धयितुञ्च बहुशो न्यवेदयत्।

सन् १९७४ ई० वर्षस्यारम्भे गुजरात-प्रदेशे छात्राणामान्दोलनमारब्धम्, तस्यान्दोलनस्य साफल्येन प्रतिपक्षिणो महान्तमात्मविश्वासं प्राप्नुवन्। अन्यतो बिहारशासनमपदस्थं विधातुं कम्यूनिष्टा आन्दोलनमप्यकार्षुस्तस्यां स्थितौ च प्राक्तनः सम्मानितो नेता **श्रीजयप्रकाशनारायणमहाभागो**ऽपि तस्मिन् सम्मिलितः। आन्दोलनस्य सञ्चालन-सूत्रं स्वहस्तेऽगृह्णात्। सम्पूर्णेऽपि वर्षे श्रीजयप्रकाश-महाभागस्य नीत्या न्यूना अन्यूना बिहार-शासन-पराकरण-प्रयाससंवलित-प्रक्रियाः प्राचलन्नेव। प्रान्ते प्रतिपक्षमैक्ये सङ्कलयितुं स साफल्यमवाप्नोदेव। तेष्वेव दिवसेषु **श्रीमतः सञ्जयगान्धिनः** कारणादपि जनाः श्रीमतीमिन्दिरागान्धी-महाभागामालोचयितुञ्चेङ्गयितुमचेष्टन्त। साऽऽलोचना तस्य महाभागस्य **'मारुति-तैलयानयोजना'**याः कारणादवर्तत। हरियाणाप्रदेशस्य भूमेरधिग्रहणस्य तथा योजनाप्रवर्तनाय धन-सङ्ग्रहणस्य विषयौ तत्र प्रमुखावभूताम्। यद्यपि तद्विषये स्वयं जनताऽजानाद् यदत्र विषये श्रीमती गान्धीमहाभागा स्पष्टमेवापरामृष्टा वर्तते किञ्च के चन भ्रष्टा मन्त्रिणः पदाधिकारिणश्चैवोत्तरदायित्वभाजः सन्तीति।

ईदृशीषु चरमोत्कर्षवतीषु घटनास्वपि प्रधानमन्त्रि-महाभागा २६ अप्रैल १९७५ ई० दिवसे **'सिक्किम'**प्रदेशं भारतसङ्घस्य द्वाविंशतितमं राज्यमघोषयत्। ततः परं २८ अप्रैल १९७५ ई० दिने च **'राष्ट्रमण्डल-प्रधानमन्त्रि-सम्मेलने'** 'समवेतुं **'जमैका'** नगरमयासीत्।

तस्मिन्नेव हायने '१२-जून' दिने, इलाहाबादस्योच्चन्यायालयेन स्वकीय एकस्मिन् निर्णये रायबरेलीतः श्रीमत्या इन्दिरागान्धी-महाभागाया निर्वाचनं कासाञ्चिदनियमिततानां कारणादवैधं घोषितम्। श्रीमतीन्दिरागान्धी-महाभागा पुनरप्युच्चतमन्यायालय आवेदनमकार्षीत्। प्रतिपक्षः प्रतिदिनमान्दोलनं प्रारभत यत् प्रधानमन्त्रिणा त्यागपत्रं दातव्यमिति। २४ जून १९७५ ई० दिने सर्वोच्चन्यायालयस्य सत्तावकाशकालिकेन पीठेन श्रीमत्या गान्धीमहाभागाया आवेदनेन **'स्थगनादेशं'** प्रसारयता घोषितं यद्—"अग्रिमादेशं यावत्, सा संसदः कार्यवाहिनीषु

भागं गृह्णती प्रधानमन्त्रिणः पदे स्थातुं शक्नोति। केवलं तस्या मतदानेऽधिकारो न भविष्यतीति।"

यद्यप्ययं निर्णय उच्चन्यायालयस्यासीत् तथा विंशति-दिनानामवधिरपि तस्या उच्चतमन्यायालये पुनरपि विचारार्थमावेदन-पत्रोपस्थापनाय दत्त आसीत् किन्तु विपक्षदलनेतारस्तावन्तं कालं निश्चेष्टमवस्थातुमनुत्सुका भूत्वा नैकान् विरोधप्रकारानाधृत्य कथमपि श्रीमतीमिन्दिरागान्धीमहाभागां पदाच्च्यावयितुमेवावाञ्छन्, फलतो बहुशश्चलयात्राः समायोजिताः, सभासु विरुद्धानि भाषितानि, सामूहिकावरोधः प्रवर्तितः, संसदः परिवारणस्यापि योजना निर्धारिता। एकस्य कूटनीतिकयुद्धस्यारम्भ एव तदानीं विरोधिदलेनारब्धम्। २५ जून १९७५ दिवस ऐतिहासिकं प्रदर्शनमायोजितं यस्य नेतृत्वं श्रीजयप्रकाशनारायणो व्यधात्। तत्रैवेदमपि घोषितं यद् 'इन्दिरा त्यागपत्रदानाय विवशयितुं २९ जूनतः सकलेऽपि देश आन्दोलनं करिष्यत' इति। इयदेव नैव, तेनेदमपि कथितं यदारक्षिणः सैनिकाश्च शासनस्य निर्वैधानिकानामादेशानां पालनमपि निषेधयेयुः। तदा स्थितेर्गाम्भीर्यं विचिन्त्य श्रीमती इन्दिरागान्धी-महाभागा तात्कालिकमन्तिममस्त्रं प्रयोक्तुं विवशाऽभूत्।

वस्तुतस्तदानीं श्रीमतीन्दिरागान्धी स्वपदात् त्यागपत्रं प्रस्तोतुं तथोच्चन्यायालयज्जनताया न्यायालयाच्च निर्णयं कारयितुमैच्छत् परं कनीयसः पुत्रस्य श्रीसञ्जयगान्धिनस्तथा केषाञ्चिदन्येषां सम्मतिप्रदानामाग्रहेण सम्मत्या च २५ जून १९७५ ई० दिने देशे **'आन्तरिकस्थापालकाल प्रवर्तनस्य'** घोषणामकारयत्। २६ जून-दिने घोषणोत्तरं राष्ट्रस्य नाम्ना वक्तव्यं प्रसारयन्ती साऽकथयत्—

"लोकतन्त्रस्य नाम्नि लोकतन्त्रस्य कार्य-व्यवस्थाभ्यो नकारात्मकं स्वरूपं दीयते। केचन जनाः सेनामपि समुत्तेजयितुं प्रवृत्ताः सन्ति। अन्येऽपि भूयांस ईदृशा एवानुचित्ता विचारा विपक्षैरनुस्त्रियन्ते। अत एव लोकतन्त्रस्य रक्षणाय साम्प्रतिकोऽयमुपाय एव समुचित आसीदित्यस्य प्रवर्तने महान् हेतुरस्तीति।"

पुनश्च साऽकथयत्—

"हिंसाया घृणायाश्चैकमीदृशं वातावरणं सुसज्जितं कृतमस्ति, यस्य फलस्वरूपमेकस्य केन्द्रीय-मन्त्रिणो हत्याऽभूत् तथा मुख्यन्यायाधीशस्य प्राणापहरणप्रयासा अक्रियन्त। विरोधिदलैः केन्द्रशासनं पूर्णरूपेण पङ्गु विधातुमावेष्टनान्दोलनत्रोटनस्फोटनानां तथौद्योगिककर्मकराणामारक्षिणां सुरक्षा-सैनिकानां चोत्तेजनस्यापि कार्यक्रमा निर्धारिता आसन्।··· एतादृशः कार्यक्रमः सार्वजनिक-व्यवस्थापनायै गभीरः सङ्कटोऽभविष्यत् तथाऽर्थव्यवस्थामियतीं क्षतिग्रस्तामकरिष्यत् यद् व्यवस्थापनमतीव कठिनमभविष्यत्। एतस्यास्य सर्वस्यावरोधनमावश्यकमासीत्।

विरोधिभी रचितः कार्यक्रमो लोकतन्त्रस्यानुरूपो नास्ति। स प्रत्येकं निकषे राष्ट्र-विरोध्येवाभविष्यदतस्स नानुमतः......।" इत्यादि।

□ आपातकालस्य विचित्र-घोषणा

देशे जनाः केचन वैभवान्विता, अन्ये च केचिद् धनहीन-जीवनाः।
जीवन्ति चैतज्जनतन्त्रदूषणं, सद्योऽपवार्यं निजदेश-गुप्तये ।।१८।।
भ्रष्टाश्रया द्यूतरता विकर्मिणश्चौर्यार्जिना भूरि-विभेद-वृत्तयः।
आतङ्क-दुर्वृत्त-युता विगर्हिताः, कुर्वन्ति देशस्य मुधैव दुःस्थितिम् ।।१९।।
आलोक्य तत्सत्कृतमुद्धतायितं, देशस्य रक्षार्थमिहास्त्रमुत्तमम्।
मत्वा द्विषां दुर्दमनाय वर्तिता, आपातकालस्य विचित्र-घोषणा ।।२०।।

श्रीमतीन्दिरागान्धी प्रारम्भादेवात्मानं देशस्यैकां सेविकां मत्वैव राष्ट्रियेषु सेवाकर्मसु प्राणपणेन संलग्नाऽभवत्। यदा राष्ट्रवासिनस्तदीययोर्हस्तयोः स्वदेशस्य सर्वविधानां प्रगतीनां परिवर्द्धनाय नवभारतस्य निर्माणाय विकासबाधकानां तत्त्वानां पराकरणाय च गुरुतरं कार्यभारं प्रधान-मन्त्रि-पदरूपेणार्पितवन्तस्तदा सा स्वकीयेन दृढसङ्कल्पेन सहैव प्रत्येकं भारतीयं स्वं स्वमुत्तरदायित्वं परिज्ञाय तदनुरूपाणि कार्याणि कर्तुं प्रैरयत्। स्वदेशे वर्तमानानां समस्यानां समाधानाय जनताः प्रोद्बोधयन्त्या तया कथितं यत् सर्वासां समस्यानां समाधानम् 'अधिकैः श्रमैरधिकैरुत्पादनै'रेव भवितुमर्हति तदर्थमस्माभिः सर्वदा सावधानैर्भवितव्यम्।' **'स्वतन्त्रता शान्तिः प्रगति'**श्चेति त्रयं भारते वर्ततां वर्धतामिति निश्चित्यैव सा महाभागा प्रतिक्षणं चिन्तयन्ती देशे महत्त्वपूर्णा योजनाः प्रावर्तयत्। भौतिकानि विज्ञान-विजृम्भितानि साधनानि समाकलय्योद्योगेष्वात्मनिर्भरत्वमासादयत्। समाज-कल्याणं च सम्पादयितुं महिलानां बालानां दलितानां विकलाङ्गानां कृषकाणां कर्मकराणां तथा सर्वसामान्यानां सर्वविध-सौविध्यायावसरान् प्रापयत्। किन्तु राजनीतिक-स्वार्थवशाः प्रतिपक्षधराः प्रतिक्षणं छिद्रान्वेषणपराः कौटिल्य-वर्धनप्रखरा देशस्य प्रतिनगरं प्रतिग्रामं लब्धप्रसराश्च सन्तो लोकतन्त्रस्य वास्तविकीं रीतिमेव दूषयितुं प्रावर्तन्त तदाऽमनस्कतयाऽनिच्छन्त्याऽपि श्रीमती-न्दिरागान्धी-महाभागयाऽऽ**पातकालप्रवृत्तेर्घोषणा** विहितेति स्पष्टमेव। यतः—

परिस्थिति-वशाज्जनैर्मनसि यन्न चेच्चेष्टितं,
न यच्च सुखदं भवेत् सकल-मानवेभ्यो हितम्।
तथापि पुरतः स्थितं प्रकटमुत्कटं सङ्कटं,
समीक्ष्य बल-पूर्वकं भवति वर्तनीयं हि तत् ।।२१।।

आपातपरिस्थितेर्घोषणानन्तरं श्रीमतीन्दिरागान्धी भारते 'शोषण-विहीनस्य जातिविहीनस्य च समाजस्य निर्मितेर्लक्ष्यं प्रापयितुं १ जुलाई १९७५ ई० दिने

कतिपयानां कार्यक्रमाणां घोषणामकरोद् ये **'विंशतिसूत्रीयाः कार्यक्रमा'** इति संज्ञया सम्बोधिताः। आपातस्थितेः समर्थकैर्विश्वस्तं यदिमे कार्यक्रमा देशस्य कोटि-कोटि-जनेष्वाशायाः किरणा उद्बोधिता नवीनाश्चेतना उत्पादिताश्च। विंशतिसूत्रीयाणां कार्यक्रमाणां लक्ष्यमार्थिकविकासेन सहैव समाजिको न्यायोऽप्यासीत्। कार्यक्रम-मिमं प्रसारयन्त्या श्रीमतीन्दिरागान्धी-महाभागयोक्तमभूत्।

"अस्माकं जननाया अधिकांशो ग्रामेषु वसति। अस्माभिः कर्षणास्याधिकतम-सीमसम्बन्धिनियमाः प्रवर्तनीयाः सन्ति किन्त्व भूमिहीनेषु भूमेर्वितरण-व्यवस्थाऽपि द्विगुणितेनोत्साहेन सम्पादनीयाऽपि विद्यते। अनुपयोगिन्याः कृषिभुवो वितरणे विशिष्य जनजातीयो वर्गः प्राथम्येन सहयोक्तव्यः। भूमिरहितेभ्यः कर्म-चारिभ्यो भुवः स्वामित्वदानायापि व्यवस्था विधीयेति।"

आन्तरिकापातस्थितेर्घोषणया सहैव देशस्य ते सर्वेऽपि नेतारो बन्दीकृता ये देशेऽराजकतायाः प्रसारणेन राजनीतिकलाभाय प्रयासानकर्षुः। श्रीमतीन्दिरा स्वकीयस्य दलस्य तानपि नेतॄन् निग्राहितवती ये गुप्तरूपेण विपक्षाणां समर्थने प्रसक्ता आसन्। तया विश्वं दर्शितं यत् सत्यामावश्यकतायां कुसुमादपि कोमला सा वज्रादपि कठोरा भूत्वाऽपि देशस्य रक्षणे तत्परा भवतीति। अराजकान्यसामाजि-कानि च तत्त्वानि खिन्नानि भूत्वा सहैव भीता अप्यभूवन्। सामान्या जना वाता-वरणे मनाक् शान्तिमप्यन्वभवन्। दैनिकानि प्रयोज्यानि वस्तूनि सौलभ्यात् प्राप्तुं प्रावर्तन्त। सम्पूर्णेऽपि देशे सामाजिकी स्थिरता दृष्टिगोचरतामायाति स्म। राज-नीतिकसङ्कटस्य समाप्तिरजायत। प्रशासनतन्त्रे स्फूर्तिः पर्यलक्ष्यत। देशेऽनुशासन-वीचयो धावितुं प्रवृत्ताः। किं बहुना—

कार्ये तत्परता मतौ च समता सूत्पादने वृद्धिता,
व्याहारे शुचिता मिथौ व्यवहृतौ निःस्वार्थता नार्थिता।
प्रज्ञायां पटुता परेषु मृदुता मित्रेषु निर्व्याजता,
येषां कर्मसु राजते भुवि सदा सम्प्राप्यते तैर्जयः॥२२॥

इत्यनुसारं तया समग्रेऽपि विरोधि-दले यन्मालिन्यं व्याप्तमासीत्तस्यापसा-रणाय तादृंशि कर्माणि प्रवर्त्य देशस्य समुन्नतये बहु प्रयतितम्। तथासत्यप्यापात-कालघोषणयाऽऽतङ्कस्य वातावरणं तु प्रसृतमेव। देशस्य जनता विरोधि-दलानि च श्रीमतीन्दिरागान्धीमहाभागा कदाचिददृशं कठोरं चरणमपि प्रवर्तयिष्यतीति तु कदापि नाकल्पयन्। विरोधिभिरापातकालिकीं स्थितिमनुरुध्य भूयांस आरोपा अपि निरूपिताः, परं ते तथ्येभ्यो दूरवर्तिन एवासन्। यतो ह्यसंवैधानिकान्यलोक-तान्त्रिकानि कर्माणि विरोधिदलैरेव प्रवृत्तान्यभूवन्। तस्यां स्थितौ संविधानस्याव-हेलनं निरोद्धुं विहितेनानेनापातकालिक-प्रयासेन राजनीतिकापराधेन सहार्थिकाप-

राधकर्तारोऽपि दण्डभाज आसन्। समाचार-पत्रेष्वङ्कुशारोपणस्यापि संवैधानिक आधारस्तदानीमवर्तत। प्रतिक्रियावादिनां लघु-लघून्यपि वृत्तन्तांस्ते स्थूलस्थूलैर-क्षरैः प्रस्तूय जनतां सत्यात् परे यातुं प्रेरयन्ति स्म। भूयसोऽपवादान् प्रकाश्य जनेषु विकृतानां धारणां वर्धयन्ति स्म। अत एव तदानीं नियन्त्रणमाध्यमेन विचाराभि-व्यक्तिभ्यः केवलं रचनात्मिका दिगदीयत विनाशो नाक्रियत। आपातस्थितौ श्रीसञ्जयगान्धिनमुद्दिश्यापि बहव आरोपाः प्राकाश्यन्त। मारुति-यान-निर्माण-भूम्यधिग्रहण-धन-संग्रह-नगर-परिशोधन-परिवारनियोजनादिमाध्यमेन श्रीसञ्जये य आरोपा निहितास्तेषु विरोधिनां लक्ष्येषु श्रीमत्या इन्दिरागान्धीमहाभागाया विरोधस्य तस्याः सत्तायाः प्रच्यावनस्य प्रतिष्ठाया हननस्यैव लक्ष्याणि प्रमुखान्यासन्। परमस्य सर्वस्य काण्डस्य पृष्ठभूमौ तत्त्वमिदमासीद् यत्—श्रीसञ्जय एको महत्त्वाकाङ्क्षी युवक आसीत्, तस्य दृष्टिरतीव निपुणा कार्यकरणपद्धतिः सहजा सरला चावर्तत। तस्मै तदानीं युवक-काङ्ग्रेसस्य कार्यभारोऽदीयत किञ्च श्रीमती-न्दिरागान्धीमहाभागाया विंशति-सूत्रीय-कार्यक्रमाणां तदतिरिक्तानाञ्च पञ्चसूत्र-कार्यक्रमाणाञ्चोत्तरदायित्वमपि तस्मै प्रदत्तमासीदतस्तेन स्वकौशलेन सर्वं सम्पादितमिति तत्र प्रधानमन्त्रिमहाभागाया नासीद् हस्तक्षेपः। एवमेवान्येऽप्यारोपाः कौटिल्य-कलुषिता एवासन्।

कलुषित-हृदयानां द्वेष-भावाश्रितानां,
भवति भुवि विचित्रा रीतिरत्र प्रतीपा।
यदुचितमपि कृत्यं साध्यते सत्त्ववृत्त्या,
तदपि मलिनबुद्ध्या वीक्ष्यते दोषपूर्णम्॥२३॥

आपात-स्थित्या समग्रोऽपि देशः सामान्यायामवस्थायां परावर्तितः। शान्तेः स्थिरतायाश्च स्थितेरानयनस्योद्देश्यमभिलक्ष्य प्रवृत्त आपातकालो विश्वासस्य वातावरणमुत्पादयितुं सफलोऽभूत्। यद्यपि बन्दिनां राजनेतॄणां विषयेऽसामाजिकै-स्तत्त्वैर्भिन्न-भिन्नाः कथानिका निर्मायापवादाः प्रसारिताः परं तादृक् किमपि न सम्पन्नम्। तैः सह सहानुभूतेः सौजन्यस्य च व्यवहारा अक्रियन्त। तत एव ते कारास्वपि स्वीयान् विचारान् मूर्तयितुं समर्था अभवन्। केचन नेतारो भूमिगता भूत्वा स्वदेशे विदेशेषु च गुप्तरूपेण गतास्ते केवलं राजनीत्यैव न विद्रुता आसन्नपि तु तेऽन्येष्वपराधकाण्डेष्वपि प्रसक्ता आसन्, तस्मादेव तेषां पारिवारिकैरपि कष्ट-मनुभूतम्। आसीत् स हि समय एकताया अनुशासनस्य स्वदेशस्य सुदृढतायाश्च। तत एव ये तद्विषयिणीं घोषणां 'शक्ति-प्रयोगं' 'लोकतन्त्रस्य मरण-दिनं' वा कथ-यित्वा तामनिन्दयंस्तदपि सत्यं नावर्तत।

आपातकालस्यान्तराल एव १० अक्तूबर १९७५ ई० दिने श्रीमती गान्धी केन्द्रीयमन्त्रिमण्डले परिवर्तनमकरोत्। ७ नवम्बर-दिने च सर्वोच्चन्यायालयस्य

वैधानिकपीठेन प्रधानमन्त्रिणो रायबरेली-निर्वाचनं सर्वसम्मत्या वैधं घोषितं तेन च भूयोऽपि श्रीमतीगान्धी स्वदेशस्य विशेषतो विरोधिनां पुरत आत्मसम्मानेन मण्डिता। १७ नवम्बर ई० दिने विरोधिनेता श्रीजयप्रकाशनारायणो मोचितः। ८ दिसम्बरदिने भारतीय मुद्रण-नियन्त्रणस्य सीम सङ्कुचितम्। २३ दिसम्बरदिने पुनरपि मन्त्रिमण्डले किञ्चित् परिवर्तनमानीतम्। रक्षामन्त्रालयस्य कार्यभारः परस्मै सर्मपितः। अखिलभारतीयकाङ्ग्रेससमितेश्चण्डीगढनगरे सम्पन्ने पञ्चसप्ततितमे सम्मेलने नैकशः सुदृढानामुपायानां स्वीकरणाय निर्णीतं येष्वापातकालस्थितेः स्थगनं निर्वाचनानां स्थगनं तथा संविधानस्य पुनरीक्षणमपि सम्मिलितमासीत्। तदानीमेवेदमपि घोषितं यत् काङ्ग्रेसदलस्य पुनः सङ्घटनं करिष्यत इति।

इत्थं नानाविधासु प्रवृत्तिषु सतीष्वपि श्रीमतीन्दिरागान्धीमहाभागा कर्तव्य-पराङ्मुखी नाभवत्। सर्वा अपि पुर उपागताः समस्याः समाधातुं तत्परा सती स्व-देशस्य लोकतन्त्रं द्रढयितुं सर्वदा प्रायतत। विदेशेषु यात्रा विधाय दक्षिणाफ्रीका-देशस्य मुक्त्यान्दोलनेभ्यो भारत-पक्षतः समर्थनघोषणामप्यकरोत्।

सति मनसि शुभेच्छाशंसि-भद्रे विचारे,
विलसित - विविधोद्यच्छान्ति-भाव-प्रसारे।
श्रितवति च विकास-प्रोन्नति-प्राप्ति-भारे—
ऽप्यहह ! कुटिलनीत्या दूषितं लोकतन्त्रम् ॥२४॥

卐

[९]

स्थिति-कला

समृद्धेर्दिशि स्वस्तिमत् प्रस्थानम्

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्त समुद्रो योनिः ।
विख्याय चक्षुषां त्वमभितिष्ठ पृतन्यतः ।।
—यजुर्वेद० ११-२० ।

स्वदेश-सेवा-संसक्ताश्चिन्तयन्ते दिवानिशम् ।
समृद्धेर्दिशि जायेत प्रस्थानं स्वस्तिमत् कथम् ।।१।।
निन्दा-स्तुती नैव रुन्धः पथः श्रेयोऽभिवाञ्छताम् ।
कण्टकाः कुसुमायन्ते सत्य-मार्गानुयायिनाम् ।।२।।

एकोनविंशतिमासात्मकमापातकालं विमृशद्भिर्लेखकैः सूक्ष्मया दृष्ट्या पर्यालोच्य लिखितमस्ति यच्छ्रीमतीन्दिरागान्धी महाभागा निश्चेष्टा भूत्वा कदापि नातिष्ठत् । सा हि—

विश्वस्मिन् विश्वे व्याप्तं मुद्रास्फीति-सङ्कटमभिलक्ष्य कौशलेन भारते तं न्ययन्त्रयत् । फलतो मूल्येषु नैयून्यमेतुं प्रावर्तिष्ट । आर्थिकापराधिभ्यः कठोरान् नियमान् प्रासारयत् । अश्वेतधनस्य तथा दैनिकोपयोगि-वस्तूनां सङ्ग्राहकेभ्यः कठोरां दण्ड-व्यवस्थां व्यदधात् । अनुचितेन प्रकारेणार्जितायाः सम्पदः शासनेन ग्रहणस्य निर्णयं समपादयत् । तथाविधं विधातुं नियमेष्वावश्यकानि संशोधनान्यप्यकारयत् । उपभोक्तॄणां सौविध्यायावश्यकवस्त्वधिनियमं प्रावर्तयत् । वस्तु-निर्मातृभ्यो विक्रेतृभ्यश्च प्रत्येकं वस्तुनि पुटके वा तस्य निर्माणतिथेर्भारस्य मूल्यस्य चाङ्कनमनिवार्यमघोषयत् । प्रत्येकमापणे, निर्माणशालायां शासकीयाशासकीय-विक्रयकेन्द्रेषु वस्तुनो मूल्यस्य सूच्या बहिः प्रकटनमावश्यकं प्रत्यपादयत् । प्रत्येकमावासपरिसरे स्वयंसेवि-महिलानां समितयः संयोज्य ताभ्योऽनावश्यकप्रक्रियया वस्तु-सङ्ग्रहस्यापमिश्रणस्य च परीक्षणसौविध्यं समसूचयत् ।

मानवेभ्यः सर्वतः पूर्वं खाद्यान्न-व्यवस्थाऽनिवार्या भवति, तदर्थं खाद्यान्न-स्थितेस्तथेक्षूत्पादनादिव्यवस्थासु स्फूर्तिमानयत् । स्वीयेन कुशलेन नेत्रीत्वेन वितरण-व्यवस्थायां परिष्कृतिमकारयत् । इक्षूणामुत्पादने तु तदेयती वृद्धिरभूद् यतः शर्कराया निर्यातेन विदेशिमुद्रार्जनमपि विहितम् ।

खाद्यान्नानां न्यूनता-परिहारायोत्पादनाभिवृद्धिरनिवार्याऽऽसीत्। अत एवोत्पादन-विवृद्धये लाभकारिण्यो योजना निर्मिताः। यास्वतिरिक्तिताया भूमेः कर्षण-व्यवस्थाः, सेचनसाधनवृद्धिः, उर्वरकोत्पादनवर्धनं, तन्मूल्येषु नैयून्यं, भूमिगत-सलिलस्याधिकव्ययेनोपयोगाय परियोजनाः कृषकेभ्यश्च विद्युत्प्रदान-व्यवस्था-श्चेति विशिष्य महत्त्वपूर्णा आसन्। सहैव लघवः कृषकाः स्वीयमुत्पादनं वर्धयितुं समर्थाः स्युरिति धिया ऋणदानपद्धतिषु सारल्यमानीतम्। कृषकाणां सौविध्याय ग्रामीणक्षेत्रेषु धनागारिका (बैङ्काः) उद्घाटिताः। एतस्य सर्वस्य परिणामोऽयमभूद् यत् खाद्यान्नानामापातः समाप्तस्तथा कृषकैरियदुत्पादितं येन देशः खाद्यान्नविषय आत्मनिर्भरोऽभवत्।

भूमि-परिष्कृति-कार्यक्रमा अपि तस्मिन् काले कल्याणकारिणः प्रवर्तिताः। तदाधारेण भूमि-रहितेभ्योऽतिरिक्तताया भूमेर्वितरणं कृतम्। तादृश-कार्यक्रमेभ्यो व्यावहारिकं रूपं दातुं मार्च १९७६ ई० मासे मुख्यमन्त्रिणामेकं सम्मेलनमायोजितं तत्र च मुख्यमन्त्रिणोऽष्टानां वार्तानां कार्यान्वयनाय परामृष्टाः। तासां वार्तानां कार्यरूपे परिणमनात् जनप्रतिनिधयोऽपि सम्मेलने समावेशिताः। ये जना अवैध-रूपेण भूमिं प्रयुञ्जन्ति स्म तेषां गवेषणं विधाय तेभ्यो भूमिं गृहीत्वा च भूमि-हीनेभ्यः साऽदीयत। अवैधाधिकृताया भुवः सम्बद्धानि यानि २० सहस्रोत्तर १३ लक्षमितानि प्रकरणानि शासनस्य पुरत आयातानि तेषु ७ लक्षमितानि प्रकरणानि सत्वरं निर्णीतानि। तया योजनया लाभानां प्रापकेषु जनेष्वेकलक्षमिता जना अनुसूचित-जातीयास्तथा जन-जातीया अवर्तन्त।

शासनेन तस्यां दिश्यपि महत्त्वपूर्णं चरणं प्रवर्तितं येन प्रत्येकं जनस्तस्या आवश्यकतानुसारं स्वल्पमूल्यवद् वस्त्रं प्राप्तुं शक्नुयात्। सर्वेऽपि वस्त्रनिर्मातृयन्त्रा-लयाध्यक्षाः शासनेनादिष्टा यत् त एकस्यां निश्चितायां मात्रायां स्वल्पमूल्यवन्ति वस्त्राणि निर्मान्त्विति। तादृशाल्पमूल्यवतां वस्त्राणां वितरणार्थं स्थाने-स्थाने नियन्त्रित-मूल्यवन्ति विक्रयकेन्द्राण्यप्युद्घाटितानि। सारल्येन तत् कार्यं प्रचलेत् तदर्थञ्च सहकारिण्यः समितयोऽपि समायोजिताः। ग्रामेषु तादृशवस्त्रविक्रय-व्यवस्थायै ३७ सहस्रमितानि विक्रयकेन्द्राणि स्थापितानि। हस्त-वयनेन वस्त्रो-त्पादनमपि शासनेन प्रोत्साहितम्। श्रीमत्या इन्दिरागान्धीमहाभागाया विंशति-सूत्रीयस्य कार्यक्रमस्यान्तर्गतं हस्तवयनोद्योगः पुनरुद्भावितस्तथोद्योगाय तस्मै गतिं दातुं १९७६ ई० वर्षे काश्चन परियोजनाः प्रवर्तिता यासामाधारेण भारतं १६२ कोटिमुद्राणां हस्तनिर्मितवाससां निर्यातमकार्षीत्।

ग्रामेषु वसतां गृहहीनानां दीनानामावासायेत्थं व्यवसितं यत् तेभ्यः केचन भूभागा भवन-निर्मितये देयास्तथा भवन-निर्माणोपयोगिन्यः सामग्र्योऽपि स्वल्पेन मूल्येन प्रापणीया इति। कतिषु चिद् राज्येषु येभ्यो भूभागा उपलम्भितास्तेभ्यो

भवन-निर्माणायर्णप्रदानव्यवस्थाप्यक्रियत। एकाकिन्युत्तरप्रदेशेऽनया योजनया तत्र द्वादशलक्षजना लाभान्विता अभूवन्। ग्रामेष्वेव निवसद्भ्यो: भूमिहीनेभ्य: कृषिकर्मकरेभ्यो निर्धनेभ्यो गृहनिर्माणस्य कार्यं पञ्चायत-संस्थाभ्यो दत्त्वा देशे विकसिताविकसिता: ३२,५०,००० संख्यका भूभागा निर्मूल्यं वितरिता:।

न्यूनायवद्भ्य: पेयपत्रिकोद्यानेषु कर्माणि कुर्वद्भ्य: कर्मकरेभ्यो गृहनिर्माणाय योजना निर्मितास्तासां परिपूर्तये च ५८००१६ कोटिमितानां मुद्राणां व्ययव्यवस्था व्यधीयत। तस्मिन्नेव वर्षे प्राय: सार्धषड्लक्षमितानि गृहाणि निर्माप्य सार्धद्विलक्षमितानां गृहाणां निर्माणाय कार्यारम्भा विहिता:।

नगराणां विकासार्थं राजधानीस्थक्षेत्रेभ्य: २० कोटिमुद्राणां व्यवस्था तथा नगरीय-विकासाय २३० कोटिरूप्यकाणां व्ययदिङ् निर्धारिता। नगराणामापणा: स्वच्छा विहिता। अवैधा भुवोऽधिकारा निराकृता:। देहल्यां शासकीयायां भुवि वसतां जनानां व्यवस्थापनाय तेभ्यो भूभागा अदीयन्त।

आर्थिकसमत्वसम्पादनाय शासनेन संसदा नगरीय-भूमि-सीमया विनियमनस्याधिनियम: पारितस्तदनुरोधेन च सीमतोऽधिकायां भूमौ शासनस्याधिपत्यं व्यवस्थापितम्। तेष्वेव भूभागेषु दुर्बलवर्गाणां भवननिर्माणयोजना विनिर्माय क्रियान्विता:। ग्रामीण-विकासाय प्रचलन्तीनां योजनानां प्रगतये तथा ताश्च लक्ष्यं यावत् प्रापयितुं १३.६५ कोटिरूप्यकाणां राशि: स्वीकृत:। तासु योजनासु पशुपालन-कृषि-सहकारिता-स्वास्थ्य-केन्द्र-कुटीरोद्योग-पारम्परिक-लघूद्योगानां विकासार्थं विशिष्य ध्यानं दत्तम्। तस्मिन्नेव वर्षे पञ्चायत-समितिभ्योऽतिरिक्तानां जनपद-परिषदां स्थापना अपि विहिता यासां माध्यमेन विकासकार्याणि सुतरां प्रगतिं श्रितानि। सीमान्त-कृषकेभ्य: सहयोगायाभिकरण-व्यवस्था सम्पादिता। तन्माध्यमेन।भिकर्तार: सीमान्तकृषकाणां कृषिकर्मकराणाञ्च गवेषणां विधाय तेषां काठिन्यान्यपाकुर्वन् साहाय्यं च प्रदातुं व्यवास्थापयन्। ईदृशकार्येभ्य: २००कोटिमुद्राणां व्यवस्थाऽभूत्।

दीनानां शोषितानां धनपति-विहित-व्यूह-मध्यङ्गतानां,
सामन्तानां समन्ताद् बहुविध-वितते बन्धने पातितानाम्।
भूस्वामित्वं श्रितानां कुसृति-विवशितोद्धारभारोब्जितानां—
मुद्धारार्थं विधानं विरचितमुचितं सौख्यदं शासनेन ।।३।।

अपि च— **ऋण-स्थगन-मोचने नियमिते तत: शोषिता:,**
कृषीवल-जना द्रुतं सुसरलै ऋणैस्तोषिता:।
सदुद्यम-रतास्तथा श्रमकरा: प्रबन्धादिषु,
प्रयस्य परिषत्स्वपि प्रतिनिधित्वत: पोषिता: ।।४।।

हठादुद्योगानां सततमवरोधाय स-बलं,
विसृष्ट्यै मुक्त्यै वा श्रमिक-निवहस्याशु चयनात् ।
गृहीतव्याऽवश्यं ह्यनुमतिरिति द्राङ् नियमितं,
ततः श्लाघ्यं सर्वैरपि भुवि तदा शासनमभूत् ।।५।।

इत्थमेव देशस्यार्थिक-विकासाय महत्सूद्योगेषु सम्पदामधिकाधिकं नियोजनाय योजना आहिताः। रुग्णानांयन्त्रालयानां व्यवस्थाः शासनेन स्वहस्तसात् कृतास्तथा विमान-परिवहन-बेङ्क-बीमा-कृष्णाङ्गारोद्योगानां राष्ट्रियकरणं सम्पादितम् । नैष्कर्म्यापनोदनाय नूतनानामुद्योगानां स्थापनाः, उद्योगेषु कार्यरतानां श्रमिकाणां शिशुभ्यः समुचित-शिक्षा-व्यवस्थां विधातुं केन्द्रीयविद्यालयानामन्येषां साहाय्यप्राप्त-विद्यालयानां स्थापनाश्चाप्यक्रियन्त ।

भारतस्य परममित्रेण रूसदेशेन १९५५ ई० वर्षस्य जूनमासे श्रीजवाहरलालनेहरूमहाभागानां रूसयात्रया सहैव प्रवर्तितायाः सहयोग-प्रक्रियाया नैरन्तर्येण भारतीय-महोद्योग-विकासेषु परमोन्नतिरभूत् । द्वयोरपि देशयोर्मध्ये व्यावहारिकार्थिक-वैज्ञानिक-तान्त्रिक-सांस्कृतिक-क्षेत्रेषु विहितानां सन्धीनां परिणत्या मिथो मैत्री-भावना सुदृढाऽभवत् । भारतस्य तटस्थया विदेशनीत्या तथा श्रीमत्या इन्दिरागान्धीमहाभागायाः शान्ति-सहास्तित्व-भावनाभ्यां भारत-रूस-देशयोर्वर्धमाना मैत्रीसम्बन्धा भूयोऽपि दृढतरा अभूवन् । तेषामेव परिणामोऽयं विद्यते यत्—सांस्कृतिकादान-प्रदानाभियान्त्रिक - वस्तुनिर्माण-भवन - निर्माण-साधनौषधोद्योग-कर्गद-सैचन-व्यापारादिषु सहयोगा वर्धन्त एव । स्वदेशे सोवियत-रूसदेशस्य सहयोगेन 'भिलाई-लोह-संयन्त्रो, बोकारोस्थो धातु-यन्त्रालयः, रांचीस्थाऽभियान्त्रिक-वस्तुनिर्माण-शाला, कोर्बो-रत्नागिर्योरल्यूमीनियमस्य तथा दुर्गापुरे खनि-खनन-यन्त्र-निर्मितेः,हरिद्वारे विद्युतो महद्वस्तु-निर्माणस्य बरौनी-मथुरयोश्च तैलशोधनस्य विशालानां निर्माणीनां परियोजनाः साफल्येन प्रवर्तमाना भारतस्यार्थिके विकासे साम्प्रतमपि योगं कुर्वन्ति ।

रक्षासु शिक्षासु च पूर्णदाक्ष्यमानेतुमुद्घाट्य विधाः प्रशस्ताः ।
कृताश्च शान्त्यै सहयोग-लब्ध्यै मैत्र्याऽनुकूलाः प्रतिवेशि-देशाः ।।६।।
आपातकालस्य दिनेषु संयता, स्वराष्ट्र-सेवासु भृशं सुसङ्गता ।
आशासु सर्वास्वभवत् स्थितिः स्थिरा, व्यधादिदं चारु महीयसीन्दिरा ।।७।।

□ सम्पत्तौ च विपत्तौ च महतामेकरूपता

सम्पत्तौ नातिमोदन्ते विपत्तौ न तुदन्ति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ।।८।।

शान्ति सहयोगञ्च सर्वैर्देशैः सह विधित्सया श्रीमतीन्दिरागान्धीमहाभागा पाकिस्तानेन साकं पत्राचार-सेवा-विमान-सेवा-धूमयान-सेवाश्च पुनः प्रारभत। युद्धबन्दिनः परावर्तत। पञ्चशीलोद्घोषेण सम्पादितां चीनदेशीयां प्राक्तनीं मैत्रीं भूयः स्वस्वभावानुसारं सर्वाः पूर्वा घटना विस्मृत्य चीनेन सहापि सम्बन्ध-परिष्काराय सा प्रायतत राजनयिकं सम्बन्धञ्च समस्थापयत्। श्रीलङ्का-बर्मा-बांग्लादेश-नेपालादिभिर्देशेभ्यः सहापि तथैवावर्तयत्। जम्मू-कश्मीरेषु स्थायिन्यै शान्तये काङ्ग्रेसदलस्य सहयोगेन **'शेख अब्दुल्ला महोदय'** मुख्यमन्त्रित्वेनास्थापयत्। नागालैण्डं व्यवस्थापयितुं तत्रत्यामशान्तिमातङ्कवादितां च समापयितुं तत्र विकास-व्यवस्थाविधिमुन्नमय्य स्वेच्छया राष्ट्रवादि-सङ्घटनस्य काङ्ग्रेसे विलयमकारयत्। सिक्किमस्य जनताया भारते विलयस्य स्वप्नमपि सा विधानसभायां बहुमतं प्रापय्य साकारयत्।

विपक्षदलानां नेतारः श्रीमतीमिन्दिरागान्धी-महाभागां **'स्वेच्छाचारशालिनी शासिके'** त्यारोपेण वर्णयन्ति स्म किन्तु १८ जनवरी १९७७ ई० दिने लोकसभां सम्भज्य निर्वाचन-घोषणया सा स्वीयां लोकतन्त्रे दृढां निष्ठां प्रकटयन्ती विरोधिनामारोपमसदसाधयत्। तयाऽप्रत्याशितया निर्वाचनघोषणया विरोधिनो विस्मयं प्राप्ताः परं द्वेषात् केनाप्येतन्न स्वीकृतं यदिन्दिराया इदं कार्यं लोकतान्त्रिक-पद्धतावास्थायाः प्रतीकमासीदिति। निर्वाचन-घोषणोत्तरं येषां नेतॄणां विरुद्धं त्रोटन-स्फोटनानां कर्मसु कान्यपि स्पष्टानि प्रमाणानि नाभूवँस्ते विमोचिताः।

त्रयोदशमासानन्तरं कारातो मुक्तः श्रीमुरारजीदेसाईमहोदयो **'जनता-दल'**-नाम्नैकस्य संयुक्त-सङ्घटनस्य घोषणामकरोत्। तस्मिन् काङ्ग्रेससंस्थासन्तुष्टो वर्गो जनसङ्घो भारतीय-जनता-दलं समाजवादि-दलं च सम्मिलितमभूत्। विभिन्न-धारावतां तत् सङ्घटनं सफलं प्रत्यपद्यत। श्रीजगजीवनराम-हेमवतीनन्दनबहुगुणा-सदृशा अनेके महारथा इन्दिरायाः पक्षं त्यक्त्वा निःसृताः। श्रीजगजीवनरामस्य बहिर्गमनात् सत्तारूढदलस्यैकं वास्तविकं नवीनं विभाजनमभूत्। संसदि जगजीवन-रामो भारतस्य जनवसतेः सप्तमभागस्यास्पृश्यवर्गस्य प्रातिनिध्यं करोति स्म। तेनैकं **'काङ्ग्रेस फार डेमोक्रेसी'**-नाम्ना नवीनं दलमपि घोषितम्।

ये लोलुपाः स्वार्थदृशो ह्यनिश्चिताः, पदान्तिकासाश्च भवन्ति सङ्गनाः।
ते सम्पदि त्वाशु भजन्ति सङ्गतिं, दृष्ट्वा विपत्तिं ननु यान्ति सर्वतः ॥९॥

८ फरवरी १९७७ ई० दिने श्रीमतीन्दिरागान्धी-महाभागा सत्तारूढदलस्य कार्यक्रमं प्रास्तौद् यस्मिन् जनतायाः समाधानाय साऽकथयत्—काङ्ग्रेसदलं कदापि कस्याप्येकस्य जनस्य दलं नाभूत्। मया तु जनताया एकया विनम्रया सेविकयैव भाव्यम्। सर्वदैव काङ्ग्रेस-दलं सार्वजनिकं दलमस्थात्। तेन सर्वदैव

दीनानां हितस्य पक्षः समर्थितः। लोकतन्त्रं प्रति काङ्ग्रेसदलं पूर्णया निष्ठया संयुक्तमस्ति। ततस्तत् कोऽपि विचालयितुं न शक्नोति न वा पराकर्तुं शक्नोति।...... नवीने संविधाने न्यायालयानां प्रतिष्ठाया निष्पक्षतायाश्चोत्तरयदायित्वमपि सुनिश्चितमस्ति।" इति।

९ फरवरी १९७७ ई० दिने भारतीय-गणतन्त्रस्य **राष्ट्रपतीनां श्रीफकरूद्दीन-अली-महोदयानां निधनमभूत्।** तेषां निधनेन श्रीमती गान्धी भृशमाहता। ते गभीरा ज्ञानिन आसन्। विभिन्नेषु पदेषु कार्याणि कृत्वैवोच्चैःपदे प्रतिष्ठिता अभूवन्। श्रीमतीन्दिरायास्ते प्रबलाः समर्थका अप्यासन्। १९६९ ई० वर्षे काङ्ग्रेसदलस्य विभाजनावसरे त एव प्रथमे समर्थका अभूवन्। परिवारनियोजन-कार्यक्रममाध्यममाश्रित्यानुचितं लाभं प्राप्नुवानेभ्यो दण्डप्रदानायापि त उत्सुका अवर्तन्त। सङ्क्रान्तिके काले तेषां निधनेन सर्वेऽपि देशवासिनः खेदं सङ्कटञ्चान्वभूवन्!!!

न कोऽप्यवेदीदिदमद्य यावत्, कस्माद् विधाता विनिहन्ति शीघ्रम्।
सुसज्जनानत्र निरीहभावात्, कथं च पुष्यन्ति नितान्त-दुष्टाः॥१०॥

श्रीमतीन्दिरागान्धी दैवस्य प्रतिकूलताभनुभवन्त्येकदा श्री ई० पुष्पदासाय साक्ष्यं ददानाऽकथयत्—"अद्य प्रत्येकं जनः स्वस्याधिकारान् प्रति जागरूकोऽस्ति स हि यः कोऽपि वा भवतु। साम्प्रतिके विश्वे प्रेम्णः सद्भावनायाश्च स्थिरत्वाय दैन्यस्यापाकरणमत्यावश्यकं विद्यते। एवं तत्कालं कर्तुं न शक्यते। दैन्यं पूर्णतया परिहर्तुमपि न शक्यते। परं यथासम्भवं ततोऽधिकाधिकं जना दूरे कर्तव्याः। अस्माकं देशे यथैव वयमीदृशे कार्ये संलग्नास्तदैव सर्वा अपि शक्तयोऽस्माकं विरुद्धमेकीभूताः। देश्यं वैदेश्यं धनमर्थशक्तिः समाचारपत्राण्युद्योगाः सर्वेऽपि सम्भूयास्मान् प्रभावयितुमकथयन्। त इदं न कथयन्ति यद् 'वयं दैन्यस्य विरुद्धाः स्मः। प्रत्येकं जनः कथयति यद् दैन्यं निन्द्यं विद्यते, तथापि तस्य समाप्तेः कार्यक्रमाणां दिशि पुरो वर्धने सत्यस्माकं मार्गेऽवरोधमुत्पादयन्तीति।"

एवंविधायां स्थितौ स्वीयां धूमायमानां राजनीतिकीं स्थितिं धैर्येण संरक्षन्ती श्रीमतीन्दिरा-गान्धी-महाभागा जनवरी १९७७ ई० तः प्रायो मार्च १९७७ ई० पर्यन्तं समस्तेऽपि भारते स्वदलस्य पक्षेऽतिप्रबलं निर्वाचन-प्रचारमकार्षीत्। सा चापातकाले तथाकथित-दुष्प्रभावि-प्रक्रियाणां नैतिकमुत्तरदायित्वमात्मनि स्वयं स्वीकृतवती। तथासत्यपि तस्मिन् निर्वाचने काङ्ग्रेसस्यानेके महान्तो नेतारः पराजिताः। काङ्ग्रेसदलस्याशाया विपरीतानि फलानि प्रकटितानि। स्वयं श्रीमती गान्धी-महाभागाऽपि रायबरेलीक्षेत्रतो निर्वाचने पराजिता। समस्तं विश्वमेतेषां निर्वाचनानां परिणामं विज्ञाय विस्मितम्। एकादशवर्षेभ्यः प्रवृत्तमिन्दिरायाः शासनं भारते समाप्तम्।

निर्वाचनेऽस्मिन् श्रीमती गान्धी नैकाननुभवान् प्राप्तवती । काङ्ग्रेसस्य ते जना, ये ह्यापातकालस्यान्तिमं चरणं यावत् तस्याः समर्थनं कुर्वन्ति स्म तेऽपि निर्गताः। तेषु भूयांसः सौविध्यवादिनोऽप्यभूवन्। उत्तरभारते महान् पराजयोऽभूत् केवलं दक्षिण-भारत-गुजरात-महाराष्ट्रेभ्यस्तस्याः समर्थकाः सार्धशतमिताः सदस्या एव जित्वा संसद्युपागताः।

विरोधिदलानां स्पष्टमुद्देश्यमासीद्—श्रीमत्या इन्दिरागान्धी-महाभागायाः शासनस्य समाप्तिः। तेषां तद्दुरभिकाङ्क्षितं दुर्दैवान्न फलितम्। राजनीतिकसङ्घर्षाणामनुभववती श्रीमती गान्धी प्रत्याह्वानस्य स्वीकृतेः शक्तिमप्यधारयत्। पराजयानन्तरं च सा स्थितिं सर्वतो विमृश्य जनताया निर्णयं स्वीकृत्य च कार्यकारिराष्ट्रपतिमहामहिम-**श्री बी० डी० 'जत्ती-महोदयेभ्यः'** २२, मार्च ७७ ई० दिने स्वीयं त्यागपत्रं प्रास्तौत्। निजेभ्यः कारणेभ्यः खेदानुभवस्तस्या महाभागायाः प्रकृतौ नासीत्। परं राष्ट्रियेण पराजयेन साऽवश्यं दुःखिताऽभूत्। तथापि येन गरिम्णा सा प्रधानमन्त्रिपदं प्राप्ताऽऽसीद् तेनैव गरिम्णा विपक्षस्य नेत्रीत्वभूमिकाया निर्वाहस्यापि सङ्कल्पमकार्षीत्।

कर्तव्य-मार्गे सततं प्रसक्ताः, प्राप्तिं विसृष्टिं च न चिन्तयन्ति ।
दत्तं सुहार्देन च यैस्तदीयं, तेभ्योऽर्पणे स्याल् किमु चिन्तनीयम् ॥११॥

□ जनता-शासनं तदीयाः प्रवृत्तयश्च

अन्तर्भवति निलीनो, यदि दुरभिसन्धिजेन्धनो विरूपः ।
दहति शुभोऽपि विचारो, भवति न काऽपि स्थिरा वृत्तिः ॥१२॥

जनता दलेन बहुमतं प्राप्तम्। नेतृत्वं श्रीमुरारजी-देसाई-महोदयैरधिगतम्। तेषां चयनं जनतादलस्य संसत्सदस्यैर्नाक्रियत। सङ्घर्षः श्रीचरणसिंह-श्रीजगजीवनराममयोर्मध्येऽवर्तत किञ्च निर्णीतमासीद् यद् द्वितीयदिने श्रीजयप्रकाशनारायणः प्रातः सदस्यानां सम्मतिं प्राप्य निर्णेष्यतीति। तन्मध्य एव तत्र चौधरी-चरणसिंहस्य पत्रं नीत्वा राजनारायण आगच्छद् यस्मिन् तेन स्पष्टं कथितमासीद् यत् ते जगजीवनरामस्य नेतृत्वे कार्यं न करिष्यन्तीति। सहैव कैश्चित् सदस्यैरपि श्रीजयप्रकाशाय कथितं यत् तेऽपि जगजीवनरामस्य समर्थका न सन्ति। ततः परं गान्धि-प्रतिष्ठाने यत्र स महाभागः सदस्यानां सम्मतिं गृह्णाति स्म, कैश्चन जनैः प्रस्तावितं यत् ते सम्मत्यपेक्षया स्वयं यदुचितं मन्येरँस्तं प्रधानमन्त्रित्वाय मनोनीतं कुर्युः।

श्रीनारायण आचार्य-कृपलानीमहोदयमपि सहयोगिनमकरोत्। उभाभ्यां च श्रीमुरारजीदेसाईमहाभागा एव प्रधानमन्त्रिणो निर्णीताः। तस्मिन्नुपवेशने

श्रीजगजीवनराम उपस्थितो नाभूत्। तेन मन्त्रिपदस्वीकारेऽप्यसहमतिः प्रकटिता। तस्य गृहे प्रदर्शनेन स मन्त्रित्वाय बाधितः। प्रधान-मन्त्रिणश्चयने काऽपि वैधानिक्यापत्तिस्तु नासीत् परं जनतादलस्य सदस्यानां मतानि न गृहीतान्यासन्, तस्नादेव श्रीमुरारजीभ्रातरः स्वीये प्रधानमन्त्रित्वकाल एकस्य दलस्य नेतार एवावर्तिषत।

जनता-शासने श्रीचरणसिंहश्चौधरी गृहमन्त्री, श्रीअटलबिहारी विदेशमन्त्री, श्रीलालकृष्ण अडवानी सूचना-प्रसारणमन्त्री श्रीराजनारायणश्च स्वास्थ्यमन्त्री नियुक्तः। शासन-प्रवृत्तेः समकालमेवैते मन्त्रिणः श्रीमत्या इन्दिराया विरुद्धमत्याचारानाचरितुं नानाविधानि कर्माण्यकार्षुः। विविधा मिथ्याप्रचारा निस्तत्त्वा आरोपास्तथा तर्कहीना विचारास्तां महाभागां निन्दयितुं प्रत्यहं निरमीयन्त। इन्दिराया विरुद्धमष्टचत्वारिंशत्-सङ्ख्यकाः परीक्षणायोगा अस्थाप्यन्त। तेषु सर्वतो ज्यायानासीत्—'शाह आयोगः।' श्री सञ्जयस्य विरुद्धमपि पञ्चत्रिंशत्-सङ्ख्यका आयोगा न्ययुज्यन्त। नवीनायां लोकसंसदि प्रायस्तेष्वेव प्राधान्येन चर्चा अक्रियन्त यथेच्छमनर्गलं च सदस्यैरभ्यभाष्यत। श्रीमतीन्दिरा कारायां कथं निपात्येत, कथं च सा पीड्येत कथं च साऽपमानिता क्रियेत? एत एव विषया यत्र तत्र मन्त्रिगणेषु विशिष्य विवेच्या अभूवन्। यतस्ततो यत्किञ्चिदपि परिज्ञाय तद्-विकृत्य प्रस्तोतव्यमित्येव कार्यं सर्वेऽप्यात्मसादकार्षुः। हन्त !!!

श्रीमतीन्दिरागान्धीमहाभागा काङ्ग्रेस-दलस्य दृढतायै भूयो भूय आगन्तुकान् कार्यकर्तॄनबोधयत् परं दलस्य दृढता-रक्षणं कठिनमासीत्। तदा श्रीमती गान्धीमहाभागा समग्रां राष्ट्रियां सामाजिकीं च पीडामात्मनः स्कन्ध उदवहत्। साऽवनमनं नैव शिक्षिताऽऽसीत्। आत्मसम्मानाय राष्ट्रियगौरवस्य रक्षार्थञ्च साऽत्यन्तं संवदेनशीलाऽभवत्। अत एवैकेन प्रतिष्ठितेन राजनेत्रा 'माइकल-फूट'-महानुभावेन स्वीय एकस्मिन् लेखे कथितमासीत्—'इमं पराजयं सा महाभागा येन गरिम्णा ययोदारतयाऽग्रहीत् स भारतीय-लोकतन्त्रस्येतिहासे सर्वतो महत्त्वपूर्णः क्षणोऽवर्तत।" इति।

एकदा श्रीमत्या इन्दिरागान्धी-महाभागायाः केचन शुभ-चिन्तकास्तया सह मन्त्रयितुं समागताः। येषु श्रीवसन्तसाठेमहोदयास्तथा पञ्जाबप्रान्तस्य भूतपूर्वमुख्यमन्त्रिणः श्रीदरबारासिंहा अप्याअन्। तैः श्रीमतीगान्धी निवेदिता यद् विरोधिनामपकीर्ति-प्रसारणाभियानस्योत्तरं दातुं सा पूर्णरूपेणाभिमुखमागच्छेत्। तदा सा महाभागा तयोः प्रस्तावं स्वीकृत्याप्राक्षीत्-सर्वप्रथमं मया क्व गन्तव्यम्? तदा ते **'पवनाराश्रमे श्रीविनोवाभावे'**महानुभावस्य दर्शनाय प्रैरयन्। सा तत्रागच्छत् तस्यास्तत्र भव्यं स्वागतमभूत्। आचार्य-श्रीविनोवामहाभागैश्चाशीर्दत्त्वा 'चरैवेति चरैवेती'ति सन्दिष्टम्। वस्तुतः सा ततः शक्तिं प्राप्नोत्।

तेष्वेव दिवसेषु भारतस्य गृहमन्त्रिणा श्रीचरणसिंहेन जीप-क्रयविक्रतिकाण्डस्य व्याजेन ३ अक्टूबर १९७७ ई० दिने श्रीमतीन्दिरागान्धी निगृहीता। निग्रहणानन्तरं तामधिकृत्य प्रस्तुतानारोपान् सत्यापयितुं श्रीचौधरी समर्थो नाभूत्। अतः सा ४ अक्टूबरदिन एव विमोचिता।

महानिर्वाचने पराजयानन्तरं श्रीमत्या इन्दिरागान्धी-महाभागाया व्यक्तित्वं प्रभावहीनं विधातुं जनतादलस्यान्तर्बहिश्च सुनियोजितेन प्रकारेणाक्रमणानि प्रारभन्त। परम्, आत्मविश्वासवती दृढनिश्चयशालिनी च श्रीमतीगान्धी साहसेन तेषामाक्रमणानामाभिमुख्यमकरोत् तथा प्रामाणयद् यत् सा देशस्य सशक्ता प्रभावशालिनी च नेत्री वर्तत इति। एतन्मध्य एव काङ्ग्रेसाध्यक्षपदाद् दलस्य पराजय-सम्बद्धमुत्तरदायित्वमात्मनि गृहीत्वा श्रीदेवकान्तबरुआमहोदयो दलाध्यक्षपदात् त्यागपत्रमदात्। श्रीमत्या इन्दिरागान्धी-महाभागायाः पराजयकारणात् तस्या नाम्नोऽप्यध्यक्षतायै विरोधोऽभूत्। तदा सा महाभागा तं मार्गमनुचितं मत्वा १८ दिसम्बर १९७७ ई० दिने काङ्ग्रेसकार्यकारिणी-समितेस्त्यागपत्रं प्रादात् तथा स्वीयानां समर्थकानामेकसुपवेशनमाकार्य विचारमकरोत्। सर्वैरपि निर्णीय पृथक् काङ्ग्रेस-निर्माणं कृतं तथा सर्वैः सदस्यैश्च सम्भूय साऽध्यक्षपदेऽभिषिक्ता। तच्च **'काङ्ग्रेस-दलम्'** (इ०)' नाम्ना समबोध्यत।

स्वतन्त्रवृत्त्या निजदेशसेवां स्वकीयतन्वा मनसा धनेन।
कुर्वन्ति येऽजस्रमपेतलोभास्ते स्वापमानं न जनाः सहन्ते ॥१३॥

शनैः शनैर्जनताशासनस्य गतिविधिं जनता ज्ञातवती। मन्त्रिमण्डले वर्तमाना अपि परस्परं सामञ्जस्यं स्थापयितुमशक्ता व्यर्थेषु कार्येषु कालं गमयन्तः स्थैर्याय किमपि कर्तुं नाशक्नुवन्। श्रीमतीगान्धी स्वीयं दलं दृढं कुर्वती मार्च १९७८ ई० मध्य आजमगढ़तो लोकसभाया एकस्मिन् निर्वाचने काङ्ग्रेस (ई०)-प्रत्याशिनीं **श्रीमतीमोहिसिना किदवई**—महाभागामुपास्थापयत्, सा च सर्वानन्यान्-प्रत्याशिनः पराजित्य विजयमवृणोत्। १३ मार्च, ७८ ई० दिने शाहायोगेन संसदि स्वीयमन्तरिमं प्रतिवेदनं प्रस्तुतम्। जूनमासे कर्णाटकान्ध्रमहाराष्ट्रेषु सम्पन्नेषु निर्वाचनेषु काङ्ग्रेस (इ०) दलेन बहूनि स्थानानि जितानि। ततः परमिङ्गलैण्डतः श्रीमती गान्धी समामन्त्रिता किन्तु सर्वकारस्यानिच्छया सा गन्तुं नानुमता। कालान्तरेण सा लन्दनस्य यात्रामकरोत् सम्मानञ्च प्राप्नोत्।

आत्मानं निर्वाचन उपास्थाप्य जनताया दृष्टौ स्वीयं पुनर्मूल्याङ्कनं कारयितुं श्रीमतीन्दिरागान्धी चिकमंगलूर (कर्णाटक) तो लोकसभायै प्रत्याशितां प्राप्योपस्थिता। ५ नवम्बर १९७८ ई० दिने च सा जनतादलस्य प्रत्याशिनं पराजित्य विजयमलभत किन्तु तस्यैव मासस्यैकविंशे दिने विशेषाधिकारस्य दुरुपयोगनाम्ना

लोकसभायाः सादस्येन तां वञ्चितां विधायैकस्मै दिवसाय सा तिहाड़-कारायां प्रेषिता। पुनश्च २६ दिसम्बर-दिने विशेषाधिकारसमितेः सम्मत्या निगृहीता तस्मिन्नेव दिने च विमोचिता। इत्थमपदस्थकालस्तस्या अग्निपरीक्षाकाल आसीत्। बहुधा सा राजनीतेः संन्यासायापि व्यचारयत् परं देशभक्तेः परवशा सर्वमसहत।

अवाप्य सङ्कटं न ये भवन्ति जातु विह्वला,
जलाप्लवोपमं च तं विचार्य सन्ततं स्थिराः।
स्वकर्म-साधने रताः पुरः पुरो व्रजन्ति ते,
ह्यवाप्नुवन्ति सद्दिशं तथा जयन्ति जीवने ॥१४॥

आसीज्जनतादलं बहूनां दलानां विलयेन निर्मितम्। तस्मादेव तेषु मिथो नाभूदैकमत्यम्। १६७६ ई० वर्षे जुलाईमासस्यान्तिमे सप्ताहे श्रीमतीन्दिरागान्धी श्रीचरणसिंहं काङ्ग्रेससहयोगेन प्रधानमन्त्रित्वं प्रापयितुं प्रालोभयत्। स हि प्रलोभनवशात् तथाविधां प्रक्रियां विधाय जनतादले स्वीयं बहुमतं संसाध्य श्रीमुरारजीभ्रातरं त्यागपत्राय बाध्यमकार्षीत्। प्रधानमन्त्री च चौधरीचरणसिंहमहोदयोऽभूत्। पुनश्च २० अगस्त १६७६ ई० दिने लोकसभाया उपवेशनं कल्पितमासीत् तद्दिन एव काङ्ग्रेस (इ०)दलेन चरणसिंहमन्त्रिमण्डलात् स्वीयं समर्थनं प्रतिगृहीतम्। फलतश्चौधरीमहोदयस्य मन्त्रिमण्डलेन त्यागपत्रं दत्तम्। २२ अगस्त, ७६ ई० दिने लोकसभा भग्ना राष्ट्रपति शासनञ्च प्रवर्तितम्। ततः परं लोकसभाया निर्वाचनस्य याचनां कुर्वत्या श्रीमत्या गान्धीमहाभागया प्रमाणितं यद् भारतस्यान्येषां नेतॄणामपेक्षया सा राजनीतावधिकं प्रावीण्यं भजत इति।

वाञ्छन्ति स्म सदैव ये निजकरेष्वेयादिदं शासनं,
लब्ध्वा चोच्चपदानि तत्र जनता-सेवां-प्रकुर्याम वै।
किन्त्वासीन्नहि सर्वसम्मतमतं तेष्वैकमत्यं ततो,
मण्डूकप्लुतिवद् विकीर्य विरताः साफल्यमेता न ते ॥१५॥

□

[१०]

सिद्धि-कला

प्राप्ता प्रतिष्ठां पुनरिन्दिरैव

मनो॑ जूतिर्जु॑षतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञᳬ समिमं दधातु।
विश्वे॑ दे॒वास॑ इ॒हमा॑दयन्तामो३म् प्रतिष्ठ ॥१३/२॥

—यजुर्वेदसंहिता०

प्रभवति कुटिलेऽथ कृष्णपक्षे, प्रसरति भूपटले घनोऽन्धकारः।
द्रुतमुदयमवाप्य शुक्लपक्षः परिहरते च पुनस्तमत्रिदृग्जः ॥१॥
निरन्तरं निन्दन-दूषणाद्यैर्मिथ्याप्रचारैश्च कदर्थिताऽपि।
महीयसी मानधना प्रधानां प्राप्ता प्रतिष्ठां पुनरिन्दिरैव ॥२॥

१९८० ई० वर्षस्य जनवरीमासे लोकसभाया निर्वाचनं सम्पन्नम्। **श्रीमतीन्दिरागान्धी** महाभागा **'रायबरेली'** तथा **'मेडक'** तो विशालेन बहुमतेन विजयमलभत। **श्रीसञ्जयगान्धी**-महाभागश्च-**'अमेठी'**तो विजयं प्राप्तवान्। श्रीमत्या इन्दिरागान्धी-महाभागाया दलं ५२५ स्थानेभ्यः ३५१ स्थानानि सम्प्राप्य द्वि-त्रिकांशमितेन बहुमतेन विजित्य लोकसभायामागच्छत्।

१० जनवरी १९८० ई० दिने संसदः केन्द्रीये प्रकोष्ठे काङ्ग्रेस (इ०) संसदीयदलस्योपवेशने परमेण हर्षोल्लासेन श्रीमतीन्दिरागान्धी सर्वसम्मत्या दलस्य नेत्री निर्वाचिता तथा तस्या नेत्रीत्वे सर्वैरपि पूर्णो विश्वासो व्यञ्जितः। तस्या नेत्रीनिर्वाचन-सूचनां श्रीभीष्मनारायणो राष्ट्रपतिभ्योऽदात् तैश्च श्रीमती गान्धी नवीनसर्वकारनिर्माणाय निमन्त्रिता।

चतुस्त्रिंशन्मासानन्तरं जनवरी-मासस्य चतुर्दशे दिने द्वाविंशति-सदस्यानां मन्त्रिपरिषदा सह श्रीमतीन्दिरागान्धीमहाभागा शासन-भारमग्रहीत्। राष्ट्रपतिभवने मन्त्रिपरिषदो द्वाविंशतिसदस्येभ्यो महामहिम-श्रीराष्ट्रपति-महानुभावाः पदस्य गोपनीयतायाः शपथानदापयन्। **श्रीमतीन्दिरागान्धीमहाभागा चतुर्थवारं भारतदेशस्य प्रधानमन्त्रिपदे प्रतिष्ठिताऽभवत्।**

तस्या मन्त्रिमण्डले पञ्चदश केन्द्रीयस्तरस्य सप्त च राज्यस्तरस्य मन्त्रिण आसन्। २१ जनवरीदिनस्यैकादशवादनसमये सप्तम्या लोकसभायाः सत्रमारब्धम्।

शपथसमारोहस्यासीदिदं प्रमुखं वैशिष्ट्यं यत्तस्मिन् पञ्चसदस्यैः संस्कृत-भाषया षट्सदस्यैश्च हिन्दीभाषया शपथाः स्वीकृताः। श्रीमतीगान्धीमहाभागापि हिन्दीभाषयैव शपथमगृह्णात्। २२ जनवरीदिने लोकसभायाः स्थायिनेऽध्यक्षाय श्रीमतीगान्धीमहाभागा कृषकनेतुः **श्रीबलरामजाखड़**—महोदयस्याभिधानं प्रास्तावीत्। श्रीजाखड़-महानुभावश्च सर्वसम्मत्या लोकसभाया अध्यक्षपदाय निर्वाचितः। श्रीबलराम-जाखड़-महोदयः काङ्ग्रेस(इ०)दलेन फिरोजपुर-निर्वाचनक्षेत्रतो लोकसभायै निर्वाचित आसीत्। जनताशासनस्य काले स महाभागः पञ्जाब-प्रदेशे विपक्षदलस्य विधानसभायां नेताऽवर्तिष्ट। पूर्वं शार्करिलायां तथाल्पोदनवत्यां भूमावत्यधिकं परिश्रम्य द्राक्षा-जम्बीरादीनामुत्तमेनोत्पादनेन कीर्तिमानं संस्थाप्य च श्रीबलरामजाखड़-महानुभावो भारत-सर्वकारेण 'कृषि-पण्डित' इत्युपाधिनाऽपि सम्मानित आसीत्।

सत्ताया अधिग्रहणानन्तरं श्रीमतीन्दिरागान्धी राष्ट्राय प्रथमं सन्देशं प्रसारयन्त्यचकथद् यद्—"अहं स्वदेशमात्मनिर्भरं शक्तिशालिनमात्मविश्वासिनं च विधातुमभिलषामि तथा निश्चितमेवेदं कस्याप्येकस्य जनस्य कार्यं न विद्यते। अस्मिन् देशस्य सर्वेषां वर्गाणां जनानां सहयोगोऽपेक्षते। किञ्च लोकतन्त्रं केवलं बहुमताय नास्ति तद् देशस्य सर्वेभ्यो जनेभ्यो वर्तते। देशस्य विकासः सर्वेषां सहयोगेन मैत्रीभावेन च सम्भाव्यते। अस्माभिर्जनतायाः समक्षं यानि वचनानि दत्तानि सन्ति तानि निश्चितेन रूपेण वयं पूरयिष्यामः।"

श्रीमतीन्दिरागान्धी निश्चितरूपेणेदं जानाति स्म यत्—

वचनं हि कदापि कुत्रचिन्नहि देयं यदि तन्न पाल्यते।
अयमेव गुणोऽस्ति यो जनं, नितरां राति पदे समुन्नतिम् ॥३॥ इति।

काङ्ग्रेस (इ०) दले सत्तायामागतवत्येव विरोधि-दलानां विघटनं चरमे सीम्नि प्रयातम् **'जनता, जनता (ए-सी०), भारतीयजनतादलं, जनता (जे० पी०), काङ्ग्रेस (अर्स)-लोकदलं'**चेति बहूनि दलानि विघटनतरोरेव फलान्यभूवन्। इत्थमेव केचन पूर्वं विघटिता अपि क्रमेण काङ्ग्रेस (इ०) दले सङ्घटितुं प्रवृत्ताः। श्रीहेमवतीनन्दनबहुगुणा-महोदयोऽपि काङ्ग्रेस (इ०) तो विभज्य **'लोकतान्त्रिक-समाजवादिमञ्च'**मस्थापयत्। श्रीचौधरीचरणसिंहस्य सङ्कीर्णतया श्रीचन्द्रजीत-यादवेन लोकदलान्निःसृत्य **'लोकतान्त्रिक-लोकदलं'** सङ्घटितम्। अस्य विघटनस्य मूले तेषां वैचारिका मतभेदास्तथा स्वार्थपरताश्चेत्येव कारणतां प्राप्ता आसन्।

१९८० ई० वर्षस्य निर्वाचनानन्तरं विश्वस्य राजनीतिके क्षेत्रे देशस्य महती प्रतिष्ठाऽवर्धत। सर्वेभ्यो भागेभ्यः श्रीमतीगान्धीमहाभागामभिनन्दयन्तः सन्देशा आगच्छन् येषु सा 'प्रमुखा राजनीतिज्ञा, राजनेत्री, व्यक्तित्व-विवेकाभ्यां सम्पन्ना,

सुदृढा नेत्री'त्यादि-सम्बोधनैः सम्मानिता। सर्वेऽपि समाजवादि-देशानां राजनयिकाः स्वयमुपस्थाय भारतीयराजनयिकैः सह सम्मिल्य श्रीमत्या इन्दिरागान्धीमहाभागाया विजये प्रसन्नतां प्राचीकटन्। एतेन सहैवान्येषां दलानां सांसदेषु विधायकेषु च काङ्ग्रेस (इ०) दले प्रवेशाय प्रतिस्पर्धेवाजायत। सर्वप्रथमं कर्नाटकेषु काङ्ग्रेस (अर्स)स्य विधायका महत्या सङ्ख्याया काङ्ग्रेस (इ०)दले मिलिताः। ततो महाराष्ट्रस्य हरियाणाराज्यस्य च विभिन्न-दलानां नेतारोऽपि तथैवाकार्षुः। किमधिकं, सर्वेषां राज्यानां प्रगतिशीलाः सांसदा विधायकाश्चोपेत्य श्रीमत्या इन्दिरागान्धीमहाभागाया ध्वजस्याध एकीभवितुं प्रवृत्ताः। अयमासीदपरो विजयस्तस्या महीयस्याः। यतः—

यत्रास्ति सत्यं शुचिता विवेको, न्यायः स्वदेशाय समर्पणं च।
निःस्वार्थभावेन तदाश्रितव्यं, दलं तदेवास्ति हितं च पथ्यम् ॥४॥

यद्यपि विरोधिनां कूट-प्रवृत्त्या १८ जनवरी १९८० ई० दिवस एव—असमराज्यं महतान्दोलनेनोग्रतयाऽऽक्रान्तमभूत्। तत्र सेनाऽप्याकारिता। आन्दोलनानि तु लोकतन्त्रे प्रवर्तन्त एव, किन्तु यदा तानि हिंसात्मकानि रूपाणि प्राप्यन्ते तदा राष्ट्रस्य महती हानिर्भवति। राष्ट्रियाणां सम्पदां विनाशादार्थिकः सङ्कट उद्भवति। तत एव च कराणां भारो वर्धते। एतत् सर्वं विचिन्त्य श्रीमतीन्दिरामहाभागाऽऽन्दोलनकर्तृभिर्नेतृभिः सह शान्तिपूर्वकं वार्तालाप-माध्यमेन तेषां समस्याः समाधातुं तानाह्वयत्। किन्तु तस्याः सर्वेऽपि प्रयासा वैफल्यं प्राप्ताः। कारणं च तस्यासीद् वैदेशिकैः षड्यन्त्रकारिभिस्तेषां प्रोत्साहनं विपक्षदलैरान्दोलनकारिणां तादृशे पथि प्रवर्तनं तथा राजनीतिक-स्वार्थवतामारोपारोपणं च। पञ्जाबराज्येऽपि तादृश्येव स्थितिरवर्तत। तत्रापि सेनाया आकारणमावश्यकमभूत्। वस्तुतो विपक्षाणामिदं कार्यं श्रीमत्या गान्धीमहाभागायाश्चिन्तने राष्ट्रिय-विषयाणां राष्ट्रियप्रगतीनां कार्येषु या दृष्टिरासीत् ततः पराकृत्य व्यर्थेषु वित्रादेषु प्रवर्तनमासीत्। असमस्थाश्छात्रा आन्दोलनं स्वाधीनं विधाय विदेशिजनानां राज्यान्निस्सारणस्योद्देश्यं बलवदकुर्वन्। तैश्च तादृशाः प्रस्तावा उपस्थापिता ये स्वीकार्या नाभवन्। एवं सत्यपि सा महाभागा निरतं प्रयतते स्म यत् कथमपि समाधानं भवेत्।

या सर्वदा शान्तिमपेक्षमाणा, सर्वस्य सौख्यं भुवि चेष्टते स्म।
कस्मान्न तद्-राज्यगताः समस्याः, पूर्णाः समाधातुमथो न वाञ्छेत् ॥५॥
स्वयं गता साऽसम-राजधान्यां, व्यधाच्च वार्तामपि सन्धिरूपाम्।
परं न साफल्यमवापि तत्र, हठाग्रहात् तत्कृत-याचनासु ॥६॥

श्रीमत्या इन्दिरागान्धीमहाभागायाः प्रयासेन काङ्ग्रेस (इ०)-दलं न केवलं केन्द्र एवापितु भारतस्य प्रतिराज्यं लोकम्पृणतां भजते स्म। तत एव मणिपुर-गोवा-

पाण्डिचेरी-अरुणाचल-प्रदेशेषु विधानसभानां छन्दाकलनानि सम्पन्नानि तेषु गोवां विहाय सर्वत्र काङ्ग्रेस (इ०) दलमेव विजयमलभत। १९८० ई० वर्षस्य जूनमासेऽप्युत्तरप्रदेश-मध्यप्रदेश-गुजरात-पंजाब-महाराष्ट्र-उड़ीसादि-नवराज्येषु विधान-सभानां छन्दाकलनेष्वपि कांग्रेस (इ) दलेनैव बहुमतं प्राप्तम्। तमिलनाडु-प्रदेशे च तस्याएव दलस्य सहयोगेनाखिलभारतीय-अन्नाद्रमुक-दलेन विजय आसादितः।

भारतस्य पुनः शासनभारग्रहणानन्तरं श्रीमतीन्दिरामहाभागा मुख्यत्वेनार्थिकं स्वरूपं व्यवस्थापयितुं तथा पूर्वं प्रवृत्तानां राजनीतिकदुरवस्थानां कारणाद् राष्ट्रियेऽन्ताराष्ट्रियेषु च क्षेत्रेषु ह्रसीयसीं प्रतिष्ठां पुनरुन्नमयितुं परिश्राम्यति स्म। तदैव २३ जून १९८० ई० दिने श्रीमत्यामिन्दिरायामाकस्मिको वज्रपातोऽभूत् तस्याः **साहसी वीरः पुत्रः श्रीसञ्जय एकस्यां विमान-दुर्घटनायां दिवमगच्छत्।** श्रीसञ्जयगान्धिनो दारुणं देहावसानं केवलमिन्दिरा-महाभागाया एव दुःखदं नासीदपि तु तस्याभावेन भारतस्य जनताया अपि हृदयानि भृशं विकम्पितानि। श्रीसञ्जयः स्वदेशस्य प्रतिभावान् पुत्र आसीत्। देशस्तस्मान्महत्य आशा धारयति स्म। इममाघातं श्रीमतीन्दिरा स्वकीये हृदये तथैवासहत यथा ह्येका महीयसी माता स्वदेशाय जीविता बलिदानं चादात्, किञ्च देशस्य तथा विश्वस्य सङ्ख्यातीतान् पुत्रानात्मनः पुत्रान् मत्वाऽथ च स्वीयानां पूज्यानां पितामहानां पितृ-चरणानां स्वस्याः पतिमहाभागानां च निधन-कालेषु विवेकः परिचायितस्तथैव तदानीमप्यश्रूणि पीत्वा तया स्वस्या महनीयतायाः परिचयो दत्तः।

'सङ्कटैः सह सङ्घर्षः, पारम्पर्येण योऽमिलत्।
तमेव चिन्तयन्ती सा, हृदि पीडां न्यलीयत॥७॥
मातुर्ममत्वे राष्ट्रस्य, प्रेम्णाऽऽप्तो विजयस्तदा।
राष्ट्रपीडास्वात्मपीडां, निलीय च पुरोऽचलत्॥८॥

श्रीमतीन्दिरागान्धी तदानीं प्राय इदमेव वाञ्छति स्म यत्—पूर्ववर्तिनि निर्वाचनेऽस्माभिर्यानि कार्याणि पूरयितुं प्रतिज्ञातानि सङ्कल्पितानि च तेषां पूर्तये समर्पितया भावनया सर्वात्मना यतितव्यमिति। तया काग्रेसस्य विजयोत्तरं ताल-कटोराऽभिध उद्याने समायोजिते प्रथमेऽधिवेशनेऽपि सदस्याः सबलं निवेदिताः सङ्कल्पानां संसिद्धये। तत्रैवाधिवेशने सोवियत-रूसदेशो भारतस्य सर्वतः शुभं मित्रं प्रतिपादितः परं समापन-व्याख्याने तयेदमपि स्पष्टीकृतं यद् "इदं नास्त्यावश्यकं यत् कस्यापि मित्रस्य प्रत्येकं कथनं स्वीकुर्यामेव किञ्च सत्यमिदं विद्यते यत् कोऽप्यस्मान् प्रभावयितुं न शक्नोति।"

तस्मिन्नेव वर्षे सोवियतसङ्घस्य सर्वोच्चसोवियताध्यक्ष-मण्डलाध्यक्षाः **श्री एल० आई० ब्रेझनेव-महोदया** मैत्री-सद्भावना-यात्रार्थं भारतं समायाताः। तेषां यात्रया नैकेषां सहयोगानां मैत्र्याश्च सुदृढत्व-प्रदायकेषु महत्त्वपूर्णेषु सन्धिपत्रेषु

हस्ताक्षराणि सञ्जातानि। यत्र सांस्कृतिकार्थिकोद्यौगिक-व्यापारिकादि-विषयेषु मुख्यत्येनोभयोर्देशयोर्जनगणं प्रति परम्परागतताया मित्रताया गत्यात्मकेन विकासेन सहैशियामहाद्वीपे शान्तेः स्थिरतायाश्च विषया आसन्। १९८२ ई० वर्षे नव-देहल्यामायोजितं 'समूहनिरपेक्ष'-देशानां विदेशमन्त्रिणां सम्मेलनमपि प्रामाणयद् यद् भारतं मैत्रीपूर्णेषु मानवीयसम्बन्धेषु विश्वसिति तथाऽन्ताराष्ट्रियशान्तये सामाजिकन्यायांय सुरक्षायै तथाऽऽर्थिकसमुन्नतये प्रयत्नशीलानां च प्रशंसकमस्ति। स्वयं भारतमपि तथाविधे समूहनिरपेक्ष आन्दोलने महत्त्वपूर्णां भूमिकां निर्वोढुं च वाञ्छति। यतः —

अन्ताराष्ट्रिय-मञ्चकेषु विततोऽशान्तिर्निराशा तथाऽ—
सूया शस्त्रसमृद्धिरार्णविकजास्त्राणां भयं वैरिता।
साम्राज्योपनिवेशवाद-भेद-भरित-स्पर्धाऽपहाराय वा,
सङ्घानां निरपेक्षतैव जयति प्रीतेः सदा वर्धिनी ॥९॥

१९८१ वर्षस्य १६ फरवरीदिने 'बोट क्लब'स्थाने देशस्य लक्षशः कृषकाः श्रीमत्यामिन्दिरागान्धी-महाभागायां स्वीयाः सुदृढा आस्था व्यञ्जयितुं समवेताः। दूरदूराद् विभिन्नेषु यानेषु स्थिताः पदातयश्च ते भूयोभूय उच्चैरिममाघोषमुच्चरन्ति स्म—'किसानों के करोड़ों हाथ—इन्दिराजी के साथ' इति। तत्र १२३ मितानां रैलयानानां तैलयानानां तथा ३५ सहस्रातिरिक्तवाहनानामुपयोगस्तेभ्यो विहित आसीदित्येव तेषामुपस्थितेः प्रमाणायालम्।

कृषकान् सम्बोधयन्ती सा महाभागा षष्ठयाः पाञ्चवार्षिकयोजनायाः प्रसङ्गेनावोचद् यदस्यां योजनायां व्ययं प्राप्स्यतः समग्रस्य धनस्य पञ्चविंशति-मितोंऽशो ग्रामाणां विकासाय व्ययीकरिष्यते। अनुसूचितजातीनां जनजातीन्नाञ्च प्रगतये तथा कल्याणायास्यां योजनायां सप्तति-कोट्युत्तर-दशार्बुद-रूप्यकाणां व्यय-व्यवस्था विहिताऽस्ति। तथाऽन्ते स्वस्याः समर्थनाय देशस्य विभिन्न-भागेभ्य उपागतानामनुरागदार्ढ्यं वीक्ष्य परमां भावुकतां प्राप्योदकथयच्च—**"कृषकाणामात्मकल्याणाय यद्यस्माकं रक्तस्याप्यावश्यकता स्यात्तदा वयं भवतां क्षेत्राण्यपि स्वीयेन रक्तेन सेचयितुं सन्नद्धाः स्मः।"**

श्रीमतीन्दिरा गान्धी भारते यावती लोकप्रियाऽवर्तत तावत्येव विदेशेष्वपि लोकप्रियाऽभवत् कारणं च तस्येदमभूद् यत् सा स्वीयानि मित्राणि कदापि नो व्यस्मार्षीत् पूर्वं स्थिरीकृतानां लक्ष्याणां भ्रंशनस्य स्थितिमात्मन्युत्पत्तये चावसरं नादात्। अत एव सा १९२७ ई० वर्षस्य नवम्बरमासे पं० जवाहरलालनेहरूभिः सम्पादितां भारत-रूसयोर्मैत्रीं सुदृढामकरोत्। साम्राज्यवादानुवंशवाद-सामन्त-व्यवस्थावादानां विरुद्धं सङ्घर्षयन्तौ देशाविमौ निरन्तरं प्रगतिमन्तौ भवन्तौ शान्तये

सहास्तित्वाय च मैत्रीभावनां विकासयतः स्म। श्रीमती गान्धी तथ्यमिदं सर्वथा जानाति स्म यद् देशस्य शान्तये सुखाय च प्रतिवेशिदेशैः सह मधुरः सम्बन्ध आवश्यकः। तत एव सा भारतस्य यात्रार्थमागतवतां चीनदेशस्य विदेशमन्त्रिणां **श्री हुआंग हुआ**-महोदयानां प्राक्तनीं कटुतां विस्मृत्य हार्दिकं स्वागतं व्यदधात्। दशकद्वयतोऽधिकात् कालात् प्रवृत्तं सीमविवादं समाधातुं द्वावपि सुखदे वातावरणे व्यचारयताम्। उभावपि पारस्परिकेण सौहार्देन समस्यानां च समाधानाय निरचिन्वताम्।

१९८० ई० वर्षे समस्तस्य जगत इस्लामधर्मानुयायिनो यदा पैगम्बर-मुहम्मदमहाभागानां हिजरी-महोत्सवमायोजयितुं प्रवृत्ता आसन्, तदा श्रीमतीन्दिरा गान्धीमहाभागायाः प्रेरणया सहयोगेन च भारतेऽपि पूर्णयाऽऽस्थया श्रद्धया च सह हिजरीमहोत्सवा आयोजिताः। स्वयं स माहाभागाऽपि तेषु सममिलत्। ३ नवम्बर १९८० ई० दिने पञ्चदश्याः शत्याः प्रारम्भावसरे सा पत्र-प्रैष-त्रिकटं प्रसारयन्त्यवोचद् यत्—"पैगम्बर-इस्लाम-हजरतमोहम्मदमहोदयानां शिक्षासु लोकतान्त्रिकभावनायाः समानतायाः प्रेम्णः सुखस्य शान्तेस्तथा स्वकीयं साहाय्यं स्वेन विधातव्यमितिविषयस्य ये सन्देशा विद्यन्ते तेषु जनेभ्यः क्रान्तिकारिप्रतिवेदनं निहितमस्ति। वयं भारते महोत्सवमिममस्मात् कारणान्मानयामो यदस्माकं मिश्रितायाः परिपूर्णायास्तथा विविधवर्णवत्याः संस्कृतेर्विकास इस्लामेनापि विभिन्नरूपेण भागो गृहीतः। अस्मभ्यमियं गर्वस्य वार्ताऽस्ति यद् भारते समुत्पन्नेभ्यो महद्भ्यो धर्मेभ्योऽतिरिक्तमयं देशः संसारस्य महतां धर्माणामपि प्रशंसकोऽस्तीति।"

१९८० ई० वर्षस्य निर्वाचनानन्तरं श्रीमत्यै गान्धीमहाभागायै प्राप्ताया लोकप्रियतायाः परिणतिवशाद् १९८१ तमवर्षस्य षष्ठे मासे सम्पन्नेषूपनिर्वाचनेषु काङ्ग्रेस (इ०) दलेनाभूतपूर्वो विजयः प्राप्तः। 'अमेठी' तो लोकसभाया निर्वाचने काङ्ग्रेस (इ०) दलस्य प्रत्याशित्वेन **श्रीराजीवगान्धी** (वर्तमानः प्रधानमन्त्री) प्रतिशतं चतुरशीतिमितानि मतान्यवाप्य नवीनं कीर्तिमानमस्थापयत्। तदानीमेव तद्दलेनान्यान्यपि चत्वारि स्थानानि लोकसभायै जितानि।

संसारस्य सर्वासु दिक्षु वसतां मानवीय-समस्यानां सर्वेऽपि देशाः सम्भूय समाधानं कुर्युरिति दृष्टेः समर्थिका शान्तौ सहयोगे च दृढं विश्वस्ता श्रीमतीगान्धी परैर्देशैः सह घनिष्ठां मैत्रीं सम्पादयितुं निरन्तरं प्रयतमाना व्यराजत। अत एवाक्टूबरमासे रोमानियादेशस्य राष्ट्रपतिभिः समायोजिते स्वकीये सम्मानभोजे साऽवादीत्—"अद्य वयं तादृशे विश्वे वसामो यत्र सर्वेऽपि परस्परं निर्भरा भवन्ति तस्मादेवास्माभिः सर्वैर्देशैस्सह तेषां राजनीतिकानां वैचारिकाणाञ्च स्वरूपेभ्यो महत्त्वदानं विना मैत्र्या हस्तोऽग्रे वर्धितः।" तत्रैव सैवमपि प्रत्यपादयत्—

सुरक्षा न शस्त्रैर्न चास्त्रैः कदाचित् क्षितौ साधु सम्भाविताऽस्तीति सत्यम्।
मिथो बोधनेनात्मनः शोधनेन, स्वतः प्राप्यते सा विना योधनेन॥

अक्तूबरमासस्य प्रथमे सप्ताहे **'राष्ट्र-मण्डल-शिखर-सम्मेलनं'**—**'मेलबोर्न'** (आस्ट्रेलिया) नगरे समायोज्यत। तत्र श्रीमतीगान्धीमहाभागा भारतस्य प्रतिनिधित्वं निरवहत्। तत्रैव सम्मेलनेन **'नामीबिया'** देशस्य स्वातन्त्र्याय **'अफगानिस्तान-कम्पूचिया-हिन्दमहासागर'**-सम्बद्धानां प्रश्नानां विषये कैश्चित् समूहनिरपेक्ष-देशैस्तथा भारतेन स्वीकृतस्य मार्गस्य समर्थनमक्रियत। इत्थमेव **फिलिस्तीनस्य** जनताया अधिकाराणां पुष्टिस्तथा तद्विषये सम्पाद्यमानासु वार्तासु **'फिलिस्तीनी-मुक्ति-सङ्गठन'**स्य नेतृणां सम्मेलनस्याप्याग्रहो व्यधीयत। सम्मेलने श्रीमतीन्दिरा-गान्धी स्वीयेषूद्देश्येषु सुस्थिरा भूत्वा पत्रकारवार्तास्वपि स्वीयां विदेशनीतिं यथोचितं प्रस्थाप्य सम्मेलनं विसृज्य बहिः स्थितानां स्थितिमपि व्याञ्जयत्। ततः परं नवम्बरमासे शान्ति सहयोगं सद्भावञ्च वर्धयितुम् **'इटली-फ्रान्स-बुल्गारिया'**-देशानां यात्रा अकार्षीत्। तत्र गत्वा च सा तत्रत्यैः प्रधानैः सह चर्चां विधाय तानपि विश्वशान्तये शस्त्रास्त्रसङ्ग्रहणस्पर्धा-विरुद्धमगवमय्य विश्वशान्तये प्रैरयत्। तया यात्रया च साऽमेरिकाया राष्ट्रपतेः श्रीरीगनमहोदयस्य यूरोपे वर्धमानं प्रभावमवरोद्धुमद्भुतं साफल्यमवाप्नोत्। तथा च ६ जून, १९८२ ई० दिनात् प्रारब्धे त्रिदिवसीये सप्तप्रमुखधनिकदेशानां **'वर्साई-(फ्रान्स)** स्थले सम्पन्ने सम्मेलन आशजनकाः परिणामा निःसृताः। सर्वेऽप्यैकमत्येन विश्ववार्ताया आरम्भाय सहमता अभूवन्।

सति पथि हितमत्या लोककल्याण-काङ्क्षा—
वति विगतभया ये वर्धयन्ते पुरस्तात्।
सति महति विरोधेऽप्यत्र सत्यानुरोधे,
नहि भवति तदीया निष्फला वाग्विभूतिः॥११॥

एतस्यैव मध्यवर्तिनि काले मईमासे भारतस्य विभिन्नेषु भागेषु सप्त संसदीयानि निर्वाचनानि संवृत्तानि तेषु काङ्ग्रेस (इ०) दलेन त्रीणि स्थानानि जितानि। देशे वर्धमानैर्भ्रष्टाचारानुशासनहीनता-क्षेत्रीयवाद-जातिवाद-प्रभृति-भयैः सङ्घर्षं कुर्वती श्रीमती गान्धी स्वीयं दलं प्रति समर्थनस्य शैथिल्येन मनाक् चिन्तावत्यजायत। चतुर्षु प्रदेशेषु सम्पन्नेषु विधानसभानां निर्वाचनेष्वपि काङ्ग्रेस (इ०) दलं कुत्रापि स्पष्टं बहुमतं प्राप्य सर्वकारं स्थापयितुं नाशक्नोत्। पश्चिमबङ्गप्रदेशे तु वामपथानुयायिनां दलमेवात्यधिकं बहुमत मवाप्यविजयं प्राप्नोत्। एतदतिरिक्तं हरियाणा-प्रदेशे काङ्ग्रेस (इ०) दलस्य सर्वकारनिर्मितये सिद्धान्तहीनतया सह दल-परिवर्तनादीन्यपि तां व्यथयन्ति स्मैव। वस्तुतो राजनीतिरेका तादृशी महानदी वर्तते यस्यां यतस्तत आगता नद्यः सम्मिल्य स्वस्व-स्वभावानुसारं तरङ्गानुत्तालयन्ति, मालिन्यानि मेलयन्ति सति समयेऽनुचितमुचितं वा विदधति, तैरसामयिका उत्फाला उत्पद्यन्ते विलीयन्ते च।

राजनीतौ प्रावीण्यं भजन्ती श्रीमती गान्धी ततो विचलिता न भूत्वा सत्तायां

पुनरागमनस्य प्रायो वर्षद्वयानन्तरं स्व-प्रवर्तितान् विंशति-सूत्रीयान् कार्यक्रमान् भूयोऽपि नवीनेन रूपेण परिष्कृत्य सर्वकारीय-तन्त्राय तेषु दार्ढ्येन कार्यान्वियनायादिशत्। सा हि तान् कार्यक्रमान् सफलयितुं जनतां दलस्य कार्यकर्तॄन् नेतृजनांश्चाप्याह्वयत्। देशस्य प्रगत्या सन्नद्धा आपातकाले प्रारब्धा विंशसूत्रीया: कार्यक्रमा ये पुरा कियदंशेन पूर्णा आसँस्तेष्वेवाशिष्टेष्वन्यान् परमावश्यकान् नूतनान् कार्यक्रमान् सा १४ जनवरी १९८२ दिनेऽघोषयत्। यतो हि देशस्याधिकांशा जना ग्रामे वसन्ति तथाऽयं देश: कृषिप्रधानोऽस्त्यत एव प्रारम्भान्नव कार्यक्रमा मुख्यत्वेन ग्रामाणां ग्राम्याणां कृषकाणां कृष्युत्पादानां समृद्धय एव प्रवर्त्तिता आसन्। शिष्टेषु शिक्षा-स्वास्थ्य-राजस्वसम्पन्नता-जनोत्थान-नगर - विकास - परिवार-कल्याणादि-विषयका: कार्यक्रमा अवर्तन्त।

विश्वस्य प्रथितेषु राष्ट्रेषु भारतं प्रतिष्ठापयितुमपि सा नित्यशश्चिन्तयति स्म। तया तस्मिन्नेव वर्षे **एशियास्थ-देशानां क्रीडोत्सवो**ऽपि समायोजित:। भारत-भूमिं द्रष्टुकामा अनेके विदेशवासिनस्तन्माध्यमेनात्रोपेत्य स्वातन्त्र्योत्तरं समेधमानानां तान्त्रिक-यान्त्रिक-वैज्ञानिक-प्रगतीनां निरीक्षणेन सन्तुष्टा अभूवन्। यद्यपि बहवो जनास्तादृशमुत्सवं तदानीमनावश्यकं मन्वते स्म, परं सा महाभागा देशस्य प्रगतये तमावश्यकं मत्वा समपादयदेव।

सर्वधर्म-समभावं धारयन्ती सैकदाऽकथयत्—"वयं तु-इस्लामधर्मं भारतीयं धर्ममेव मन्महे। मुस्लिम-शासकैर्यानि राज्यानि स्थापितानि तानि भारतीयानि राज्यानि तथा शासनान्येवाभवन्। तानि भारतस्य विविधवर्णमयस्य जीवनस्य संस्कृतेश्चाङ्गान्यासन्। वस्तुतस्तेषां प्रभुत्वेन तथोज्ज्वलशासनमस्तिष्कवद्भि: शासकै-र्भारतस्य भिन्न-भिन्नानां संस्कृतीनां तुरी-वेमभ्यामतीव महान् भागो गृहीत:।"

तत: परमगस्तमासस्य नवमे दिने विभिन्नेषु केन्द्रीयमन्त्रालयसचिवेषु परिवर्तनं विहितम्। तेष्वेव दिनेष्वफ्रीकीयेषु देशेषु सा यात्रामप्यकरोत्। २६ नवम्बर १९८१ ई० दिने च—'अकालीदलनेतृभि: श्रीमत्या गान्धीमहाभागया वार्ता कृता तथाऽऽत्मसंयमेन वर्तनायतै: प्रतिज्ञातम्।

अन्ताराष्ट्रिय-शान्ति-प्रयासेभ्य: श्रीमती गान्धीमहाभागा २ अगस्त १९८२ ई० दिने 'ऊथान्त-पुरस्कारेण' सम्मानिता तथा—९ सितम्बर १९८२ ई० दिने श्रीशेख अब्दुल्लामहोदयस्य निधनेन सा श्रीनगरं गता। २२ अक्टूबर-दिने च केन्द्रस्याकालीदलस्य च मध्ये साक्षाद्वार्तया भूमिकानिर्माणाय प्रधानमन्त्रिणो विशेष-प्रतिनिधित्वेन सरदारस्वर्णसिंहमहोदयोऽकालीदलनेतॄनमिलत्। ३० अक्टूबर-दिने च पाकिस्तानस्य राष्ट्रपतये पत्रं विलिख्य बेगम-नुसरत-भुट्टो-महाभागाया मुक्तयेच तथाऽनुरुद्धम्।

न विस्मरति कर्तव्यं यत्र कुत्रापि संस्थितः।
स एव निरतं श्लाघ्यो महत्ता तस्य राजते।।११।।

सहयोगस्य मैत्र्याश्च भावनया प्रेरिता श्रीमती गान्धीमहाभागा २३ मार्च १९८२ ई० दिने ब्रिटेनस्य षड्दिवसानां राजकीय-यात्रार्थं प्रस्थिता। लन्दननगरे सा भव्येन स्वागतेन सम्मानिता। तत्रैव सा भारतसमारोहस्योद्घाटनमप्यकरोत्। तस्मिन् समारोहे विभिन्नक्षेत्रेषु भारतेन विधीयमानानां प्रगतीनां प्रदर्शन्योऽप्यायोजिता आसन्। उद्घाटनसमारोहे ब्रिटिश-प्रधानमन्त्री श्रीमती मार्गरेट थैचरमहोदया, श्रीमतीन्दिरागान्धीमहाभागाया ज्येष्ठा पुत्रवधूः श्रीमती सोनियागान्धी, युवराजश्चार्ल्स महानुभावस्तथा भारतसमारोहस्याध्यक्षः श्रीमाइकेलवाकरमहोदयः समारोहस्य परामर्शदात्र्याः समितेरध्यक्षा श्रीमती पुपुल-जयकरमहाभागा चोपस्थिता आसन्।

विश्वशान्तये मानवतायै च निरन्तरं विधीयमानानां प्रयत्नानां कारणात् १७ जून १९८२ ई० दिनेऽमेरिकाया **'अन्ताराष्ट्रिय-हिमालय-योग-विज्ञान-दर्शन-शास्त्र-संस्थानेन'** श्रीमती-इन्दिरागान्धीमहाभागा 'शान्ति-दूत'-पुरस्कारेण सम्मानिता। पुरस्कारेण सहैव समर्पिते प्रशस्ति-पत्रे समुल्लिखितमासीद् यत्—"श्रीमती-गान्धी-महाभागया मानवतायै विहिताः प्रयासा वर्तमानेभ्यो भविष्यद्भ्यश्च पुरातन-नवीनयोः सम्मिश्रणात्मकयोगदानस्य श्लाघनीयं कार्यं सम्पादयन्ति सम्पादयिष्यन्ति च।"

१९८३ ई० वर्षस्य जनवरीमासान्ते **श्रीविश्वनाथप्रतापसिंहः** केन्द्रीय-मन्त्रिमण्डले मेलितः किञ्च **श्रीबूटासिंह**महानुभावऽपि केन्द्रीयमन्त्रिस्तरस्य मन्त्रित्वेन सम्मानितः। ११ फरवरी-दिने भूयोऽपि मन्त्रिमण्डले परिवर्तनं कृतम्। १७ मार्च १९८३ दिवसे **सप्तम-सङ्घ-निरपेक्षदेशानां सम्मेलनं** भारते प्रारब्धम्। तस्मिन्नेकोत्तरशतमिता देशाः सहभागिनोऽभूवन्। श्रीमतीन्दिरागान्धीमहाभागा तस्य नवीनाऽध्यक्षा निर्वाचिता। तादृशेन महता सम्मानेन तां सभाजयित्वा सर्वेऽपि देशा भारतेन स्वीकृताया नीतेः समर्थनेन सहैव श्रीमतीं गान्धी-महाभागां तादृशकर्मसम्पादनदक्षामिव मत्वैवाध्यक्षत्वेनाभूषयन्। २५ मार्च दिने—**'अन्ताराष्ट्रिय-क्रीडा-समिते'**रध्यक्षेण श्रीमतीगान्धी विश्वक्रीडा-स्वर्णपदकेनालङ्कृता। १५ अगस्तदिने राष्ट्रस्य नाम्ना स्वीयान् विचारान् प्रसारयन्त्या तयोक्तमासीद्—"कदाचिद् दास्यशृङ्खलासु निगडितो दीनः शोषितस्तथा क्षीणो मन्यमानोऽस्माकमयं देशः साम्प्रतं गर्वेण शिर उन्नमयितुं शक्नोति। अद्य तदीया उपलब्धयो विलोक्यन्ताम्, तासु काश्चन त्वतीव महत्यः सन्ति।" तस्मिन्नेव भाषणे सा महाभागा राष्ट्रियैकतायां ध्यानमाकर्षयन्ती न्यगादीत्—'यदि वयं स्वाधीनता-सङ्ग्रामात् किमपि शिक्षणं ग्रहीष्यामस्तदा प्राप्स्यामो यत् केवलमेकताया अनुशासनस्य च बलादेवास्माभिः साफल्यमवाप्तम्। अद्य वयं पश्यामो यत् समाजस्य केचन वर्गाः केचन जना ज्ञानेन किं वाऽज्ञानेन समु-

दायस्य नाम्ना धर्ममेव क्षीणं कुर्वते। इदमस्माकं दौर्बल्यं विद्यते।

समस्तेऽपि जगत्यार्थिक्यै समानतायै तथा मानवसेवायै प्रयस्यन्त्याः श्रीमती-गान्धीमहाभागायाः सर्वत्र समादरोऽवर्धत। २७ सितम्बर १९८३ ई० दिने देहल्यां श्रीमत्या गान्धीमहाभागाया आध्यक्ष्ये राष्ट्रमण्डलस्य शासनाध्यक्षाणां सम्मेलनं तथा नवम्बरमासे ब्रिटेनमहाराज्ञ्या आध्यक्ष्ये राष्ट्रमण्डलीय-देश-प्रमुखानां सम्मेलन-मायोजिते अभूताम्। अनेकेषां राष्ट्राणामधिपतयस्तदानीं भारतस्य प्रगतिं विलोक्य सन्तुष्टा अभवन्नकथयँश्च—'भारताय विभिन्नेभ्यः स्रोतोभ्य उपलभ्यमानानां साहाय्यानामत्र समुचित उपयोगः क्रियत' इति। तदानीमेव सर्वेऽपि राष्ट्रप्रमुखाः श्रीमत्या गान्धीमहाभागायास्तथा भारतस्य प्रयासानप्यश्लाघयन्।

आत्मानं शुचि-विषयेषु योजयित्वा,
सङ्कल्पान् जनसुखदाँश्च कल्पयित्वा।
सन्मार्गेऽनवरतमत्र ये चलन्ति,
श्लाघ्यास्ते सकलजनैर्न किं भवन्ति? ॥१२॥

६ अक्टूबरदिने पंजाबराज्ये राष्ट्रपतिशासनं घोषितम्। ततः परं एव १२ दिसम्बरं यावत् सर्वप्रथमं 'सङ्घ-निरपेक्ष-मीडिया-कान्फ्रेन्स'स्याध्यक्षं श्रीमती गान्धी निरवहत्। २९ दिसम्बरदिने चाखिलभारतीयकाङ्ग्रेससमितेः सप्तसप्तति-तममधिवेशनं कलकत्तामहानगर्यां सम्पन्नम्। एवं सत्यपि—

दुर्वृत्तिमन्तो निजलाभतुष्टाः, परापकाराय कृतप्रयत्नाः।
किमप्यकार्यं विदधत्यजस्रं, हिताहितं चैव न चिन्तयन्ति ॥१३॥

इति किंवदन्त्यनुसारं सन् १९८० ई० वर्षे सत्तायामागमनात् परं श्रीमती-न्दिरागान्धीमहाभागैकया नवीनया समस्यया सङ्घर्षं करोति स्म। कारणं तस्येद-मासीद् यज्जनतादलस्य विघटनात् परं राष्ट्रियेण स्तरेण तदीयकाङ्ग्रेसदलस्य साम्यं भजतः कस्याप्यन्यस्य दलस्याभावाद् विघटिता नेतारो यथेच्छं क्षेत्रीयाणां भावनानां तथा क्षुद्रप्रायाणां समस्यानामाश्रयेण नेतृत्वं स्थिरयितुं प्रयत्नवन्तोऽजायन्त। तत एव क्षेत्रीयाणि दलान्यप्युद्भूतानि। असम-त्रिपुरा-नागालैण्ड-पूर्व-सीमस्थराज्यादिषु यानि क्षेत्रीयाण्यान्दोलनानि चलन्ति स्म तैस्सहैवान्ध्रप्रदेशे प्रान्तीयभाषयोराधारेण प्रान्तेभ्यो विशिष्य स्वायत्तता-प्रापणाय 'तेलगूदेशम्'—नामकस्य दलस्य जन्माभूत्। तन्माध्यमेन विपक्षस्यान्ये नेतारोऽपि तस्मिन् संयुक्ताः। सर्वेषामपि तत्रेन्दिराशासन-स्योच्छेदनमेवान्तर्निहितमासीत्। तत्र वस्तुतो राजनीतिकेन विद्वेषेण दुर्भावनाया-स्तथा प्रवर्तितताया दुर्वृत्तेः कारणाद् भविष्यति काले देशस्य खण्डनेन तेषु केचन स्वल्पाय कालाय प्रशासनमधिकारं नेतृत्वं वा प्राप्स्याम इत्येषैव तुच्छा भावना बलवत्यभूत्।

पञ्जाबराज्येऽपि तादृश्येव भावना स्वातन्त्र्यप्राप्ति-कालादेव मूलं प्राप्ता-ऽऽसीत्। तस्य राज्यस्य समस्याः क्रमशो बलवत्तरा बलवत्तमाश्च भवितुं प्रवृत्ताः।

'पञ्जाब-भूभाग एकः स्वतन्त्रो देशः '**खालिस्तान**'-नाम्ना भारतात् पृथक् स्थाप्येत' —इयं याचना भारतादप्यधिकमुन्नततयाऽमेरिका-इङ्ग्लैण्ड-कनाडा-पश्चिम-जर्मन-पाकिस्तान-भूभागेषु विशिष्योत्थापिता। एकमुग्रवादि दलमेव सङ्घटितम्। तस्य समर्थकाः मुष्टिमेया जनाः पंजाबस्थाया जनतायाः शान्ति विखण्ड्य जनहिंसाम-कुर्वन्। खालिस्तान-विरोधिनां प्रमुखनेतृवराणां—येषु स्वयमिन्दिरा महाभागा तदीयाः पारिवारिका अपि सम्मिलिता आसन्—हिंसनसूचीं निर्माय यथायथं वधोऽपि प्रारब्धः। यथा तथा जनेष्वातङ्कोत्पादनं स्वविरुद्धमाचरतां हिंसनमान्दोलन-चालनाय लुण्ठनं धनार्जनं सर्वकारसम्पदो हानञ्चेति बहुभिरुद्देश्यैः प्रेरिता आतङ्कवादिनो निर्दयं क्रूराणि कर्माण्यवर्धयन्। ते हि भारतस्य लोकतन्त्र-समाज-वाद-धर्मनिरपेक्षता-मूलकान् सिद्धान्तान् सर्वथा खण्डयितुमप्यचेष्टन्त। पंजाब-समस्यानां प्रस्थापनाय १९७३ ई० वर्षे तथा १९७८ ई० वर्षे चाकालीदलस्य क्रमश आनन्दपुरसाहबस्थले तथा लुधियानानगरे यत् सम्मेलनद्वयमभूत् तत्र याः समस्या उत्थापिता आसँस्तासु भूयस्यस्तु केन्द्रेण स्वीकृताः किन्तु तैरधियाचितेषु सङ्कल्पेषु—'केन्द्रशासनस्य केवलं रक्षायां, विदेशविषयेषु, मुद्रायान्तथा सामान्यसञ्चारस्य विषयेष्वेव हस्तरूपस्याधिकारो भवेदि'त्यात्मकः सङ्कल्पो न स्वीकृतो यतो ह्ययं मूलसंविधानाद् विपरीतोऽखण्डतादृष्ट्या च घातक आसीत्।

१६ अक्टूबर १९८१ ई० वर्षात् १५ फरवरी १९८४ ई० पर्यन्तं प्राय-स्त्रयोविंशतिवारं पंजाबसमस्यानां समाधानाय श्रीमतीन्दिरागान्धी महाभागा-ऽकालीदलस्य नेतृभिः सह वार्ता अकार्षीत् किन्तु किमपि समाधानं नाभूत्। २ जून १९८४ ई० दिने राष्ट्रस्य नाम्ना प्रसारिते स्वीये सन्देशे श्रीमतीन्दिरागान्धी स्पष्टमेवाकथयत्—"अकालिनां सर्वा अप्युचिता याचनाः स्वीकर्तुं शासनं सन्नद्ध-मासीत्। इन्दिरायाः समक्षं केवलं पञ्जाब एव तु नास्ति यतोऽकालिदलीयाः कथये-युर्यत्—पश्चिमोत्तरप्रदेशं दिल्लीञ्चापि पञ्जाबराज्ये मेलयतु तदा तथा क्रियेत। अतो योग्यायोग्ययोर्विवेकस्तु कर्तव्य एव।" इति।

पञ्जाबराज्यस्य तदानीन्तनी रक्तरञ्जिता गाथाऽतीव प्रदीर्घा विद्यते। श्रीमत्या इन्दिराया विषये विहिता आरोपाः सुबहूनां नेतॄणां पत्रकाराणां धार्मिकाणां सतां सामाजिक-कार्यकर्तॄणां हत्यास्तथाऽनेकार्बुदमुद्रामूल्यानां सम्पदां विनाशास्तत्र दैवदुर्विपाकं घृणां शोकञ्चोद्भावयन्ति। एतेषां सर्वेषामातङ्कानां केन्द्रममृतसरस्य गुरुद्वारं तथा सञ्चालकः सन्तजनरैलसिंहभिंडरावालाऽभूत्। तदानीञ्च—

देशे विदेशेषु च हन्त! हत्या लुण्टाकवृत्तिर्जनताभिघाताः।
सम्पद्विनाशाः प्रसृतास्तदानीं सर्वत्र साम्राज्यमभूच्च भीतेः॥१४॥

तदैव तादृशीं दुःस्थितिं वीक्ष्य श्रीमती गान्धी स्वर्णमन्दिरे सेना-प्रवेशस्य घोषणामकरोत्। तस्या घोषणायाः पूर्वं २० मार्च १९८१ ई० दिनादारभ्य ३ जून

१९८४ ई० पर्यन्तं प्रायः १२५० हिंसापूर्णा घटनाः, ४५० हत्याः, १२५५ जनानामाहतयः कृता आसन्। बेंकानां यानानां गुटिकास्त्राणां भुशुण्डीनां बलाल्लुण्ठनान्यपि बहुशोऽभूवन्। श्रीमतीन्दिरागान्धीमहाभागा तदापि संयमेन व्यवस्थां विदधती सर्वस्या अपि सैनिककार्यवाहिन्या उत्तरदायित्वं **प्रधानसेनाध्यक्षश्रीरणजीतसिंहदयालस्य** हस्तेऽदात् तथा परिसरस्यान्तर्वर्ति-सैनिक-कार्यस्य दायित्वं **मेजर जनरल वराड़**-महाभागायार्पयत्। सहैव मुख्यत्वेन सैनिका मुख्यमन्दिरं हरमिन्दरसाहबस्थानं प्रति च विस्फोटकास्त्रादिक्षेपणाय निषिद्धा आसन्। तस्यां सर्वस्यामपि प्रक्रियायां विविधाधिकारि-सहिता ८२ सैनिकाः, ४९३ असैनिका आतङ्कवादिनश्च मृतास्तथा प्रायः ८६ जना आहताः। तत्रैव २८० सैनिका अप्याहताः। आसीदेतेष्वेव मुख्य आतङ्कवादसञ्चालकः श्रीभिंडरावालाऽपि। स्वर्णमन्दिरे सैनिक-प्रयोगानन्तरं तत्परिसरादेव प्रायः ३० लक्षमिता प्रत्यक्षमुद्रा उपलब्धाः। ४१ मशीनगन ६७ स्टेनगन ३०३ राईफलनामकान्यस्त्राण्यपि प्राप्तानि। अन्येषां शस्त्रास्त्राणां सूची तु ततोऽपि विस्तृताऽभूत्।

एक वारं पुनर्देशस्याखण्डतायै विहितोऽयं सुदृढः प्रयासः सर्वैरश्लाध्यत। विपक्षनेतारोऽपि प्रायः समर्थनमेवाकार्षुः।

समग्रो देशोऽयं वसतु सुखितः शान्तिसहितो,
न कस्याप्येकस्य प्रचरतु यथेच्छं विलसितम्।
तदेतद् दार्ढ्येन स्थिरयितुमकार्षीदिह तदा,
महामात्या मान्या समुचितधियैक्याय सकलम्॥१५॥
यथा यथा च यद्यच्च शासनेन कृतं तदा।
तत्सर्वं श्वेतपत्रेण प्रकाश्य विहितं स्फुटम्॥१६॥

आतङ्कवादस्य दुरन्तगाथा कं राष्ट्रभक्तं व्यथितं न कुर्यात्।
अंशोऽपि यस्याः श्रुतिमूलमेतो दुःखाकरोति प्रसभं हि चित्तम्॥१७॥

सर्वा अपि पंजाबक्षेत्रे विशेषतोऽमृतसरस्थ-स्वर्णमन्दिरे तादृश्यः प्रक्रियाः श्रीमतीन्दिरागान्धीमहाभागा देशस्य संरक्षायै जनतायाः सुरक्षायै लोकतन्त्रस्य स्थिरत्वाय भारतस्याखण्डताया अकरोत्। ततः शनैः शनैः पुनरपि देशस्य प्रगतये ध्यानमदात्। तेष्वेव दिवसेषु सत्यामावश्यकतायां केन्द्रीये मन्त्रिमण्डलेऽपि सामान्यं परिवर्तनमकरोत्। २५ सितम्बर १९८४ ई० दिने दक्षिणपूर्वेशियावर्ति-देशानां स्वास्थ्य-मन्त्रिसम्मेलनं श्रीमतीगान्धी समबोधयत् तस्मिन्नेव दिने च सा स्वर्णमन्दिरात् सेनां व्यावर्तयितुं स्वीयं सन्देशं प्रासारयत्। २८ सितम्बरदिने बिहारासमयोरागतयोर्जलोपप्लवयोर्वायवीयं सर्वेक्षणं वायुयानेनाकरोत्। ७-८-९-अक्तूबरदिनेषु राजस्थान-महाराष्ट्रयोर्यात्रां व्यधात्। १० अक्तूबरदिवसे बौद्धानां तथा राष्ट्रियसंस्कृतीनामन्ताराष्ट्रियपरिषदमुदघाटयत्। १६ तो ३० अक्तूबर-

दिवसेषु सा महाभागा तमिलनाडु-बिहारोत्तरप्रदेश-मध्यप्रदेश-जम्मू-काश्मीरोड़ीसा-प्रदेशानां प्रवासान् विधाय तत्रत्यां स्थितिं समस्याश्चावगत्य कर्तव्यानि सन्दिश्य जनताः सम्बोध्य चात्मानं देशसेवाविधयाऽतोषयत्। १६ अक्तूबर १९८४ ई० दिने श्रीमतीमिन्दिरागान्धी-महाभागां मिलितुं यदा बहाई-सम्प्रदायस्य सदस्यास्तदीयं कार्यालयमुपागतास्तदा सा महाभागा विक्रतिं गच्छन्त्या अन्ताराष्ट्रियस्थितेर्विषये स्वीयां चिन्तां प्राकटयत् सहैव च मानव-कल्याणस्याभिलाषं व्यञ्जयन्ती विश्वे व्याप्ताया विद्वेषभावनाया न्यूनत्वापादन-विषयेऽपि बलमदात्। सा हि राष्ट्रियैकतायादाढर्चायापि विचारानभिव्यज्य दलीयभावनाभ्य ऊर्ध्वमुत्थाय सद्भावनापूर्णस्य वातावरणस्य मार्गप्रशस्त्यै समभावयत्। ईरानदेशे बहाईसम्प्रदायवत्सु विधीयमानैरत्याचारैरुत्पीडनैश्च सा विरुद्धाऽवर्तत। यदा सा महाभागा—आस्ट्रेलियादेशस्य यात्रायां सिडनीनगरस्थं बहाई-मन्दिरं द्रष्टुमगच्छत् तदा तस्य सौन्दर्यमाध्यात्मिकं वातावरणञ्चापि प्राशंसत। दक्षिणदेहल्यां निर्मीयमाणस्य बहाई-मन्दिरस्य पूर्तेरनन्तरं तस्य दर्शनमपि तया काङ्क्षितमासीत्।

३० अक्टूबर १९८४ ई० दिने भुवनेश्वरस्य विशालायां जनसभायां श्रीमत्या इन्दिरागान्धीमहाभागाया अन्तिमं सार्वजनिकं भाषणमभूत्। तस्मिन् भाषणे प्रकृत्यैव प्रेरिता सा महाभागा 'राष्ट्रियभावनाः, प्रत्येकं जनस्योत्तरदायित्वं, लोकतन्त्रं, समाजवादः, सन्तुलितो विकासो भारत-हितचिन्तनं, विपक्षस्यासहयोगो निराधारा आक्षेपाः, स्वतन्त्रताया अविभाज्यत्वं' चातीव प्रबलया वाण्या विमृश्यान्तेऽकथयत्—

"नाहं चिन्तिताऽस्मि यदहं जीवेयं वा न वा। परं मम समग्रं जीवनं देश-सेवायां व्यतीतं तस्मिन् गौरवमनुभवामि किञ्च यावच्छ्वासश्चलिष्यति तावद् देशसेवामेव करिष्ये। यदि चाहं स्वदेशस्य सेवां कुर्वती मरणमपि गच्छेयं तदाऽहं तस्मिन् गर्वमावहिष्यामि। अहं विश्वसिमि यन्मम रक्तस्य प्रत्येकं बिन्दुरस्य देशस्य विकासे योगदानं करिष्यति, एनं सुदृढं गतिशीलं च विधास्यतीति।"

स्वर्णमन्दिरे विहिताया आतङ्कवादिनां निःसारण-प्रक्रियाया अनन्तरं प्रधान-मन्त्रि-श्रीमत्या इन्दिरागान्धी-महाभागाया जीवनं सङ्कटापन्नमस्तीति चर्चा प्रायोऽक्रियत। तादृशे समये तस्याः सुरक्षार्थं नियुक्तानां सिखकर्मचारिणां परिवर्तनाय प्रस्तावः कृत आसीत् परं तया तन्न स्वीकृतम्। देश-विदेशभ्यः आयान्तीनां हत्यासम्बद्ध-सूचनानामनन्तरमपि सा महाभागा सुरक्षाकर्मचारिषु विश्वासमकरोत्। किन्तु ३१ अक्तूबर १९८४ ई० बुधवासरे प्रातः प्रायः सपादनववादनसमये तस्याः सुरक्षार्थं नियुक्ताभ्यां द्वाभ्यां सिखसुरक्षाकर्मचारिभ्यां सा महाभागा गुटिकाप्रहारैः निःशेषतां प्रापिता।

श्रीमतीन्दिरागान्धी प्रत्येकं दिनमिव बुधवासरमपि प्रारभत। नासीत् तदा कोऽपीदृशः सङ्केतो यत् तद् दिनं समस्ताय देशाय तमःपूर्णं दिनं भविष्यतीति।

तस्मिन् दिवसे शरदः सामान्यं शैल्यमवर्तत किन्तु कोऽप्येवं नाजानाद् यत् कतिचित् क्षणानन्तरं समग्रं वातावरणमेव परिवर्तितं भविष्यति ? सा प्रातः सप्तवादनकाले स्वीयं सहायकं **श्री आर० के० धवन**-महानुभावमकथयत्—'अद्यतनः सर्वोऽपि कार्यक्रमो निरसनीयः। उड़ीसाप्रदेशस्य द्विदिवसीयया यात्रया सा श्रान्ताऽस्तीति।' तदनुसारं सर्वे कार्यक्रमाः प्रायेण निरस्ताः परम् आयरलैण्डस्य दूरदर्शनदलेन सह साक्षात्काराय श्रीधवनस्तस्यावश्यकतां निवेद्य स्वीकृतिं प्राप्नोत्।

सा महाभागा प्रातराशं विधाय पौत्र-पौत्रीभ्यां मिलिता कुशलं चपृष्टवती। सज्जादिकं कारयित्वा च पञ्चक्षणोत्तरं नववादनसमये स्वावासस्थानात् (क्र० १) सफदरजंगमार्गतो बहिरायाता तथा २ अकबरमार्ग—यत्र तदीयः कार्यालयोऽवर्तत, प्रति गन्तुं प्रवृत्ता। तदानीं तया सह विदेशमन्त्रालयस्य नीतिनिर्धारणसमितेरध्यक्षः श्री जी० पार्थसारथिस्तदीयः सूचनापरामर्शदाता श्री एच० वाई० शारदाप्रसादश्चावर्तताम्। तस्मिन्नेव समये त्रय आरक्षि-सुरक्षाकर्मचारिणः समक्षमायाताः। श्रीमतीन्दिरा स्वभावानुसारं नमस्त इत्यवोचत् तेऽपि हस्तान् संयोज्य नमनमकुर्वन्। तदैव तेष्वेकेन नमनेन सहैव गुटिकास्त्रद्वारा गुटिकावर्षणं प्रारब्धं सा चीत्कृत्य तत्रैव निपतिता। तदैव द्वितीयोऽपि द्रुतगुटिकावर्षकेणास्त्रेण गुटिका अचालयत्।

तयोः प्रथम आसीदारक्ष्युपनिरीक्षको **बेअन्तसिंह**स्तथाऽपर आरक्षी **सतवन्तसिंहः**। रक्षकावेव भक्षकौ संवृत्तौ। कोटि-कोटि-जनानां माता प्राणैर्वियोजिता। या च प्रकाशभित्तिस्तदानीं यावदखिलान् प्रकाशते स्म सा सहसा गुटिकावर्षणैर्ध्वंसिता !!!

धर्मान्धताजन्यविकार-पुष्टैर्वैदेशिकैश्चापि हतावबोधैः।
नुन्नो जिघांसुः सहसैव हन्त ! व्याधोऽवधीद् भारत-राजहंसीम्॥१८॥

अन्यश्च भूमौ पतितां पुनस्तां, प्राणैर्वियुक्तामपि शङ्कितः सन्।
दुष्टः स्वकीयास्त्रज-गोलिकाभिर्व्यधाद् वधायोद्यममाशु हन्त !॥१९॥

□ तेजस्तेजसि हन्त ! विलीनम्

क्रूरस्यास्य काण्डस्यानुपदमेव तावात्मसमर्पणमकुरुतां तदा श्रीमतीगान्धीमहाभागायाः सुरक्षार्थं नियुक्तं कमाण्डो-दलं घटनास्थलमुपेतं तथा द्वयोरपि घातकयोर्हस्तौ बद्ध्वा १ अकबरमार्ग—स्थित आरक्ष्यागारे तावानीतौ। तत्रारक्षिणा गुटिकाप्रहारो विहितस्तेन गुटिकानां विंशत्याऽऽहतो बेअन्तसिंहस्तु तत्रैव मृतः परं सतवन्तसिंहोऽष्टभिर्गुटिकाभिराहतः सन्नपि जीवितोऽतिष्ठत् तस्मात् स उपचाराय राममनोहरलोहिया-चिकित्सालये प्रेषितः।

तदैवः श्रीमतीन्दिरागान्धीमहाभागां प्रवहद्-रक्तलिप्तसर्वाङ्गां शीघ्रमेवायुर्विज्ञानसंस्थानेऽनयन्। तदानीं तया सह श्रीधवनः श्री के० पी० माथुरस्तथा

तस्याः पुत्रवधूः श्रीमती सोनिया गान्धी चावर्तन्त। अतीव प्रयासानन्तरमपि चिकित्सकाः श्रीमतीन्दिरागान्धी-महाभागां रक्षितुं नाशक्नुवन्। तस्याः सकलमपि शरीरं गुटिकाभिश्छिद्रायितमभूत्। बहुषु मार्मिकस्थलेषु गुटिकाः प्रविष्टा आसन्। परं तस्या महाभागाया दिवं प्रयाणस्यौपचारिकी घोषणाऽपराह्णे षड्वादन-वेलातः पूर्वं भारतशासनेन नाक्रियत। यतः —

अस्माकं देशस्य राष्ट्रपतयो ज्ञानि-श्रीजैलसिंहमहाभागाः स्वदेशात् बहिर्यमननगरेऽवर्तन्त, अखिलभारतीय-काङ्ग्रेस (इ०) दलस्य महासचिवस्तथा श्रीमत्या गान्धीमहाभागाया पुत्रः श्रीराजीवगान्धी तदानीं पश्चिमबङ्गालप्रदेशेऽभूत्। गृहमन्त्रि-श्रीनरसिंहराव-महोदयाः, वित्तमन्त्रि-श्रीप्रणवमुखर्जीमहाशया रेलमन्त्रि-श्री ए० बी० ए० गनी खां महानुभावा लोकसभाध्यक्ष-श्रीबलरामजाखड़-महोदयाः प्रधानमन्त्रिणां मुख्यसचिवाः पी० सी० एलैक्जैण्डरमहाशयाः केन्द्रियसचिवाः श्री सी० आर० कृष्णास्वामिमहानुभावाश्च तदानीं देहलीतो बहिरासन्।

श्रीमत्या-इन्दिरागान्धी-महाभागायाः पार्थिवदेहस्य प्रायः पञ्चाशद्गजदूरवर्तिनि स्थले तस्या उत्तराधिकारि-निर्णयाय काङ्ग्रेस (इ०) नेतृणामुपवेशनमारब्धम्! तावन्तं कालं यावद् राजकीय-रूपेण मृत्योर्घोषणा नाक्रियत। यद्यपि समाचार-सञ्चार-साधनैः सकलमपि विश्वं विदितप्रायमभूत् किन्तु भारतसर्वकारस्य केनापि माध्यमेन मृत्युविषयिणी सूचना न प्रकाशिता। यतो हि राष्ट्रपतीनां श्रीजैलसिंहमहाभागानां विदेशयात्रातः परावर्तनस्य प्रतीक्षाऽवर्तत। प्रायः सार्धपञ्चवादनसमये श्रीराष्ट्रपतयश्चिकित्सालयं प्राप्ताः। अवनतशिरसस्तेऽन्तः प्रविष्टाः, विंशतिक्षणानन्तरं च पुनर्बहिरायाताः। ततः प्रधानमन्त्रिण उत्तराधिकारिरूपेण श्रीराजीवगान्धिमहाभागं निर्णीय श्रीमत्या इन्दिरागान्धीमहाभागाया देहावसानसूचना विधिवत् प्रकाशिता।

तस्या मृत्योर्घोषणया सकलोऽपि देशः शोकसागरे निमग्नः। सर्वमपि स्तब्धमिव प्रत्यभात्। शोके राष्ट्रिया ध्वजा अवनामिताः। शीघ्रमेव सार्वजनिकाः कार्यक्रमा निरस्ताः।

भारतीयायुर्विज्ञान-संस्थानाद् बहिः स्थितवता जनसमूहेन यदा स्वस्याः प्रियनेत्र्या मृत्योः समाचारः श्रुतस्तदा स स्वकीयमाक्रोशमेकस्मिन् समुदायविशेषे प्रकटयितुं प्रावर्तत। फलतो न केवलं राजधान्यामेव, अपि तु भारतस्य बहुषु भागेषु हिंसायाः सम्पद्विनाशस्य ज्वलनज्वालनस्य यानादित्रोटनस्य च ताण्डव एव प्रवृत्तः। १ नवम्बरदिनं यावत् तद् भीषणं कृत्यं ताण्डवं च सर्वत्र प्रसृतम्। तदा नवीनेन **प्रधानमन्त्रिणा श्रीराजीवगान्धि-महाभागेन** तथा **गृहमन्त्रि-श्री पी०वी० नरसिंहराव-**महाभागेन शान्तय एकतायै च जनता निवेदिता। स्थाने-स्थाने सञ्चाररोधाः प्रवर्तिताः। हिंसककार्याणि कुर्वतो विलोकनेन सहैव गोलिकाभिर्मारणमादिष्टम्। इत्थं जनता कथञ्चिदपि शान्ताऽभूत्। एवमेव नानाविधा अपसमाचारा अपि

प्रासरन् तानपि सत्यप्रसारणेन शासनमशातयत्।

इष्टं विशिष्टं प्रसमीक्ष्य नष्टं, स्पष्टं जना धैर्यमिह त्यजन्ति।
प्रायः समापन्न-विपत्तिकाले, धियोऽपि पुंसां मलिना भवन्ति ॥१९॥

राष्ट्रेण द्वादश दिनानां शोको मानितः। देशस्य विभिन्नप्रान्तानां राज्यपाला मुख्यसचिवा राजधानीमागन्तुं प्रवृत्ताः तस्या महाभागायाः पार्थिवं शरीरं दर्शनाय 'तीन-मूर्ति-भवने' स्थापितम्। तद् भवनं तस्याः पितुः श्रीजवाहरलालनेहरूमहोदयस्य शासकीयं निवासस्थानमभूत्। सत्यपि शैत्याधिक्ये १ नवम्बरदिने प्रातरारभ्य स्वस्याः प्रियनेत्र्या अन्तिमदर्शनाय स्त्रियः पुरुषाः बालकाश्च त्रि-मूर्तिभवनमागन्तुं प्रारभन्त। विलपन्तो दर्शनार्थिनोऽसहाया इव शून्ये विलोकयन्तः प्रातीयन्त। अश्रुपूरितनेत्राः प्रकम्पितैर्हस्तैः पुष्पमालाः समर्प्य स्वीयान् हार्दिकान् श्रद्धाञ्जलीनर्पयन्ति स्म।

यस्या असीम-करुणामृतवर्षणेन दीना हीनाः फलन्ति स्म, पुष्प्यान्ति स्म तथाऽऽत्मविश्वासेन सुरभिता भवन्ति स्म तेऽप्यद्यानाथा इवात्मानमनुभवन्त श्रद्धावनता नयनैरैव नयनैः किमपि किमपि जल्पन्तोऽश्रूणि मुञ्चन्ति स्म। विश्वस्य महतां नेतॄणां राजनेतॄणां तथाऽन्येषां जननेतॄणां समवेदना-सन्देशा आगच्छन्। यतः—

आत्मीयस्य जनस्य हन्त ! सहसा श्रुत्वा स्वकीयैः कृतां,
हत्यां को व्यथते न शोक-विधुतः कार्तज्ञ्यभावान्वितः ?।
तत्रापि प्रतिमानवं निजपरीवारोद्भवं निश्छलं,
प्रीत्याऽमन्यत याऽथ तां दिवमितां स्मृत्वा न पीड्येत कः ? ॥ २१॥

३ नवम्बर १९८४ ई० दिने श्रीमत्या इन्दिरागान्धी-महाभागायाः पार्थिव-शरीरस्यान्त्येष्टिः शान्तिवन-राजघट्टयोर्मध्यवर्तिनि स्थलेऽक्रियत। तस्या अन्तिमयात्रायां देशस्य लक्षशो मानवानामतिरिक्तं शताधिकदेशानां नेतारो राजनयिकाः प्रतिनिधि-मण्डलानि च सहभागमगृह्णन्। प्रायोऽपराह्णस्य चतुर्वादनकाले स्वीयेन व्याकुलितेन चेतसा वाष्पाकुलितैर्नेत्रैश्च देशस्य जनतयाऽऽत्मनोऽतिप्रीता मान्या नेत्री वह्नये समर्पिता। वैदिकमन्त्रोच्चारणेन सह स्व० श्रीमतीइन्दिरागान्धीमहाभागायाः पुत्रस्तथा भारतस्य प्रधानमन्त्री श्रीराजीवगान्धी परमेण भाराक्रान्तेत्र हृदयेन तस्याश्चितां प्राज्वालयत्। राष्ट्रपति-प्रभृतिभिः परिक्रम्यान्तिमः श्रद्धाञ्जलिरर्पितः। धार्मिकमन्त्रपाठैः सह चिताऽपि ज्वालामालाभिर्व्याप्ताऽभूत्। श्रीराजीवगान्धिद्वारा ४-४५ समये कपाल-क्रिया-सम्पादनान्तरं तस्या महीयस्या महाप्रयाणं पूर्णतामितम्।

अन्त्येष्टि-स्थलस्य समन्ततो जन-सागरस्तरङ्गित आसीत् तन्मध्ये च स्वीयेन परिवारेण सहोपस्थित आसीत् सजलनयनः श्रीराजीवगान्धी। दूरे पश्चिमायां दिशि पीतवर्णोऽशुमाली निस्तेजा भवति स्म। तेन सहैवान्तिमां दिशं प्रत्येको युगः सङ्कुचति स्म च। पञ्चवादन-समये श्रीराजीवगान्धी मातुश्चिताया अन्तिमं प्रणाममर्पयित्वा पत्नीं श्रीमतीं सोनियागान्धीमहाभागां पुत्रीं प्रियङ्कां पुत्रं राहुलं भ्रातृव्यं वरुणं

च नीत्वा परावर्तत ।

तृतीये दिवसे प्रातः सार्धषड्वादन-समये श्रीराजीवगान्धी दिवङ्गताया मातुः पार्थिवावशेषरूपाण्यस्थिपुष्पाण्यवचेतुमन्त्येष्टिस्थलं गतः । मन्त्रोच्चारणेन सह चितास्थले दुग्धं मधु च विकीर्य चत्वारिंशत्-ताम्रकलशेष्वस्थिपुष्पाणि सङ्गृहीतानि । ते कलशाः शोभायात्रया त्रिमूर्तिभवनमानीता जनताया दर्शनाय च 'अमलतास-पादपस्य' परितः स्थापिताः । सर्वैः पारिवारिकैस्तथा राष्ट्रपति-प्रभृतिभिर्माल्यार्पणं विहितम् । ततः परं त्रीनस्थिकलशान् तत्रैव संरक्ष्य शेषा विभिन्नराज्यानां राजधानीषु केन्द्रशासित-प्रदेशेषु च देशस्य जनताया दर्शनाय श्रद्धाञ्जलि-समर्पणाय प्रेषिताः । नवम्बरमासस्य दशमीं तिथिं यावत् सर्वेऽपि कलशाः पुनस्त्रिमूर्तिभवनमानीताः ।

विश्वस्य सर्वतो महतो लोकतन्त्रस्य स्व० प्रधानमन्त्रि-श्रीमतीन्दिरागान्धीमहाभागाया हार्दिकोऽभिलाष आसीद्यत् तस्या अस्थ्यवशेषा हिमालयस्य हिमाच्छादितेषु शिखरेषु विकीर्येरन् । श्रीराजीवगान्धिमहाभागस्तमभिलाषं पूरयितुं व्योमयानेन सपरिवारमस्थ्यवशेषान् नीत्वा प्रायः षड्विंशतिसहस्र-फुटमितोन्नतमुड्डीय हिमालयस्य हिमाच्छन्नेषु शुभ्रशिखरेषु सश्रद्धं विसर्जितवान् । कश्चिदस्थ्यवशेषो गङ्गावतर-यमुनावतरतीर्थयोर्मध्ये गोमुखतीर्थे तथा काश्मीरस्य भगवतोऽमरनाथस्य तीर्थेऽपि विसर्जितः । इत्थं श्रीमत्या इन्दिरागान्धीमहाभागायाः पाञ्चभौतिकं शरीरं पञ्चतत्त्वेषु मिलितम् । **तेजो लीनं च तेजसि ।**

□ मृत्यु-पत्र-विषयिणी वार्ता

श्रीमती-इन्दिरागान्धी **'मृत्यु-पत्र'** स्वरूपेण कमपि हस्तलेखं विलिख्य नात्यजत् परंमृत्योरनन्तरं (क्रमाङ्क १ सफदरजंगमार्गे) तदीय-प्रकोष्ठस्थे लेखपीठे तस्याः स्वहस्तेन लिखितपत्राणां त्रीणि पृष्ठानि लब्धानि, यानि वयं श्रीमत्या इन्दिरागान्धीमहाभागाया मृत्यु-पत्रमन्तिमं पत्रं वा कथयितुं शक्नुमः । इदं स्पष्टमस्ति यत् स्वर्गीया प्रधानमन्त्रि-पदे विराजमाना तत्रभवती किमप्यन्यदपि लिखितुं वाञ्छति स्म, यतो हि तेषां त्रयाणां पृष्ठानामन्ते तया हस्ताक्षराणि न कृतानि । कश्चन दिनाङ्कोऽपि नाङ्कितः । स्फुटमस्ति यन्मृत्योः कियतश्चित् कालात् पूर्वं तया सर्वं लिखितमासीत्, यतस्तानि त्रीण्यपि पृष्ठानि तदीये लेखपीठ एव स्थितान्यभूवन् ।

श्रीमतीन्दिरागान्धी-महाभागा स्वीयेऽवसान-पत्रेऽन्यत् किं लिखितुमिच्छति स्मेति तु केवलमनुमानस्यैवास्ति विषयः, किन्तु सा त्रिषु पृष्ठेषु स्वहस्तेन यल्लिखितवती तेन ततः पूर्वकालिक्यास्तस्या मनःस्थितेः पूर्णं ज्ञानं भवति । तस्या विश्वास आसीद् यत् तदीयस्य घातस्य षड्यन्त्रं रच्यते । तया लिखितम्—**"यदि मम हिंसापूर्णं मरणं भवेद्, यथा हि केचन जना भीताः सन्ति तथा स्वल्पा जना षड्यन्त्रं विदधति, तदाऽहं वेद्मि यदियं हिंसा घातकस्य विचारे कर्मणि च भविष्यति । मम मृत्यौ नैव ।"**

अग्रिमाः पङ्क्तय इन्दिरागान्धी-महाभागायाः सम्पूर्णं चरित्रं द्योतयन्ति। यथा—"**यतो हि काचिदपि घृणा नास्तीयती कृष्णा, या देशं तथा जनतां प्रति ममानुरागस्य विस्तारमाच्छादयितुं प्रभवेत्। काऽपि शक्तिरियती दृढा न विद्यते या मां स्वलक्ष्यात् तथा देशमिमं पुरो वर्धयितुं विधीयमानेभ्यः प्रयत्नेभ्यो विमुखीं कर्तुं शक्नुयात्।**"

आम्, इदं शतप्रतिशतं सत्यमस्ति यद् भारतस्यैकताया अखण्डतायाश्च विनिमये ते खण्डयित्वा केनापि सह सन्धये सा कदापि सन्नद्धा नाभवत्। राष्ट्रः हितानां बलिदानापेक्षया साः स्वीयानां प्राणानामेव बलिमार्पयत्। इन्दिरा-सदृश्य-नुभवपूर्णा कल्पनाशीला दूरदर्शिनी राष्ट्रनेत्री देशे बहिश्च यत् किञ्चिद् भवति स्म तं ज्ञातुं न पारयेदिति सम्भवं नासीत्। भारते राजनीतिकीमस्थिरतामुत्पाद-यितुं तदीया हत्यायाः षड्यन्त्राणि रच्यन्त इति सा जानाति स्म। इदं तु सा भूयोभूयोऽकथयद् यद् बाह्या देशस्यान्तःस्थाश्च शक्तयो भारतं निर्बलं विधातुं चेष्टन्ते। सा चेदमपि समसूचयद् यद् भारतस्य पश्चिमसीमभ्यो भूयोऽपि भयमुत्पन्नमस्ति। परं सार्वजनिकरूपेणेदं कदापि तया नोक्तमासीद् यत् तस्या हत्यायाः केचन जनाः कूटकृत्यं विदधतीति। परं तस्या मृत्योरनन्तरं यो मृत्युलेखः प्राप्तस्तेन स्पष्टं भवति यत् सा हत्यायाः षड्यन्त्रविषये जानाति स्म।

श्रीमती-गान्धी-महाभागा केवलं महती राष्ट्रवादिनी नेत्रीत्वमण्डितैव नावर्तत, परं तस्यामद्भुतः साहसोऽप्यासीद् या आत्मबलिदानादपि पृष्ठपदा नाभूत्। तया यदपि लिखितमभूत् तत् प्रमाणीकृत्यापि दर्शितम्। काऽपि शक्तिस्तां स्वीयेभ्य उद्देशेभ्यः पृथक् कर्तुं नाशक्नोत्।

तत्रभवत्या इन्दिरागान्धी-महाभागया जीवनदानं स्वीकृतमासीत् परं राष्ट्रहितानां विनिमयेन सह केनापि सन्धि-विधानं स्वीकृतं नासीत्।

□ विकसितं सौगन्धिकं सहस्रदलं पद्मम्

आजन्मोर्जितमात्मगौरवमयं कर्मात्र सम्पादितं,
विस्मृत्यात्म-सुखानि यच्च निरतं राष्ट्रस्य सेवां व्यवधात्।
ऐक्यं शान्तिरथोन्नतिः प्रगतिरप्येकान्ततः काङ्क्षिता,
तत्सद्गन्धयुतं सहस्रदलभृत् पद्मं व्यराजत् क्षितौ॥२१॥

आसीत् सर्वतो मनोरमं श्रीमत्या इन्दिरागान्धीमहाभागाया जीवमेकं 'सौग-न्धिकं सहस्रदलंपद्मम्'। प्रतिपत्रं काञ्चनापूर्वां शोभां धारयत् तत् पद्मं दर्शन-मात्रेण हृदयं प्रसादयति स्म। तद् दृष्ट्वा नयने कर्पूरवर्तिकयाऽञ्जिते इव शान्ति मनुभवतः स्म। कर्णौ च तद्गुण-गणाकर्णनेन तृप्तौ भवतः स्म। तस्य पद्मस्य प्रभा तिरयति स्म लोकानामान्तरं तमः। तत् पद्मं नेहरूपरिवारस्य प्रसन्न-सलिले गुण-गम्भीरस्वच्छे सरसि राष्ट्रिय-भावनात्मकैरुन्नतैरंशुमालिनः किरणैर्विकसितं सेवा-

मकरन्दामोदितं निरन्तरं विकसदेव व्यराजत ।

श्रीमतीन्दिरा गान्धी निःसंशयमात्मनः कर्तृत्वसौरभेण देशे विदेशे च सर्वैरपि सम्मान्याऽभवत्। साऽवर्ततैका साहससम्पन्नाऽसाधारण-प्रतिभावती धीरा वीरा च। समाजवादस्य सा पक्षधराऽऽसीत् । स्वदेशमपि सा तस्मिन्नेव मार्गे नेतुं वाञ्छति स्म । दृढसङ्कल्पं सूक्ष्मां दृष्टिञ्च धारयन्ती श्रीमतीन्दिरागान्धी-महाभागा न केवलं देशस्यैका नेत्र्यैवावर्तत परं गभीरा राजनीतिज्ञा कूटनीतिज्ञाऽप्यासीत् । भारतसदृशस्य विशालस्य देशस्य—यत्र बहूनां धर्माणां बह्वीनां जातीनां नैकेषां सम्प्रदायानां मानवा वसन्ति, तस्य— लोकतान्त्रिकपद्धत्या प्रशासनमेकं महत् कार्यमपि सा सर्वात्मना निरवहत् ।

कैशोरे वयसि वर्तमाने लोकतन्त्रे भारतवासिनः पूर्णरूपेण विकसिता अपि नाभवन् । समाजे प्रवर्तमानाऽसमानतैकतो दीनानामुटजेषु परतश्च धनिनां प्रासादेषु स्पष्टं दृष्टिगोचरीभवति स्म । अभावानां पूर्तये यतमाना अपि प्रशासकाः प्रकृत्याः कोपेन बाह्येनक्रमणेनान्तरिकेण साम्प्रदायिकेनाथ च राजनीतिकेन कलहेन कुण्ठिता नियति-लुण्ठिता इवेच्छन्तोऽपि तावत् साफल्यमवाप्तुं क्षमा नादृश्यन्त । सङ्कटानां समस्यानां च सत्यपि बाहुल्ये निष्ठया साहसेन तथा सूक्ष्मचिन्तनेन निराचिकीर्षुः श्रीमतीगान्धीमहाभागा विश्वमैत्रीं शान्तिं प्रगतिञ्चाभिलक्ष्य कर्तव्ये पथि द्रुतया गत्याऽवर्धत ।

श्रीजवाहरलालनेहरोः श्रीलालबहादुरशास्त्रिणश्च प्रधानमन्त्रित्वकाले लोकतन्त्रस्य याऽऽधारशिला न्यास्यत तस्या दृढत्वाय तदुपरि भव्यस्य भवनस्य निर्माणाय श्रीमतीगान्धी देशं नवीनां दिशं प्रत्यनयत्। राष्ट्रेण सहैकाकारतां प्राप्ता सा महाभागा जनमानसेषु **'इन्दिरैव भारतं भारतमेवेन्दिरा'**-सदृशीं स्थितिमपि प्राप्नोत्। तदासीत् तस्या एव कौशलस्यामृतं फलम् । यद्यपि संसदीये लोकतन्त्रे प्रधानमन्त्रिणः शक्तिषु संविधान-संसद्-दल-लोकमतानां नियन्त्रणं भवति तथापि तस्य सूक्ष्मं परिज्ञानमेव सर्वत्र मुखरं मन्यते। भारते विभिन्नाः प्रधानमन्त्रिणो विभिन्नेन रूपेण भारतीयं लोकतन्त्रं प्राशासत किन्तु श्रीमतीन्दिरागान्धी स्वीये कार्यविधौ समन्वयं समानतां शान्तिमेकतामखण्डतां प्रगतिं विश्वमैत्रीं च सम्भावयन्ती प्राथम्येन तेषु तेषु विषयेषु देशं नेतुं प्रायतत ।

श्रीमत्या इन्दिरागान्धीमहाभागाया राजनीतिक जीवनस्य सूक्ष्माध्ययनेन प्रतीयते यद् वस्तुतस्तस्या महत्सु कार्येषु भारतीयमनीषिणां तत्त्वज्ञानस्य समग्रः प्रभाव आसीत्। सा महाभागा पारम्परिक्या आध्यात्मिकताया पश्चिमस्य यथार्थवादेन समन्वयं वाञ्छति स्म। स्वतन्त्रभारतस्य विकसितासु राजनीतिकविचारधारासु तया गभीरेण चिन्तनेन नवनवाः प्रयोगा अपि समादृताः। तस्या दृष्टौ **"लोकतन्त्रं तदेवासीद् यत्रावश्यकेन प्रतिबन्धेन सहवैयक्तिक-स्वाधीनताया उत्तर-**

दायित्वं स्यात् ।" सा प्रजातन्त्रात्मिकां पद्धतिं वाञ्छन्ती व्यक्तेरेव मुख्यं महत्त्वममन्यत । अत एव सा राज्यस्य वैधानिकेषु तथा प्रशासनिकेषु कार्येषु वैयक्तिकस्याः स्वाधीनतायास्तथा सामाजिकस्य जनहितस्योभयोर्मेलनमकरोत् तथा मध्यवर्तिनं तादृशं मार्गमन्वैषयद्, यस्मिन्नुभावपि फलेयुः पुष्प्येयुः, कस्याप्येकस्य हानं न भवेत् तथा कोऽपि दुर्बलतां न प्राप्नुयात् । सा हि लोकतन्त्र-सम्बद्धं स्वकीयं दृष्टिकोणं स्पष्टयन्त्यकथयद्—"अस्माभिर्लोकतन्त्रस्य पन्थाः स्वीकृतः । तस्य केवलमयमर्थो नास्ति यदेका लोकसभा प्रवर्तते । जना मतदानं कुर्वन्ति, तस्यां प्रतिनिधयो गच्छन्ति किं वाऽस्माकं प्रदेशेषु विधानसभाः प्रवर्तन्ते । इमानि त्वेकया दृष्ट्या साधनानि सन्ति लोकतन्त्रस्य । वास्तविकं तथ्यन्त्विदमस्ति यत् सर्वा जनता भागं गृह्णाति—समस्ता जनता, भवतु नाम सा दीना, दूरस्था वा, सा विचारयति यदस्माकं के प्रश्नाः सन्ति, कानि काठिन्यानि विद्यन्ते, कथं च तानि दूरे करणीयानि । सर्वोऽपि देशः कार्येऽनुरक्तोऽस्त्येतदेवास्ति लोकतन्त्रम् ।"

भारते लोकतन्त्रं द्रढयितुं श्रीमतीगान्धीमहाभागा सार्वजनिकस्य सामाजिकोत्तरदायित्वस्य तथा समुदायिकहितस्य गौरवपूर्णां भावनां नागरिकेषु व्यकासयत् । नादवादिन्या राजनीतेर्दूरे वास्तविकीं राजनीतिं प्रवर्तयितुं सा जनतां प्रैरयत् । महात्मनः श्रीगान्धिनस्तथा श्रीजवाहरलालस्य गतिशीलाया दूरदृष्टेः प्रेरणां प्राप्य शतीभ्यः प्राचीनमार्थिकमभावं सामाजिकीं गतिहीनतां सांस्कृतिकं पतनं च तिरयितुं तथा भारतीय-जनजीवने सर्वप्रथममेकं गुणात्मकं शोधनमानेतुं प्रायस्यत् । सा हि भारतस्याखण्डताया लोकतन्त्रस्य धर्मनिरपेक्षतायाः समाजवादस्य तथा यूथनिरपेक्षतायाः सुस्पष्टरूपेण निर्धारितासु नीतिष्वाधारिताया एकस्याः सुसङ्गताया विचारधारायाः प्रतिनिधित्वमाचरत् । भारतीये जनमानसे स्वीयामास्थां प्राकटयत् तथा सति समये जनतायाः समक्षं गमनेऽपि सङ्कोचं नाकरोत् । देशस्य समक्षमुपस्थितानां समस्यानां गोपनेन सा कदापि जनसाधारणं नावञ्चयदपि तु जनसाधारणं सा सदैवात्मनः प्रेरणायाः केन्द्रबिन्दुमेवामन्यत । तस्या महाभागाया दृष्टौ 'जनताशब्दस्यार्थ' इत्थमासीत्—

"जनताया अर्थोऽस्मभ्यं जनतायां एको वर्गो नास्ति । अस्माकं तात्पर्यं सकलया जनतया विद्यते । केचन जना विचारयन्ति यत् केचनवर्गा—ये धनिनः सन्ति ते, जनतायां न सन्ति; परमन्ये ये जना विद्यन्ते तेषां समूहो जनताऽस्ति । केचन मानवा धर्मविशेषानुयायिन एव जनतां मन्वते भिन्न-भिन्नान् भेदांश्च स्वीकुर्वन्ति । परमस्मभ्यं तु भारतस्य प्रत्येकं नागरिको महत्त्वपूर्णोऽस्ति तथा प्रत्येकं महत्त्वपूर्णेन जनेन जनता भवति ।" इति । वस्तुतः—

यावन्न स्याद् हृदि विशदता नैव वा कर्मनिष्ठा,
स्वार्थत्यागः प्रचुर-पटुता राजनीतौ च पुंसः ।

तावत् तस्मै कथमपि निजं सर्वतः सारभूतं,
स्नेहं मन्ये भुवि न जनता प्रार्पयत्यात्मनीनम् ॥ २२॥

भारतीयं विज्ञानमुन्नमयितुं श्रीमतीन्दिरागान्धी महाभागा निरन्तरं प्रायतिष्ट। यद्यपि भारते साम्प्रतिक-भारतीय-विज्ञानस्याधारशिला श्रीमता पं० जवाहरलालनेहरूमहाभागेन स्थापिताऽऽसीत्। तेषां प्रधानमन्त्रित्वकाल एकादश राष्ट्रियाः प्रयोगशालाः स्थापिताः। आणविकोर्जा-विभाग उद्घाटितस्तथा वैज्ञानिकेभ्यः कार्यसम्पादनाय सर्वैः सौविध्यैः सह स्वातन्त्र्यमदीयत तथापि विज्ञानस्य सफलतायाः शिखरं यावत्प्रापणस्य श्रेयः श्रीमत्यै गान्धीमहाभागाया एव गच्छति। सन् १९५०-५१ ई० वर्षयोर्वैज्ञानिकानुसन्धानाय सप्ततिलक्षोत्तरचतुष्कोटि-मुद्राणां व्ययोऽक्रियत। १९७६-७७ ई० वर्षयोरयं राशिश्चतुःशतकोटितोऽप्यग्रे व्ययार्थं स्वीकृतः। पञ्चम्यां योजनायां विज्ञान-तान्त्रिकविध्योर्विकसाय सप्तत्युत्तर-पञ्चदशकोटिमुद्राणामनुमितो व्ययोऽभूत्। वस्तुतः श्रीमतीगान्धीमहाभागा विज्ञानमेकं पृथक् साध्यं मन्वानापि सहैव तन्मानवस्य सार्वभौमविकासस्यैकं बलवत्साधनं सम्पादयितुं विशिष्य ध्यानमदात्। तदर्थं स्वदेशे १३० शोधसंस्थानानि, ११९ विश्वविद्यालयाः, १५० क्षेत्रीया आभियान्त्रिकमहाविद्यालया, १०० चिकित्सामहाविद्यालयाः, ३ केन्द्रीय-तान्त्रिकसंस्थानानि, ३५० प्रौद्योगशिक्षणमहाविद्यालयाः कार्यं कुर्वन्ति। प्रतिवर्षमत्र सार्द्धलक्षमिता वैज्ञानिकास्तन्त्रविदश्च सुसज्जा भवन्ति। तथास्माकं सविधे सम्प्रति त्रिंशल्लक्षमिता वैज्ञानिका आभियन्त्रिकाश्च विद्यन्ते। विज्ञानविषये तयोक्तमासीत्—

"साम्प्रतिक-मानवस्य निकटे न केवलं विनाशकारिणी शक्तिरेवास्ति, अपि तु प्रारम्भादेव तस्य निर्माणकारिणी शक्तिरपि तेन प्राप्ताऽस्ति। तस्य समीपे विज्ञानस्य प्रौद्योगिक्याश्चोपकरणान्यागतानि सन्ति। स नक्षत्राणि यावदुपयाति। अतो नाहमस्मि हताशा। यतो हि शान्तिः समस्तस्य विश्वस्य जनसाधारणस्य सामूहिक्या कामनया विमुखीभवितुं न शक्ष्यति।" इति।

श्रीमत्या इन्दिरागान्धीमहाभागाया महत्सु कार्येष्वार्थिकनीतिस्तथा तस्याः क्रियान्वयनं चावलोक्यते चेत् तदपीयन् महद् व्यापकं च विद्यते येन सा जगत्यां महतीषु व्यक्तिषु नामाङ्किता स्थास्यति। चतुर्दश महतीनां धनागारिकाणां राष्ट्रियकरणं कृषिमुद्योगं प्रति च तासामुन्मुखीकरणं तया सम्पादितम्। उद्यमशीलेभ्यस्तरुणेभ्य आर्थिकसाहाय्यदानेन साधनहीनेभ्यो वित्तविरहितेभ्यश्चार्थिकसहायता-प्रदानेन तेषामुन्नतेर्द्वाराण्युद्घाटितानि। राज्ञां विशेषाधिकारसमाप्तिर्वैयक्तिकसौविध्यराशिप्रदाननिरोधावपि तद्विषये स्पृहणीयावास्ताम्। देशे खनिजतैलस्य नैयून्यं निराकर्तुं गवेषणा, ऊर्जाया उपलब्धये परमाणुशक्तेर्विकासः, साम्प्रतं च सौरतापाद् वायोः, समुद्रस्य तरङ्गेभ्यो गोमय-वाष्पेणोल्करादिभ्यश्चोर्जाप्राप्तेः सफलाः प्रयोगाः सम्पन्नाः सन्ति तेभ्यो यथायथं सौविध्यमपि लभ्यते। शान्तये

परमाणुशक्तेः परीक्षणं, व्योमविज्ञानक्षेत्र आर्यभटस्य तथा इन्सैट-उपग्रहस्य स्थापनं तथा प्रथमस्य भारतीयस्य श्रीराकेशर्मणोऽन्तरिक्षयात्रा चेति महत्य उपलब्धयो विद्यन्ते ।

१९६२ ई० वर्ष एव परमाणूर्जाविभागस्यान्तर्गतमन्तरिक्ष-कार्यक्रमं बलवन्तं विधातुं **'इंकास्पर'**नाम्ना संस्था सङ्घटिता तथा **'थुम्बा-राकेट-प्रक्षेपण-केन्द्र'**स्य स्थापनाऽक्रियत । ततः परं श्रीमत्या इन्दिरागान्धीमहाभागायाः शासनकाले प्रथमो भारतीय उपग्रह आर्यभटः सोवितसङ्घस्य साहाय्येनान्तरिक्षे प्रक्षेपितः। तदनन्तरं **'भास्करः प्रथमो भास्करो द्वितीयो रोहिणी'**-प्रभृतय उपग्रहा अपि प्रेषितास्ते पूर्णतया भारतीया एवासन् । **'एपल'**-नामको भू-उपग्रहो जून १९८१ ई० वर्षेऽन्तरिक्षं प्रेषितस्तत एव च **'इंसेट'**-युगस्यारम्भः सञ्जातः । सेयं परम्परा प्रतिवर्षं वर्धत एव । साम्प्रतिकविज्ञानस्येयं गवेषणा महाभारतेऽभिमन्यु-महर्ष्यष्टावक्रयोश्चर्चाकालादेव भारते प्रवृत्तेति मन्यते। एवमेवान्येष्वपि पर्यावरण-दुर्लभ-जीव-जन्तु-रक्षा-सागरतलात् तैलसम्प्राप्ति-बहुधात्विक-पिण्ड-सङ्ग्रह-प्रभृतिकार्येषु साफल्येन भारतीया वर्धन्त इति तस्या एव दूरदृष्टेः फलं विद्यते। सुदूरे दक्षिणध्रुवस्थले हिममहाद्वीपान्टाकार्टिके भारतीयानामधिकारस्थापनाय तथोपयोग्यनुसन्धान-व्यवस्थायै वैज्ञानिकानां दलचतुष्टयं प्रेषितं तेन च तत्राधारशिविरञ्च स्थापितमिति ।

भूमेर्वाऽन्तरिक्षस्य च धरणितलस्यास्तु वा योजना या,
वैज्ञानिक्यार्थिकी वा भवतु निजभुवः प्रोन्नतेः साधयित्री ।
राष्ट्रक्षेमाय तां तां प्रखरगतिमतीं संविधातुं सयत्ना,
मान्या देवीन्दिरा साऽप्यहरहरकरोत् स्वीकृतां शीघ्रमेव ॥२३॥

सा हि महाभागा विदेशनीत्या भारत-सोवियतसन्धि सुदृढमकार्षीत् । बांगलादेशस्य स्थापनायां सहयोगमदात् । एशियामहाद्वीपस्य क्रीडामहोत्सवायोजनं व्यूह-निरपेक्षराष्ट्राणां शिखरसम्मेलनं चापि तस्या भारतीयविदेशनीतेः प्रशस्तेः पोषके अभूताम् । प्रतिरक्षानीतावपि सा महाभागाऽतीव सावधानतया विकासाय प्रायतत । पञ्चाशद्वर्षेभ्यः शैथिल्यं प्राप्तां प्रतिरक्षानीतिं पुनरुन्नमय्य श्रीमतीगान्धी शनैः शनैर्नवीनैरायामैस्तामवर्धयत् । सैन्यशक्ति-वर्धनाय जल-स्थल-नभसां सैन्यदलानि सज्जितानि। शस्त्रास्त्रोपकरणानि वायुयानानि च यथावसरमावश्यकतानुसारं सङ्गृहीतानि। तेषामेव परिणाम आसीत् पाकिस्तानयुद्धे विजयः। सीम-सुरक्षा-व्यवस्था सुदृढतां नीता। तस्याः प्रधानमन्त्रित्वकाल एवास्माकं देशः प्रायेण सुरक्षायामात्मनिर्भरोऽभवत् ।

श्रीमतीन्दिरागान्धी महाभागा सर्वा अपि राजनीतिकीः प्रक्रिया यथायथं प्रवर्तयन्त्यपि स्वदेशस्य प्राचीनां परम्परां न व्यस्मरत् । साम्प्रदायिक-समन्वयाय तथा धार्मिक-सहिष्णुतायै सा स्वयं दृष्टान्तभूताऽवर्तत । देशस्य सर्वाऽपि जातिर्धर्मैः

सम्प्रदायो वर्गो वा तस्यै समानमादरपात्रमभूत्। सांस्कृतिकं प्रत्येकं क्षेत्रं सा समुन्नतिमद् विधातुं द्रष्टुं च नवनवानामायामानां विस्तृतये सर्वकारपक्षतो धर्मनिरपेक्षभावनया साहाय्यमदात्। सर्वा अपि देशस्य भाषा विकासाय प्रेरिताः। साहित्यिका लेखकाः कवयश्च सम्मानिताः। धर्मे प्रगाढामास्थां धारयन्ती सा भारतस्य यस्मिन् कस्मिन्नपि क्षेत्रे गच्छति स्म, तत्र वर्तमानानां पुण्यस्थलानां पुण्यात्मनां च दर्शनायावश्यं गच्छति स्म।

'संस्कृतिः संस्कृताश्रिता' **'भारतस्य प्रतिष्ठे द्वे संस्कृतिः संस्कृतं तथा'** **'कथं भविष्यति विना संस्कृतं संस्कृतिशीलो लोक'**—इत्यादि नैकासामभियुक्तोक्तीनां तात्त्विकार्थं स्वीकुर्वतीव श्रीमतीन्दिरागान्धीमहाभागा भारतीयसंस्कृतेरभिरक्षणप्रवर्धन-सम्पोषणैः सहैवान्या भारतीया भाषाः पुष्णन्ती **संस्कृत-भाषायाः** संरक्षणायाभिवर्धनाय पोषणाय च विविधान् शासकीय-सहयोगानाविरभावयत्। **'संस्कृतं भारतस्य जीवन'**मिति धिया पञ्चवार्षिकीषु योजनासु क्रमशो द्रव्यराशेर्वर्धनेन विशिष्टानां संस्कृतसंस्थानानां प्राच्यग्रन्थागाराणां ग्रन्थप्रकाशनानां विद्वत्सम्मानानां संस्कृतविश्वविद्यालयस्थापनानां विद्यापीठानां महाविद्यालयानां विद्यालयानां च संरक्षणोपक्रमैश्च विधीयमानाः प्रयासा अवश्यमेव तस्या महाभागाया एव सुदृष्टेः परिणामाः सन्ति।

सा हि बहुधा कथयति स्म—

"जगति मानवा द्विविधा भवन्ति, तेषु केचन तमस आवृतौ सत्यां तमो निन्दयितुं प्रवर्तन्ते परमन्ये तमो न निन्दयन्ति किन्तु तस्याग्रे ज्योतिष एकं लघुतमं दीपं ज्वालयन्ति।"

वस्तुतः सा ज्योतिर्दीपं प्रज्वाल्य तमो निरासाय नितरां प्रायस्यत् प्रान्ते चात्मन उत्सर्गेण महान्तं दीपं ज्वालयित्वा भारतीयानां समुन्नतयेऽपूर्वं प्रकाशमास्तीर्य दिवं प्रस्थिता। अद्य समग्रं राष्ट्रं तस्या महाभागायास्त्यागान् तपस्याः कर्तृत्वानि च स्मारं स्मारं तां प्रति कृतज्ञातामावहति न च विस्मरिष्यति कदापि तया सर्वात्मना विहितां राष्ट्रसेवामित्योम्।

जयतु जयतु राष्ट्रं भारतं भा-रतं मे,
जयतु जयतु भव्या भारतीया प्रजा च।
जयतु जयतु नित्यं मान्या संस्कृतिर्विश्ववारा,
जयतु जयतु सर्वदैवेन्दिराऽपि ॥२४॥
लोके विद्वद्भिराख्यातं 'कीर्तिर्यस्य स जीवति'।
तथैवेयं चिरं जीयाद् 'इन्दिरा-कीर्ति-कौमुदी' ॥२५॥

—०—



1

सत्यमेव जयते

PRIME MINISTER

MESSAGE

Sanskrit is a basic source of Indian culture. Most modern Indian languages trace their origin to it. The study of ancient languages is a good training for the mind. Sanskrit is important for any student of ancient civilisations and for an understanding of the eternal wisdom of India's sacred texts.

The Lal Bahadur Shastri Kendriya Sanskrit Vidyapeetha has done useful work in the research and publication of Sanskrit texts. Through its cultural functions it has helped to popularise this great language.


I send my good wishes for the 20th annual function and Convocation of the Vidyapeetha.


(Indira Gandhi)

New Delhi
March 18, 1983













7





































महर्षि वाल्मीकि जन्मोत्सव समिति
दिल्ली
MAHARISHI VALMIKI JANMOTSAV SAMITI
DELHI
THUKRAL






आर्य समाज शताब्दी-विशेष डाक टिकट समारोह
25
आर्य समाज ARYA SAMAJ
1875
कृण्वन्तो विश्वमार्यम्
भारत
INDIA








THE FOUNDATION-STONE OF THE
ENTENARY ANNEXE OF THE ASIATIC SOCIETY
IS LAID BY THE PRIME MINISTER OF INDIA
SHRIMATI INDIRA GANDHI
ON THE



FIRST INTERNATIONAL
ON BUDDHIS











जीवी - सम्मेलन
RENCE OF INTELLECTUALS














विचारालोकः

[स्वर्गीय-प्रधानमन्त्रि-श्रीमती-इन्दिरागान्धी-महाभागायाः
संस्कृत-संस्कृति-शिक्षासंवलितानां
भाषणानां निदर्शकः]

卐

अपूर्वः कोऽप्यास्ते निधिरतुलितो मानवमतौ,
विराजन्ते यस्मिन् प्रखरकिरणा ज्ञान-मणयः ।
सुविज्ञास्तज्ज्ञात्वा किरति भुवि यत् तेन निचितो,
"विचारालोको"ऽयं तिरयतु तमस्तान्तिमचिरम् ॥

—रुद्रस्य

विमर्श-वेदिका

—सम्पादकीया

अपूर्वः कश्चन ज्ञान-महिमा। **'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते'** इत्येवं निर्दिश्य **'ऋते ज्ञानान्न मुक्ति'**रिति च भगवती श्रुतिर्यद् घोषितवती तत्र समस्तमपि ज्ञानं समाविष्टं विद्यते। यद्यज्ज्ञानं यस्मिन् यस्मिन् कर्मण्यावश्यकतां बिभर्ति तत्तत् प्राप्तव्यमेव प्राप्य च संसाराय वितरितव्यमित्यपि सार्वदिको राद्धान्तः। महामनीषिणो लौकिकं लोकोत्तरं च ज्ञानं दैवाच्छ्रमाच्च सम्प्राप्य स्वकीय-प्रतिभा-बलेन यथाकालं यथादेशं विविच्य परिष्कृत्य सारासारं हेयोपदेयं निरीक्ष्य च प्रकाशयन्ति। सेयं ज्ञानप्रकाशनपरम्पराऽनादिकालात् प्रवृत्ता प्रसृता च भागीरथी-प्रवाहवदनवरतं वर्धमाना सर्वतोविसारिण्या गत्या प्रवहत्येव।

भारतस्वातन्त्र्योत्तरं परिवर्तितायां परिस्थितौ राजनीतिके जीवने जीवतां नेतॄणां नेत्रीणाञ्च राष्ट्रिया विचारा विशिष्योपादेया अभूवन्। देशस्य समृद्धये प्रगतये च मूर्धन्यतां श्रितानामादरणीयानां धीमद्धौरेयाणां समये समये लेखनैः प्रसारणैर्भाषणैस्तथा प्रबोधनैर्देश-वासिनो निरन्तरं परिचिता भवेयुः स्वेषु स्वेषु कर्मसु सुदृढया निष्ठया प्रवर्तेरन्, स्वानि स्वानि कर्तव्यानि यथायथं सम्पाद्येरन्निति दृष्ट्या तेषां प्रकाशनान्यपि विहितानि विधीयन्ते च।

स्वर्गीया प्रधानमन्त्रि-श्रीमतीन्दिरागान्धी स्वदेशस्य सुप्रतिष्ठिते प्रधानामात्यपदे विराजमाना संस्कृत-संस्कृति-शिक्षा-स्वास्थ्य-समाजकल्याण-विज्ञान-भाषा-महापुरुषस्मृति-देश-विदेशनीति-सम्बद्धानि भूयांसि भाषणानि व्यतीतरत्। तेषु कानिचिदेव निदर्शन-रूपेण-संस्कृत-संस्कृति-शिक्षाविचारसंवलितानि भाषणान्यत्र **'विचारालोके'** प्रकाश्यन्ते —

गुरुप्राप्त-सज्ज्ञानभा-भासितानां, श्रुतेक्षाऽनुभूतिस्फुरद्बोधवाचाम्।
समुद्यत्प्रमापूर्ण-विद्वन्मणीनां, प्रकृष्टा विचारा भुवं दीपयन्ते॥

—सम्पादकः

अखिल भारतीय संस्कृत-साहित्य-सम्मेलन के स्वर्णजयन्ती समारोह पर श्रीमती इन्दिरा गांधी का अध्यक्षीय भाषण

आज का दिन हमारे देश के लिए गौरव का है। राष्ट्रपिता महात्मा गांधी का जन्म दिवस है।

अखिल भारतीय संस्कृत साहित्य सम्मेलन के स्वर्ण-जयन्ती समारोह के इस अवसर पर विश्व के भिन्न-भिन्न भागों से आए हुए सब विद्वानों का सम्मेलन के सभापति के रूप में स्वागत करते हुए मुझे बड़ी प्रसन्नता है। सर्वाधिक व्यस्त होते हुए भी केवल भारतीय संस्कृति के प्रचार-प्रसार को बढ़ावा देने की मेरी प्रबल इच्छा ने मुझे सम्मेलन का सभापति बनने के लिए प्रेरित किया। यह शुभ संयोग की बात है कि मैं सम्मेलन के मंच पर पहली बार आज इस महत्त्वपूर्ण अवसर पर उपस्थित हूँ।

संस्कृत और भारत के प्राचीन गौरव का अटूट सम्बन्ध है। संस्कृत के ज्ञान के बिना हमारी संस्कृति, साहित्य, प्रादेशिक भावनायें, कलायें, इतिहास आदि का वास्तविक ज्ञान अपूर्ण है। जवाहरलाल नेहरू को संस्कृत से प्रेम था और उसकी महत्ता ने उनको अपनी ओर खींचा। वे इसे भारत की सभ्यता और संस्कृति का मूल मानते थे। उन्होंने कहा है—

"भारत के इतिहास में संस्कृत का जो हाथ रहा है, वह दुनियाँ में किसी भी भाषा का किसी भी कौम के इतिहास में नहीं रहा। संस्कृत में न सिर्फ ऊँचे से ऊँचे विचार और सुन्दर से सुन्दर साहित्य रचा गया है—बल्कि कई एक छोटे-छोटे राज्यों में बँटे हुए उस भारत को एकता की लड़ी में बाँधे रखने के काम को भी संस्कृत ने ही किया। रामायण और महाभारत हजारों वर्षों से भारत की हर पीढ़ी के करोड़ों लोगों की जिन्दगियों का ताना-बाना बने हुए हैं। मैं अक्सर यह सोच कर हैरान रह जाता हूं कि हमारी जाति कहीं बुद्ध, महाभारत, रामायण, गीता-उपनिषदों को भूल जाए तो उसका क्या हश्र होगा? हमारी जड़ें उखड़ जायेंगी, हम अपनी उन सारी बुनियादी खूबियों को खो देंगें, जो युगों से हमारे साथ चली आ रही हैं और जिनके कारण दुनियाँ में हमारी हैसियत बनी हुई है। तब भारत, भारत न रह सकेगा।"

जवाहरलाल नेहरू का यह उद्धरण इस देश के साथ संस्कृत के गहरे सम्बन्ध को बताने के लिए काफी है। न केवल हमारे देश में, परन्तु सारे संसार में संस्कृत ने अपना महत्त्वपूर्ण स्थान बनाया है। अनेक विदेशी विद्वानों ने भारत में आकर संस्कृत का अध्ययन किया। आज भी जर्मनी, अमेरिका, नेपाल, अफगानिस्तान, फ्रांस, इटली, इंग्लैण्ड, ईरान आदि देशों में संस्कृत की शिक्षा के लिए विशेष-व्यवस्था है और अंतर्राष्ट्रीय स्तर पर संस्कृत का काम हो रहा है। इस देश ने संस्कृत को जन्म दिया है, इसलिए हमारा विशेष कर्त्तव्य है कि हम इस भाषा के विकास और उन्नति के लिए अधिक प्रयत्न करें तथा जो विदेशी विद्वान्

यहाँ आ कर संस्कृत का अध्ययन करना चाहते हैं—उनके लिए हमारे यहाँ अच्छी से अच्छी व्यवस्था करें।

मुझे यह जानकर प्रसन्नता है कि "अखिल भारतीय संस्कृत साहित्य सम्मेलन" गत आधी शताब्दी से संस्कृत के प्रचार-प्रसार के लिए प्रयत्न कर रहा है। इसने विदेशी साम्राज्य की कठिनाइयों के समय भी संस्कृत के हितों की रक्षा की। अपनी सफलताओं की आधी शताब्दी पूरी करने के उपलक्ष में सम्मेलन और इसके कार्य-कर्त्ताओं को मैं बधाई देना चाहती हूँ। किसी भी संस्था के लिए इससे बढ़कर शुभ-दिन क्या हो सकता है कि वह अपने ५० वर्ष पूरे कर अपनी स्वर्ण-जयन्ती का आयोजन करे। इतने लम्बे समय तक कई विघ्न-बाधाओं को पार करते हुए इस संस्था का जीवित रहना ही भारत की जनता में इसके प्रति विश्वास का प्रत्यक्ष प्रमाण है। इस समारोह से सम्मेलन के जीवन में एक नए दिन की शुरुआत हो रही है और मेरा विश्वास है कि आप सब लोगों के सहयोग से यह संस्था आज से नया उत्साह लेकर संस्कृत और भारतीय संस्कृति के प्रचार-प्रसार के कार्य को और आगे बढ़ाएगी।

समय-समय पर संस्कृत और भारतीय संस्कृति से सम्बन्धित मामलों पर भारत सरकार की नीति के बारे में अनेक प्रकार की शंकायें की जाती हैं। लेकिन आप सब लोगों के सामने मैं यह स्पष्ट कर देना चाहती हूं कि भारत सरकार संस्कृत के महत्त्व को समझती है और वह उसके प्रचार-प्रसार के लिए अपने साधनों और सुविधाओं के अनुसार आवश्यक सहायता करने का प्रयत्न कर रही है। भारत में संस्कृत का भविष्य उज्ज्वल है—इस बारे में कोई सन्देह नहीं किया जाना चाहिए।

आप जानते हैं कि दिल्ली में 'अखिल भारतीय संस्कृत विद्यापीठ' की स्थापना श्री शास्त्री जी ने की थी और उन्होंने 'इण्टर नेशनल संस्कृत इस्टीट्यूट' के रूप में इसके विकास की घोषणा कर एक योजना भी बनवाई थी। अब यह उचित होगा कि इस संस्था के साथ उनका नाम जोड़ कर उनकी सेवाओं का एक स्थायी स्मारक बनाया जाए। इसी दृष्टि से मैं सम्मेलन और विद्यापीठ के सभापति के रूप में आज से संस्कृत विद्यापीठ का नाम "श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृत विद्यापीठ, दिल्ली" करने की घोषणा करती हूँ।

इसी प्रसंग में मुझे यह घोषणा करते हुए भी प्रसन्नता है कि भारत सरकार ने संस्कृत विद्यापीठ, दिल्ली को केन्द्रीय संस्थान के रूप में, अपने संचालन में लेने का निर्णय किया है और शिक्षा मंत्रालय, विद्यापीठ और सम्मेलन के पदाधिकारियों से परामर्श कर शीघ्र ही विद्यापीठ की व्यवस्था अपने हाथ में ले रहा है। मेरा विश्वास है कि शिक्षा मंत्रालय इस संस्था के विकास का पूरा प्रयत्न करेगा।

भारत की सांस्कृतिक ज्योति को जलाये रखने के लिए संस्कृत भाषा को समृद्ध बनाना है। परन्तु यह प्रयास करते हुए यदि प्राचीन समय में अटक गये तो हम वर्तमान को न पहचान पायेंगे और न भविष्य की कल्पना कर सकेंगे। इस शानदार बीते युग का वर्तमान स्थिति और भविष्य के साथ संकलन करना है। मेरा विश्वास है कि 'संस्कृत साहित्य सम्मेलन' इस ओर प्रयास करेगा। इस कार्य के लिए मेरी शुभ कामनायें आपके साथ हैं। धन्यवाद।

The Relevance of the Vedas

Functions like this provide us an opportunity to give a thought to the sources of the rich treasures of our civilization which we have preserved for thousands of years. The Vedas, like the Ganga and the Yamuna have helped in building up India. Otherwise, the India we know would not hove come about. The biggest gifts of the scriptures to us are the Vedic order, truth and a sense of discipline and dedication.

I am neither a philosopher nor a Sanskrit scholar. Hence, I was reluctant to come to your function. In this country our ancestors bequeathed to us such great epics as the *Ramayana* and *Mahabharata* which are a store-house of ancient wisdom. These classics are popular even with those who are not well-educated. The Vedas are the source of all the great spiritual philosophies that govern the path of *Karma* (action), the path of Knowledge (*Jnana*) and the path of *Mukti* (liberation of the soul). The Vedas do not merely deal with the creation of life and the relation between the body and the soul, but also provide the source material for the most important work created by man. The Saints, who were blessed by visions of their gods, were able to see a divine light when the cosmos was still unsullied. The scriptures throw a light on the mysteries of life that is unique. They provide a wonderful description of the link between man and creation.

You may be aware of the keen interest that my father had in these subjects. I have some knowledge of Sanskrit but I must confess that much of my knowledge of the Vedas is derived from their English translation. Not all the *slokas* of the Vedas are equally religious in content. Many verses relate t.) *Karma Kanda* (cult of religious rituals). But some of them are brilliant examples of exalted knowledge. One of them is the very essence of the holy wisdom of our land. It says *Ekam Satyam*, that is Truth is one, but the learned describe it in many ways.

The Rig Veda says that all forms of divine knowledge are worthy of our respect and worship. The scriptures povide a fine example of

the liberation of the minds of the ancient seers from any kind of dogmatism. It was the Vedas that taught us even in the early days that we should lift ourselves above the narrow distinctions of caste and creed. They taught us the equality of the paths of knowledge which means that in our search for unity we should try to understand not only our own selves but also the people of the entire world. Our minds should be united and our aims should be the same. We should not try to destroy the divine spark within us. Can there be a better teaching than the one which tells us that our hearts should be united and we should be free from rancour?

It is an irony that the masses have remained deprived of such inspiring legacy. What was stated amounted to saying that woman should not be imparted the knowledge of the Vedas, nor should they seek it. Simultaneously, the majority of our people, including farmers and artisans, were also deprived of the right to learn the Vedas. This is how our country was weakened and our internal strength was destroyed. Decline has always set in whenever people in large numbers have been kept away from the source of knowledge and a small minority instead has become its custodian. The same thing happened in this country.

From time to time; we have had saints and seers who have demolished this wall and encouraged the people to go forward on the path of knowledge. During the last century, man like Raja Ram Mohan Roy and Swami Dayanand Saraswati opened the gates to our ancient wisdom through their teachings. Sri Ramkrishna Paramhansa unveiled before the people the great truth in a language which was their own.

We are aware of the work that you, Maharajji, is doing in this direction. I am happy that a concerted effort is being made to bring within the reach of the masses the wisdom of the Vedas in both Hindi and English. The compilation of the present edition of the four Vedas is a commendable effort on a natinoal scale. Swamiji has been serving the nation in several ways and by bringing out the present book, he has performed yet another signal service to mankind.

As you have been told, Swamiji has been known to my family. My father's name has been mentioned. But if I am not mistaken, you knew my grandfather as well. I have come here for your *darshan*, and to participate in this conference which has been going on for some days. I am grateful that you invited me and gave me your blessings.

India's Religious Tolerance

We have gathered here two days before Christmas to commemorate the mission of one of the direct disciples of Jesus Christ. It is our special pride that all the major religions of the world live and thrive in India. Four were born here: Hinduism, Buddhism, Jainism and Sikhism. The others came: Christianity 19 centuries ago and Zoroastrianism and Islam 12 or 13 centuries ago. Judaism has also had its Indian followers. These four religions are as Indian as the others. From the earliest times, one of the highest ideals of our country has been equal respect for all religions. Twenty-two centuries ago, Emperor Asoka said that we can fully respect our own religion if we respect religions of others.

We have heard today an account of St. Thomas' work in India and of the early years of Christianity here. The historical evidence and numerous traditions show that Christians were accepted from the earliest days as a part of the Indian mosaic. There are, as we have just heard, 1.45 crore Christians in India. As a group, they have made significant contribution to our composite religious heritage and to the cultural diversity of our society. After the European conquest of India, Christianity came to be erroneously associated with the foreign rule in some minds. However, Christian leaders have largely identified themselves with nationalist aspirations.

They have taken a leading part in many fields of national endeavour and have been in the mainstream of our national movement. Who can forget the moving speech made by Dr. H. C. Mukerjee in the Constituent Assembly, spurning the suggestion that Christians needed quotas and reservations? The greatest safeguard for a minority is the trust of the majority. In fact, while each of us has the full right to his faith

---

Speech on the 19th centenary celebrations of St. Thomas, New Delhi, December 23, 1972

and the practice of his religion in a modern state, there can be no politics of religion. The obligations of common citizenship must prevail over the numerous denominational claims. This is what we mean by secularism. It is not irreligion. It accords equal esteem and protection to the people of all religions, but it does not allow religious considerations or prejudices in the conduct of national affairs.

Religion is, and should basically be, each individual's personal search for a faith to live by, a faith which will show light in dark moments and enable him to apprehend the relationship between the self and the Creator. But, throughout history, organized religions have wielded considerable power over social organizations and this power has sometimes been used in defence of causes far removed from religion. At the same time, the religious impulse has been the largest single source of inspiration of the endeavour to improve the lot of "the poorest, the lowliest and the lost," as Poet Tagore called them. Kindness and charity have been the mark of the truly religious man.

In the last couple of centuries, Christian organizations in India have rendered invaluable service and this they have done with understanding and dedication. They have undertaken important programmes of social service—in education, in health and in the care of the unwanted and the derelict. Their example encouraged the followers of other religions to undertake similar service.

Christian scholars have done pioneering work for the renaissance of our various languages and literatures. Christian religious books were brought out in our regional languages and much was done to collect, edit and publish our own classics. Printing presses owned by Christian missions occupy an important place in our literary history.

The expansion of the great religions had indeed been a miracle. St. Thomas lived and worked in an age when there was no printing press and when travel was extraordinarily difficult. But such obstacles have never impeded the spread of ideas. Today, we lay so much emphasis on the mass media, but it is the message which is important.

The Buddha, a young prince in a small principality, is deeply stirred by human suffering. He lights a small lamp which within a few generations illumines the far off countries of Asia. Jesus Christ, son of a humble craftsman, finds the truth and is persecuted for uttering it. Yet, barely a few years after his martyrdom, his teachings travel across the then known world. Prophet Mohammed extols his message in the desert and within half a century it reverberates over three continents.

It is the men and women who believed and the men and women who gave themselves in dedication, who have built civilization and who have added to wisdom. Fortunately, we are today at a stage when each individual, wherever he may happen to live, can claim the whole of human heritage and can rise above the limitations of his own region or language. Man has the knowledge and the capacity to overcome misery and fear.

All over the world, man is coming to realize that progress or rather the contemporary description of progress, cannot bring satisfaction. Contentment does not come from conquest or from possessions or even from knowledge, but from something far more subtle and at the same time more concrete—the ability to give, to give oneself to a large cause, a large purpose. This is the season for noble thoughts and good deeds. Before I end, I would like to quote the beautiful words of Khalil Gibran :

> You have been told also that life is darkness and
> in your weariness you echo what was said by the weary,
> And I say that life is indeed darkness, save when there is the urge.
> And all urge is blind save when there is knowledge,
> And all knowledge is vain save when there is work,
> And all work is empty save when there is love ;
> And when you work with love you bind yourself to
> yourself, and to one another, and to God.
> And what is it to work with love ?...
> It is sow seeds with tenderness and reap the harvest with joy.

× × ×

श्रीमत्या इन्दिरायाः शैक्षिको दृष्टिकोणः

[विविध-भाषणानामाधारेण सङ्कलितः]

यावन्तो जनास्तावन्त एव शिक्षायाः परिभाषाविषये मतभेदाः। श्रीमतीगान्धी-महाभागाया विचारा अस्मिन् विषयेऽतिसरलाः सुस्पष्टाश्चावर्तन्त। **'जिज्ञासया सहैव शिवेषु सुन्दरेषु च विचारशक्तिस्तयोर्विषये चिन्तनात्मिका निर्णयात्मिका च शक्तिरेव शिक्षा। शिक्षा तु सैव या जनान् स्वाध्याये प्रवर्तयेत्'** इत्यासीत् तदनुसारिणी शिक्षायाः परिभाषा। वर्तमान-परिस्थितिषु त्वपरिहार्यैषा प्रवृत्तिर्यदा ज्ञानस्य परिसीमा प्रतिदिनं परिवर्तते परिवर्धते च। परिवर्तनं तस्मिंश्च नैरन्तर्यमनिवार्यम्, तेन सहास्माकीनस्य ज्ञानस्य समाहितत्वं तु कर्तव्यमेव भाविने कल्याणाय।

सा मन्यते स्म यद् 'बौद्धिकानां संवेदनात्मिकानां भावनात्मिकानाञ्च शक्तीनां विकास एव शिक्षायाः प्रमुखमुद्देश्यं येन व्यक्तित्त्वस्य विकासो भवति, सङ्कटानां निराकरणाय शक्ति-श्चायाति। अत एव प्रकारान्तरेण मानवस्य विभिन्नमानसिकशक्तीनां विकासार्थं प्रशिक्षणप्रक्रम एव शिक्षा। सा च स्वशक्तीनां मध्ये सामञ्जस्य-स्थापनार्थं मानवं प्रशिक्षयति स्वराष्ट्रं प्रति किं वा मानवतां प्रति कर्तव्यबोधञ्च जनयति। केवलं ज्ञानमेव न पर्याप्तम्, परं जीवने तस्यो-पयोगस्तथा मानवस्य व्यक्तित्त्वनिर्माणे तस्य प्रभावश्चापि महत्त्वपूर्णः।

सा ह्येकां किम्वदन्तीमुदाहरति स्म—'पर्वतास्तु सीमान्तहीनाः, स्वर्गदर्शनमपि सम्भवं ततः।' तथैव वयं सर्वेऽग्रे पश्येम, अग्र एव च सरेम। वयं स्वकार्येभ्यः कदाचिदपि न तुष्येम। अयमसन्तोषस्तु द्विविधः—एको निराशात्मकः स तु विध्वंसकः, द्वितीय आशात्मकः स्व-प्रगत्यर्थमुच्चतरप्रकर्षार्थञ्च प्रयत्ननैरन्तर्ययुक्तः। तत्रासन्तोषस्य द्वितीयप्रकार एव तस्या अभिमत आसीत्।

सा प्राचीनशिक्षाप्रणाल्याः प्रशंसिकाऽऽसीत्। तां प्रशस्यमाना सा कथितवती यत् प्राचीनकालिकाया भारतीयशिक्षायाः सङ्कल्पना श्रेष्ठतराऽऽसीद् यतः प्राचीनशिक्षाया मुख्य-मुद्देश्यमासीन् मानवस्य निर्माणं तस्य वैचारिक्याः क्रियात्मिकायाः शक्तेः परिवर्धनञ्च।

तस्या मते सामयिकमिदं यत् प्रत्येकं जने स्वपरम्परायां स्वसंस्कृत्यामास्था गर्वानु-भूतिश्च जायेत। आत्मपरिचयश्च परमावश्यकः। उच्चसिद्धान्तैः सहास्माकं समाजेऽर्थहीना-अन्धविश्वासाअसामयिक्यो रीतयश्च प्रचलन्ति। सुमनोरमपुष्पवाटिकायामपतृणवत् समुच्छेद्यास्ते दोषाः। साहसैकतोद्यमाश्च सिद्ध्यर्थमनुपालनीयाः।

पाश्चात्यशिक्षाप्रणाल्या गुणदोषौ समालोचयन्त्या तया निगदितं यद् भारते प्रचलिता पाश्चात्यशिक्षाप्रणाली तूपाधिप्राप्त्यर्थं किं वा व्यवसायप्राप्त्यर्थमेव सक्षमा। एषा प्रणाली प्रदानाद् विमुखीकरोति, ग्रहणार्थमेव चाभिमुखीकरोति। अन्येषां समुत्थानं प्रति सहयोग-प्रदानं प्रति चावहेलनादृष्टिदुष्टैषा प्रणाली। विचारेषु क्रियासु वा दानभावनयोन्नत्यर्थं नवाः सम्भावनाः प्रभवन्ति। सन्तोषं परमानन्दञ्च लभते स जनो यः स्वराष्ट्रं स्वराष्ट्रस्य जनतां वा सेवते।

शिक्षाप्रणालीं प्रत्यसन्तोषस्य भावना कतिपयवर्षेभ्यः प्रचलिताऽस्ति न केवलं भारत-वर्षेऽपि तु सर्वेष्वेव राष्ट्रेषु यतो विश्वमिदमतितीव्रगत्या परिवर्तते। संसारस्य विभिन्नेषु भागेषु सङ्घटमानैः परिवर्तनैर्नवपरीक्षणैश्च सह शिक्षाविदः शिक्षाप्रणाल्यां तथाविधं परिवर्तनं विधातुं नाशक्नुवन् यथा सा नवयुवकानां परिवर्तितानि प्रयोजनानि परिपूरयेत्। किन्त्वस्यां दिशायां प्रयत्नस्तु न त्याज्यः स तु कर्तव्य एव।

अस्मिन् विषये तस्या अभिमतमासीत् यत्—"शिक्षणविधायां शिक्षणसामग्र्यां च समुत्कर्षोऽवश्यं कर्तव्यः। अनेकासु संस्थासु प्रचलिताः पाठ्यक्रमा असामयिकाः प्रतिभान्ति तेषु संशोधनमत्या-वश्यकम्। इदं तु सत्यं यदस्माकं देशे अन्ताराष्ट्रियशिक्षाप्रणाल्यनुसारं शिक्षणोपादानानि प्राविधिकान्युपकरणानि च नोपलब्धानि किन्त्वेतदपि स्वीकर्तव्यं यद् बालकस्य पर्यावरणे यदप्युपलब्धं भवति तेन साहाय्येन तस्य शिक्षा सुगमतरा भवति। भारतीयपर्यावरणे पौंड-पैंस-साहाय्येन या गणितशिक्षा कठिनतरा प्रतिभाति सैव रूप्यकसाहाय्येन सुगमतरा भवति। तथैव सर्वेष्वपि क्षेत्रेषु शिक्षोपकरणानि बालकस्य पर्यावरणानुसारमेव भवितव्यानि।"

एवं प्रकारेण श्रीमती गान्धी साम्प्रतिकशिक्षाप्रणाल्या आलोचिकाऽऽसीत् किन्तु सेदमपि स्वीकरोति स्म यत् कतिपया असाधारणवैज्ञानिका अन्येऽपि बहवो विद्वांस इमां शिक्षाप्रणाली-मवलम्ब्यैव महतीं सफलतां प्राप्नुवन्। इत्थमिदमपि न कथनीयं यदेषा प्रणाली पूर्णरूपेणा-सफला वर्तते किन्त्वेषा तथा संशोधनीया यथा सा सर्वेभ्य एव कल्याणकारिणी भवेत्। यूनां व्यक्तित्वमेवं प्रकारेण स्रष्टव्यं येन त आत्मविश्रम्भिनो भवेयुः। स्वक्षेत्रे स्वराज्ये स्वराष्ट्रे संसारे वा घटितान् कार्यकलापान् प्रत्यधिकतरं जागरूका मानवीयानि मूल्यानि प्रति च प्रबुद्धा भवेयुः।

किस प्रकार से मनुष्यजाति वना है लेकिन अब कई चीज़ों में तो हम वहुत तेज़ आगे बढ़ें कौन समझता है कि हम चांद पर पैर रखेंगे या दूसरी जगह जाएंगे। लेकिन उसके संग जो एक-दूसरे के बारे में समझ की जरूरत है। मैत्री-भावना की जरूरत है, करुणा की जरूरत है वह चीज़ तो बिल्कुल हम लोग भूल गए हैं। अब एकमात्र है कि किस तरह से हमारा बल बढ़े, ऐसी शक्ति बढ़े कि हम दूसरे पर हावी हो सकें। ऐसी शक्ति बढ़े कि दूसरे से हम धनी हो सकें। यह जो दिशा बदल रही है इस दिशा से कैसे हम देश को हटाएं, मनुष्य जाति को हटाएं। मेरे सामने इस वक्त सबसे बड़ा प्रश्न यह है और यद्यपि इसका हमें पूरा उत्तर नहीं मिल सकता, लेकिन ज़रा भी अगर झलक है, ज़रा भी अगर इच्छा है कि इस तरफ हम आगे बढ़ें तो मैं समझती हूं कि हम आगे बढ़ पायेंगे। वैसे हमेशा कौन सा ज़माना रहा है कि जब प्रश्न नहीं रहे। एक प्रकार के नहीं तो दूसरे प्रकार के। और कौन सा परिवार है, कौन सी जाति है, कौन सा काम है जिसमें अपने प्रश्न नहीं हैं या नहीं रहे हैं? वे हमेशा रहेंगे इनको आप सुलझा लेंगे तो इनकी जगह पर दूसरे खड़े हो जाएंगे। लेकिन अगर दिशा हमारी दूर की है। अगर निगाह हमारी किसी ऊंचे आदर्श पर है तो जैसे आज़ादी के जमाने में गांधी जी ने कहा कि भई जेल जायेंगे तो कांटें आएंगे, चाहे फांसी आए, चाहे गोली आए ये सब तुम आप देखो, लेकिन इधर तुमको चलना है, चाहे कुछ हो, यह भावना किस प्रकार से हम अपने देश के सामने लाएं और इसमें हमारे प्राचीन जो आदर्श और विचारधारा हैं—वे इसमें हमें सहायता देंगे क्योंकि उनमें वह दूरदृष्टि थी वे ऐसी चीज़ें देख सकें। पता नहीं, उनके पास औज़ार थे कि नहीं। जो आजकल औज़ार के संग, जो आजकल के मेथेमेटिशियन, आजकल के फिजिशियन, आजकल के दूसरे साइंटिस्ट जिस निर्णय पर पहुंच रहे हैं वह उस जमाने में उस निर्णय पर पहुंचे थे। क्या चीज थी जिन्होंने वह दिया? उसकी खोज हमें कुछ करनी है वह ऐसी या किसी भी तरह की संकीर्ण विचारधारा से नहीं होगा। वह तो जब सारी मनुष्यजाति को हम एक मानेंगे जैसे हम मानते थे, तभी ऐसा होगा। मैं तो सोचती थी कि मैं २ ही मिनट बोलूंगी क्योंकि आपको सुनने आई थी। कुछ अधिक बोल गई। लेकिन मैं आपकी आभारी हूं कि आपने ऐसे मौके पर मुझे बुलाया। आप सबसे मिलने का अवसर दिया। इसी प्रकार अगर हम कोशिश में लगें, तो अवश्य ही हम अन्तर ला सकते हैं और एक नया भारत जो प्राचीन भारत को बिना भूले हुए हो, वैसा बना सकते हैं। फिर से मैं आप सबका आभार प्रकट करती हुं।

• इन्दिरा-वाणी •

- हिंसाया मार्गस्तु नैवास्त्यस्मत्कृते। विपरीतत्वादयं सर्वथैव त्याज्यः।
- अधिनायकतन्त्रं तु लघुकालापेक्षं प्रपञ्चं स्थायित्वं नैव भजते।
- तत्तदुद्योगविज्ञानमजानन्तो वयं किमपि कर्तुं न शक्नुमः किन्तु सर्वदैव विदेशिसहयोगस्यावलम्बनं नैवोचितम्, यत एतद् अस्मान् कर्तव्यपथादपमार्गयति जनांश्च प्रेरयति निरुद्योगिनं पन्थानमनुसर्तुम्।
- नेतृत्वे मम विश्वासो नास्ति, अहं तु समाजं तथाकर्तुं प्रयते यस्मिन् नेतृत्वस्यावकाश एव न स्यात्।
- अहं विश्वसिमि यद् इन्दिरागान्धी तिष्ठतु न वा तिष्ठतु, परं भारतीया जनता किमपि कातरतापूर्णव्यक्तित्वं स्वात्मनो नेतृत्वाय नैव स्वीकरिष्यति।
- अहमस्म्यतिक्षुद्रा नारी किन्त्वहं केषाञ्चनोद्देश्यानां सिद्धान्तानां च परिपालनाय दृढपरिकराऽस्मि। आपतितः प्रत्येकं दण्डो मम कृते शक्तिवर्धनायैव भविष्यति।
- मम जीवनं तु प्रायः पूर्णमेव, कृतं मया यथाशक्ति सर्वं करणीयं स्वराष्ट्राय। व्यक्तिरूपेणेन्दिरायाः किमपि महत्त्वं नास्ति।
- आत्मानमहं प्रधानमन्त्र्यपेक्षया स्वतन्त्रतासैनिकामेव प्रायो मन्ये।
- रक्तं मा प्रावाक्षीत्, प्रावाक्षीज्जगुप्साम्।
- मां निराकर्तुं प्रयत्नाः प्रचलन्त्येव किन्त्वहम् अन्तिमं रक्तकणं यावद् राष्ट्रस्यैकतामखण्डतां च संरक्षिष्यामि। मम रक्तस्यैकैकः कणो राष्ट्रस्य परिपोषणाय संवर्धनाय च भविष्यति।
- पूर्वं पराधीना निर्धनाः शोषिताश्च वयमद्य गौरवेणाप्लाविताः स्म। पश्यतास्माकमुपलब्धीः काश्चन हि तेषु सुमहत्तमाः।
- स्वातन्त्र्यसङ्ग्रामात् शिक्षामाप्नुवन्तो वयं पश्यामो यद् श्रमेणानुशासनेन च वयं साफल्यमवाप्तुं शक्ष्यामः। केचन सम्प्रदायाः साभिप्रायं निरभिप्रायं वा लोकं पीडयन्ति सम्प्रदायविशेषस्य नामाभिधानपूर्वकञ्च, परधर्ममुन्मूलयन्ति स्वधर्मव्याजेन। एते सन्त्यस्माकं दोषाः।

[सङ्कलयित्री—डा० अमिता शर्मा]

इन्दिरा-विचार-बिन्दवः

- अनुसन्धानं कदापि नान्तं गच्छति। शोधभूमिका जीवनदात्री वर्तते।

- धर्मो हि मूलतो वैयक्तिकी गवेषणा। इयं हि जीवने श्रद्धां जनयति। सङ्कटकाले प्रकाशं वितरति तथा चात्मपरमात्मनोरवगतये स्थितिं द्रढयति।

- धर्म इति पदेन निश्चितानि मूल्यानि क्रियाविधयश्च भवन्ति, परन्तु मदीयो विश्वासो मूल्येषु नैवापितु कर्मपद्धतिषु विद्यते।

- सर्वे महन्तो धर्मा मानवोद्यमस्य लेख-प्रमाणानि सन्ति, तान् शोधयितुमन्तः-करणमेव प्रमाणम्।

- भारतं धर्म-बहुला भूमिः। कश्चन प्रकृति-जीवयोर्विहारे धर्मं मन्यते तं च दैनिकजीवनकार्येषु, कलायां, हस्तकौशले सामाजिक-परिप्रेक्ष्य च निदर्शयन्ति।

- पुरातनकालादेवास्माकं भारतस्यायं सर्वश्रेष्ठ आदर्शोऽस्ति यद् वयं सर्वेषा-मेव धर्माणां समानेन मानेन सम्मानं कुर्मः।

- भारतीयपरम्पराया एकं विशिष्टं रूपं विद्यते यत्—"**सर्वेषां धर्माणां ज्ञान-मादि्रयते।**"

- धर्म इति पदं पुरोगतिं वर्धयति नावगतिम्।

- आञ्चलिकः सहयोग उन्नयति निरन्तरम्, नवीनाः समस्याः समादधति। सहयोग एवं कार्यंक्षमतां वर्धयति। सर्वैरैक्य-भावेन स्वातन्त्र्यस्य भावीनि कार्याण्यग्रे सारणीयानि, यतो वयं शान्ति वैभवं च लभेमहि।

[सङ्कलयिता—आचार्यो गणेशकुमारशुक्लः]

श्रद्धालोकः

[भारत-राष्ट्र-भक्ति-भावित-विश्वनेतृगणार्पित-निवापाञ्जलिभिस्तथा मान्यजनस्मारित-संस्मरणैः संवलितः]

× 卐 ×

श्रद्धा सत्यस्य धात्री सकलजनिमतां प्रीतिपात्री च दात्री,
सौख्यानामात्मतुष्टेः प्रसृति-सृति-परिष्कारीतेर्विधात्री ।
तस्या औदात्य-वृत्त्या दिशि दिशि विततः कान्तकीर्त्या समिद्धः,
'श्रद्धालोकः' स्मृतीनामतिमसृणततिं स्फोरयन् सञ्चकास्तु ॥१॥

—रुद्रदेवत्रिपाठिनः

+ 卐 +

विमर्श-वेदिका

[सम्पादकीया]

'श्रद्धया सत्यमाप्यते' इति भगवती श्रुतिः प्रतिमानवं श्रद्धां प्रति प्रेरयन्ती भूयो भूय उदघोषयत्। श्रद्धा च दाक्षिण्यादवाप्यते। दाक्षिण्यं दीक्षाधीनम्। दीक्षा च व्रतायत्ता। व्रतं किलात्मनो नियन्त्रणात् सुसिद्धयति। ये च लोक-शोक-मोचन-व्रता भवन्ति तेभ्य आत्म-नियन्त्रणमेव सर्वतो रक्षाकरं शिक्षाकरं च सम्पद्यते। सार्वजनिके जीवने ये हुतात्मानः स्वीयं सार्वत्रिकं सुखं विस्मृत्य सर्वतः स्वं देशं स्वदेश्यांश्च सेवमाना नक्तन्दिवं यतन्ते स्वदेशोन्नतये। ये प्रयस्यन्ति परितः पारवश्यप्रवृत्तीः पराकर्तुम्। ये चेङ्गयन्ति प्रत्यङ्गं पोषयितुं भारत-भारती-भारतीय-भारतीयतश्च ते श्रद्धेया एव।

'श्रद्धया देवत्वमश्नुत'-इति च तैत्तिरीयब्राह्मण-(३।१२।३।१) प्रोक्तवाक्यानुसारं न केवलं श्रद्धा परेषां तोषायैव साधीयसी भवत्यपि तु श्रद्धावतामपि कल्याणाय भवति। अत एव नान्दिश्राद्धावसरे पूजितास्तर्पिताः पितृपितामहप्रपितामहाः सश्रद्धं प्रार्थ्यन्ते यदस्माकं श्रद्धा मा व्यपगच्छेदिति। श्रद्धया देवत्वप्राप्तिर्भवतीति तत्र दिवु-धातोर्यावन्तोऽर्थाः प्रत्यक्षं विजिगीषादयो वा प्रदर्शिताः सन्ति ते सर्वेऽपि श्रद्धावतः श्रद्धया प्राप्यन्ते। इदं श्रद्धाया एव सात्त्विकं फलं विद्यते यद् भारतीयाः सर्वेभ्योऽपि स्वीयोपकर्तृभ्य आत्मनीनाः श्रद्धाः समर्प्य तद्गुणगणश्रवणपूर्वकं तत्कृतकर्मणामुपकृतिं सभाजयन्ति, कृतज्ञतामर्पयन्ति श्रद्धया च वेद-बोधितपात्रालम्भनपूर्वकप्रमीतपित्रादि—देवतोदेश्यक-द्रव्यत्यागविशेषकानि श्राद्धान्याचरन्ति। श्रद्धया श्राद्धं कुर्वतां जनानां कुले मनागपि दुःखं न भवति। यो वा वैभवानुसारेण विधिपूर्वकं श्राद्धकर्म समाचरति स मानव आब्रह्मस्तम्बपर्यन्तं जगत् प्रीणातीति ब्रह्माण्डपुराणोपदेशः। मार्कण्डेय-पुराणानुसारं च —

न तत्र वीरा जायन्ते नारोग्यं न शतायुषः।
न च श्रेयोऽधिगच्छन्ति यत्र श्राद्धं विवर्जितम्॥

इति संस्मृत्य संस्मृत्य स्वर्गीयप्रधानमन्त्रि-श्रीमतीन्दिरागान्धिमहाभागायाः प्रथमां वार्षिकीं पुण्यस्मृतिमभिलक्ष्य 'वाक्यपुष्पाञ्जलि'-स्वरूपमात्मनो देशस्य सार्वदिक-सार्वत्रिक-सार्वभौम-श्रेयसे शाब्दिकश्राद्धमिदं **'श्रद्धालोक'**-माध्यमेनाचरामः। यतः —

'श्राद्धं स्याच्छ्रद्धया युतम्'

इति निर्दिष्टमेव स्मृति-शास्त्रपारदृश्वभिः पराशराचार्यचरणैः। अत्रास्मिन्नालोके मान्यानां श्रीमतीन्दिरागान्धी-महाभागानां प्रेरणाप्रदानि भाषणानि, कानिचित् संस्मरणानि तथा विदुषां काव्य-निवापाञ्जलयश्च सश्रद्धमुपहृताः सन्तीति सन्ततं सन्तु सन्तोषाय।

—सम्पादकः

श्रीमत्यै इन्दिरा-गान्धिमहोदयायै समर्पितः

भारतसर्वकारस्य श्रद्धाञ्जलिः

भारतसर्वकारो दिवङ्गतायाः श्रीमत्याः इन्दिरागान्धि-महोदयाया निधनमधिकृत्य राजपत्रस्थकृष्णरेखांकितांशेऽधिसूचनाम्प्रसार्य तस्यै श्रद्धाञ्जलिमार्पयत्। सम्पूर्णेयमधिसूचनेत्थमस्ति —

भारतस्य महानेत्र्याः प्रियप्रधानमन्त्रि-महोदयायाः श्रीमत्या इन्दिरागान्धिमहाभागायाश्चतुरशीत्यधिकैकोनविंशतिशततमे खिष्टाब्देऽक्टूबरमासस्यैकत्रिंशत्तारिकायाञ्जातामेनान्निर्घृणहतिमधिकृत्य निखिलमपि राष्ट्रङ्गभीररूपेण शोकाकुलन्दुःखनिमग्नञ्चास्ति। श्रीन्दिरागान्धिमहोदया यशस्विनं स्वपितरं श्रीमन्तञ्जवाहरलालनेहरूमहोदयमिव न केवलम्भारतस्यैवाऽऽसीदपि तु निखिलायाश्चापि मानवजातयाः। अस्या निधनेन जगदिदमेकं समुत्कृष्टं राष्ट्रनेतारम्पर्यभ्रंशयत्।

श्रीमत्या इन्दिरागान्धिमहोदयाया जनिः सप्तदशाधिकैकोनविंशतिशततमे खिष्टाब्दे नवम्बरमासस्यैकोनविंशतितमे दिनांके प्रयागे समभूत्। श्रीमत्या गान्धिमहोदयाया बाल्यं श्रीमतां महात्मनां गान्धिमहोदयानां श्रीमताम्मोतीलालनेहरूमहोदयानां श्रीमताञ्जवाहरलालनेहरूमहोदयानान्तथा चान्येषाम्भारतीयस्य स्वतन्त्रतासंग्रामस्य महतान्नेतृणाञ्छायायां व्यतिचक्राम। बाल्यादेव श्रीमती गान्धी राष्ट्रिये स्वातन्त्र्यसंग्रामे सक्रियम्भागञ्जग्राह। त्रिंशदुत्तरैकोनविंशतितमे खिष्टाब्दे स्वातन्त्र्य—सैनिकानां साहाय्यार्थं श्रीमत्या बालानां बिग्रेडनामकं वानरसैन्यमपि संगठितम्।

विंशत्युत्तरैकोनविंशतिशततमखिष्टाब्दस्य दशाब्द्याश्चरमवर्षेषु भवत्याः शिक्षा यूरोपदेशे सम्पन्ना समभूद् यत्र भवत्या जननी चिकित्सायै समगच्छत्। तदनन्तरञ्च भवत्या पुण्यपत्तने मोहमय्याञ्च शिक्षा समधिगता। चतुस्त्रिंशदधिकैकोनविंशतिशततमे खिष्टाब्देऽत्र भवती श्रीरवीन्द्रनाथठाकुरमहोदयस्य विश्वभारतीतिप्रसिद्धायां संस्थायां प्रवेशञ्जग्राह। परङ्कतिचनमासानन्तरमेव स्वीयया रुग्णमात्रा सह यूरोपगमनपारवश्याद् भवत्यै विश्वभारती-संस्थायास्त्यागो नितरामपरिहार्यः संवृत्तः, संस्था चेयं परित्यक्ता भवत्या। षट्त्रिंशदुत्तरैकोनविंशतिशततमे खिष्टाब्दे स्विट्जरलैण्डदेशे लांजेननगरे श्रीमती कमलानेहरूमहोदया दिवङ्गता। सप्तत्रिंशदुत्तरैकोनविंशतिशततमे खिष्टाब्दे श्रीमती इन्दिरागान्धिमहोदया आक्सफोर्डविश्वविद्यासोमरविलमहाविद्यालये प्राविशत्।

श्रीमत्याः पितुः श्रीजवाहरलालनेहरूमहोदयस्य कारागारतः श्रीमतीम्प्रति लिखितानि पत्राणि भवत्याः बौद्धिकञ्जीवनं सर्जनात्मकतया प्रभावयामासुः। यानि पत्राणि पश्चात् "पितुः पत्राणि पुत्र्यै" इति नाम्ना "विश्वैतिह्यदिग्दर्शनम्"—इति नाम्ना च प्रकाशितानि समभूवन्। तानि श्रीजवाहरलालनेहरोः पत्राणि श्रीमत्यां कौतूहल-प्रवृत्तिम्प्रबोधयामासुः। या कौतूहलप्रवृत्तिः श्रीमत्याः गवेषणाजिज्ञासयोः भावनां विकसिताञ्चकार। एतत्फलतः श्रीमतीगान्धिमहोदया विश्वसभ्यतायाः परमसमृद्धेः सदुत्तरान्धिकारिणी संवृत्ता परं सहैव भारतीयया संस्कृत्या सहापि पूर्णतः सन्नद्धाऽस्थात्।

अष्टत्रिंशदधिकैकोनविंशतिशततमे खिृष्टाब्दे भवती भारतीयराष्ट्रियकाङ्ग्रेससभायाः सदस्यतामध्यगच्छत्। एकचत्वारिंशदधिकैकोनविंशतिशततमे खिृष्टाब्दे मार्च-मासस्य षड्विंशतितमे दिनांकेऽत्र भवत्याः पाणिग्रहणसंस्कारः श्रीमता फिरोजगान्धिमहोदयेन सह सुसम्पन्नं समभूत् यः श्रीफिरोजगान्धिमहोदयः स्वयमेको वीरः स्वातन्त्र्य-सेनानीरासीद् सुबहुभ्यो वर्षेभ्यश्चात्र भवत्याः श्रीमत्याः गान्धिमहोदयायाः परिवारस्यापि सुपरिचितश्च। द्विचत्वारिंशदुत्तरैकोनविंशतितमे ख्रिष्टाब्देऽगस्तमासेऽखिल-भारतीय-काङ्ग्रेस-परिषदोऽधिवेशने भवती सम्मिलिता यस्मिन्नधिवेशने सुप्रसिद्धः सङ्कल्पः ("भारत छोड़ो)" "भारतन्त्यजत" इति नामधेयोऽपार्यत। एतदनुपदमेव भवत्यधिगृहीता कारागारञ्च प्रहिता। त्रिचत्वारिंशदुत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे मईमासे भवती कारागारतो विमुक्ता समभूत्। चतुश्चत्वारिंशदुत्तरैकोनविंशतिशततमे ख्रिष्टाब्देऽगस्तंमासेऽत्रभवत्याः प्रथमः पुत्रः श्रीराजीवगान्धिमहोदयोऽजीजनत्। भवत्याः द्वितीयोः पुत्रः श्रीसञ्जयगान्धिमहोदयश्च षट्चत्वारिंशदुत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे दिसम्बरमासे जनिंल्लेभे।

सप्तचत्वारिंशदुत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे भारतस्य स्वतन्त्रताधिगतौ श्रीमत्याः सार्वजनिकजीवनस्य नूतनोऽध्यायः प्रारभत। भवत्या प्रधानमन्त्रिणो निवासस्थानव्यवस्थायाः सञ्चालनोत्तरदायित्वन्निर्व्यूढम्। एतदतिरिक्तमत्रभवती सामाजिकेषु बालकल्याणकार्यक्रमेषु चापि पूर्णतस्तत्परताम्भेजे। सुमहत्त्वपूर्णाः राजनीतिकीः सुभूमिकाः निर्वोढुम्भवती सत्वरमेव कांग्रेस-परिषदम्प्रति समाकृष्टा समभूत्, या परिषद् भवत्याः बाल्यादेव राजनीतिकङ्क्षेत्रमासीत्। भवती प्रथमम्पञ्चपञ्चाशदुत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे कांग्रेसकार्यकारिण्याः सदस्या समजायत, तदनन्तरञ्चाष्टपञ्चाशदुत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे केन्द्रीय-संसदीयायोगस्यापि सदस्या संवृत्ता। एकोनषष्ट्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे श्रीमती भारतीयराष्ट्रियकांग्रेसपरिषदोऽध्यक्षत्वेन निर्वाचिताऽभूत्। भवती भारतीयाः सामाजिकीर्मूलसमस्याः समधिकृत्य कांग्रेसपरिषदो विचारैभ्यः कार्येभ्यश्च नूतन-दृष्टिकोणम्प्रायच्छत्, राष्ट्रस्यास्य कर्मणि च यूनोऽनुप्राणयत्।

चतुष्षष्ट्युत्तरैकोनविंशतिशततमे खिृष्टाब्देमई-मासे यदा पण्डितः श्रीजवाहरलालनेहरूमहोदयो दिवङ्गतस्तदानीं साग्रहं श्रीलालबहादुरशास्त्री स्वीये मन्त्रिमण्डले सूचनाप्रसारणमन्त्रिपदं श्रीमत्यै गान्धिमहोदयायै प्रायच्छच्छ्रीमती गान्धिमहोदया च सूचनाप्रसारणमन्त्रिपदम-

लङ्कृतवती । पञ्चषष्ट्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे तमिलनाडु-प्रदेशेऽतिसुव्यापकरूपेण भाषामधिकृत्य जाते ह्युपद्रवे श्रीमती इन्दिरागान्धिमहोदयाऽनुपदमेव तत्रागच्छत् स्वीयेन व्यावहारिकेण कौशलेन प्रतिभया नीतिनैपुण्येन च तत्रत्यानां समुत्तेजिताः भावनाः समुपसान्त्वयामास स्थितिञ्च नियन्त्रितवती । षट्षष्ट्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे जनवरीमासस्यैकोनविंशतितमे दिनाङ्के श्रीलालबहादुरशास्त्रिणि दिवङ्गते श्रीमती कांग्रेससंसदीयदलस्य नेतृपदे निर्वाचिता समभूत्, षट्षष्ट्युत्तरैकोनविंशतिशततमे ख्रिस्टाब्दे जनवरीमासस्य चतुर्विंशतितमे दिनाङ्के च श्रीमत्यै भारतप्रधानमन्त्रिपदस्य प्रतिज्ञा प्रादायि । श्रीमती भारतप्रधानमन्त्रित्वेन सप्तसप्तत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे मार्चमासं यावद् देशस्यास्य नेतृत्वन्न्यभालयत् । सप्तषष्ट्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे सार्वजनिकनिर्वाचने स्वदलाय साफल्यं प्रदाप्य भवत्या कांग्रेसपरिषदि प्रगतिशीलतया सामाजिकार्थिकनीतिस्वरूपेण च नैके समारम्भाः विहिताः । पूर्वप्रचलितां स्थितिमधिकृत्य स्वार्थितत्त्वानां विरोधतश्च भवत्याः सङ्घर्षफलतश्च सुतीक्ष्णाः सैद्धान्तिकाः विवादाः समुत्पन्नाः, फलतश्चैकोनसप्तत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे कांग्रेसपरिषदो विभाजनं संवृत्तम् । तदा सुविपुलसङ्ख्यायां कांग्रेसपरिषत्सदस्याः महिलाश्च श्रीमत्या सहैवाऽऽसन् । एकसप्तत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्देऽत्र भवती सार्वजनिकनिर्वाचने निर्णायकेन बहुमतेन पुनः सत्तां समध्यगच्छत् । यत् सत्तायां पुनः प्रत्यागमनं तथ्यस्यास्य दीप्तिमदुदाहरणमस्ति यदिह जनतया भवत्याः नीतिनिर्णयाः सुसमर्थिता इति ।

पञ्चसप्तत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे जूनमासे विवशीभूय भवत्या संविधानसम्मतायाः सत्तायाः परावर्तनभयमपोहितुन्देशेऽत्राऽऽन्तरिकाऽऽपातस्थितेर्घोषणा व्यधायि । सप्तसप्तत्युत्तरैकोनविंशतिशततमख्रिष्टाब्दस्य समारम्भ एव भवती लोकसभायै सार्वजनिकनिर्वाचनमुदघोषयत् । यस्मिन्निर्वाचने कांग्रेस-परिषत् पराजिताऽभूत् । सप्तसप्तत्युत्तरैकोनविंशतिशततम-ख्रिष्टाब्दतोऽशीत्युत्तरैकोनविंशतिशततमख्रिष्टाब्दं यावद् यदा श्रीमती सत्तायाः बहिरासीत्, तदा भवत्याः विरुद्धं विहितेषु सर्वथाऽत्याचरणेषु निन्दायाः सुनियोजितेष्वभियानेषु च जनतया भवत्याः सर्वथाऽदमनीयः सत्साहसः समन्वभावि । भवत्याः सपरिवारायाश्चापयशांसि प्रथितुन्न किमपि नैयून्यन्तत्कालिकेन शासनेनाऽऽरक्षितम् । अतितुच्छानि चापि तथ्यान्याश्रित्य भवत्याः विरुद्धमभियोगाः सञ्चालिताः । भवत्येतादृग्भिरध्यारोपैरधिगृह्य कारागारम्प्रहिता ये सर्वेप्यारोपाः न्यायिकान्वेषणानन्तरमसत्याः संसिद्धाः । यद्यप्येकस्मिन्नुपनिर्वाचने भवती लोकसभायै निर्वाचिता समभूत्तथापि मतदातृनिर्णयम्पूर्णंतोऽवमत्य लोकसभासदस्यपदतोऽपि वञ्चिता । श्रीमत्या स्थितिरियं सर्वथा निर्विकारभावेन वीरतापूर्वकञ्च सोढा । पददलितानां समुत्पीडितानाञ्च सामाजिकानां पुष्टिङ्कृतवती । तेषु दिनेष्वत्र भवती यत्र कुत्रचिदप्यगच्छत् तत्रैव लक्षशः कोटिशश्च जनाः भवतीम्प्रति स्वीयं स्नेहभावं स्वीयां सत्कृतिम्भवत्याः नेतृत्वे स्वीयं विश्वासञ्चाभिव्यङ्क्तुं यूथशोऽभ्याजग्मुः । अशीत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे जनवरी-मासे सार्वजनिकनिर्वाचने जनता भवतीं विपुलेन बहुमतेन भूयोऽपि सत्तायामानीतवती ।

कांग्रेसपरिषदो मूलसिद्धान्तान् प्रति जनवादिधारणाम्प्रति भवत्याः सुदृढसङ्कल्पपार-

वर्श्यादष्टसप्तत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे प्रारम्भ एव स्वपरिषदि भूयोऽप्येकं विभाजनं सोढम् ।

इन्दिरागान्धिमहोदयायाः नेतृत्वस्य महत्त्वपूर्णेषु भारतीये समाजे सुमहत्परिवर्तनमभवत् । श्रीनेहरूयुगस्य मूलनीतीः कूटनीतीश्च यथावत् परिरक्षन्ती भवती राष्ट्रिये विचारमञ्चे निर्धनताविषयाय प्रमुखं स्थानञ्च प्रयच्छन्ती राजनैतिकम्पर्यावरणमेव पर्यवर्त्तयत् । समतावादिनीं समुचितां समाजव्यवस्थाम्प्रति भवत्याः वचनवद्धतः तास्वैतिहासिककार्यश्रृंखलासु परिलक्ष्यते यासां समारम्भो धनागाराणां राष्ट्रियकरणेन राज्ञाङ्कृते प्रदीयमाननिर्धारितद्रव्यप्रदानप्रक्रियोन्मूलनेन चाभून् । अस्याः प्रक्रियायाः सुपरिणतिः विंशतिसूत्रात्मकस्य कार्यक्रमस्य निर्माणे तत्कार्यान्वियेन चाभवत्, यत्र श्रीमत्या निर्धनवर्गस्य स्थितिशोधनकर्मणि विशेषतः समवधत्तम् ।

राष्ट्रस्यैकतार्थमखण्डतायै च श्रीमती स्वप्रयासेषु सातत्येन तत्पराऽऽसीत् । श्रीमती संविधानस्य धर्मनिरपेक्षताऽऽदर्शानां सुदार्ढ्येन समर्थिकाऽभूत् । भवती स्वल्पसङ्ख्यकानाञ्जनानां सामाजिकार्थिकाभ्युत्थानार्थमहर्निशङ्कार्यमकरोत् । तेषाङ्कल्याणाय श्रीमत्याः सुव्यग्रता चिन्ता च तेषान्धार्मिकाधिकाराणां सांस्कृतिकाधिकाराणां शैक्षणिकाधिकाराणाञ्च रक्षायै जीविकावसराणाम्परिवृद्ध्यै च सर्वकारेण विहितैः विशेषोपायैः प्रकटीभवति । श्रीमत्या साम्प्रदायिक्याः हिंसायाः परिसमाप्त्यै भृशं सङ्घर्षो व्यधायि । यां साम्प्रदायिकीं हिंसाञ्च भवती "भारतनाम्नि कलङ्करेखां" व्याजहार ।

आधुनिक्याः ह्यात्मनिर्भरतायाः प्रगतिशीलायाः ह्यर्थव्यवस्थायाश्च भवत्या विहिता परिकल्पनैका, सा परिकल्पनैव भारतीयकृषिक्षेत्रे, भारतीयोद्योगक्षेत्रे, विज्ञानक्षेत्रे च सञ्जाततीव्रप्रगतिरूपेण साकारतामगात् । कृषिक्षेत्रे जातया प्रौद्योगिक्या क्रान्त्याऽस्माकं राष्ट्रं खाद्यान्नविषये सर्वथाऽऽत्मनिर्भरतामाबिभर्ति । साफल्यमेतदेतादृशमस्ति यत् केचन सर्वथाऽसम्भवममन्यन्त । योजनाप्रक्रियायाम्भवत्याऽऽधुनिकतायाः योऽयं सुशक्तिशाली योगः प्रादायि तस्मादेवास्माकमौद्योगिकी संरचना ह्येकं सुव्यापकमाधारमाश्रित्यैव सुस्थिराभूत् । विशेषतश्चोर्जायाः क्षेत्रेऽस्माकमाधारभूता संरचना सुदृढा विकासशीला चाभूत् ।

श्रीमत्याः कार्ययोजनायां कृषकाणां श्रमिकाणाञ्च कल्याणमुच्चप्राथम्यमध्यगच्छत् । कृषिकर्मकर्तृभ्यो कृषिभूमिदानङ्कृषिश्रमिकाणां स्थितिशोधनार्थञ्च सुचिरं यावत् सत्फलदानि संशोधनानि विहितानि । लघुकृषकाणाङ्कृते सीमान्त-कृषकाणाञ्च कृते स्वीकृतकार्यक्रमपरिपाकत्वेन सुविपुलोत्पादकतया समधिकलाभाधिगत्या च भूयान् लाभोऽजायत । श्रीमत्या सन्नेतृत्वे कृषकवर्गो ऋणान्याधुनिकानि कृषिसम्बन्धीन्युपकरणानि चाध्यगच्छत् । लाभदानि मूल्यान्यपि निर्धारितानि यैः समधिकरूपेणोत्पादनाय वास्तविकम्प्रोत्साहनं कृषकैरधिगतम् ।

श्रीमत्यास्तीव्रोद्योगीकरणनीतिपारवश्यादेव श्रमिकवर्गो बृहत्सामाजिकशक्तित्वेनोन्नतिमगात् । अत्रभवत्याः प्रेरणयैव प्रजावर्गोऽर्थव्यवस्थाक्षेत्रेऽपि सुपर्याप्तरूपेण समुन्नतं स्तरमवाप्नोत्; श्रमिकाणाञ्च सर्वाः समस्या अधिकृत्य भवत्याः सामाजिकरूपेण प्रगतिशीलदृष्टिकोण-

प्रभावतोऽत्र समधिकाः श्रमिकाः समधिकं लाभं समधिजग्मुः। भारतदेशोऽप्यन्तेषु केषुचिद् विकासशीलेषु देशेषु वर्त्तते, येषु ह्येतादृशी श्रमिकनियमव्यवस्थास्ति या श्रमिकाणामधिकारान् संरक्षते, तेभ्यश्च स्वकौशलाभिवृद्धयै लाभाभिवृद्ध्यै च साहाय्यमपि प्रयच्छति।

सङ्कटपूर्णेऽप्यन्ताराष्ट्रियेऽर्थव्यवस्थावातावरणे भारतीयाऽर्थव्यवस्था स्वीयैरेव साधनै-र्विकासाय शक्ति स्थायित्वञ्चाप्नोत्। श्रीमत्याः साफल्यन्तथ्येनानेनाऽऽकलयितुं शक्यते यदि-दम्भारतं विश्वव्यापिनि मूल्यह्रासे मन्दतायाश्च कष्टपूर्णे समयेऽपि समुत्पादनेऽद्भुतमाकलमं संरक्षितुमपारयत्। समायोजनस्य विश्वव्यापिन्या प्रक्रिययाऽपि नात्र काचिदपि बाधोपा-तिष्ठत्। आत्मनिर्भरतायै विहितेऽस्मिन्महति प्रयासे श्रीमत्या सुतीव्रा गतिः सुदृढादृतिश्च प्रादायि।

भारतीयं विज्ञानम्प्रति औद्योगिकीम्प्रति च श्रीमती सर्वदैव कृतसङ्कल्पाऽऽसीत्। इदमेव बीजमस्ति, यदिहास्माकं वैज्ञानिकेषु शिल्पवैज्ञानिकेषु च रचनात्मकानुसन्धानविषये समुल्लेखनार्हैका प्रवृत्तिः प्रोन्नताऽभूत्। आधुनिकविज्ञानस्य प्रत्येकस्मिन् क्षेत्रे विशेषतश्च परमाणूर्जायाः ह्यन्तरिक्षविज्ञानस्य शान्तिपूर्णोपयोगक्षेत्रे च भारतमिदमेतादृक्शक्तित्वेन प्रोन्नतं संवृत्तं यथाशक्ति प्रौद्योगिक्याः परिखामिमाम्पूरयितुं समर्थञ्च वर्त्तते। श्रीमती वैज्ञानिकान् नवायामाऽधिगत्यै सातत्येन प्रोत्साहयामास। प्रोत्साहनस्यास्य परिपाकत्वेन वैज्ञानिकक्षेत्रे नैकेऽभिनवाः शोधाः समपद्यन्त। यदा प्रभृति श्रीमती इन्दिरागान्धिमहोदया देशस्यास्य नेतृत्व-मधिचक्रे, ततः प्रभृति स्वल्पीयस्यप्येतस्मिन् समय एव महासागरस्य विकासोऽण्टार्कटिकायाश्चा-न्वेषणयात्रा तथ्यमिदम्प्रकटीकुरुते यदत्र विकासविषयेऽस्माभिः कियती प्रगतिर्विहितेति। श्रीमत्याः धारणामनुसृत्य विज्ञानम्प्रौद्योगिकी चेह जनतायाः समुन्नतेः साधने स्तः।

अविवेकपूर्णेनाऽऽर्थिकेन विकासेन जायमानाः क्षतीः प्रति संवेदनशीला सती श्रीमती तासु विरलास्वन्ताराष्ट्रियासु विभूतिष्वासीत्, याभिः मानवतायाः भविष्यति पर्यावरणस्य महत्त्वमवबुद्धन्तदर्थञ्च दाढ्येंन प्रयतितम्। भवती भारतीयायाः प्राचीनसंस्कृतेः सुदूरदर्शिता-मन्तर्दृष्टिञ्चावबुध्य द्विसप्तत्युत्तरैकोनविंशतिशततमे खिष्टाब्दे स्टॉकहोमाख्ये स्थाने जाते मानव-पर्यावरणविषयके संयुक्तराष्ट्रसम्मेलने स्वीये भावभरिते भाषणे सुस्पष्टीचकार, यत् "प्रकृतेरविवेकपूर्णमपहरणम्" कं सीमानं यावन्मानवतायाः सद्भविष्यद्विघातकं भवितुमर्हति, भवती विकासस्यैतादृशः पथः पक्षं पर्यपोषयत्, यत्र पुरुषः प्रकृत्या सह तादात्म्यमास्थाय वस्तु-मर्हति। वयन्तथ्यस्यास्य कृतेऽत्र भवत्याः सर्वथाऽधमर्णतामावहामो यद् भवत्या सन्मानवास्ति-त्वाय स्ववनानि, नदीः, सरांसि, आकाशम्, वन्यान् प्राणिनश्च संरक्षितुं वयं सावधानीकृताः।

निःसंशयमेतद्वक्तुं शक्यते, यदत्र न किमप्येतादृशं सर्जनात्मकङ्कार्यमस्ति, यत्र भवत्या रुचिर्नैव गृहीता स्यात्, तत्कार्यंराजनीतिकमार्थिकं वैज्ञानिकं सांस्कृतिकं वा किमपि भवेत् तत्सर्वम्भवती सरुचिग्राहं समृद्धयामास। देशस्यास्य परम्पराम्प्रति सांस्कृतिकमान्यताः प्रति च भवत्याः वचनबद्धताऽक्षुण्णाऽऽसीत्। एतत्फलस्वरूपेण कलाः, हस्तकलाः, रङ्गमञ्चो नृत्यानि सङ्गीतानां सर्वाश्चापि विद्याः प्रबलं समर्थनमलभन्त। पञ्चषष्ट्युत्तरैकोनविंशति-

शततमख्रिष्टाब्दतः समारभ्य चतुःसप्तत्यधिकैकोनविंशतिशततमं ख्रिष्टाब्दं यावद् भवती सङ्गीत-नाटकायोगस्याध्यक्ष्यम्भेजे । दक्षिणभारते हिन्दीप्रचारसभाया अध्यक्षात्वेन भवत्या सङ्गीत-नाटकायोगस्य कार्ये समधिका रुचिर्गृहीता । बौद्धिकक्षेत्रे स्थायिरूपेण योगदानमधिकृत्यात्र भवती देशस्थेभ्यो विश्वविद्यालयेभ्यो विदेशस्थेभ्यो विश्वविद्यालयेभ्यो वैज्ञानिकायोगेभ्यश्च डॉक्टरेडिति नामधेयाः सदुपाधीः समवाप्नोत् । परिवारनियोजनक्षेत्रे समुत्कृष्टकार्यमधिकृत्य भवत्यै त्र्यशीत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे संयुक्तराष्ट्रजनसङ्ख्या-पुरस्कारः प्रादायि ।

भवत्याः बहुमुखीषु कार्यप्रवृत्तिषु विकलाङ्गानाङ्कल्याणकार्याय भवत्या व्यक्तिगत-रूपेण सुविशिष्टम्महत्त्वम्प्रदत्तम् । अन्धेभ्यो विकलाङ्गेभ्यश्च भवती नैकान् कार्यक्रमान् प्रारभत । कुष्ठरोगचिकित्सायै एकन्देशव्यापि समान्दोलनम्प्राचालयत् । विकलाङ्गेभ्यः श्रीमत्या या समभिरुचिः प्रदर्शिता तया तेषु सदाशामयूखा दृग्गोचरीबभूवुः ।

सौविध्यहीनवर्गाणामभ्युत्थानार्थम्भवती सततं प्रायतत । अनुसूचितानाञ्जातीनाङ्कृते अनुसूचितानाञ्जनजातीनाङ्कृते अनुपलब्धप्रगतीनां वर्गाणाङ्कृतेऽन्येषान्निर्धनानां वर्गा-णाञ्च कृते आर्थिकाभ्युत्थानाय सामाजिकोत्थानाय च भवती नैकान् स्थायिकार्यक्रमान् निर्ममे, ये कार्यक्रमाः साम्प्रतमस्माकं 'निर्धनतामपाकुरुत'' इत्यादिकानां राष्ट्रियकार्यक्रमाणामभिन्ना-ङ्गताङ्गताः । महिलानामधिकारार्थन्तासां सामाजिक्यायार्थिक्यै च प्रगत्यै भवत्या सामुदायिकी चेतना प्रबोधिता ।

पर्वतान् प्रति श्रीमत्याः इन्दिरामान्धिमहोदयायाः सुविशिष्टोऽनुराग आसीत् । पर्वतीयान् जनान् प्रति तेषां विशिष्टां जीवनप्रणालीम्प्रति च श्रीमत्याः सहानुभूतिरासीत् । एतदेव बीजमस्ति यत् पर्वतीयानां विकासाय कार्यक्रमाः विनिर्धारिताः । श्रीमती भारतस्य सुदूरस्थेषु स्थानेषु ययौ येष्वस्माकं बाह्याः द्वीपाश्चापि सम्भूयन्ते । तत्र श्रीमत्या उद्देश्यमिदमासीद् यदिमे पार्थक्येन स्थिताश्चापि समुदायाः ह्येकस्यां राष्ट्रियजीवनधारायां सम्मेलनीया इति । इमे पर्वतीयाः सर्वदैव श्रीमतीं स्वीयामेव मन्यन्ते स्म । श्रीमतीन्दिरागान्धिमहोदया ह्येतेषाङ्कल्याणाय सत्य-निष्ठापूर्वकं समर्पिता समभूत् कृतज्ञता चैभिः श्रीमत्यै निःसीमः स्नेहभावोऽदायि ।

इन्दिरागान्धिमहोदया स्वयमपि राष्ट्रियस्वातन्त्र्यान्दोलनस्यैव फलमासीत् । श्रीमती स्वातन्त्र्यसैनिकैर्विहितान्देशस्य सत्सेवां स्पष्टरूपेण मान्यतया सभाजयामास ।

श्रीमत्या यूनाङ्कल्याणकर्मसु सुपर्याप्तरूपेण समयः प्रदत्तः, शक्तिश्चापि समर्पिता । श्रीमत्येतदर्थं समुत्सुकाऽऽसीद्यदत्र भारतीयो युववर्गः क्रीडासु समुत्कृष्टतामधिगच्छेदिति । भारते ह्येशियादीनां क्रीडानां समायोजनस्य स्वीयाः प्रतिज्ञाः पूरयन्त्यै दिल्ल्यां सर्वथाऽऽधुनिकतमा-नाङ्क्रीडाभवनानाङ्क्रीडाङ्गणानाञ्च स्थापनायाः व्यवस्थान्तराणां व्यवस्थापनस्य च श्रेयः श्रीमत्यै प्रदीयते यदन्येषां सुबहूनाम्महानगराणाङ्कृते स्पर्धाविषयताङ्गच्छति । क्रीडानां विकासार्थं श्रीमती यत् सततम्प्रोत्साहनम्मार्गनिर्देशनञ्च कृतवती तदर्थं श्रीमत्यै समुचितरूपेण त्र्यशीत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्देऽन्ताराष्ट्रियौलम्पिकपरिषदो गोल्डआर्डराख्यः समादरः प्रादायि ।

यावद्राष्ट्रियसुरक्षायाः प्रश्नोऽस्ति, श्रीमती सर्वदैवाऽस्माकं रक्षासैन्यस्याऽऽधुनिकीकरणस्याऽऽवश्यकतां प्रति सावधानाऽऽसीत्, येन सुरक्षायाः पतनशीलेऽपि वातावरणेऽस्माकं सैन्यानि नवाऽऽवाहनानि प्रतिरोद्धुं प्रभवेयुरिति । श्रीमती इन्दिरागान्धिमहोदयास्मिन् संवेदनशीले परममहत्त्वपूर्णे च क्षेत्रे भारतं स्वात्मनिर्भरीकर्त्तुमस्माकं स्वदेशीयान् प्रयासान् समेधितुञ्च भृशम्प्रायतत । अस्माकं रक्षाव्यवस्थाया औद्योगिकोन्नतिसम्बन्धिनीतीनाम्भवत्याः सशक्तेन समर्थनेनैवाद्य भारतीयानि सशस्त्रसैन्यानि राष्ट्रस्यास्य सर्वथाऽखण्डतां संरक्षितुं पूर्णरूपेण समर्थानि सन्ति । परम्भवती शस्त्राणां विकासातिरिक्तं तान् सैनिकांश्चाप्यचिन्तयद् ये शस्त्राणि प्रयुञ्जते । अस्माकं सैनिकानां सेवानियमशोधने तेषाम्मनोबलस्य प्रोन्नयने च श्रीमती सुव्यापकरूपेण नीतीः सूत्रयामास । भूतपूर्वसैनिकानां समस्याः समधिकृत्य भवती कियती चिन्तिताऽऽसीदिति तैः नैकैः सदुपायैः सर्वथा स्पष्टीभवति; ये सदुपायाः सर्वकारेण तेषां जीविकासंशोधनार्थं विहिताः ।

नैकासूपलब्धिषु विशेषरूपेण संस्मरणीयं श्रीमत्यास्तदत्युत्कटं शौर्यं समुत्कृष्टं राजनैतिकङ्कौशलञ्चास्ति यच्छ्रीमती बाँग्लादेशसङ्घर्षसमाधाने ह्येकसप्तत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे प्रादर्शयत् ।

श्रीमतीन्दिरागान्धिमहोदया निखिलायाश्चापि मानवजातेः सदाकाङ्क्षाणाम्प्रतीकभूताऽऽसीत् । श्रीमती राष्ट्रसङ्घाऽऽदर्शान् प्रति तस्य निदर्शकस्य सिद्धान्तान् प्रति च सर्वथा समर्पिता बभूव । अत्रभवती शान्त्याः पूर्णतो निरस्त्रीकरणस्य च समर्थकेषु विश्वस्य प्रमुखतमेष्वग्रगण्याऽऽसीत् । श्रीमत्येतादृश्या अन्ताराष्ट्रियव्यवस्थायाः समर्थिकाऽऽसीद्यस्यां शक्तेर्दयाभावस्य च सामञ्जस्यं स्यात्, ज्ञानक्षमते च मानवसेवाम्प्रति सर्वथा समर्पिते स्याताम् । श्रीमती परतन्त्राणान्देशानां स्वातन्त्र्यस्य प्रबलरूपेण समर्थिकाऽऽसीत् । यथा तत्पिता तथा श्रीमत्यपि सर्वथा सर्वविधशोषणेभ्यो विरुद्धा बभूव । अत्र भवती राजनैतिकानि सैनिकानि घटनबन्धनानि विश्वशान्तये बाधकान्यमन्यत । राष्ट्रेषु परस्परार्थिकानि वैषम्याणि न्यूनीकर्त्तुम्प्रयत्नपरेष्वप्यग्रगण्या श्रीमत्येवाऽभूत् । श्रीमती समूहनिरपेक्षाऽऽन्दोलनस्याप्यान्दोलकेष्वग्रगण्या व्यराजत् यदान्दोलनाय चास्मै भवत्यैव सार्थकतागतिशीलतासम्बद्धता च प्रादायि । त्र्यशीत्युत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे मार्चमासे नवेन्प्रद्रस्थे सम्भूते तस्य समूहनिरपेक्षशिखरसम्मेलनस्य सप्तमाधिवेशने भवत्याः सन्निर्वाचनन्तदध्यक्षपदे समभूत् ।

श्रीमती इन्दिरागान्धिमहोदया भयेभ्योऽभयदाऽऽवाहनेभ्यश्च न कदाचिदपि पराङ्मुख्यभूत् । सुमहाभयावसरेषु, ते स्वीयाः स्युः राष्ट्रिया वा, श्रीमत्या सर्वदैव तत्र सर्वथादम्ये शौर्यधैर्ये परिचायिते । श्रीमती कोटिशो जनान् प्रत्यगछच्त्तेभ्यश्च साहसं प्रायच्छत् । तेभ्यो जीवनसम्बलञ्चापि समभ्यगच्छत् ।

श्रीमती कोटिशो देशवासिभ्योऽतुलनीयं समादरभरं समवाप्नोत् । एतदुपलक्ष्य राष्ट्रमिदं श्रीमतीं द्विसप्तत्यधिकैकोनविंशतिशततमे ख्रिष्टाब्दे स्वीयेन सर्वोत्तमेन भारतरत्नाख्येन सदुपाधिना विभूषयामास ।

स्वदेशेराष्ट्रियेषु कार्येषु समग्रायाश्च मानवजात्याः शान्त्यर्थम्प्रगत्यर्थञ्च पूर्णतो व्यस्ता सत्यपि श्रीमतीन्दिरा प्रियदर्शिनी सर्वदैव तेजोमय्या जीवनशक्त्योताप्रोता सर्वथा प्रफुल्लिता चाभूत् प्रकृतेः सर्वेष्वपि मनोज्ञेषु वस्तुषु समभिरुचिञ्जगृहे । परन्तत्कान्तिमयं सौम्यतापूर्णञ्च समुत्कृष्टञ्जीवनं चतुरशीत्यधिकैकोनविंशतिशततमे ख्रिष्टाब्देऽक्टूबरमासस्यैकत्रिंशत्तमे दिनाङ्के कातरेण विश्वासघातपूर्णेन च कार्येण श्रीमत्याः स्वकीय एव निवासस्थाने ताभ्यामुभाभ्यान्निष्करुणतया जघन्यतया च परिसमापितं याभ्यां सुरक्षायाः सद्दायित्वं समर्पितमासीत् ।

श्रीमत्यै इन्दिरागान्धिमहोदयायै देशस्यास्यैकताऽखण्डतैवैकम्पावनङ्कर्मासीत्, यत्समक्षं कार्यान्तराणि सर्वाण्यपि गौणान्येवाभूवन् । देशस्यैकतायाः सुरक्षायै श्रीमती साम्प्रदायिकरूढिवादविरुद्धं सर्वविधधार्मिकरूढिवादविरुद्धञ्च निर्भीकतया भृशं युयोध । श्रीमती भूयो भूयो देशमिमं प्रबोधयामास साम्प्रदायिकतावादिनीभिः समाजविरोधिनीभिश्च शक्तिभिः शस्त्रद्वयीयमेव प्रयुक्ता । श्रीमती तानादर्शान् रक्षन्ती स्वप्राणान् जुहाव यानादर्शान् समधिकृत्यास्माकङ् गणतन्त्रस्यैकताऽखण्डता च समाश्रित्य विराजेते । भारतस्यैक्यसंरक्षणे जातम्महात्मनः श्रीगान्धिमहोदयस्य बलिदानं श्रीमत्याः इन्दिरागान्धिमहोदयायाश्च बलिदानं शताब्दान् यावदमरतामधिगमिष्यति ।

ऐतिह्ये कदाचिदेवैकाकी कश्चिदेतादृशः स्याद् यो देशस्यास्य भाग्येन सहैतावान् सम्बद्धोऽभूत् । श्रीमती भारतस्यात्मसम्मानस्य स्वात्मविश्वासस्य च सुदृढम्प्रतीकस्वरूपिण्यासीत् । श्रीमत्याः स्वर्गारोहणन्तदा समभूद् यदा श्रीमती स्वोन्नतेश्चरमशिखरमारुरोह यत्र श्रीमत्याः सद्-व्यक्तित्वस्य सत्प्रभावस्य च विश्वस्मिन् विश्वे यशोमयं वातावरणमासीत् ।

इन्दिरागान्धिमहोदयायाः परमदुःखदेन दिवङ्गमनेन भारतं राजनीतिकार्थिकविकासयोः निर्णायकावसरे ह्येकं सर्वदैव समर्पितं प्रतिभासम्पन्नन्नेतारं हापयामास ।

राष्ट्रमिदन्निर्णयशीलस्य तेजस्विनः करुणामयस्य च व्यक्तित्वस्य परमामधमर्णतामावहति । श्रीमत्याः पित्रा श्रीजवाहरलालनेहरुणा स्वात्मनो वर्णनमेतादृशव्यक्तित्वेनाकारि यः स्वतन्वा मनसा च भारतमस्निह्यत, तत्स्थाने भारतीयैश्चापि तस्मै स्नेहभावः समादरञ्च प्रादायि । तथ्यमेतदिन्दिरागान्धिमहोदयाविषयेऽपि पूर्णतः सत्यमस्ति । भारतीयानां जनानां स्वकीयायास्यै महानेत्र्यै सर्वदैव प्रियता स्नेहभावश्च स्थास्यतः या स्वस्य चरमं श्वसनं यावत्तेषां सेवायान्निरता आसीत् ।

स्वस्वर्गारोहणतो केवलमेकाहपूर्वं श्रीमती समुद्गारानिमान् समभिव्यञ्जयामास ।—

"यद्यहं राष्ट्रं शुश्रूषन्ती निधनमप्यधिगच्छेयन्तथापि मे गौरवं स्यात् । अहं विश्वसिमि यन्मम शोणितस्य प्रत्येकं बिन्दुः राष्ट्रस्यास्य समभिवृद्धौ देशमेनं शक्तिमन्तम्प्रगतिशीलञ्च विधातुं सहायको भविष्यति" ।

भारतस्यास्याः महनीयायाः सुपुत्र्या असामयिकेन निधनेन निखिलमपि राष्ट्रं शोकाकुलमस्ति, देशस्याखण्डतायै सुदृढतायै प्रगत्यै च श्रीमत्याः कार्याणि लक्ष्यीकृत्य स्वीयां सम्माननामधमर्णताञ्चाभिव्यनक्ति ।

संस्कृतानुवादकः — **पञ्चोल्युपाह्वो डॉ. बदरीनारायणः शर्मा**

विश्वस्य विश्वस्य महतां नेतृणां हार्दिकाः

श्रद्धाञ्जलयः

१. राष्ट्रमण्डलीयदेशानां किं वा विश्वस्य समस्तानां देशानां शीर्षस्थनेतृष्वन्यतमाद्यास्माकं मध्ये नास्ति। अस्मिन्नतिदारुणे क्षणेऽहं भारतीयान् प्रति स्वसंवेदनां प्रकटीकरोमि।

ब्रिटेनदेशस्य महाराज्ञी श्रीमती एलिजाबेथमहोदया

२. श्रीमती गान्धी महतो राष्ट्रस्यासीत् महती नेत्री। तस्या इत्थं दारुणमवसानं कल्पनातीतं वर्तते। शोकमिमं शब्दैर्वक्तुं न पारयामि। तया सह मम मैत्री सुदीर्घकालादासीत्। व्यक्तित्वं तु तस्या अद्वितीयमेवासीत्।

ब्रिटेनदेशस्य प्रधानमन्त्रि-
श्रीमती मार्गरेटथैचरमहोदया

३. श्रीमतीन्दिरागान्धी भारतीयमूल्यानां शक्तेश्च प्रतिमूर्तिरासीत्। भूमण्डलस्य विशालतमलोकतन्त्रस्य प्रधानमन्त्री श्रीमतीगान्धी जानाति स्म स्वतन्त्रताया महत्त्वम्। निष्पक्षताया आन्दोलनस्याध्यक्षा सा विश्वशान्तये विश्वसुरक्षायै विकासशीलदेशानामार्थिकविकासाय च दृढं प्रायतत।

अमरीकादेशस्य राष्ट्रपतिः श्रीरेगनमहोदयः

४. श्रीमत्या इन्दिराया नृशंसवधेन सह तृतीयविश्वस्य गरिम्णोऽधिकाराणाञ्च संरक्षणमेव विलोपमवाप।

फ्रान्सदेशस्य राष्ट्रपतिः
श्रीइ-मिटरैण्ड-महोदयः

५. श्रीमत्या देहावसानेन शोकाकुलमस्ति मम राष्ट्रं यत्र सा सुप्रसिद्धाऽऽसीत् स्वसाहसपूर्णवर्तनाय समुज्ज्वल-चारित्र्यबलाय च।

फ्रान्सदेशस्य प्रधानमन्त्री
श्री बॉरेन्ट फेबिअसमहोदयः

६. श्रीमती गान्धी एकाऽसाधारणप्रतिभासम्पन्ना नेत्री आसीद् यस्याः साहसं शक्तिं मार्गदर्शनञ्च न केवलं भारतमपि तु सकलं विश्वं स्मरिष्यति।

आस्ट्रेलियादेशस्य प्रधानमन्त्री
श्री बाब हाथमहोदयः

७. श्रीमत्या वधः सकलस्यापि विश्वस्य कृते शोकावहो वृत्तान्तोऽस्ति यतः सा भूमण्डलस्य विशालतमलोकतन्त्रस्यैव नेत्री नासीत्, निष्पक्षान्दोलने संघर्षरतानां मानवानामपि नेतृत्वं भजति स्म ।

युगाण्डादेशस्य राष्ट्रपतिः
श्री ए० मिल्टन ओबोटेमहोदयः

८. सोवियतरूसदेशस्य भारतवर्षस्य च पारस्परिकमैत्रीसम्पोषणाय सहयोग-संवर्धनाय च श्रीमत्या इन्दिराया महान् योगोऽस्ति । सोवियतदेशीयानां स्मृतिपटले महामहिमशालिन्या यस्या नामाचिरमङ्कितं स्यात् ।

सोवियतरूसदेशस्य राष्ट्रपतिः
श्री कोन्सटेन्टिन चेरनेन्कोमहोदयः

९. सा निष्पक्षसङ्कल्पनाया आचरणस्य च क्रोडे जनिमलभत । तस्याः पिता समूहनिरपेक्षान्दोलनस्य संस्थापक आसीत् । पूर्व-पश्चिम-देशानां प्रतिस्पर्द्धायाः श्याममेघेनाच्छादिते वातावरणे साऽऽन्दोलनस्य परिपोषणायानवरतं कार्यमकरोत् ।

लुसाकादेशस्य राष्ट्रपतिः

१०. श्रीमत्या इन्दिराया हत्यया न केवलं भारतीयानां निष्पक्षान्दोलनस्य राष्ट्रमण्डलस्य च महती क्षतिरभूत् अपि तु सकलाया मानवताया एव संरक्षिका विलुप्ता । साऽद्य नास्ति किन्तु तस्याः सङ्कल्पनास्माकं मार्गदर्शनायास्त्येव । त्रयोदशमासपूर्वमेषा सङ्कल्पनाऽस्मिन्नेव कक्षे सङ्गृहीताऽस्माभिः ।

राष्ट्रमण्डलस्य महासभाया अध्यक्षः
श्रीपाललुसाकामहोदयः

११. श्रीमती गान्धी राष्ट्रमण्डलस्य परमसम्माननीया सदस्याऽऽसीत् । मण्डलस्य स्थितिं दृढीकर्तुम् सा स्वपितरं श्रीजवाहरलालनेहरू-महोदयमनुसृतवती । अन्ताराष्ट्रियपरिदृश्ये सा संयमस्य धैर्यस्य विवेकस्य च प्रतिकृतिरासीत् ।

राष्ट्रमण्डलस्य महासभायाः सचिवः
श्रीपरेजदस्वेलरमहोदयः

१२. निष्पक्षान्दोलनस्य हृदयमिव श्रीमती गान्धी राष्ट्रमण्डले वरीयसी राजनीतिज्ञा न्यूजीलैण्डदेशस्य च सुहृद् आसीत् ।

न्यूजीलैण्डदेशस्याध्यक्षः
श्रीडेविडलौन्जमहोदयः

१३. श्रीमत्या इन्दिराया देहावसानेन या क्षतिर्जाता सा कदापि पूरयितुं न शक्यते। नेपालदेशस्य सन्मित्रं विलुप्तम्।

नेपालदेशस्य भूतपूर्व-प्रधानमन्त्री
श्रीसूर्यबहादुरथापा-महोदयः

१४. श्रीमत्या इन्दिराया निधनेन निष्पक्षान्दोलनमन्ताराष्ट्रियसमुदायश्च गम्भीरमाहते।

श्रीलङ्कादेशस्य राष्ट्रपतिः
श्री जे. आर. जयवर्धनमहोदयः

१५. अहमनया हत्ययाऽत्यधिकमाहतोऽस्मि। समस्तेऽपि विश्वे स्वातन्त्र्यानुरागिभिर्जनैरस्याः क्रूरहत्यायाा निन्दा कर्तव्या।

—एडवर्ड केनेडीमहोदयः

१६. श्रीमती गान्धी न केवलं भारतीयानामेव माताऽऽसीत् परं साऽस्माकं समस्तस्य बांगलादेशस्यापि माताऽवर्तत। तत्रभवत्या निधनेन समूहनिरपेक्षराष्ट्रैरेकः सुयोग्योऽध्यक्षः, राष्ट्रमण्डलेनैकः प्रभावशाली प्रवक्ता तथा विकासशीलैर्देशैः स्त्रीय एकः समर्थोऽधिवक्ता भ्रंशितः।

बांगलादेशस्य राष्ट्रपतिः
श्री एच० एम० इरशादमहोदयः

१७. अहमिन्दिरा-रहितस्य भारतस्य कल्पनामपि कर्तुं न पारयामि। मयाऽऽत्मनोऽतिस्नेहशीला भगिनी निर्यस्ताऽस्ति। स्वस्य दुःखस्याभिव्यक्तये मन्निकटे शब्दा एव न सन्ति।

फिलिस्तीनस्य नेता
श्री यासीरअराफातमहोदयः

१८. श्रीमती गान्धी विश्वशान्तये निरस्त्रीकरणाय च यत् किमप्यकार्षीत् स विस्मर्तुं न शक्यते।

जापानदेशस्य प्रधाममन्त्री
श्रीनाकासोनेमहोदयः

श्रीमती-'इन्दिरागान्धी'-महाभागाभ्यः

श्रद्धा–प्रसूनाञ्जलिः

□

पञ्चाशच्छतवर्षाणि सप्तषष्टियुतानि वै ।
कलौ यदा ययुर्लोको राज्ञीमकुरुतेन्दिराम् ।।१।।

सा माता मातृहीनानामन्येवासोन्महेश्वरी ।
विक्तोरियां क्लियोप्पात्रां हेलनां निष्प्रभीकृता ।।२।।

इन्दिया वर्तते राजदिन्दीवरम्,
इन्दिरा सूर्यवन्मञ्जुरिन्दीवरे ।
इन्दिया-वासिनश्च स्म इन्दिन्दिराः,
इन्दिराऽस्तक्षितिन्द्रष्टुमिन्द्रायते ।।३।।

पञ्चाशच्छतवर्षेषु पञ्चाशीति-युतेषु वै ।
कलौ गतेष्विन्दिराख्या जनराज्ञी न्यहन्यत ।।४।।


देहल्यां राजधान्यां वै तदीयास्सह-कार्मिकाः ।
अमेरिक्का-चारभूताः षड्यन्त्रात्तां न्यहंसिषुः ।।५।।

दिष्टादिनोदिता दिव्या दिनादित्येन्दिया-दिवि ।
दिक्षु दिक्ष्विन्दिराऽऽदिश्रीर्दिशेदिष्टं दिने दिने ।।६।।

—रामचन्द्रः पाद्मनाभिः

卐

श्रीमती-इन्दिरागान्धी-महाभागाभ्यः समर्पितः 'कुसुममाला-बन्धरूपः श्रद्धाञ्जलिः



इन्दिया वर्तते राजदिन्दीवरम्, इन्दिरा सूर्यवन्मञ्जुरिन्दीवरे।
इन्दिया-वासिनश्च स्म इन्दिरा, इन्दिराऽस्तक्षितिं द्रष्टुमिन्द्वायते ॥
दिष्टादिनोदिता दिव्या दिनादित्येन्दिया-दिवि ।
दिक्षु दिक्ष्विन्दिराऽऽदिश्रीर्दिशेदिष्टं दिने दिने ॥

—रामचन्द्रः पाधनाभिः

इन्दिरापुण्यस्मृतिः

ऐश्वर्यं परमं यस्याः सौन्दर्यं च मनोरमम् ।
धैर्यं धरागुणाधारं स्थैर्यं हिमवतो यथा ।।

इन्दिरा लोकमाता साऽद्वितीया सृष्टिसम्भवा ।
संस्कृतोदात्तचरिता राष्ट्रशक्तिः शिवप्रिया ।।

श्रीपतेः श्रीर्यथेन्द्राणी महेन्द्रस्य महीयसी ।
प्रभा प्रभाकरस्येव तथासीत्तद्रुचिः शुचिः ।।

दीने दयार्द्रा सुजने सुशीला,
विशालकीर्तिः सुमतिः प्रधाना ।
आजीवनात्यन्तमृदुस्वभावा,
राजीवसञ्जीवपराप्रसूतिः ।।

पुण्यैः पुनीता विजया विनीता, प्रज्ञा समेता च कृतार्थयन्ती ।
भा-भारतावाप्तयशोधरा सा, शुभा सदासीदुदयास्तकाले ।।

दिशास्वशेषासु गुणैरुदारैः, क्रियासु वागर्थसमानरूपैः ।
विभेद-विध्वंस-विकारजातैर्यदीयसंयोगपरा मनीषा ।।

मुक्ताश्रया मुहुरहर्निशि राष्ट्रसेवा-
स्वात्मानमत्र विनिवेद्य दिवङ्गता या ।
तामिन्दिरां सकललोकनुतां वरेण्या-
मौत्कण्ठचवाष्पकलया मनसा स्मरामि ।।

—पं० रामदेव झा 'विनोदः'

नूतन और सनातन का संगम—इन्दिरा जी

—डॉ० लोकेशचन्द्र

युग-युगान्तर में नवीन का निरन्तर अभ्युदय होता रहा है। सतत सृजन में ही मानव का विकास है। इसके लिए जीवन-मूल्यों और संस्कारों से, तप और त्यागसे—युग-युग में अवतार आते रहे हैं। यही भगवद्गीता में भगवान् कृष्ण का "सम्भवामि युगे युगे" है। हमारे जीवनकाल में अंग्रेजी साम्राज्यवाद से मुक्ति दिलाने के लिए महात्मा गान्धी और पं० जवाहरलाल नेहरू का अवतरण हुआ। पं० नेहरू भारत के स्वप्नों के सजीव रूप थे। उनके अथक उद्बोधन ने देश के जन-जन को नई दृष्टि दी और स्वतन्त्रता मिलने पर भारत में नए विकास का और विज्ञान का प्रारम्भ हुआ।

श्री जवाहरलाल नेहरू जी सम्राट् अशोक के विविध आयामों से गहरे प्रभावित थे। पण्डित जी कहा करते थे कि अशोक ने अपने शिलालेखों में सब धर्मों के समभाव का बारबार प्रचार-प्रसार किया है। अशोक ने कलिंग-विजय में प्रलयकारी युद्ध से त्रस्त होकर विश्व को शान्ति का सन्देश दिया। पण्डितजी की विदेश-नीतिमें यह शान्तिप्रियता आधारशिला बनी और आज तक हमारी नीति का मूलाधार है। १९५७ की 'भारतीय विज्ञान कांग्रेस' के कलकत्ता अधिवेशन का उद्घाटन करते हुए, पण्डित जी ने अशोक के शिलालेखों पर खुदे सन्देश का विस्तार से उद्धरण दिया। उन्होंने कहा—जैसे अशोकने धर्म में मत-मतान्तरों का सम्मान करने का उपदेश दिया, वैसे ही विज्ञान को मतभेदों का आदर करना चाहिए जिससे वह सङ्कुचित दृष्टि से दूषित न हो जाए।" अशोक के पुत्र और पुत्री, भगवान् बुद्ध की करुणा का उपदेश श्रीलंका ले गए—इससे अन्तरराष्ट्रीयता का प्रारम्भ हुआ। अशोक की राजधानी पाटलिपुत्र गंगा के तट पर स्थित थी— पण्डित जी गंगा की गोद में खेले थे। पण्डित जी के लेखन में भगवान् बुद्ध, अशोक और महात्मा गाँधी का सर्वत्र उल्लेख है। शिलालेखों में अशोक का नाम है—प्रियदर्शी। प्रियदर्शी अशोक "नए भारत की प्रियदर्शिनी इन्दिरा" बने। जैसे अशोक ने भारत की विविधता को एक सूत्र में पिरोया था उसी प्रकार इन्दिराजी ने इस देश की एकता, एकजुटता के लिए, जीवन-भर प्रयास किया और उसी एकप्राणता के लिए बलिदान हो गईं। जैसे अशोक ने भारत में भगवान् तथागत की करुणा का, नए शान्तिमय समाज का आगमन किया, उसी भांति इन्दिराजी ने नवीन का बोध, नएपन की अनुभूति में भारत के जनजन को जगाया। नई आशाओं और आकांक्षाओं से इस देश के

जनसाधारण को जागृत किया—इन्दिरा जी ने बैंकों के राष्ट्रीयकरण, रजवाड़ों की बंधी थैलियों की समाप्ति और बीससूत्री कार्यक्रम से पिछड़े वर्गों को नए अस्तित्वका भान करवाया। इन्दिराजी जनता-जनार्दन के नए बिहान की, आशा-विश्वास-भरी नई उमंगों की स्वर्णजयन्ती थीं। क्या विश्वास हो सकता है कि इन्दिराजी को गए एक वर्ष बीत गया—जबकि देश-निर्माण के लिए, राष्ट्र-विकास के लिए उनका आह्वान आमन्त्रित करता है पल-पल, क्षण-क्षण, दिन-प्रतिदिन, मासानुमास, सतत-सनातन। अस्त होने पर भी वे छोड़ गईं - नए की प्रेरणा, कर्म का संकल्प, अथक की संस्पृश्यता, प्रगति की नित्यचर्या। इन्दिराजी को हमारा नमन, हमारा वन्दन, अविचल विशाल उपवन भारत के मुस्कुराते मुखों का। जब जनतापार्टी की सरकार की कुबुद्धि ने इन्दिराजी को जेल भेजने का कुचक्र चलाया तब इन्दिराजी ने कहा था—आंसुओं से नहीं, मुस्कान से अभिवादन कीजिए। जब तक आपसे दूर रहूं तब तक आपकी मुस्कानों से मेरा हृदय भरा रहे। "इन्दिराजी आशा की प्रतिमा थीं। बीहड़ दुरत्यय क्षणों में दृढ संकल्प से और अथक कर्मठता से आशाका सञ्चार करतीं और सारा देश भविष्य की उज्ज्वलता के उल्लास से भर उठता था। जब उनकी स्मृति तन-मनको क्रन्दन से, अश्रुओं से भर देती है, तब सोचने लगता हूँ कि उनकी थाती क्या है? क्रन्दन से बहुत विराट् विरासत है—इन्दिराजी का अदम्य उत्साह। संकट पार करने का अप्रतिहत आन्तरिक बल, अनन्त अविरल प्रगति की निष्ठा, विज्ञान के नित-नवीन पथ का अनुसरण और सर्वोपरि मानवकी गरिमा को प्रतिष्ठित करना।

लेखकों, पत्रकारों, कलाकारों, विद्वानों, अर्थात् समस्त बुद्धिजीवी वर्ग के प्रति इन्दिराजी की विशेष निष्ठा थी। १९६८ के एक दिन इन्दिराजी को मिलने गया। कहा—"आपके अमूल्य समय से दस मिनट चाहिये।" बोलीं—"भय्याजी, मेरे पास चाय पीने का समय नहीं है, आपको दस मिनट कहां से दूं।" कहकर, अन्दर निवास में चली गईं। उन दिनों उनके सफदरजंग निवास पर ही मिलने की परिपाटी थी। सं० १ अकबर मार्ग अभी नहीं था। निराश-चुपचाप कोने में खड़ा रहा। १५-२० मिनट में पुनः निकल आईं और देखा कि खड़ा हूं। बोलीं—"पद्मजा नाइडू अन्दर डाईनिंग रूम में बैठी हैं। आप उधर बैठ जाइए।" कुछ क्षणों में भोजन-कक्ष में आ गईं और पूछने लगीं—"आप क्या लाए हैं।" कहा—"भारत और अन्य एशियाई देशों के सांस्कृतिक आदान-प्रदान पर कार्य करता हूं। अपनी पुस्तकें दिखाने लाया हूं।" रचनाएं दिखानी प्रारम्भ कीं। ४० मिनट बैठी सुनती रहीं और प्रश्न करती रहीं। उनकी गहरी सांस्कृतिक अभिरुचि ने मुझे अभिभूत कर दिया। यह उनके साथ सबसे लम्बी चर्चा थी। १९८० के चुनाव-घोषणापत्र में साहित्य और कला पर विशेष धारा ११० थी—"अपने धरोहर की रक्षा करने तथा मौलिक सर्जनात्मक प्रयासों को प्रोत्साहन देने के उद्देश्य से कांग्रेस सदा ही साहित्यिक क्रियाकलापों में और कलाओं को बढ़ावा देने तथा राष्ट्र के सांस्कृतिक जीवन को समृद्ध करने में विश्वास करती रही है। लेखकों, कलाकारों, फिल्मी दुनिया के लोगों······के कामके लिए अधिक अनुकूल वातावरण बनाया जाएगा।"

जनवरी १९८० में मतदान के उपरान्त, प्रधानमन्त्री की शपथ लेने से पूर्व, इन्दिराजी एक छोटे से पुस्तक-विक्रेता की दुकान पर गईं। यहाँ पश्चिमी जगत् की नई पीढ़ी

के लड़के-लड़कियां नए युग की खोज में, नई संस्कृति ढूंढने के लिए, पुस्तकें लेने आते हैं। हिप्पियों की इस दुकान पर इन्दिराजी का जाना कुछ विलक्षण, कुछ सामान्य लगा। नए पथको खोजने वालों के प्रति उनका कौतूहल अवश्य था—सहमति हो या न हो। नए का आगमन शनैः शनैः होता है। किस तन में और किस रूप में, कहाँ और कब प्रतिफलित हो जाए, कौन जाने। उसको इन्दिराजी मारना नहीं चाहती थीं। नए में प्रगति के बीज निहित हैं। नया मानव उन्नतिका मार्ग प्रशस्त करता है। इन्दिराजी ने इस पिकाडिली बुकशॉप से दो पुस्तकें भी लीं। एक दिन जब दुकान पर गया तो दुकान स्वामी ने बताया कि इन्दिराजी आई थीं। पूछा—"क्या प्रमाण है।" दुकानदार बोला—"मेरी दर्शक-पंजी में लिख भी गई हैं। कहा—"हो ही नहीं सकता कि दुकानदार की पंजी में लिखें।" देखा तो पाया कि इन्दिराजी ने अपने हाथ से, अपनी लेखनी से दुकानदार की दर्शक-पंजीमें लिखा है। स्तब्ध सा रह गया। कवि-हृदया थीं। सोचा कि क्यों लिखा है? मन में आया—हर नये पल, नये क्षण का आगमन, इस दुकान में खोजते हैं विश्व के युवजन। इन्दिराजी का खोज से अटूट सम्बन्ध था—जहां भविष्य का नूतन जन्मता था। इन्दिराजी समय की अविराम प्रगति हैं जहाँ चिन्तन और नवीनतम का सङ्गम है। क्यों?

प्रयाग के संगम पर जन्मी थीं—संस्कृतियों का संगम, धर्मों का समभाव, विज्ञान और मानवता की एकरसता, सनातन और भविष्य का समन्वय, उनकी धरोहर थी। दिल्ली विश्वविद्यालय के दीक्षान्त-भाषण (१.४.१९८०) में उन्होंने कहा था—"हमारे देश की असाधारण भौगोलिक और दूसरी विविधताओं तथा उसकी आश्चर्यजनक सांस्कृतिक एकता को देख प्रत्येक यात्री स्तब्ध रह जाता है। दिल्ली महाभारत-काल का इन्द्रप्रस्थ है। महाभारत के विराट् दर्शन और जीवन की प्रमुख समस्याओं के बोध और समाधान से भी बढ़कर उसका प्रभावी सन्देश है—"**भारत की एकता**।" इस महाग्रन्थ में भारत के प्रत्येक प्रदेश का वर्णन स्नेह से और आत्मीयता से किया गया है। अर्जुन के लिए प्रत्येक स्थान अपना है, कोई भी पराया नहीं।…इससे क्या भव्य दृष्टि हो सकती है कि प्रतिभा से देदीप्यमान आदि-शङ्कराचार्य सुदूर केरल में जन्मे और वहाँ से विद्याकेन्द्र श्रीनगर में पधारे। १६ वीं शती में गुरु नानकजी ने कामाख्या और रामेश्वरम् की यात्रा की।"

नवम्बर १९८० में हिजरा के १४०० वर्षों की पूर्ति का डाक-टिकट विमोचन करते हुए इन्दिराजी ने कहा—"यह हमारे लिए गर्व का विषय है कि हमारे देश में समुत्पन्न महान् धर्मों के साथसाथ, संसारके अन्य प्रमुख धर्म भी यहाँ विद्यमान हैं। हमारे लिए इस्लाम भारतीय धर्म है।…सच तो यह है कि इस्लामी सन्तों और सूफ़ियों के कारण भारत में यह धर्म अधिक फैला।"

इन्दिराजी को प्रकृति से अगाध प्रेम था। हिमगिरि के आंचल में खेलते कश्मीर की पुत्री थीं, वितस्ता की बेटी थीं। निधन से कुछ ही दिन पूर्व काश्मीर में गिरते चिनार के पत्ते देखने गई थीं और शैवागमों के आचार्य-प्रवर श्री लक्ष्मणजू से चर्चा करने। ६ मार्च १९८०

को प्रकृति-संरक्षण पर विश्व-सम्मेलन में बोलते हुए उन्होंने कहा था—"भारतीय परम्परा हमें सिखाती है कि सब प्रकार के जीवन का—मानव, पशु-पक्षी और पौधों से—इतना घनिष्ठ सम्बन्ध है कि किसी एक के अस्तव्यस्त करने पर सम्पूर्ण जीवन असन्तुलित हो जाता है।" अथर्ववेद का उद्धरण देते हुए इन्दिराजी ने आह्वान किया कि मानव धरती से जो ले उसका पुनरारोपण करे। धरती के मर्म को, उसके जीवन-चक्र को आहत न करे। यद्यपि मनुष्य अन्तरिक्ष में पहुंच गया है, धरती ही उसका निवास है। उसके लिए इस वसुन्धरा पर ही सब कुछ है। इन्दिराजी के शब्दों में—"हमारे राष्ट्रगान '**वन्दे मातरम्**' में, जिसने स्वतन्त्रता-संग्राम को अनुप्राणित किया, भारत को 'सुजलां सुफलां सस्यश्यामलां' के रूप में देखा। यह भारत के लिए ही नहीं अपितु सब देशों के लिए सत्य है। कहा जाता है कि कुछ लोग श्यामल-अंगुलि (green fingered) हैं। विश्व-संरक्षणनीति-सम्मेलन का ध्येय होना चाहिए कि प्रत्येक नर, नारी और बच्चे की अंगुलियां उगाएं, उखाड़ें या छीना-झपटी ही न करें।"

इन्दिराजी को खेद था कि हिमालय में अनेक दुर्लभ पेड़-पौधों की जातियां नष्ट हो रही हैं। जिस गति से हम अपने वनों और पर्वतों को नष्ट कर रहे हैं—यह संहार भावी विकास के लिए घातक है। इससे भूक्षरण, बाढ़ एवं नदियों और जलाशयों में मिट्टी भर गई है। भारत को सुजलां सुफलां रखने के लिए इन्दिराजी ने अनेक कार्यक्रम चलाए। वे वन्दे मातरम् की सच्ची पुत्री थीं और "एक बच्चा एक पेड़" की वृक्षारोपण जैसी उनकी पर्यावरण-रक्षा की नीतियां भावी भारत की अमूल्य निधि हैं।

प्रकृति के सन्तुलन को हानि पहुंचाए बिना आर्थिक विकास—इन्दिराजी की नीति थी। उनके शब्दों में—"कुछ विशेषज्ञ कहते हैं कि विकास सीमित होना चाहिए। यह विडम्बना है कि जो आवश्यकता से अधिक उपभोग करने वाले हैं वे हम वञ्चितों को मितव्यय के मूल्य सिखा रहे हैं। भूख और कुपोषण को समाप्त करने के लिए हमें लाखों वञ्चितों के लिए आर्थिक विनियोजन, उत्पादन, और भोजन-सुरक्षा करनी होगी, हमें आत्मनिर्भरता का निर्णय क्रियान्वित करना होगा। अपनी सारी शक्तियां और अनुभव संजोकर, सहयोग का स्थायी तन्त्र बनाना होगा जिसमें विकास और अक्षुण्ण प्रकृति के अन्योन्याश्रय से मनुष्य की प्रगति अबाध चलती रहे।"

'संयुक्त राष्ट्र का जल-दशक १९८१-१९९०' के अवसर पर भेजे गए सन्देश में इन्दिराजी ने ऋग्वेद का उद्धरण देते हुए कहा—"जल जीवन है। सभ्यता, मनुष्य और जल का संवाद है। प्राचीनतम मानव बसा—नदी-तटों पर, सरोवरों के समीप, समुद्र-तट पर और वहीं कृषि एवं प्रारम्भिक उद्योग का विकास हुआ।······मानवता के लिए विज्ञान अपरिहार्य है। परन्तु उसके विभ्रान्त अथवा बिना सोचे-समझे अल्पकालिक लाभ के प्रयोग, कल्पनातीत-हानि भी पहुंचा सकते हैं। आधुनिक विज्ञान ने दरिद्रता की धूल झाड़ डाली, परन्तु इसने अपना नया प्रदूषण फैला दिया जो हमारे पर्यावरण को विनष्ट कर रहा है।···संयुक्त राष्ट्र का जल-

दशक अन्तरराष्ट्रीय सहयोग का उदाहरण बने और सर्वत्र लोगोंको अपनी मूलभूत आवश्यकताएं पाने में सहायक बने—स्वच्छ जीवन-साधक पर्यावरण।" इन्दिराजी के बहुमुखी व्यक्तित्व में संस्कृति और विज्ञान, मानवता और विकास का दूरदर्शी संमिश्रण था। संगम की पुत्री में अनेक संगम थे—जो आगामी दशकों के चिरव्यापी दर्शन बनेंगे।

पिछले ५०० वर्षों में पाश्चात्य मनीषियों ने विज्ञान और उद्योग के चमत्कारों से मानव की अभूतपूर्व उन्नति की है। साथ साथ राजनैतिक सत्ता और आर्थिक साम्राज्यवाद के राक्षस भी उठ खड़े हैं। स्वर्ग की दिव्य कल्पनाएं धरती की सच्ची उपलब्धियां बन गई हैं—अथकपरिश्रम से, निरन्तर अध्ययन से, तर्कपरायण विश्लेषण से। इस दौड़में भारत पीछे रह गया था। पं० नेहरू और इन्दिराजी की अन्तर्यामी दृष्टि ने भारत को इस प्रगतिशीलता का अभिन्न सहभागी बनाया। इस प्रक्रिया में हमारे नेताओं की सुलझी मानसिकता के कारण हमने मानवता का पथ ही अपनाया है। वैज्ञानिक मानस के पुरोधा होने पर भी कुछ पाश्चात्य शक्तियां आज भी सामाज्यवाद के अन्धकार में डूबी हैं। दक्षिण अफ्रीका, जहां महात्मा गांधी ने अपना कार्य प्रारम्भ किया था, वही रंगभेद के अमानुषिक अत्याचारों और हत्याओं से त्रस्त है। यह रंगभेद मानवता के माथे पर कलंक है। अपनी काव्यमयी भाषा में इन्दिराजी ने विश्व का उद्‌बोधन किया था—"श्वेत मनुष्य का भार काले और भूरे मानव के कन्धों पर बहुत देर तक ढोया गया है। स्वतन्त्रता-संग्राम दबाया नहीं जा सकता। उसके सैनिक सतत मारे नहीं जा सकते, न ही सदा कारावास में रखे जा सकते हैं, अथवा अपमानित किए जा सकते हैं। स्वतन्त्रता का विचार मिटाया नहीं जा सकता। कोई न कोई चिंगारी ज्वाला में फूट पड़ेगी, कहीं न कहीं और कभी न कभी, पथ को आलोकित करने के लिए, हृदयों को प्रज्वलित करने के लिए। अन्त में सफल अवश्य होगी।" नेलसन मण्डेला को विश्व-सद्‌भाव के लिए 'जवाहरलाल नेहरू पुरस्कार' देते समय ये इन्दिराजी के उद्‌गार थे।

विश्व-शान्ति और विकास का अभिन्न संबन्ध है। उनका विचार था कि विकसित देशों के सैनिक व्यय से अनहोने आर्थिक संकट खड़े हो रहे हैं। उनके वाक्य में—"जैसे उत्पादन-क्षमता सौगुनी बढ़ती है, वैसे ही संहार-क्षमता हज़ारगुना बढ़ जाती है। कुछ सरकारें कहती हैं 'आज अस्त्रीकरण कल निरस्त्रीकरण।' परन्तु आजके हथियारों से हमारे लिए 'कल' हो सकता है कभी आएं ही नहीं।" विकास संहार के लिए नहीं, मनुष्य के दुःखों को दूर करने के लिए चाहती थीं इन्दिराजी।

भारत के दरिद्र-नारायण का उत्थान इन्दिराजी के सोते-जागते क्षणों की चेतना थी। गरीबी और भूखमरी को दूर करके नए भारत का निर्माण करने के लिए कन्धे से कन्धा मिलाकर काम करने का आह्वान किया। उनका बीससूत्री कार्यक्रम भारत का विकास-मन्त्र है। गांव-गांव में खेती और धंधों का विकास, बेकारों को काम, भूमिहीन किसानों को अधिकार दिलवाना, श्रम का पूरा-पूरा प्रतिफल श्रमिक को, बंधुवा मजदूरों की मुक्ति, अनुसूचित और वन-जातियों का कल्याण, ग्रामों को पीने का पानी, महिला-कल्याण, परिवार-नियोजन, काले धन की रोकथाम, आत्मनिर्भरता आदि से भारत के जन-जन के मन में नई आशा, नए उल्लास का संचार किया। इस प्रकार इन्दिराजी ने भारत के दूरातिदूर अनसुने गांवों में हिमश्रृंगों

पर बसे भारतबासी के मनमें नया संकल्प, नई कर्मनिष्ठा आलोकित की।

इन्दिराजी विश्व-नागरिक थीं जिनके लिए धरती का प्रत्येक देश अपना था, उसके उदात्त मूल्यों की वे सहभागिनी थीं—'विश्वं भवत्येकनीडं' उनपर अक्षरशः सच था। योरोपीय संस्कृति का उद्भव ग्रीस की राजधानी आथेना (Athens) में हुआ। लोकतन्त्र के लिए अंग्रेजी शब्द डेमोक्रसी ग्रीक भाषा का है - डेमोस् 'लोक' क्रातोस् 'शक्ति।' सितम्बर १९८३ में आथेना के नागरिक सम्मान में इन्दिराजी ने कहा—"आथेना का नाम ही इतिहास से गुञ्जित है। यह पाश्चात्य सभ्यता की जन्म-भूमि है। इस नगर में मनीषी और प्रतिभा की विभूतियां जन्मी हैं। डेमोक्रसी शब्द का उद्भव भी यहां है। ग्राम और नगरीय गणराज्य अन्य सभ्यताओं में भी थे। मेरे देश में, बुद्ध के समय और तदुपरान्त, उनके अभिलेख हैं। परन्तु, सब नागरिक एक स्थान पर मिलें और राज्य के लिए निर्णय करें-- यह परिष्कार आथेना और अन्य ग्रीक नगरों में हुआ। उस समय, नागरिक की कल्पना सीमित थी। महिलाएं, दास और कुछ वर्गोंका निर्णयमें भाग नहीं था।...मैं उन दूरदर्शी चेतनाओं के प्राति आभार प्रकट करना चाहती हूं, जिनका लगाया हुआ छोटा-सा अंकुर अब इतना अमर राजवृक्ष हो गया है।... "हम सब एक विश्व के नागरिक हैं। आथेना में कोई पराया नहीं।" अन्तरराष्ट्रीय जगत् इन्दिराजी की मानवता से अभिभूत था।

इन्दिराजी के रोम-रोम में भारत के जन-जन के प्रति प्यार भरा था। अन्तिम इच्छापत्र में लिखती हैं—"कोई भी घृणा इतनी जघन्य नहीं जो मेरी जनता के प्रति मेरा प्यार धूमिल कर सके, कोई ऐसी शक्ति नहीं जो मुझे इस देश को आगे ले जाने के लक्ष्य और प्रयत्न से विचलित कर सके। हमारी सामासिक संस्कृति की सम्पन्नता और अनन्त विविधता, लोक-मानस की विराटता जो किसी संकट को सहन या भार को वहन कर सकती है, अपनी निष्ठाओं में सुदृढ़, निर्धनता और कठिनाइयों में भी स्वत: प्रसन्न—जहां ऐसे लोग हों वहां यह सोचा ही नहीं जा सकता कि कोई भारतीय हो और वह अपने को गौरवान्वित अनुभव न करे।"

इन्दिरा जी चली गईं। संसार स्तब्ध रह गया कि भारत का भविष्य क्या होगा ? युगान्त के उपरान्त युगोदय कैसे होगा ? इन्दिरा जी की देश को सबसे महत्त्व पूर्ण देन है—श्री राजीव गांधी। एक बार किसी ने रूसी भाषा के आदिकवि श्री पुश्किन से पूछा—"आपकी सबसे महत्त्वपूर्ण कृति कौन सी है ?" पुश्किन ने पुत्रको कन्धेपर बैठाकर कहा—"यह मेरी सर्वोत्कृष्ट कृति है।" भारत के कोने-कोने ने श्री राजीव गांधी और उनके साथियों को अभूतपूर्व बहुमत देकर देश की एकात्मता सिद्ध की है। श्री राजीव जी ने सहज ढंग से पंजाब में शान्ति की स्थापना कर दी है। हृदयसम्राट् प्रधानमन्त्री श्री राजीव गांधी जी ने देश को कर्मठ प्रशासन दिया है जिसके परिणाम दिखाई देने लगे हैं। दूरतम बसी जनजातियों में जाकर श्री राजीव जी दरिद्र-नारायण के लिए आशादीप बन गए हैं और उनके क़ल्याण की योजनाएं चल पड़ी हैं। आधुनिककरण से भारत में औद्योगिक प्रगतिशीलता आई है। विगत के पटाक्षेप के उपरान्त, नवीन की भव्यप्रेरणा और उसका कार्यान्वयन लिए हमारे प्रधानमन्त्रीजी देश को गति से कर्मक्षेत्र में लिए जा रहे हैं। श्री राजीवगांधीजी के नेतृत्व में भारत का हृदय और हाथ नई गौरवपूर्ण यात्रा पूर्ण करने के लिए कटिबद्ध है। नया समय क्रियाभूत हो रहा है।

श्रीमती इन्दिरा गांधी : कुछ यादें

—अक्षयकुमार जैन

प्रियदर्शिनी इन्दिरा गांधी के बलिदान की प्रथम पुण्यतिथि पर उनके बहुआयामी व्यक्तित्व का मूल्याङ्कन करना कठोर हृदय वाले के लिए कठिन है, किन्तु यह तो स्पष्ट दिखाई दे रहा है कि राष्ट्र के महान् निर्माताओं के इतिहास में उनका नाम स्वर्णाक्षरों में लिखा जाएगा ।

कैसी विडम्बना है कि राष्ट्रपिता महात्मा गांधी की भाँति उनका बलिदान भी संकीर्ण साम्प्रदायिक जुनून के कारण हुआ और वे अपने सिद्धान्त का पालन करते हुए अमर हो गईं ।

उनके गत २० वर्ष के कार्यों तथा नेतृत्व के कारण देश ने जो प्रगति की उसके प्रति कृतज्ञ राष्ट्र नतमस्तक रहेगा । पं० जवाहरलाल नेहरू कहा करते थे कि हमारे देश की जितनी जनसंख्या है उतनी ही समस्याएं हैं जिनका समाधान हमें करना है । उनकी सुपुत्री श्रीमती इन्दिरा गांधी ने यह सिद्ध कर दिया कि कोटि-कोटि समस्याओं का समाधान करने की क्षमता, साहस और कार्यकुशलता उनमें है ।

The Kurmapurana refers to the Shrirudram as the essence of the Yajurveda, the chanting of which by a devotee till the end of his life confers immortality.

Parashara says that of all japas, 'Shatarudriyam is the greatest among the means of salvation in the same way as the upasanas of Avimukteshvara of Banaras among all upasanas or samnyasa among the ashramas is considered the greatest among the means of salvation. Sutasamhita avers that the chanting of Shatarudriyam is capable of cleaning the soul of all sins. Yajnavalkya smriti echoes the same idea. Shivapurana declares, 'there is no sure means other than Shri Rudram for one who either wants to perform prayashcitta or seeks bhoga or mukti'.

Rudra is to be identified with Parameshwara who is immanent in everything and at the same time transcendent. This twin aspect is dealt with in this Rudropanisad. The Rudropanisad is divided into eleven

anuvakas or divisions. The first one refers to his grace ; the next eight deal with different aspects like his overlordship, his being the inner core of every soul and his immanence in everything etc. the tenth division is in the form of prayer to Sarveshvara and the eleventh is a prayer addressed to the Rudrasangha.

The opening mantra is in the form of salutation to Rudra whose anger is legitimately directed against the erring souls. It may be seen that Rudra is referred to in the Rig Veda in his malignant aspect—'O Rudra' do not, out of thy anger, injure our children and descendants, our people, our cattle, our houses and do not kill our men (1 . 114 . 8). This Upanisad also opens with the words, Om namas te Rudra manyave' —'O Rudra, salutation to thy anger.' Several mantras in this Upanisad touch upon this trait of Rudra and an appeal is made to his compassion.

He is addressed as 'Nilagriva' in another mantra. The epithet 'Nilagriva' or 'Nilakantha' the 'blue throated' is eloquent about his concern for the welfare of others. When every other good turned his back when the poison arose from the ocean that was churned by the Gods and demons, it was Shiva who took it unperturbed and put it into his mouth. It is a rare virtue to be seen only in the great who hold aloft on their head (praise) the good ones and conceal the evil in their neck (do not speak ill of even the evil ones). Lord Shiva, truly great that he was, holds aloft on his head the moon that causes delight to the people in the world and conceals the deadly poison in his neck. He is the witness of everything and hence called 'Sahasraksa' the thousand eyed. He gives bounteous gifts to everyone who prays sincerely. The mantra reads 'namo astu Nilagrivaya Sahasrakshaya midhushe'.

The term 'Pashupati' occurs in the second anuvaka. The mantra reads, 'Namo vrksebhyo harikeshebhyah Pashunam pataye namah'. The word 'vrksa' means a tree ; however, it is taken here to mean the tree of wordly existence with its numerous branches in the form of countless species of creation in which Pashupati, the lord of souls is immanent. The Linga Purana explains how Siva is lord of Pashus or souls of varied gradation beginning from Brahma down to the plant—'Brahmadyad Sthavarantas ca devadevasya Sulinah, Pasavah parikirtyante samsaravashavartinah, Tesam Patitvat deveshah Shivah Pashupatih smrtah.

The fifth anuvaka opens with a mantra which is in the form of obeisance to Shiva in his various aspects indicated by the words Bhava (the source of universe), Rudra (one who drives away the sorrows of earthly existence); 'Sharva (one who causes the dissolution of the

Universe) and Pashupati (Lord of the souls). The mantra reads 'Namo Bhavaya ca Rudraya ca namah Sharvaya ca Pashupataye ca'. In him we find the pairs of opposites which are indicated by epithete like 'Nilagriva' (blue necked) and 'Sitikantha' (white necked) 'Kapardi (with matted locks) and 'Vyuptakesha (bald headed), 'Hrasva (short) and 'Brhat (vast), jyeshtha (eldest) and 'Kanistha (youngest), Purvaja (cause) and aparaja (effect) etc. In short he is beyond all categorisation and characterisation.

Omkara or Pranava is called 'Tara' the one that carries a person across the ocean of earthly existence to the goal of final beatitude. Shiva is that 'Tara', the pranava. Shivapurana identifies 'Shiva' with Pranava. The seventh anuvaka is important in that it refers to this Pranava, the subtle pancaksara as well as 'Namah Shivaya' the sthula pancaksara in two mantras, 'Namas taraya' and 'Namah Shivaya ca Sivataraya ca'. The Atharva Veda says, Siva eko dhyeyah Sivamkarah'—Shiva, one who causes auspiciousness is the only one to be meditated upon'. It is said in Mahabharata that Shiva is so called because he wills only what is good and auspicious to Gods and demons alike'. The word Shiva is also explained by transposition of letters of the root 'vash' 'to attract' meaning one who possesses attractive traits, the repository of all Kalyana gunas. He is called 'Shivatara' in the mantra to indicate that there is none to excel him in conferring the good things of life here and hereafter.

In the tenth anuvaka prayer is addressed to the auspicious form of Rudra which is capable not only of removing poverty and misery of this world as a physician relieves a person of his physical illness but also in conferring the bliss of immortality.

Ya te Rudra Shiva tanuh shiva vishvahabhesaji
Shiva Rudrasya bhesaji taya no mrida jivase.

वैदिकयुगे भारतस्य भौगोलिक-स्थितिविमर्शः

—डा० कैलाशनाथद्विवेदी

वेदाः विश्वविश्रुतभारतस्य पुरातनसस्कृतेः नावनस्मारकाः । एषु सम्पूर्णकला-धर्म-दर्शनैतिहास-भूगोलादिविविधविषयाणां सम्यक् परिचयः प्राप्यते । तत्र प्रस्तुतशोध-लेखे वैदिकयुगीनभारतस्य भौगोलिकी स्थितिः सोदाहरणं विविच्यते ।

प्रारम्भिके वैंदिके युगे भारतस्य भौगोलिकविस्तारो मध्येशियासमुद्रहिमवत्पर्यन्त-मासीत्; यस्मिन् मूजवच्छर्यणावद्हिमवदर्बुदप्रभृतिपर्वताः, त्रिधन्वयोजना, सिन्धुसरस्वती-प्रभृतयः सप्तसिन्धवो विशेषरूपेणोल्लेखनीयाः सन्ति । यथा—

"अष्टौ व्यख्यत् ककुभः पृथिव्यास्त्रीधन्वयोजना सप्तसिन्धून् ।" —ऋक्० १/३५

"यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।"—ऋक् १०/१२१

"न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीलवः ।"—ऋक्० ८/७७

"दिवः पृथिव्योरव आवृणीमहे मातृन् सिन्धून् पर्वतान्द्वर्यणावतः ।।"ऋक्० १०/३५।

यद्यपि सप्तसिन्धूनां देशस्य पश्चिमोत्तरभूभागे प्राधान्यमासीत् तथापि नानानदनदी-नामपि वर्णनमप्यन्तं महत्त्वपूर्णमस्ति । यथा—

इमं मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये श्रृणुह्या सुषोमया ।।
तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वत्या त्या ।
त्वं सिन्धो कुभया गोमतीं क्रुमुं मेहन्त्वा सरथं याभिरीयसे ।।" ऋक्० १०/७५/

वैदिककालिके भारते सप्तसिन्धुप्रदेशे सीमान्तपरावत्-अर्वावत्-सारस्वतशर्यणावत्-सदृशचतुःसमुद्राणामवस्थितौ द्वयोः समुद्रयोः प्राधान्यमासीत् । यथा—"उभौ समुद्रा वा क्षेति यश्च पूर्व उतापरः ।" ऋक्० १०/१३६ परावति अर्वावति समुद्रे···।" ऋक्० १/१८२/५। परवर्तिशतपथैतरेयादिब्राह्मणग्रन्थेष्वप्यनयोरुल्लेखो विद्यते ।

प्रतीयते प्रारम्भिके वैदिककालात्मकभूभागे भूकम्पादिप्राकृतिकशक्तिभिः प्रभूतं परिवर्तनं बभूव—(पर्वंतश्रृङ्गाणां भ्रंशनम्, समुद्रनदीतालानामुन्मज्जनं पृथ्वीकम्पनञ्च); यस्य सङ्केतो न केवलम् ऋग्वेदस्य द्वितीयमण्डले "यः पृथ्वीं व्यथमानामदृंहद् यः पर्वतान्

प्रकुपितानरम्णात्।"[1] अपि तु ताण्ड्यजैमिनीय[2]ब्राह्मणग्रन्थयोः सरस्वत्या विलोपप्रादुर्भावयोरुल्लेखो विनशनप्लक्षरूपयोः प्राप्यते। वी० वी० केतकर[3]महोदयेन भूगर्भशास्त्रानुसारं राजस्थानक्षेत्रस्य समुद्रगर्भात् प्रकटनम् ईस्वीपूर्वं सार्धसप्तसहस्रवर्षपूर्वमनुमानितम्। अथर्ववेदकाले तु परावत्-अर्वावत्-समुद्रमध्यवर्तिक्षेत्रे स्थलोन्मेषे सति सप्तसिन्धुप्रदेशस्य पूर्वस्मिन् भूभागे मगधाङ्गादिराज्यानां संस्थापना बभूव; येषु सोमपाय्यार्याणां यदुतुर्वशानुद्रुह्यु-पुरुतृत्सुप्रभृतिजनानां राज्यविस्तार आसीत् येषामुल्लेखोऽनेकेषु स्थलेषु विद्यते। यथा—

यदिन्द्राग्नी यदुषु तुर्वशेषु यद् द्रुह्यु्स्वनुषु पूरुषु स्थः।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥' ऋक्० १/१० ।

असुरदानवदासदस्युपणिप्रभृतिपर्वतीयकृष्णानार्यजनानामिव पश्चिमसीमान्तप्रदेशीयाः पक्थभलानस-सिवालिन्‌विषाणिन्-जना अपि आर्याणाममित्राण्यासन्, येषामुल्लेखोऽनेकमन्त्रेषु विद्यते। यथा—

"अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः।
त्वं तस्यामित्रहन् वधर्दासस्य दम्भय॥" १०/२२॥
"आपक्थासो भलानसो भनन्तालिनासो विषाणिनः शिवासः।
आ यो नयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नृन्॥ ऋक्० ७/१८/१
अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात्।
उरुः कक्षो न गाङ्ग्यः॥" ऋक्० ६/४५/३१

सामान्यतः समशीतोष्णजलवायुप्रभावितैर्ऋषीणां पर्जन्यसदृशसूक्तेभ्यः प्रभूतवर्षाणां शोभनं वर्णनं प्राप्यते—

"प्रवाता वान्ति पतयन्ति विद्युदुदोषधी जिह्वते पिन्वते स्वः। ···"
"अवर्षीर्वर्षमुदतु गृभायार्कधन्वान्यत्येतव॥" ऋक्० ५/८३/४/१०॥

पर्याप्तवर्षाभिः सदा हरितसाधनवनारामप्यधिकताऽऽसीत्, किन्तु भयङ्करे दीर्घशीततर्तो सामान्यतो हिमपातेन वनद्रुमाणां पर्णान्यपि विनष्टानि भवन्ति स्म। यथा—
"हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद्वलोगाः।" ऋक्० १०/६८/१०॥

यद्यपि वैदिकयुगे वनानि मानवानामाजीविकाया आधारभूतानि आसन्, येषु धेन्वजाविकाश्वादीनां पशुपालनम्, आखेटकाष्ठाद्युद्योगाः प्राधान्येन प्रचलन्ति स्म; तथापि कृषिकार्येऽपि कर्मशीलार्याणामभिरुचिर्न्यूना नासीत्। द्यूतादिदुर्व्यसनेभ्यो दूरीकृत्य सामाजिकसमृद्ध्यै मङ्गलकामनायै कृषिं प्रति ध्यानाकर्षणं कृत्वा वैदिकर्षिः कथयति।

---

१. ऋग्वेदे २।१५।६

२. ताण्ड्यब्रा० २५।१०।१, १६, जैमिनिब्रा० २।२।९७

३. प्रथमप्राच्यविद्यासम्मेलनम्' १९१९, पुणे (I st A. I. O. C. Poona)

"अक्षैर्मा दीव्यः कृषिमित् कृषस्व, वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितवस्तत्र जाया तन्मे विचष्टे सवितायमर्यः॥

—ऋक्० १०/३४/१३

शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभियान्तु वाहैः।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम्॥

—ऋक्० ४/५७/८

तैत्तिरीयसंहितायामपि ऋत्वनुकूलं यवव्रीहिप्रभृतिधान्यानां वपनपरिपाकयोरुल्लेखो[1] विद्यते। कृषिसम्बन्धिविधीनां क्रियाणामपि वर्णनं विद्यते परवर्तिवैदिकसाहित्ये। यथा शतपथब्राह्मणे—"कृषन्तः वपन्तः लुनन्तः मृणन्तः।" (शत० १/६/१/३)। सामान्यतः शीतर्तौः सस्यं चैत्रमासे[2] पचति स्म। तद्युगीनपरिवारे श्रमपूर्णाजीविकायां वैविध्यमपि वर्तते। यथा—

कारुरहं ततो भिषगुपलप्रक्षिणी नना।
नानाधियो वसूयतोऽनुगा इव तस्थिमेन्द्रायेन्दो परिस्रव॥" ऋक्० ९/११२/३

वहूद्योगिनो वैदिका आर्या ऊर्णिकार्पासिकस्यूतवस्त्रैः पौष्टिकखाद्यपानेन ग्रीष्मशीत-वर्षात्राणकारिगृहावासेन च रुक्मवक्षसो मणिग्रीवाः हिरण्यकर्णाश्च भूत्वा सुखेन जीवनं यापयन्ति स्म।

तत्कालीनगृहनिर्माणकलाऽपीदृश्युत्कर्षपूर्णा जलवाय्वनुकूला चासीत्, यत् सहस्र-स्तम्भमयदीर्घगृहाणामपि निर्माणमभवत्—

"सहस्रस्थूणं बिभृथः सह द्वौ..." —ऋक्० ५/६२/६

वैदिकयुगीना राज्यव्यवस्था कुलमग्रामणीव्राजपति-विश्वपतिराजादिभिः कुलग्रामव्रजपुर-विड्जनराष्ट्रादिविविधरूपे संविभाज्य सम्यग्रूपेण सञ्चाल्यते स्म। व्यापक-प्रशासनिक-प्रभुसत्तादृष्ट्या राष्ट्रे 'सम्राट्', 'एकराट्' पदधारिणो राजानः सेनापतिपुरोहित (प्रधान-मन्त्रि) प्रभृत्यधिकारिणां साहाय्येन सभा-समिति-सदृश्या लोकतन्त्रात्मकप्रणाल्या प्राशासुः। परन्तु पारस्परिकसामयिकराजनैतिक-सामाजिकधार्मिकमतभेदैर्युद्धान्यप्यनिवार्याणि भवन्ति स्म, येषु युद्धेषु विविधशस्त्रास्त्रप्रयोगेण सह साङ्ग्रामिककूटनीतेः, प्राकृतिकशक्तीनां भौगोलिक-कारकाणां (नदी-प्रवाहपर्वतावरोधभयङ्करवृष्टिप्रभृतीनामपि) प्रत्यक्षप्रभावः परिलक्ष्यते। दिवोदासकाले पर्वतीयप्रदेशे सम्पन्नमार्यानार्ययुद्धं, तृत्सुराजसुदाससमये जलप्रवाहपूर्ण-परुष्णीतटे दाशराज्ञयुद्धञ्च तथ्यमिदं प्रमाणयतः।

प्रायः परुष्णीवितस्तासरस्वत्यादिनदीनां सुरम्यतटेषु भरद्वाजवशिष्ठविश्वामित्र-वामदेवजमदग्नि-कण्वादिमुनीनामाश्रमा आसन्, येषु धर्मदर्शनकला-ज्ञानविज्ञानानां पराकाष्ठां प्राप्य वैदिकसंस्कृतेः समुज्ज्वला, शाश्वती, सार्वभौमिकी समृद्धिरधिगताऽऽसीत्।

---

१. तैत्ति० सं० ७।२।१०।२।
२. कौशीतकिब्राह्मणे, १९।३

सूर्याग्निवायुपर्जन्यवरुणपृथ्वीन्द्रादि-प्राकृतिक-शक्तीनामुपासना हवनञ्च महायज्ञसंस्कारा-श्रमपुरुषार्थादीनां व्यवस्था, धर्मदर्शनयोराध्यात्मिकताकर्मवादिताशावादितामोक्षादीनामव-धारणा ऋषीणामार्याणां च राष्ट्रियसांस्कृतिकैकतायाः समुपलब्धये चैका महती संसिद्धिरासीत्।

वैदिकयुगीनसांस्कृतिकोत्कर्षज्ञानाय महर्षिभरद्वाजवशिष्ठयोर्यौद्धिकवर्णनपूर्णसैन्य-विज्ञानसम्बद्धमन्त्राः, कृषिविकाससम्बन्धिनो वामदेवस्य मन्त्राः, ज्योतिषविषयका अत्रि-मुनेर्मन्त्राः वनस्पतिजीवविज्ञानविषयका अगस्त्यस्य मन्त्राः, भौगोलिकज्ञानाय श्यावाश्वस्य मन्त्राश्च महत्त्वपूर्णाः सन्ति।

वैदिकसप्तसैन्धवप्रदेशीयानां पावनसप्तनदीनामखण्डभावात्मकैकतासंवर्धनाय न केवलं तद्युगीनार्यावर्ते मध्यदेशे वाऽपि तु समग्रे भारतेऽपि महत्त्वमासीत्। अद्यापि प्रत्येकं श्रद्धालुः भारतीयः पुरातनसांस्कृतिकैतिहासिक-धार्मिकभावाभिभूतो भूत्वासां पावनं राष्ट्र-व्यापिस्वरूपस्य स्मरणं स्नानसमये करोत्येव—

> **गङ्गे च यमुने चैव गोदावरि सरस्वति।**
> **नर्मदे सिन्धु कावेरि, जलेऽस्मिन् सन्निधिं कुरु॥**

परमप्रतापितृत्सूनां (पुरु+कुरु-भरतानां) वैदिकयुगीना यज्ञियसंस्कृतिः 'भारती' प्रादुर्भूय सांस्कृतिकसमृद्धिं विजयञ्चाधिगत्य कालान्तरेऽस्य राष्ट्रस्य नामकरणेऽपि आधारवती बभूव। पुरुवंशिदौष्यन्तेर्भरतस्य प्रतापमहिमा न केवलं शतपथब्राह्मणे (१३/५/३/१३) वर्णितोऽस्ति प्रत्युत निरुक्ताधारेण मनुपरम्परया ऋषभपुत्रभरतस्याऽपि वर्णनं विद्यते पुराणग्रन्थेषु —

> **प्रजानां भरणाच्चैव मनुर्भरत उच्यते।**
> **निरुक्तवचनाच्चैव वर्षं तद् भारतं स्मृतम्॥**

—(वायु० ४५/७६, मात्स्ये० ११४/५.६)

अस्या यज्ञियभारतीसंस्कृतेः संरक्षणं सम्प्रसारणञ्च मनीषिभिर्मुनिभिर्मनस्विभिरार्यैः सततं न केवलं स्वदेशेऽपि तु शतारित्रमयनौकाभ्यः समुद्रं तीर्त्वाऽन्यदेशेषु द्वीपान्तरेष्वपि परिभ्रम्य कृतम्। अस्य सङ्केत ऋग्वेदेऽनेकस्थलेषु वर्तते। यथा —

"अनारम्भणे...अग्रभणे समुद्रे...शतारित्रां नावमातस्थिवांसम्।"—ऋक्० १/११६/५

"प्रयत्समुद्रमतिशरपर्षिपारया...तुर्वशं यदुं स्वस्ति।" —ऋक्० १/१७४/९

"वि द्वीपानि पापतन्तिष्ठद् दुच्छुनो मे।" —ऋक्० ८/२०/४

साम्प्रतमपि वैदिकभारतीसंस्कृतेः पुरातनावशेषा ईरानेशकलेविलोनियासीरिया-हिन्देशियादिदेशेषु बाहुल्येन प्राप्यन्ते। अस्माभिः स्वदेशानुरागिभिस्तस्या गौरवरक्षणार्थं राष्ट्रियसांस्कृतिकैकतायै च सततं समाचरणीयम्।

---

१. वायुपुराणे—३३।५१, ५२ मार्कण्डेयपुराणे—५३।३९, ४०।

द्रष्टव्यम्—कर्णपूरविश्वविद्यालयीय डी० लिट्० (साहित्यवारिधि-)उपाधये स्वीकृतः शोधग्रन्थः 'सप्तसैन्धवप्रदेशः' (ऋग्वैदिक भूगोल); साहित्यनिकेतनम्, कर्णपुरम्, १९८४ वर्षे प्रकाशितम् हिन्दी संस्मरणम्।

गृह्यसूत्रों के परिप्रेक्ष्य में विष्णु-विवेचन

—डा० वेदपाल

गृह्यसूत्रों का मुख्य प्रतिपाद्य गृह्यकर्मों का निरूपण करना है। ये सभी कर्म प्रायः यज्ञों के माध्यम से सम्पादित किये जाते हैं। यद्यपि गृह्यसूत्रों में स्वतन्त्ररूप से यज्ञों का वर्णन नहीं हैं। यहां तो मुख्यतः षोडश-संस्कारों का वर्णन है। इन सभी संस्कारों के समय अनेक देवों का स्तवन या आह्वान किया जाता है। इन्हीं में 'विष्णु' की अपनी महता है, जिसे निम्न प्रकार व्यक्त किया जा सकता है—

१. प्रायश्चित्ताधिपति —

गृह्यसूत्रकार ब्राह्मण एवं श्रौतसूत्रकारों की इस मान्यता से पर्याप्त प्रभावित प्रतीत होते हैं कि—यज्ञ विष्णु है। अतः यज्ञ में अयज्ञीय—अवैष्णवी अर्थात् यज्ञविषयेतर वाणी का प्रयोग नहीं किया जाना चाहिये। यदि अयज्ञीय वाणी का व्यवहार वहां पर हो जाये तो उसके प्रायश्चित्तार्थ वैष्णवी ऋचा का पाठ करना चाहिये[१]।

विष्णु ही यज्ञ और यज्ञ हीं विष्णु है। वह विष्णु ही यज्ञ की दुरिष्ट से रक्षा करता है। अतः यज्ञ में अयज्ञीय- अवैष्णवी वाक् का प्रयोग करने पर उसके प्रायश्चित्तार्थ वैष्णवी ऋक् वा यजुः का प्रयोग यज्ञ को पूर्ण करने के निमित्त है। इस विषय में गृह्यसूत्रकार सर्वांश में श्रौत-सूत्रों[२] का अनुसरण करते हैं।

२. दिगधिपति —

विवाह प्रकरण में जय, अभ्यातान और राष्ट्रभृत होम के अनन्तर सप्तपदी से पूर्व आधिपत्याहुतियां दी जाती हैं। इनमें एक आहुति 'विष्णु' के लिये भी है। इसमें विष्णु को दिशाओं का अधिपति कहा गया है और उससे प्रार्थना की गयी है कि वह इन दिशाओं से हमारी रक्षा करे[३]।

---

१. नायज्ञियां वाचं वदेत्।
यद्ययज्ञियां वाचं वदेद् वैष्णवीमृचं यजुर्वा जपेत्॥ गोभिल गृ० १.६.१८-१९
इदं विष्णुरिति वा ऋचम्॥ द्राह्यायण गृ० १.१.२४-२५

२. द्रष्टव्य—आश्व० श्रौ० पू० ष० १.५, कात्या० श्रौ. २.२.६

३. आधिपत्यानि जुहोति - काठक गृ० ३.१.१५
मे आधिपत्याहुतियां २१ हैं—"विष्णुर्दिशामधिपतिः स मावतु तस्मै स्वाहा" आदि।

दुःस्वप्न देखने पर उससे होनेवाले अनिष्ट के निवृत्त्यर्थ तिलमिश्रित घृत की चार व्याहृति-आहुतियां सामान्य आघारादिविधि के पश्चात् देकर देवों का उपस्थापन करने का विधान है। इन उपस्थापित देवों में 'विष्णु' को नीचे (ध्रुवा दिक्) से रक्षा करनेवाला कहा गया है[1]।

३. भूत विनाशक —

विनायक नामक भूतविशेषों के द्वारा ग्रस्त व्यक्ति को वनमृगों द्वारा खोदकर बनाये गये बिलों की मिट्टी, रोली, गुग्गल तथा बड़ी नदियों के चार स्रोतों (धाराओं) के जल से परिपूर्ण चार चित्र-विचित्र घड़े लेकर उनमें केसर, कस्तूरी, मिष्टादि छहों रसों, ब्राह्मी आदि उत्तम ओषधी, पद्मराग आदि सभी रत्न, कलावा, दही तथा शहद इन सब पदार्थों को मिलाकर घड़ों में डालकर पुनः सब को मिला ले। तदनन्तर भूतग्रस्त व्यक्ति को बैल (जिसे बधिया न किया गया हो अर्थात् साँड) के चर्म पर बैठाकर उक्त जल से समन्त्रक स्नान कराने का विधान है।

भूतमुक्त्यर्थ स्नान के समय पढ़े जानेवाले मन्त्रपठित देवों में विष्णु भी एक हैं[2]। जो विष्णु के विनायक (भूतविशेष) विनाशकत्व का बोधक है।

४. गृह्यदेवता

गृह्यसूत्रों के अनुसार मानव-जीवन को सुसंस्कृत एवं परिष्कृत बनाने के लिये संस्कारों की महत्ता सर्वोपरि है। सामान्यतः ये संस्कार सोलह (१६) माने गये हैं किन्तु वैखानस गृह्यसूत्र[3] में इन की संख्या अठारह (१८) बतायी गयी है।

संस्कारों में प्रथम संस्कार गर्भाधान है। इस संस्कार में पुत्रप्राप्ति की कामना को लेकर किये जानेवाले यज्ञ में 'विष्णुर्योनिं कल्पयतु'[4] मन्त्र से विष्णु-स्तवन करने की व्यवस्था है[5]। अन्यत्र प्रथम सम्भव के समय दक्षिण हस्त से स्त्री के उपस्थ के अभिमर्शन का विधान भी उक्त मन्त्र से किया गया है[6]।

---

१. यदि दुःस्वप्नं पश्येद् व्याहृतिभिस्तिलान् हुत्वा दिश उपतिष्ठेत—...।...।... विष्णुश्च मा पृथिवी च नागाश्चाधस्ताद् गोपायताम्। मानव गृ० २.१५.१

२. एतान्सम्भारान्संसृज्य-ऋषभचर्मारोह्य-अथैनं स्नपयन्ति-सहस्राक्षं शतधारमृषिभिः पावनं कृतम्। ताभिष्ट्वाभिषिञ्चामि पावमानीः पुनन्तु त्वा ॥ अग्निना दत्ता। ...... विष्णुना दत्ता। ... पावमानी पुनन्तु त्वेति सर्वत्रानुषजति ॥ मानव गृ० २.१४.२६

३. ऋतुसङ्गमनगर्भाधान......पाणिग्रहणानीत्यष्टादशसंस्काराः शारीराः—वै० गृ० १.१.१

४. ऋक् १०.१८४.१, अथर्व० ५.२५.५; श० प० १४.९.४.२०
ऋग्वेद में उक्त मन्त्र का देवता विष्णु है, किन्तु अथर्व में 'योनिगर्भः' है।

५. षाडाहुतं प्रतिपदि प्रतिपदि पुत्रकामः ॥ मानव गृ० २.१८.१
विष्णुर्योनिं कल्पयतु .. ॥ मानव गृ० २.१८.६

६. द्राह्यायण गृ० १.४.१५; गोभिल गृ० २.५.९

कौषीतकि गृह्यसूत्र एवं सांख्यायन गृह्यसंग्रह में उक्त मन्त्र का विनियोग सीमन्तोन्नयन (गर्भ के ७वें या आठवें मास) संस्कार में हुआ है। तदनुसार[1] इस मन्त्र को पढ़कर गर्भवती को अक्षत मिश्रित उदक पिलाने का विधान उपलब्ध होता है।

गर्भावस्था के ७वें मास के अधिक भाग के व्यतीत होने अथवा आठवें मास में पुंसवन संस्कार किया जाता है। इसमें 'प्रतद् विष्णुः',[2] मन्त्र से स्थालीपाक तथा 'पुमान्विष्णुः'[3] मन्त्र से आज्याहुति दी जाती हैं।[4]

पुंसवन संस्कार में विष्णुस्तवन या विष्णु को स्थालीपाक अथवा आज्याहुति पुत्रप्राप्ति की कामना को लेकर दी जाती है। पूर्व संस्कार (गर्भाधान) में विष्णु से ही स्त्री के उपस्थ को गर्भग्रहण योग्य बनाने की प्रार्थना की जाती है। यहां उसी विष्णु से उस उपस्थापित गर्भ से पुत्रप्राप्ति की कामना की गयी है।

भारतीय संस्कृति के अनुसार मानवमात्र पितृ, ऋषि एवं देव इस ऋणत्रय से ऋणवान् उत्पन्न होता है इनमें से पितृऋण से अनृण होने का साधन है—विवाह संस्कार। भारतीय परम्परा जब तक सप्तपदी न हो जाए, तब तक विवाह को पूर्ण नहीं मानती है।

सप्तपदी में ईशान दिशा[5] में वर एवं वधू दोनों सात-सात पग चलते हैं। इनमें वर मन्त्रपाठ करके वधू को चलने के लिये कहता है। प्रत्येक मन्त्र के साथ एक-एक पग चलना होता है। सप्तपदी के सातों मन्त्रों में यह स्पष्ट किया गया है कि सात पग चलने का उद्देश्य क्या है? तद्यथा—

प्रथम पग 'इषे'— अन्नादि की प्राप्ति के लिये है[6]। वर कहता है कि विष्णु तुझे 'इष्' के लिये चलने का सामर्थ्य प्रदान करे, वह तुझे पुत्रों की प्राप्ति कराये जो वृद्धावस्था में तेरा सहारा बनें।

उर्ज-बल प्राप्ति के निमित्त द्वितीय पग[7], रायस्पोष[8] — धन के लिये तृतीय पग, मयोभव[9]-सुख के निमित्त चतुर्थ, प्रजासन्तान एवं पशु[10] आदि के लिये पञ्चम, छहों ऋतुएं सुखदायी होवें[11] इसके लिये छठा तथा सखा-मित्रभाव-समानता से रहने के लिये सप्तम पग

---

१. कौषी० गृ० १.२२; सांख्यायन गृह्य संग्रह अ० १, पृ० २२
२. ऋक् १. १५४. २
३. काठक गृ० ३. ८.३
४. काठक गृ० ३.८.२-३
५. अथैनामुत्तरेणाग्निं दक्षिणेन पदा प्राचीमुदीचीं वा दिशमभि प्रक्रमयति। आप० गृ० २.४.१५
६. एकमिषे विष्णुस्त्वा नयतु। गोभिल गृ० २.२.१०; मन्त्र ब्रा० १.२.६
७. द्वे ऊर्जे विष्णुस्त्वा नयतु। गोभिल गृ० २.२.१०; मन्त्र ब्रा० १.२.७
८-११. त्रीणि रायस्पोषाय चत्वारि मयोभवाय पञ्च प्रजाभ्यः षड् ऋतुभ्यो...(विष्णुस्त्वेति सर्वत्रानुषजति)। काठक गृ० ३.१.४२

चला जाता है[1]। यहां 'विष्णुस्त्वा नयतु' को प्रत्येक मन्त्र के साथ सम्बद्ध किया जाता है।

काठक के अनुसार सातवां पग दीर्घायुष्य के लिये चलना होता है, तथा सखाभाव सातो पगों में समान रूप से रहता है।[2]

सांख्यायन गृह्यसंग्रह के अनुसार छठा पग शत्रुओं के लिये[3] अर्थात् शत्रुओं के विनाशार्थ चला जाता है। साथ ही यहां प्रत्येक पग चलने के पश्चात् जलप्रोक्षण किया जाता है।

गर्भाधान से लेकर सप्तपदी पर्यन्त किया जानेवाला विष्णु स्मरण उसकी महत्ता का बोधक है। जिससे स्पष्ट है कि यह देव मनुष्य की सभी कामनाओं की पूर्ति का सामर्थ्य रखता है तथा वह सभी प्रकार की सुख-समृद्धि का दाता है। इस प्रकार अनिष्ट से रक्षा, गर्भाधान से लेकर विवाह तक किये जाने वाले विष्णु-स्मरण के आधार पर विष्णु को गृह्यदेवता कहना अनुपयुक्त न होगा।

अन्त में साररूप में कहा जा सकता है कि ऐहलौकिक एवं पारलौकिक अभ्युदय की कामना से सम्पाद्यमान संस्थात्रय में विभक्त अग्निष्टोम आदि यज्ञों में होने वाली न्यूनता, विकृति तथा व्रतभङ्ग आदि ऐसे कृत्य जिनसे यज्ञ की सफलता प्रभावित हो सकती हो, उन सभी अव-स्थाओं में प्रायश्चित्तार्थ विष्णु-स्मरण द्वारा न्यूनत्व आदि से होनेवाला विघातकत्व नष्ट किया जाता है। दिगधिपति एवं विनायक विनाशकत्व (भूत-विशेष -दुष्ट विचार अथवा विशिष्ट रोगा-णुओं से रक्षार्थ) रूप में किया जानेवाला विष्णुस्मरण तथा गृह्यदेवता के रूप में प्रतिपादित उसका अपरिमेय योगदान उसकी महत्ता का द्योतक है।

इस प्रकार कहा जा सकता है कि परवर्ती पुराण-वाङ्मय में वर्णित देवत्रयी में जगत् रक्षकत्व-पालकत्व रूप में उपलब्ध विष्णु वर्णन का उपजीव्य उपरिवर्णित गृह्यसूत्र वर्णन ही है।

—०—

१. सखे सप्तपदी भव०... — पारस्कर गृ०-१.८

२. — दीर्घायुत्वाय सप्तमं सखा सप्तपदा भव सुमृडीका सरस्वति मा ते व्योम संदृशे विष्णुस्त्वा न्वेतित्यनुषङ्गः —काठक गृ० ३.१.४२

३. शत्रुभ्यः षट्पदी भव। सां० गृह्यसंग्रह पृष्ठ १४

THE ANNASUKTA AND ITS SIGNIFICANCE

—Dr. S. Venkitasubramonia Iyer

Sukta 117 of the tenth Mandala (Anuvaka 10), corresponding to Vargas 22-23 of Adhyaya 6 of the eight Ashtakath, of the Rigveda is generally known as Annasukta in view of its emphasis on giving food to the needy (annadana). It is a hymn on generosity, an aspect of social service, and a call to share one's wealth with those that are in less favourable circumstances. It serves as an example to silence those who hold that social service is not an essential element in the Hindu ideal of life, which, according to them, is concerned mainly with liberation and life after death. Let us examine this hymn and its import.

1. न वा उ देवाः क्षुधमिद् वधं ददु-
   रुताशितमुप गच्छन्ति मृत्यवः ।
   उतो रयिः पृणतो नोप दस्य-
   त्युतापृणन् मर्डितारं न विन्दते ।।

The great Almighty has not ordained
Hunger as the sole cause of death,
As it can come in myriad ways
To him that is quite well fed too.
Wealth expended to help the needy
Does not deplete its source at all.
But he who cares not to spend it so,
Fails to find a friend for solace.

This administers a warning to the miser who, although having a lot of food, does not give it in the least to one in hunger. The hungry man may die of starvation, but the one with food need not be complacent that he will not die. For, death can occur in ever so many ways and it well be falls even one who eats well. It also points out that money spent on the

worthy and the needy is not drained away, but grows because the good deed, 'in its turn, provides the means for it. And he who does not let loose his hoard, will not get the sympathy of anyone when he is in distress. Even providence forsakes him since he does not spend to propitiate the gods.[1]

2. य आध्राय चकमानाय पित्वो-
ऽन्नवान्त्सन् रफितायोपजग्मुषे ।
स्थिरं मनः कृणुते सेवते पुरो-
ऽतो चित् स मर्डितारं न विन्दते ॥

He, who having abundant food,
Makes up his mind not to give
To the poor, frail, famished wretch,
And eats, to boot, in his sight,
Never can find a single soul
To comfort him when so he needs.

The man who is absolutely unmoved by the piteous groans of the destitute in penurial anguish and not only pays a deaf ear to the entreaties of the suppliant, but turns to his own enjoyment in their very presence, is condemned here. He will have none to his succour when he stands in need.

3. स इद्भोजो यो गृहवे ददा-
त्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता
उतापरीषु कृणुते सखायम् ॥

But he who takes the food he holds,
Giving it to him who needs it too,
Gets in plenty and in store
To go with him at the call of death.
It bestows on him a benefit more
By turning even the enemies into friends.

---

1. Vide Sayana's commentory...
इह बन्धवोऽप्रदानान्न सुखयति, देवा अपि हविष्प्रदानाभावात् ।

The man who shares the food with him who has come to his house seeking it, is eommended here. He gets two benefits. One is that it gains for him adequate merit. The other is that it produces the remarkable effect of making those illdisposed towards him, for whatever reason, well-disposed. Alms thus generates two positive favours.[1]

4. न स सखा यो न ददाति सख्ये
सचाभुवे सचमानाय पित्वः ।
अपास्मात् प्रेयान् न तदोको अस्ति
पृणन्तमन्यमरणं चिदिच्छेत् ॥

A friend he is not who does not give
To the friend that serves him ever and anon,
Food and things he badly needs
And puts him to the need to seek service
Under some one else more noble and kind.
His house no more is a happy home.

Let alone the silent suppliant and the vociferous beggar. The miser may not extend hospitality even to his kith and kin and constant companions who render him service. He then ceases to be a friend, being never a benefactor, They turn away from him, being forced to do so by his niggardly attitude, and seek the patronage of some one munificent. His house then ceases to be a home, being without those that really make it lively and happy.[2] So one should not be stingy, particularly towards one's

---

1. In the exposition of this stanza, we have followed the interpretation of Venkatamadhava who takes *bhoja* as meaning *bhokta* (eater, enjoyer) and *yamahuti* as *yamasya ahvana* meaning *marana* (death). Sayana, however, takes *bhoja* as meaning *data* (giver) and *yamahuti* as *yajna* (sacrifice) and interprets that the liberal giver attains his desires in sacrifice. What he means is, perhaps, the donor gets merit equivalent to that of performing a sacrifice.

2. Vide Sayana—
यद्येनं परित्यज्य गच्छेत् तर्हि तदोकः निवासः सदनं
न अस्ति न भवति । सदनं हि बन्धुभिः परिवृतम् ।

own friends, relations and dependants.[1]

5. पृणीयादिन्नाधमानाय तव्यान्
द्राघीयांसमनु पश्येत पन्थाम् ।
ओ हि वर्तन्ते रथ्येव चक्रा-
न्यमन्यमुप तिष्ठन्त रायः ॥

Let the affluent help the suppliant
With all the riches kept in store,
And see the pathway long of virtue,
Knowing well that fortune is fleeting
And rolls like the moving chariot's wheels,[2]
Now going to one, now to another.

This is directed towards the highly opulent. They should remember two things. One is that parting with their riches, giving them to those in object poverty, will take them to the meritorious path of virtue leading to heaven. The other is that prosperity is inconstant and alternates with adversity, fortune favouring one man at one time and another man at another time. A person rolling in wealth may not be able to do so always and, when he is in a position to help others, he should do so without hesitation.[3]

6. मोघमन्नं विन्दते अप्रचेताः
सत्यं ब्रवीमि वध इत्स तस्य ।

---

1. For the latter part of the stanza which we have explained following Sayana, a different interpretation is given by Venkatamadhava. According to him, the man who does not give has no place in the world; he does not like others giving either, but desires that the generosity of others may be directed towards himself.

   सः अस्मात् अप प्र गच्छति लोकात्, न तत्र तस्य स्थानं भवति। कामम प्रद एव अस्मिन् लोके प्रयच्छन्तमन्यमरममाणमिच्छति । न रमतें कदर्यो दाने, कमप्यात्मनः पृणन्तमिच्छति ।

2. The analogy of the chariot wheel is adopted by great poets like Bhasa and Kalidasa.
   चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः (Bhasa's *Svapnavasavadatta*)
   नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण (Kalidasa's *Meghasandcsa*).
3. Vide Sayana—तस्माद् धनानि देयानीति भावः ।

The man who shares the food with him who has come to his house seeking it, is eommended here. He gets two benefits. One is that it gains for him adequate merit. The other is that it produces the remarkable effect of making those illdisposed towards him, for whatever reason, well-disposed. Alms thus generates two positive favours.[1]

4. न स सखा यो न ददाति सख्ये
सचाभुवे सचमानाय पित्वः ।
अपास्मात् प्रेयान् न तदोको अस्ति
पृणन्तमन्यमरणं चिदिच्छेत् ॥

A friend he is not who does not give
To the friend that serves him ever and anon,
Food and things he badly needs
And puts him to the need to seek service
Under some one else more noble and kind.
His house no more is a happy home.

Let alone the silent suppliant and the vociferous beggar. The miser may not extend hospitality even to his kith and kin and constant companions who render him service. He then ceases to be a friend, being never a benefactor, They turn away from him, being forced to do so by his niggardly attitude, and seek the patronage of some one munificent. His house then ceases to be a home, being without those that really make it lively and happy.[२] So one should not be stingy, particularly towards one's

---

1. In the exposition of this stanza, we have followed the interpretation of Venkatamadhava who takes *bhoja* as meaning *bhokta* (eater, enjoyer) and *yamahuti* as *yamasya ahvana* meaning *marana* (death). Sayana, however, takes *bhoja* as meaning *data* (giver) and *yamahuti* as *yajna* (sacrifice) and interprets that the liberal giver attains his desires in sacrifice. What he means is, perhaps, the donor gets merit equivalent to that of performing a sacrifice.

2. Vide Sayana—
यद्येनं परित्यज्य गच्छेत् तर्हि तदोकः निवासः सदनं
न अस्ति न भवति । सदनं हि बन्धुभिः परिवृतम् ।

own friends, relations and dependants.[1]

5. पृणीयादिन्नाधमानाय तव्यान्
द्राघीयांसमनु पश्येत पन्थाम् ।
ओ हि वर्तन्ते रथ्येव चक्रा-
न्यमन्यमुप तिष्ठन्त रायः ॥

Let the affluent help the suppliant
With all the riches kept in store,
And see the pathway long of virtue,
Knowing well that fortune is fleeting
And rolls like the moving chariot's wheels,[2]
Now going to one, now to another.

This is directed towards the highly opulent. They should remember two things. One is that parting with their riches, giving them to those in object poverty, will take them to the meritorious path of virtue leading to heaven. The other is that prosperity is inconstant and alternates with adversity, fortune favouring one man at one time and another man at another time. A person rolling in wealth may not be able to do so always and, when he is in a position to help others, he should do so without hesitation.[3]

6. मोघमन्नं विन्दते अप्रचेताः
सत्यं ब्रवीमि वध इत्स तस्य ।

1. For the latter part of the stanza which we have explained following Sayana, a different interpretation is given by Venkatamadhava. According to him, the man who does not give has no place in the world; he does not like others giving either, but desires that the generosity of others may be directed towards himself.

स: अस्मात् अप प्र गच्छति लोकात्, न तत्र तस्य स्थानं भवति। काममप्रद एव अस्मिन् लोके प्रयच्छन्तमन्यमरममाणमिच्छति । न रमते कदर्यो दाने, कमप्यात्मनः पृणन्तमिच्छति ।

2. The analogy of the chariot wheel is adopted by great poets like Bhasa and Kalidasa.
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः (Bhasa's *Svapnavasavadatta*)
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण (Kalidasa's *Meghasandesa*).

3. Vide Sayana—तस्माद् धनानि देयानीति भावः ।

नार्यमणं पुष्यति नो सखायं
केवलाघो भवति केवलादी ।।

The food he has is indeed in vain,
Being not inclined to give it to others.
What he begets is his ruin alone.
I say this in truth for all to know.
Pleasing neither God nor friend,[1]
Eating alone, he incurs but sin.

Food and other possessions should be properly utilised, and the best way to do so is to distribute them to those who do not have them. That will help the needy friends and propitiate the Gods. One who is not so inclined serves neither man nor God. It is highly sinful to enjoy all alone. The Rishi, the seer of the hymn, says that he is declaring in unmistakable terms the truth that selfishness is suicidal and it does not conduce to continuous prosperity or spiritual felicity.

7. कृषन्नित् फाल आशितं कृणोति
यन्नध्वानमपवृङ्क्ते चरित्रैः ।
वदन् ब्रह्मावदतो वनीयान्
पृणन्नापिरपृणन्तमभि ष्यात् ।।

The plough when used in the field alone
plays its part in raising crops.
The man who goes out to the world alone
Is able to make his deserts known.[2]
The teacher who expounds his knowledge alone

---

1. The God Aryaman is specifically mentioned, but we have taken it as standing for Gods in general. (Vide Sayana—
अर्यमणम् । उपलक्षणमिदम् । सर्वान् देवानर्यमादीन् न पुष्यति ।)
2. The second line in the stanza is usually rendered as 'He who bestirs, completes the journey'. Though this may be literally correct, the ultimate idea seems to be what we have given, when we take the statement in conjunction wiih the other instances here, in all of which the contrast is between the inert and the active, and the activity is for the benefit of others more than for one self.

Gains his place above the rest.
The rich man who donates in plenty alone
Becomes superior to one not so,

Every thing serves its purpose only by its practical application and proper utilisation. This is illustrated by some examples. The ploughshare kept at home is of no avail. It has to be put to use in the field to make it ready for sowing. A man of parts can never be known if he stays at home. He has to go out to the wide world and demonstrate his skill to get approbation. A learned man who is taciturn is no better than the rest of his kind. He should disseminate his knowledge to get his merit recognised. Similarly the moneyed man can never earn respect if he keeps all the money for himself. He should gift it liberally to the worthy and the needy and for noble cause. That alone will distinguish him from other moneyed persons.[1] In fact, this utilitarian aspect should be considered to be their natural potentiality, which, when turned to action, conduces to the benefit of others at large.[2]

8. एकपाद् भूयो द्विपदो वि चक्रमे
द्विपाद् त्रिपादमभ्येति पश्चात्।
चतुष्पादेति द्विपदामभिस्वरे
सम्पश्यन् पङ्क्तीरुपतिष्ठमानः॥

The man with a part ever looks up
To one with two, he to him with three.
He that has four looks at their rows,
Held by them all in high esteem.

The position of a man who considers himself rich is brought out in the form of riddle. He who has one unit of wealth finds himself inferior to one who has two, and strives to acquire more to rise to his level. He who has two units, although superior to the first, finds himself inferior to one

1. The explanation is mainly following Venkatamadhava who emphasises the activity in all these—
कृषन्नेव कालः पुरुषं आशितं करोति, न गृहे निक्षिप्तः।
2. Vide Sayana —
ते स्वकर्मणि प्रवर्तमानाः परेषामुपकारकाः।

who has three and attempts to become one like him. One who has wealth on all fours, being superior to all these, casts a look of condescension on them. So considering grades of wealth, rich and poor are relative expressions, and none is absolutely rich.[2] So, casting aside the pride of possession, one should utilise one's wealth for the sake of others.[1]

9. समौ चिद्धस्तौ न समं विविष्टः
संमातरा चिन्न समं दुहाते।
यमयोश्चिन्न समा वीर्याणि
ज्ञाती चित् सन्तौ न समं पृणीतः॥

The hands, though a pair, act not a like;
Sister cows yield not milk alike;
Brothers twins are not bright alike;
Scions of a stock do not give alike.

The analogies draw our attention to two points. One is that although there may be apparent equality, actually there may be inequality, even as the left hand does not perform the functions which the right hand is capable of, cows born to the same mother may not yield the same quantity of milk and twin born persons may not have the same ability and attainments. So between two persons similarly placed to all appearance, one may be in need of money and material. He who is in a position to help should go to his help.[3] The other is that one need not wait to know what another like him does. Real means and in born temperament may

---

1. Vide Sayana—
अन्योन्यापेक्षया सर्वे उत्तमाधमाः।

2. Being an example of what is calle riddled, this stanza is capable of other interpretations as well. We have followed Sayana who takes *pada* as meaning *bhaga* (part, part of wealth—
पादशब्दो भागवचनः, एकपाद एकभागधनः पुरुषः)
and gives as the import of the stanza the injunction for liberality in gifts—त्वमह्येव धनवानिति न मन्येः किन्त्वतिथिभ्यो धनानि ददस्वेत्यर्थः। Venkatamadhava explains it in relation to vital airs, but that does not seem to suit the context here.

3. Vide Sayana—यस्य धनमस्ति स एव दद्यादित्यर्थः।

vary. So, irrespective of what another does, one should be ready to extend helping hand. We also get the indication that inequality is a natural faelor.

Let us now see what the above examination of the hymn enables us to know :

(1) In a very telling manner the hymn denounces the selfish and the stingy and extols the generous and the gracious.

(2) It points out that the possession of wealth is an accident. Wealth always rolls making princes paupers and paupers princes.

(3) It states that inequalities may be natural, but wealth should flow from the rich to the poor, and the man who enjoys all by himself incurs only sin and no virtue.

(4) It warns the miser who sits tight over his store, that he will be deserted by his kinsmen and friends and forced to face a life of isolation with none even to say a word of comfort.

(5) It declares that one should not strive to become equal to another who is more affluent, but look at those that are far less so and direct his resources to their amelioration.

(6) It observes that liberality works the wonder of converting adversaries into admirers.

(7) It indicates that to help the needy and feed the destitute is to propitiate god.

(8) It proclaims that the means to salvation lies in the proper utilisation of wealth and not in its hoaiding.

(9) It decries **bhoga** and glorifies **tyaga**.

It is interesting to note that the Rishi, the seer, of the hymn is named Bhikshu, meaning 'begger', and is given as a descendant of Angiras, known for his humanistic service, and the deity is the gift of food and money,[1] thus making generosity itself the divinity. It is a matter of pride and gratification for us that more than three thousand years ago, long long before the advent of modern socialistic ideology, our grand seers have propounded the truth of equality and the prudence of generosity and exhorted us to adopt the noble ideals of fraternity. They have made the call to alleviate distress and to open the coffers for the common good. They have declared this as service to god and as the means for spiritual progress. To respond to their call is moral elevation; to follow it in life with resolution is consummate wisdom.

---

1. भिक्षुर्नाम आङ्गिरस ऋषिः, धनान्नदानं देवता।

अव्ययीभावः समासः

—डा० आजादमिश्रो 'मधुकरः'

संस्कृतभाषायां वैशिष्टयान्तरसन्निभं समासवैशिष्टयमपि नितरां सञ्चकास्ति। समासो नाम सार्थकपदानामितरपदार्थनिरपेक्षार्थकानां मिथ एव सापेक्षार्थकानां कयाचिदप्येक-विभक्त्या प्रयोगः। तदुक्तम्—**'समसनं समास'** इति। समसनत्वञ्च—**समस्यमानपद-विभक्तिनिवृत्तिपुरस्सरैकविभक्तिविशिष्टत्वम्,** वैशिष्ट्यञ्च—**स्वार्थान्वयित्व—स्वेतरार्था-न्वयित्व—इत्युभाभ्यां सम्बन्धाभ्याम्।** मध्यमपदलोपिसमासे विभक्तिमतिरिच्य मध्यम-पदवारणोऽप्यपसार्यंते बुधैर्वैयाकरणैः, तत्र च तत्पदाध्याहारेणैव बोध इति राद्धान्तः। कुत्रचिच्च समासे पूर्वपदविभक्ति श्रुतिरपि, तथापि तेषां परिगणितत्वेनाऽभवादत्वकल्पनया लक्षणेऽस्मिन् अदोषो द्रष्टव्यः।

तत्र समाससामग्रीषु मुख्यं खलु सामर्थ्यं नाम, तदवबोधयितुमेव महर्षिपाणिनिना **"समर्थः पदविधिः"** (२.१.१) इति सूत्रितम्। पदसम्बन्धिसमासादिविधानं समर्थेष्वेव पदेषु भवतीति सूत्रार्थो लक्ष्यः। इदञ्च सामर्थ्यं समर्थे पदे व्यपेक्षैकार्थीभावभेदेन द्विविधम्। तत्र **व्यपेक्षा-सामर्थ्यं** नाम स्वार्थमात्रबोधकानां पदानामाकाङ्क्षादिसहकारेण परस्परान्वयरूपम्। इदं हि **'हरिं भजति'** इत्यादौ वाक्ये संराजते, येन वाक्यार्थः परिस्फुरति। अपरञ्च सामर्थ्यम्—**एकार्थी-भावलक्षणम्,** तत्खलु समास एव समस्ति। तत्त्वञ्च—विशेष्यविशेषणभावावगाह्येकोपस्थिति-जनकत्वम्, अनेकार्थस्यैकार्थभाव इति व्युत्पत्तेः। एतदभावे हि समासो दुर्घटेत।

एकार्थीभावोऽप्ययं जहदजहत्स्वार्थभेदेन द्विविधः। यत्र वै समासवर्तीनि पदानि स्वार्थ-मजहन्ति विशिष्टैकार्थं बोधयन्ति, तत्र अजहत्स्वार्थवृत्तिरूपमेकार्थीभावसामर्थ्यमिति तत्र समासः सञ्जायते। अत एव 'महाबाहुः, सुपन्थाः' इत्यादावात्वादि सिद्धयति, अन्यथा व्यधिकरण-त्वात्तन्न स्यात्। यत्र तु **'गौरखरः, कृष्णसर्पः, अश्वकर्णः, मण्डपम्'** इत्यादाववयवार्थस्य प्राग्भारतिरस्कारः, तत्र रूढेर्बलीयस्या विरोधाज्जहत्स्वार्थरूपैव एकार्थीभाववृत्तिरिति तत्रा-समासो नित्यसमासो वा। एवञ्चैकार्थीभावसामर्थ्यावच्छिन्नरूपे एव समासो विधीयते, न तु व्यपेक्षायाम्। अथ चैकार्थीभावोऽयं विग्रहवाक्य एव कल्प्य इति निश्चितम्।

यत्र तु समस्यमानपदार्थव्यतिरिक्तसापेक्षता तत्र समासोऽसाधुरेव, यथा—**'नीतिनिपु-णस्य मित्रमन्दिरम्'**। अत्र मित्रपदार्थः समस्यमानमन्दिरपदार्थव्यतिरिक्तं नीतिनिपुणपदार्थं विशेष्यत्वेनान्वेतुमपेक्षत इत्यत्र समासोऽसाधुः। अत्रैव मित्रस्वामिकमन्दिरे नीतिनिपुणस्य सम्बन्धित्वेनान्वयविवक्षा स्यात्तर्हि साधुरेव सः। ईदृशस्थलेषु विशेषणविशिष्टस्य विशेष्य-पदस्य पदान्तरेण समासविधानात् प्रागेव विशेषणपदेन सह समासो विधेयः, ततः पदान्तरेण,

यथा—अत्रैव पूर्वं विशेष्यभूतस्य मित्रशब्दस्य मन्दिरपदेन सह समासमकृत्वा विशेषणेन नीतिनिपुणपदेन सह स विधेयः, ततो जाते कर्मधारयसमासेऽस्य नीतिनिपुणमित्रपदस्य मन्दिरादिपदान्तरेण सह षष्ठीतत्पुरुषं विधाय दोषाशीविषापहारः कार्यः। अन्यथा मित्रमन्दिरपदार्थैकदेशे मित्रपदार्थे नीतिनिपुणपदार्थस्याभेदान्वयोऽनुपपत्तिदरिद्रामालिङ्गेत्, **'पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेन'** इति न्यायात्।

अत्र समासवर्तिपदार्थभिन्नार्थकपदमुत्थिताकाङ्क्षां शमयेच्चेत्तदानीमसमस्तमपि तत्पदं निर्दुष्टमेव, नित्यसाकाङ्क्षत्वेन पदार्थैकदेशेऽपि तदर्थान्वयस्यौचित्यात्। अत एव **'देवदत्तस्य गुरुकुलम्, चैत्रस्य मातृकुलम्, मम मातुलगृहम्'** इत्यादौ उपसर्जनीभूतपदार्थैकदेशगुर्वाद्यर्थेषु नित्यसाकाङ्क्षत्वेन समासावर्तिनोऽपि देवदत्तादेर्भवति सम्बन्धः। तत्र यथा वाक्ये 'देवदत्तस्य गुरोः कुलम्' इत्यादौ व्यपेक्षासामर्थ्यं वर्तते, तद्वदेव, समासे 'देवदत्तस्य गुरुकुलम्' इत्यादावपि सा वर्तत एव। तदुक्तं भर्तृहरिणा—

'सम्बन्धिशब्दःसापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते॥' इति। वृत्तिसमुद्देशः ॥४७॥

तत्र व्यपेक्षा हि देवदत्तादीनन्वायती सती तानवयविभिर्योजयति। तदुक्तं हरिभिः—

'समुदायेन सम्बन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह॥' इति। वृत्तिसमुद्देशः ॥४८॥

किन्तु तद्धितवृत्तौ 'शिवभागवत' इत्यादौ नित्यसाकाङ्क्षत्वेऽप्येकार्थीभाव एव। तत्र हि नित्यसाकाङ्क्षस्य शिवस्य पदार्थैकदेशभगवदर्थान्वयद्वारा सेव्यसेवकभावसम्बन्धेन प्रधानप्रत्ययार्थेऽन्वयः। तथा हि—'शिवो भगवान् भक्तिरस्य' इति विग्रहे "भक्तिः" (४।३।९५) इति सूत्रेण अण्प्रत्ययः विशेषणसमासश्च युगपदेव भवतः। तत्रार्थे 'शिवस्य भागवतः' इति व्यस्तप्रयोगोऽसाधुरेव, व्यपेक्षासामर्थ्यस्यात्र नृश्रृङ्गायमाणत्वात्। अत्र त्वेकार्थीभाव एव भगवद्द्वारकविशिष्टैकार्थोपस्थितिजनकः। नन्वीदृश्यां समासादिवृत्तौ केन संबन्धेन देवदत्तादीनां सम्बन्धिनो गुर्वादयो ग्राह्येति चेत्—विद्यायोनिप्रभृतिप्रथित एव सम्बन्धस्तत्रेति बुधगृहरीतिरिति दिक्।

समासश्चायम्— अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वकेवलभेदात् पञ्चविध इति लघुसिद्धान्तकौमुदीसमासप्रकरणादौ। तत्र अनव्ययम् अव्ययं भवतीत्यर्थे 'भवतेर्णस्योपसंख्यानम्' इति वार्तिकेन भूधातोः कर्तरि णप्रत्यये, अभूततद्भावे च्वौ ईत्वे च सति अव्ययीभावशब्दो निष्पद्यते। समासेऽस्मिन् 'अनुदिनम, प्रत्यहम्, उपकृष्णम्' इत्यादौ यानि समासघटकोत्तरपदानि तानि पूर्वमव्ययत्वविरहितानि, किन्तु सति समासे तानि अव्ययत्वगुणग्रथितानि भवन्तीत्यन्वर्थेयं महासंज्ञेति ज्ञेयम्। अयञ्च समासः प्रायः पूर्वपदार्थप्रधान इति सम्प्रदायः। मिथः समस्यमानयोः पदयोर्यौ अर्थौ, तयोः पूर्वपदस्यैवार्थःप्रधानं भवति। यथा—'उपकृष्णम्' इत्यत्र उपकृष्णपदार्थयोः प्रथमपदार्थः सामीप्यावच्छिन्नसमीपम्, तदेव प्रधानम्, अतः 'उपकृष्णं गावश्चरन्ति' इति वाक्ये स एव प्रधानभूतोऽर्थो गवि अभेदेनान्वेति। तस्य च गोरूपार्थस्य चरणानुकूलव्यापारेऽन्वयः। तथा च—'कृष्णसामीप्यवद्बहुत्वावच्छिन्नगोकर्तृकचरणानुकूलव्यापारः' इति शाब्दबोधोऽत्र

सिद्ध्यति।

तत्रैतत्समासविधायकानि चतुर्दशसूत्राणि भगवता पाणिनिना रचितानीति तान्येव बालबुद्धचा यथासंख्यमधिप्रज्ञापथं सोदाहारमवतार्यन्ते। तत्राद्यं सूत्रम्—"**अव्ययं विभक्तिसमीपसमृद्धिव्यृद्धचर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु**" (२।१।६) इति। अस्मिन् सूत्रे 'अव्ययम्' इति पदं पृथक्कृत्य तस्य 'अव्ययं समर्थेन सह समस्यते' इत्यर्थः क्रियते। तस्य फलम्—दिशयोर्मध्येऽपदिशम्—इत्यत्र मध्येऽर्थे केनाप्यप्राप्तस्य समासस्य सिद्धिः। किन्तु योगविभागोऽयं भाष्येऽदर्शनादुपेक्ष्य एव, अपदिशम् इत्यादिमान्तप्रयोगस्तु स्वरादिगणे पाठेन "**स्वरादिनिपातमव्ययम्**" (१।१।३७) इत्यव्ययसंज्ञाकरणादव्युत्पन्नमव्ययपदमिदमिति बोध्यम्। किञ्च योगविभागपरिपाटीयं लक्षणैकचक्षुष्काणामस्माकं कृते महामोहशाटी। एवञ्च सूत्रेऽस्मिन् ये विभक्त्याद्यर्थाः सन्ति प्रदर्शितास्तेष्वर्थेषु वर्तमानमव्ययं नित्यं समर्थेन सुबन्तेन सह समस्यते, स च समासोऽव्ययीभावः इति सूत्रार्थः सम्पद्यते।

तत्रोक्तानां विभक्त्याद्यर्थानामुदाहरणानि क्रमश उपादीयन्ते। तथा हि—**अधिहरि, अधिगङ्गम्, अधिगुरु, अध्यात्मम्, अधिनवकम्** इत्यादिषु सर्वत्र अधिनिपातः सप्तमीविभक्तेरर्थं द्योतयति, अतस्तस्य हर्यादिसुबन्तैः सह नित्योऽयं समासः। '**हरिविषये**' इत्यादिरूपेण सर्वत्रोदाहृतेषु अधिकरणार्थावगतिरिति ज्ञेयम्। विभक्त्यर्थेऽधेरेव प्रयोगात्तेनैव सहायं समास इत्यपि बोध्यम्।

अनेन सूत्रेण समीपार्थकनिपातस्यापि सुबन्तेन समासो यथा—**उपकृष्णम्, उपकूलम्, अनुकूलम्, अनुमेघम्, निकटम्, निकामम्, समक्षम्**—इत्यादि। समीपार्थका एते चत्वार एव निपाताः, अत एतेषामेव सुबन्तैः समं तथा समासो विधेयो येनार्थः प्रकरणादिना परिस्फुट्येत। यद्यपि समया, निकषा आरात् इत्यव्ययत्रयमपि समीपार्थकमेव, तथापि नायं समास एतेषाम्, एभिर्युक्ते द्वितीयापञ्चमीविभक्तिविधानात्। अन्यथा समासस्यास्य नित्यत्वेन द्वितीयापञ्चम्योर्लक्ष्ये क्वाप्यदर्शनात् तद्विधानक्लेशो निष्फलायेत।

समृद्ध्यर्थकयोः सुसमनिपातयोः सुबन्तेन सह समासो यथा—**सम्मद्रम्, सुकैकेयम्, सुगङ्गम्, संपाञ्चालम्**—इत्यादि।

ऋद्धेरभावेऽर्थे वर्तमानस्य 'दुर्' निपातस्यानेन समासो,-यथा—**दुर्यवनम्, दुर्दिनम्, दुष्कूलम्, दुर्देशम्**—इत्यादिषूत्तरपदार्थस्य ऋद्धेरभावः प्राधान्येन वाच्यः। अत एव वक्ष्यमाणादर्थाभावादस्या व्यृद्धेर्भिदा स्पष्टा। 'दुर्यवनम्' इत्यस्य यवनानामृद्धेरभावः इत्यर्थो वाच्यः, अर्थाभावेऽव्ययीभावे तु अत्रैव यवनानामभावः इत्यर्थः, नतु तदृद्धेरिति विवेकः।

अर्थाभावार्थकनिपातस्य समासो यथा—**निर्मक्षिकम्, निर्जीवम्, निर्धनम्, निरुत्तरम्**—इत्यादिषु समस्यमानपूर्वपदार्थोऽभावः, स एव प्रधानम्, न तु द्रव्यम्। तत्पुरुषीयप्रादिसमासे तु '**निष्कौशाम्बिः** इत्यादौ कौशाम्ब्या निर्गतः इत्यर्थे नाभावार्थको निरुपसर्ग इति तेन समासेन निष्पन्नं पदमपि नाव्ययमिति ततो भेद उत्तान एव। एवमेव बहुव्रीहौ अविद्यमानः पुत्रः यस्यासौ

इति विग्रहे **'अपुत्रः, अपशुः'** इत्यादावन्यपदार्थावगमादभावस्य मध्यमपदार्थप्रतियोगिकत्वाच्च भवति भूयान् भेदोऽस्मात्। इत्थमेव नञ्तत्पुरुषे **'अब्राह्मणः, अनश्वः, अगौः, अमानवः'** इत्यादौ सर्वत्राभावार्थस्य पर्यवसाने प्रतीतावपि तस्य नञर्थत्वं नास्ति। तत्र नञर्थस्त्वारोपितत्वम्, तस्य च ब्राह्मणत्वद्वारा ब्राह्मणेऽन्वयः। तथा च 'अब्राह्मणः' इत्यादेः 'आरोपितब्राह्मणत्ववान्' इति बोधः।

अत्र केषाञ्चिन्मते नञ्पदं भिन्नार्थकम्, तथा च अब्राह्मण इत्यादेः ब्राह्मणभिन्न इति बोधः, इति चेदन्याय्यम्; तथा सति पूर्वपदार्थप्राधान्येन **अते, अतस्मै अतस्मात्** इत्यादौ तदादेरुपसर्जनत्वेन **'संज्ञोपसर्जनीभूतास्तु न सर्वादयः'** इति सर्वनामसंज्ञाप्रतिषेधेन शीभावाद्यनुपपत्तेः। एवञ्च प्राधान्येन अभावबोधनार्थं तु षष्ठीतत्पुरुषं विहाय निषेधार्थकाभ्यां निर्-प्रतिनिपाताभ्यां सह प्रतियोगितावच्छेदकसंयोगसम्बन्धावच्छिन्नान्यन्ताभावीयप्रतियोगितावच्छेदकावच्छिन्नबहिर्भूतार्थोपस्थापकस्य सुबन्तस्याव्ययीभाव एवोद्भावनीयः। षष्ठीतत्पुरुषेऽपि 'घटाभावः, पटाभावः' इत्यादावभावपदेन समासं विधाय प्राधान्येनाभावार्थ उपस्थाप्यते। अभावपदं विनैव तदर्थं प्राधान्येनोपस्थापयितुमत्र सूत्रेऽर्थाभावपदमुपात्तम्, अन्यथा केवलमभावपदं गृह्णीयात्। तदुक्तं भट्टनागेशेनात्र प्रकरणे शब्देन्दौ—**'प्रतियोगिभूतबहिर्विद्यमानार्थसमानाधिकरणाभाववाचकेनैव समासो यथा स्यादित्येतदर्थं तत् सत्त्वात्'** इति। अत एवाभावार्थकेन निरा सह शशशृङ्गादिबहिरलीकार्थवाचकानां पदानामयं समासो न भवति।

एवञ्च 'पटस्य प्रागभावः' इति प्रागभावे, 'घटो न पटः' इत्यन्योन्याभावे चापि निरा सह प्रतियोगिभूतसुबन्तस्याव्ययीभावसमासो न भवति। तत्राद्ये, प्रतियोगिरूपपटाधिकरणे तन्तुषु अभावस्य सत्त्वेऽपि एकक्षणावच्छेद्यत्वाभावेन संयोगसम्बन्धाभावात्। द्वितीयेऽन्योन्याभावस्थलेऽपि घटे पटस्य भेदो न हि संयोगसम्बन्धेन, किन्तु तादात्म्यसम्बन्धेन, अतः प्रतियोगितावच्छेदकसंयोगसंबन्धाभावान्नोभयत्रायं समासः।

एवमेव घटस्य प्रतियोगितावच्छेदकसंयोगसम्बन्धः कपालकदम्बरूपप्रध्वंसाभावेऽपि न भवतीति तत्रापि निरा सह प्रतियोगिभूतार्थवाचकसुबन्तस्याव्ययीभावसमासो न प्राप्नोतीति तदर्थमत्र सूत्रेऽव्ययपदमुपात्तम्। अस्योदाहरणम्—अतिहिमम्, अतिशीतम्, अतिवर्षम्, अतिग्रीष्मम्-इत्यादि दीक्षितमतेन। नागेशस्तु वृत्तिकारमतमूरीकृत्य—**निर्हिमम्, निश्शीतम्, निर्वनम्**—इत्याद्युदाजहार। एवञ्चाभावार्थेऽव्ययीभावः केवलेन निरा निपातेनैवेति नव्याः, अतिहिमम् इत्यादौ अतिना हिमातिशयस्यैव प्रतीतेः, अत्ययशब्दे अतेः सूत्रगृहीताव्ययत्वाच्च।

सूत्रेऽसम्प्रतिपदस्य सम्प्रति न युज्यते इत्यर्थो वेद्यः, युजिक्रियान्तर्भाविणैकार्थीभावान्नञ्-समासः। अत्रार्थे समासो यथा—**अतिनिद्रम्, अतिहासम्, अतिजागृति, अतिरोदनम्**—इत्यादि। वाक्यं तु—अतिनिद्रमपि स्वपिति—इत्यादि। 'अतिनिद्रमासीत्' इत्यादौ तु वर्तमानभूतत्वयोर्विरोधादव्ययीभावो नोपपद्यत **इत्यनारमणीयम्**, तत्र निद्राकर्तृकवर्तमानकालिकयुजिक्रियाऽप्रशस्ता इति अतिनिद्रपदार्थः, अस्य च पदार्थस्य लक्षणया लब्धकर्तुः सत्त्वक्रियायां भूतत्वप्रतीतावविरोधः।

शब्दप्रादुर्भावे शब्दस्वरूपमात्रप्रकाशनेच्छयापि समासोऽयम्, यथा —**इतिहरि, इति-**

सिद्धयति।

तत्रैतत्समासविधायकानि चतुर्दशसूत्राणि भगवता पाणिनिना रचितानीति तान्येव बालबुद्धया यथासंख्यमधिप्रज्ञापथं सोदाहारमवतार्यन्ते। तत्राद्यं सूत्रम्—"**अव्ययं विभक्ति-समीपसमृद्धिव्यृद्धयर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्ति-साकल्यान्तवचनेषु**" (२।१।६) इति। अस्मिन् सूत्रे 'अव्ययम्' इति पदं पृथक्कृत्य तस्य 'अव्ययं समर्थेन सह समस्यते' इत्यर्थः क्रियते। तस्य फलम्—दिशयोर्मध्येऽपदिशम्—इत्यत्र मध्येऽर्थे केनाप्यप्राप्तस्य समासस्य सिद्धिः। किन्तु योगविभागोऽयं भाष्येऽदर्शनादुपेक्ष्य एव, अपदिशम् इत्यादिमान्तप्रयोगस्तु स्वरादिगणे पाठेन "**स्वरादिनिपातमव्ययम्**" (१।१।३७) इत्यव्यय-संज्ञाकरणादव्युत्पन्नमव्ययपदमिदमिति बोध्यम्। किञ्च योगविभागपरिपाटीयं लक्षणैकचक्षुष्का-णामस्माकं कृते महामोहशाटी। एवञ्च सूत्रेऽस्मिन् ये विभक्त्याद्यर्थाः सन्ति प्रदर्शितास्तेष्वर्थेषु वर्तमानमव्ययं नित्यं समर्थेन सुबन्तेन सह समस्यते, स च समासोऽव्ययीभावः इति सूत्रार्थः सम्पद्यते।

तत्रोक्तानां विभक्त्याद्यर्थानामुदाहरणानि क्रमश उपादीयन्ते। तथा हि—**अधिहरि, अधिगङ्गम्, अधिगुरु, अध्यात्मम्, अधिनवकम्** इत्यादिषु सर्वत्र अधिनिपातः सप्तमीविभक्तेरर्थं द्योतयति, अतस्तस्य हर्यादिसुबन्तैः सह नित्योऽयं समासः। '**हरिविषये**' इत्यादिरूपेण सर्वत्रो-दाहृतेषु अधिकरणार्थावगतिरिति ज्ञेयम्। विभक्त्यर्थेऽधेरेव प्रयोगात्तेनैव सहायं समास इत्यपि बोध्यम्।

अनेन सूत्रेण समीपार्थकनिपातस्यापि सुबन्तेन समासो यथा—**उपकृष्णम्, उपकूलम्, अनुकूलम्, अनुमेघम्, निकटम्, निकामम्, समक्षम्**—इत्यादि। समीपार्थका एते चत्वार एव निपाताः, अत एतेषामेव सुबन्तैः समं तथा समासो विधेयो येनार्थः प्रकरणादिना परिस्फुट्येत। यद्यपि समया, निकषा आरात् इत्यव्ययत्रयमपि समीपार्थकमेव, तथापि नायं समास एतेषाम्, एभिर्युक्ते द्वितीयापञ्चमीविभक्तिविधानात्। अन्यथा समासस्यास्य नित्यत्वेन द्वितीया-पञ्चम्योर्लक्ष्ये क्वाप्यदर्शनात् तद्विधानक्लेशो निष्फलायेत।

समृद्ध्यर्थकयोः सुसमनिपातयोः सुबन्तेन सह समासो यथा—**सम्मद्रम्, सुकैकेयम्, सुगङ्गम्, संपाञ्चालम्**—इत्यादि।

ऋद्धेरभावेऽर्थे वर्तमानस्य 'दुर्' निपातस्यानेन समासो,-यथा—**दुर्यवनम्, दुर्दिनम्, दुष्कूलम्, दुर्देशम्**—इत्यादिषूत्तरपदार्थस्य ऋद्धेरभावः प्राधान्येन वाच्यः। अत एव वक्ष्यमाणा-दर्थाभावादस्या व्यृद्धेर्भिदा स्पष्टा। 'दुर्यवनम्' इत्यस्य यवनानामृद्धेरभावः इत्यर्थो वाच्यः, अर्थाभावेऽव्ययीभावे तु अत्रैव यवनानामभावः इत्यर्थः, नतु तदृद्धेरिति विवेकः।

अर्थाभावार्थकनिपातस्य समासो यथा—**निर्मक्षिकम्, निर्जीवम्, निर्धनम्, निरुत्तरम्**—इत्यादिषु समस्यमानपूर्वपदार्थोऽभावः, स एव प्रधानम्, न तु द्रव्यम्। तत्पुरुषीयप्रादिसमासे तु '**निष्कौशाम्बिः** इत्यादौ कौशाम्ब्या निर्गतः इत्यर्थे नाभावार्थको निरुपसर्ग इति तेन समासेन निष्पन्नं पदमपि नाव्ययमिति ततो भेद उत्तान एव। एवमेव बहुव्रीहौ अविद्यमानः पुत्रः यस्यासौ

इति विग्रहे **'अपुत्रः, अपशुः'** इत्यादावन्यपदार्थावगमादभावस्य मध्यमपदार्थप्रतियोगिकत्वाच्च भवति भूयान् भेदोऽस्मात्। इत्थमेव नञ्तत्पुरुषे **'अब्राह्मणः, अनश्वः, अगौः, अमानवः'** इत्यादौ सर्वत्राभावार्थस्य पर्यवसाने प्रतीतावपि तस्य नञर्थत्वं नास्ति। तत्र नञर्थस्त्वारोपितत्वम्, तस्य च ब्राह्मणत्वद्वारा ब्राह्मणेऽन्वयः। तथा च 'अब्राह्मणः' इत्यादेः 'आरोपितब्राह्मणत्ववान्' इति बोधः।

अत्र केषाञ्चिन्मते नञ्पदं भिन्नार्थकम्, तथा च अब्राह्मण इत्यादेः ब्राह्मणभिन्न इति बोधः, इति चेदन्याय्यम्; तथा सति पूर्वपदार्थप्राधान्येन **अते, अतस्मै अतस्मात्** इत्यादौ तदादेरुपसर्जनत्वेन **'संज्ञोपसर्जनीभूतास्तु न सर्वादयः'** इति सर्वनामसंज्ञाप्रतिषेधेन शीभावाद्यनुपपत्तेः। एवञ्च प्राधान्येन अभावबोधनार्थं तु षष्ठीतत्पुरुषं विहाय निषेधार्थकाभ्यां निर्-प्रतिनिपाताभ्यां सह प्रतियोगितावच्छेदकसंयोगसम्बन्धावच्छिन्नान्यन्ताभावीयप्रतियोगितावच्छेदकावच्छिन्नबहिर्भूतार्थोपस्थापकस्य सुबन्तस्याव्ययीभाव एवोद्भावनीयः। षष्ठीतत्पुरुषेऽपि 'घटाभावः, पटाभावः' इत्यादावभावपदेन समासं विधाय प्राधान्येनाभावार्थ उपस्थाप्यते। अभावपदं विनैव तदर्थं प्राधान्येनोपस्थापयितुमत्र सूत्रेऽर्थाभावपदमुपात्तम्, अन्यथा केवलमभावपदं गृह्णीयात्। तदुक्तं भट्टनागेशेनात्र प्रकरणे शब्देन्दौ—**'प्रतियोगिभूतबहिर्विद्यमानार्थसमानाधिकरणाभाववाचकेनैव समासो यथा स्यादित्येतदर्थं तत् सत्त्वात्'** इति। अत एवाभावार्थकेन निरा सह शशशृङ्गादिबहिरलीकार्थवाचकानां पदानामयं समासो न भवति।

एवञ्च 'पटस्य प्रागभावः' इति प्रागभावे, 'घटो न पटः' इत्यन्योन्याभावे चापि निरा सह प्रतियोगिभूतसुबन्तस्याव्ययीभावसमासो न भवति। तत्राद्ये, प्रतियोगिरूपपटाधिकरणे तन्तुषु अभावस्य सत्त्वेऽपि एकक्षणावच्छेद्यत्वाभावेन संयोगसम्बन्धाभावात्। द्वितीयेऽन्योन्याभावस्थलेऽपि घटे पटस्य भेदो न हि संयोगसम्बन्धेन, किन्तु तादात्म्यसम्बन्धेन, अतः प्रतियोगितावच्छेदकसंयोगसंबन्धाभावान्नोभयत्रायं समासः।

एवमेव घटस्य प्रतियोगितावच्छेदकसंयोगसम्बन्धः कपालकदम्बरूपप्रध्वंसाभावेऽपि न भवतीति तत्रापि निरा सह प्रतियोगिभूतार्थवाचकसुबन्तस्याव्ययीभावसमासो न प्राप्नोतीति तदर्थमत्र सूत्रेऽव्ययपदमुपात्तम्। अस्योदाहरणम्—अतिहिमम्, अतिशीतम्, अतिवर्षम्, अतिग्रीष्मम्-इत्यादि दीक्षितमतेन। नागेशस्तु वृत्तिकारमतमूरीकृत्य—**निर्हिमम्, निश्शीतम्, निर्वनम्**—इत्याद्युदाजहार। एवञ्चाभावार्थेऽव्ययीभावः केवलेन निरा निपातेनैवेति नव्याः, अतिहिमम् इत्यादौ अतिना हिमातिशयस्यैव प्रतीतेः, अत्ययशब्दे अतेः सूत्रगृहीताव्ययत्वाच्च।

सूत्रेऽसम्प्रतिपदस्य सम्प्रति न युज्यते इत्यर्थो वेद्यः, युजिक्रियान्तर्भावेणैकार्थीभावान्नञ्-समासः। अत्रार्थे समासो यथा—**अतिनिद्रम्, अतिहासम्, अतिजागृति, अतिरोदनम्**—इत्यादि। वाक्यं तु—अतिनिद्रमपि स्वपिति—इत्यादि। 'अतिनिद्रमासीत्' इत्यादौ तु वर्तमानभूतत्वयोर्विरोधादव्ययीभावो नोपपद्यत **इत्यनारमणीयम्**, तत्र निद्राकर्तृकवर्तमानकालिकयुजिक्रियाऽप्रशस्ता इति अतिनिद्रपदार्थः, अस्य च पदार्थस्य लक्षणया लब्धकर्तुः सत्त्वक्रियायां भूतत्वप्रतीतावविरोधः।

शब्दप्रादुर्भावे शब्दस्वरूपमात्रप्रकाशनेच्छयापि समासोऽयम्, यथा—**इतिहरि, इति-**

रामम्, इतिनदि—इत्यादि। पश्चाद्भावे समासो यथा—**अनुविष्णु, अनुगमनम्, अनुग्रैष्मम्**—इत्यादि।

यथाशब्दस्य च योग्यता वीप्सा पदार्थानतिक्रमणं सादृश्यञ्चेति चत्वारोऽर्थाः। एषु कमप्यर्थं बोधयतोऽव्ययस्य सुबन्तेन समासोऽयम्, यथा—**रूपस्य योग्यमनुरूपम्, दिनं दिनमिति प्रतिदिनम् शक्तिमनतिक्रम्येति यथाशक्ति, हरेः सादृश्यमिति सहरि**—इति क्रमेणोदाहरणानि।

आनुपूर्व्यं क्रमः, तस्मिन्नर्थेऽप्ययं समासः, यथा—**अनुज्येष्ठम्, अनुलघु, अन्ववरम्**—इत्यादि। वाक्यं यथा—अनुज्येष्ठं प्रणमति। ज्येष्ठस्य क्रमेणेत्यर्थः।

युगपद्बोधकाव्ययस्यापि सुबन्तेनायं समासः, यथा—**सचक्रम्, सपाशम्, सशक्ति, सोक्ति**—इत्यादि। अत्र चक्रेण युगपत्प्रयुक्तमित्याद्यर्थः। **'सचक्रमच्छिनद्देवी तयोः शिरसी भुजावुभौ'** अत्र शिरोभुजद्वयविषयकच्छेदनस्य चक्रच्छेदनस्य च यौगपद्यप्रतीतिः। पुत्रेण सहितः सपुत्रः, सहामात्यः-इत्यादिबहुव्रीहौ तु पुत्रादीनां वतिपदार्थानां सहभावेनाप्राधान्यप्रतीतिः अन्यार्थप्रधानता चेत्युभयत्र विवेकः।

सदृशार्थेऽप्यनेनाव्ययीभावो यथा—**ससखि, समित्रम्, सगुरु, सभ्रातृ**—इत्यादि। 'अयं ससखि प्रतीयते' इत्यत्र सखिसादृश्यवानयं पदार्थः। अत्र सादृश्यं गुणीभूतम्, यथार्थे तु तत्प्रधानमिति भिदा। तद्यथा यथार्थे—समातृ इह नास्ति—इत्यत्र मातुः सादृश्यं नास्तीति भावः।

सम्पत्त्यर्थेऽनेनाव्ययीभावो यथा—**सक्षत्रम्, सवैश्यम्**—इत्यादि। 'सक्षत्रमनुहरति राजा' इत्यत्र उचितं युद्धद्यूतादिक्षत्रं कर्म करोतीत्यर्थः। समृद्धिस्तु ऋद्धेराधिक्यमित्युभयोर्भेदः।

साकल्यार्थेऽव्ययीभावो यथा—**सतृणम्, सपरिशिष्टम्**—इत्यादि। 'सतृणमत्ति' इत्यस्य 'पत्रले पतितं सर्वं पाकं खादति।' इत्यर्थः, न तु पत्रलतृणभक्षणेऽत्र तात्पर्यम्।

अन्तावयवसाहित्यार्थकाव्ययस्याप्ययं समासः, यथा—**साग्नि, सभाष्यम्, सदर्पणम्**—इत्यादि। अध्ययनकालेऽध्येतव्यत्वेन परिगृहीतो यावान् ग्रन्थः, तेषु ग्रन्थेषु अग्निग्रन्थोऽग्निचयनप्रतिपादकग्रन्थोऽन्तिमः, तत्पर्यन्तमिति साग्नि अधीते। एवमेव 'सभाष्यमधीते' इत्यादि वाक्यम्। भाष्यानन्तरमपि विषयान्तरेऽध्ययनमस्तीति साकल्यात्पृथगुक्तिः। अत्राध्ययनक्रिया नहि वृत्तावन्तर्भूता, अतो वाक्ये तस्याः प्रयोगः।

एतावतोक्तेषूनविंशतावर्थेषु कस्मिंश्चिदप्यर्थे वर्तमानस्याव्ययस्य समर्थसुबन्तेन सहाव्ययीभावसमासः **"अव्ययं विभक्ति"** इत्यादिना प्रथमसूत्रेण भवतीत्युक्तम्। अत्राव्ययशब्देषु सहेति यथाप्रादिशब्दा एव दीक्षितादिभिरुदाहृताः, अतस्तेषामेव समर्थसुबन्तपदेन समासोऽयमिति प्रतीयते। सूत्रेऽस्मिन्नुपात्तानां पश्चादादीनामव्ययानां तु सूत्रबोधितार्थेषु कथमपि नानेन समासः, 'ततः पश्चात् स्रंसते ध्वंसते' इति भाष्यप्रयोगात्। पदार्थानतिवृत्तौ यथाव्ययस्य, क्रमार्थे च अनु-अव्ययस्य सूत्रोपात्तत्वेऽपि 'यथाशक्ति, अनुपूर्वम्' इत्यादौ भवत्येवायं समास इति व्यवहारः।

'यथा हरिस्तथा हरः' इत्यादौ यथाव्ययस्य हरेः सादृश्यबोधनात् हरिपदेन सह

तस्याव्ययीभावसमासः "अव्ययं विभक्ति०" इति सूत्रीयसादृश्यांशेन प्राप्तः, दीक्षितमते तु सादृश्यांशेन यथार्थत्वेन चोभयथापि प्राप्तः; किन्तु सादृश्यार्थे यथाव्ययस्य समासोऽसाधुः, **"यथाऽसादृश्ये"** (२।१।७) इति सूत्रेण तन्निषेधात्।

अथाव्ययीभावसमासविधौ द्वितीयं सूत्रम् **"यावदवधारणे"** (२।१।८) इति। इयत्ता-परिच्छेदमवगमयितुं यावदव्ययस्य समर्थसुबन्तेन सह समास इति सूत्रार्थः। यथा— यावन्तः श्लोकास्तावन्तः इति यावच्छ्लोकम् अच्युतप्रणामाः सन्तु, यावन्मन्दाकिनि, यावत्सूर्यशशाङ्कम्—इत्यादि। यत्रेयत्तापरिच्छेदो न गम्यते, यथा—यावद्दत्तं तावद्भुक्तम्—इत्यादौ, तत्र नायं समासः। अत्र हि 'इयत् भुक्तम्' इति नावधारयतीत्यर्थः।

तृतीयेन सूत्रेण सुबन्तार्थस्याल्पत्वं प्रकटयितुं प्रतिनिपातेनैव सह तस्य सुबन्तस्य समासोऽनुशास्यते। यथा—शाकस्य लेश इति **शाकप्रति, घृतप्रति, ज्ञानप्रति**—इत्यादि। शाकादेरल्पता इत्यर्थः।

चतुर्थेन सूत्रेण तु पञ्चिकानामकद्यूतक्रीडायां पराजयबोधने केवलेन परिनिपातेन सह एकत्वसंख्याविशिष्टाक्षपदस्य शलाकापदस्य संख्यावाचकैकद्वित्र्यादिपदस्य च समासो विधीयते। यथा—**अक्षपरि, शलाकापरि, एकपरि, द्विपरि, त्रिपरि, चतुष्परि**—इति। अस्यां क्रीडायां पञ्चैव अक्षाः शलाका वा भवन्ति। तत्रैकेनाक्षेण विपरीतं वृत्तमित्यादिरर्थः। जये यथा परिवर्तितव्यम्, न तथा परिवृत्तमिति भावः। तत्र विपरीतं वृत्तमिति परिणैव द्योत्यते। भक्षेण' इत्यत्र कर्तरि तृतीया।

अत्रेदमाकूतम्— उपर्युक्तैश्चतुर्भिः सूत्रैर्विधीयमानः समासो नित्यसमास इति चोच्यते। ययोः पदयोर्नित्यसमासः, ते पदे असमस्तरूपेण तमेवार्थमवबोधयितुं वाक्ये प्रयोगानर्हे। अत एव तत्र तत्र समासेऽस्वपदविग्रहेण भाव्यम्। येन पदेन समासस्तेनैव पदेन विग्रहो न भवतीत्यर्थः। यथा-**उपकृष्णम्**—इत्यत्र समासस्तु 'उपेन', किन्तु विग्रहः 'कृष्णस्य समीपम्' इति समीपशब्देन क्रियते। समीपार्थमेवावगमयितुं वाक्येऽसमस्तरूपेण 'उपकृष्णम्' इति प्रयोगोऽसाधुरिति तत्तात्पर्यम्। यद्यपि वीप्सायां समासे 'प्रतिवृक्षम्' इति, असमासे तु 'वृक्षं वृक्ष प्रति' इति द्वितीयागर्भं वाक्यमपि दृष्टम्, तत्रापि विग्रहस्तु 'वृक्षं वृक्षम्' इति अस्वपद एव द्वितीयागर्भ-वाक्यन्तु प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात्। वीप्सायां "नित्यवीप्सयोः" (८।१।४) इत्यनेन पदस्य वैकल्पिकं द्वित्वं विधीयते। यथा—वृक्षं वृक्षं सिञ्चति इति। द्वित्वाभावपक्षे वीप्सायां प्रत्यादेरव्ययस्य नित्यसमासः— **प्रतिवृक्षम्**—इति। कर्मप्रवचनीय-संज्ञायाम्-वृक्षं वृक्षं प्रतिषिञ्चति-इत्यपि एवञ्चात्र त्रिधा प्रयोगास्थितिरित्यवधेयम्।

उपर्युक्तसूत्रचतुष्टयं विहायावशिष्टैर्दशभिः सूत्रैः पाक्षिकोऽव्ययीभावसमासो विधी-यते। अतोऽत्र विग्रहः स्वपद एव। समासाभावे विग्रहवाक्यमपि तदर्थे प्रयुज्यते। तत्र प्रथमं सूत्रम् **"अपपरिबहिरञ्चवः पञ्चम्याः"** (२।१।१२) इति। पञ्चम्यन्तेन सुबन्तेन सह अपपरि-बहिः प्राक्प्रत्यगवागुदक्पदानां समासो भवतीति सूत्रार्थः। यथा—अपविष्णोरिति अपविष्णु, परिविष्णोरिति **परिविष्णु, प्राग्वनम्, बहिर्नगरम्**—इत्यादि। अपपरी अत्र वर्जने स्तः। विष्णुं वर्जयित्वेत्यर्थः। समासाभावे पञ्चमीगर्भं वाक्यमपि—परि विष्णोः, प्राग्वनात्—इत्यादि।

द्वितीयं आङ्मर्यादाभिविध्योः" (२।१।१३) इति सूत्रं तु मर्यादायामभिविधौ च आङ्निपातस्य पञ्चम्यन्तेन सह समासं शास्ति । यथा—**आमुक्ति, आबालम्, आभानु**—इत्यादि । पक्षे— **आमुक्तेः, आबालेभ्यः, आभानोः** —इत्यादि पञ्चम्यन्तमपि ।

तृतीयेन "लक्षणेनाभिप्रति आभिमुख्ये" (२।१।१४) इति सूत्रेण सांमुख्यवाचकयोः अभिप्रतिनिपातयोश्चिह्नवाचिना समर्थसुबन्तेन सह समासो विधीयते । यथा —**अभ्यग्नि शलभाः पतन्ति, प्रतिदीपम्, अभिपाठशालम्, प्रतिनदि**—इत्यादि । पक्षे—**अग्निमभि, दीपं प्रति । अग्नेः समुखम्** इत्याद्यर्थः ।

चतुर्थं **"अनुर्यत्समया"** (२१।१।१५) इति सूत्रन्तु—यस्य पदार्थस्य सामीप्यं लक्ष्यते, लक्षणभूततत्पदार्थवाचकसुबन्तेन सह अनुनिपातस्य समासं विधत्ते । यथा—**अनुवनम् अनुमन्दिरम्**—इत्यादि । अनुवनं राजते सुरनदी । वनस्य समीपमित्यर्थः । वनशब्दोऽत्र वनसमीपदेशे लाक्षणिकः । 'वनसमीपदेशे राजते' इति लक्ष्यार्थः । अत्र वनसमीपमेव लक्षणम् । लक्षणत्वञ्च द्विविधम्—वस्तुसद्रूपं ज्ञातमात्रञ्च । अत्र तु वस्तुसद्रूपमेव लक्षणत्वम् । वनसमीपं सुरनदीवस्तुनः सत्ता विद्यत एव । अत एवात्र समासाभावपक्षे **'वनस्य अनु'** इति प्रयोगोऽपि साधुरेव । किञ्चैतत्प्रयोगनिष्पत्तय एव सूत्रमिदम्, अन्यथा सामीप्यार्थे "अव्ययं विभक्त्यर्थ०" इत्यादिनैव नित्यसमाससिद्धिः स्यात् । तस्माद्विभाषार्थमिदं सूत्रम् । ततश्च 'वनस्य अनु' इति लौकिकविग्रहवाक्यमुदाहार्यम् । नात्र कर्मप्रवचनीयसंज्ञा शङ्क्या, तत्र ज्ञातस्य लक्षणत्वस्य निमित्तत्वाङ्गीकारात् ।

पञ्चमेन **"यस्य चायामः"** (२।१।१६) इति सूत्रेण दैर्घ्यसदृशदैर्घ्यमर्थमवगमयितुं लक्षणभूतेन पदेन सह अनुनिपातस्यैव समासः । यथा —**अनुगङ्गम् वाराणसी** । अत्र गङ्गा-दैर्घ्यसदृशदैर्घ्योपलक्षिता वाराणसी इति बोधः । अत्र हि गङ्गापदेन गङ्गादैर्घ्यसदृशं दैर्घ्यं लक्ष्यते, तदेवानुना द्योत्यते । अत्रापि सूत्रे पूर्ववदेव लक्षणत्वं वस्तु सदेव निमित्तम्, न तु अनुद्योत्यं ज्ञातम्, अतो न कर्मप्रवचनीयत्वम् । तथा च समासाभावपक्षे 'गङ्गाया अनु" इत्यादौ षष्ठी एव । एवमेवात्र —**अनुतालम्, अनूष्ट्रम्, अनुपर्वतम्**—इत्याद्यप्युदाहार्यम् ।

षष्ठं **"पारे मध्ये षष्ठ्या वा"** (२।१।१८) इति सूत्रं पारमध्यशब्दयोः षष्ठ्यन्तेन सह वैकल्पिकं समासमनुशास्ति, पूर्वपदान्ते चैत्वमपि निपातयति । एतत्समासाभावे विकल्पेन षष्ठीतत्पुरुषसमासे षष्ठ्यन्तस्य पूर्वप्रयोगः, तस्याप्यभावे वाक्यमेव । यथा—पारेगङ्गम्, मध्येत्रिवेणि—इत्यादि । तत्पुरुषे तु 'गङ्गापारम्' इत्यादि । तदभावे 'गङ्गायाः पारम्' इत्यादि वाक्यमेव ।

गुरुपरम्परायां पुत्रादिपरम्परायां चोत्पन्नस्य वाचकं यत्पदम्, तेन सह संख्यावाचक-शब्दानां समासः सप्तमेन **"संख्या वंश्येन"** (२।१।१९) इति सूत्रेण विधीयते । वंशो द्विधा, विद्यया जन्मना च । तत्र भवो वंश्यः । तेन संख्या समस्यते इति सूत्राक्षरार्थः । यथा—**द्वौ मुनी वंश्यौ** इति **द्विमुनि, त्रिमुनि, पञ्चभट्टम्, एकविंशतिभारद्वाजम्, सप्तवत्सम्**—इत्यादि । वाक्यन्तु— त्रिमुनिव्याकरणस्य—इत्यादि । व्याकरणविद्यायाः पाणिनिकात्यायनपतञ्जलय-स्त्रयो मुनयः प्रवर्तका इति वाक्यार्थः । नन्वेवं 'त्रिमुनि व्याकरणम्' इति सामानाधिकरण्यम-

नुपपन्नमिति चेत्, न, विद्यातद्वतामभेदविवक्षया तदुपपत्तेः। यद्यप्यत्रोदाहरणेषु द्वौ च तौ मुनी चेत्यादिविग्रहे कर्मधारयसमासोऽपि प्राप्तः, तथापि तं बाधित्वात्र अव्ययीभावः। तत्फलन्तु एतेषामव्ययत्वसिद्धिरिति।

अष्टमं "**नदीभिश्च**" (२।१।२०) इति सूत्रं समूहेऽर्थे संख्यावाचि—शब्दानां नदीतद्विशेषवाचकसुबन्तेन सह समासं विधत्ते। यथा—**सप्तगङ्गम्, द्वियमुनम्, पञ्चनदम्, सप्तगोदावरम्**—इत्यादि। यद्यप्यत्र 'सप्तानां गङ्गानां समाहारः' इत्यादिविग्रहे समाहारद्विगुसमासेऽपि नार्थसंगतिः, तथाप्यव्ययकार्यं विधातुं तद्बाधकोऽयं समास आवश्यक इति।

नवमेन "**अन्यपदार्थे च संज्ञायाम्**" (२।१।२१) इति सूत्रेण देशविशेषस्य संज्ञायामन्यपदार्थे विद्यमानसुबन्तस्य नदीभिः सह नित्यं समासो विधीयते, वाक्येन संज्ञानवगमात्। समासेऽस्मिन् प्राधान्यमन्यपदार्थस्यैव। यथा—**उन्मत्तगङ्गम्, लोहितगङ्गम्**—इत्यादि। कस्यचिद्देशस्य नामेदम्। अस्योदाहरणानि कोशे रक्षितव्यानीति अन्यथासिद्धमिदं सूत्रम्।

चरमं "**तिष्ठद्गुप्रभृतीनि च**" (२।१।१७) इति सूत्रं निपातनार्थम्। सूत्रान्तरैरनिष्पाद्यान्येकत्रिंशत्पदानि लोकेऽव्ययत्वेन प्रथितानि अनेनानेककार्यनिपातनद्वारा प्रसिद्ध्यन्ति। तानि यथागणं साधूनि प्रत्येतव्यानीत्येतदर्थमिदं सूत्रमिति भावः। तानि यथा—**तिष्ठद्गु, वहद्गु, आयतीगवम्, खलेयवम्, खलेबुसम्, लूनियवम्, लूयमानयवम्, पूतयवम्, पूयमानयवम्, संहितयवम्, संह्रियमाणयवम् संहितबुसम्, संह्रियमाणबुसम् समभूमि, समपदाति, सुषमम्, विषमम्, दुःषमम्, निःषमम्, अपसमम्, आयतीसमम्, प्रौढम्, पापसमम्, पुण्यसमम्, प्राह्णम्, प्ररथम्, प्रमृगम्, प्रदक्षिणम्, अपरदक्षिणम् सम्प्रति, असम्प्रति**—इति। अत्र सर्वेषु पदेषु अन्यार्थः काल एव प्रधानम्। यथा तिष्ठन्ति गावो यस्मिन् काले स तिष्ठद्गु दोहनकाल इत्यर्थः। अत्रानेनैव सूत्रेण शत्रादेशाव्ययीभावसमासादि सर्वं कार्यं निपात्यते।

उपर्युक्तैश्चतुर्दशसूत्रैरेवाव्ययीभावसमासो विधीयते। तत्र अल्पार्थे पराजयार्थे चायं समास उत्तरपदार्थप्रधानः, तत्राव्ययस्य प्रतिपरिशब्दस्योत्तरत्र प्रयोगात्। सूत्रद्वयेन संख्यायाः समासेऽपि उत्तरपदार्थः समूहश्च प्रधाने भवतः, तत्पुरुषापवादत्वात्। संज्ञायां निपातने चायमन्यपदार्थप्रधानः, संज्ञिनो निपातिनश्च भिन्नार्थत्वात्। अन्यत्र विधीयमानः सर्वोऽप्यव्ययीभावः पूर्वपदार्थप्रधान एव। अतोऽव्ययार्थप्रधानोऽव्ययीभाव इति वक्तुमुचितम्। तदुक्तं भाष्यकारेण—"**प्रायः पूर्वपदार्थप्रधानोऽव्ययीभावः**" इति।

समासेऽस्मिन् कस्य पूर्वप्रयोगः, इति चेच्छ्रूयताम्—अल्पार्थे पराजयार्थे च सुबन्तस्य पूर्वप्रयोगः, अव्ययस्य तु परप्रयोगः। संख्यायाः समासे तु संख्यायाः एव पूर्वप्रयोगः। संज्ञायां निपातने च समासे विशेषणस्य पूर्वप्रयोगः। अन्यत्र सर्वत्र समासेऽस्मिन् अव्ययस्यैव पूर्वप्रयोग इति बोद्धव्यम्।

सम्पन्नेऽस्मिन् समासे सर्वमपि समस्तं पदं नपुंसकलिङ्गमव्ययं ह्रस्वान्तं च जायते। यथा—**अपदिशम्, अनुगङ्गम्, अधिगोपम्, उपनदि**—इत्यादि। अव्ययत्वादेतेषां रूपाणि न चलन्ति। ह्रस्वे कृते स्वभावतो वा यदि पदमकारान्तम्, तदा पञ्चमीं, विकल्पेन तृतीयां सप्तमीं

च विहाय सर्वासु विभक्तिषु पदममन्तं जायते । यथा—**अधिपाठशालम्, उपयमुनम्, उपवनम्, अधिगोपम्, उपकृष्णम्**—इत्यादि । पञ्चम्यान्तु अधिपाठशालात्, उपयमुनात्, इत्यादीनि रामवद्रूपाणि भवन्ति । एवमेवास्य अकारान्तस्य तृतीयायां सप्तम्यां चापि विकल्पेन रामवद्रूपाणि, पक्षे तु अमन्तमपि रूपं सम्पद्यन्ते । किन्तु योऽव्ययीभावोऽकारान्तो नास्ति, स नहि अमन्तो भवति, न वा तस्य रूपाणि चलन्तीति ध्येयम् । यथा—**उपनदि, अधिविष्णु, उपगुरु, अनुभानु**—इत्यादि । अस्मात्सर्वास्वपि विभक्तिषु अव्ययत्वाद् विभक्तेर्लुग्भवति ।

इदमवधेयं समासप्रक्रियायामत्र—समासविधायकसूत्रेण समाससंज्ञायां सञ्जातायां सत्यां विग्रहस्थविभक्तीनां लुग्भवति, ततः समस्तसमुदायात् प्रातिपदिकात् पुनः स्वेष्टविभक्ति-रुत्पद्यते । अकारान्तात् तस्या विभक्तेः स्थानेऽमादेशः, अन्यस्मात्तु इकारान्तादुकारान्तात्तस्या विभक्तेः पुनर्लुग्भवति, पदस्याव्ययत्वादिति ।

पुनरिह तत्त्वम्—समासेऽस्मिन्नुत्तरपदं प्रातः, पूर्वाह्णम्, अपराह्णम्, सायम्, रात्रि, दिनम्, वर्षम् इत्यादि कालवाचकं न स्याच्चेत्तर्हि पूर्वपदभूतस्य 'सह' इत्यस्य स्थाने सादेशो भवति । यथा—**सचक्रम्, सहलम्, समित्रम्, ससखि**—इत्यादि । कालवाचके उत्तरपदे तु न, यथा—**सहपूर्वाह्णम्सहरात्रि, सहदिवम्, सहाब्दम्**—इत्यादि । यदि च कालवाचकः शब्दो ग्रन्थेऽर्थे लाक्षणिकः, तदा तदुत्तरपदे सति भवत्येवायं सादेशः । तदुक्तम् "**ग्रन्थान्ताधिके च**" (६।४।७६) इति सूत्रेण । यथा—समुहूर्त्तं ज्यौतिषमधीते इत्यादि । अत्र हि अध्येतव्यत्वेन गृहीतग्रन्थानाम-न्तिमग्रन्थपरकमुहूर्त्तपदेन सहाव्ययस्य 'मुहूर्त्तपर्यन्तम्' इति विग्रहेऽव्ययीभावसमासे कृते सति सहस्य सादेशः । एवमेव 'सायनम्, सक्रान्ति' इत्याद्यप्युदाहार्यम् । एवञ्च लाक्षणिकभिन्ने कालवाचके उत्तरपदे सति पूर्वपदभूतस्य सहस्य सादेशोऽत्र न भवतीति तत्त्वम् । अन्यत्र तु भवत्येव स इति ।

समासेनानेन निष्पन्नस्य समुदायविशेषस्यान्ते समासान्तः 'टच्' प्रत्ययोऽपि जायते । टचि टचौ इतौ, अकारमात्रमवशिष्यते । जाते च प्रत्ययेऽस्मिन् पूर्वस्य समुदायरूप-प्रकृतेर्भ-संज्ञापि भवति । तेन समुदायान्ते वर्तमानयोरकारेकारयोः "**यस्येति च**" (१।४।१४८) इति सूत्रेण लोपः । अथ च समुदायो नान्तः स्याच्चेत्तर्हि तस्य "**नस्तद्धिते**" (६।४।१४४) इति सूत्रेण 'अन्' भागस्य टेर्लोपो विधेयः । तत्राकाङ्क्षेयम्, कश्चासौ समुदायविशेषो यस्माट्टच् भवतीति चेत्—अष्टविधोऽपि स समुदायविशेष उच्यते—

(१) शरदादिगणे पठिताः – शरद्, विपाश्, अनस्, मनस्, उपानह्, दिव्, हिमवत्, अनडुह्, दिश्, दृश्, विश्, चेतस्, चतुर्, त्यद्, तद्, यद्, कियत्—इति सप्तदश शब्दाः । एतेषु कोऽपि शब्दः समासेऽस्मिन्नुत्तरपदं स्यात्तदा समासनिमित्तकष्टज्जायते । यथा उपशरदम्, प्रतिविपाशम्, सुमनसम्, अध्युपानहम्, अनुतदम्, यथाचेतसम्—इत्यादि सर्वत्र ज्ञेयम् ।

(२) यदि समासान्ते जराशब्दः, तदा तस्य जरस्-आदेशष्टच्चोभयमपि भवति । यथा—उपजरसम्, अनुजरसम्—इत्यादि ।

(३) प्रति-पर-सम्-अनु-इत्येतेभ्यश्चतुर्भ्यो निपानेभ्यः परः अक्षिशब्दो यदि तदापि टच् । यथा –प्रत्यक्षम्, समक्षम्, परोक्षम्, अन्वक्षम्—इति । 'परोक्षम्' इत्यत्र तु निपातनात् 'पर'

शब्दस्य ओकारान्तादेशोऽपि जायत इति विशेषः ।

(४) यदि चात्रोत्तरपदम् अन्नन्तम्, ततोऽपि 'टच्' । यथा—उपराजम्, अध्यात्मम्, उपशर्मम्, अधिवर्मम्—इत्यादि ।

(५) पूर्वोक्तमन्नन्तमुत्तरपदं नपुंसकलिङ्गं चेत्, तदा तु टच् विकल्पेन जायते। यथा—उपचर्मम्—उपचर्म, अधिकर्मम्—अधिकर्म—इत्यादि । अत्र टजभावे विभक्तेर्लुकि सति पदान्तनकारस्यापि लोपो भवतीति विशेषः ।

(६) यदि चात्र नदीतद्विशेषवाचिशब्दः, पौर्णमासी, आग्रहायणी वा उत्तरपदम् ततोऽपि पाक्षिकष्टच् । यथा—उपनदम्—उपनदि, सप्तगोदावरम्—सप्तगोदावरि, उपपौर्णमासम्—उपपौर्णमासि, उपाग्रहायणम्—उपाग्रहायणि—इत्यादि । अत्र टजभावे ह्रस्वत्वमेव ।

(७) पञ्चममनुनासिकवर्णं विहाय कवर्गादिषु पञ्चस्वपि वर्गेष्वन्यतमो वर्णो यदि अव्ययीभावसमुदायस्यान्ते स्यात्, ततोऽपि विकल्पेन टच् भवति । यथा—उपसमिधम्—उपसमित् । अधिक्रुधम्—अधिक्रुत्, अनुबुधम्—अनुभुत्— इत्यादि ।

(८) गिरिशब्दस्यात्रोत्तरपदत्वेऽप्ययं वैकल्पिकष्टच् । यथा—उपगिरम्—उपगिरि, अधिगिरम्—अधिगिरि—इत्यादि रूपद्वयं निष्पद्यते ।

समासेनानेन समस्तं पदं पुनः पदान्तरेणापि विवक्षया समस्यते । तद्यथा—अनुगङ्गं काशी राजते । अत्र 'अनुगङ्गम्' इत्यनेन सह पुनर्विभक्त्यर्थे समासविवक्षया 'अधेः' समासे कृते—अध्यनुगङ्गं काश्यां स राजते—इति प्रयोगः साधुरेव, 'अनुगङ्गम्' इत्यस्य समर्थसुबन्तत्वात् । अस्याव्ययीभावसमस्तपदस्य पुनः तत्पुरुषसमासे प्रयोगस्तु—"अनुरूपाभिनिवेशतोषिणा"—इति कालिदासस्यैव। बहुव्रीहावपि—यथाशक्तिदत्तवित्तः—इत्यादि । यत्तु अत्र त्रिपदबहुव्रीहिरिति, तदविचारितम्, निष्ठान्तस्य पूर्वप्रयोगाभावात् ।

समासस्तु समर्थेन सुबन्तपदेन सह भवति । समर्थं पदञ्च सामर्थ्यवत् इत्युच्यते। सामर्थ्यञ्च द्विविधम् । तदत्र कीदृगपेक्षितम् । कस्मिन्नर्थे केषां सामान्यविशेषाव्ययानव्ययपदानां समासः सञ्जायते। समासस्यास्य नित्यत्वानित्यत्वव्यवस्थितिः प्रधानार्थनिर्णयः। समासेऽत्र कस्य पदस्य पूर्वं प्रयोगः। अत्र का प्रक्रिया। कथञ्च रूपनिष्पत्तिः। निष्पन्नरूपस्य समासान्तरेऽपि प्रयोगः।

—०—

आर्यभटप्रथमस्तद्गणितीयकृतयश्च

—स्वामी आत्मानन्दपरमहंसः

आर्यभटः स्वयमेव "कुसुमपुरेऽभ्यर्चितं ज्ञानम्"[1]

इत्यनेनासूसुचद्यत्तस्य शिक्षास्थली वर्तमानकालीन-पाटलिपुत्राख्या (पटना) नगरी । न चान्ध्रप्रदेशस्थाश्मकजनपदस्यैव वर्तमानकालावच्छेदेन "निजामाबाद" पदवाच्यस्य नीलकण्ठसोमसुत्त्वनमतानुसारेण पठनस्थलत्वमिति वाच्यम्; आर्यभटीयटीकाकर्त्तुर्भास्करप्रथमस्यैव तत्स्थलीयत्वात्, भाष्यकर्त्तुरेव वसतेर्मूलग्रन्थप्रणेतुः स्थानत्वमिति नियमाभावात् । जन्मनो ग्रन्थप्रणयनस्य च कालः—

षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः ।
त्र्यधिका विंशतिरब्दास्तदेह मम जन्मनोऽतीताः[2] ॥

इति श्लोकेन तेनैव स्पष्टीकृतः अर्थात् ३५७७ तमे गतकलौ तस्य जन्म, ३६०० तमे च "आर्यभटी"याख्यग्रन्थप्रणयनम् । तदनुसारेण ४७६ तमः ख्रैस्ताब्दस्तस्य जन्मसंवत्सरः ४९९ तमे ख्रैस्ताब्दे च ग्रन्थप्रणयनम् । अनेनेदमपि सिद्धयति यत्तत्कालीनगणनायाँ कलिसंवत्सरस्य व्यवहारः प्रावर्तत ।

ग्रन्थद्वयं तेन प्रणीतमिति वाङ्मयेऽवधार्यते । तयोरेक आर्यभटीयाख्योऽपरश्चार्द्धरात्रिकाभिधो लुप्तश्च । आर्यभटीयस्य भागत्रयं, संक्षिप्ता प्रस्तावना च ।

अयमेव महापुरुषः सर्वप्रथमं व्यासपरिध्योस्सम्बन्धं —

"चतुरधिकं शतमष्टगुणं द्वाषष्टिस्तथा सहस्राणाम् .
अयुतद्वयविष्कम्भस्यासन्नो वृत्तपरिणाहः[3] ॥

अथात् $\Pi = \frac{६२८३२}{२००००} = ३.१४१६$

मानमिदं ग्रीकगणितज्ञैर्निर्धारितमानस्य २२/७

---

१. आर्यभटीयगणितपादे श्लोकः १ ।

२. तत्रैव कालक्रियापादे श्लोकः १० ।

३. आर्यभटीयगणितपादे श्लोकः १० ।

इत्यस्यापेक्षया शुद्धतरम्। अयमेव च मनीषी पृथिव्या गतिशीलतां—

"अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्।
अचलानि भानि तद्वत् समपश्चिमगानि लंकायाम्[1] ॥

इतिश्लोकेनोपदिदेश यां योरोपीयवैज्ञानिका वर्षसहस्रानन्तरमेवाऽवगन्तुं पारयामासुः।

आर्यभटीयगोलपादोऽष्टशततमे ख्रीस्ताब्देऽनूदितोऽरबीभाषया "जिज अल आर्जभटे"ति नाम्ना। अलबीरूनीमहोदयेन समुद्धृतानि वचनान्यस्मादेवानुवादादित्यवगन्तव्यमत एव के० महोदयस्य भ्रान्तिर्यद्गणितपादस्य नार्यभटकर्तृकत्वमिति।

आर्यभटीयस्य टीकासम्पत्तिः

ग्रन्थरत्नस्यास्य बहूनि भाष्याणि विरचितानि। तेष्वनेकानि दाक्षिणात्यविद्वज्जनकर्तृकाणि यैर्विशेषेणास्याध्ययनं विधीयते। प्रमुखभाष्यकर्तॄणां नामान्यधो निर्दिश्यन्ते—

१. **प्रभाकरः** (ख्रीस्ताब्दः ५२५ तमः)—अस्य भाष्यं लुप्तम्।

२. **भास्करप्रथमः** (ख्री० ६२९)—अस्य भाष्यं लक्ष्मणपुरीयेण प्रो० कृपाशङ्करशुक्लमहोदयेन १९७६ तमे ख्रीस्ताब्दे सम्पादितम्।

३. **सोमेश्वरः** (१०४० ख्री०)—एतत्कृत-वासनाभाष्यस्य पाण्डुलिपिद्वयं बम्बईविश्वविद्यालयपुस्तकालये सन्निहितम्।

४. **केरलीयः सूर्यदेवयज्वा** (ज०११९१ ख्री०)—एतत्प्रणीतभटप्रकाशस्य बह्व्यः पाण्डुलिपयो दक्षिणभारते प्राप्यन्ते।

५. **परमेश्वरः** (१४००-१४५० ख्री०)—सूर्यदेवकृतभटप्रकाशानुगमिनी भटदीपिका एच० केर्नमहोदयेन प्रकाशिता (१८७४ ख्री०)।

६. **नीलकण्ठसोमसुत्वनः** (ज० १४४३ ख्री०)—"तिरुवनन्तपुरम् (त्रिवेन्द्रम्) संस्कृत सिरीज"तः प्रकाशितं तस्य भाष्यम् १९३०, ३१, ५७ ख्रीस्ताब्देषु।

७. **यल्लयः** (१४८२ ख्री०)—सूर्यदेवकृतभटप्रकाशानुकारी तस्य "व्याख्यानम्"। अस्यैका पाण्डुलिपिर्मद्रासनगरे अपरा च "इण्डिया ऑफिस लाइब्रेरी"त्याख्यपुस्तकालये मैकेंजीपाण्डुलिपिमध्ये।

८. **रघुनाथः** (१५९०) एतत्प्रणीताया व्याख्यायाः सूचना के० माधवकृष्णशर्मणा दत्ता निम्नशोधपत्रे।

दि आर्यभटीयव्याख्या ऑफ रघुनाथराज—"ए रेर ऐण्ड हिदर्टू अन्नोन वर्क", ब्रह्मविद्या-अङ्क ६ (१९४२) २१७-२२७।

९. **कोटिकलपूडिकुलीनः कोदण्डरामः**—आन्ध्रप्रदेशस्थगोदावरीजनपदीयबोब्रिलिवास्तव्यः (१८५४ ख्री०) तेनैका विरचिता संस्कृतटीका आर्यभटतन्त्रगणिताख्याऽपरा च तेलुगुटीका सुधातरङ्गाख्या। इयं च बी० लक्ष्मीनारायणशास्त्रिणा सम्पादिता मद्रासगवर्नमेन्ट ओरियन्टल सिरीजतः १९५६ ख्रीस्ताब्दे प्रकाशिता, श्रेणी १३९.

---

१. तत्रैव गोलपादे श्लोकः ९।

१०. **भूतिविष्णुः**—एतद्विरचितभाष्यस्यैकैव सम्भाव्यमाना पाण्डुलिपिर्जर्मनीस्थे बर्लिननगरे। दशगीतिकाभाष्यस्य (एपोग्राफ) साक्षात्प्रतिलिपिश्च वाशिंगटन (डी० सी०) नगरे।

११. **घटीगोपः**—एतद्विरचितव्याख्यायाः पाण्डुलिपिद्वयं तिरुवनन्तपुरम् (त्रिवेन्द्रम्) नगरे।

१२. **विरूपाक्षसूरिः**—एतद्विरचिततेलुगुटीकाया एका पाण्डुलिपिः मैसूरनगरे। मुम्बईनगर आर्यभटीयस्य मराठीभाषयाऽनूदिता पाण्डुलिपिरपि वर्तते।

आर्यभटीयस्य संस्करणानि

परमेश्वरकृतभटदीपिकासहितं **एच० कर्न**द्वारा सम्पादितं, लन्दनतः १८७४ खीस्ताब्दे प्रकाशितं चैकं संस्करणम्। इदमेव हिन्दीभाषयाऽनूदित**मुदयनारायणसिंह**द्वारा सम्पादितं, मुजफ्फरपुरतः १९०६ खीस्ताब्दे प्रकाशितञ्च।

नीलकण्ठसोमसुत्वन्कृतभाष्येण संवलितं दशगीतिकारहितं च संस्कणम् **के० साम्बशिव-शास्त्रि**द्वारासम्पादितमाद्यभागद्वयम्, तृतीयं च **सुरनदकुंजनपिलई**महोदयेन सम्पादितम्। त्रिवेन्द्रम् संस्कृतसिरीजतः यथाक्रमं भागत्रयं १९३०, १९३१, १९५७ खीस्ताब्देषु १०१, ११०, १८५ तमाङ्करूपेण प्रकाशितम्। बलदेवमिश्रविरचितं टीकाद्वयं, तयोरेका देववाण्याऽपरा हिन्दीभाषया पाटलिपुत्र (पटना) तः १९६६ खीस्ताब्दे प्रकाशिता।

गणितपादाख्यो द्वितीयोऽध्यायः फ्रेंचभाषयाऽनूदितः **एल० रोड**महोदयेन जर्नल एशियाटिक ७(१३) (१८७९) पृ० ३९३-४३४, पुनर्मुद्रितः पेरिसनगरे १८७९ खीस्ताब्दे। अयमेवाङ्ग्ल-भाषया **जी० आर० के०** महोदयेनानूदितः प्रकाशितश्च शोधपत्ररूपेण—**"नोट्स ऑन इण्डियन मैथेमेटिक्स, नं० २—आर्यभट", जर्नल आफ दि एशियाटिक सोसाइटी आफ बंगाल, अंक ४, (१९०८), १११-१४१।**

पी० सी० सेनगुप्तकृत आङ्ग्लभाषयानुवादः (दि आर्यभटीयम्) : जर्नल ऑफ दि डिपार्टमेण्ट ऑफ लेटर्स इन दि यूनिवर्सिटी ऑफ, कलकत्ता अंक १६ (१९२७) पृ० १-५६।

डब्ल्यू० ई० क्लार्ककृतोऽनुवादस्तु **'दि आर्यभटीय आफ आर्यभट'** रूपेण शिकागोनगरतः १९३० खीस्ताब्दे प्रकाशितः।

शिकागोनगरस्थेन वैद्यनाथशास्त्रिणा १९२५ खीस्ताब्द आङ्ग्लभाषया साकल्येनानूदितोऽयं ग्रन्थः किन्त्वप्रकाशितः।

के० एस० शुक्लमहोदयेनसम्पादितं **भास्करसोमेश्वरभाष्यसंवलितम्, इण्डियन नेशनल साइंस अकादमी देहलीतः १९७६ खीस्ताब्दे प्रकाशितमेकं संस्करणम्।**

आर्यभटमधिकृत्य वाङ्मयन्तु **डेविडपिंग्री**महोदयेन 'सेन्सस आफ दी इक्जैक्ट साइन्सेज इन इण्डिया' इत्याख्ये प्रबन्धे द्रष्टव्यम्। विशेषेणोल्लेखनीयान्यधोनिर्दिश्यन्ते। एतत्संग्रहार्थ-**डेविड पिंग्री**महोदया धन्यवादार्हाः।

१. **एफ० ई० हाल—आन दी आर्यसिद्धान्त, जर्नल ऑफ दी अमेरिकन ओरियण्टल सोसाइटी ६ (१८६०) ५५६-५५९।**

२. **कमिटी आफ पब्लिकेशन (विशेषतो डब्ल्यू० एच० ह्विटनी), 'एडीशनल नोट ऑन आर्यभट एण्ड हिज राईटिंग्स'। जर्नल ऑफ अमेरिकन ओरियन्टल सोसाइटी ६ (१८६०) ५६०-५६४।**

३. **एच० कर्न**—'आन सम फ्रैगमेण्ट्स आफ आर्यभट', जर्नल आफ दी रायल एशियाटिक सोसाइटी २० (१८६३) ३७१—३८६.
४. उपरिलिखितस्य पुनर्मुद्रणम् कर्नमहोदयस्य वेस्पीदे जेसश्रिप्ट १ (दी हेग, १९१३), ३१—४१ पृष्ठेषु।
५. **माऊ दाजी**—"ब्रीफ नोट्स आन दी एज एण्ड आथेण्टिसिटी आफ दी वर्क्स आफ आर्यभट वाराहमिहिर, ब्रह्मगुप्त, भट्टोत्पल, एण्ड भास्कराचार्य", जर्नल आफ दी रायल एशियाटिक सोसाइटी (१८६५) पृ० ३९२-४१८ (आर्यभटस्य विवरणम् केवलं ३९२-४०६, ४१३-४१४ पृष्ठेषु)
६. **एल रोड**—सुर ला वेरीताब्ले सिग्नीफिकेशियों दे ला नोतासियों न्यूमेरीक इन्वेन्ते पार आर्यभट जर्नल एशियाटिक सिरीज ७, १६ (१८८०), ४४०-४८५।
७. **सुधारकर द्विवेदी**—गणकतरङ्गिणी (पण्डित १४ (१८९२), पृ० २-७, पुनर्मुद्रितं च बनारस, १९३३ इत्यत्र)।
८. **एस० बी दीक्षित**—भारतीय ज्योतिःशास्त्र. पूनातः प्रकाशितम् १८९६ ख्रैस्ताब्दे, पुनर्मद्रितं च तत्रैव १९३१ ख्रैस्ताब्दे, पृ० १९०-२१०।
९. **जी० थिबो**—ऐस्ट्रोनोमी, ऐस्ट्रोलोजी उण्ड माथेमाटिक, ग्रुण्ड्स डेर इण्डो—एरिसशेन् फिलोलोजी उण्ड आल्टेर्टुन्सकुण्डे ३ भाग ९ (स्ट्रासबर्ग, १८९९) पृ० ५४-५५।
१०. **टी० आर० पिलइ**—आर्यभट आर दी न्यूटन आफ ऐस्ट्रानामी (मद्रास (१९०५), इदन्त्वप्राप्तम्, किन्त्वस्य समीक्षा इण्डियन थाट (१९०७) इत्यस्य २१३-२१६ पृ०।
११. **जी० आर० के**—"टू आर्यभटाज—" बिब्लिआथैका माथेमाटिका १० (१९१०), पृ० २८९-२९२।
१२. **जे० एफ० फ्लीट**—"आर्यभटाज सिस्टम आफ एक्सप्रेसिंग नम्बर्स"—जर्नल आफ दी रॉयल एशियाटिक सोसाइटी (१९११), पृ १०९-१२६।
१३. **एन० के० मजूमदार**—"आर्यभटाज रूल इन रिलेशन टू इन्डिटर्मिनेट इक्वेशन्स आफ दी फर्स्ट ढिग्री"—बुलेटिन आफ दी कलकत्ता मैथेमेटिकल सोसाइटी, ३ (१९११। १९१२) ११-१९।
१४. **जे० एफ० फ्लीट**—"टेबिल्स फार फाइन्डिंग दी मीन प्लेस आफ सैटर्न"—जर्नल आफ रायल एशियाटिक सोसाइटी (१९ ५), पृ० ७४१-७५६।
१५. **पी० सी० सेनगुप्त**—"आर्यभटाज मेथड आफ डिटर्मिनिंग दी मीन मोशंस आफ प्लैनेट्स—बुलेटिन आफ दी कलकत्ता मैथमेटिकल सोसाइटी, १२ (१९२०।१९२१); १८३-१८८।
१६. **आर० सेवेल**—"दी फर्स्ट आर्यसिद्धान्त" एपीग्राफिया इण्डिका १६ (१९२१।१९२२), १००-१४४, तथा १७ (१९२३।१९२४), १७—१०४।
१७. **ए० ए० कृष्णस्वामी अय्यंगर**—"दी मैथेमेटिक्स आफ आर्यभट" क्वार्टर्ली जर्नल आफ दी मिथिक सोसाइटी, १६ (१९२६), १५८-१७९।
१८. **विभूतिभूषणदत्त**—"टू आर्यभटाज आफ अल-बीरूनी", बुलेटिन आफ दी कलकत्ता

मैथेमेटिकल सोसाइटी १७ (१६२६), ५६-७४।

१९. एस० के० गागुंली--"वाज आर्यभट इन्डेटेड टू दि ग्रीक्स फार हिज अल्फाबेटिकल सिस्टम ऑफ एक्सप्रेसिंग नम्बर्स १" बुलेटिन आफ दि कलकत्ता मैथेमेटिकल सोसाइटी १७ (१६२६), १६५-२०२

२०. एस० के० गाँगुली—"नोट्स ऑन आर्यभट" जर्नल आफ दी बिहार एण्ड उड़ीसा रिसर्च सोसाइटी १२ (१६२६), ७८-६१।

२१. विभूतिभूषणदत्त—"आर्यभट, दी आथर ऑफ दि गणित", बुलेटिन आफ दी कलकत्ता मैथेमेटिकल सोसाइटी १८ (१६२७), ५-१८।

२२. एस० के० गांगुली—"दि एल्डर आर्यभट एण्ड दी मॉडर्न एरिथमेटिकल नोटेशन"— अमेरिकन मैथेमेटिकल मन्थली ३४ (१६२७), ४०६-४१५।

२३. पी० सी० सेनगुप्त—"आर्यभट, दि फादर आफ इण्डियन एपीसाइक्लिक एस्टॉनॉमी", जर्नल आफ दि डिपार्टमेन्ट आफ लेटर्स आफ कलकत्ता यूनिवर्सिटी, १८ (१६२६), १-५६।

२४. एस० के० गांगुली—"दि एल्डर आर्यभटाज वैल्यू आफ II" अमेरिकन मैथेमेटिकल मन्थली ३७ (१६३०), १६-२६।

२५. पी० सी० सेनगुप्त—"आर्यभटाज लास्ट वर्क" बुलेटिन आफ दी कलकत्ता मैथेमेटिकल सोसाइटी २२ (१६३०),११५-१२०।

२६. विभूतिभूषणदत्तः—"एल्डर आर्यभटाज रूल फार दि साल्यूशन आफ इन्डिटर्मिनेट इक्वेशंस आफ दी फर्स्ट डिग्री", बुलेटिन आफ दि कलकत्ता मैथेमेटिकल सोसाइटी २४ (१६३२), १६-२६।

२७. पी० के० गोडे—"अप्पयदीक्षिताज क्रिटिसिज्म आफ आर्यभटाज थ्योरी आफ दि ड्यूर्नल मोशन आफ दि अर्थ (भ्रूभ्रमवाद)", एनल्स आफ दि भण्डारकर ओरिएन्टल रिसर्च इंस्टीच्यूट, १६ (१६३८), ६३-६५, पुनर्मुद्रितं च गोडेज स्टडीज इन इण्डियन लिटरेरी हिस्ट्री II, सिंघी जैनसिरीज ३८ (बाम्बे, १६५४), ४६-५२।

२८. एस० एन० सेन—"आर्यभटाज मैथेमेटिक्स" बुलेटिन आफ दी नेशनल इंस्टीच्यूट आफ साइंसेज आफ इण्डिया २१ (१६६३), २६७-३१६।

२९. सत्यप्रकाश—"फाउण्डर्स आफ साइंसेज इन ऐंशियन्ट इण्डिया (न्यू देहली, १६६५) ४१६-४४६।

□

Vedic Numerations and the Genesis* of Arabic Numerals

Dr. N.M. Kansara,

In Europe the invention of the first number forms or notations is generally assigned to the eastern shores of the Mediteranian, sometimes to the Hebrews, sometimes to the Egyptians, but more often to the early trading Phoenicians.[1] Others argued that they were probably invented by the Chaldeans or the Jews. Others, and among them such influential writers as Tartaglia in Italy and Kobel in Germany, asserted the Arabic origin of the numerals, while still others left the matter undecided or simply dismissed them as "barbaric".[2]

While it is generally conceded that the scientific development of astrology among the Hindus towards the beginning of the Christian Era rested upon Greek or Chinese sources, yet their ancient literature testifies to a high state of civilization, and to a considerable advance in sciences, in philosophy, and along literary lines, long before the golden age of Greece. From earliest times even upto the present day the Hindu has been wont to put his thoughts into rhythmic form. The first of his worthy metaphysical poetry, known as the Vedas, consisted of the hymns of praise and poems of worship collected during the Vedic period which dates from approximately 2000 B.C. to 1400 B.C. Following this work, or perhaps contemporary with it, is the Brahmanic literature, which is partly ritualistic, known as the Brahmanas, and partly philosophical, known as the Upanisads. Our special interest is in the Sutras, versified abridgments of the ritual and of ceremonial rules which contain considerable geometric material used in connection with alter construction, and also numerous examples of rational numbers the sum of whose

---

*This research article was presented to the VIth World Sanskrit Conference (October 13-20, 1984) held at the University of Pennsylvania, Philadelphia, U.S.A.

squares is also a square, *i.e.* "Pythagorean numbers", although this was long before Pythagoras lived.[3] The importance of the Sutras as showing an independent origin of Hindu geometry, contrary to the opinion long held by Cantor of a Greek origin, has been repeatedly emphasized since the appearance of the important work of Von Schroeder,[4] Vogt, Burk, Max Simon, Thibaut and Levi.[5] Further, fundamental mathematical notations such as the conception of irrationals and the use of gnomons are shown in these works to be native to India. All this is highly pertinent as showing the aptitude of the Hindu for mathematical and mental work, a fact further attested by the independent development of the drama and of the epic and lyric poetry.

We are not sure that the most ancient forms of the numerals commonly known as Arabic had their origin in India ; they may have been suggested by those in Egypt, or in Eastern Persia, or in China, or on the plains of Mesopotamia. We are quite in the dark as to these early steps ; but as to their development in India, the approximate period of the rise of their essential features of place value, their introduction into the Arab civilization, and their spread to the West, We have more or less definite information.

There is evidence that primary schools existed in earliest times and of the seventy-two recognized sciences writing and arithmetic were the most prized.[6] In the Vedic period, say from 2000 to 1400 B.C., there was the same attention to astronomy that was found in the earlier civilizations of Babylon, China, and Egypt, a fact attested by the Vedas themselves.[7] Such advance in science presupposes a fair knowledge of calculation. The Lalitavistara_[8] one of the Buddhist sacred books, relates an incident in which Gopa the father of the Bodhisattva's bride demanded an examination of the five hundred suiters, and that when matched against Arjuna the great arithmetician who asked him to express numbers greater than 100 kotis, he gave in reply a scheme of number names as high as 10^{53}, adding that he could proceed as far as 10^{4215} : To this pre-Christian period belong also the Vedangas, of which the sixth known as Jyotisa (astronomy) is a short treatise of only thirty-six verses, written not earlier than 300 B.C., and affording us some knowledge of the extent of number work in that period.[9] The Hindus also speak of eighteen ancient Siddhantas or astronomical works, which, though mostly lost, confirm this evidence.[10]

Now, as to the types of the early forms of the first three numerals, there is considerable ground for interesting speculation. The earliest

Hindu forms were perpendicular. In the Nama Ghat inscriptions they are vertical. But long before either the Asoka or the Nama Ghat inscriptions the Chinese were using the horizontal forms for the first three numerals, but, a vertical arrangement for four. The tradition is that China brought her civilization around the north of Tibet from Mongolia, the primitive habitat being Mesopotamia, or probably the oases of Turkestan. The babylonian system, simple in its general principles but very complicated in many of its details, is now well known.[11] In particular, one, two and three were represented by vertical arrow-heads. We find that these Babylonian forms were not the primitive ones of this region, but that the early Sumerian forms were horizontal.[12] As to the numerals above three, there have been many conjectures. Buhler and Martin[13] asserted an Egyptian origin for these numerals. The Kharosthi numerals were formerly known as Bactrian, Indo-Bactrian and Aryan. Cunnigham was the first to suggest that these numerals were derived from the alphabet of the Bactrian civilization of Eastern Persia perhaps a thousand years before our era, and in this he was supported by the scholarly work of Sir E. Clive Beyley.[14] While the relation to ancient Bactrian forms has been generally doubted, it is agreed that most of the numerals resemble Brahmi letters, and would naturally expect them to be initials. Out of all the conflicting theories, and from all the resemblances seen or imagined between the numerals of the West and those of the East, probably no satisfactory conclusion can be drawn. Indeed, upon the evidence at hand we might properly feel that everything points to the numerals as being substantially indigenous to India.[15]

A circle is one of the world's common stock of figures, and that it should mean twenty in Phoenicia and in India is hardly more surprising than that it signified ten at one time in Babylon.[16] It is, therefore quite probable that an extraneous origin cannot be found for the very sufficient reason that none exists. No one knows what suggested certain of the early numeral forms used in India. There is no reason why they could not have been invented by some priest or teacher or guild, by the order of some king, or as a part of the mysticism of some temple.

No other language than Sanskrit has made consistent application in numerations, of the peculair system of numbers. Nor did the any other ancient people carry the numeration as far as did the Hindus. When the decimal—plan system of writing numbers (anka-palli) was perfected, the tenth symbol was called the shunya-bindu, generally shortened to shunya (the void). Brockhaus has well said that[17] if there

was any invention for which the Hindus, by all their philosophy and religion, were well fitted, it was the invention of a symbol for zero. This making of nothingness the crux of a tremendous achievement was a step in complete harmony with the genius of the Hindu. The first kind alphabetic numerals and also the word-system, both utilizing the place value, are play upon, or variation of, posiarithmetic, which should be most likely to occur in the country of its origin.

In view of the above discussion, let us now see what data we can find from the Vedic texts handed down to us since the origin of the Mantras and their compilation into the form of the Samhitas.

We can definitely say that, from the very earliest known times, ten has formed the basis of numeration in India. In fact there is absolutely no trace of the extensive use of any other basis of numeration in the whole of the Sanskrit literature. It is also the characteristic of India that there should be found at a very early date long series of number names for very high numerals.[18] While the Greeks had no terminology for denominations above the myriad (10^4), and the Romans above the mile (10^3), the ancient Hindus dealt freely with no less than eighteen denominations. In modern times also, the numeral language of no other nation is as scientific and perfect as that of the Hindus.[19]

In the Yajurveda Samhita (Vajasaneyi),[20] the following list of numeral denominations is given: Eka (1), dasha (10), shata (100), sahasra (1000), ayuta (10,000), niyuta (100,000), prayuta (1,000,000), arbuda (10,000,000), nyarbuda (100,000,000), samudra (1,000,000,000), madhya (10,000,000,000), anta (100,000,000,000), and parardha (1,00· ,000,000,000). The same list occurs at two places in the Taittiriya Samhita.[21] The Maitrayani Samhita[22] and the Kathaka Samhitas[23] contain the same list with slight alteration that niyuta and prayuta change places, and after nyarbuda a new term vadava intervenes, respectively. The Pancavimsha Brahmana[24] has the Yajurveda list upto nyarbuda inclusive, and then follow nikarva, vadava, aksiti, etc. The Sankhayaya Srauta Sutra[25] continues the series after nyarbuda with nikharva, Samudra, Salila, antya, ananta (=10 billions). Each of these denomonation is 10 times the preceding, so that there were aptly called dasagunottara samjna ("decuple terms") by Bhaskara later on.[26]

The Vedic Hindus showed the same proficiency in developing a scientific vocabulary of number names, in which the principle of addition, subtraction and multiplication were conveniently used,[27] The system

required the naming the first nine digits, *e.g.*, eka, dvi, tri, catur, panca, sat, sapta, asta and nava ; the second group of nine numbers obtained by multiplying each of the above digits by 10, *e.g.*, dasa (10), vimsat (20), trimsat (30), catvarimsat (40), pancasat (50), sasti (60), saptati (70), asiti (80), and navati (90); and the third group of 11 numbers beginning with 100 and followed by its multiples of 10 and its higher powers, *e.g.* sata, sahasra, ayuta, ... paradha, as shown above. The same multiplicative principle is seen to have been operating in sasti sahasrani (60,000), pancasat sahasram (50,000), dva-saptatih sahasrani (72,000), etc. The additive principle is generally used in making a number in saptavimsati (27), asta-trimsat (38), etc. Additive and multiplicative principles are simultaneously used when, in the number concerned, the members of the third group participate along with those of the second and the first, *e.g.* sapta satam vimsatih (720), sastim sahasram navatin nava (60,092).[28] Of greater importance, however, is the infrequent application of the subtractive principle in the number nomenclature, by the Vedic Hindus in coining such terms as ekanna-sata (100-1, *i.e.*, 99), ekanna-catvarimsat (40-1, *e.g.*, 39), etc.[29] The word ekanna, meaning 'one less', was later on shortened into ekona and una.

The four fundamental arithmetic operations, viz., addition, subtraction, multiplication and division, though nowhere spelt out in the Vedic literature, are obviously taken for granted as being commonplace operations.[30] The very fact that some of these principles were widely used by the Greeks, the Etruscans and the Babylonians, but to the extent of very limited range of the digits, does not warrant the deduction that they were borrowed by the Vedic Aryans ; it would rather testify to their being indebted to the Vedic people, may be at the Indo-European stage, when the Vedic Mantras may not have been yet compiled into the forms of the extant Samhitas. On the contrary, the elaborate development scientific system of numeration was highly necessiated by the ritual exigences of the Vedic people who were keen to fix up the exact timings for their seasonal sacrificial ceremonies. This is all the more evident from the fact that, the Rgveda and the Brahmanas testify to an interesting case of dividing one thousand in three equal parts : Although the division of the thousand is not explicitly mentioned in the Rgveda, it is done so in the Taittiriya Samhita,[31] which while incorporating the rc, modifies the last line as "Vedic divide the thousand into three". The full explanation of the arithmetical feat of Indra and Visnu in the proposed division is given in the Satapatha Brahmana as follows : 'For when Indra and

Visnu divided a thousand (cows) into three parts, there was one left, and here they caused to propagate herself in three kinds; and hence even now, if anyone were to divide a thousand by three, one would remain over'.[32]

Over and above the above-mentioned operations with the absolute units, the Vedic texts and their appendages clearly show indications about their acquaintance with arithmetical operations with elementary fractions. The Rgveda gives names of a number of simple fractions such as ardha (1/2), tripada (3/4),[33] and the Maitrayani Samhita mentions pada (1/4), sapha (1/8), kustha (1/16),[34] and from the Sulvasutras onwards we meet with terms such as amsa, bhaga to denote fractions in general.

Evidence of series of numerals in geometrical progression is available in the Taittiriya Samhita[35] where the odd (ayugma) and the even (yugma) ones are mentioned, viz., 1, 3, 5, ...; 2, 4, 6; 4, 8, 12; 5, 10, 15; 10, 20, 30; 19, 29, 39, ... 99; 20; 100, etc. The Pancavimsa Brahmana[36] mentions another geometrical series in progression in connection with prescription of daksinas in gold measures, viz., 12, 24, 48, 96, 192, ... 3072, 6144, ... 49152, 98304, 196608, 393216. While the summations of such series are not given in this text, it is correctly done in the Satapatha Brahmana[37] as follows : '...there are seven of these metres, increasing by four syllables; and the triplets of these make seven hundred and twenty syllables and thirty-six in addition thereto'. Although no general rule for finding the summation is indicated in this text, it virtually comes to be computed as 3(24-28-32-......7 terms) =37/2 2 24-(7-1) 4=756. The recurrence of both arithmetical and geometrical series, with the correct statement of the results of their summation, strongly suggests that the Vedic Hindus probably possessed some method of finding the summation of such series.[38] Thus the Brhaddevata (400 B.C.) gives the summation 2 3 4 ......1000=500499.[39] Pingala, in his Chandah-sutra (200 B.C.), used a geometrical series 2, 2^2, 2^3....[40]

Another favourite mathematical pursuit of the Vedic Hindus was in the field of permutations and combinations, the interest being undoubtedly activated by the consideration of the Vedic metres and their variations. The wellknown Vedic metres, *e.g.* Gayatri, Anustubh, Brhati, Tristubh, Jagati consist of the quarters of 8, 9, 11, 12 syllables. The Vedic metre specialists dealt with the problem of producing different possible types of metres from those of varying syllables by changing the long and short sounds within each syllable group, thus leading invariably

to laying the foundation of the mathematics of permutations and combinations.[41] Special importance attaches to Pingala's method of meruprastara, virtually the same as the triangle array known in Europe as Pascal's triangle, for finding the number of combinations of *n* syllables taken 1, 2, 3,... *n* at a time.[42] The method has been explained by his commentator Halayudha (tenth century A.D.) elaborately.[43]

In view of this overwhelmingly stupendous evidence of scientific knowledge of the Vedic people, will it not be rather childishly pathetical to still stick to, and go on repeating the quite out-of-date medieval conjectural opinions of the then celebrated orientalist researchers? It is high time we begin to exhibit some academic honesty in revising our opinions in the light of fresh evidence put forth by successive generations of scholars seeking truth and nothing but the absolute truth, both in terms academic and metaphysical.

REFERENCES

1. Smith, David Gugene and Karpinski, Louis Charles—'The Hindu Arabic Numerals'. Ginn and Company, Boston and London, 1911, p. 27.
2. Smith *et al.*, (1911), *op. cit.*, pp. 3-4.
3. *Op. cit.*, pp. 12-13.
4. Schroeder, L. von—'Pythagoras and die Inder, Leipzig, 1884.
5. Smith *et al.*, *op. cit.*, p. 13.
6. Hillebrandt, A.—'Alt Indien'. Bresalau, 1809, p. 111 ; Buhler, G.—'Indische Palaeographic', Stressburg. 1896, p. 5.
7. Dutt. R.C.—'A History of Civilization in Ancient India', Vol. I. p. 174.
8. Lalitavistara, Ch. XII (Mithila Institute, Darbhanga, 1958 Edn.) pp 103-105.
9. Monier-Williams, Sir Monier—'Indian Wisdom' (4th Edn.), London, 1893, pp. 114, 177.
10. Dutt—*op. cit.*, Vol. II, p. 121.
11. Hilprecht, H.V.–'Mathematical, Metrological and Chronological Tablets from the Temple Library at Nippur;, Vol. XX, Pt. I (Series A, Cueniform Texts) Babylonian Expedition of the University of Pennsylvania, U.S.A., 1906.
12. Howard, Sir H.H.—'On the Earliest Inscriptions from Chaldea'. Proceedings of the Society of Biblical Archaeology, XXI (1899), p. 301, London.
13. Buhler, *loc. cit.*, p. 77.
14. Smith and Karpinski (1911), p. 30.
15. *Ibid.*, pp. 34-35.

16. Ball, C J.—"An Inscribed Lime Stone Tablet from Sippasa'. Proceedings of the Society of Biblical Archaelogy, Vol. XX, (1898), p. 25, London.

17. Brockhaus—'Zur Geschichte des Indischen Ziffernsystems'. Zeitschrift fur die Kunde des Morgenlandes, Vol. IV (1842).

18. Macdonell, A.A. and Keith, A.B.—Vedic Index, Vol. I (1912), p. 343.

19. Datta, Bibhutibhusan and Singh, Avdhesh Narayan—'History of Hindu Mathematics. Motilal Banarasidas, Lahore, 1935, pp. 9-10.

20. Yajurveda Samhita (Vajasaneyi), XVII, 2.

21. Taittiriya *S*amhita (Krsna Yajurveda), IV. 4.11.4 ; and VII. 2.10.1.

22. Maitrayani Samhita (Krsna Yajurveda), XVII, 2.20.

23. Kathaka Samhita (Krsna Yajurveda), XXXIX. 6.

24. Pancavimsa Brahmana, XVII. 14.1.2.

25. Sankyhayana Srauta Sutra, 15.11.4.

26. Bhaskaracharya—Lilavati, p. 9, *vs*. 3 (under 'Abhinnaparikarmastaka' section).

27. Bose, D.M., Sen S.N. and Subbarayappa B.V.—'A Concise History of Science in India'. Indian National Science Academy, New Delhi, 1971, p. 142.

28. Rgveda Samhita, I. 164/11; I. 53.9.

29. Taittiriya Samhita (K,Y.V.), VII. 2.11.

30. Bose *et al*., p. 142.

31. Taittiriya Samhita (K.Y.V.), VI. 1.6.

32. Satapatha Brahmana, III. 3.1.13.

33. Rgveda Samhita, X. 27.18 ; II. 30.5, etc.; X. 90.3; X. 117.8.

34. Maitrayani Samhita, II. 5.6.

35. Taittiriya Samhita, VII. 2.11.12.

36. Pancavimsa Brahmana, XVIII. 3.

37. Satapatha Brahmana, X. 5.4.7.

38. Bose, *et al*., p. 144.

39. Brhaddevata, VI. 115; VII. 51, etc.

40. Pingala's Chandahsutra, II. 7, 9.

41. Bose, *et al*., p. 156.

42. Bag, A.K —'Binomial Theorem in Ancient India', Indian Journal of Historical Studies, Vol. I (1966), pp. 68-74.

43. Halayudha's Commentary on Pingala's Chandahsutra, II. 16.

राजतरङ्गणी

—डॉ० बदरीनाथकल्ला

संस्कृतसाहित्ये कथासाहित्यलेखनस्य परम्परातिप्राचीना। अस्य कथासाहित्यस्य प्रारम्भिकावस्थासु अद्भुतकथानां, लोककथानां नीतिकथादीनाञ्च प्रचलनं भारवर्षे आसीत् लोकप्रियकथासु गुणाढय्स्य बृहत्कथा, क्षेमेन्द्रस्य बृहत्कथामञ्जरी, सोमदेवस्य कथासरित्सागरः, बुद्धस्वामिनः बृहत्कथाश्लोकसंग्रहः केषां सहृदयानां मनांसि न रञ्जयति ? नीतिकथासु पञ्चतन्त्रहितोपदेशौ प्रसिद्धे पुस्तके स्तः। इत्थमेव बौद्धसाहित्ये जातककथादयो जैनसाहित्ये प्रपञ्चकथादय उपलभ्यन्ते। आसु काश्चन कथा; कल्पिताः काश्चनैतिहासिकाः। उक्तकथा-साहित्यस्य विविधविधासु प्रमाणिकरूपेण राज्ञामैतिहासिककथालेखनस्य श्रेयः सर्वप्रथमं विश्व-विख्यातस्य कल्हणपण्डितस्यास्ति।

सौभाग्येन कश्मीरस्य प्राचीनेतिहासग्रन्थेषु महाकविकल्हणस्य राजतरङ्गणी लभ्यते। अस्येतिहासग्रन्थस्याभावे, इतिहासकाराणां कश्मीरस्यातीतं ज्ञानमसम्भवम्। ऐतिहासिक-परम्परायामस्य स्थानमत्यन्तमुत्कृष्टम्। नात्र विसंवादः कस्यापि विदुषः। कल्याणस्यापभ्रंश-शब्दः 'कल्हणः' इति केषाञ्चन विदुषां मतम्। महाकविर्मङ्खः (द्वादशशताब्द्याः) स्वमहाकाव्य-श्रीकण्ठचरितस्य पञ्चविंशसर्गे कल्याणस्य चर्चा चक्रे। एनेन ज्ञायते यत्कल्याणेशो द्वादश-शताब्द्यामासीत् धीमता महाकविना कल्हणेनायमितिहासः ११-४८-४९ ईस्व्यामारब्धः। द्विवर्ष-पर्यन्तमनेनायं ग्रन्थः समापितः। कश्मीरराजस्य **जयसिंहस्य** (११२८-११४१ ईस्वीं यावत्) राज्य-काले कल्हणपण्डितः स्वेतिहासग्रन्थस्य रचनं चकार।

कल्हणस्य पितृनाम चम्पक आसीत् यस्तत्कालीनः राज्ञो हर्षस्य मन्त्री आसीत्। अस्य पितृव्यः संगीतकलानिपुणः कनक आसीत्। इतिहासकाराणां मतेन अस्य जन्मस्थानं परिहासपुर-मासीत्। यत्तु अधुना 'परसपोर' नाम्ना कश्मीरे प्रसिद्धम्। ऐतिहासिकविषयानुसन्धानशीलस्य कल्हणस्य दृष्टिकोणः सङ्कुचितो नासीत्। शैवः सन्नपि स बौद्धधर्मं प्रत्युदारो बभूव। प्रत्येकराज्ञो गुणदोषविवेचने तन्मतं निष्पक्षमासीत्। एकादशैतिहासिकग्रन्थानां गम्भीराध्ययनान्तरं स राजतरङ्गिणीग्रन्थरत्नं लिलेख। कल्हणः स्वपूर्ववर्तिनां केषाञ्चनेतिहासकाराणां तथा मेण्ठादि-कवीनां सुन्दरं परिचयं ददौ। एषु इतिहासकारेषु सुव्रत-क्षेमेन्द्र-पद्ममिहिर-छविल्लाकर,-हेला-राजादय उल्लेखनीयाः सन्ति। हेलाराजनामकेन ब्राह्मणकविना द्वादशसहस्रश्लोकयुतस्य पार्थि-वावलीनामकग्रन्थस्य रचना कृता। तदाधारेणैव पद्ममिहिरनामकविः स्वरचनायामशोकस्य पूर्वजानां लवाद्यष्टराज्ञामुल्लेखं चकार। इत्थमेव छविल्लाकरनामकेन कविनापि स्वग्रन्थे

"किसी कारणवश यदि जल की व्यवस्था न हो सके तो वैसी स्थिति में 'काल-लोप' न करते हुए 'अनूदकी सन्ध्या' कर लेनी चाहिये। मूलतः प्रधान पुरुषातीत की सन्धि होने पर जो सत्त्वगुणशालिनी सन्धि है, वही सन्ध्या कहलाती है। जो अनूदकी सन्ध्या है वह लेप, स्नेह से विवर्जित, सम्पूर्ण भूतों की सन्धिनी-शोधन करनेवाली और भय का नाश करनेवाली है। हृदयरूपी आकाश में स्थित सूक्ष्मरूप से सूर्य की रेखा के प्रतीकात्मक चन्द्र, सूर्य एवं अग्नि के तेज से संस्कृत अण्ड (शरीर) को भेदन कर उत्कृष्ट ज्योति रूप में निकलती हुई दीर्घघण्टा के शब्द के समान, मन से आत्मतत्त्व की अनुभूति का हृदय में ध्यान करना ही अनूदकी सन्ध्या है। सन्धिवेला में ही सन्ध्योपासन करना चाहिये न तो सूर्य के अस्त होने पर और न सूर्य के उदय होने पर।

इन सभी दृष्टियों से विचार करने पर 'सन्ध्या' न केवल एक सामान्य कर्म ही है, अपितु ज्ञान-विज्ञान से परिपूर्ण, साधना-सदन का मुख्य द्वार, सर्वोपरि करणीय, इहलोक तथा परलोक की साधक, निगम एवं आगम से प्रतिपादित तथा समस्त शास्त्र-वेद, आगम, पुराण, धर्मशास्त्र आदि से अनुमोदित एक विशिष्ट आवश्यक विधान है। यही कारण है कि प्रत्येक धार्मिक व्यक्ति किसी न किसी रूप में सन्ध्या करता ही है। सन्ध्या के पारम्परिक प्रयोग-विधान पर इतना अधिक विस्तृत विचार किया गया कि सभी का एकत्र सङ्कलन सम्भव नहीं है। अतः हमने अत्यावश्यक तथा पूर्वकाल में अप्रकाशित साहित्य एवं प्रक्रिया पर यत्किञ्चित् निर्देश दिया है। अभी भी बहुत सी बातें विचारणीय हैं, जिन्हें पृथक् पुस्तक में प्रकाशित करने का हम प्रयास करेंगे।

विद्यारण्यगुरोरनैव-विशद-प्रज्ञान-कासारज-
श्रीमद्-वन्द्यपदारविन्द-मकरन्दामोद-सम्मोदितः।
यत् सत्यं निगमागमेषु गदितं तत्संमतो राजतां,
सन्ध्याया गुणगौरवेण निचितः सोऽयं निबन्धो मम॥

—०—

आगमेषु प्राणायाम-चिन्तनानि

—आचार्यः पण्डितरमानाथशास्त्री

शास्त्रेषु प्राणायाममधिकृत्य बहुधा कथितमस्ति। यथा—

इतिकृतेऽधिकृतो भवति ध्रुवं परमदैवतमन्त्रजपादिषु।
पवनसंयमनेत्यमुना चरेद्यमिह जप्तुमसौ मुनिमिच्छति ॥१॥

प्राणायामः — तत्र प्राणानां शरीरादपि द्वादशाङ्गुलाधिकानामायामः। इति।

आयामनमायामः सङ्कुचितभावः शरीरसाम्यं शरीरान्न्यूनभावापादनं वेति प्राणायाम इत्यर्थः, अत एव पवन-संयमनमित्युक्तम्। त्रिपुरासारसमुच्चये—

अथेदं शरीरं स्वकीयाङ्गुलीभिर्बुधैः षण्णवत्यङ्गुलायाममुक्तम्।
दिनेशाङ्गुलीभिः शरीरात् समीरोऽधिकः प्राणसंज्ञो मतो योगविद्भिः ॥२॥

इति प्राणवायुं सदाभ्यासतो यो, नरो न्यूनभावं नयत्येनमङ्गात्।
समत्वं शरीरेण वा भूतलेऽस्मिन् स पूज्यो बुधैरुत्तमो योगवित्तु ॥३॥ इति।

स तु पूरकाद्यङ्गत्रयात्मकः। तथा च—"अङ्गत्रयात्मकः प्रोक्तः पूरकुम्भकरेचकै"रिति।

तत्र कुम्भक एव प्राणायामशब्दो मुख्यः, इतरयोस्तदुपकारकत्वात्। यथोक्तं—'ज्ञानार्णवे'—

कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम्।
प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना ॥१॥ इति।

स पुनर्द्विविधः सहितः केवलश्च। तत्र सहितोऽपि द्विविधो रेचकादिक्रमः पूरकादिक्रमश्चेति। तत्र रेचकादिक्रममाह 'योगशास्त्रे' —

प्राणायामस्त्रिधा प्रोक्तो रेचपूरक-कुम्भकैः।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ॥१॥
विरेच्य पूरकः कार्यः शनैः सहितकुम्भके।
यावत्केवलसिद्धिः स्यात् तावत्सहितमभ्यसेत् ॥२॥

इति। तत्क्रममाह प्रपञ्चसारे —

रेचक-पूरक-कुम्भकभेदात् त्रिविधः प्रभञ्जनायामः।
मुञ्चेद् दक्षिणयाऽनिलमन्तर्नयेद् वामया च मध्यमया।
संस्थापयेच्च नाड्येत्येवं प्रोक्तानि रेचकादीनि।
षोडश तद्द्विगुण-चतुःषष्टिमात्रकाणि तानि च क्रमशः॥ इति॥

नाड्येत्यस्य दक्षिणयेत्यादिभिः सम्बन्धः। तथा च "इडा वामे तनोर्मध्ये सुषुम्ना पिङ्गला परे।" द्विगुण इति षोडशानां द्विगुण इत्यर्थः।

अथ पूरकादिक्रममाह समुच्चये—

शीतांशुमार्गेण शनैः समीरमापूरयेत् सोदरमादरेण।
विकारमात्राभिरपेततन्द्रः कालाग्निमूलार्पितचित्तवृत्तिः॥१॥
ततो धारयेन्मातृकाधारचेताः चतुःषष्टिमात्रासमापूरितं तम्।
बहिर्भास्वता रेचयेन्मन्दमेनं तदार्धाभिरन्तर्निरूढं तु ताभिः॥२॥

तथा च 'वामकेश्वरे'—

पूरकं कुम्भकं चैव रेचकं च विचिन्तयेत्।
मूलाधारे लयं कृत्वा पीत्वा वायु शनैः शनैः॥१॥

यथेष्टं पूरयेद् देहं तत्त्ववतो विजितेन्द्रियः।
ततस्तु स्तम्भयेद्वायुं प्रकाशगत-मानसः॥२॥

कुम्भके चिन्तयेद्विद्वान् विद्यां मुक्तिकरीं शुभाम्।
तदा तु रेचयेद् वायुं गम्यते यत्स्वभावतः॥३॥

देहान्निःसारयेन्मन्त्री स्वदेहस्थं तमोगुणम्।
वामेन पूरयेद् वायुं दक्षिणेन विरेचयत्॥४॥

माहेन्द्रेण समेनैव मन्त्री कुम्भकमभ्यसेत्।
सदा कुम्भकयोगेन लभते सिद्धिमुत्तमाम्॥५॥

अभ्यासी कारयेन्मात्रां यथेष्टं तत्त्वदर्शिनाम्।
यथाशक्त्या पिबेद्वायुं यथाशक्त्या च कुम्भयेत्॥६॥
स्वभावं च त्यजेद् वायुस्ततः सिद्धिः प्रजायते। इति।

तस्यां विद्यायां पूरकादिक्रम एव नित्यातन्त्रोक्तः, रेचकादिक्रमस्तु साधारणतया प्राप्तः श्रुत्यनुसारेण प्रपञ्चसारादौ वैष्णवादि-सामान्यतया प्रोक्तत्वात्। तथा च श्रुतिः 'प्रत्येकमशक्तः केवलकुम्भके वेति ध्येयम्।

रेचकप्रकारमाह—तदेत्यादि। गम्यते बहिरिति शेषः। स्वभावतो न तु न्यूनाधिकः

त्वादन्यथा तु अयुक्ताभ्यासाद् दोषापत्तेः। तथा चोक्तं गोरक्षशतके—

युक्तं युक्तं पिबेद् वायुं युक्तं युक्तं च धारयेत्।
युक्तं युक्तं त्यजेदेनमेवं सिद्धिमवाप्नुयात् ॥१॥
यथा सिंहो गजो व्याघ्रो भवेद्वार्यः शनैः शनैः।
तथैव हि निजो वायुरन्यथा हन्ति साधकम् ॥२॥
प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्।
अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः ॥३॥
हिक्काश्वासश्चकासश्च शिरःकर्णाक्षिवेदनाः।
भवन्ति विविधा रोगाः प्राणायामव्यतिक्रमात् ॥४॥

ततः शास्त्रोक्तमार्गेण प्राणायामान् समाचरेत्। इति।

देहान्निःसारयेदिति। रेचकयोगवायुना सह देहस्थस्तमोगुणो बहिर्निःसृत इति भावयेदित्यर्थः। अथ पूरकादेर्नाडीनियममाह वामेनेत्यादि। इत्येकप्राणायामे प्रथमे द्वितीयादितृतीयादियुग्मे तु दक्षिणेनैव पूरयेत्। तदुक्तम्—

येनैव सन्त्यजेत् तेन पूरयेद् धारयेत् ततः। न रेचयेत् ततोऽन्येन शनैरेवं पुनः पुनः ॥१॥ इति

योगशास्त्रे—

अथ संनह्येद् योगी वशी हितमिताशनः।
गुरूपदिष्टमार्गेण प्राणायामान् समभ्यसेत् ॥१॥
चले वाते चलं चित्तं निश्चले दृढबन्धनम्।
योगी स्थानमवाप्नोति ततो वायुं निबन्धयेत् ॥२॥
यावद् वायुः स्थितो देहे तावज्जीवनमुच्यते।
मरणं तस्य निष्क्रान्तिस्ततो वायुं निबन्धयेत् ॥३॥
मलाकुलासु नाडीषु मारुतो नैव मध्यमः।
कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवेत् ॥४॥
शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम्।
तदैव जायते योगी प्राणसंग्रहणे क्षमः ॥५॥
प्राणाभ्यासं ततः कुर्यान्नित्यं सात्त्विकया धिया।
यथा सुषुम्नापार्श्वस्था मलाः शोषं प्रयान्ति च ॥६॥
बद्ध-पद्मासनो योगी प्राणं चन्द्रेण पूरयेत्।
धारयित्वा यथाशक्ति पुनः सूर्येण रेचयेत् ॥७॥
प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः।
विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत् ॥८॥

येन त्यजेत्तेन पीत्वा धारयेदनिरोधतः ।
रेचयेच्च ततोऽन्येन शनैरेवं न वेगतः ॥९॥

प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यथा रेचयेत्,
पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद् वामया ।
सूर्याचन्द्रमसोरनेन विधिनाऽभ्यासं सदा तन्वतां,
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः ॥१०॥ इति ।

तथा त्रिपुरासारे —

विपरीतमतो विदधीत पुनः पुनरप्यथ तद्विपरीतमिति ।
अमुना विधिना सुमनाः सततं मरुतो विदधीत सुसंयमनम् ॥१॥ इति ।

अथ कुम्भकफलमाह —

सहेत्यादि केवलकुम्भकयोगेनत्यर्थः । सुसाधिते वायौ मात्रासंख्यानमुक्तं प्रथमाभ्यासे, तत्राप्ययं कामचारमाह—"अभ्यासी" इत्यादि । अभ्यासी प्रथमाभ्यासी तत्त्वदर्शिनां मात्रां यथेष्टं कारयेदित्यर्थः । एतदेव स्पष्टयति यथाशक्त्येत्यादि । तथा च सति प्रथमाभ्यासी यथोक्त-संख्यामात्रया न्यूनमपि कुर्यात्, मध्यमाभ्यासी यथोक्तसंख्यामेव, उत्तमाभ्यासी ततोऽधिकसंख्यामपि कुर्यादिति यथेष्टपदतात्पर्यम् ।

अथ मात्रालक्षणमाह नारदः —

कालेन यावतात्मीयो हस्तः स्वं जानुमण्डलम् ।
पर्येति मात्रा स्यात् तुल्या स्वयैकश्वासमात्रया ॥१॥ इति ।

तथा फेत्कारिणीतन्त्रे —

जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
क्रियते चांगुलीस्फोटः सा मात्रा परिकीर्तिता ॥१॥

इति । अपि च कात्यायनीतन्त्रे —

मध्यामूलाद् यावदग्रमङ्गुष्ठेन च पीड्यते ।
मात्रा च प्रोच्यते सद्भिर्योगेऽभीष्टं प्रयच्छते ॥ इति ।

वस्तुतस्तु तत्तन्मन्त्रोच्चारणमेव मात्रा । तथा च गौतमीये —

रेचयेद् दक्षिणे वायुं पूरयेद्वामतस्ततः ।
द्वात्रिंशदभ्यसेन्मन्त्रं प्राणायामः स उच्यते ॥१॥ इति ।

ततः पूरकानन्तरं कुम्भकेऽभ्यसेदित्यर्थः । एतत् तु रेचकादिपक्षे, अत एव कुम्भक एव जपादिकं नेतरयोः ।

'दक्षिणामूर्ति-कल्पे'—

प्राणापानौ समौ कृत्वा सुविधाय च कुम्भकम् ।
हृत्पङ्कज-समासीनमाध्यायेद् यतमानसः ।।

अगस्त्यसंहितायाम् —

यावच्छक्यं नियम्यासून् मनसैव जपेन्मनुम् ।
रामं मुहुर्मुहुर्ध्यायन् पूर्वोक्तविधिना सुधीः ।।१।। इति ।

असून् नियम्य कुम्भकं कृत्वा रामं ध्यायन् यावच्छक्यं मनुं जपेदिति सम्बन्धः । एतेन यत्र विशेषो नोक्तस्तत्र यथाशक्ति मन्त्रं जपेदिति वैष्णवाः । तथैव रीत्यैकमदृष्टन्यायेन सर्वत्रैवायं प्रकारः । अत एव श्रीविद्यायां कामेश्वरतन्त्रे—

कुम्भके चिन्तयेद्विद्वान् विद्यां मुक्तिकरीं शुभाम् ।

इत्युक्तमिति वदन्ति । वस्तुतस्तु सगर्भप्राणायामे केवलकुम्भके कुम्भक एव, सहित-कुम्भके शक्तावङ्गभयेऽप्यशक्तौ कुम्भके स्वावश्यकं जप-ध्यानमिति तु तेषां वचनानां निर्गलितार्थः । स च मूलया बालया वा तदशक्तौ प्रणवेन वा कार्यः । तदुक्तं फेत्कारिणीतन्त्रे —

प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन वा ।"

निषिद्धप्रणवोच्चारिणां प्रणवस्थाने सार्द्ध त्रिमात्रिक ओकारो ज्ञेयः । कालिकापुराणे —

चतुर्दशस्वरो यस्तु सार्द्धत्रिमात्रसंज्ञकः ।
नादाबिन्दुसमायुक्तः शूद्राणां सेतुरुच्यते ।।१।।

अत्र सुसाधितप्राणानां पूरकादौ त्रिपुरासारोक्तैव संख्या जपादौ तन्त्रराजे तदन्यथा । यदुक्तं तन्त्रराजे—

एवं सुसाधितः पश्चाद् द्वात्रिंन्मात्रया हरेत् ।
धारयेत्तच्चतुष्षष्ट्या रेचयेत् तु तुरीयतः ।।१।।

इति तु श्रीकादिमते तदेतयोर्मतयोर्विकल्पः । तत्राशक्तौ सामान्यपटले फेत्कारीयतन्त्रोक्तः कार्यः ।

तद्यथा —

तथा द्वादशमात्राभिः कुम्भकः क्रियते सदा ।
तस्माद् द्विगुणमात्राभी रेचकः क्रियते तथा ।।१।।
प्राणामात्रयं त्वेवमेकैकं त्रितयात्मकम् । इति ।

अत्राप्यशक्तो सुभगोदयोक्तः कार्यः । यथा—

"प्राणायामत्रयं कुर्यात् स्मरन् विद्यां हृदा पुनः ।" इति ।

तदुक्तं तत्पद्धतौ व्याख्यातं—दक्षिणनाड्या एकवारं मूलमुच्चरन् वायुमापूर्य चतुष्कुम्भकं

कृत्वा वामनाड्या द्विवारं रेचयेदिति प्राणायामत्रयं कुर्यादित्यर्थः। अत्र दक्षिणेन—

शुचिः प्राणायामान् प्रणवसहितान् षोडश वशी,
प्रभाते सायं च प्रतिदिवसमेवं वितनुते ।
द्विजा यस्तं भ्रूणप्रहरणकृतांहोऽभिकलितं,
पुनन्त्येते मासादिह दुरिततूलौघदहनाः ॥१॥

त्रायन्त्यभीक्षमाभिरपीह मासैर्जन्मान्तरोपार्जितपापपुञ्जात्
संवत्सराद् ब्रह्मपदस्तदेकं प्रकाशयत्येव यदच्युताख्यम् ॥२॥ इति।

योगशास्त्रे तु—

प्रातर्मध्यन्दिने सायमर्द्धरात्रे च कुम्भकान् ।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥१॥
कनीयसि भवेत् स्पन्दः कम्पो भवति मध्यमे ।
उत्तिष्ठत्युत्तमे प्राणरोधे पद्मासने मुहुः ॥२॥
जलेन श्रमजातेन गात्रमर्दनमाचरेत् ।
दृढता लघुता चैव तेन गात्रस्य जायते ॥३॥
अभ्यासे प्रथमे शस्तं मधु-क्षीराज्यभोजनम् ।
ततोऽभ्यासे दृढे जाते न तादृङ् नियमग्रहः ॥४॥ इति ।

तत्र क्रमः — विहितासनः संनिमीलितनयनयुगलो मूलाधारार्पितचित्तवृत्तिर्मूलमन्त्रादिकमुच्चरन् इडया वामनाड्या षोडशमात्रया वायुमापूर्य मूलाधारं प्रापय्याङ्गुष्ठकनिष्ठाऽनामाभिर्नासापुटौ विधृत्य चतुःषष्टिमात्रया तं वायुं स्तम्भयित्वा द्वात्रिंशन्मात्रया पिङ्गलया दक्षिणनाड्या शनैः वायुं रेचयेदित्येकः प्राणायामः। पुनस्तं पिङ्गलया वायुं शनैः शनैः समाकृष्य तथैवेडया रेचयेदित्यन्यः। एवं वैपरीत्येन विंशतिवारं द्वादश त्रिर्वा द्विर्वा यथाशक्ति कुर्यात्। ततः सिद्धिमवाप्नुयादिति । शारदा-तिलके-"मात्रावृद्धिक्रमेणैव सम्यग् द्वादश षोडश" इति संक्षेपः। अत्र सर्वत्र प्राणायामेनैव सर्वेषां कर्माधिकारः, अकरणे निन्दाश्रवणात्। अगस्त्यसंहितायाम्—

प्राणायामैर्विना यद्यत् कृतं कर्मं निरर्थकम् ।
अतो यत्नेन कर्तव्याः प्राणायामाः शुभार्थिभिः ॥ इति ।

अत एव आवश्यकोऽयं प्राणायामविधिः पूजायां भूतशुद्धिरिति प्राणायामविधिर्मंतद्वयसाधारणः। इति ।

सङ्कलयित्री— ज्योतिष्मती त्रिपाठी

अमनस्क योग

—म० म० डा० ब्रह्ममित्र अवस्थी

योगशास्त्र का व्यवस्थितरूप यद्यपि हमें महर्षि पतञ्जलि के योगसूत्र में प्राप्त होता है, किन्तु इसका प्रथमतः प्रारम्भ कब और किसके द्वारा हुआ है ? इस प्रश्न का निश्चित रूप से उत्तर दे सकना यदि असम्भव नहीं तो अत्यन्त दुष्कर कार्य अवश्य है। सामान्यतः 'इस शास्त्र के आदि गुरु शंकर हैं, ऐसा स्वीकार किया जाता है। अधिकांश श्लोकबद्ध योगग्रन्थों में शिव को उपदेष्टा के रूप में और महादेवी जगदम्बा पार्वती को और कहीं-कहीं भैरव को श्रोता के रूप में निबद्ध किया गया है। शिवसंहिता घेरण्ड संहिता आदि ग्रन्थ इसमें प्रमाण हैं। इस 'अमनस्क योग, ग्रन्थ में वामदेव ने ईश्वर (शिव) से ही जीवन्मुक्तिप्रद उपाय को जानने की इच्छा की है, जिसके उत्तर में ईश्वर (शिव) ने उन्हें इस योग (अमनस्कयोग) का उपदेश किया है; जबकि योगशिखोपनिषद् एवं योगबीज नामकग्रन्थों में स्वयं पार्वती प्रश्न करती हैं। भगवान् शिव ही वहां भी उपदेष्टा के रूप में निबद्ध हैं।[1]

इसके विपरीत योगतत्त्वोपनिषद् में विष्णु वक्ता के रूप में निबद्ध किये गये हैं, यहां श्रोता के रूप में स्वयं ब्रह्मा उपस्थित हैं—

विष्णुर्नाम महायोगी महाभूतो महातपः।
तत्त्वमार्गे यथा दीपो दृश्यते परमेश्वरः।
तमाराध्य जगन्नाथं प्रणिपत्य पितामहः।
पप्रच्छ योगतत्त्वं मे ब्रूहि चाष्टाङ्गसंयुतम्।।[2]

इसी प्रकार दत्तात्रेय योगशास्त्र में दत्तात्रेय को योगशास्त्र के प्रवक्ता के रूप में निबद्ध किया गया है'[3] और वहां इन्हें भी विष्णु के रूप में ही स्वीकार किया गया है।[4] इस

---

१. (क) सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः।
तेषां मुक्तिः कथं देव कृपया वद शंकर।। योगशिखोपनिषद् १. १.

(ख) नाना मार्गास्त्वया देब कथितास्तु महेश्वर।
अधुना मोक्षदं मार्गं ब्रूहि योगविदांवर।।
बद्धाः येन विमुच्यन्ते नाथ मार्गमतः परम्।
तमहं कथयिष्यामि तव प्रीत्या सुरेश्वरि।। योगबीज ११-१४

२. योगतत्त्वोपनिषद् १. २-३. ३. दत्तात्रेय योगशास्त्र ८-१८.

४. दत्तात्रेयस्य विष्णोः पदनलिनयुगं नित्यमेव प्रपद्ये। वही २१६

ग्रन्थ में इस उपदेश को सुनने वाले सांकृति हैं। महाभारत में भगवद्गीता के उपदेष्टा भगवान् कृष्ण भी विष्णु के अवतार हैं। गीता में स्वयं कृष्ण को योगीश्वर स्वीकार किया गया है[1] तथा प्रत्येक अध्याय की पुष्पिका में उस अध्यायविशेष में एक योगविशेष का उपदेश प्रतिपादित है, ऐसा कहा गया है।[2] पातञ्जल योगसूत्र के व्यासभाष्य के व्याख्याकार विज्ञान भिक्षु ने योग के प्रवर्त्तक भगवान् हिरण्यगर्भ हैं, ऐसा संकेत किया है।[3]

इन तथ्यों आधार पर यह मानना ही अधिक सहज लगता है कि योग की परम्परा के आदि प्रवर्त्तक, अथवा इस शास्त्र के प्रथम उपदेष्टा कौन है? इस प्रश्न का आज उत्तर दे सकना सम्भव नहीं है। मानव चेतना के विकास के आदिकाल से ही योगसाधना और उसके शास्त्रीय स्वरूप का आरम्भ हुआ है, भगवान् शिव अथवा विष्णु आदि आराध्य देवों के भक्तों ने अपने-अपने आराध्य देवों को इस शास्त्र का प्रवर्त्तक अथवा आदि उपदेष्टा मान लिया है।

दत्तात्रेय-योगशास्त्र, जो वैष्णव परम्परा का योगग्रन्थ माना जा सकता है, में योग की चार शाखाएं मन्त्रयोग लययोग हठयोग और राजयोग (अष्टाङ्गयोग) वर्णित हैं। इसमें लययोग का प्रवर्त्तक आदिनाथ को माना गया है, और वहीं यह भी कहा गया है कि आदिनाथ स्वयं भगवान् शिव हैं—

लययोगश्चित्तलयः संकेतैस्तु प्रजायते।
आदिनाथेन संकेताः अष्टकोटयः प्रकीर्त्तिताः॥[4]
महादेवस्य नामानि आदिनाथादिकान्यपि।
शिवेश्वरश्च देवोऽसौ लीलया व्यचरत्प्रभुः॥[5]

इसी ग्रन्थ में अष्टाङ्गयोग (राजयोग) का उपदेश करने के अनन्तर उसे कविमार्ग अर्थात् शुक्राचार्य[6] द्वारा प्रवर्तित योगमार्ग कहा गया है—

'कविमार्गोऽयमुक्तस्ते सांकृतेऽष्टाङ्गयोगतः'॥[7]

दत्तात्रेय योगशास्त्र में ही महामुनि कपिल को हठयोग का प्रवर्त्तक अथवा प्रमुख साधक दूसरे शब्दों में हठयोग की परम्परा का प्रधान आचार्य माना है—

कपिलाद्यास्तु शिष्याश्च हठं कुर्युस्ततो यथा॥

---

१. यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः। भगवद्गीता १८. अन्तिम श्लोक
२. ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे......अर्जुनविषादयोगो नाम प्रथमोध्यायः।' ब्रह्मविद्यायां योगशास्त्रे...सांख्ययोगो नाम द्वितीयोऽध्यायः।...' ब्रह्मविद्यायां योगशास्त्रे...'कर्मयोगो नाम तृतीयोऽध्यायः। इत्यादि
३. हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः। इति योगियाज्ञवल्क्यः। पा० यो० सू० योगवार्त्तिक, टीका से उद्धृत।
४. दत्तात्रेययोगशास्त्र २९-३०.
५. वहीं, ३२-३३.
६. उशना भार्गवः कविः। अमरकोश
७. दत्तात्रेययोगशास्त्र २५९।

तद्यथा च महामुद्रा महाबन्धस्तथैव च।
ततः स्यात्खेचरीमुद्रा बन्धो जालन्धरस्तथा॥
उड्डियाणं मूलबन्धो विपरीतकरणी तथा।
वज्रोलिरमरोलिश्च सहजोलिस्त्रिधा मता॥[1]

पतञ्जलि प्रणीत योगसूत्र में 'ईश्वरप्रणिधानाद्वा', 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः, 'तस्य वाचकः प्रणवः' तज्जपस्तदर्थभावनम्'[2] सूत्रों में मन्त्रयोग अर्थात् अर्थ भावना के साथ मन्त्र के जप का स्पष्ट निर्देश हुआ है। इस आधार पर यह कहना अनुचित न होगा कि पतञ्जलि से पूर्व मन्त्रयोग भी पर्याप्त प्रचलित था, अथवा योगसाधना की स्वतन्त्र शाखा के रूप में मन्त्रयोग की सम्यक् प्रतिष्ठा हो चुकी थी। स्मरणीय है कि दत्तात्रेय योगशास्त्र में मन्त्रयोग को योग की एक स्वतन्त्र शाखा मानते हुए भी उसे अधमयोग तथा मन्त्रयोगी की मृदुयोगी और साधकाधम कहा गया है।[3]

योग सम्बन्धीं इन इतिहासपरक निर्देशों के आधार पर यह स्वीकार करने में किसी प्रकार की आपत्ति नहीं होनी चाहिए कि योग साधना की परम्परा अत्यन्त प्राचीन है, और इसकी विविध शाखाएं मन्त्रयोग लययोग हठयोग आदि भी इतने ही प्राचीन काल से व्यापक रूप से प्रचलित थीं कि आज उनका आदिकालीन इतिहास खोज पाना असम्भव है। संभवतः यही कारण है कि शिव एवं विष्णु आदि के भक्तों ने अपने-अपने आराध्य देवों को ही इस योगविद्या का आदि उपदेष्टा मान लिया है।

योगविद्या या योगशास्त्र के इतिहास की इस प्रासङ्गिक चर्चा के बाद मैं अब निबन्ध के मुख्य विषय **अमनस्क योग** पर आता हूं। **अमनस्क योग**, जिसे आज की भाषा में **भावातीत ध्यान** (Trancedental meditation) कहा जा रहा है, भी योग की एक अत्यन्त प्राचीन शाखा है। दत्तात्रेय के अनुसार इसे लय योग के अन्दर वर्गीकृत करना चाहिए, जिसका प्रथम उपदेश आदिनाथ भगवान् शिव ने किया था।[4] उनके अनुसार बैठे हुए खड़े हुए चलते

---

१. दत्तात्रेय योग शास्त्र ५७-६१.

२. पातंजलयोग सूत्र पाद १. सू०

३. अङ्गेषु मातृकान्यासपूर्वं मन्त्रं जपन् सुधीः।
यं कञ्चनाभिसिद्धयै स्यान्मन्त्रयोगः स कथ्यते॥
मृदुस्तस्याधिकारी स्याद् द्वादशाब्दैस्तु साधनात्।
प्रायेण लभते सिद्धिं सिद्धीश्चैवाणिमादिकाः॥
अल्पबुद्धिरिमं योगं सेवते साधकाधमः।
मन्त्रयोगो ह्ययं प्रोक्तो योगानामधमस्तथा॥ दत्तात्रेययोगशास्त्र २५-२८.

४. गिरिकूटे चित्रकूटे सुपादपयुते गिरौ।
कृपयैकैकसंकेतं शंकरः प्राह तत्र तान्॥

हुए या सोते हुए अथवा भोजन करते हुए अर्थात् किसी भी स्थिति में रहने पर शून्य का ध्यान करना आदिनाथ द्वारा उपदिष्ट प्रथम संकेत है—

तिष्ठन् गच्छन् स्वपन्भुञ्जन् ध्यायन् शून्यमहर्निशम् ।
अयमेको हि संकेत आदिनाथेन भाषितः ॥[1] इत्यादि ।

यहां शून्य पद का अर्थ बिन्दु अथवा संख्या का एक चिह्न विशेष (०) नहीं है, अपितु विषय का अभाव है। तात्पर्य यह है कि बिना किसी विषय को ध्येय बनाए चित्त को स्थिर करना। इसे ही ध्यान की परिभाषा के रूप में 'ध्यानं निर्विषयं मनः'[2] सूत्र में परिभाषित किया गया है।

लययोग साधना की परम्परा में शून्य के ध्यान (अमनस्कता) को अत्यन्त महत्त्वपूर्ण अथवा सर्वोत्कृष्ट साधना माना गया है। वहीं यह भी कहा गया है कि जिसे यह सिद्धि मिल गयी है, वह ही सेव्य गुरु हो सकता है—

दृष्टिः स्थिरा यस्य विनैव दृश्यात्
वायुः स्थिरो यस्य विना प्रयत्नात् ।
चित्तं स्थिरं यस्य विनावलम्बात्
स एव योगी स गुरुः स सेव्यः ॥[3]

इस साधना में क्योंकि मन को ही निर्विषय दूसरे शब्दों में क्रिया-रहित (स्वधर्म से रहित) किया जाता है, अतः इसे अमनस्क योग कहते हैं।

अमनस्क योग का सर्व प्रथम उल्लेख हमें महाभारत में मिलता है। वहां कहा गया है कि 'जो साधक एक आसन में चुप चाप बिना विषय के चिन्तन करता हुआ लीन हो जाता है, वह धर्म अधर्म और शुभ अशुभ से परे हो जाता है।[4] आचार्य शंकर ने भी महाभारत के उपर्युक्त पद्य को गीताभाष्य की प्रस्तावना में उद्धृत करते हुए अमनस्क योग की ओर संकेत किया है। इससे यह अनुमान करना अस्वाभाविक न होगा कि अत्यन्त प्राचीन काल के मूर्धन्य दार्शनिकों में भी इस अमनस्क साधना के प्रति महान् आदर था।

तानि सर्वाणि वक्तुं हि न शक्नोमि तु विस्तरात् ।
कानिचित् कथयिष्यामि सहजाभ्यासवत् सुखम् ॥ दत्तात्रेययोग ३६-३

१. वही ४०-४१

२. सांख्यदर्शन ६·२५

३. अमनस्क योग २-४२

४. नैव धर्मी नचाधर्मी न चैव हि शुभाशुभी ।
यः स्यादेकासने लीनः नैव किंचिदचिन्तयन् ॥
श्रीमद्भगवद्गीता, शाङ्कर भाष्य पृ० २ से उद्धृत ।

महाकवि रत्नाकर के हरविजय महाकाव्य में दो बार **अमनस्क योग** की चर्चा हुई है। एक स्थल पर कवि ने **अमनस्क पद** का प्रयोग किये बिना साधना विधि का वर्णन करते हुए कहा है कि 'तब तक अभाव की भावना करे जब तक तन्मयता को न प्राप्त हो जाए'—**अभावं भावयेत्तावत् यावत् तन्मयतां व्रजेत्।**[1]

एक अन्य स्थल पर 'अमनस्क योग' शब्द का भी प्रयोग करते हुए कवि ने इस योग के प्रति अत्यन्त आदर पूर्वक कविनिबद्धवक्ता द्वारा शिव से प्रार्थना कराते हुए कहलाया है कि—'अमनस्क-योग साधना का व्रत करने वाले साधकों को जिस निरञ्जन पद की प्राप्ति होती है, वह आपके अनुग्रह से हमें प्राप्त हो'—

अमनस्कयोगगतिसंशितव्रतैः
यदवाप्यते किल निरञ्जनं पदम्।
निरुपप्लवां च दधदात्मनि स्थितिं
भव नान्तरीयकमनुग्रहस्य ते॥[2] इत्यादि

अमनस्क योग (भावातीतध्यान) के सम्बन्ध में इस प्रकार के प्राचीन एवं आदर भरे महत्त्वपूर्ण उल्लेख संस्कृत वाङ्मय में हमें अनेक प्राप्त होते हैं, जिससे इस योग साधना पद्धति की प्राचीनता एवं अत्यन्त प्राचीन काल में भी इसके प्रति अतिशय आदर भाव के होने में कोई सन्देह नहीं रह जाता, किन्तु यह अत्यन्त दुर्भाग्य की बात है कि इस साधना पद्धति का प्रतिपादक कोई अधिक प्राचीन ग्रन्थ हमें प्राप्त नहीं है।

महर्षि पतञ्जलि वर्णित अष्टाङ्गयोग साधना पद्धति की चरम स्थिति असम्प्रज्ञात समाधि, जिसमें वितर्क विचार आनन्द एवं अस्मिता का भी अनुगम समाप्त हो जाता है, ही **अमनस्क योग** की भी चरम उपलब्धि है. इस आधार पर पतञ्जलि के योग से अभिन्न अमनस्क योग को सिद्ध करने का हठात् प्रयत्न किया जा सकता है। पतञ्जलि के योगसूत्रों में दर्शन पक्ष एवं साधना पक्ष समान भाव से वर्णित हैं, किन्तु फिर भी पातञ्जल योगसूत्र को अमनस्क-योग का ग्रन्थ कहने का प्रयत्न करना हठवाद की श्रेणी का ही कार्य कहा जायेगा; क्योंकि असम्प्रज्ञात समाधि की स्थिति दोनों साधना पद्धतियों की चरम स्थिति होने पर भी दोनों पद्धतियों के साधना क्रम में महान् अन्तर है। पतञ्जलि के अष्टाङ्गयोग साधना के क्रम में विषय सम्बद्ध मन का व्यापार साथ चलता है, देशबन्धश्चित्तस्य धारणा, तत्र प्रत्ययैकतानता ध्यानम्, तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" सूत्रों द्वारा दी गई धारणा ध्यान और समाधि की परिभाषाएं इसका स्पष्ट प्रमाण हैं।

अमनस्क योग साधना के क्रम में हमें केवल एक ग्रन्थ प्राप्त होता है, जिसे ग्रन्थकार

---

१. हरविजय महाकाव्य
२. वही ६. १४३

ने स्वयंबोध या अमनस्क योग नाम दिया है।[१] यह ग्रन्थ अधिक प्राचीन नहीं प्रतीत होता। इसकी किसी पाण्डुलिपि में इसके रचयिता अथवा रचनाकार का उल्लेख नहीं है, जबकि योग-नाथ स्वामी ने इसे गोरक्षनाथ कृत माना है, जो नवम शती से पूर्व स्वीकार किये जाते हैं। किन्तु इतने से इस ग्रन्थ की प्राचीनता सिद्ध नहीं हो पाती, क्योंकि इस ग्रन्थ का गोरक्षनाथ-कृतित्व ही सन्दिग्ध है। ऐसा कहने का मुख्य कारण मैं प्रस्तुत अमनस्क योग नामक ग्रन्थ में विविधशास्त्रों एवं अनेक साधना पद्धतियों के प्रति अत्यन्त उग्र आक्रोश की अभिव्यक्ति को मानना चाहूंगा। इस आक्रोश के कुछ उदाहरण द्रष्टव्य हैं :—

जित्वा वायुं विविधकरणैः क्लेशमूलैः कथञ्चित्
कृत्वा यत्नं निजतनुगताशेषनाडीप्रवाहान्।
अश्रद्धेयां परमपुरगतिं साधयित्वाऽपि नूनम्
विज्ञानैकव्यसनसुखिनो नास्ति मोक्षस्य सिद्धिः ॥[३]

केचिन्मूत्रं पिबन्ति स्वमलमथ तनोः केचिदश्नन्ति लालाम्,
केचित्काष्ठां प्रविष्टाः युवतिभगपतद्बिन्दुमूर्ध्वं नयन्ति।
केचित्खादन्ति धातूनखिलतनुशिरावायुसंचारदक्षाः,
नैतेषां देहसिद्धिर्विगतनिजमनोराजयोगाद् ऋते स्यात् ॥[४]

उपर्युक्त दोनों ही पद्यों में प्राणायाम साधना, नाडीचक्रों के जागरण, ज्ञानयोग, हठयोग की क्रियाएं वज्रोलि आदि, विविध साधनाओं के प्रति तिरस्कार भावना की अभिव्यक्ति हुई है। इसी प्रकार—

केचित्तर्कवितर्ककर्कशधियोऽहंकारदर्पोद्धताः,
केचिज्जातिगताभिमानभरिताः ध्यानादिकर्माकुलाः।
प्रायः प्राणिगणा विमूढमनसो नानाविकारान्विताः,
दृश्यन्ते नहि निर्विकारसहजानन्दैकभोगाकुलाः ॥[५]

एकदण्डत्रिदण्डादिजटाभस्मादिधारणम्।
केशलुंचननग्नत्वे रक्तचीवरधारणम् ॥
उन्मत्तताऽऽमभोज्यान्नपानं पाखण्डवृत्तिता।
इत्यादिलिङ्गग्रहणं नानादर्शनदर्शनम् ॥
नोत्पन्नस्वावबोधस्य ह्युदासीनस्य तिष्ठतः।
सदाभ्यासरतस्यैतेष्वेकमप्युपयुज्यते ॥[६]

---

१. पातञ्जल योगसूत्र ३. १-३
२. इति श्री'''अमनस्के स्वयं बोधाख्यो द्वितीयः।
३. अमनस्क योग ३२
४. अमनस्क योग २, ३३.
५. वही, २, ३४
६. वही २, ३५-३७.

इत्यादि पद्यों में एक ओर विविध शास्त्रों के वैदुष्य का तिरस्कार प्रगट होता है, वहीं वैष्णव शैव जैन बौद्ध आदि धर्मों के आचार नियमों और चिह्नों आदि का तिरस्कार करके बिना किसी तर्क के स्वयं बोधाख्य अमनस्क योग की श्रेष्ठता और अतुलनीयता प्रतिपादित है, जो अधिक प्राचीन शैली नहीं है, न दार्शनिक परम्परा में ही स्वीकार शैली हैं। अतः इसे अधिक प्राचीन कहना संभव नहीं है।

जहां तक योगनाथ स्वामी के इस कथन का प्रश्न है कि 'यह ग्रन्थ गोरक्षनाथ विरचित्त है, इसको स्वीकार करने के लिए कोई पुष्ट प्रमाण नहीं है; क्योंकि ग्रन्थ के मंगलाचरण अथवा पुष्पिका में ग्रन्थ कर्त्ता के सम्बन्ध में कोई संकेत नहीं मिलते हैं। जहां तक परम्परागत मान्यता का प्रश्न है, जिसमें अमनस्क योग को गोरक्ष की रचना माना जाता है, वहीं उसी परम्परा में योगबीज को भी गोरक्ष की रचना स्वीकार किया गया है, जबकि दोनों की मान्यताओं में परस्पर विरोध स्पष्ट दिखाई देता हैं, उदाहरणार्थ योगबीज में सूर्यभेद, उज्जायी, शीतली भस्त्री प्राणायामों का अत्यन्त आदर के साथ उल्लेख हुआ है,[1] किन्तु इस ग्रन्थ में प्राणायाम की क्रिया के प्रति तिरस्कार व्यक्त किया गया है,[2] जो इन दोनों रचनाओं को एक लेखक की रचना मानने में सन्देह उपस्थित कर देता है। हठयोग के अनेक ग्रन्थ गोरक्ष के नाम से स्वीकृत हैं किन्तु इस अमनस्क में हठयोग की ही क्रिया वज्रोलि के प्रति अत्यन्त तिरस्कार प्रगट हुआ है। अत एव इस ग्रन्थ अमनस्क योग को गोरक्षनाथ की रचना मानना प्रशस्त नहीं लगता। इस संक्षिप्त चर्चा के बाद में अमनस्क योग ग्रन्थ के कर्त्तृत्व के प्रश्न को यही यह कहकर छोड़ना चाहूंगा कि 'योग साधना के विविध सम्प्रदाय अत्यन्त प्राचीन काल से गुरु परम्परा में प्रचलित रहे हैं। उन सम्प्रदायों की साधना पद्धति को, बहुत संभव है, समय-समय पर गुरुजनों ने शिष्यों की सुविधा के लिए अथवा शिष्यों ने स्मरण करने की सुविधा के लिए श्लोक बद्ध कर लिया हो। ये श्लोक भी अपने-अपने सम्प्रदाय में गुरु परम्परा में चिरकाल तक प्रचलित रहे हैं। कालान्तर में लिपिबद्ध करने की आवश्यकता का अनुभव होने पर लेखक का नाम दिये बिना ही उन्हें लिपिबद्ध भी कर लिया गया। कालान्तर में 'ये रचनाएं अमुक प्राचीन गुरु की हैं' ऐसी कल्पना कुछ भक्तों ने श्रद्धावश कर ली। वस्तुत इस प्रकार की अनेक रचनाएं अज्ञात कर्त्तृक माननी चाहिएं।

अमनस्कयोग ग्रन्थ के अनुसार विश्व के सात प्रधान तत्त्व हैं: पृथिवी जल अग्नि वायु आकाश मनस् और परतत्त्व। इनमें पूर्व-पूर्व स्थूलतर एवं उत्तरोत्तर सूक्ष्मतर हैं। इनमें पृथिवी से आकाश पर्यन्त पांच तत्त्व महत्परिमाण वाले साक्षात् अथवा परम्परया इन्द्रिय ग्राह्य हैं। मन भी पृथिवी आदि की भांति मूर्त्त पदार्थ है, जो इन्द्रियों के माध्यम से अन्य पदार्थों (तत्त्वों) के साक्षात्कार का हेतु बनता है। इनका इस ग्रन्थ में केवल परिगणन मात्र हुआ है स्वरूप विश्लेषण नहीं। पर या परमतत्त्व इन सबसे सर्वथा भिन्न है। वह (परतत्त्व) भावरूपता और अभावरूपता दोनों से भिन्न उत्पत्ति और विनाश से रहित समस्त संकल्पनाओं से अतीत

---

१. योगबीज १६०-२११.

२. अमनस्क योग २, ३२-३३.

है। वह परिणाम से रहित, इन्द्रियों द्वारा अग्राह्य अचल ध्रुव एवं सभी प्रकार की उपाधियों अथवा कामों से रहित है :—

'भावाभावविनिर्मुक्तं विनोशोत्पत्तिर्वाजतम् ।
सर्वसंकल्पनातीतं परतत्त्वं तदुच्यते ।।
अनाकारमवच्छिन्नमग्राह्यमचलं ध्रुवम् ।
सर्वोपाधिविनिर्मुक्तं सर्वकामविर्वाजतम् ।।'[1]

क्योंकि यह परतत्त्व भावातीत है, अतः इसके साक्षात्कार में अमनस्कता स्वतः आ जाती है। इस भावातीत ध्यान के लिए दत्तात्रेय के अनुसार उठते-बैठते चलते-फिरते खाते पीते सभी स्थितियों में शून्य का, भावातीत परतत्त्व का ध्यान करना चाहिए।[2] किन्तु अमनस्क योग ग्रन्थ के लेखक के अनुसार सर्वप्रथम सिद्ध गुरु के मुख से इस साधना के पथ को सम्यक् समझना चाहिए, उसके बाद कहीं एकान्त मनोरम प्रदेश में सुख पूर्वक; दुःख बाधा आदि से रहित आसन पर बैठकर सभी अंगों को शिथिल करके बाहु प्रमाण दूरी पर किसी भी दृश्य पदार्थ पर दृष्टि को स्थिर करना चाहिए। इस अभ्यास क्रम में साधक को चाहिए कि वह अपने मन को सभी चिन्ताओं से रहित कर लेवे :—

'एवंविधगुरोः शब्दात्सर्वचिन्ताविर्वाजतः ।
स्थित्वा मनोहरे देशे योगमेव सदाभ्यसेत् ।।
विविक्तदेशे सुखसन्निविष्टः
समासने किञ्चिदुपेत्य पश्चात् ।
बाहुप्रमाणं स्थिरदृक्श्लथाङ्गः
चिन्ताविहीनोऽभ्यसनं कुरुष्व ।।'[3]

इस साधना क्रम में साधक को सभी स्थूल या सूक्ष्म पदार्थों से अपने ध्यान को हटाने का प्रयत्न करना चाहिए, सभी चिन्ताओं से परे होने का प्रयत्न करना चाहिए। वह साधक जब अन्दर बाहर सभी चिन्ताओं से मुक्त हो जाता है, तो उसे परतत्त्व का बोध होता है, और तभी उसमें अमनस्कता आ जाती है, इस स्थिति में पहुंचने पर साधक के चित्त का प्राणों में विलय हो जाता है, अर्थात् चित्त (मन) की गति अवरुद्ध हो जाती है, बाह्यज्ञान समाप्त हो जाता है। फलतः वह सर्वमय अर्थात् परतत्त्व रूप भावावभाव विनिर्मुक्त हो जाता है। कहा भी है :—

न किञ्चिन्मनसा ध्यायेत् सर्वचिन्ताविर्वाजतः ।
तत्त्वस्य सम्मुखे जाते त्वमनस्कं प्रजायते ।।[4]

---

१. अमनस्क योग १. २१-२२.
२. दत्तात्रेय योगशास्त्र ४०-४१.
३. अमनस्क योग १. २७-२८.
४. वही, १, ३१.

अमनस्केऽपि संजाते चित्तादिविलयो भवेत्।
चित्तादिविलये जाते पवनस्य लयो भवेत्।
मनःपवनयोर्नाशाद् इन्द्रियार्थान् विमुञ्चति।
इन्द्रियार्थैर्यदा मुक्तो बाह्यज्ञानं न जायते।
बाह्यज्ञाने विनष्टे च ततः सर्वमयो भवेत्।।[1]

साधक जब इस स्थिति में पहुंच जाता है, तब वह इन्द्रियों के विषयों में विचरण करते रहने पर भी सुख अथवा दुःख का शीत अथवा ताप का अनुभव नहीं करता।

सुखदुःखे न जानाति शीतोष्णे न च विन्दति।
विचरंश्चेन्द्रियार्थेषु न वेत्ति च लयं गतः।।[2]

साधक की यह स्थिति प्रथमतः निमेषमात्र के लिए ही होती है, किन्तु क्रमशः अभ्यास में लगे रहने पर उसकी यह स्थिति कुछ घण्टे प्रहर या दिन भर के लिए ही नहीं वर्षों के लिए भी हो जाती है। काल संख्या पर आधारित इन विविध स्थितियों का वर्णन ग्रन्थ में (अमनस्क योग ग्रन्थ में) बहुत विस्तार से किया है।[3] निमेषमात्र के लिए भी लय-अवस्था, जो कि भावातीत ध्यान अवस्था की प्रथम स्थिति है, को प्राप्त कर लेने पर योगी को परतत्त्व का अनुभव तो होता ही है, वह समस्त बाह्य भोगों से ऊपर भी उठ जाता है। इस 'उत्थान' को कुछ लोग 'भूमि से उठ जाता है' ऐसी व्याख्या करते हैं। भूमि से उत्थान की स्थिति प्राणायाम साधना के क्रम में घटावस्था में पहुंचने पर, ज़ब प्राणों का प्रवेश सुषुम्ना नाड़ी में होता है, साथ ही साथ कुण्डलिनी का भी जागरण हो जाता है, अवश्य होती है; किन्तु वह साधना का एक भिन्न प्रकार है, अर्थात् अमनस्क योग या भावातीत ध्यान तथा प्राणायाम साधना ये दोनों अलग साधना पद्धतियां हैं।

इस साधना के प्रसङ्ग में यह प्रश्न हो सकता है कि साधक जब प्रथमतः बाहु-प्रमाण दूरी पर किसी भाव-पदार्थ पर दृष्टि को स्थिर करता है, तब मन को विषयमय होना चाहिए भावातीत (विषयातीत) नहीं। इस प्रश्न के समाधान के क्रम में ग्रन्थकार का कहना है कि जिस प्रकार अंकुश द्वारा नियन्त्रित न रहने पर भी हाथी अपने काम्य पदार्थ को प्राप्त करके स्वतः लौट पड़ता है, उसी प्रकार अवारित मन भी अभ्यास क्रम चलते रहने पर स्वतः विलीन होने लगता है :—

यथा निरङ्कुशो हस्ती कामान् प्राप्य निवर्त्तते।
अवारितं मनस्तद्वत् स्वयमेव विलीयते।।[4]

इसे ही स्पष्ट करते हुए ग्रन्थकार का कहना है कि साधक की दृष्टि पहले तो विषयों पर जाती है, फिर वह वहीं जिस किसी विषय पर अथवा विषय के अंशपर संसक्त होती है,

---

१. अमनस्क योग १, ३२-३४.
२. वही १, ३७.
३. वही,
४. अमनस्क योग २, ७७.

इसके बाद वह वहीं स्थिर हो जाती और वहीं स्थिर रहने पर धीरे-धीरे वहीं विलीन भी हो जाती है :—

'प्रथमं निःसृता दृष्टिः संलग्ना यत्र कुत्रचित्।
स्थिरीभूता च तत्रैव विनश्यति शनैः शनैः ॥'[1]

किन्तु इस स्थिति में आने के लिए साधक को अपनी संकल्प परम्परा के उच्छेदन के लिए निरन्तर सावधान रहना पड़ता है। संकल्प विकल्प के अभाव में मन का अवलम्ब क्रमशः क्षीण होने लगता है, फलतः दृष्टि तथा उसके साथ-साथ अन्य इन्द्रियां भी, क्रमशः अपचित होकर शान्त हो जाती हैं। इसके लिए साधक को वैसे ही सावधान रहना चाहिए, जैसे तराजू से तौलने का कार्य करने वाला वणिक् दोनों पलड़ों पर समता (समभार) लाने का प्रयत्न करते हुए चंचल तुला को (तराजू की डण्डी या कांटे को) स्थिर करता है। अमंनस्क साधना के क्रम में चंचल तुला को स्थिर करने वाले तुलाधार की उपमा अत्यन्त सटीक है। जब तक मन में सन्तुलन न होगा, बल्कि राग और द्वेष का सम्बन्ध बना रहेगा, तब तक समाधि की, अमनस्क-भाव की, संभावना नहीं हो सकती। यही कारण है कि इस प्रसङ्ग में ग्रन्थकार ने औदासीन्य (उदासीन भाव) को अमृतपूर की भाँति उपादेय कहा है। उसकी मान्यता है कि जब तक किसी विषय की प्राप्ति के लिए राग अथवा उसको छोड़ने के लिए द्वेष रहेगा, और जब तक एतदर्थं प्रयत्न चलता रहेगा, तब तक सम्बन्ध के अभाव की कल्पना नहीं हो सकती। किसी विषय के प्रति रागात्मक सम्बन्ध जिस प्रकार मन के बन्धन का कारण होता है, द्वेषात्मक सम्बन्ध भी उसी प्रकार बन्धन का कारण बनता है। सम्बन्ध रागात्मक न होकर द्वेषात्मक हो, तब भी सम्बन्ध तो है, सम्बन्ध का अभाव तो न हुआ। इस स्थिति में अहंभाव ममभाव, तो रहता ही है, और जब तक यह अहन्ता ममता रहेगी, द्वैत भी रहेगा, और तब तक तत्त्वावबोध का प्रश्न ही नहीं है। किन्तु जिस क्षण राग और द्वेष को तुला के दण्ड के दो किनारों के समान सन्तुलित कर लिया जाता है और उसके फलस्वरूप विश्व के समस्त पदार्थों के प्रति राग और द्वेष के स्थान पर उदासीनता उत्पन्न होकर प्रतिष्ठित होने लगती है, उस क्षण से ही जगद्रूपी वृक्ष का उन्मूलन प्रारम्भ हो जाता है, और उसके (उदासीनता) पूर्णतः प्रतिष्ठित होत ही जगद्-रूपी वृक्ष गिर जाता है, विनष्ट हो जाता है :—

यावत्प्रयत्नलेशोऽस्ति यावत्संकल्पकल्पना।
अहं त्वमिति सम्प्राप्तिः तावत्तत्त्वस्य का कथा॥
औदासीन्यामृतौघेन वर्धमानेन योगिनाम्।
उन्मूलित-मनोमूलो जगद्वृक्षः पतिष्यति॥

इस प्रकार राग द्वेष के सन्तुलन से दूसरे शब्दों में उन्मूलन से, उत्पन्न औदासीन्य इस साधना पद्धति का सबसे महत्त्वपूर्ण तत्त्व है, और इसकी सिद्धि से भी विश्व प्रपञ्च से मुक्ति प्राप्त हो सकती है।

यह साधना पद्धति भी अन्य साधना पद्धतियों के समान योग-साधना की एक प्राचीन पद्धति है। महाभारत गीताभाष्य एवं हरविजय महाकाव्य जैसे प्राचीन ग्रन्थों में इस साधना पद्धति का उल्लेख होने पर भी इसके प्रतिपादक ग्रन्थ आज भी अनुसन्धान के विषय हैं, जो एक ग्रन्थ प्राप्त है, उसकी अधिक प्राचीनता न होने पर भी उसमें प्रतिपादित साधना विधि अत्यन्त महत्त्वपूर्ण है। इस प्रसङ्ग में विशेष अनुसन्धान की अपेक्षा है।

१. वही २, ६७,

नैगमिकागमिकयोरनुसन्धानालोके—

गायत्री-मन्त्र-साधना-विमर्शः

—डा० रुद्रदेवत्रिपाठी

"उप त्वाऽग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि ॥
(ऋ० १।१।७)

प्रस्तुताया ऋचः —'हे अग्ने ! मनुष्याणामग्रणीर्जगद्गुरो परमात्मन् ! अहरहः प्रतिदिनम् रात्रावहनि रात्रिन्दिवयोः सन्धौ सायम्प्रातः, मनसा त्वदेकचेतसा नमस्कारं सम्पादयन्तो वयं त्वत्पुत्राः सर्वे मनुष्यास्त्वामन्तरात्मानं भगवन्तं उपास्महे, गुरुमन्त्रेण गायत्र्योपासीमही"ति —भाष्यार्थ-माध्यमेन ज्ञायते यद् वेदाः सर्वप्रथमं गायत्र्याः=गायत्रीमन्त्रस्योपासन-साधनत्वं समकेतयन्निति। अथ च गायत्री 'वेदमाता'पदेनाथर्ववेदे किञ्चिद् विशिष्यैवं वर्णितास्ति —

स्तुता मया वरदा वेदमाता प्रचोदयन्तां पावमानी द्विजानाम्।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसं,
मह्यं दत्त्वा व्रजत ब्रह्मलोकम् ॥ (१९।७१।१)

अत्र स्वानुष्ठित-गायत्रीमन्त्रजपेन मन्त्रद्रष्टा ऋषिर्द्विजानामायुरादीष्टफलमाशास्य तन्मध्यवर्तिनः स्वस्यापि प्रार्थनीयं फलं सिद्धवदनुवदति। किञ्च —

तेजोऽसि शुक्रमस्यमृतमसि, धामनामासि।
प्रियं देवानामनाधृष्टं देवयजनमसि॥ (यजु० अ० १२, मं० ३१)

इति मन्त्रेण गायत्र्या आवाहनं विधीयते तथाऽस्या उपस्थानम् —

गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे।
नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो मा प्रापत्॥[1]

इति मन्त्रेण क्रियते। इयमेव च गायत्री कालभेदेन त्रिधा व्यवाह्रियत। यथा —

गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने।
सरस्वती च सायाह्ने सैव सन्ध्या त्रिधा स्मृता॥

१- अयं वाजसनेयकशतपथब्राह्मणोक्तो गायत्र्युपस्थानमन्त्रः। बृ० ५।१४।७।

क्रियाभेदेनाऽप्यस्य त्रैविध्यं - तत्प्रयोक्तृप्राणत्राणाद् **गायत्री** सवितृद्योतनाज्जगतः प्रगवितृत्वाच्च सैव सावित्री वाक्स्वरूपत्वाच्च **सरस्वतीति**।

एवं रूपेण विभावितेयं 'गायत्री' किं छन्दोरूपैव ? किं वा मन्त्ररूपा ? किं वा गायत्री-मन्त्रोक्ता सवितृरूपा ? प्रत्युत शक्तिरूपेति प्रश्नाः प्रायशः साधकानां मनसि समुत्पद्यन्ते। तत्राहि —

'किमिदं छन्दः ?' इति प्रश्ने छन्दः किल त्रिविधं भवति १. लक्ष्यापेक्षम् २. लक्षण्या-पेक्षं तथा ३. लक्षणापेक्षम्। यथा-" १. अग्निमीडे०, २. गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रि-ष्टुब्जगत्याद्याः सप्तैव जातयः, ३. यदक्षरं परिमाणं तच्छन्दः, मात्रान्तरसङ्ख्या नियता वाक् छन्द इति च स्पष्टम्। तत्रापि छन्दसामुच्चावचवादा अनेके सन्ति। यथा—"प्राणमात्रा छन्दः। वाचिकप्राणः स्वरस्तन्मात्रा वाचिकच्छन्दः। भौतिकप्राणो वैश्वानरस्तन्मात्रा भौतिक-च्छन्दः। वागेव छन्दः शब्दवाच्या न। अतोऽवच्छेदश्छन्द इत्येव राद्धान्तः, स च मानेन प्रतिष्ठया वा तुलितकेन वा क्रियमाणो वस्तुस्वरूपमर्यादाबन्धः। अत एवाच्छादकस्य छन्दस्त्वम्। इतर-सम्बन्धापवारकत्वमाच्छादकत्वम्। 'तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे' इति स्वरूप-संवरकत्वमेव छन्द इत्यपि। अथवा — मा-प्रमा-प्रतिमात्मकभेदत्रयभिन्नः प्राणावच्छेदोऽवच्छिन्नप्राण एव वा छन्दः। प्राणश्छन्दःपरिभाषायामक्षरशब्देनाख्यायते तेषां चाक्षरप्राणानां प्रातिस्विकोऽवच्छेदो मात्राशब्देन वाचिकच्छन्द आर्थिकच्छन्द इति ज्ञायते।

अनया दृष्ट्या गायत्रीच्छन्दो वाचिकार्थिकच्छन्दसोरग्निरूपत्वं मन्यते। अष्टावग्नि-रूपाणि। अत एव-'**अग्निर्गायत्र**' इत्युच्यते। अष्टाक्षरा गायत्री। तस्मादाहुर्गायत्रोऽग्निरिति। तेजो ब्रह्मवर्चसं गायत्रम्। ब्रह्म गायत्रम्। ब्राह्मणो गायत्रः। '**गायतो मुखादपतद्**' इति गायत्री, सा च त्रिपदा। गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभति'-इत्यनुष्टुभश्च निर्वचनम्।

गायत्रीछन्दस्त्विदं '**दैव्येकाक्षरा गायत्री**' (उपनिदानसूत्रे) प्रणवस्य च्छन्दोद्योतिका। अष्टाक्षरात्मकत्रिपदा सती चतुर्विंशत्यक्षरा प्रसिद्धा। कैश्चिच्च **मा ४ प्रमा ८ प्रतिमा १२, उपमा १६ समा २०** चेति पञ्चापि गायत्रीति निगद्यन्ते। यजुषां गायत्री षडक्षरा। ऋचां त्रिः-षट्। साम्नां द्वादशाक्षरा। आर्ची अष्टादशाक्षरा। ब्राह्मी षट्त्रिंशदक्षरा (उव्वटभाष्ये) इत्थमेव 'वर्धमाना गायत्री पिपीलिकामध्या गायत्री' चेत्यादयो भेदाश्छन्दःशास्त्रादिषु प्रदर्शिताः सन्ति।

एवं छन्दःसु बहुषु सत्स्वपि गायत्रीच्छन्दस एवं मुख्यत्वं प्रतिपादयन्ती भगवती श्रुतिः —

> **गायत्री वा इदं सर्वं भूतं यदिदं किञ्च वाग् वै गायत्री।**
> **वाग् वा इदं सर्वं भूतं गायन्ति त्रायते च ॥ (छान्दोग्ये० ३।१२।१) इति।**

भगवत्पादाः श्रीशङ्कराचार्याश्चास्याः श्रुतेर्भाष्ये गायत्र्या महत्त्वं प्रतिपादयन्तश्चेत्थं व्याख्यातवन्तः —

"गायत्रीद्वारेण चोच्यते ब्रह्म। ब्रह्मणः सर्वविशेषरहितस्य नेतिनेतीत्यादि विशेषप्रतिषेध-गम्यस्य दुर्बोधत्वात्। सत्स्वनेकेषु छन्दःसु गायत्र्या एव ब्रह्मज्ञानद्वारतयोपादानं प्राधान्यात्।

सोमाहरणादितरच्छन्दोऽक्षराहरणेनेतरच्छन्दोव्याप्त्या च सर्वसवनव्यापकत्वाच्च यज्ञे प्राधान्यं गायत्र्याः। गायत्रीसारत्वाच्च ब्राह्मणस्य मातरमिव हित्वा गुरुतरां गायत्रीं ततोऽन्यद् गुरुतरं न प्रतिपद्यते, यथोक्तं — ब्रह्मापीति। तस्यामत्यन्तगौरवस्य प्रसिद्धत्वात्। अतो गायत्रीमुखेनैव ब्रह्मोच्यत इति।"

बृहदारण्यकश्रुते (५।१४।१) भाष्येऽपि त इत्थं निगदन्ति —

"गायत्र्युपाधिविशिष्टस्य (ब्रह्मणः) उपासनं वक्तव्यं···सर्वच्छन्दसां हि गायत्रीछन्दः प्रधानभूतम्···ः द्विजोत्तमस्य द्वितीयं जन्म गायत्रीनिमित्तं तस्मात् प्रधाना गायत्री···गायत्र्या हि यः सृष्टो द्विजोत्तमो निरङ्कुश एवोत्तमपुरुषार्थसाधनेऽधिक्रियते। अतस्तन्मूलः पुरुषार्थ-सम्बन्धः।"

किञ्च 'बृहदारण्यकोपनिषद्भाष्ये'ऽपि प्रतिपादितवन्त आचार्याः —

"सैषा गायत्री प्राणः। अतो गायत्र्यां जगत्प्रतिष्ठितम्। यस्मिन् प्राणे सर्वे देवा एकं भवन्ति। सर्वे वेदाः कर्माणि तत्फलं च, सैव गायत्री प्राणरूपा सती जगत आत्मा, सा हैष गयांस्तत्रे=त्रातवती, के पुनर्गयाः? प्राणाः=वागादयो वै गयाः। गयत्राणाद् गायत्रीति प्रथिता"। इति। (५।१४।४)

एवमेवान्यत्र गायत्र्या व्याख्यानानि सुबहूनि प्राप्यन्ते, तानि विस्तरभियाऽत्र न प्रकाश्यन्ते परं योगशास्त्रेण प्रतिपादितानां नाडीनामपि गायत्रीमन्त्राक्षरैर्महान् सम्बन्धोऽस्तीति विषये किमप्यत्र प्रतिपाद्यते।

आगमिको गायत्री-विमर्श :

आगमेषु गायत्री-मन्त्रस्य विमर्शो द्विधा प्राप्यते। तत्र प्रथमे विमर्शे स्वतन्त्ररूपेण 'गायत्री'-तन्त्र'मिति नाम्ना प्रणीतं तन्त्रं श्रीमच्छङ्कराचार्यचरणैर्व्याख्यातं तथा 'गायत्री-भाष्य'-नाम्ना बहवो ग्रन्था उपलभ्यन्ते, येषु शङ्कराचार्य-सायणाचार्य-भास्कर-भट्ट-महीधर-वल्लभाचार्य-विट्ठलनाथ-महाप्रभुरूपगोस्वामि-प्रभृतीनामाचार्याणां गायत्री-मन्त्रार्थपूर्वकं स्व-स्वसम्प्रदायानुसारिण्यो जपप्रक्रिया वर्णिताः सन्ति। पुराणेषु दर्शिता जपपद्धतयोऽपि तन्त्राण्ये-वानुकुर्वन्ति। नानाविधेषु पटलेषु गायत्रीमन्त्रमधिकृत्य जपादिव्यवस्थाः प्रकटिताः सन्ति। यथा हि—'तारैकजटापूजा-पटल'स्यान्ते 'गायत्री-रहस्य'-प्रकरणे गायत्रीमन्त्रविषये प्रोक्त-मस्ति —

गायत्र्या पुटितं मन्त्रमिष्टमन्त्रं जपेच्छतम्।
इष्टमन्त्रेण पुटितां गायत्रीं प्रजपेच्छतम् ॥१॥

एतज्जपं महेशानि ! आधाराधेयमुच्यते।
विनाधारं महेशानि ! आधेयं न विना तथा ॥२॥

आधारः सिद्ध्यते भद्रे ! आधेयं च न सिद्ध्यति।
सर्वेषु विष्णुमन्त्रेषु शैवशाक्तेषु सुन्दरि ॥३॥

सौरे गाणपतौ भद्रे शस्यते वरवर्णिनि।
एवमाधाराधेयं च यः करोति द्विजातिकः ।।४।।

अङ्कुरो जायते भद्रे लक्षजापान्न संशयः।
न स जीवात्मनोर्भिन्नो गायत्री ब्रह्मरूपिणी ।।५।।

गायत्र्या नहि भिन्नः स्याज्जीवात्मा तत्स्वरूपिणी।
सर्वदैवोभयोरैक्यं नारिकेले यथोदकम् ।।६।।

चन्द्रसूर्योपरागे च जप्त्वा ब्रह्ममयो भवेत्।
मन्त्रस्य परमेशानि न च होमादिकं दशा ।।७।।

कृते होमादिके भद्रे तज्जप्ते विफले तथा।
जपमात्रे महेशानि दशांशं केन जायते ।।८।।

गायत्र्या रहितो यस्तु जपपूजादिका वृथा।
हविरारोपमात्रेण यथा वह्निः प्रदीप्यते ।।९।।

आधाराधेय-सम्बन्धान्मन्त्रः प्रज्वलितस्तथा।
विनाधाराधेयं च प्रजपेद् यदि मूढधीः ।।१०।।

शतकोटि-जपेनापि तस्य विद्या न सिद्ध्यति। इति।

श्रीविश्वामित्र-प्रोक्ते 'गायत्री-स्तवराजे' गायत्रीमन्त्रस्य सम्पुट-विदर्भ-बीज-योजन-मन्त्रान्तरगर्भानुलोम-विलोम-नानाविध-प्रणवादि-विद्यामन्त्रसंयोजनप्रकाराणां ये ये निर्देशा विद्यन्ते ते सर्वेऽप्यागमप्रोक्ता एव। कालविशेषेण जप्यानां गायत्रीमन्त्राणां प्रक्रियास्तत्तद्-विद्यायुक्त-मन्त्राणां प्रयोगाश्चागमेष्वेव लभ्यन्ते। 'मन्त्रमहार्णव-पुरश्चर्यार्णव-श्रीविद्यार्णव-मन्त्रमहोदधि'-प्रभृति-तन्त्रग्रन्थेष्वपि गायत्रीमन्त्रस्य विशिष्टाश्चर्चास्तथा चान्यान्यानि 'गायत्री-विधानानि' प्रदर्शितानि विद्यन्ते। एवमेव पञ्चतारागायत्री-साम्राज्यबीजयुक्ता-सव्यापसव्य-गायत्री-सदृशा अनेके मन्त्रा अपि तत्तत्प्रयोगसमन्वितास्तन्त्रेषु विद्यन्ते।

अत्र तन्त्र-योगयोः समष्ट्या या गायत्री-मन्त्र-साधना क्रियते तद्विषये परमपूज्याद्य-शङ्कराचार्य-प्रदर्शितायाः पद्धत्याः संक्षेपः प्रस्तूयते सोऽप्यागम-सम्मत एवेति।

'यतिदण्डैश्वर्ये' गायत्री-निरूपणम्

आद्यशङ्कराचार्यचरणानामुपलब्धेषु ग्रन्थेषु 'यतिदण्डैश्वर्यविधानं' नाम ग्रन्थरत्नमद्या-वध्यज्ञातमेवावर्तत। पूज्यपादाः श्रीविद्यारण्य (मूर्खारण्यापरनामधेयाः) यतयो नेपालदेशादिमं ग्रन्थं समुद्धृत्यानीतवन्तः। नैकैरध्यायैः समन्वितो बृहदाकारकोऽयं ग्रन्थः श्रीमदाचार्यै-र्ज्योतिर्मठे प्रारब्धः कारणवशाच्च नेपालान् समागत्य तत्रैव निवसद्भिरयं समापितः।

१- अयं ग्रन्थः साम्प्रतं मुद्रितः। अस्य सम्पादनं हिन्दीव्याख्यानं चास्य निबन्धस्य लेखकेन (मया रुद्रदेवेन) विहितमस्तीति।

अस्मिन् यतोर्दण्डस्य वैज्ञानिकेन विवेचनेन सह शारीर-शास्त्रस्य तथा साधनासम्बद्धानां रहस्यानामपि विस्तरेण विचारो विहितः। अस्मिन् ग्रन्थे श्रीचक्रार्चना-प्रसङ्गेनावरणार्चनान्याविर्भावयद्भिस्तैरेकादशद्वादशावरणयोर्गायत्रीसाधनाया एकं दुर्लभं विधानमपि निरूपितमस्ति। तत्र हि —

गायत्रीमन्त्रस्य वर्णानधिकृत्य या देवता वर्णितास्तासां सङ्ख्या चतुर्विंशतिसङ्ख्यात्मिका नास्ति प्रत्युत द्वात्रिंशन्मयी विद्यते। कारणं तत्र 'नेत्रतन्त्रो'क्तोऽयं पद्यांशो विद्यते —

"अक्षराक्षर-संयुक्तो यः स मन्त्रो नैव सिद्ध्यति।"

एतदनुसारं संयुक्ताक्षरवतो मन्त्रस्य जपात् सिद्धिर्न भवतीति निश्चित्यैवाचार्यपादैर्गायत्रीवर्णानां गणना एकत्रिंशदक्षरैर्विहिताऽस्ति। सहैव गायत्रीवर्णानधिकृत्य ते शरीरस्थानां नाडीनामप्यनुसन्धानं चक्रुः। प्रत्येकं नाड्या नाम्नि देवीशक्तेर्नाम निविष्टं विद्यते। मानवशरीरे वर्तमाना नाड्यस्तासामेव शक्तीनां नामभिः स्थिताः सन्ति। आचार्यपादा गायत्रीमन्त्रवर्णाधारेण वर्णितानां तासां देवीनां नाम्नां पाठमात्रेण गायत्रीमन्त्रजप-फलं भवतीति दर्शितवन्तः। किञ्चैतैः साकं तुरीयपादस्य[1] नववर्णानां शक्तयोऽपि दर्शिताः। एवमाहत्य चत्वारिंशन्नाम्नां जपादौ जपान्ते च पाठाच्छरीरस्थं नाडीतन्त्रं प्रदीप्तं सत् साधकस्य लक्ष्यसाधने सहायकं भवति।

मानवशरीररचना गायत्री च

गायत्र्या वर्णात्मक-स्वरूपाधारेणैव मानव-शरीरस्य रचना संवृत्ताऽस्ति। शरीरस्थो मेरुदण्डो गायत्र्या अक्षरात्मकं तन्त्रं विद्यते। यथा गायत्रीमन्त्रे चतुर्विंशतिसङ्ख्यकान्यक्षराणि विद्यन्ते तथैव मेरुदण्डेऽपि तावत्य एव कशेरुकाः सन्ति। तासां कशेरुकाणां रचना गायत्र्या एकैकेन वर्णेन वर्णानुरूपेण वा सम्पन्नाऽस्ति। एतासु प्राणशक्तीनां प्रवाहानुरूपमेव वर्णानां मुखानि विभिन्नानक्षांशान् प्रति वलितानि विद्यन्ते। अक्षराकृतौ परिणमयितुं तानि वर्णमुखानि तावत एवाक्षांशान् यावद् वलयितव्यानि भवन्ति। सरलीभावात् तानि तेषां तेषामक्षराणां स्वरूपेषु परिणमन्ते। मस्तिष्के चलन्त्यो नाड्यो मेरुदण्डमेवाधारीकृत्य पादाङ्गुष्ठं यावदात्मीयानि कार्याणि सम्पादयन्ति। मेरुदण्ड एव समेषां चक्राणां सर्वेषां नाडीचक्राणां शक्तिकेन्द्राणाञ्च वर्तत आवासः। गायत्र्याः शरीररचनायाश्च सम्बन्ध इयान् घनिष्ठो विद्यते यो हि शब्दानां माध्यमेन प्रकटयितुं न भवत्यलम्। निरन्तरं साधनायाः प्रवृत्त्या यदा रहस्यानां प्रकटीभावस्याधारभूः पुष्टा भवितुं प्रवर्तते तदा तेषां रहस्यानामनुभवाः स्वयमेव प्रारभ्यन्ते शनैः शनैश्च गायत्र्याः साधकस्य च स्थितिरेकाकारा भवितुं प्रवर्तते। शरीरस्य मन्त्रमय्यां स्थितौ सत्यां शरीरं दिव्यत्वं धारयति दिव्यत्वस्थितौ च विश्वस्य विश्वस्य किमपीदृशं रहस्यं नावशिष्यते यन्न प्रकटीभवेत्। ब्रह्माण्डस्य पिण्डस्य च तादात्म्यं तदैव स्थाप्यते। ईदृशाय शरीराय नावशिष्यते किमपि दुर्लभम्।

१- अयं पादोऽथर्ववेदादुद्धृतः 'परो रजसे सावदोम्' इति विद्यते।

गायत्री शरीरस्थं नाडीचक्रञ्च

मानवशरीरस्य स्थूला सूक्ष्मा चोभयविधा सञ्चालन-प्रक्रिया नाडीसंस्थानेनैव भवति। शरीरमाधारीकृत्य नाडीसमूहोऽयं पिण्डरूपेणात्मन एकं पृथग् ब्रह्माण्डं संस्थाप्य राजते। पिण्डस्यायं ब्रह्माण्डः प्राणशक्तेराधारेणैव विराजा ब्रह्माण्डेनात्मनः सम्बन्धं स्थापयित्वा स्थितः। मानवशरीरस्य समस्ते पिण्डे सार्धत्रिलक्षमितानां नाडीनामस्त्यधिष्ठानम्। तास्वपि द्वासप्ततिसहस्रमिता नाड्यो मुख्याः सन्ति। या अन्याभिः सहयोगिनीभिर्नाडिकाभिः सम्बद्ध्यन्ते। तास्वपि द्वासप्ततिसङ्ख्यकाः प्रमुखा या हि मानवशरीरस्य समस्तानां क्रिया-कलापानां मुख्याधाररूपाः।

इत्थं शरीरस्येमासु द्वासप्ततिनाडिकासु नियन्त्रण-संस्थापनस्य तात्पर्यमस्ति सृष्टेः कस्मिन्नपि कार्ये स्वेच्छाशक्त्या परिवर्तनसामर्थ्यप्राप्तिः। इदं नियन्त्रणं तदैव भवितुमर्हति यदा—अशुद्धस्य रक्तस्य शोधनं शुद्धस्य रक्तस्य शरीरे प्रसारणं प्राणवायुना प्राणतत्त्वस्य ग्रहणं प्राणस्य पञ्च प्राणेषु तथा पञ्चोपप्राणेषु विभाजनं विचारेच्छा-क्रिया-चिन्तन-मननानि च भवेयुः। अस्तीदं सर्वं प्राणस्वरूपाया गायत्र्या अधीनम्।

मानव-मस्तिष्कं वाम-दक्षिणयोर्द्वयोर्गोलार्धयोर्विभक्तं विद्यते। प्रत्येकं गोलार्धे षोडश-षोडश नाड्यः सन्ति या आरोहावरोहक्रमेण द्वात्रिंशद्-द्वात्रिंशद् रूपा भवन्ति। द्वयोरपि गोलार्ध-योरिमा नाड्यः शरीरेऽधोभागं प्रति गच्छन्त्यो यत्र यावतां दलानां रूपेण चक्राणि निर्मान्ति तत्र तावत्य एव न्यूना भवन्ति किञ्च दिशां कोणा भवन्ति तत्र दलानामनुपातेन तावत्य एव नाडिकास्तासु सम्मिलिता जायन्ते। इत्थं द्वयोरपि भागयोर्नाडिका अग्रे ललनाचक्रं सम्प्राप्य सर्वप्रथमं चतुः-षष्टिदलात्मकं चक्रं निर्मान्ति। ललनाचक्राच्चाग्रे वर्धमानास्ता एव विशुद्ध-चक्रे षोडशदलात्मकं पद्मं रचयन्ति। तत्र तासां सङ्ख्यायां षोडशनाडीनां नैयून्यमायाति। ततोऽग्रे वायव्यकोणरूपाच्चक्राच्चतुर्दश नाडिका उपेत्य युञ्जन्ति। ततः परमनाहतपद्मे द्वादश नाडिका न्यूना भवन्ति नैर्ऋत्यकोणादेकादशनाड्य आगत्य मिलन्ति। मणिपूरकनिर्माणे दश नाडिका न्यूना भवन्ति तदाऽऽग्नेयकोणादागत्याष्टौ नाड्यो भूयोपि सङ्गताः। ततः परं स्वाधिष्ठानचक्रनिर्मितये षण्णाडिका न्यूना भवन्ति तदेशानकोणचक्रादुपेत्यैकादशनाड्यः पुनः संयुताः जायन्ते। एवमेव मूलाधारचक्रस्य निर्माणे यत्र चतस्रो नाड्यो न्यूनतां यान्ति तदा-ऽऽज्ञाचक्रनिर्माणे द्वे नाड्यौ न्यूने भवतः। अग्रे मूलाधारादप्यधो विषुवचक्रस्याष्टौ नाड्यस्तथा-ऽकुलचक्रस्य षण्णाड्यः पुनः सङ्गच्छन्ति, एवं सर्वाः सम्भूय द्वासप्ततिसङ्ख्यकाः सम्पद्यन्ते।[1] क्रममिमं परिज्ञातुं तालिका-फलकमिदं द्रष्टव्यम्—

१- अन्यत्र कथितमस्ति यत् कन्दमूलादेव सर्वा इमा नाड्य उत्पद्यन्ते—

गुदस्तु द्व्यङ्गुलादूर्ध्वं मेढ्रात् तु द्व्यङ्गुलादधः।
चतुरङ्गुलविस्तारं कन्दमूलं खगाण्डवत्॥
नाड्यस्तस्मात् समुत्पन्नाः सहस्राणां द्विसप्ततिः। इति॥

मस्तिष्कात् प्रारभमाणानां नाडीनां सञ्चारक्रमः

चक्रनामानि	दलानां सङ्ख्या	चक्रेषु नाडीनां प्रभावः	नाडीनां योगः
ललनाचक्रेषु	६४	पूर्णा सङ्ख्या	६४
विशुद्धचक्रे (उत्तरे)	१६	न्यूना जाताः	४८
वायव्यकोणे	१४	संयुताः	६२
अनाहतचक्रे (पश्चिमे)	१२	न्यूना जाताः	५०
नैर्ऋत्यकोणे	११	संयुताः	६१
मणिपूरचक्रे (दक्षिणे)	१०	न्यूना जाताः	५१
आग्नेयकोणे	८	संयुताः	५९
स्वाधिष्ठानचक्रे (पूर्वे)	६	न्यूना जाताः	५३
ईशानकोणे	११	संयुताः	६४
मूलाधारचक्रे	४	न्यूना जाताः	६०
आज्ञाचक्रे	२	न्यूना जाताः	५८
विषुवचक्रे	८	संयुताः	६६
अकुलचक्रे	६	संयुताः	७२

एता द्वासप्तति-नाडिका एवाग्रे परःसहस्राणां नाडिकानां स्वरूपेण विकसन्ति ।

मस्तिष्कस्य वाम-दक्षिणभागाभ्यां निःसृत्य सञ्चरणशीला एता नाडिका द्वात्रिंशद्-द्वात्रिंशद् रूपेणैकस्य प्रवाहस्य रूपं सम्प्राप्याग्रे वर्धन्ते । ललनाचक्रं यावद् गत्वा वामा नाड्यो वामपक्षाद् दक्षिणा नाड्यश्च दक्षिणपक्षादावर्तं रचयन्त्यश्चतुःषष्टिदलात्मकस्य पद्मस्य 'ललना-चक्र'स्य निर्माणं कुर्वन्ति । पद्मनिर्माणोत्तरं द्वयोरपि पक्षयोर्नाड्यः परस्परं युञ्जन्ति । एवं पद्माय पूर्णत्वप्रदानानन्तरं यत्र पूर्वोक्ता नाड्यो युज्यन्ते तत एवैकैका नाडी भिन्नभिन्नरूपेणोत्पन्ना सती चतुःषष्टिनाडीनां रूपेणाग्रे वर्धन्ते । अग्रे विशुद्धचक्रमागत्य यत्र षोडशदलानां पद्मं भवति तत इमा अष्टौ वामपक्षतोऽष्टौ च दक्षिणपक्षतः पद्मं निर्माय समाप्नुवन्ति । पुनर्विशुद्धा-नाहतचक्रयोर्मध्ये निर्मितिमादधानं वायव्यपद्मं निर्मातुमध ऊर्ध्वचक्राभ्यां विशुद्धादधो यान्त्यो-ऽष्टौ तथाऽनाहतादूर्ध्वं यान्त्यः षट् प्रचलिष्यन्ति यतो मध्ये चतुर्दशदलानामधोमुखं वायव्यचक्रं सम्पत्स्यते । अधोमुखचक्रनिर्माणानन्तरं चतुर्दश नाड्यः पुनः प्रवाहे मिलित्वा तावतीनामेव नाडीनां वृद्धिं कुर्वन्ति ।

इत्थमुपरि दर्शिते फलके न्यूनता-संयुतिमतीनां नाडिकानामयमेव क्रमोऽस्ति यो हि परस्तादन्तं तावत् प्रचलन् तिष्ठति ।

मस्तिष्काच्चलन्तीनामेतासां नाडीनां सञ्चालनक्षेत्रं मेरुदण्डमाध्यमेन हस्तपादाङ्गु-ष्ठानि यावद् विद्यते । तासु कियत्यश्चिदेतादृश्योऽपि नाड्यः सन्ति याः सहजतया प्रकृतिधर्म-रूपेण स्वीयानि शारीरिककार्याणि साधयन्ति । अनेका ईदृश्योऽपि नाड्यो विद्यन्ते या अति-सूक्ष्माः सन्ति । तादृश्य एव सूक्ष्मा नाड्यः शक्तीनां स्रोतांसि वर्तन्ते या हि मानवशरीरे

सुप्तास्तिष्ठन्ति। तासु यदि प्राणप्रवाहः प्रवेष्टुं शक्येत तर्हि ता विकासं प्राप्नुवन्ति सति च विकासे स्वासु सुप्ताः शक्तीरुद्बोध्याद्भुतान्यलौकिकक्षमतावन्ति कार्याणि सम्पादयितुं चेष्टन्ते। तासु **सूक्ष्मनाडिकासु प्राणानां प्रवाहप्रवेशनस्यैकमात्रं साधनं गायत्र्युपासनमेव वर्तते।** साधनां कुर्वतः साधकस्य प्राणशक्तौ यथा यथा नियन्त्रणं भवितुं प्रारभ्यते, तदनुरूपमेव ता नाड्योऽपि प्राणशक्तिं प्राप्य चैतन्या भवितुं प्रारभन्ते। साधनाकाले तस्याभासः स्पष्टं भवति। नाडीषु नियन्त्रणप्राप्त्यनन्तरं कस्मा अपि कार्यायाभीष्टा नाडी चैतन्या कर्तुं शक्यते तथा तया कार्यं सम्पादयितुं शक्यते। कार्यसम्पादनानन्तरं नाडी स्वस्यां शान्तमुद्रायां तिष्ठति। नाडीचैतन्ये नियन्त्रणाप्राप्तेः परं नाड्यो वशवर्तिन्यो भवन्ति, एकवारं चैतन्यं लब्ध्वा पुनः सुप्ता अपि न भवन्ति किन्तु कार्यपूर्त्यनन्तरं शान्तिमवलम्बन्ते। ता नाड्य इयत्यः सूक्ष्माः सन्ति यद् द्विसहस्रगुणितस्थूलदर्शनसामर्थ्यशालिसूक्ष्मदर्शकं यन्त्रमपि केवलं क्षीणक्षीणकेशतन्तुवदेव स्वरूपं दर्शयति। इयतीषु सूक्ष्मासु नाडीष्वपि भूयस्योऽन्या नाड्यो भवन्ति। मानवस्य सम्पूर्णमपि शरीरं लतायास्तन्तुजालकसदृशेन नाडी-वितानेनाच्छादितं विद्यते। एका प्राण-शक्तिरेव नाडीतन्त्रस्याधारभूताऽस्ति।[१]

गायत्रीजपस्य शरीरे प्रभावः

इदं पुरा प्रतिपादितमस्ति यद् गायत्री-साधनाया लक्ष्यं विराजि स्थितायाः प्राण-शक्तेराकर्षणं विधाय पिण्डे स्थितया प्राणशक्त्या संयोजनं वर्तते। पृथ्व्याः प्राणस्रोतः सूर्यो ऽस्ति। अनन्तानां रश्मीनां रूपे सूर्येण प्राणशक्तिर्निरन्तरं प्रवाहिता भवति। अन्न-जल-वाय्व-ग्न्यौषधीनां माध्यमेन मानवशरीरस्य पोषणं सूर्यस्य प्राणशक्तिरेव विदधाति। सामान्यतः समस्तं दृश्यं जगद् नैसर्गिकेषु नियमेषु निबद्धं सत् तस्या एव प्राणशक्तेरुपभोगं विधत्ते। मानवशरीरमपि तेष्वेव नियमेषु स्वस्य नैसर्गिकस्य प्राणस्योपभोगं करोति। अस्यां समस्तायां सृष्टौ मानव एवैकमात्रमीदृशो विद्यते यो यदि कामयेत तदा स्वीयात् प्रयत्नाद् यां प्राणशक्ति स प्राप्तवानस्ति ततोऽप्यधिकां प्राणशक्तिमर्जयितुं शक्नोति। प्राणशक्तिरेव सर्वासां शक्तीनां मूल आधारः।

वेदा भारतीयवाङ्मयस्यापौरुषेयाणि ज्ञानानि सन्ति। अस्माकं महर्षिभिः प्राण-शक्तेः स्रोतसोऽनुसन्धानं विधाय गायत्रीरूपा माता प्राप्ता। गायत्रीमन्त्र एव तन्माध्यमं वर्तते येन मानवो विराजः प्राणशक्तेर्दोहनस्य सामर्थ्यं लब्धुं शक्नोति। यावत्या अधिकायाः प्राणशक्तेः स दोहनं करिष्यति तावत्येवाधिका प्राणशक्तिर्मानवीयं पिण्डमधिकाधिकं शक्ति-सम्पन्नं विधास्यति। गायत्री-साधनया जपेन च मानव-शरीरस्य नाडीष्वधिकाधिकं प्राणशक्तेः सञ्चारो भविष्यति। एतेन समग्रं नाडीसंस्थानं तथा नाड्यो विकासं प्राप्स्यन्ति।

१- एतद्विषये 'शोधप्रभायां' — **'शरीरस्थ साढ़े तीन लाख नाड़ियां'** इति शीर्षकं आचार्य-रमानाथशास्त्रिणां निबन्धोऽप्यवलोकनीयः। 'राजेन्द्रप्रसाद-जन्म-शताब्द-स्मृत्यङ्के' पृ० २०३-२०९।

मानवस्य शारीरिक्या मानसिक्याश्च शक्तेराधारः शरीरस्था नाड्य एव सन्ति। मस्तिष्कादारभ्य हस्तपादाङ्गुष्ठं यावत् सर्वाणि नाडीसंस्थानानि प्रबुद्धानि भवन्ति तदा तस्मै साधकाय किमप्यसाध्यं नावशिष्यते। प्रकृतेः किमपि रहस्यं तस्मै रहस्यं न तिष्ठति। ईदृशस्य साधकस्य सकलं शरीरं दिव्यतापूरितं सम्पद्यते। रोम-रोमतस्तेजः प्रस्फुटितं भवति। मेरुदण्ड-स्थिता गायत्र्याः सर्वे वर्णाः स्वीयानि सहजस्वरूपाणि विभावयितुं प्रवर्तन्ते। ईदृशो जनः स्वीये स्थाने स्थितः पृथिव्याः कस्मिन्नपि भागे स्वकीयामिच्छाशक्तिं सम्प्रेष्य तदनुरूपस्य कार्यस्य प्रेरणां क्रियान्विर्ति च कारयितुं शक्तो भवति।

मस्तिष्कस्थे नाडीचैतन्ये मणि-मन्त्रौषधीनां योगः

मस्तिष्के वर्तमानानां नाडीनां चैतन्यमेव शरीरस्थनाडीचैतन्यस्य मूलाधारः। नाडी-चैतन्यस्य पृष्ठभूमौ मणिमन्त्रौषधीनां यद् योगदानमस्ति तद्विषये भगवताऽऽद्यशङ्कराचार्ये-णागम-निगमयोरुभाभ्यां पक्षाभ्यां तुलनात्मकं समन्वयं साधयता मणि-मन्त्रौधीनां साकार-रूपं प्रतिपादितम्। वैदिके पूजाप्रकरणे पूजाया अष्टाविंशतिमन्त्राः सन्ति। तेभ्य एव मन्त्रेभ्यः कूटात्मकं बीजात्मकं वा रूपं दत्त्वा गायत्रीमन्त्रस्य महाषोडश्याश्च स्वरूपं प्रतिपादितम्। एतद्विषये यद्यपि कोऽपि स्वतन्त्रो ग्रन्थो नोपलभ्यते तथापि यत्र तत्र मणिमन्त्रौधीनां परस्परं समन्वयस्य सूचकाः सङ्केता ग्रन्थेषु प्राप्यन्ते। यावत् त्रयाणामपि मणिमन्त्रौषधीना-मैक्यं न भवति तावत् कुण्डलिनीप्रबोधः खपुष्पायित एव भवति।

हठयोगस्य क्रियाभिः कुण्डलिन्याः किञ्चिदुद्बोधनं भवति परं यावत् त्रिकमिदं समन्वितं न भवति तावन्महाशक्तेः कुण्डलिन्या व्युत्थान-प्रक्रिया सम्पूर्णेन रूपेण क्रियान्विता न भवतीति वास्तविकं तथ्यम्।

प्राणिषु यथा केचन प्राणिनो मणिधरा भवन्ति तथैव कतिपय-मानवानां मस्तिष्केऽपि जन्मत एव मणिस्तिष्ठति। मस्तिष्कस्य सप्तमभागीये प्रथमे प्रभागेऽस्य मणेर्नियतं स्थानमस्ति। जन्मजातमणेरतिरिक्तं मणेरस्य निर्माणं मानवमष्तिष्के द्विधा विधाभ्यां सम्पद्यते, तत्रैका मणि-विधा द्वितीया चौषधविधा। येषु मानवेष्वयं मणिर्जन्मत एव भवति तेषां मणेरियं शक्तिः स्वत एव कार्यं करोति परं तन्मणिशक्तौ मणिवतो नियन्त्रणं न भवति प्रायेण चांशिक-रूपेणैवापरिपक्वतया सा कार्यं करोति। पूर्णपरिपक्वमणिवन्तो जना विरला एव भवन्ति। एतादृशेषु जनेषु पिण्डगतशक्तीनां पूर्णत्वं स्वत एवोद्भवति। अपूर्णायां परिपक्वदशायामथ-वाऽविकसितायां स्थितावपि मणिः स्वीयं दिव्यं प्रभावं तु दर्शयत्येव। ईदृशा जनाः कस्याम-प्येकस्यां दिशि दिव्यत्वमलौकिकीं शक्तिं बा प्राप्नुवन्ति। तत्प्रभावेण ते सूक्ष्मजगतः प्राणिनो द्रष्टुं तैः सह भाषितुं सत्यामिच्छायां च सम्पर्कं स्थापयितुमपि शक्नुवन्ति। जन्मजातो मणिः केषुचिन्मनुष्येतरेषु प्राणिषु सर्प-गज-मण्डूक-शुक्तिकास्वपि भवति परं ते तदीयं कमप्यु-पयोगं कर्तुं न क्षमन्ते।

(क) मन्त्रेण मणि-निर्माणम्

अस्यायमभिप्रायोऽस्ति यन्मन्त्रात्मिक्या साधनया मणेर्निर्माणम्। तत्र मन्त्रेषु सर्वाधिकं

महत्त्वपूर्णो मन्त्रो गायत्री-मन्त्र एव। गायत्रीसाधना पिण्डगतशक्तेर्विकासस्य सर्वोत्कृष्टा साधनाऽस्ति। आर्यसंस्कृतौ सन्ध्याया गायत्र्याश्च यन्महत्त्वं प्रतिपादितमस्ति तस्य पृष्ठभूमाविदमेव रहस्यं निविष्टमस्ति। यो नियमितं सन्ध्यां गायत्रीजपं च करोति तस्य मस्तिष्के मणेर्बीजस्य निर्माणं प्रारभ्यते। नियमिता मन्त्रात्मिकी साधना तद्बीजस्य स्वरूपं निर्धारयितुं प्रवर्तते साधनया सहैवोत्तरोत्तरं मणेर्विकासश्च भवति।

(ख) ओषधिद्वारा मणिनिर्माणम्

ओषधिर्विश्वप्राणानां विविधरश्मीनां साकारं स्वरूपमस्ति। सर्वा ओषधयो दिव्य-चेतनाभिरोतप्रोता भवन्ति। मन्त्रात्मिक्याः प्राणशक्तेः साधनाया माध्यमेन यथा मस्तिष्कगताः सुप्ता नाड्यः प्रबोध्यन्ते तथैवौषधिरूपया प्राणशक्त्याः माध्यमेनापि मस्तिष्कस्था नाड्यः प्रबुद्धाः क्रियन्ते। औषधीया शक्तिर्नाडिकाः प्रबोध्य तासु मणेर्बीजारोपणं करोति। सततसाधनावदेव सततमोषधसेवनं मणये परिपक्वतां ददाति। ओषधिद्वारा मणि-निर्माणप्रक्रिया साम्प्रतं लुप्तप्राया विद्यते तथापि तन्त्रेषु यस्य वर्णस्य या ओषधिर्वर्णिताऽस्ति तदाधारेण मन्त्रवर्णानां या या औषधयो भवन्ति तासां सङ्कलनेन गुटिका-निर्माणपूर्वकमौषधि-सेवनेन तथा निर्मातुं शक्यते। यत्र तत्र मेधाजननाय धारणाशक्तये कवित्वाय वा ये प्रयोगा ओषधिरूपास्तान्त्रिकपद्धत्या सूचितास्तेषां सेवनमप्यत्र हितावहं स्यात्।

कोऽयं मणिः ?

मानव-मस्तिष्कस्य सप्तमभागवर्तिनः प्रथमप्रभागस्य यत् स्थानमाज्ञाचक्रं स एव मणिः। मणिना समस्तं कार्यसञ्चालनमाज्ञाचक्रस्य माध्यमेनैव भवति। आज्ञाचक्रस्य समक्षवर्तिनि पूर्णतः पृष्ठ-भागे मणेः स्थानमस्ति। अयं मणिर्दिव्यप्रकाशकार्युपकरण (सर्च लाइट)-वत् सततं जागरितो भवति। मन्त्रात्मकेन साधनेनाथवौषधसेवनेन किं वोभयोरपि समञ्चितेन साधनेन मस्तिष्कगता दिव्या नाड्य एकं स्थानमागत्य सङ्गता भवन्ति। सततसाधनायाः प्रभावादेतासां नाडीनां प्रथममेकः समन्वितो गुच्छको भवति। स एव च नाडीगुच्छकस्तरलो भूत्वैकाकारतां प्रतिपद्यते। तरलतायाश्चरमपरिस्थितेरनन्तरं ततरलं पिण्डं शनैः शनैः कठोरं भवितुमारभते। कठोरं सच्च क्रमशः कठोरतायाश्चरमां स्थितिं प्राप्नोति। इयमेव मणेः परिपक्वाऽवस्थाऽस्ति। मणिरूपे परिणतः स नाडीगुच्छकः पारदर्शी परमप्रकाशशाली च सम्पद्यते। स्वस्यां परिपक्वावस्थायां स सर्वाभ्यो नाडीभ्यः स्वीयं सम्बन्धं विच्छिनत्ति। एवं मणिस्वरूपेण स्थिरतां प्राप्य सर्वासां सर्वेषां च मध्ये स्थित्वाऽपि सर्वाभ्यः सर्वेभ्यश्च पृथक् स्वतन्त्रावस्थितिं गच्छति।

मणेः परिपक्वतायास्तात्पर्यमिदमस्ति यत् पिण्डगतानां शक्तीनां पूर्णो विकासः। ईदृशो जनः स्वकीयाभिः शक्तिभिर्विराजो ब्रह्माण्डस्य शक्तिष्वपि नियन्त्रणं साधयितुं प्रवर्तते। पिण्डगताः शक्तयो विराजः सजातीयाः शक्तयो भवन्ति। ईदृशो जनोऽत्यन्तं प्रतिभावान् तेजस्वी दिव्यद्रष्टा च सम्पद्यते। संसारस्य किमपि रहस्यं तस्मै रहस्यं न तिष्ठति।

आगमग्रन्थेषु यस्य तृतीयनेत्रस्याथवा दिव्यनेत्रस्य वर्णनं विद्यते तदस्य मानव-मणेरेवै-


कस्या आंशिकशक्तेः प्रतीकमस्ति । मणेः परिपक्वतैव दिव्यस्वरूपस्य पूर्णो विकासो वर्तते । अस्यां स्थितौ साधकः पिण्डत उत्थाय विराजा ब्रह्माण्डेन सहाभिन्नं सम्बन्धं स्थापयति ।

आर्यकपालशास्त्र-विज्ञानम्


मस्तिष्कस्य या स्थितिर्गतिः प्रवृत्तिश्चात्र वर्णितास्तासां मूलं कपालशास्त्रानुसारं विज्ञेयं विद्यते । अतस्तस्य संक्षिप्तः परिचयोऽत्र प्रस्तूयते —

सम्पूर्णस्य विश्वपुरोडाशस्य संरक्षणं व्यवहारश्चाष्टकपालेषु भवति । मनुष्यस्य शिरोभागे द्वाविंशत्यस्थीनि सन्ति किन्तु तेषु मुख्यानि शिरोऽस्थीन्यष्टावेव सन्ति । यथा —


(१)




(२)



(३)



(४)




मुखसहिता अस्थ्नामष्टौ विभागाः

1. Frontap	ललाटपट्टिकाधारः	5. Maear	दन्ताधारः
2. Parictab	तनूकरणास्थि	6. Nasal	नासिक्यास्थि
3. Sphenoid	कपालाधिष्ठास्थि	7. Mazeelary	मुखाधारः
4. Temporat	शङ्खास्थि	8. Ocipitab	शिरःपृष्ठम्

आर्यकपालशास्त्रे परःसहस्राणां गतीनां व्यवहाराणाञ्च वर्णनस्याष्टकपालेषु तथाष्ट-शक्तिषु समादेशं विधाय दर्शितमस्ति । तस्य कपाले यत्स्थानमस्ति तदित्थं विद्यते —

(५)



कपालशास्त्रानुसार्यष्टौ-विभा ाः

१- शिरःपृष्ठास्थि	आश्रमिका शक्तिः	
२- कर्णविवराधारास्थि	स्वसंरक्षण—	"
३- तनूकरणास्थि	स्वोत्कर्षिणी	"
४- प्रकृत्यस्थि	स्वतः प्रवर्तिनी	"
५- ललाटपट्टिका	ज्ञानप्रवर्तिका	"
६- नासिक्यास्थि	विषयग्राहिणी	"
७- नृकपालास्थि	विवेचनी	"
८- पौरुषास्थि	मनोव्यवहार—	"

अथ चैतेषां कपालास्थ्नां सत्ताधारचक्राक्षराणां परिज्ञानाय तालिकेयं विलोकनीया-ऽस्ति —

१. ग्राम्या, ग्रह-प्रवृत्ति-सत्ता —	तारसम्बन्धः	मूलबन्धः	४. अक्षराणि	
२. स्वहित-परनिष्ठा	"	स्वाधिष्ठाने	"	६. "
३. स्वार्थभाव —	"	मणिपूरके	"	१०. "
४. सात्त्विकभाव —	"	अनाहते	"	१२. "
५. अर्धचित्तभाव —	"	विशुद्धाख्ये	"	१६. "
६. विषयग्रहण —	"	आज्ञाचक्रे	"	२. "
७. चिच्छक्ति —	"	सहस्रदले	"	ॐ अक्षरम्
८. सुप्ता	"	बीजक्षराणि	"	....

अष्टसु कपालेषु यावत्यः सत्ताः सन्ति तासु द्वाचत्वारिंशत्सङ्ख्यकानां सत्तानां परिज्ञानं सामान्या जना अनुभवन्ति । परं तास्वष्टौ सत्ता, या मनोव्यवहार एव समाविष्टाः सन्ति तासां बोधः केवलं योगाचरणशीलानामेव भवति । ता अष्टौ शक्तयः "१- प्रभा-प्रकाशशक्तिः, २- नम्रवर्णता-बीजज्ञानं, ३- उन्मनी-श्रुतिविज्ञानं, ४- निस्सङ्गी-वर्णार्थ-सम्यक्त्वज्ञानं, ५- ब्रह्मणी-गतिविज्ञानं (स्वाहा), ६- लोहिता-गतिहेतुः (स्वधा), ७- षोडश चन्द्रकलाः,

द्वादश सूर्यकलाः" सन्ति । इमाः सम्मिल्य ५० पञ्चाशद् भवन्ति ।[1]

उपरि निर्दिष्टानां विचारपूर्वकं दर्शनेन स्वस्मिन् नैसर्गिकी सत्ता काऽस्ति तथा तस्याः परास्वरूपं कीदृशं विद्यते किञ्चापरायां सर्वथा विरुद्धो व्यवहारः कथं भवतीति ज्ञाने सति स्वस्य जीवनशोधनस्यैकः विशुद्धो मार्गो ज्ञातुं शक्यते । यथा हि परायां यत्र योगानन्दोऽस्ति तत्रैवापरायां काम्य-व्यवहारस्यानन्दो भवति, अथ च तयोः कतमस्मिन्नानन्दे यातव्यमिति विचार एव बुद्धिमतां कार्यमस्ति ।

इत्थं मस्तिष्कस्य कपालशास्त्रस्य मनश्चक्रस्य मणेश्च ज्ञानं सम्प्राप्य तत्तद्विषयकोद्बोधनप्रक्रियाणां साधनया सिद्धिः सुकरा भवति । अष्टपालेषु यान्यष्टाक्षराणि भवन्ति तान्यपि गायत्र्या अक्षराण्येव । साम्प्रतं गायत्रीमन्त्रस्याक्षरात्मिकायाः शक्तेः श्रीमदाद्यशङ्कराचार्याणां **'यतिवण्डैश्वर्य-विधान'**—ग्रन्थानुसारं परिचयः प्रस्तूयते —

गायत्रीमन्त्रस्याक्षरात्मकशक्तिपरिचयः

श्रीमद्भिः शङ्कराचार्यचरणैर्गायत्र्याश्चतुर्विंशतिवर्णानां द्वात्रिंशच्छक्तयो निर्धारिताः। तत्राधाक्षराणामपि गणनया प्रथम-तकारादारभ्यान्तिमार्धतकारपर्यन्तमेकत्रिंशद्वर्णा भवन्ति। तुरीयपादस्य पकारादारभ्यान्तिमार्धमकारपर्यन्तं नवाक्षराणि भवन्ति। इत्थं ३१ + ९ = ४० वर्णा भवन्ति। द्वात्रिंशन्नाडीनां शक्तिपक्षे गायत्र्यास्त्रिपादानामेकत्रिंशद्वर्णास्तथा तुरीयपादस्य नवानां वर्णानामेका नाडी मिलित्वा ३१ + १ = ३२ द्वात्रिंशद् भवन्ति । अनेकनाड्या नवाक्षराणामेकस्याः शक्तेः स्वीकरणे कारणमिदं विद्यते यच्चतुर्थपादस्य प्रथमाक्षरस्य प्रथमा नाडी **'परब्रह्मात्मिका'**ऽभिधानाऽस्ति तस्यामेवान्या अष्टौ नाड्योऽन्तर्हिता मन्यन्ते । गुच्छरूपेण परस्परं स्यूतत्वादेकरूपतैवास्याः स्वीक्रियते। एवं सत्यप्यक्षररूपात्मिकाः शक्तयोरस्तित्वं च तासां पृथक्-पृथग् वर्तत एव । एता द्वात्रिंशन्नाड्यो मानवमस्तिकान्निःसृत्य हस्तपादाङ्गुष्ठावधि सञ्चरन्त्यः शरीरस्य मस्तिष्कस्य च समस्ताया जीवनशक्तेराधारकेन्द्रत्वं सम्प्राप्य मानवस्यास्तित्वं सुरक्षन्ति ।

एतेषां गायत्र्याश्चत्वारिंशद्वर्णानां विशेषणसमन्विता नामगर्भाः श्लोका इत्थं विद्यन्ते —

१- पञ्चाशद्वर्णमयी मातृकाऽप्येतासां शक्तीनां स्वरूपेण विकसिताः सन्ति । कपाले पञ्चाशद् वर्णानां स्थानान्यपि चित्राधारेण दर्शितानि सन्ति। सत्तानां परास्वरूपे अपरा-स्वरूपेऽपि प्रत्येकं वर्णस्यार्थो भिन्नो भिन्नो भवति । मूर्धनि मनश्चक्रमष्टदलं विद्यते, तदनुसारं मनोव्यवहारः कथं चलतीत्यपि विशिष्य ज्ञातव्यं वर्तते । अत्र विस्तृतेः कारणात् तद्विषये न लिखितम् ।

श्रीमत्परमहंस - परिव्राजकाचार्य - श्रीमदाद्यशङ्कर - भगवत्पादाचार्यवर्य-प्रणीत-**यतिदण्डैश्वर्य-विधानानुसारं** गायत्र्याश्चत्वारिंशन्नाम्नां निर्देशकाः श्लोकाः

तत्वज्ञा ज्ञानदात्री च **तत्वज्ञानप्रबोधिनी** । शास्त्रे ख्याता सदा वन्द्या **सर्वशास्त्रार्थवादिनी** ॥
विबुधेषु च विज्ञेया **विबुधार्थस्वरूपिणी** । सर्वज्ञा सर्वदा देवी **तुर्यामार्गप्रदर्शिनी** ॥
सनातना **रमा** दिव्या **वयोवस्थाविवर्जिता** । रेवाया रम्यतीर्थे च **रेवातीरनिवासिनी** ॥
आगमैकसदारूपा **निखिलागमवेदिनी** । **यमुना मोक्षदा** रम्या **भक्ताभीष्टप्रदायिनी** ॥
भक्ताभीष्टप्रदा रम्या गोवर्धनविवर्धिनी । शान्तिप्रिया च **विघ्नेशी देशोपद्रवनाशिनी** ॥
वरदात्री सर्वदा सा वक्रतुण्डवरप्रदा । **स्पन्दरूपा योगगम्या** ज्ञानविज्ञानसौख्यदा ॥
वीरवन्द्या वन्दिता च **महावैरिविनाशिनी** । समग्रेषु च कार्येषु हितकर्मफलप्रदा ॥
धिषणा योधिनी सान्या **योगक्षेमविहारिणी** । **नवसिद्धिसमाराध्या प्रभवा रोग-शमनी** ॥
चोरघ्नी चोरहन्त्री च **दक्षिणामूर्तिरूपिणी** । वन्द्या च **वेदमाता** सा **यात्रापापविवर्जिता** ॥
स्तोतव्या छन्दसां माता **तुरीयपथगामिनी** । **परब्रह्मात्मिका** ब्राह्मी **रोगेशी रमणी-प्रिया** ॥
जगत्-प्रिया सेव्यमाना परमा **सागराम्बरा** । **वेदाक्षरपरीताङ्गी दोहिनी माधवी** तथा ॥
द्वात्रिंशदक्षरैरुक्ता गायत्री परमा शुभा । अतोऽस्याः पाठमात्रेण फलं प्राप्नोति वै शुभम् ॥

☐

गायत्र्याश्चत्वारिंशन्नाम्नां नमोऽन्ता नामावली

क्र० सं०	गायत्र्या अक्षराणि	गायत्रीपरकाणि नाडीनामानि	
१.	(त)	तत्वज्ञायै	नमः
२.	(त्)	तत्वज्ञानप्रबोधिन्यै	"
३.	(स)	सर्वशास्त्रार्थवादिन्यै	"
४.	(वि)	विबुधार्थस्वरूपिण्यै	"
५.	(तु)	तुर्य्यामार्गप्रदर्शिन्यै	"
६.	(र्)	रमायै	"
७.	(व)	वयोवस्थाविवर्जितायै	"
८.	(रे)	रेवातीरनिवासिन्यै	"
९.	(णि)	निखिलागमवेदिन्यै	"
१०.	(य)	यमुनायै	,
११.	(म्)	मोक्षदायै	
१२.	(भ)	भक्ताभीष्टप्रदायिन्य	

१३.	(र्)	रम्यायै	"
१४.	(गो)	गोवर्धनविवर्धिन्यै	"
१५.	(दे)	देशोपद्रवनाशिन्यै	"
१६.	(व)	वक्रतुण्डवरप्रदायै	"
१७.	(स्)	स्पन्दरूपायै	"
१८.	(य)	योगगम्यायै	"
१९.	(धी)	धीरवन्द्यायै	"
२०.	(म)	महावैरिविनाशिन्यै	"
२१.	(हि)	हितकर्मफलप्रदायै	"
२२.	(धि)	धिषणायै	"
२३.	(यो)	योधिन्यै	"
२४.	(यो)	योगक्षेमविहारिण्यै	"
२५.	(नः)	नवसिद्धिसमाराध्यायै	"
२६.	(प्)	प्रभवायै	"
२७.	(र)	रोगशमन्यै	"
२८.	(चो)	चोरघ्न्यै	"
२९.	(द)	दक्षिणामूर्तिरूपिण्यै	"
३०.	(या)	यात्रापापविवर्जितायै	"
३१.	(त्)	तुरीयपथगामिन्यै	"
३२.	(प)	परब्रह्मात्मिकायै	"
३३.	(रो)	रोगेश्यै	"
३४.	(र)	रमणीप्रियायै	"
३५.	(ज)	जगत्प्रियायै	"
३६.	(से)	सेव्यमानायै	"
३७.	(सा)	सागराम्बरायै	"
३८.	(व)	वेदाक्षरपरीताङ्ग्यै	"
३९.	(दो)	दोहिन्यै	"
४०.	(म्)	माधव्यै	"

इत्थं गायत्री-मन्त्रस्य साधना सर्वासु साधनासु सर्वोत्तमं स्थानं धारयति। पुराणेषु सर्वत्र गायत्री-माहात्म्यं जपादि-विधानं चातीव विस्तरेण विनिविष्टमुपलभ्यते । स्कन्दवाय्वग्नि-भागवत-प्रभृतीनि पुराणानि तु सदृष्टान्तं समाहात्म्यं सविधानं सव्याख्यानं गायत्रीमन्त्रस्य तत्त्वं प्रतिपादयन्ति। स्मृतिषु मनोरारभ्य यावत्यः स्मृतयो लभन्ते तासु प्रायो गायत्रीमन्त्र-साधनायाः सन्ध्यायाश्च बिचाराः पुरस्कृताः सन्ति, तत्रापि भारद्वाज-विश्वामित्र-गोतम-याज्ञवल्क्यादि-स्मृतिषु गायत्र्युपासना-प्रकारा महनीया विद्यन्ते । साम्प्रतं कलौ ब्रह्मतेजोऽभिवृद्धये गायत्र्यु-पासनाऽत्यावश्यकी वर्तत इति निश्चित्य स्वस्वाधिकार-गुरूपदेश-सम्प्रदाय-परम्परानुसारं जपे स्मरणे स्तोत्रादिपाठे च सर्वथा प्रयतनीयमिति निवेदनम् ।[१]

'श्रीविद्यारण्य'-वर्यैर्यतिवरगुरुभिर्बोधितो 'रुद्रदेवः',
संयोज्य स्वीयबुद्ध्या प्रकटितमकरोद् वेदमातुः कृपातः ।
नित्यं कर्तव्यबुद्ध्या द्विजकुलजननाः सर्वकालोपयुक्तं,
गायत्रीमन्त्रजापं सविधि विदधतु श्रद्धयेत्यस्ति याच्ञा ।।
कृष्णानन्दाप्त-विद्येन रुद्रदेवत्रिपाठिना ।
निबद्धोऽयं हि गायत्र्या लेखः स्याद्विदुषां मुदे ।।

□

१- गायत्री-मन्त्रस्य जपप्रकाराणां तन्त्रशास्त्रेषु प्रचुराणि विधानानि विद्यन्ते। यामलग्रन्थेषु विविधया नवीनया दृष्ट्याऽन्यान्य-देवता-मन्त्राणां विदर्भेण सह सुबह्व्यः प्रक्रिया अपि निर्दिष्टाः सन्ति। एवमेवानेकानि स्तोत्राणि तादृशि विद्यन्ते येषु मन्त्रजपस्य विशिष्टाः प्रकारा वर्णिताः सन्ति। तेष्वेव 'गायत्री स्तवराजो'ऽत्र प्रकाशितो विद्यते येन सह मन्त्र-सङ्केता अतीवोपयोगिनो विद्यन्ते तेऽपि द्रष्टव्या गुरवश्चोपास्य विधयो ज्ञातव्य इति।

सर्ववेद-सारभूत गायत्री-मन्त्र

—डा० त्रिपाठी

गायत्री वेदजननी

सनातनसाहित्य में वेद की महत्ता सर्वोपरि है और वेदों की उत्पत्ति का मूल ओङ्कार है। इस मूल का पहला अङ्कुरण हुआ वही "गायत्री-मन्त्र" के नाम से प्रसिद्ध है। गायत्री-मन्त्र का विस्तार वेदों के रूप में प्रकट हुआ और क्रमशः इसकी महिमा मन्त्र-ब्राह्मणात्मक वेदों में, मन्त्र-तन्त्र-यन्त्रात्मक आगमों में, अध्यात्मप्रधान उपनिषदों में, वेदों के समुपबृंहणकारी अष्टादश पुराण एवं उपपुराणों में तथा स्तुति-साहित्य में अत्यन्त आदरपूर्वक प्रसृत हुई। गायत्री-मन्त्र की आराधना के लिये प्रेरित करते हुए शास्त्रकार महर्षियों ने पद-पद पर कहा है कि "गायत्री परमजप है, गायत्री अत्यन्त आवश्यक तथा गौरवशाली है, गायत्री की अर्चा के बिना सत्पुरुषों में निन्दा होती है, केवल गायत्री की आराधना में निष्णात होकर द्विज—ब्राह्मण, क्षत्रिय और वैश्य मोक्षको प्राप्त करते हैं। सभी वेदों की सारभूत इस गायत्री की आराधना स्वयं ब्रह्मादिक देव भी सन्ध्या करते समय ध्यान और जप द्वारा करते हैं।"[१] ऐसे अनेक प्रमाणों के आधार पर ही गायत्री को वेदमाता माना जाता है।

नामकरण तथा व्याख्या

प्रस्तुत मन्त्र में तीन पद होने से इसका छन्द "गायत्री" है, यही कारण है कि ऐसे तीन पदों वाले मन्त्र का नाम गायत्री कहा जाता है। वैसे गायत्री पदकी व्युत्पत्ति 'गायन्तं त्रायते इति गायत्री' की जाती है जिसका अर्थ होता है— गान-स्तुति करनेवाले की जो रक्षा करे, वह है गायत्री। सम्भवतः इन्हीं महान् तत्त्वों के आधार पर प्रत्येक देवता का त्रिपादमन्त्र "गायत्री" कहलाने लगा और उसके स्तुतिकर्त्ता के संरक्षक धर्म ने ही उसे विश्वव्यापक बनाने में सहयोग दिया। इसी अर्थ की व्याप्ति सर्वत्र व्याप्त है। यही गायत्रीदेवी एकपदी, द्विपदी, त्रिपदी और चतुष्पदी के रूप में परिव्याप्त बन गई है।

---

१. गायत्री परमो जपः ॥४।४॥, गायत्र्यतिगरीयसी ॥५।१६।'—बृहत्पाराशरस्मृति। एतदर्चाविसंयुक्त·········गर्हणां याति साधुषु ॥२।८२॥ मनुस्मृति। गायत्रीमात्र-निष्णातो द्विजो मोक्षत्वमाप्नुयात् ॥१२।८।९०॥, सर्ववेदसारभूता गायत्र्यास्तु समर्चना। ब्रह्मादयोऽपि सन्ध्यायां तां ध्यायन्ति जपन्ति च ॥११।१५।१६॥

—देवीभागवत।

गायत्री-मन्त्र का स्वरूप

वैसे तो मन्त्रों के स्वरूप के विषय में मन्त्रशास्त्र—'बीजमन्त्र, मन्त्र और मालामन्त्र'—ऐसे तीन भेद करते हुए उनके अक्षरों का स्वरूप-निर्धारण करते हैं, परन्तु गायत्री मन्त्र एक वैदिक मन्त्र होने से चौबीस अक्षरों वाला माना गया है। अतः वह चौबीस अक्षरों की दृष्टि से 'माला-मन्त्र' की कोटि में आता है, तथा अन्तिम अवस्था में फलदायक कहा जा सकता है।[१] किन्तु गायत्री मन्त्र का उपदेश तो प्रत्येक द्विज को बाल्यकाल में दिया जाता है और उसका जप भी तभी से आरम्भ होता है, अतः यह सिद्ध होता है कि गायत्री मन्त्र इन बन्धनों से मुक्त है। इस मन्त्र के अक्षरों की गणना यदि हम करते हैं तो कुल तेईस अक्षर ही होते हैं जिनमें अर्धाक्षरों की गणना नहीं होती। अतः यहां अर्धमात्रा गुरुगम्य है और दुर्गा सप्तशती के—'अर्धमात्रा स्थिता नित्या याऽनुच्चार्या विशेषतः'— इस कथन की पुष्टि भी इसी से होती है। प्रस्तुत मन्त्र के आरम्भ में प्रणव और त्रिव्याहृति का योग रहता हैं। शारदातिलक में सात व्याहृतियों का तथा शिरोमन्त्र का भी निर्देश है, जिसका हम प्राणायाम के अवसर पर जप करते हैं। इस प्रकार गायत्री-मन्त्र की अक्षर संख्या बढ़ जाती है।[२]

ॐ (प्रणव), भूर्भवः स्वः (त्रिव्याहृति), (इन तीन व्याहृतियों के साथ), महः जनः तपः और सत्यं (ये चार व्याहृतियां) और जोड़ देने से सात व्याहृतियां हो जाती हैं। तदनन्तर—तत्० भर्गो० धियो० इन तीन पदों को जोड़कर अन्त में (शिरोमन्त्र) 'ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्' का भी जप किया जाता है।

परमपूज्य स्वामी विद्यारण्यजी महाराज ने इस विषय पर विशेष आगमिक अध्ययन और मनन के आधार पर गायत्री-मन्त्रजप के लिये कुछ नवीन प्रकार बतलाये हैं, तथा उनकी दृढ इच्छा थी कि द्विज-समुदाय इस रहस्य को ज्ञात कर गायत्रीजप करे जिससे उसका अभ्युदय हो। एक समय लेखक के साथ चर्चा करते हुए पूज्य स्वामीजी ने बतलाला था कि—"यद्यपि संन्यासी होने के नाते गायत्री मन्त्रोपदेश आदि का मेरा अधिकार नहीं हैं, तथापि विश्वकल्याण के लिये प्रेरित होकर मैं ऐसा करता हूं। एतदर्थ मुझे नरक में भी जाना पड़े—तो जाऊंगा।" अनेक वर्षों तक पूज्यश्री ने नेपाल में निवास कर मन्त्र-तन्त्र शास्त्रों की खोज की है, एवं स्वयं भी एक उच्च साधक हैं। उनकी आज्ञानुसार गायत्री-मन्त्र जप का प्रकार यह है। मन्त्र—

ॐ भूर्भुवः स्वः ॐ ह्रीं तत्० ॐ श्रीं भर्गो० ॐ क्लीं धियो० ॐ नमः। और यदि साधक दीक्षित हो तो बाला, पञ्चदशी के तीन कूट, षोडशी अथवा महाषोडशी के तीन खण्डों के बीजों को

---

१. द्वाविंशत्यक्षरान्मन्त्रा मालामन्त्रा इति स्मृताः।
(तथा) अन्तिमे वयसि प्राहुर्मालामन्त्रान् फलप्रदान्।
—मन्त्रव्याकरण।

२. प्रणवाद्या व्याहृतयः सप्त स्युः सत्पदादिकाः।
चतुर्विंशत्यक्षरात्मा गायत्री शिरसाऽन्विता ॥ २ ॥
—शारदातिलक, २१ वां पटल।

संयुक्त करके जप करे। यथा—

ॐभूर्भुवः स्वः ॐ ऐं तत्० ॐ क्लीं भर्गो० ॐ सौः धियो० ॐ नमः। इस जप के साथ ही प्रातःसंन्ध्या भी विशिष्ट रूप से की जानी चाहिए। वर्तमान में सन्ध्या की जो पुस्तकें बाजार में मिलती हैं वे अपूर्णप्राय हैं। किसी में कुछ और किसी में कुछ। होता यह है कि उपासक की भावना डगमगाने लगती है और वह किंकर्तव्य-विमूढ बन जाता है। वास्तविकता तो यह है कि गुरुकृपा से ही यह सब प्राप्त करना चाहिये।

उपर्युक्त गायत्री-मन्त्र का जप प्रातःकाल के लिये १२ बजे से पूर्व करना हितावह है। मध्याह्न में इसका क्रम परिवर्तित होकर २-३-१ क्रम से पद जोड़कर जप करना चाहिये। सायंकालीन जप में ३-२-१ क्रम से पद जोड़कर जप किया जाए। इसमें आदि का ॐकार तथा त्रिव्याहृति और अन्त में ॐ नमः पद यथावत् ही रहेंगे। 'गायत्रीं त्र्यक्षरां बालां' इत्यादि ध्यान-पद इस स्वरूप का संकेतक है। ब्रह्मचर्यावस्था में प्रातःकालीन मन्त्र, युवावस्था में मध्याह्न-जाप्यमन्त्र एवं वृद्धावस्था में सायंकालीन जाप्यमन्त्र अधिक फलदायी है।

इसके अतिरिक्त पञ्चप्रणवा-गायत्री का जप भी प्रसिद्ध है। इस प्रकार के प्रयोगों के सम्बन्ध में कुछ विद्वानों का यह कथन है कि "ये तान्त्रिक प्रयोगानुकूल जप-विधियां हैं अतः इनका प्रयोग सर्वसाधारण के लिये उपादेय नहीं है।" किन्तु उनके प्रति हमारा यह निवेदन है कि आगम और वेद के सामञ्जस्य से ही उपासना का मार्ग प्रशस्त होता है। बिना आगम-तन्त्र के सामान्य पूजादि कर्म भी अवैदिक हो जाएंगे। और वास्तविकता तो यह है कि हमारे प्राचीन महर्षियों ने भी इस प्रकार के प्रयोगों को कभी हेय नहीं बतलाया है तथा ऐसा करने से तात्कालिक लाभ भी होता है, अनेक उपासक इस जप द्वारा आज सुखी और सम्पन्न हैं, अतः ऐसा करने में कोई दोष नहीं है, ऐसा हम मानते हैं। समस्त वेदादि शास्त्रों का सार गायत्री-मन्त्र में विराजमान होने से यह सर्वोपरि मन्त्र है, तथा इसकी ऐसी महिमा के कारण ही शास्त्रों में कहा गया है कि—

> कुर्यादन्यन्न वा कुर्यादनुष्ठानादिकं तथा।
> गायत्रीमात्रनिष्ठस्तु कृतकृत्यो भवेद् द्विजः॥१३॥
>
> —कूर्मपुराण

गायत्री-मन्त्र की उपासना

सृष्टि के आरम्भ से ही गायत्री-मन्त्र की उपासना आरम्भ हो जाने से तथा बड़े-बड़े महर्षियों के भी इसकी उपासना में तल्लीन रहने से इस मन्त्र की साधना अत्यन्त व्यापक बन गई है। आज तक गायत्री उपासना के सम्बन्ध में सैंकड़ों ग्रन्थ लिखे गये हैं और उनमें लिखे गये विधि-विधानों की संख्या किसी भी अन्य मन्त्र की अपेक्षा कई गुना अधिक है। विश्वामित्र, जमदग्नि, भरद्वाज, गौतम, अत्रि, वशिष्ठ और कश्यप जैसे दिव्य महर्षियों ने जिसकी उपासना में अपनी पूरी आयु बिता दी हो, उसके विधान में न्यूनता कैसे रह सकती है?

सामान्य रूप से गायत्री उपासना के दो अंग माने जा सकते हैं। १-नित्य-कर्माङ्ग,

जिसमें गायत्री जप अत्यावश्यक हैं और इस जप का कोई फल तो नहीं मिलता, किन्तु वैसे नहीं किया जाता है तो प्रायश्चित्त अवश्य लगता है। इसी लिये "करणे फलाभावोऽकरणे प्रत्यवायः" यह नित्यकर्म का सिद्धान्त है और दूसरा अंग है २-काम्यकर्म। इसमें हम अपने इष्टकार्य की सिद्धि के लिये गायत्री की उपासना करके उसे प्राप्त कर सकते हैं। इस प्रकार गायत्री-मन्त्र अन्य मन्त्रों की समानता में आ जाता है। इन दो अंगों के अतिरिक्त इस मन्त्र की एक विशेषता और है कि हम जब किन्हीं अन्य काम्यकर्मों की साधना के लिए तत्पर होते हैं तब उससे भी कायिक, वाचिक और मानसिक तैयारी के लिये पहले गायत्री-मन्त्र के जप का विधान है, जिससे साधक की उपासना-सम्बन्धी योग्यता बढ़ती है। यदि ऐसा नहीं किया जाए तो शास्त्रकारों के कथनानुसार निष्फलता मिलती है।

ऐसी भिन्न-भिन्न उपासनाओं में साधकों को वैदिक अथवा तान्त्रिक पद्धति का अथवा तो दोनों पद्धतियों के मिश्रित रूप का आश्रय लेना पड़ता है। शुद्ध वैदिक उपासना में प्रातः सन्ध्यावन्दनादि कर्म कर लेने के पश्चात् पुरश्चरणादि के संकल्पानुसार दैनिक जप करना चाहिये तथा गायत्री देवी के ध्यानावाहनादि षोडशोपचार पूजन आदि कर्म करने चाहिये। यहां पुरश्चरण के सम्बन्ध में कुछ स्पष्टता इस प्रकार की जा सकती है—

पुरश्चरण शब्द की रचना पुरः (अर्थात् आगे) तथा चरण (अर्थात् चलना) इन दो शब्दों के द्वारा हुई है। साधना के लिये आगे बढ़ने में कुछ क्रियाएँ की जांय तो सरलता से सिद्धि मिल सकती है। चलने की क्रिया में गति, आगति और स्थिति ये तीन बातें आवश्यक होती हैं। पुरश्चरण में भी इन तीनों की आवश्यकता रहती है। गति में जो दोषों की आगति को रोक कर उचित शक्ति को प्रस्फुटित करने के लिये योग्य स्थिति चाहता है उसे पुरश्चरण अवश्य करना चाहिये। इस पुरश्चरण में (१) नित्यकर्म स्नानादि, (२) सन्ध्या, (३) गायत्री-पूजन (जिसमें प्रधान अंग पूजा, कवच, न्यास, ध्यान, स्तोत्रपाठ आदि आते हैं), (४) शाप-मोचन, (५)जप, (६) दशांश-हवन, (७) तर्पण, (८) मार्जन, (९) ब्राह्मण-भोजन और (१०) विसर्जन आदि क्रियाओं का विभाजन हो सकता है।[१] पुरश्चरण में प्रायः सवा लाख जप किया जाता हैं और विशेष में मन्त्राक्षरों की संख्या के अनुसार प्रत्यक्षरलक्ष जप करना चाहिये।

गायत्री की तान्त्रिक उपासना

तान्त्रिक उपासना में प्रयुक्त तन्त्र शब्द के सम्बन्ध में बहुत से लोगों की धारणा है कि वह कोई मलिन विद्या है अथवा तो किसी प्रकार के जादू, जन्तर-मंतर, टोना अथवा श्मशान-साधन की विद्या है। किन्तु यह केवल भ्रम है। शास्त्रों में 'तन्त्र' शब्द की व्याख्या वेद के अर्थ

---

१. पूजा त्रैकालिकी नित्यं, जपस्तर्पणमेव च। होमं ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते ॥
—कुलार्णवतन्त्र।

में ही की गई है[1] तथा शास्त्रों के विविध विस्तार को तन्त्र की संज्ञा दी गई है। अतः गायत्री की तान्त्रिक उपासना में भी मन्त्र-विज्ञान में प्रदर्शित मार्ग का ही विस्तार मानना चाहिये। स्वामी प्रत्यगात्मानन्दजी ने अधिक स्पष्ट करते हुये बतलाया है कि तन्त्रविधान में मन्त्र मुख्य-मन्त्री है और मन्त्र के चैतन्य के लिये तथा समर्थ विनियोग के लिये यन्त्रों की भी विशेष आवश्यकता रहती है।[2] गायत्री की यान्त्रिक उपासना में उपयोगी विषयों की विचारणा इस प्रकार है—

१- **आकृति**— आराधना में मन की एकाग्रता के लिये उपास्य देव की आकृति हो तो उससे साधना में सरलता आ जाती है। उस आकृतिके लिये हम निराकार और साकार स्वरूप का निर्धारण कर सकते हैं। निराकार स्वरूप में केवल तेजोमय शक्ति का चिन्तन होता है, जब कि साकार चिन्तन में—

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम्।
गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गदां, शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे॥

इस पद्य के सन्दर्भ का आश्रय उपयुक्त होता है। यदि यन्त्रमय स्वरूप का चिन्तन करना हो तो मध्य में त्रिकोण, उससे बाहर षट्कोण, उसके बाहर वलय, पुनः अष्टदल कमल तथा उसके भी बाहर वलययुक्त अट्ठाईस दलों वाले कमल की रचना करके उसमें शास्त्रोक्त पद्धति से मन्त्राक्षर लिखें। इस प्रकार तैयार बने हुए यन्त्र की प्राण-प्रतिष्ठा करके आराधना करनी चाहिये तथा यन्त्र की आवरण पूजा भी नित्य करनी चाहिये।

२- **ध्यान**— गायत्री का ध्यान करते समय गायत्री मन्त्र के वर्ण का ध्यान और उसकी शक्तियों का ध्यान किया जाता है। वर्णध्यान में 'गायत्री-पञ्चाङ्ग' आदि ग्रन्थों में सूचित पद्यों का अवलम्बन लेना चाहिये। उदाहरण के रूप में तत् पद का ध्यान इस प्रकार है—

तत्कारं चम्पकापीतं ब्रह्म-विष्णु शिवात्मकम्।
शतपत्रासनारूढं ध्यायेत् सुस्थान-संस्थितम्॥

चम्पे के पुष्प जैसे पीत, ब्रह्मा, विष्णु और महेशरूपी कमल पर विराजमान ऐसे 'तत्' पद का ध्यान करना चाहिये। यदि गायत्री देवी की शक्तियों का ध्यान करना हो तो ऊपर दिखलाये हुए पद्य के आधार पर तथा—

पञ्चवक्त्रां दशभुजां सूर्यकोटिसमप्रभाम्।
सावित्रीं ब्रह्मवरदां चन्द्रकोटि-सुशीतलाम्॥

---

१. श्रुतिश्च द्विविधा—वैदिकी तान्त्रिकी च। इति तन्त्राणामपि श्रुतिरिति व्यवहारः— (हारीतधर्मशास्त्र)। वैदिकी तान्त्रिकी चैव द्विविधा कीर्तिता श्रुतिः।
—कुल्लूकभट्ट, मनुस्मृति टीका।

२. तन्त्रविधानेषु मन्त्रस्य मुख्यमन्त्रस्य मन्त्राणां वा चैतन्योद्बोधनाय समर्थविनियोगाय च यन्त्राणामपि सविशेष उपयोगः।
(अध्यक्षीय भाषण, तन्त्रसम्मेलन, वाराणसी)

त्रिनेत्रां सितवक्त्रां च मुक्ताहार-विराजिताम् ।
वराभयाङ्कुशकशा-हेमपद्माक्षमालिकाम् ॥
शङ्खचक्राब्जयुगलं कराभ्यां दधतीं पराम् ।
सितपङ्कज-संस्थां च हंसारूढां सुखस्मिताम् ॥
ध्यात्वैवं मानसाम्भोजे गायत्रीकवचं पठेत् ।

इस प्रकार ध्यान किया जा सकता है। वैदिक सन्ध्या के अनुसार त्रिकाल सन्ध्या में गायत्री के तीन स्वरूप माने गये हैं। उनमें प्रातः ब्रह्माणी, मध्याह्न में रुद्राणी और सायंकाल लक्ष्मी का स्वरूप होता है। इनके स्वरूप-परिवर्तन के साथ ही वेद, गोत्र, वसन, आभरण, वाहन आदि भी बदल जाते हैं, यह ध्यान में रखना चाहिये।

३- **कवच**— साधक को आत्मरक्षा के लिये कवच का पाठ करना चाहिये और यह कवच साधक के अंगों पर भगवती की शक्तियों द्वारा आच्छादन बन जाता है ऐसी भावना रखनी चाहिये। यह कवच भी तीन प्रकार का होता हैं, पद-शक्तिमय, अक्षर-शक्तिमय तथा नाम-शक्तिमय। जैसे कि—

१— तत्पदं पातु मे पादौ जङ्घे मे सवितुः पदम् ।
वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च ॥

२— तद्वर्णं पातु मे मूर्द्धनि सकारः पातु भालकम् ।
चक्षुषी मे विकारस्तु श्रोत्रे रक्षेत् तुकारकः ॥

३— गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ।
ब्रह्मविद्या च मे पश्चादुत्तरे मां सरस्वती ॥

इन पद्यों का पाठ करते समय सूचित अंगों पर हस्तस्पर्श करना अथवा तत्सम्बन्धी भावना से भी उचितविधि पूर्ण की जाती है। आचार्यों ने कवच के अन्य प्रकार भी प्रस्तुत किये हैं, परन्तु विस्तारभय से यहां वे नहीं दिये जा रहे हैं।

४- **न्यास**— मानसिक दृढ़ता और विचारपुष्टि के लिये गायत्री-न्यास की भी आवश्यकता है, वह भी पदमय, अक्षरमय, तथा नाममय आदि भेदों में, अंगन्यास, करन्यास, शरीर-न्यास आदि रूपों में प्राप्त होता है।

५- **स्तोत्र**— उपास्य देवता की अपूर्व महिमा के वास्तविक स्वरूप को प्रस्तुत करने वाले तथा विविध छन्द, अलङ्कार और कथानकों से अङ्कित असंख्य स्तोत्र गायत्री देवी के लिखे गये है। उनमें से एक-दो स्तोत्रों का अपने समय की अनुकूलता के अनुसार नित्य पाठ करना चाहिये।[1]

---

१. लेखक ने एक 'गायत्री-लहरी' ग्रन्थ का निर्माण किया है—जिसमें अनेक विषयों का समावेश द्रष्टव्य है। यह 'गायत्री-रहस्य दर्पण' में प्रकाशित है।

६- **शापविमोचन**— पुराणों में गायत्री के शाप से सम्बन्धित दो कथाएँ इस प्रकार मिलती हैं —

(१)—ब्रह्माजी की प्रथम पत्नी सावित्री पति की आज्ञा होने पर भी एक यज्ञ में सम्मिलित नहीं हुई, तब द्वितीय पत्नी गायत्री ने पति की आज्ञानुसार उस यज्ञ में पूर्ण सहयोग दिया, जिससे असन्तुष्ट होकर सावित्री ने गायत्री को शाप दिया कि 'तेरी शक्ति नष्ट हो जाएगी।' बाद में देवताओं के अनुनय-विनय से सावित्री ने शापोद्धार मन्त्र दिया।

२—एक समय ब्रह्मा, वसिष्ठ और विश्वामित्र इन तीनों ने अपनीअपनी स्वतन्त्र सृष्टि चलाने के लिये गायत्री की उपासना की तथापि गायत्री ने उनको सृष्टिनिर्माण-शक्ति प्रदान नहीं की, इससे रुष्ट होकर उसको शाप दिया, जिसका निस्तार देवताओं के अनुनय से शाप-विमोचन-मन्त्र द्वारा बतलाया।

इस प्रकार शापविमोचन में—यम, वरुण, कश्यप, अंगिरा, ब्रह्मा, वसिष्ठ, नकुली और विश्वामित्र के शापविमोचन का अधिक महत्त्व है, जिसे गायत्री-पञ्चाङ्ग, आह्निकसूत्रावली एवं अन्य ग्रन्थों से जानना चाहिये। यदि वैसा न हो सके तो जप से पूर्व निम्नलिखित मन्त्र का जप किया जा सकता है—

ॐ यद् ब्रह्मेति ब्रह्मविदो विदुस्त्वां पश्यन्ति धीराः सुमनसो वा गायत्री त्वं ब्रह्मशापाद् विमुक्ता भव।

७- **हवन**— हवन की विधि प्रायः प्रसिद्ध है, जो जप संख्या के दशांश के रूप में की जाती है।

८-९-१०-तर्पण, मार्जन, एवं ब्राह्मणभोजनादि— ये विधियां भी दशांश के आधार पर अवरोह क्रम से सम्पन्न की जाती हैं।

११- **मुद्रा**— गायत्रीजप से पूर्व तथा अन्त में कतिपय मुद्राओं के प्रदर्शन का भी विधान है। कहीं-कहीं तो यह भी कहा गया है कि—जो मुद्राएँ नहीं जानता है उसका गायत्री-जप ही निष्फल होता है। मुद्रा शब्द का शाब्दिक अर्थ है—मोद-प्रदान। लौकिक दृष्टि से यदि हम मुख से केवल 'नमस्कार' कह देते हैं और दोनों हाथ जोड़ कर नमस्कार-मुद्रा न दिखायें तो वह दम्भ ही कहा जाएगा। इसी प्रकार आराध्य के समक्ष मुद्रादर्शन का विधान समझना चाहिये। यह देवताओं को प्रसन्न करती है और असुरों का द्रावण अर्थात् विनाश करती है। अथवा विघ्न-समूहों का मुद्रण इनके प्रदर्शन से होता है और ये देवताओं की सान्निध्यकारक हैं। अतः अर्चन, जप, ध्यान आदि के समय मुद्राओं को दिखाना आवश्यक है। गायत्री जप में सुमुख-सम्पुटादि २४ मुद्राएँ जप से पूर्व एवं सुरभि-ज्ञानादि आठ मुद्राएँ जपान्त में दिखाई जाती हैं, जो सर्वत्र प्रसिद्ध हैं।

अन्य उपाङ्ग— गायत्री की साधना का विस्तार अतिविस्तृत होने से इसमें **अष्टोत्तर-शतनाम, सहस्रनाम, गायत्रीहृदय, गायत्रीकवच, गायत्री-पञ्जर, गायत्री आग्नेयास्त्र, गायत्री-रामायण और गायत्री-योग, गायत्र्यक्षर नामावली** आदि के पाठ का भी विधान है।

'गायत्री' नाम की महत्ता

गायत्री मन्त्र की इतनी महत्ता होने से वैदिक और जैन-बौद्धादि अन्य धर्म-सम्प्रदायों में भी अनेक गायत्री मन्त्रों का प्रचलन हुआ है। गायत्री के २४ अक्षरों में २४देवताओं का निवास इस प्रकार है १-गणेश, २-नृसिंह, ३-विष्णु, ४-शिव, ५-कृष्ण, ६-राधा, ७-लक्ष्मी, ८-अग्नि, ९-इन्द्र, १०-सरस्वती, ११-दुर्गा, १२-हनुमान्, १३-पृथ्वी, १४-सूर्य, १५-राम, १६-सीता, १७-चन्द्र, १८-यम, १९-ब्रह्मा, २०-वरुण, २१-नारायण, २२-हयग्रीव २३-हंस और २४-तुलसी।

इन देवी देवताओं के भिन्न-भिन्न गायत्री-मन्त्र भी उपलब्ध होते है। यथा—'एकदन्ताय विद्महे, वक्रतुण्डाय धीमहि, तन्नो दन्ती प्रचोदयात्।' इस प्रकार सभी देवों के गायत्री मन्त्र में तीन पद होते हैं जिनमें विद्महे, धीमहि और प्रचोदयात्, पदों का समावेश अवश्य आता है। जैनगायत्री, पद्मावती-गायत्री, भैरवगायत्री आदि की रचना भी इसी आधार पर हुई है। श्रीविद्या के पञ्चदशी और षोडशी मन्त्रों के अर्थ भी गायत्री मन्त्र जैसे ही हैं।[1] अतः यह स्पष्ट है कि गायत्री मन्त्र की महत्ता कितनी विशद और विश्वव्यापी है।

१—सन्ध्या एवं गायत्री-मन्त्र-विषयक कुछ ज्ञातव्य

(क) यथोचित काल में यदि सन्ध्या नहीं की जा सके तो **'प्रत्यङ्गिरा-सूत्रकार'** ने एक व्यवस्था दी है, जिसका निर्देश श्रीशङ्कराचार्य-प्रणीत **'गायत्री-पुरश्चरण-पद्धति'** में किया गया है। सूत्रकार का कथन है कि सन्ध्या का काललोप होने पर अथवा अशक्ति की स्थिति में उन-उन कालों में मानसिक रूप से इस मन्त्र का यथाशक्ति जप करें—

"ॐ ऐं ह्रीं श्रीं परमदुष्करकर्मच्छेदिन्यघोरे वरदे विच्चे माये त्रैलोक्यरूप-सहस्रपरिवर्तिनि मातृगणे क्लूं श्रीं ह्रीं ऐं ॐ॥

इस प्रकार जप करने से सन्ध्या करने के फल की सिद्धि होती है।

(ख) अन्य आचार्यों का कथन है कि—

सन्ध्याकाले व्यतिक्रान्ते जपं कुर्यात् पुनर्म्मनः।
ऋचं वाचं त्र्यृचं जप्त्वा कालदोषो न विद्यते॥

१- गायत्री का सूक्ष्मरूप पञ्चदशी और षोडशी श्रीविद्या है। **'त्रिपुरोपनिषद्'** और **'वरिवस्या-रहस्य'** आदि ग्रन्थों में कहा गया है कि—"गायत्री के दो रूप हैं, स्पष्ट और गोपनीय। चतुर्विंशत्यक्षरात्मक मन्त्र स्पष्ट रूप है और पञ्चदशी के त्रिकूटों में सङ्केतात्मक वर्ण उसके गोपनीय रूप के व्यञ्जक हैं।" श्रीविद्या पञ्चदशी के मन्त्र विभिन्न उपासक १- वरुण, २- धर्मराज, ३- अग्नि, ४- नागराज, ५- वायु, ६- बुध, ७- ईशान, ८- रति, ९- नारायण, १०- ब्रह्मा, ११- जीव, १२- अगस्त्य, १३- लोपामुद्रा, १४- मनु, १५- कुबेर, १६- नन्दी, १७- सूर्य तथा १८- दुर्वासा आदि के भेद से अनेक प्रकार के हैं तथा उनके भी काल-भेद एवं क्रमदीक्षा-भेदों से अनन्तरूप तथा विशिष्ट मन्त्र हैं।

इसके अनुसार अधोदर्शित चार मन्त्रों का जप करने से काललोपजनित दोष नहीं लगता है —

१—ॐ पुनर्म्मनः पुनरायुर्म्मऽआगात् पुनश्चक्षुः पुनः श्रोत्रं म आगात् । पुनः प्राणः पुनरात्मा मऽआगाद् वैश्वानरो ऽ ग्रदब्धस्तनूपा ऽ अग्निर्मा पातु दुरितादवद्यात् ॥

२—ॐ ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये । वागोजः सहौजो मयि प्राणापानौ ॥ (यजु० ३६/१)

३—ॐ यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वाति तृण्णं बृहस्पतिर्म्मे तद्दधातु । शन्नो भवतु भुवनस्य यस्पतिः ॥ (यजु० ३६/२)

४—ॐ (गायत्री-मन्त्र)

(ग) 'कात्यायन, दक्ष एवं व्यास-स्मृतियां और मलमासतत्त्व'-कार के अनुसार १०८ बार गायत्री जप करके सन्ध्या करने से भी काललोपजनित प्रत्यवाय नहीं होता है।

२—पञ्चकालोचित गायत्री ध्यान

(क) प्रातः —ब्रह्माणी चतुराननाऽक्षवलयं कुम्भं करैः स्रुक्स्रुवौ,
बिभ्राणारुणकान्तिरिन्दुवदना ऋग्रूपिणी बालिका।
हंसारोहण-केलिरम्बरमणेर्बिम्बाश्रिता भूतिदा,
गायत्री हृदि भाविता भवतु नः सम्पत्समृद्धयै सदा ॥१॥

(ख) मध्याह्ने —रुद्राणी नवयौवना त्रिनयना वैयाघ्रचर्माम्बरा,
खट्वाङ्गत्रिशिखाक्षसूत्रवलयाभीतिं दधानाऽम्बिका ।
विद्युत्पुञ्जजटाकलापविलसद्बालेन्दुमौलिः सदा,
सावित्री वृषवाहना सिततनुर्ध्येया यजूरूपिणी ॥२॥

(ग) सायाह्ने —वृद्धा नीलघनप्रभापरिलसत्पीताम्बराभूषिता,
दिव्यैराभरणैरथाङ्गकमले शङ्खं गदां बिभ्रती ।
तार्क्ष्य-स्कन्धगता समस्तजगदाराध्या परा वैष्णवी,
ध्येया सैव सरस्वती भगवती सायं स्वरूपा परा ॥३॥

(घ) तुरीयाकाले —मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै—
(अनाख्यायाम्) र्युक्तामिन्दुनिबद्ध-रत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गुणं,
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥४॥

(ङ) भासाकाले —ॐ अधिलोकं यस्य पादौ यस्याधि ज्योतिषं मुखम् ।
अधिधिष्ण्यं पक्षयुगं यस्य पक्षमधि प्रभु ॥

अधिदेवं यस्य गृहं देहं यस्याधिभौतिकम् ।
यस्याः स्वरूपमध्यात्मं तत्स्वरूपं विचिन्तये ।।

ॐ मूर्ध्नि सङ्घाते ब्रह्मा विष्णुर्ललाटे रुद्रो भ्रूमध्ये चक्षुषोश्चन्द्रादित्यौ कर्णयोः शुक्रबृहस्पती नासिके वायुदैवत्यं प्रभातं दोषा उभे सन्ध्ये मुखमग्निर्जिह्वा सरस्वती ग्रीवायां स्वाध्यायाः स्तनयोर्वसवो बाह्वोर्मरुतो हृदयं पर्जन्यमाकाशमपरं नाभिरन्तरिक्षं कटिरिन्द्रियाणि जघनं प्राजापत्यं कैलासमलयावूरू विश्वेदेवा जानुभ्यां जान्वोः कुशिकौ जङ्घयोरयनद्वयं खुराः पितरः पादौ पृथिवी वनस्पतिर्गुल्फौ रोमाणि मुहूर्तास्ते विग्रहाः केतु-मासर्तवः सन्ध्याकाल-त्रयाच्छादनं संवत्सरो निमिषोऽहोरात्रादित्यश्चन्द्रमाः ।

सहस्रपरमां देवीं शतमध्यां दशापराम् ।
सहस्रनेत्रीं देवीं गायत्रीं शरणमहं प्रपद्ये ।। ॐ नमः ।।५।।

गायत्री और गुह्य-तन्त्र

"शारदातिलक'-के २१ वें पटल में गायत्री-मन्त्र द्वारा विविध तान्त्रिक साधनाओं—जैसे कि-'ग्रह-शान्ति के लिये क्षीरवृक्षों की समिधा द्वारा हवन, सर्वदोष शान्ति के लिये जल द्वारा तर्पण, अभिचार शान्ति के लिये पञ्चगव्य के साथ समिधाओं का हवन, पृथ्वी में गड्ढा खोद कर उसमें त्रिशूल और मन्त्र लिखकर गाड़ने से सर्वविध शान्ति, अभिषेक, स्मृतिवृद्धि, रोग-निवारण, ज्वरनाशन, धनप्राप्ति, मारण, मोहन, उच्चाटनादि'—के प्रयोगों के विस्तृत विधान मिलते हैं। इसी प्रकार अन्य तन्त्रग्रन्थ भी ऐसे ही अनेक विधानों का उल्लेख करते हैं।

उपसंहार

गायत्री मन्त्र की महिमा का जिसने अनुभव किया है उन महापुरुषों में पं० मदन मोहन मालवीय, स्वामी विवेकानन्द, लोकमान्य तिलक, स्वामी दयानन्द सरस्वती, स्वामी राम-तीर्थ, योगी अरविन्द आदि प्रथम कोटि में आते है। पं० मदनमोहन मालवीय ने विश्वविख्यात हिन्दू विश्वविद्यालय की स्थापना से पूर्व चौबीस लक्ष गायत्री का पुरश्चरण करवाया था, जिसके फलस्वरूप आज उसकी महत्ता सर्वत्र व्याप्त है, यह किसी से छिपा नहीं है। तात्पर्य यह कि गायत्री-मन्त्र परम-पवित्र और अखिल आगम-निगमों का सार है। प्रत्येक द्विजाति को इसकी उपासना अवश्य करनी चाहिये।

रुद्रयामलोक्तं

त्रिपदा-गायत्री-स्तोत्रम्[1]

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि गायत्री-तत्त्वमुत्तमम्।
स्तोत्रं मन्त्रमयं देव्याः सर्वतन्त्रेषु गोपितम् ॥१॥

आद्य-पञ्चकमीशानां महापातक-नाशनम्।
पुण्यप्रदं वेदसारं सर्वतत्त्वोत्तमोत्तमम् ॥२॥

परमार्थाभिधस्यास्य स्तोत्रस्यास्ति ऋषिः शिवः।
छन्दोऽनुष्टुप् समाख्यातं त्रिपदा देवता स्मृता ॥३॥

तारं बीजं शिवः शक्तिः खं गं कीलकमीश्वरि।
धर्मार्थकाममोक्षार्थे विनियोग इति स्मृतः ॥४॥

चतुर्भुजां कर्मसहस्त्रकार्थितां त्रिलोचनां हार-किरीट-शोभिताम्।
चतुर्मुखां कामगतां महोज्ज्वलां, विद्येश्वरीं पञ्चमुखीं भजाम्यहम् ॥५॥

विविध-मणि-मयूख-स्फीत-केयूर-हार—
प्रकर-कनककाञ्ची-किङ्किणी-कङ्कणाढ्याम्।
सकल-भुवनरक्षा-सृष्टि-संहार-कर्त्रीं,
परम-निगमविद्यां नौम्यहं वेदधात्रीम् ॥६॥

प्रणवं मनुराजमौलिरत्नं, यदि वेदेश्वरि ! वेदसारभूतम्।
प्रजपेद् हृदये दयासमुद्रं, स भवेद् ब्रह्मविदीश्वरो रविर्वा ॥७॥

---

१. यह स्तोत्र भी मन्त्रादि-तत्त्वगर्भ-स्तोत्र-परम्परा में प्रणीत एक पाण्डुलिपि के आधार पर सम्पादित किया गया है। इसमें कतिपय बीजमन्त्रों के साथ गायत्री-मन्त्र जपने का विधान निर्दिष्ट है। साथ ही उन बीजों के योग से प्राप्त होने वाले फलों का सङ्केत देते हुए यथावश्यक स्थान एवं काल के भी निर्देश किये गये हैं। प्रस्तुत स्तोत्र साहित्य एवं तान्त्रिक दोनों ही दृष्टियों से महत्त्वपूर्ण है। इसकी अन्य पाण्डुलिपियां एवं पूर्ण शुद्ध पाठ मिलने पर और भी स्पष्ट मार्ग-निर्देशन प्राप्त हो सकता है। —सम्पादक

शङ्कां जपेद् योऽत्र विहाय शङ्कां, कङ्कालमालाभरणां निशीथे ।
कृशानु-भानु-प्रभया समानो, विमानचारी स भवेत् समानः ॥८॥

कंबीजमन्तः शिवशक्तिरूपं, त्रिभिर्जपेद् यस्त्रिपदा-स्वरूपम् ।
स कामुकः कामकलाविदग्धो, भवेत् तु रम्भारतभोग-भागी ॥९॥

तार्तीयबीजं तव मन्त्रमध्ये, जपेद् भवानि ! स्मरतत्त्व-चेताः ।
समेतकामान् समवाप्य भूमौ, भवेत् स वै भूप-वधू-जनेन्द्रः ॥१०॥

वाणीं च वानीरतले जपेद् यो, दशायुतं दुर्दशयाऽभिभूतः ।
स वैरिगर्वं समरे निहत्य, भवेद् भवानीतनयो दिवीन्द्रः ॥११॥

स्मरं जपेद् यस्तव मन्त्रबीजं, त्रिलोचने-लोचन-भोगकामी ।
सुलोचना-लोचन - वीक्षण-प्रभा - पीयूषराशीवृतसङ्कुलात्मा ॥१२॥

परां जपेद् यः परमार्थरथ्यां, निर्वाणरथ्यां तव पञ्चवक्त्रे ।
समस्तलोकाधिपतिः पुरेशो, भवेत् परानुग्रहभाजनं सः ॥१३॥

लक्ष्मीं जपेद् यः परवर्गभीतः, श्मशानभूमौ शिववेषधारी ।
तस्यात्र वश्या कमला करस्था, या विष्णुपत्नी कमलाकरस्था ॥१४॥

भीमां जपेद् योऽत्र रतान्तकाले, नितान्तमम्भोजदलं करस्थाम् ।
स भीमरूपारिकुलं निहत्य, प्रान्ते लभेत् कान्तपदं त्रिपाद्याः ॥१५॥

पठेज्जपेद् यः शुचिरर्चनीयां चतुर्भुजां हव्यभुजः स दक्षः ।
स गाणपत्यं प्रणिपत्य देवीं, लक्ष्मीं भवेदीश्वरसिद्धिनाथः ॥१६॥

गायत्री-त्रिविधाक्षरत्रयमिदं वेदार्थ-तत्त्वं परं,
यो ध्यायेद् हृदयारविन्दकुहरे प्रातर्निशीथे तथा ।
चैनाचार-विचारमार्ग-निपुणो वेदान्तसारद्वय—
प्रोद्भूतागमतत्त्ववित् स त्रिपदीधाम स्वयं प्राप्स्यति ॥१७॥

रामायुगं यो गिरियोनिगर्भान्तरे जपेच्चिद्गिरिणा सरम्भया ।
स योनिगम्यो गुरुगर्वहारी, गिरा भवेदिन्द्र-समर्चिताङ्घ्रिकः ॥१८॥

मायां जपेद् यः स्मरसक्तचेता, जटाकिरीटेन्दुकलान्त-बाधः ।
स वैष्णवेन्द्रो ललनाऽथ योनिस्फुरन्मणिः स्यान्नितरां नताङ्घ्रिः ॥१९॥

माबीजमिन्दुस्फुरितोर्ध्वबीजं, जपेन्निशीथे मणिपीठ-संस्थः ।
यो धी-रमातैकपरः ससन्ध्यो, भवेद् धरायां नृपसार्वभौमः ॥२०॥

मायापुटां योऽत्र जपेद् रतादौ, तन्वीमुखासक्तमुखो निशान्ते ।
स लोकपालार्चित-पादपद्मो, भवेज्जगत्यां भुवनाधिनाथः ॥२१॥

वाणीं जपेद् यो जडभावयुक्तो, वेदान्ततत्त्वैकरसो भवानि।
तस्यास्यपद्मे वसतिं विधाय, बिभर्ति वाणी विवशा सभायाम् ॥२२॥

यो वायुपूजां सुरभावतेजाः जपेन्निशीथे शशिखण्डचूडः।
स वायुपूज्यो बलवान् प्रयाति, तद्वायुतल्पं त्रिदिवेन्द्र! सत्यम् ॥२३॥

मन्त्रं मनोऽन्तर्जपति स्मरार्तो, यो वेदमातुर्दिवसावसाने।
वश्योर्वशी तस्य पदारविन्दं, शुश्रूषमाणा भविता भवानि! ॥२४॥

मन्त्रान्तःस्थां ठद्वयीं वै जपेद् यस्तेजोरूपं साधकः साधकेशि!।
तस्यास्ये स्याद् भारती तस्य हस्ते, लक्ष्मीः कुर्याद् दाससाकल्य-कालम् ॥२५॥

भूगेह-वृत्तत्रय-षोडशास्त्र-दिक्कोणयुक्ताग्निविराजमानाम्।
निषेदुषीं शीघ्र-रसाकुलाक्षीं, त्र्यक्षीं त्रिमूर्तिं त्रिपदीं भजामि ॥२६॥

देवि त्रैलोक्यमार्तविविधकुसुमधृक् ध्वस्त-सर्वान्धकारे,
नाना रत्नप्रभाढ्ये त्रिनयन-विलसत्सूर्यचन्द्राग्निरूपे।
पीठेशी-पञ्चवक्त्रे धवलमणिनिभे भासुरे नूपुराढ्ये,
श्रीमन्नीलोत्पलाभे सपदि वरकरे! देवि मातः प्रसीद ॥२७॥

इति स्तोत्रं पुण्यं पर-मनुमयं तत्त्वसहितं,
पठेद् यो गायत्र्या निशि कुजदिने वापि सततम्।
समन्तात् तस्यार्थागम-पुर - पुराणार्थ - सहिता,
गृहे लक्ष्मीः प्रान्ते परपदविधात्री विलसति ॥२८॥

इतीदं देवि! पञ्चाङ्गं सर्वस्वं सारमुत्तमम्।
गायत्र्याः स्तवमीशानि! चतुर्वेद-रहस्यकम् ॥२९॥

अश्रद्धायुतायाभक्ताय, कुशीलाय दुरात्मने।
अदेयं सर्वथा नित्यं, दत्त्वा नियममाप्नुयात् ॥३०॥

शिष्याय भक्तियुक्ताय गुरु-भक्ताय पार्वति।
दीक्षिताय कुलीनाय देयं साधकसत्तमे! ॥३१॥

इतीदं देवि गायत्र्यास्तवोक्तं सरहस्यकम्।
गुह्यं गोप्यं महत्तत्त्वं, गोपनीयं मुमुक्षुभिः ॥३२॥

इति श्रीरुद्रयामले 'गायत्री-रहस्ये' गौरीशङ्करसंवादे

त्रिपदा-गायत्री-स्तोत्रम्।

विश्वामित्रकल्पोक्तः सन्ध्यान्तर्गताचमन-मार्जनार्घ्य—गायत्रीजपादिविचार।

आचमनप्रकारः—

देवतागारमागत्य समाचामेद् यथाविधि।
केशवनारायणमाधवैः पीत्वा जलं त्रिधा॥
करौ गोविन्दविष्णुभ्यां क्षालयेद् मधूसूदन—।
त्रिविक्रमाभ्यामोष्ठौ वामनश्रीधराभ्यां मुखम्॥
हृषीकेशेन हस्तौ च चरणौ पद्मनामतः।
दामोदरेण मूर्धानं प्रोक्ष्य सङ्कर्षणादिकान्॥
मुखादिष्वङ्गुष्ठांगुल्या वेदादिप्रीणने न्यसेत्।
मुखे सङ्कर्षणं वासुदेव—प्रद्युम्नकौ नसौ॥
अनिरुद्धं च पुरुषोत्तममक्षणोः प्रविन्यसेत्।
अधोक्षजं नृसिंहं च कर्णयोर्नाभितोऽच्युतम्॥
जनार्दनं हृदि न्यस्य उपेन्द्रमपि मूर्धनि।
ऊर्ध्वे ज्योतिर्मयं वक्त्रं शिखाकारं तदन्तरे॥
श्रीचक्रराजचिह्नं तु परब्रह्मात्मकं विभुम्।
अंसयोश्च हरिं कृष्णं वैष्णवाचमनं त्विदम्।
केशवादि-चतुर्थ्यन्ता नमोन्ताः प्रणवादिकाः॥

मार्जनम्—

पादं पानं क्षिपेन्मूर्घ्नि प्रतिप्रणवसम्पुटम्।
निक्षिपेदष्टपादं तु अधो यस्य क्षयाय च॥
अष्टाक्षरं नव-पदं पदादौ ब्रह्महा भवेत्।
आदौ यो मार्जनं कुर्यात् सोश्वमेधफलं लभेत्॥
यस्य क्षयायपादं तु आपः सिन्धुत्वमेव च।
भूमौ पादौ विनिक्षिप्य इतरन्मूर्घ्नि विन्यसेत्॥

अर्घ्यम्—

सन्ध्यावन्दनवेलायामर्घ्यं दद्यात्त्रयं बुधः।
सायं प्रातः समानं स्यान्मध्याह्ने च पृथग् विधिः॥

एकं मध्याह्नकाले तु सायं प्रातस्त्रयस्त्रयः।
एवं ज्ञात्वा सृजेदर्घ्यं सूर्यं नक्षत्रपूर्वकम्॥
एकं शस्त्रास्त्रनाशाय एकं हनन-नाशने।
असुराणां वधायार्घ्यं प्रायश्चित्तार्घ्यसंयुतम्॥
दद्यात् केवलगायत्र्या मूढो ह्यर्घ्यं तु यो द्विजः।
स बिन्दुब्राह्मणो नाम सर्वधर्मबहिष्कृतः॥
ब्रह्मास्त्रं नाभिजानाति स विप्रः शूद्र एव हि।
तस्य कर्मादिकं जातं धर्माद्यं निष्फलं भवेत्॥
बीजमन्त्रेण गायत्र्या प्रणवेत्यभिधीयते।
देहस्तु दण्ड इत्युक्तः संज्ञा कवचमेव हि॥
सर्वाङ्गानि पदो मन्त्रं सर्वमन्त्रे त्वयं विधिः।
अस्त्राष्टवारतः प्रोक्ता गायत्री व्याप्य उच्यते॥
एतत् षण्मन्त्रकं ज्ञात्वा अर्घ्यं दद्याद्धि नामतः।
अर्घ्यत्रय—प्रयोगार्थं प्रायश्चित्तं चतुर्थकम्।
सायं प्रातर्द्विजादीनामेवमेव विधिः क्रमात्॥
ब्रह्मास्त्रं ब्रह्मदण्डं च ब्रह्मशीर्षं च संयुतम्।
अर्घ्यत्रयं प्रयोगार्थमेवमेवमुदाहृतम्॥
शस्त्रमादौ ततो दण्डं शिखास्त्रीणि समुच्चरेत्।
पर्यायेण त्रिरुच्चार्यमञ्जलिं च त्रिधा हरेत्॥
अर्घ्यत्रयं प्रयोक्तव्यमभिमन्त्रितमञ्जलिम्।
त्रियुक्तं विसृजेदर्घ्यमसुराणां वधाय च॥
अस्त्रदण्डशिरोयुवतमर्घ्यमेकं समुच्चरेत्।
अस्त्रं वाहनरक्षोघ्नमेकाञ्जलि जलं क्षिपेत्॥
प्रायश्चित्तं द्वितीयार्घ्यमसुराणां वधाय च।
प्रदक्षिणं पृथिव्यां च सर्वपापैः प्रमुच्यते॥

गायत्री-जपप्रकारः—

ॐकारं पूर्वमुच्चार्य भूर्भुवःस्वस्तथैव च।
गायत्रीं प्रणवान्तां च मध्ये त्रिप्रणवां तथा॥
एवं नित्यजपं कुर्य्याद् ब्राह्मणो विप्रपुङ्गवः।
भिन्नपादा तु गायत्री ब्रह्महत्या—प्रणाशिनी॥
अभिन्नपादा गायत्री ब्रह्महत्यां प्रयच्छति॥
अच्छिन्नपाद—गायत्रीजपं कुर्वन्ति ये द्विजाः।
अधोमुखाश्च तिष्ठन्ति कल्पकोटिशतानि च॥

धर्मशास्त्र—पुराणेषु इतिहासे च सुव्रत ।
पञ्च—प्रणव—संयुक्तां जपेदित्यनुशासनम् ।।

जपसंख्याष्टभागान्ते पादो जाप्यस्तुरीयकः ।
स द्विजः परमो ज्ञेयः परं सायुज्यमाप्नुयात् ।।

प्रातः केवलगायत्री मध्याह्ने व्याहृतीयुता ।
सायाह्ने तुर्यया युक्ता नित्यं जाप्यं समाचरेत् ।।

पादादौ रेफसंयुक्ता गायत्री—जप लक्षणम् ।

पादत्रयं समुच्चार्य प्रतिलोमं ततश्चरेत् ।
रेफ-बिन्दू तदाद्यन्तौ गायत्री—जपमाचरेत् ।।

गायत्रीं पूर्वमुच्चार्य तुर्य्यान्त्यादि-विलोमतः ।
सायं सन्ध्यां जपेदेवं साधक सर्वसिद्धये ।।
तकारादि यकारान्तमनुलोमं विलोमतः ।
तुर्य्यपादं विना मन्त्रं प्रातः सन्ध्यामथाचरेत् ।।
भकारादिहिकारान्तं मध्यपादमिति स्मृतम् ।
तार्तीयं तु प्रयोक्तव्यं तदर्घ्यं प्रथमं भवेत् ।।
धकारादि यकारान्तं तृतीयं पादमुच्चरेत् ।
प्रथमं च द्वितीयं च त्रिविधं जपलक्षणम् ।।
कालत्रयं त्रिधा जाप्यं त्रिकालं त्रिविधं स्मृतम् ।
अनुलोम-विलोमाभ्यां चिरं सिद्धिमवाप्नुयात् ।।
चतुर्विंशतिवर्णानामनुलोमं जपेदपि ।
पूर्णजाप्यफलं नास्ति अर्धजाप्यफलं लभेत् ।।
चतुष्पादं तु गायत्र्या अनुलोम-विलोमतः ।
नित्यं जाप्यं प्रकुर्वीत भुक्तिमुक्ती लभेन्नरः ।।
नित्यनैमित्तककाम्यादि-व्यस्ताव्यस्तं जपेन्मनुम् ।
प्रातर्मध्याह्न—सायाह्ने जपेदेवं क्रमेण तु ।।
जपपारायणं कुर्यात् त्रिपदा-सम्पुटं नव ।
एवं ज्ञात्वा जपेन्नित्यमेककोटिगुणं भवेत् ।।
कालत्रयं यथोक्तं च जाप्यपारायणं परम् ।
अनन्तफलमाप्नोति सत्यं सत्यं न संशयः ।।
वरेण्यं विरलं चोक्त्वा जपकाले विशेषतः ।
पारायणेषु युक्तं स्यादन्यथा विफला भवेत् ।।

धात्वर्थ-विवेचनम्

—पं० श्रीदेवीकान्तमिश्रः

धर्म एवाभ्युदयं निर्वाणं च साधयतीति यतोऽभ्युदयनिःश्रेयससिद्धिस्स धर्म इत्यनेन प्रतीयते। तस्य धर्मस्य मूलं वेदः षडङ्गत्वं भजत इति षडङ्गो वेद उच्यते षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यादिवचनैर्निश्चीयते च। षडङ्गेषु व्याकरणस्य प्राधान्यं मुखमिव प्रधानत्वान्मुख्यमिति पतञ्जलिवचसाऽवगम्यते। शब्दानुशासनं व्याकरणमष्टविधमिति विचिन्तका आमनन्ति। अष्टस्वपि व्याकरणेषु पाणिनीयं व्याकरणन्न केवलं शब्दाननुशास्त्यपि तु **'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारक'** मिति प्राचीनोक्तदिशा सर्वाणि शास्त्राणि समुपकरोति।

शब्दानुशासनम् = सूत्रपाठः, धातुपाठः, गणपाठः = प्रातिपदिकपाठः, उणादिपाठः, लिङ्गानुशासनमिति पञ्चाङ्गं व्याकरणमपवर्गस्य द्वारं वाङ्मयानाञ्चिकित्सकञ्च वरीवर्ति। मुख्यं शब्दानुशासनमुपकुर्वन्त्यवशिष्टानि चत्वार्यङ्गानि।

उपसर्गस्य निपाते तस्य चाव्ययेऽन्तर्भावं विधाय नामाख्यातोपसर्गनिपाताख्याश्चतुर्विधा निरुक्तौ यास्कोक्ताः शब्दाः नामाख्याताव्ययभेदैस्त्रिविधत्वं बिभ्रति पाणिनीयव्याकरणे। शब्दाः धातुजा इति **"धातुजन्नाम"** इति भाष्यादध्यवसीयते। तत्र धातुः दधाति शब्दस्वरूपं य इति विग्रहे धारणपोषणार्थकात् "डुधाञ्" इत्यस्मात् धातोः **'सितनिगमिमसिसच्यविधाञ्-क्रुशिभ्यस्तु'**न्नित्युणादिसूत्रेण कर्तरि तुनि कृते व्युत्पाद्यते यश्शब्दः धातुपदवाच्यतामर्हति यो नामविभक्त्याद्युक्तो नाम्ना व्यवह्रियते आख्यातविभक्तिसहितः क्रियां व्यनक्ति क्वचन च तदुभयविध-विभक्तिरहितः स्वार्थमात्रमभिदधातीति "धातुजन्नाम" इति भाष्यवचनाज्ज्ञायते। धात्वर्थ एव सर्वपदमूलप्रकृतिरिति विनिश्चित्य धातुजाश्शब्दा भवन्तीत्यामनन्ति शाब्दिकाः। अत्र सर्वत्र सूत्रेष्वन्तिमवर्णचतुष्टयम्। 'धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये' इत्यत्र धात्वर्थम् = धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थमिति नागेशोक्तिरपि प्रामाण्यमाकलयत्युक्तार्थे।

तत्र कस्तावद् धातुस्तदर्थश्च इति स्वाभाविकजिज्ञासायां जायमानायामुच्यते— **"भूवादयो धातव"** इति सूत्रयता पाणिनिना संज्ञारूपेण व्यवहृतोऽयं धातुशब्दः। द्विविधा खलु संज्ञा दृश्यते, प्रथमाऽन्वर्थसंज्ञा तदपरा च कार्यनिर्वाहक-संज्ञा। या संज्ञिनां समूलमर्थमनुगच्छति सा संयोगसंज्ञानुनासिकसंज्ञा धातुसंज्ञा प्रातिपदिकादि-संज्ञारूपेण व्यवह्रियमाणा महासंज्ञापर्यायान्वर्थसंज्ञा। या च पुनः केवलं कार्यमेव निर्वहति सा लघुसंज्ञापर्याया कार्यनिर्वाहिका संज्ञा। यथा टिसंज्ञा घु-संज्ञा भसंज्ञेति। **'प्रथमा निर्दिष्टं समास उपसर्जन'**मिति सूत्रव्याख्यावसरे शब्द-

कौस्तुभे श्रीभट्टोजिदीक्षितैरभिहितं यन्महासंज्ञाकरणमन्वर्थलाभार्थम्। किन्त्वर्थवत्सूत्रव्याख्यावसरे महासंज्ञाकरणं प्राचामनुरोधेनेति दीक्षितस्यैव वचसा **'रजकाय वस्त्रं ददाति, खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति** प्रयोगमनुसृत्य च सम्प्रदानसंज्ञा-व्याख्याने **"नान्वर्थतायामाग्रहः"** इति महाभाष्यकारस्योक्त्या च प्रतिपादयितुं पार्यते यत्क्व चनान्वर्थलाभः क्वचिच्च कार्यनिर्वाहकसंज्ञारूपलघुसंज्ञालाभः।

तस्य धातुशब्दस्य प्रयोगः ऋग्वेदे **"स नः स्तुतो वीरवद्धातुगोमात्"** इत्यष्टममन्त्रे क्रुरोत्यर्थे विराजते। **'अन्त्यं हविः सचते सच्च धातु चारिष्टगातु'**रिति पञ्चम-मण्डलस्थ-मन्त्रघटकधातुशब्दस्य धातुः=धारकमिति भाष्यं कुर्वता सायणाचार्येण धारणकर्तृत्वमेवावधारितम्। **'रपद् गन्धर्वीरप्या······आदितिर्निधातु'** रिति दशममण्डलीयमन्त्रे धातुशब्दस्स्थापनार्थे सायणेन व्याख्यातः। अतः समन्वयात्मकदृष्ट्या धारकत्वं कर्तृत्वं स्थापनकर्तृत्वं क्रियापरकत्वम्वा धातुत्वमिति निश्चेतुं शक्यते। **"तदाख्यातं येन भावं स धातुः"**रिति ऋक्प्रातिशाख्यसूत्रपर्यालोचनेनावगम्यते यद् भाववाचकता यत्र तिष्ठति स धातुः। **"उपसर्गस्य धाता वेकाक्षरे नामभूते"** इति सामप्रातिशाख्ये धातुशब्दः क्रियावाचक एव सुरक्षितः। मन्ये सर्वमेतदालोच्यैव व्याकरणसम्प्रदायेऽबाधगत्या प्रवाहितः क्रियावाचकतामापन्नो धातुशब्दो महर्षिपाणिनिना भूवादयो धातव इति सूत्रेऽन्वर्थसंज्ञारूपेण समाविष्टः।

भूश्च वाश्चेति भूवौ, आदिश्चादिश्चेत्यादी, भूवौ आदी येषान्ते भूवादयः। एक आदिशब्दो व्यवस्थावाची, अपरश्च प्रकारवाची, भूशब्देन सम्बद्ध आदिशब्दो व्यवस्थावाची, वाशब्देन सम्बद्ध आदिशब्दश्च प्रकारवाची, अर्थात्सदृशवाची तथा च भूप्रभृतयो वा सदृशाः धातवः इति भूवादिसूत्रार्थः निष्पद्यते। अत्र भूसाहचर्याद्वाशब्दोऽनव्ययमेव गृह्यते वाशब्दसाहचर्याच्च भूशब्दोऽसत्त्ववाचीति परस्परसाहचर्यात् तादृशः क्रियावाच्येव सम्भवतीति क्रियावाचिन इति लाभाय विशिष्टा वृत्तिरङ्गीक्रियते। क्रियावाचकत्वेन सादृश्यग्रहणे प्रमाणाभावस्तु न शङ्क्यः, चन्द्रवन्मुखमित्यत्र मुखचन्द्रयोस्सादृश्योपपत्तये सादृश्यप्रतियोगितावच्छेदकीभूतो यो धर्मस्तद्धर्मव्यापकीभूतो यो धर्मस्तेनैव धर्मेण सादृश्यग्रहणाद्। यथा चन्द्रवन्मुखमित्यत्रोपमानञ्चन्द्रस्सादृश्यप्रतियोगी भवत्युपमेयञ्च मुखं सादृश्यानुयोगीति सादृश्यप्रतियोगिता चन्द्रे प्रतियोगितावच्छेदकीभूतो धर्मश्चन्द्रत्वन्तस्य व्यापको धर्म आह्लादकत्वन्तेनाह्लादकत्वेन मुखचन्द्रयोः सादृश्यमुपजायते तथैव भूप्रभृतयो वा सदृशा इत्यत्र सादृश्यानुयोगी "भू" भवति सादृश्यप्रतियोगी च "वा" इति तत्प्रतियोगितावच्छेदकीभूतो धर्मः वात्वम् तद्धर्मव्यापकीभूतो धर्मः क्रियावाचकत्वमिति क्रियावाचकत्वेन सादृश्यग्रहणे सयुक्तिकप्रबल-प्रमाणस्योररीकृतत्वात्। **'क्रियावचनो धातु'**रिति भाष्यमपि सादृश्यस्य क्रियावाचकत्वे प्रामाण्यमधिगच्छति।

इदमत्रावधेयम्, धातोः व्यापारवाचकत्वे सादृश्यं क्रियावाचकत्वेन फलवाचकत्वे तु सादृश्यं फलत्वेनाहोस्वित् फलवाचकत्वेन ग्राह्यम्। भू सत्तायामिति धात्वर्थनिर्देशः फलत्वेन सादृश्यग्रहणे प्रामाण्यमवाप्नोति। आत्मधारणरूपा या सत्ता सा भवति भूधातोः फलमिति सुस्पष्टतया प्रतीतिर्जायते। कर्तृगामिनि क्रियाफले स्वरितेतानां ञिताञ्च धातूनामात्मनेपद-

विधायकं 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति सूत्रमपि धातोः फलवाचकत्वं द्रढयति। धातुः साध्या क्रियावाचक एव न सिद्धाक्रियावाचकः। यत्र कारकविषयिणी खलु जायत आकाङ्क्षा न साध्या तावत् क्रियाविषयिणी तत्र साध्या क्रिया भवति। यथा पचतीत्युक्ते किं पचति केन पचति क्व पचतीति कारकविषयिण्या आकाङ्क्षायां एव प्रतीतिः। यया क्रियया क्रियाविषयिणी आकाङ्क्षोदेति सा क्रिया सिद्धाक्रिया। यथा पाक इत्युक्ते भवति, भविष्यतीति क्रिया-विषयिण्या एवाकाङ्क्षाया उदयात् सा सिद्धैव।

एवञ्च यथा प्राणम्विना शरीरं व्यर्थतामुपजनयति तथैव फलव्यापाराभ्याम्विना धातुरपि व्यर्थत्वमेवादधातीति धातुश्शरीरं फलव्यापारौ च प्राण इत्यभिधानं वस्तुतत्त्वाभिधायकमेव। यदुक्तं 'क्रियावचनो धातु'स्तत्र क्रियते यया सा क्रिया=व्यापारः, क्रियते या सा क्रिया=फलम्, इति व्युत्पत्तिमाधाय क्रियया फलव्यापारौ प्रतीयेते तस्मात्फलविशिष्टे व्यापारे व्यापारविशिष्टे च फले धातूनां शक्तिं स्वीकुर्वन्ति केचन शब्दिकाः। तन्मते कर्तरि प्रत्यये सति फलविशिष्टे व्यापारे शक्तिः कर्मणि प्रत्यये तु व्यापारविशिष्टे च फले शक्तिः। 'चैत्रेण तण्डुलः पच्यत' इत्यत्र तृतीयार्थैकत्व-संख्याविशिष्ट-चैत्राभिन्नाश्रयवृत्ति वर्तमानकालिको यो व्यापारस्तज्जन्या तण्डुलाभिन्नैकत्व-विशिष्टाश्रयवृत्ति-विक्लित्तिरिति फलप्रधान-बोधदर्शनात्। अत एव "सुप आत्मनः क्यच्'जिति सूत्रे भाष्ये, आत्मनः पुत्रमिच्छतीति तात्पर्येण पुत्रीयतीति रूपं साध्यते किन्त्वात्मनः पुत्र इष्यत इति तात्पर्येण पुत्रीयतीति रूपन्न स्वीक्रियते, भिन्नार्थत्वात्। फलव्यापारयोर्विशेषणविशेष्यभावव्यत्यास - प्रयुक्तं भिन्नार्थत्वं साधितन्तत्र। व्यत्यासे कृते फलं विशेष्यं व्यापारश्च विशेषणं भवति। किन्त्वस्मिन्विशिष्टशक्तिवादेऽर्थात् फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च शक्तिस्वीकारे ग्रामं गच्छतीत्यत्रोत्तरदेशसंयोगरूपे फले ग्रामस्य वृत्तित्वसम्बन्धेन स्तोकं पचतीत्यत्र विक्लित्तिरूपे फले स्तोकस्याभेदसम्बन्धेन, ईषद्धसतीत्यत्र च हास्यरूपे फले ईषदित्यस्याभेदसम्बन्धेनान्वयो न सेत्स्यति, यतो हि वादेऽत्र फलस्य पदार्थैकदेशत्वात्तस्य पदार्थेन सहान्वयस्य 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने' ति व्युत्पत्त्या निषिद्धत्वात्। अस्याः व्युत्पत्तेरनङ्गीकारे तु नित्यो घट इत्यत्र नित्यपदार्थस्य घटनिष्ठ-घटत्वरूपे पदार्थैकदेशेऽन्वयसम्भवात्तद्वाक्यस्य साधुत्वनिवारणमशक्यमेव स्यात्। व्युत्पत्तिसत्त्वे घटत्वस्य पदार्थैकदेशतया तत्र नित्यपदार्थस्यान्वयासम्भवेन नित्यो घट इत्यस्य साधुत्वन्निरस्यते।

महावैयाकरणो नागेशः फले व्यापारे च धातूनां पृथक् शक्तिं स्वीकरोति किन्त्वेतन्मतं फलत्वावच्छिन्नप्रकारतानिरूपित-व्यापारविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्तृप्रत्ययसमभिव्याहृत-धातुजन्योपस्थितिः कारणम्, अपिच व्यापारत्वावच्छिन्न-प्रकारतानिरूपितफलविशेष्यकशाब्दबुद्धित्वावच्छिन्नम्प्रति कर्मप्रत्ययसमभिव्याहृत-धातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पनरूपगौरवादनादरणीयतामर्हति।

एवञ्च यथा आम्रमञ्जरी—एकफलवती द्विफलवती बहुफलवती चावलोक्यते किन्त्वनेकफलसत्त्वेऽप्याश्रयरूपा मञ्जर्यैकैवेति वृन्ताकन्यायेनोभयांश एका खण्डशशक्तिः तस्यां शक्तौ लम्बन्ते सर्वेऽर्थास्तेषामाश्रयभूतशक्तिरेकैवेति न शक्तिद्वयकल्पनन्न वा बोधजनकत्व-

सम्बन्धद्वयकल्पनमिति धातुनिष्ठा खण्डशशक्तिराश्रीयताम् ।

मीमांसकमते फलमात्रं धात्वर्थः, तिबर्थो भावना, सा निराश्रया न तिष्ठतीति तस्याः स्वाश्रये लक्षणा करिष्यते । यतो हि यत्र वाच्यार्थबाधोऽनुपपत्तिसन्धानं वा तत्रैव लक्षणा जायते । फलव्यापारौ तु स्वाश्रयं विनाऽनुपपन्नौ स्तस्तस्मादाश्रये लक्षणा क्रियते । प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति तन्मते प्रत्ययार्थप्रधानशाब्दबोध-सिद्धान्ताद् भावनायाः प्राधान्येन शाब्दबोधे भानमावश्यकम्, तदर्थं तिङि भावनायाः शक्तिः कल्पनीयैव । तिङर्थायाः भावनायाः स्वाश्रये कर्तरि लक्षणा चेत्, तस्याः प्राधान्यप्रतीतिर्न स्यात् । लक्षणयाऽर्थबोधनेन क्षीणशक्तिकत्वात् । यद्याख्यातस्य भावनायां शक्तिरेवोच्यते तर्हि, आश्रये लक्षणा न स्यात्, युगपत् वृत्तिद्वयविरोधात्, लक्षणाया असम्भवाच्च । यतो हि वाच्यार्थस्यानुपपत्तिरनुसन्धानम्वा लक्षणायामावश्यकमत्र च वाच्यार्थो नानुपपन्नः इति चेदर्थापत्त्या भावनया कर्तुः फलेन च कर्मणः आक्षेपादिति चेन्न; धातु-संज्ञाज्ञाने फलरूपक्रियात्वज्ञानमावश्यकं भविष्यति फलज्ञाने च फलावच्छिन्नक्रिया वाचक-धातुघटित-धातुत्वज्ञानमावश्यकमिति परस्परापेक्षकत्वरूपान्योन्याश्रयस्य निह्नोतुमसम्भवात् । किञ्च धात्वर्थफलाश्रयस्य कर्मत्वांत्सर्वेषां धातूनां सकर्मकतापत्तिः स्यात् । अपि च फलस्यैव धात्वर्थत्वे व्यापारस्य तत्त्वाभावात् धात्वर्थव्यापाराश्रयत्वासम्भवात् देवदत्तः ग्रामं गच्छतीत्यादिप्रयोगे देवदत्तादीनां कर्तृत्वमपि न स्यात् । केवलं व्यापारस्य धातुत्वे देवदत्तादीनां कर्तृत्वसम्भवात् फलस्यैव धातुत्वं मास्त्वित्यपि न रुचिकरं प्रतिभाति, अस् भुवीत्यादि-धातौ केवलं जातिरूपा सत्ता कालसम्बन्धिनी सत्ता वा प्रतीयते न तु कश्चन व्यापारस्तत्र व्यापारावाचकानामस्त्यादीनां धातूनां धातुत्वानापत्तेरतो धातुनिष्ठवाचकता-निरूपितवाच्यतावन्तौ फलव्यापाराविति सिद्धान्तपक्षोऽङ्गीकर्तव्यः ।

सकर्मकाकर्मकभेदाभ्यां धातोर्द्वैविध्यं परिकीर्तितं तत्र फलव्यापारयोरेकनिष्ठतायामकर्मकत्वं भिन्नाधिकरणतायाञ्च सकर्मकत्वं साधयति । मोहनो ग्रामं गच्छतीत्यत्र उत्तरदेशसंयोगरूपफलाश्रयतायास्तदनुकूलव्यापाराश्रयतायाश्च मोहने वर्तमानत्वाद् गम् धातोरकर्मकत्वापत्तिस्तु न समीचीना, एकनिष्ठतायामित्यस्यैकमात्रनिष्ठतायामित्यर्थकरणेन द्विष्ठस्य संयोगस्य ग्रामे मोहने चेत्युभयत्र सत्त्वेनैकमात्रवृत्तित्वाभावात् ।

आत्मानं जानातीत्यत्र ज्ञानानुकूलव्यापारस्य ज्ञानरूपफलस्य चैकस्मिन्नेवाधारे कर्तरि वर्तमानात्फलव्यापारयोस्तुल्याधिकरण-सत्त्वात्कथंकारन्नाम ज्ञाधातौ सकर्मकता, आत्मानमिच्छतीत्यत्रापि, इच्छारूपफलस्येच्छानुकूलक्रियायाश्च विषयतासम्बन्धे नैकत्रैवात्मनि सत्त्वादकर्मकलक्षणाक्रान्तत्वात्कथञ्चेषधातावपि सकर्मकतेति जिज्ञासायां उत्तरं दीयते—'चैतन्योपाधिकशरीरावच्छिन्नात्मैकः, अन्तःकरणावच्छिन्नात्मा च द्वितीय' इति शरीरान्तःकरणोपाधिभेदेनैकस्यायात्मनः भेदद्वयकल्पनात् फलव्यापारयोर्भिन्नाधिकरणनिरूपितवृत्तित्वात्सकर्मकत्वोपपत्तेः ।

तिङर्थो भावनेत्यपि मीमांसकसिद्धान्तः चिन्तनीयतामुपयाति । तथा हि कर्तुराख्यातार्थत्वे पक्ता देवदत्त इति वाक्याद्विक्लित्त्यनुकूलव्यापारवान्देवदत्त इत्यन्वयबोधः सम्भवति, अत्र

पक्तृपदार्थस्य देवदत्तपदार्थेन सहाभेदान्वयोऽवलोक्यते, कर्तरि तृचोऽभेदेनान्वयात्तथैव पचति देवदत्त इत्यत्रापि तिवर्थस्य कर्तुर्देवदत्तेन सहाभेदान्वयात् देवदत्ताभिन्नैककर्तृको विक्लित्त्यनुकूलो व्यापार इति शाब्दबोधदर्शनादाख्यातस्य कर्तरि शक्तिस्वीकारः परमावश्यकः। यदि नामाख्यातार्थो न भवेत्कर्ता न स्यादुक्तश्शाब्दबोधोऽतस्तत्रावश्यकाभेदोपपत्तये भावनायामाख्यातस्य शक्तिमपास्य तस्य कर्तरि शक्तिरनिवार्या।

अभेदसम्बन्धावच्छिन्नप्रकारतानिरूपित-विशेष्यता-सम्बन्धेन शाब्दबुद्धित्वावच्छिन्नम्प्रति समानविभक्तिपदजन्योपस्थितिः कारणमित्यभेदबोधस्थले कार्यकारणभावः श्रूयते। एवञ्च यद् विभक्त्यन्तप्रातिपदिकार्थस्तद्विभक्त्यन्तपदजन्योपस्थितिरावश्यकीति निश्चीयते तथा च पक्ता देवदत्तः, नीलोघटः इत्यादिस्थले प्रथमात्वेन सुत्वेन वा समानवचनकत्वस्योपलाभाद् भवतु तावदभेदान्वयः परन्तु पचति देवदत्त इत्यत्र प्रथमायास्तिङ्-विभक्तेश्च तिङ्त्वेन सुत्वेन वा केनाप्येकरूपेण प्रतीत्यसम्भवात्समानविभक्तिकत्वरूपस्याभेदान्वय-नियमस्य समन्वयाभावात्कथङ्कारन्नामभेदान्वयानुरोधेन कर्तुर्वाच्यत्वमिति चेदुच्यते—सोमेन यजेतेत्यत्र सोमपदस्य सोमवति लक्षणा सोमवत्पदार्थस्य यज्-धात्वर्थयागेऽभेदेनान्वयः, यागस्य च करणत्वेन लिङर्थभावनायामन्वयात्तथा च सोमवदभिन्ना यागकरणिकेष्टोद्भावनेत्यभेदान्वयदर्शनात् राजपुरुष इत्यत्र राजपदस्य राजसम्बन्धि-लक्षणा-सम्बन्धस्य पुरुषपदार्थेन सहाभेदान्वयं विधाय राजसम्बन्ध्यभिन्नः पुरुषः इत्यभेदान्वयदर्शनाच्चावधार्यते यदभेदबोधे समानविभक्तिकत्वन्नियामकमित्यस्यासार्वत्रिकत्वम्।

पचति देवदत्त इत्यत्र तिङो व्यापारे शक्तिः कर्तरि च स्वज्ञाप्यसम्बन्धरूपां लक्षणां कृत्वा स्वं तिङ् तज्ज्ञाप्या भावना तस्या भावनायाः सम्बन्धी कर्तेति लक्षणया लक्षितस्य कर्तुरुक्तत्वाद्देवदत्तेन सहाभेदान्वयास्सुलभ इति चेन्न, अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीत्यत्र पिङ्गाक्षादीनां गुणत्वात् क्रयणक्रियायामन्वयो न स्यादिति विमृश्य पिङ्गे अक्षिणी यस्यास्तयेति बहुव्रीहिसमासमाकलय्य तेषामवयवशक्त्या योगार्थेन पिङ्गाक्ष्यादिशब्दानां द्रव्यार्थकत्वमुपपादितं मीमांसकैस्तदुच्छेदापत्तेः। स्वज्ञाप्यसम्बन्धरूपलक्षणयैव द्रव्यार्थप्रतीतिसम्भवात्। स्वज्ञाप्यसम्बन्धरूपलक्षणया पिङ्गाक्षीपदादेव गोरूपव्यक्तेर्भानसम्भवात्तत्र गोरूपद्रव्ये, आरुण्यादीनामभेदेनान्वयात् तेषां गोरूपद्रव्ये शक्तिस्वीकारस्यानुपयोगित्वाल्लक्षणा न श्रेयसी। तथा च शक्यार्थस्य शक्यतावच्छेदकरूपेण उपस्थितिरिति गङ्गायां घोष इत्यत्र प्रवाहस्य प्रवाहत्वेन किम्वा गङ्गात्वेनोपस्थितिमवगत्य तत्र घोषाधारत्वानुपपत्त्या लक्षणाश्रयणीयेति मतन्निरस्य शक्यार्थस्य लक्ष्यतावच्छेदकरूपेणोपस्थितिं स्वीकृत्य प्रकृते शक्यार्थस्य प्रवाहस्य लक्ष्यतावच्छेदकरूपेण तीरत्वेनोपस्थितिमङ्गीकृत्य तत्र घोषाधारत्वसम्भवात्तदर्थं लक्षणा न स्वीकार्येति पक्षस्यापीदमेव रहस्यमिति मन्ये।

अथ सङ्क्षेपेण मीमांसकनैयायिकयोर्मतभेदं क्वचन लक्ष्यमभिलक्ष्य निर्दिशामि—लकारसामान्यस्य न कृतौ शक्तिः, रथो गच्छतीत्यादौ जडे रथे चेतनस्य कृतेरभावेनाख्यातस्य व्यापारे लक्षणापत्तेरतः लकारस्य व्यापारमात्रे शक्तिः। रथो गच्छतीत्यादौ गमनानुकूल-

व्यापारस्य रथे सत्त्वेन शक्त्यैव निर्वाहादिति मीमांसकमतं नैयायिकेभ्यो न रोचते तज्जन्यत्वे सति तज्जन्यजनकत्वं हि व्यापारत्वमिति, यथा कृतीनाम् नानात्वेन शक्यतावच्छेदकत्वे गौरवन्तथा जन्यत्वघटितव्यापारत्वस्यापि शक्यतावच्छेदकत्वे कृतित्वापेक्षया गौरवात् ।

संयोगभिन्नत्वे सति संयोगाऽसमवायिकारणत्वं क्रियात्वापरनामकं व्यापारत्वमित्यस्य भेदघटिततयाऽसमवायिकारणघटिततया च गौरवस्यापलापासम्भवात् । ननु रथनिष्ठगमनानुकूलव्यापारस्तक्षकादिकर्तृकविलक्षण-संयोगोऽपि भवत्येवं च व्यापारत्वन्न संयोगभेदादिघटितमपि तु **"अयं धात्वर्थो व्यापारः"** इति प्रतीति-विषयत्वमेवेति चेन्न, प्रतीतिविषयत्वस्य विषयभेदेन भिन्नत्वात् गौरवं निह्नोतुमशक्यत्वात्, तथा च रथो गच्छतीत्यत्राख्यातस्य व्यापारे निरूढां लक्षणामादाय गमनानुकूलकृतेः मुख्यार्थस्य रथेऽन्वयानुपपत्त्यात्मकहेतोस्सत्त्वात्, गमनानुकूलव्यापारवान् रथ इत्येव बोधः ।

ननु रथनिष्ठगमनानुकूलव्यापारस्तक्षकादिकर्तृकविलक्षणसंयोग एव स च गमनशून्यकालेऽप्यस्तीति तदापि रथो गच्छतीति प्रयोगापत्तेर्वारणायानुकूलतासम्बन्धेन गमनविशिष्टविलक्षणसंयोगवत्त्वमेव तादृशप्रयोगनियामकं वक्तव्यमेवं चानुकूलतासम्बन्धेन गमनविशिष्टव्यापारस्यैव निरूपितत्वसम्बन्धेन गमनविशिष्टा श्रयत्वस्यैव नियामकत्वस्वीकारेणापि तदानीं तादृशप्रयोगापत्तिवारणं भवत्येवेत्यत आश्रयत्वे, आख्यातस्य लक्षणा स्वीकार्या न तु व्यापारे अप्रयुक्तत्वात् गौरवाच्चेति विचार्य चिन्तामणिकारः गङ्गेशोपाध्यायः आख्यातस्याश्रयत्वे निरूढालक्षणामङ्गीकृत्य गमनानुकूलव्यापाराश्रयतावान् रथ इति रथो गच्छतीतिवाक्यात् शाब्दबोधं मन्यते ।

ननु प्रथमं सर्वो जनः जानाति ततः इच्छति ततश्च यतत इति नियमात् ज्ञानकाले यत्नाभावेन चैत्रो जानातीत्यत्राख्यातस्य कृतौ शक्तिमत्त्वे कथं ज्ञानानुकूलकृतिमांश्चैत्रो इति बोध इति चेच्छ्रूयताम्, आश्रयत्वे निरूढ़लक्षणामङ्गीकृत्य घटादिविषयकज्ञानाश्रययतावानेकत्ववाँश्चैत्र इति बोधस्य सूपपादत्वात् । घटो नश्यतीत्यत्र घटे नाशानुकूलयत्नाभावो वर्तते, अतः आख्यातस्य प्रतियोगित्वे, अनादितात्पर्यवतीं लक्षणामाकलय्य नाशप्रतियोगितावानेकत्ववान्घट इति बोधोऽभ्युपगन्तव्यः । घटः ध्वंसते इत्यत्र च ध्वंसप्रतियोगितावानेकत्वाश्रयो घट इत्यन्वय-बोधोऽभिधेयः । चैत्रः तण्डुलं पचतीत्यत्र कर्मत्वं द्वितीयार्थस्तत्राधेयतासम्बन्धेन तण्डुलस्यान्वयः, कर्मत्वस्य पाके पाकस्याख्यातार्थकृतौ कृतेश्चैत्रे, इति तण्डुलकर्मकपाकानुकूलकृतिमाँश्चैत्र इति बोधः स्वीक्रियते ।

चैत्रेण तण्डुलः पच्यत इत्यत्र तृतीयार्थः कृतिः कृतावाधेयतासम्बन्धेन चैत्रस्यान्वयः, कृतेः घत्ववर्थपाके पाकस्यात्मनेपदार्थफले फलस्याश्रयतासम्बन्धेन तण्डुले, इति चैत्रवृत्तिकृतिजन्यपाकजन्यफलाश्रयस्तण्डुल इति भवति बोधः ।

अत्र रत्नकोशकारः —आख्यातस्य न यत्ने न वा व्यापारे शक्तिरपि तु भावनाऽपरपर्यायायामुत्पादनायान्तेन सर्वत्र चेतनाचेतनकर्तृके प्रयोगे आख्यातार्थे धात्वर्थोत्पादकत्वम् ।

ओदनं पचति, रथो गच्छतीति मुख्या एव प्रयोगा इति न तत्र लक्षणाश्रयणम् । पचतीत्यत्र पाकमुत्पादयति, गच्छतीत्यत्र गमनमुत्पादयति, यतते, इत्यत्र यत्नमुत्पादयतीत्याद्ययर्थात् । उत्पादयतीत्यत्र त्वाख्यातस्याश्रयतास्वीकारादि मिनुते तदपि न रमणीयतामर्हति, उत्पादकत्वस्योत्पत्तिजनकत्वरूपस्य तत्र जनकत्वात्मककारणताया अनन्यथासिद्धनियतपूर्ववर्त्तित्वादि-घटितत्वेन गौरवात्, तस्याखण्डोपाधित्वे च मानाभावात् ।

अत्र तार्किकाः —

फलव्यापारौ धात्वर्थः लकाराणां कृतावेव शक्तिः नानाकृतिष्वनुगतायाः कृतित्वजातेः किञ्चिदविशेषितायाः शक्यतावच्छेदकत्वे, उपस्थितिकृत्त्वभावत्वात् न तु कर्तरिकर्तृत्वं लाभगौरवान् हि कृतिमत्त्वम्, तथा च कृतिमतः शक्यत्वे कृतिः शक्यतावच्छेदिका प्रतिकर्तृ-भिन्नाभिन्नेति शक्यतावच्छेदकधर्माणामानन्त्यमेवोपस्थितिकृतगौरवम् । प्रथमान्तदेवदत्तादिपदेनैव कर्तुः लाभाच्च । तथा चाख्यातार्थकृतिप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावस्संयातः । आख्यातार्थे कृतौ धात्वर्थो विशेषण - प्रकृत्यर्थ-प्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यम् । आख्यातार्थः प्रथमान्तार्थे विशेषणम् ।

इदमत्रावधेयम् — नैयायिकमते 'लः कर्मणि चे'त्यादि सूत्रेऽनुवृत्तसप्तम्यन्तकर्त्तृ-पदस्य कर्तृत्वं लाक्षणिकमेव । एवं **'कर्मणि द्वितीया कर्तृकरणयोस्तृतीये'**ति सूत्रघटकसप्तम्यन्त-कर्मकर्त्रादिपदानामपि कर्मत्वं कर्तृत्वञ्च लाक्षणिकमेव । ग्रामं गच्छतीत्यादौ द्वितीयादिना कर्मत्वादिबोधनात् तथा च सकर्मकधातुसमभिव्याहृत-यगाद्यनुत्तरलकाराः कर्तृत्ववाचकाः सकर्मकधातुसमभिव्याहृतयगाद्यनुत्तरलकाराः कर्मत्ववाचकाः । एवमकर्मकधातुसमभिव्याहृत-यगाद्यनुत्तरलकाराः कर्तृत्ववाचकाः, अकर्मकधातुसमभिव्याहृतयगाद्युत्तरलकाराः निरर्थकाः इति सूत्रार्थः । एवञ्च चैत्रः पचतीत्यादौ, आख्यातेन कर्तृत्वबोधना'दनभिहित' इत्यधिकारीय-**कर्तृकरणयोस्तृतीयेति** सूत्रस्याप्रवृत्त्या चैत्रपदोत्तरन्न तृतीया । इत्थं च प्रथमान्तपदसमभि-व्याहारज्ञानाभाने सति, आख्यातार्थभावनाप्रकारकशाब्दबोधः । प्रथमान्तपदसमभिव्याहार-ज्ञानाभावे सति तु भावनामुख्यविशेष्यशाब्दबोध एव ।

एवञ्च प्रथमान्तमुख्य-विशेष्यकशाब्दबोधस्वीकर्तृनैयायिकमते चैत्रः तण्डुलम् पचतीत्यत्र तण्डुलनिष्ठपाकानुकूलकृतिमांश्चैत्र इत्याकारकशाब्दबोधो जायते । अत्र शङ्कते धात्वर्थमुख्यविशेष्यकशाब्दबोधमादृत्य शाब्दिकाः, पश्य मृगो धावतीत्यस्माद्वाक्यात् मृग-कर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति शाब्दबोधमनुते, न तो हि पक्षेऽस्मिन् मृगस्याभेदेन धावतीति तिबर्थेऽन्वयस्तिबर्थाश्रयस्य कर्तुः कृतित्व - सम्बन्धेनाश्रयाधेयत्वसम्बन्धेन धावन-क्रियायामन्वयः, धावनस्य कर्मतया दृश् धात्वर्थदर्शनक्रियायामन्वयस्तथा चैकत्वसंख्या युक्तो यो मृगस्स एवाऽऽश्रयस्तद्वृत्तिधावनकर्मकं त्वत्कर्तृकं दर्शनं मत्प्रेरणाविषयीभूतं चक्षु-रिन्द्रियजन्यं ज्ञानमित्यन्वयबोधः, एकवाक्यतानुभूयते किन्तु नैयायिकमते तु नैकवाक्यता, यतस्त-न्मते कृतिरेव तिङर्थस्तस्य समवायसम्बन्धेनाश्रयार्थे मृगेऽन्वयस्तथा च धावनानुकूलकृतिमाने-कत्वसंख्याविशिष्टाश्रयो मृगः, मत्प्रेरणाविषयीभूतो दर्शनाश्रयस्त्वमिति वाक्यभेद एव । यदि

भाष्यसिद्धैकवाक्यतोपपत्तये मृगस्य कर्मत्वेन दर्शनक्रियायामन्वयो विधास्यते तर्हि नैयायिक-सिद्धान्ते मृगः धावनक्रियाविशेष्यः तस्य धावनक्रिया विशेष्यस्य प्रथमान्तपदेनोपस्थितस्य मृगस्य कर्मता-सम्बन्धेन दृशिक्रियायामन्वयात्तस्मात् द्वितीयाविभक्त्युत्पत्तिः स्यादर्थात् धावन-क्रियाजनकः यत्नवान्मृगः सः कर्म यस्य दर्शनस्य तद्दर्शनाश्रयस्त्वमिति ज्ञाने मृगस्य कर्मत्वात्ततः द्वितीयाविभक्त्युत्पत्तौ पश्य मृगं धावन्तमित्यनिष्टवाक्यमापद्येत, इष्टस्तु दृशिक्रियायां धावन-क्रियाया अन्वय एवेति दर्शने धावनक्रियाया एव कर्मत्वन्न तु मृगस्य।

नैयायिकमते यदा दृशिक्रियायां मृगः कर्म स्यात्तदा न केवलं द्वितीयाविभक्तिरेवापि तु प्रथमाभिन्नप्रथमासदृशद्वितीयाविभक्तेः सामानाधिकरण्यादर्थात्प्रथमाभिन्नप्रथमासदृश-विभक्तित्वधर्मवत्त्वात् शतृप्रत्ययात् धावन्तं मृगं पश्येत्यनिष्टमेव वाक्यं भवेन्न पश्य मृगो धावती-तीष्टं वाक्यम्। न च यत्र शुद्धं कर्म तत्रैव द्वितीया मृगस्तु धावनक्रिया विशिष्टन्न तु शुद्धमतो न मृगाद् द्वितीयेति वाच्यम्, गुणकर्मभेद-विशिष्टसत्तायाः (द्रव्यवृत्ति-सत्तायाः) द्रव्यगुणकर्मसु वर्तमानायाः सत्तायाश्च भेदाभावकल्पनात्। **'विशिष्टं शुद्धान्नातिरिच्यत'**इत्यस्योक्तत्वात् धावनक्रियाविशिष्टादपि मृगात् द्वितीयाप्रसक्तिर्दुर्वारैव।

दर्शनक्रियायां मृगस्यान्वयार्थम् पश्य मृगो धावतीत्यत्र तमित्यध्याहृत्याप्रथमासामानाधि-करण्यस्याभावेन शतृप्रत्ययस्य वारणं यद्यपि सम्भवति तथापि धावनक्रियाजनककृतिमान्मृग इत्येकं वाक्यम्, मृगकर्मक-दर्शनसम्बन्धी आश्रयतावाँस्त्वमित्यपरं वाक्यमिति बोधकः, धावति मृगस्तं पश्येति वाक्यभेदो जायेत। अधिकोत्प्लवनेन वैलक्षण्य-विशिष्टाया धावनक्रियायाः एव दर्शनक्रियायां सम्बन्धस्य प्रतिपादनं भाष्यकारस्याभीप्सितन्तन्नैयायिकमते सर्वथाऽसम्भवम्। अपि च तमित्यस्याध्याहारे कृते सति दृशिक्रियायां धावनक्रियाया अन्वयो न सेत्स्यत्यपि तु मृगस्यैवान्वयस्सम्पत्स्यते। एवञ्च क्रियाकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारण-मिति नैयापिकोक्तकार्यकारणभावोऽनुपादेय एव प्रतिभाति।

□

ग्रन्थालोकः

卐

'भारत-भाषानुवाद'-संवलित-पञ्च-टिप्पण-विभूषित-
'श्रीबहुरूप-गर्भ-स्तोत्र'-
रत्नेन तथा
स्वामि-श्रीब्रोधानन्द-विरचित-"**विज्ञान-बीज-प्रकाशिका**"-
'हिन्दी-भावार्थ'-'संस्कृत-रूपान्तर'-समन्वित-
साखी-वसन्त-चर्चरी-हिन्दोला-वल्ली-बिरहुली-रूप-
'कबीर-वाणी'-
नामक-ग्रन्थ-द्वयेन-विराजितः ।

प्राच्या विद्वत्-प्रवरमणयो लोक-कल्याणभावा-
न्नाना-ग्रन्थान् विविध-विषयालङ्कृतान् सारगर्भान् ।
प्राणैषुस्तान् नव-नव-परिष्कार-पूर्णान् समञ्चन्,
'ग्रन्थालोकः' प्रसरति स नः स्वान्त-भूमौ चकास्तु ।।

—रुद्रस्य

卐

विमर्श-वेदिका

[सम्पादकीया]

'स्तोत्रं कस्य न तुष्टये' इति महाकवेः कालिदासस्य सूक्तिः संस्कृतसाहित्यस्य प्रसवभूमिः। देवा वा भवन्तु मानवा वा, सर्वेऽपि स्तुत्या प्रसीदन्ति। आवैदिकात् कालात् स्तोत्राणां प्रवृत्तिरियं सकलमपि प्राणिनं यथारुचि यथाशक्ति प्रेरयन्ती किमपि लघु दीर्घं वा स्तोत्रं तन्माध्यमेन कारयत्येव। वैदिकेषु मन्त्रेषु भूयसां देवानां देवीनां मूर्तानामूर्तानां याः स्तुतयो विद्यन्ते ताः कस्य न सचेतसः स्वान्तं कान्तं कुर्वन्ति नितान्तम्। आगमाः पुराणानि तथान्यान्यानि स्वतन्त्र-तन्त्रतया यथास्थिति प्रणीतानि स्तोत्रपुस्तकानि संस्कृत-साहित्ये यावन्ति विलसन्ति सन्ति तेषां विरल एव संसारः, विरला एव वचोविलासाः, विरलान्येव कवि-कर्म-कौशलानि !!!, अत एव—

स्तुतिरेव महीयसी कृतिः, प्रथते यत्र सदा ह्यलङ्कृतिः।
वचसां च विभूतिरुज्ज्वला, जगतो जीवनमाप्रकाशते ॥

इतिदृष्ट्यात्र प्रकाशन-पदवीमानीतं भगवतः श्रीबहुरूपस्य नामावली-समन्वितं नमोऽन्तं बहुविध-दार्शनिक-तान्त्रिक-तत्त्व-परिबृंहितं स्तोत्रमतीव महनीयं विद्यते। वृद्धस्वच्छन्दतन्त्र-प्रोक्तमिदं स्तोत्रं निगूढ-तत्त्वगर्भमिति विज्ञाय बहुभिर्विद्वद्भिः स्व-स्वानुभव-प्रज्ञानां बलेन श्रीबहुरूपदेव-कृपया च सङ्केत-मात्र-स्पर्शकैः सद्भिरपि विशिष्ट-सार-तत्त्वोन्मेषकैष्टिप्पणैर्विभूषितमकारि। तदेवात्र भावार्थरूप-भाषानुवादसनाथितं प्रकाशितम्। अपि च —

दर्शन-कानन-पञ्चाननस्य साधु-शिरोमणेः श्रीकवीरमहाभागस्य लोक-शोक-मोचिका वैराग्य-भाव-प्ररोचिका लोक-भाषामयी **'वाणी'** कियती रहस्य-पूर्णा शास्त्र-सार-परिपूर्णा गभीरा च वर्तत इति बोधयितुमेव **स्वामि-श्रीबोधानन्द**-विरचितया **"विज्ञान-बीज-प्रकाशिका"**-ऽभिधया टीकया तथा डॉ० **श्रीहरिहरत्रिवेद**-महानुभाव-प्रणीत-हिन्दी-भावार्थ-संस्कृत-रूपान्तर-प्रस्तावनादि-समलङ्कृताऽत्र **'कबीर-वाणी'** ग्रन्थरूपेण प्रकाशिता विद्यते।

वाग्देव्या वाङ्मयी पूजा तत्प्रसादाय राजताम्।
एषा ग्रन्थद्वयी रम्या ज्ञान-गम्या च जायताम् ॥

—सम्पादकः

॥ ॐ नमो विघ्नहन्त्रे ॥

विषमपदसङ्केताख्यया टीकया तथाऽन्य-टिप्पणीभिः
सङ्कलितं भारत-भाषानुवाद-भूषितञ्च
वृद्ध-स्वच्छन्दतन्त्र-प्रोक्तं

श्रीबहुरूपगर्भ-स्तोत्रम्

□□□

ॐ ब्रह्मादि-कारणातीतं स्वशक्त्यानन्दनिर्भरम् ।
नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥१॥[1]

[प्रणति-मङ्गल]

ॐ ब्रह्मादि देवों के कारण से रहित, स्वशक्ति के साथ आनन्द में लीन, परम-शिवस्वरूप, स्वच्छन्द वीर नामक भगवान् अघोरभट्टारक को मैं प्रणाम करता हूं ॥१॥

कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पप्रच्छ प्रणता देवी भैरवं विगतामयम् ॥२॥

[स्तोत्रावतरणिका]

किसी समय कैलास-शिखर पर विराजमान प्रसन्नचित्त, देवाधिदेव, जगद्-गुरु, श्रीस्वच्छन्दभैरव को प्रणाम करके भगवती जगदम्बा ने उनसे पूछा ॥२॥

श्रीदेव्युवाच

प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च ।
महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ॥३॥
छिद्रस्थानेष सर्वेषु सदुपायं वद प्रभो ।
येनायासेन रहितो निर्दोषश्च भवेन्नरः ॥४॥

श्रीदेवी ने कहा—

हे प्रभो ! सभी प्रकार के प्रायश्चित्त, समय (शास्त्र-आचार) का उल्लङ्घन,

---

१, टीकाकार एवं टिप्पणीकारों ने इन प्रारम्भिक पद्यों की टीका नहीं की है। (सम्पादक)।

तीव्र उपद्रवों की स्थिति तथा सर्वविध दोषस्थानों के विद्यमान रहने पर भी साधक सरलता-पूर्वक उन दोषों से मुक्त होकर साधना कर सके ऐसा कोई उत्तम उपाय बतलाइये ।।३-४।।

श्रीभैरव उवाच

शृणु देवि परं गुह्यं रहस्यं परमाद्‌भुतम् ।
सर्वपाप-प्रशमनं सर्वदुःख-निवारणम् ।।५।।

प्रायश्चित्तेषु सर्वेषु तीव्रेष्वपि विशोधनम् ।
सर्वच्छिद्रापहरणं सर्वार्त्ति-विनिवारकम् ।।६।।

समयोल्लङ्घने घोरे जपादेव विमोचनम् ।
भोग-मोक्षप्रदं चैव सर्वसिद्धि-फलावहम् ।।७।।

श्रीभैरव ने कहा—

हे देवि ! परम गुप्त, परम अद्‌भुत रहस्यरूप, सर्वविध पापों का शमन करनेवाला, सर्व दुःखों का निवारक, सभी प्रकार के तीव्र अथवा सामान्य प्रायश्चित्तों का शोधक, सर्वविध त्रुटियों को दूर करनेवाला, समस्त पीडाओं का निवारक, घोर समय-शास्त्र के आचार का उल्लङ्घन होने पर भी केवल जप-मात्र से ही उसके दोष से मुक्त करानेवाला, भोग एवं मोक्ष का दाता और सर्वसिद्धिप्रद ऐसे (श्रीबहुरूपगर्भ—) स्तोत्र को मैं कहता हूं । इसे तुम सावधान होकर सुनो ।।५-६-७।।

शतजाप्येन शुद्धयन्ति, महापातकिनोऽपि ये ।
तदर्धं पातकं हन्ति तत्पादेनोपपातकम् ।।८।।

[स्तोत्र-जप (पाठ) का माहात्म्य]

इस (मेरे द्वारा प्रोक्त-श्रीबहुरूपगर्भस्तोत्र) का सौ बार जप[1] करने से जो महापापी हैं, वे भी शुद्ध हो जाते हैं । पचास बार पाठ करने से पाप का नाश होता है तथा पचीस बार पाठ करने से उपपातकों[2] का नाश होता है ।।८।।

कायिकं वाचिकं चैव मानसं स्पर्शदोषजम् ।
प्रमादादिच्छया वापि सकृज्जाप्येन शुद्धयति ।।९।।

प्रमादवश अथवा इच्छापूर्वक किये गये कायिक, वाचिक, मानसिक और स्पर्श के कारण उत्पन्न दोष इस स्तोत्र के एक बार पाठ करने से ही दूर हो जाते हैं ।।९।।

---

१. यहां 'जप' शब्द का 'पाठ' अर्थ ही ग्राह्य है ।

२. पातक और उपपातकों का विवेचन धर्मशास्त्रीय ग्रन्थों में किया गया है। अतः वहीं द्रष्टव्य है।

यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः ।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ।।१०।।

पूजा अथवा यज्ञ आदि कर्मों के आरम्भ और अन्त में इस स्तोत्र का पाठ करना चाहिये तथा भक्तिपूर्वक इसका श्रवण करना चाहिये। यह स्तोत्र अत्युत्तम एवं कल्याण करनेवाला है ।।१०।।

नित्ये नैमित्तिके काम्ये परस्याप्यात्मनोऽपि वा ।
निश्छिद्रकरणं प्रोक्तमभावपरिपूरकम् ।।११।।

यह स्तोत्र किसी अन्य यजमान के लिये अथवा स्वयं के लिये किये जानेवाले नित्य, नैमित्तिक एवं काम्यकर्मों में अज्ञानवश रहजानेवाली त्रुटियों के दोषों को दूर करनेवाला और अभावों की पूर्ति करनेवाला कहा गया है ।।११।।

द्रव्यहीने मन्त्रहीने ज्ञानयोग-विवर्जिते ।
भक्तिश्रद्धा-विरहिते शुद्धिशून्ये विशेषतः ।।१२।।

मनो-विक्षेपदोषे च विलोमे पशुवीक्षिते ।
विधिहीने प्रमादे च जप्तव्यं सर्वकर्मसु ।।१३।।

द्रव्यहीन, मन्त्रहीन, ज्ञान एवं योग से रहित और भक्ति तथा श्रद्धा से शून्य कर्म करने की स्थिति में एवं शुद्धता का अभाव, मन की अस्थिरता, विपरीत क्रिया, पशु (आचार शून्य-व्यक्ति द्वारा) दृष्ट, विधिरहित तथा प्रमाद के कारण हुई त्रुटियों के होने से उत्पन्न दोषों की निवृत्ति के लिये सभी कर्मों में इस स्तोत्र का पाठ करना चाहिये ।।१२-१३।।

नातः परतरो मन्त्रो नातः परतरः स्तवः ।
नातः परतरा काचित् सम्यक् प्रत्यङ्गिरा प्रिये ! ।।१४।।

हे प्रिये ! इस स्तोत्र से बढ़कर न तो कोई मन्त्र है और न स्तोत्र। तथा इससे अधिक महत्त्ववाली कोई उत्तम प्रत्यङ्गिरा (कृत्यादिदोषशमनी विद्या) भी नहीं है ।।१४।।

इयं समयविद्यानां राजराजेश्वरीश्वरि ! ।
परमाप्यायनं देवि ! भैरवस्य प्रकीर्तितम् ।।१५।।

हे ईश्वरी ! यह स्तोत्रविद्या समस्त विद्याओं की राजराजेश्वरी है, तथा यह स्तोत्र भैरव को पूर्णतः सन्तुष्ट करनेवाला कहा गया है ।।१५।।

प्रीणनं सर्वदेवानां सर्व-सौभाग्य-वर्धनम् ।
स्तवराजमिमं देवि शृणुष्वावहिता प्रिये ।।१६।।

हे प्रिय देवी, सभी देवताओं को प्रसन्न करनेवाले तथा सर्वविध सौभाग्य को बढ़ानेवाले इस 'बहुरूपगर्भ-स्तवराज' को सावधान होकर सुनो ।।१६।।

अथ विनियोगः

अस्य श्रीमदघोरभट्टारक-सकल-स्वच्छन्द-भैरवमन्त्रस्य श्रीकालाग्निरुद्रभैरव ऋषिः पङ्क्तिश्छन्दः सकलभट्टारकाघोरमूर्तिर्देवता ॐ बीजं, ह्रीं शक्तिः, कुरु कुरु कीलकं, श्रीबहुरूपगर्भप्रीत्यर्थं पाठे विनियोगः।

[स्तोत्र-पाठ के लिये विनियोग]

इस अघोरभट्टारक, सकल-स्वच्छन्द भैरव मन्त्र (स्तोत्र) के कालाग्नि-भैरव ऋषि, पङ्क्ति छन्द, सकल भट्टारक अघोरमूर्ति देवता, ॐ बीज, ह्रीं शक्ति और कुरु कुरु कीलक हैं। भगवान् बहुरूपगर्भ की प्रसन्नता के लिये पाठ का विनियोग किया जाता है।

ध्यानम्

वामे खेटकपाशशार्ङ्गविलसद्-दण्डं च वीणाष्टिके,
बिभ्राणं ध्वजमुद्गरौ स्वनिभदेव्यङ्कं कुठारं करे।
दक्षेऽप्यङ्कुशकन्दलेषु-डमरून् वज्रं त्रिशूलाभयान्,
रुद्रस्थं शरवक्त्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः ॥

ध्यान-पद्य-व्याख्या—

वयं स्वच्छन्दनाथं स्तुम इति मुख्यं वाक्यम्, शेषाणि पदानि स्वच्छन्दनाथस्य विशेषणानि। तथा हि :— रुद्रस्थं=रुद्रस्य पृष्ठ आरूढं, शरेति पञ्चसंख्या-द्योतकं पदम्। ततः शरवक्त्रं=पञ्चवक्त्रं, पञ्चशिरस्कं, पञ्चमुखम्, इन्दुवत्=चन्द्रवत्, धवलं शुभ्रं सुगौरवर्णमिति। स्वनिभा=स्वसदृशरूपा या देवी=स्वच्छन्दभट्टारकशक्तिः, साङ्के यस्य तमिति कर्मधारयपूर्वपदो बहुव्रीहिः। अङ्के स्वसदृशरूपिणीं देवीं दधानमिति तात्पर्यम्, वामे करे=हस्ते, खेटकं=तदाख्यमायुधं, पाशं, शार्ङ्गं=धनुः, विलसन्तं=शोभमानं, दण्डं, वीणा च अष्टिका चेति ते, अष्टिका=क्षुद्रघण्टा, वीणां क्षुद्रघण्टां च, ध्वजश्च मुद्गरश्चेति तावपि बिभ्राणं=धारयन्तम्। अत्र वरदमुद्रानुक्ताप्यूह्या। शास्त्रान्तरेषु स्वच्छन्दनाथस्याभयवरदमुद्रामण्डितत्वेनोपवर्णितत्वात्। किञ्च वामे हस्तनवके वस्तुनवकधारित्वं भगवतो युक्तं, शास्त्रसम्मतं च। दक्षे दक्षिणेऽपि करे करनवके कुठारं=परशुम्, अङ्कुशं=सृणिं, कन्दलेक्षुम्=इक्षुकाण्डं शरत्वेन योज्यमिति भावः। शास्त्रेषु भगवत इक्षुकाण्डशरत्वस्य प्रसिद्धत्वात्। डमरुं=तदाख्यं वाद्यं, वज्रं, त्रिशूलम्, अभयम्=अभयमुद्रां दधानमिति। दक्षिणे करद्वये मुण्ड-खट्वाङ्गधारित्वमपि भगवतः श्लोकेऽनुक्तमपि तावदङ्गीकार्यमेव। शास्त्रेष्वेवमेव तस्य वर्णनात्। किञ्च स्वच्छन्दनाथस्य खड्गधारित्वमपि प्रसिद्धम्। ततः क्वापि हस्ते वस्तुद्वयधारित्वं ज्ञेयं येन केनापि करविशेषेण खड्गधारित्वमपि तस्योपपद्येत। तच्च खड्गधारित्वं मुण्डखट्वाङ्गधारित्वमिवानुक्तमप्यङ्गीकार्यमेव। ध्वजधारित्वस्य शास्त्रान्तरेऽनुक्तत्वेन ध्वजं केनापि वस्त्वन्तरेण साकमेव हस्ते धारयतीत्यूह्यम्। एवंविधशस्त्रव्रातधारिणमभयवरदं श्रीस्वच्छन्दनाथं स्तुम इति।

[ध्यान]

रुद्र के पृष्ठ पर विराजमान, पञ्चमुख, चन्द्रमा के समान गौरवर्ण, अपने ही समान स्वरूपवाली देवी स्वच्छन्द भट्टारक शक्ति जिसके अङ्क में स्थित है तथा जो बांये हाथ में—**'१-खेटक, २-पाश, ३-धनुष, ४-दण्ड, ५-वीणा, ६-क्षुद्रघण्टिका, ७-ध्वज, ८-मुद्गर, एवं ९-वरदमुद्रा'** तथा उसी प्रकार दाँये हाथ में—**१-'परशु, २-अङ्कुश, ३-इक्षुकाण्ड बाण, ४-डमरु, ५-वज्र, ६-त्रिशूल, ७-अभयमुद्रा, ८-मुण्ड तथा ९—खट्वाङ्ग'** आयुध धारण किये हुए हैं, ऐसे **भगवान् स्वच्छन्दनाथ** की हम स्तुति / ध्यान करते हैं।[1]

श्रीभैरव उवाच—

भैरव शब्दस्यार्थः। भैरवो-विश्वभरण-रवण-वमन-रूपः। भीरूणामभयमिति व्युत्पत्त्या संसारिणामभयदः, भयं भीः संसारत्रासस्तया जनितो रवः आक्रन्दः भीरवः ततो जातः तदाक्रन्दवतां स्फुरितः, अस्यैव भी-रवस्य संसारभयविमर्शनस्यायं शक्तिपातवशेनोत्थापः। भाति नक्षत्राणि ईरयति इति भेरः कालः तं वायन्ति-इति भैरवः कालग्राससमाधिरसिकाः योगिनः तेषामयमिति-आन्तरः स्वभावः, भिये पशुजनत्रासाय रवः —

भरितं वाङ्मयं सर्वं रचितं विश्वमुत्तमम् ।
वम्रितं ज्ञानसद्भावं तेन भैरव उच्यते ॥

शब्दराशि-समुत्थाकारादिकलाविमर्शो यासां खेचरी-गोचरी-दिक्चरी-भूचरी-चक्ररूपाणां संविद्देवीनां ताः भीरवास्तासामयं स्वामी भैरवः। इति।

भ्रियात् (शिवात्) सर्वं रचयति सर्वदो व्यापकोऽखिले ।
इति भैरवशब्दस्य सततोच्चारणाच्छिवः ॥

—०—

मूल-स्तोत्रपाठः —

ॐ नमः परमाकाशशायिने परमात्मने ।
शिवाय परसंशान्त-निरानन्दपदाय ते ॥१॥

(क)[2] परमाकाशे परशिवात्मिकायां स्वभित्तौ शेते विश्राम्यति तदाविष्टो भवति स तथा तस्मै, अत एव परसंशान्तं न तु चित्रम्, अत एवाक्षुब्धत्वान्निरानन्दं यत् पदं तद्रूपः, अत एव परमात्मा यः परश्रेयोरूपः तस्मै नमः तं समाविशामीत्यर्थः।

(ख) **शून्यतामात्र-विश्रान्तेर्निरानन्दात्मिका स्थितिः। (मा० वि० वा २.३५)** ततो निरानन्दपदम् आणवोपाय उच्चाराभ्यासे साक्षात्कार्यासु षट्स्वानन्दभूमिकासु द्वितीया भूमिका। यो महाप्रकाशमयनिजस्वरूपपरामर्शात्मा शिव इत्येकोऽसामान्यः सदाशिवोऽस्ति तस्मै ॥१॥

---

१. यहाँ टिप्पणीकारों ने 'भैरव' शब्द की निरुक्ति एवं विभिन्न अर्थ दिये हैं, जिनका विचार हमने सम्पादकीय 'विमर्श-वेदिका' में दिया है। कृपया वहीं देखें।

२. यहां (क), (ख) आदि अक्षर भिन्न-भिन्न टीका टिप्पणियों के बोध के लिए निर्दिष्ट हैं।

[मूल स्तोत्र का पाठ]

श्रीभैरव बोले—

परमशिवात्मिका स्वभित्ति में विश्राम करनेवाले, परम शान्त एवं अक्षुब्ध, आणवोपायगत उच्चाराभ्यास में साक्षात्करणीय, छह आनन्द भूमिकाओं में से द्वितीय भूमिका द्वारा प्राप्य, निरानन्दपदरूप तथा महाप्रकाशमय, निजस्वरूप परामर्शात्मा सदाशिव के लिए नमस्कार हो ।।१।।

अवाच्यायाप्रमेयाय प्रमात्रे विश्वहेतवे ।
महासामान्यरूपाय सत्तामात्रैकरूपिणे ।।२।।

(क) अवाच्याय विकल्पविज्ञानागोचराय अप्रमेयाय निर्विकल्पविज्ञानापरिच्छिद्याय अत एव प्रमात्रे एकरूपाय तथात्वेऽपि प्रकाशान्यथानुपपत्त्या तदन्तर्गताय, अत एव सदेकरूपाय नमः ।

(ख) यद्यपि परमेश्वर एव विश्वसृष्टिहेतुः, तथापि परमेश्वरतावस्थायां विश्वस्य प्रकाशमात्ररूपतयावस्थानमिति परमेश्वरस्य विचित्रसत्तामात्रस्वरूपता, इति टीकाकर्तुरभिप्रायः ।

(ग) अवाच्याय नादरूपाय "स नादो देवदेवेशि प्रोक्तश्चैव सदाशिवः" इति अमृतेशशास्त्रे । विश्वहेतवे सकलस्य वेद्यजातस्य स्वेच्छया स्वभित्तावुन्मीलकाय, सत्तामात्रैकरूपिणे "सत्यं ज्ञानमनन्तं ब्रह्म" इत्युक्त्या सत्स्वरूपेणावस्थिताय ।

(घ) मायादेः क्षित्यन्तस्य विश्वस्य हेतवे कारणभूताय तस्मै ।

घोषादि-दशधा शब्द-बीजभूताय शम्भवे ।
नमः शान्तोग्रघोरादि-मन्त्रसन्दर्भगर्भिणे ।।३।।

(क) घोषादिर्योऽसौ दशधा शब्दस्तस्य बीजभूताय कारणभूताय प्रसारणस्थानाय इत्यर्थः । यदुक्तं श्रीमदमृतेशशास्त्रे—

ध्वनिरूपो यदा स्फोटस्त्वदृष्टः शिवविग्रहात् ।
प्रसरत्यतिवेगेन ध्वनिना पूरयत् जगत् ।।
स नादो देवदेवेशि प्रोक्तश्चैव सदाशिवः ।। इति ।

नादश्च श्रीस्वच्छन्दशास्त्रे स्वस्मिन्नेव तन्त्रे —

घोषो रवः स्वनः शब्दः स्फोटाख्यो ध्वनिरेव च ।
झङ्कारो ध्वङ्कृतिश्चैव अष्टौ शब्दाः प्रकीर्तिताः ।।

इत्युद्दिष्टानामष्टानां भेदानां व्यापको नवमो महाशब्दः ।

नवमस्तु महाशब्दः सर्वेषां वाचकः स्मृतः ।
नदत्यसौ सदा यस्मात् सर्वभूतेष्ववस्थितः ।।

इत्यादिना प्रतिपाद्यः

"नादाद् बिन्दुः समुत्पन्नः सूर्यकोटिसमप्रभः"।

इत्युपक्रम्य—

"स चैव दशधा ज्ञेयो दशतत्त्वफलप्रदः"।

इत्यनेन श्लोकैकदेशेन भेदनवकसमसामरस्यात्मकमुख्य बिन्दुभावाभिधदशमस्वभावसद्भावमभिदधता दशधात्वमेव निरदेशि परमेशिना---इति सूक्तं घोषादीत्यादि। अथवा '**भगवानेव घोषादिर्दशविधः शब्दो नादः श्रीसदाशिवमूर्तिः**, इत्याम्नायान्तरोक्तनीत्या भूतानामन्तश्चारित्वाद् बीजं कारणं तस्मै बीजभूतायेति पुनरग्न्याहितवदत्र सूत्रितमिति सूक्तं घोषादित्यादिशान्तोग्रघोरादीत्यादिग्रहणं प्रकारे तेन शान्तत्वादेस्तीव्रमन्दत्वादिना प्रकारग्रहणम्।

(ख) यथा खल्वाहिताग्निरिति शब्दस्य स्थाने 'अग्न्याहितं' इति शब्दः प्रयुज्यते, तथैव भूतबीजायेति वक्तव्ये बीजभूतायेति प्रोक्तं श्लोके।

(ग) घोषादि— दशधा शब्दबीजभूताय— नादो हि दशधा घोषादिनामा (सदाशिवः)—

"नादाख्यं यत्परं ब्रह्म सर्वभूतेष्ववस्थितम्"

इत्याम्नायोक्तरीत्या सर्वभूतानामन्तश्चारित्वाद् बीजकारणं तस्मै।

(घ) अनाहतध्वनिपरमार्थमहामन्त्रवीर्यरूपः परमेश्वरः स्वच्छन्दो निष्कलोऽशेषविश्वसामरस्यवेदनात्मना शिरोरूपाकारकलया घोरतरशक्तिचक्रक्रमेण ब्रह्मविष्णुरुद्रान् पार्थिवप्राकृतमायीयाण्डानि जागरस्वप्नसुषुप्तानि प्रमेय-प्रमाण-प्रमातॄंश्चेति सृष्टि-स्थिति-संहार-विलय-मात्रं भेदमयं जगद् दर्शयति। अतो भगवतो बहुरूपस्य पदार्थद्वारेण यावान् स्फारो व्याख्यातः सोऽस्य भगवतः सर्वं एवाभेदेनैवान्तःस्थितः—इति तस्मै शान्तोग्रघोरादिमन्त्रसन्दर्भगर्भिणे, नमः—महारुद्रशक्तित्रयस्फारविवशीभवत्पाशराशिशरीरादिकल्पितप्रमातृपदप्रह्वीभावेन क्षमां विशामीत्यर्थः—

"नमस्कारः परित्यागः कार्यकरणलक्षणः"। इति। नादोऽव्यक्तध्वनिः—

श्रवणाङ्गुलि-संयोगाद् यः शब्दः सम्प्रवर्तते।
दीप्तवह्निस्वनाभासः स शब्दो घोष उच्यते॥ इति॥

विकल्पात्मक विज्ञान द्वारा अगोचर अथवा नादरूप, निर्विकल्पात्मक विज्ञान द्वारा अपरिच्छेद्य, प्रमाता, समस्त ज्ञेयमात्र माया से क्षिति-पर्यन्त विश्व को स्वेच्छा से स्वाश्रय में उन्मीलन करने से उसके कारणभूत, अत्यन्त असामान्यरूप प्रकाशमात्ररूप होने के कारण सत्तामात्रैकवेद्य तथा घोषादि दशविध शब्द-नाद के आदिकारण अथवा अनाहतध्वनि के परमार्थरूप महामन्त्र के वीर्यरूप; स्वच्छन्द, निष्कल, अशेष विश्व की समरसता से वेद्य शिरोरूपाकार कला के द्वारा घोरतर शक्तिचक्र के क्रम से—ब्रह्मा, विष्णु और रुद्र; पार्थिव, प्राकृत एवं मायीय अण्ड; जागर, स्वप्न तथा सुषुप्त; प्रमेय, प्रमाण और प्रमाता के सृष्टि-स्थिति-संहार-विलयरूप भेदों के द्वारा दृश्यमान जगत् जिसमें अभेदरूप से स्थित है ऐसे भगवान् बहुरूप, शान्त, उग्र-घोरादि-मन्त्रों के सन्दर्भ से गर्भित सदाशिव के लिये नमस्कार हो॥२-३॥

रेवतीसङ्गविस्रम्भ-समाश्लेष-विलासिने ।
नमः समरसास्वाद-परानन्दोपभोगिने ॥४॥

(क) र च ई च ते रे, रे विद्येते यस्याः सा रेवती शक्तिः तया सङ्गस्तत्र विस्रम्भेण सामरस्येन यः समाश्लेषस्तन्मयत्वं तेन विलसतीति तच्छील:, अत एव समरसास्वाद-परमानन्दस्य पर-मु(मो)पभोक्ता—अनेन रहस्यार्थोऽपि कटाक्षीकृतः ।

(ख) रहस्यार्थोऽत्र कर्पूरस्तवराजादिषु वर्णितश्चर्याक्रमः। (र च ई च—इति तौ यौं, यौं विद्येते यस्याः, रेवतीति पाठोऽत्र शोभनतरः प्रतिभाति) रियावत्र बीजमन्त्रवर्णौ ।

(ग) सततसमवायिन्या शक्त्या सह यो विस्रम्भ-समाश्लेषस्तन्मयत्वं तेन विलासिने, शक्तिशक्ति-मतोरभेद इत्युक्त्याऽभेदाख्यः समाश्लेषः ॥४॥

'र् च् ई् च् त् र्' अथवा 'र् च् ई् च् यौं' बीजमन्त्र वर्णों में निहित रे वर्णद्वय अथवा र् और य् वर्ण जिसमें विद्यमान हैं, ऐसी रेवतीशक्ति के विभ्रमरूप सामरस्य से तन्मयतारूप विलास करनेवाले तथा समरसास्वाद परमानन्द के उप-भोक्ता शिव के लिये नमस्कार हो ॥४॥

भोगपाणे नमस्तुभ्यं योगेशीपूजितात्मने ।
द्वय-निर्दलनोद्योग-समुल्लासितमूर्तये ॥५॥

(क) भोगपाण इति —

"भोगो भैरव इत्युक्तो हस्तः शक्तिः परा स्मृता" इति

श्रीवामेतरया शक्त्या शक्तिमत्-सामरस्यरूप इत्यर्थः, अत एव शक्तिशक्तिमल्लक्षणद्वयस्य निर्दलनमनिर्यातत्वेन अननुवर्तमानत्वेन, अत एव पारमार्थिकत्वेनेति भावः। अवस्थापनं तदुद्योगेन समुल्लासितोऽवच्छेदविरहादनामकरूपः समुल्लासो येन स तथा । अत एव परमोप-देश्यत्वात् प्राप्ता प्राप्तव्यैरपि सततमेव सेव्यायेत्यनेनानामकयोपास्यत्वमप्यस्य सूचितम् ।

(ग) भोगपाणे=भैरवशक्तिरूप !। एतेन शक्तिः शक्तिमांश्चेति द्वयस्य भेदप्रतिपत्तेः खण्डनम् ॥५॥

योगेशो अथवा योगेशों द्वारा पूजित तथा शक्ति और शक्तिमान् के भेद का खण्डन-निर्दलन करने की प्रवृत्ति के कारण समुल्लासित स्फूर्तिशाली भैरवशक्ति-रूप के लिये नमस्कार हो ॥५॥

थरत्प्रसरविक्षोभ-विसृष्टाखिलजन्तवे ।
नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ॥६॥

(क) थरत् स्फारवान् उदितो यः प्रसरस्तस्य विक्षोभो विस्तारस्तेन विसृष्टा अखिलजन्तवो येन-

१. योगेशैः पूजितात्मने—इत्यपि पाठः ।

अत एव मायास्वरूपाय। तिष्ठत्यविचलाविनश्वररूपत्वेन इति स्थाणुः परमे पदे ब्रह्मादिकारणान्यधिगम्य तिष्ठतीति परमेष्ठी।

(ग) थरदिति— शान्तस्य परमशिवस्यानुत्तरमूर्तेः जगत्सिसृक्षया यः स्फारवान् विक्षोभो जातस्तेनाखिलजीवसृष्टिकर्त्रेऽत एव मायास्वरूपायेत्युक्तम्।

(घ) भेदोल्लासहेतुः, स्वातन्त्र्यशक्तिः, मायास्वरूपाय।

शान्त, परमशिव तथा अनुत्तरमूर्ति की जगत् निर्माणरूप इच्छा से जो विस्तृत विक्षोभ हुआ उससे अखिल जीवसृष्टि करनेवाले मायास्वरूप, अविचल; अविनश्वर तथा परमपद में स्थित भगवान् 'बहुरूप के' लिये नमस्कार हो ॥६॥

घोरसंसारसम्भोगदायिने स्थितिकारिणे।
कलादिक्षितिपर्यन्तं पालिने विभवे नमः ॥७॥

(क) घोरोऽत्यन्तभयानको यः संसारः संसृतिरूपो महान् कष्टः (महत् कष्टं) तस्य यः सम्भोगोऽनन्त-प्रकाशमयसुखदुःखाद्युपभोगस्तद्दायिने स्थितिनाम्नः परेश्वरकृत्यविशेषस्तस्य कारिणे, कलादिक्षितिपर्यन्तस्य मायीयस्य तत्त्ववर्गस्य पालिने कञ्चित्कालं स्थापयित्रेऽपि, स्वयं विभवे — विगतो भवः संसरणं यस्य तस्मै भवते नमः।

(ख) कलादीति— कलाप्रभृति पृथिवीतत्त्व-पर्यन्तं तत्त्वजातस्य मायीयस्य तत्त्ववर्गस्य पालयित्रेऽपि स्वयं विभवेऽसंसरणशीलाय।

(घ) स्थितिकारिणे — संसाररूपतया भाति तस्मै। न पुनश्चिद्रूपशिवव्यतिरिक्तं संसारस्य निजरूपं किञ्चित्, तस्मै स्थितिकारिणे ॥७॥

अत्यन्त भयानक संसाररूप कष्ट के अनन्त प्रकाशमय सुख-दु.खादि का उपभोग करानेवाले, स्थितिनामक परेश्वर की कृत्या-विशेष के कर्ता अथवा संसार के रूप में निजरूप को व्यक्त करनेवाले, कला से पृथिवीतत्त्व पर्यन्त मायीय तत्त्ववर्ण के पालक और स्वल्पकाल के लिये उसके स्थापक तथा स्वयं संसरणरहित अथवा संसरणशील भगवान् बहुरूप के लिये नमस्कार हो ॥७॥

रेहणाय महामोहध्वान्तविध्वंसहेतवे।
हृदयाम्बुजसङ्कोचभेदिने शिवभानवे ॥८॥

(क) रेह प्रकाशने, रेहयति प्रकाश(य)ति इति रेहणस्तस्मै।

(घ) रेहणाय — प्रकाशात्मने अत एव हृत्कमलसङ्कोचनाशिने तथाऽज्ञानध्वान्तनाशिने च ॥८॥

प्रकाशात्मा, महामोहरूप अज्ञानान्धकार का विध्वंस करने में कारणभूत तथा हृदय-कमल को विकसित करनेवाले शिवरूपी सूर्य के लिये नमस्कार हो ॥८॥

भोग-मोक्ष-फलप्राप्ति-हेतु-योग-विधायिने।
नमः परम-निर्वाण-दायिने चन्द्रमौलये ॥९॥

(क) भोगमोक्षफलप्राप्तिहेतुयोगं विदधातीति तच्छीलः। मोक्षो विद्याविद्येश्वरत्वप्राप्ति-रूपः। परमनिर्वाणः सायुज्यप्राप्तिरूपः। मुक्तेर्हि परापररूपतया द्वैविध्यम्। यदुक्तं—**विद्याविद्येशत्वं त्वपरा मुक्तिः परेह शिव-सम्मतेति 'चन्द्रमौलये प्रकाशाह्लादरूपाय।।**

(घ) विश्वाप्यायनकृदमाख्यामृतकलारूपाय चन्द्रमौलये ।।६।।

भोग और विद्याविद्येश्वरत्व-प्राप्तिरूप मोक्ष की प्राप्ति के लिए संयोग बनाने-वाले, सायुज्यप्राप्तिरूप परमनिर्वाण के दाता एवं विश्व को सिक्त करनेवाली 'अमा'-नामकअमृतकलारूप चन्द्र को सिर पर धारण करनेवाले चन्द्रमौलि भगवान् स्वच्छन्दनाथ के लिये नमस्कार हो ।।६।।

घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्त्तये।
नमः शर्वाय सर्वाय सर्वपापापहारिणे[1] ।।१०।।

(क) गतार्थमेतत्।

(ख) सर्वैरपि मननत्राणस्वभावैर्मन्त्रैः परमेश्वर एव प्रकाशात्मको वस्तुतो घोष्यः—सम्बोध्यस्त-द्रूपत्वान्निखिलस्योपास्यदेवतावर्गस्येति स एव परविमर्शरूपत्वाद्विश्वात्मकाखिलविमर्श-बीजभूतत्वाच्च सर्ववाङ्मयमूर्तिः। विमर्श एव हि वस्तुतो वाक्तत्त्वम्।

(घ) शर्वायेति— भेदमयमायीयस्वरूपकरणात् सृष्टिस्थितिप्रलयसंहारमात्रतापादनेन शरण-वरणरूपः तस्मै ।।१०।।

मनन एवं त्राण-स्वभावात्मक समस्त मन्त्रों द्वारा सम्बोध्य, परविमर्शरूप विश्वात्मक अखिलविमर्श के बीजभूत—'विमर्शात्मक वाक्तत्त्वरूप' सर्ववाङ्मय-मूर्ति, सर्वपापनिवारक, सृष्टि, स्थिति एवं संहार-कर्ता तथा सभी के शरणभूत भेदमय मायीयस्वरूप (श्रीस्वच्छन्दनाथ) के लिये नमस्कार हो ।।१०।।

रवणाय रवान्ताय नमस्तेऽरावराविणे।
नित्याय सुप्रबुद्धाय सर्वान्तरतमाय ते ।।११।।

(क) रवणाय नादस्वरूपाय रवस्य नादस्यान्तस्तस्मै, अविद्यमानोऽनुच्चार्यः स्थानकरणप्रयत्नै-रनभिगम्यो—रावो यस्य सोऽरावः, रौति तच्छीलो रावी अरावश्चासौ रावी (च) तस्मै अनाहतनादरूपाय।

(ख) मायीयया वाचानुच्चार्यस्यापि परमेश्वरस्य सकलविमर्शोल्लासबीजभूतत्वेन रावित्व-मिति।

(ग) अरावराविणे-अनाहतनादरूपाय।

---

१. 'सर्वपाशापहारिणे'—इत्यपि पाठः।

(घ) श्रीस्वच्छन्दतन्त्रे :—

नादं वै व्यापकं ध्यायेदहोरात्रायनेषु च ।
नाड्याधारस्तु नादो वै भित्त्वा सर्वमिदं जगत् ॥
अधःशक्त्या विनिर्गत्य यावद् ब्रह्माणमूर्ध्वतः ।
नाड्या ब्रह्मविले लीनस्त्वव्यक्तध्वनिरक्षरः ।
नदते सर्वभूतेषु शिवशक्त्या त्वधिष्ठितः ॥ इति ॥११॥

नाद, नादान्त, अनाहत, नित्य, सुप्रबुद्ध एवं सर्वान्तरतम—सर्वान्तर्यामी के लिये नमस्कार हो ॥११॥

घोष्याय परनादान्तश्चराय खचराय ते ।
नमो वाक्पतये तुभ्यं भवाय भवभेदिने ॥१२॥

(क) घोषणीयो घोष्यः पठितव्यः परस्य नादस्यान्तश्चरोऽधिष्ठाता खे भावशून्ये चरति तदाविष्टो भवति अत एव वाचाम्पतिः ॥१२॥

घोषणीय, परनाद के अधिष्ठाता, भावशून्य में विचरण करनेवाले, वाणी के स्वामी, संसाररूप शिव तथा संसार के बन्धन से छुड़ानेवाले प्रभु, बहुरूप के लिये नमस्कार हो ॥१२॥

रमणाय रतीशाङ्गदाहिने चित्रकर्मणे ।
नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ॥१३॥

(क) रमयति ह्लादयति इति रमणः ।

(ख) रतीशः कामदेवः — तदङ्गस्य तच्छरीरस्य दाहिने । चित्राणि अनन्तप्रकार-वैचित्र्ययुक्तानि सृष्ट्यादि-कृत्य-पञ्चकमयानि कर्माणि यस्य, तस्मै नमः ।

(घ) भेदोल्लासहेतुः स्वातन्त्र्यशक्तिर्माया यस्यास्ति स चिद्रूपत्वाद् विशुद्धः । मायावी व्याजी च कथं विशुद्ध इति विरोधाभासः । एवमन्यत्र सर्वस्यागोचरः प्रकाशघनस्वात्मरूपः ध्यानादिनिष्ठैरप्यलक्ष्यः स्वातन्त्र्याद् गृहीतविश्वाकारः, अत एव चित्रं विचित्रमाश्चर्यरूपञ्च कर्म यस्य, तस्मै चित्रकर्मणे ।

समस्त चराचर में रमण करनेवाले, कामदेव को भस्म करनेवाले, अनन्त प्रकार की विचित्रता से युक्त सृष्टि, स्थिति, संहार, निग्रह और अनुग्रहरूप कर्मवाले, पार्वती के पति, विश्व के कर्ता एवं महात्मा (श्रीस्वच्छन्दनाथ) के लिये नमस्कार हो ॥१३॥

नमः पारप्रतिष्ठाय सर्वान्तपदगाय ते ।
नमः समस्ततत्त्वाध्व-व्यापिने चित्स्वरूपिणे ॥१४॥

(क) तमसो यः पारः पर्यन्तो निष्कासनं प्रकाशस्तत्र प्रतिष्ठा यस्य स्वप्रकाशरूपाय । यदुक्तम्—

महतस्तमसः पारे पुरुषं ज्वलनप्रभम् ।
यं ज्ञात्वा मुच्यते जन्तुर्घोरात् संसारबन्धनात् ॥ इति

सर्वेषामन्तः सर्वान्तः सर्वान्तं च तत्पदं तत्र गच्छतीति तस्मै सर्वोपाधिवर्जिताय ।

(ख) समस्तानि षट्त्रिंशत्तत्त्वानि समस्तांश्च पद-मन्त्र-वर्ण-भुवनतत्त्वकलात्मकान् षडध्वनो व्याप्नोतीति तच्छीलस्तस्मै चित्स्वरूपाय नमः ।

(ग) सर्वान्तपदगाय उपाधिरहिताय ।

(घ) चित्स्वरूपिणे पूर्णाऽहन्तापरामर्शमयत्वाच्चित्स्वरूपस्तस्मै नमः । आणवं मायीयं च मलं देहाद्यभिमानरूपमज्ञानम् ॥१४॥

स्वप्रकाशरूप, सर्वोपाधि रहित, छत्तीस तत्त्व; पद, मन्त्र, वर्ण, भुवन, तत्त्व और कलात्मक छह अध्वों में प्राप्त तथा चित्स्वरूप के लिये नमस्कार हो ॥१४॥

रेवद्वराय रुद्राय नमस्तेऽरूपरूपिणे ।
परापरपरिस्पन्द-मन्दिराय नमो नमः ॥१५॥

(क) रे (याँ) विद्यंते येषां ते रेवन्तः, रेवतां मध्ये वरः उत्कृष्टः, रोदयति मोहयतीति रुद्रः, अरूपरूपिणे रूपातीताय, चिन्मयाय, परापरो यः परिस्पन्दः उल्लासः परः शान्तः शिवस्वभावोऽपर उदितशक्तिस्वभावस्तयोरुल्लासस्य मन्दिरं विश्रान्तिस्थानं तस्मै ।

(ग) परापरपरिस्पन्दमन्दिराय षट्त्रिंशत्तत्त्वानि षडध्वानः पद-वर्ण-मन्त्र-भुवन-तत्त्व-कलात्मकाः, षडध्वनां व्यापकाय चित्स्वरूपत्वात् ।

(घ) अरूपरूपिणे — संसाररूपतया भाति, न पुनश्चिद्रूपशिव-व्यतिरिक्तं संसारस्य निजरूपं किञ्चिद्, एवमपि संसारान्निष्क्रान्तं, निःसंसारं तेनासंस्पृष्टरूपमिति विरोधाभासः । रुद्राय— परचैतन्यस्फारात्तु प्रवेशात्मनो रोधनस्य अशेषपाशाद्रावणस्य हेतोः ॥१५॥

रे अथवा र्-य् वर्णबीजवालों में उत्कृष्ट, रुद्र, रूपातीत, चिन्मय, शान्त एवं उदित शक्ति-स्वभाव के विश्रान्ति स्थान के लिये नमस्कार हो ॥१५॥

भरिताखिलविश्वाय योगगम्याय ते नमः ।
नमः सर्वेश्वरेशाय महाहंसाय शम्भवे ॥१६॥

(क) भरितं स्वैश्वर्यशक्त्याऽखिलं विश्वं चराचररूपं तन्मयत्वादित्यर्थः । तस्मै महाहंसाय — "शिवो धर्मेण हंसः" इत्युक्तनीत्या परमात्मस्वरूपाय चिद्रूपत्वात् ।

(घ) योगगम्याय—योगेन चित्तवृत्तिनिरोधेन गम्यः तस्मै ॥१६॥

अपनी ऐश्वर्य शक्ति से अखिल विश्व का भरण-पोषण करनेवाले चराचर-रूप, चित्तवृत्ति निरोधरूप योग के द्वारा ज्ञेय एवं प्राप्त, सर्वेश्वर एवं महाहंस-चिद्रूप भगवान् शिव के लिये नमस्कार हो ॥१६॥

चर्च्याय चर्चनीयाय चर्चकाय चराय ते।
रवीन्दु-सन्धिसंस्थाय महाचक्रेश ते नमः ॥१७॥

(क) चर्च्यायेति— मन्त्राक्षरहानिहेतुत्वादपपाठः। "शर्वायेति पाठः" एष सङ्गतः। चर्चितु-मुपपद्यसे त्वमेव चर्च्यः, चर्चकाय=चेतकस्वभावाय, चराय=स्पन्दात्मने, रवीन्द्वोः—प्राणापानयो, यः सन्धिस्तत्र सम्यक् स्थानं यस्य तस्मै प्राणापानोभयपथगामिने।

(ख) कथमपपाठ इति न स्पष्टीकृतं टीकाकृता।

(घ) भगवद्भक्तेरेव चर्वणपरामर्शानन्तरमेव जीवन्मुक्त्याख्यः अनन्तरः अव्यवहितो रसश्च-र्वणानन्दः ॥१७॥

स्मरणीय चर्चा-परामर्श के योग्य, चेतन-स्वभाव, स्पन्दात्मा तथा प्राणापान की सन्धि में स्थित अथवा प्राणापानरूप उभय मार्गगामी हे महाचक्रेश ! आपके लिये नमस्कार हो ॥१७॥

सर्वानुस्यूत-रूपाय सर्वाच्छादकशक्तये।
सर्वभक्ष्याय सर्वाय नमस्ते सर्ववेदिने ॥१८॥

(क) सर्वत्रानुस्यूतं रूपमोतत्वादन्तश्चारि यस्य, सर्वत्राच्छादिका स्रोतोरूपा शक्तिर्यस्य तस्मै सर्वाय सर्वरूपाय सर्वभक्ष्याय यो यो भावो भाव इतिवत् सर्वभक्ष्यत्वम्।

(ख) सर्वायेत्यार्षः पाठः, शर्वायेति वा पाठः, सर्वं वस्त्ववस्तु भूतं विश्वं प्रकाशान्तर्ब्रुडितमेव प्रकाशितुमलम्। अतोऽपरिच्छिन्नप्रकाशरूपस्य परमेश्वरस्य सर्वेषां प्रमेयावर्गाणामात्म-सात्करणरूपा मुक्तिः सिद्धा ॥१८॥

सभी में सर्वत्र अन्तर्व्याप्त रूपवाले, सर्वत्र आच्छादिका-स्रोतोरूप शक्ति से सम्पन्न, सभी का अपने में संहरण करनेवाले, सर्वज्ञ तथा सर्वरूप के लिये नमस्कार हो ॥१८॥

रम्याय वल्लभाक्रान्त-देहार्धाय विनोदिने।
नमः प्रपन्नदुष्प्राप्यसौभाग्यफलदायिने ॥१९॥

(क) गतार्थमेतत्।

(ख) वल्लभाक्रान्तेति—अर्धनारीश्वररूपाय, प्रपन्नेभ्यः शरणागतेभ्यो दुष्प्राप्यस्य सौभाग्य-फलस्य विचित्रभोगमोक्षात्मकस्य दायिने ॥१९॥

रमणीय, अर्धनारीश्वर, विनोदी तथा शरणागत भक्तों को कठिनाई से प्राप्त होने वाले भोग-मोक्षात्मक सौभाग्य के दाता भगवान् स्वच्छन्दनाथ के लिये नमस्कार हो ॥१९॥

तन्महेशाय तत्त्वार्थ-वेदिने भवभेदिने।
महाभैरवनाथाय भक्तिगम्याय ते नमः ॥२०॥

(क) गतार्थमेतत् ।

(ख) तत्त्वार्थं वास्तविकमर्थं वेत्तीति तच्छीलस्तस्मै, भवस्य संसारस्य संसरणस्य भेदिने विनाशकाय, भैरवास्तावदभेददृष्टिभाजः सिद्धाः, महाभैरवाणां नाथः स्वयं परमेश्वर एव । भक्त्योपायभूतया गम्यः साक्षात्कार्योऽसौ ।

(घ) विद्यारूपस्याविद्यारूपस्य चोभयस्यापि तत्त्वं विन्दति तस्मै तत्त्वार्थवेदिने, समावेशरसानुविद्धव्यापारया भक्त्या गम्यस्तस्मै भक्तिगम्याय ॥२०॥

विद्या और अविद्यारूप उभयविध तत्त्व के वास्तविक अर्थ के वेत्ता, बार-बार के जन्म-मरणरूप बन्धन को नष्ट करनेवाले, समावेशरसानुविद्ध व्यापारशालिनी भक्ति से ज्ञेय तथा महेश्वर उन महाभैरवनाथ के लिये नमस्कार हो ॥२०॥

शक्ति-गर्भप्रबोधाय शरण्यायाशरीरिणे ।
शान्ति-पुष्टचादि-साध्यार्थ-साधकाय नमोऽस्तु ते ॥२१॥

(क) शक्तिर्विमर्शो गर्भः सारो यस्य, अत एव प्रकृष्टो बोधः प्रकाशः अत एवाशरीरः । शरणे साधुः शरण्यः शरण्यत्वं व्यक्तीकरोति, शान्तीत्यादिना शान्तिपुष्टचादयः साधनीया अर्था व्यापारास्तेषां साधकाय ।

(ख) शक्तिर्गर्भश्चासौ प्रबोधश्चेति तस्मै विमर्शनिर्भरशुद्धप्रकाशरूपाय ।

(घ) अशरीराय-शुद्धचिदेकरूपाय ॥२१॥

प्रकाश-विमर्शरूप, अशरीरी, शुद्धचिदेकरूप, शरणागतरक्षक तथा शान्ति-पुष्टि आदि कर्मों के साधक के लिये नमस्कार हो ॥२१॥

रक्तकुण्डलिनी-गर्भ-प्रबोधप्राप्तशक्तये ।
उत्स्फोटनापटुप्रौढपरमाक्षरमूर्तये ॥२२॥

(क) रक्ता कुण्डलिनी तस्या गर्भस्तत्र प्रबोधस्तेन प्राप्ता शक्तिः सामर्थ्यं यस्य, उत्स्फोटानायां विश्वस्फारविषये पटु कृत्वा प्रौढा परमाक्षरमयी मूर्तिर्यस्य तस्मै उद्रिक्तरूपाय ॥२२॥

उन्निद्र कुण्डलिनी के अन्तःप्रबोध से सामर्थ्यशाली तथा विश्व-विस्तार में पटु एवं प्रौढ, परमाक्षररूप के लिये नमस्कार हो ॥२२॥

समस्तव्यस्तसङ्ग्रस्त-रश्मिजालोदरात्मने ।
नमस्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ॥२३॥

(क) समस्तश्च व्यस्तश्च सम्यक् ग्रस्तमात्मसात्कृतं यद्रश्मिजालं शक्तिसमूहस्तस्योदरं तदात्मा यस्य विश्वं जलायमानं गर्भेऽन्तर्यस्य न तु जलस्यान्तर्वर्ति, मीनरूपिणे शक्तिरूपाय ।

(ख) महामीनत्वं शक्तेः कथमिति न प्रतिपादितम् । महामीनरूपेण नारायणेन प्राक् समुद्धृतं विश्वमिति हि प्रसिद्धम्, तेनोपमाव्यङ्ग्या स्यात् ।

(ग) महामीनरूपाय— यथा जडस्य जलस्य चेतनो मीनोऽन्तश्चारी भवति, तेन जडमपि जलं चेतनमिवाऽऽभासते तथा भगवतोऽपि जडस्य जगतोऽन्तश्चारित्वाज्जडमपि जगच्चेतनं प्रतिभाति ॥२३॥

समस्त और व्यस्तरूप रश्मिजालमय शक्तिसमूह को आत्मसात् करनेवाले तथा जलरूप विश्व को अपने अन्तर में धारण करनेवाले महामीनरूपी हे परमात्मा, आपके लिए नमस्कार हो ॥२३॥

(**विशेष**—जैसे जड़ जल में चेतन मत्स्य विचरण करता है, तो उससे वह जड़ जल भी चेतन प्रतीत होता है, उसी प्रकार चेतन परमात्मा के जड़ जगत् में व्याप्त होने के कारण जगत् भी चेतन प्रतीत होता है।)

रेवारणिसमुद्भूत-वह्निज्वालावभासिने ।
घनीभूतविकल्पात्मविश्वबन्धविलापिने ॥२४॥

(क) रेवृ, प्लवगतौ-रेवति-गच्छति सर्वत्र प्रसरति इति रेवा शक्तिः सैवारणिस्तस्याः सारभूताया वह्निज्वालास्ताभिरवभासते तच्छीलस्तस्मै। घनीभूतविकल्पात्मा यो विश्वबन्धस्तस्य विलापकाय।

(ख) रेवारणीति— स्वशक्त्युत्थज्वालाभिर्भासमानाय। घनीभूतेति— घनीभूतसङ्कल्पात्मकजगद्बन्धनाशिने ॥२४॥

भोगिनीस्यन्दनारूढि-प्रौढिमालब्ध-गर्विणे ।
नमस्ते सर्वभक्ष्याय परमामृत-लाभिने ॥२५॥

(क) भोगिनी कुण्डलिनी। पवनाधःस्था कुण्डलिनी शक्तिः सैव स्यन्दनं रथस्तस्यामधिरूढिस्ततः प्रौढिमा सर्वाकारमुन्मुखता तेन लब्धो गर्वोऽभिमानं येन, परामृतं मूर्धस्थानस्थश्चन्द्रस्तं लाभयति गमयति यः स तथा तस्मै।

(ख) प्रका॥ एव सर्वमन्तर्भूतमिति प्रकाशरूपस्य शिवस्य सर्वत्रौतप्रोतत्वेन सर्वभक्ष्यत्वम्, सर्वस्यापि आत्मसात्कारित्वम् ॥२५॥

रेवा-शक्तिरूप अरणि से उद्भूत वह्निज्वालाओं से भासित, घनीभूत, विकल्परूप विश्वबन्धन को नष्ट करनेवाले, कुण्डलिनीशक्ति के रथ पर आरूढ होने से प्राप्त प्रौढता से पूर्ण, शिरः-स्थित चन्द्रमा से विभूषित तथा सभी को आत्मसात् करनेवाले भगवान् बहुरूप के लिए नमस्कार हो ॥२४-२५॥

नफ-कोटिसमावेश-भरिताखिलसृष्टये ।
नमः शक्तिशरीराय कोठिद्वितयसङ्गिने ॥२६॥

(क) नफकोटीति मालिनी तदावेशवशेनैव हि परमेश्वरो निखिलशक्तिमयं विश्वं सृजति, अत एवोक्तम्। शक्तिशरीरायेति—अत एव शक्तिमल्लक्षणेन कोटिद्वितयेन युक्तः।

(ख) नादि-फान्त-वर्णरूपा हि मालिनी ॥२६॥

न—आदि से **फ**—अन्त (अर्थात् न-प-फ) वर्णरूप मालिनी के आवेश से पूर्ण होकर सकल सृष्टि की रचना करनेवाले, शक्ति-युक्त हे अर्धनारीश्वरमय शरीर-धारी आपके लिए नमस्कार हो ॥२६॥

महामोहमलाक्रान्तजीववर्गविबोधिने ।
महेश्वराय जगतां नमोऽकारणबन्धवे[1] ॥२७॥

(क) गतार्थमेतत् ।

(ख) महामोहात्मकेन मलेनाक्रान्ता ये जीववर्गास्तेषां विबोधिने मोहाद् विबोधयतीति तच्छीलस्तस्मै, "प्रबोधिने" इत्यपि पाठः । जगतामकारणबन्धुः परमेश्वर एव निरपेक्षत्वात्तस्य । "नमः कारणबन्धवे । इति पाठे जगतां यानि कारणानि ब्रह्मादि-सदाशिवान्तानि पञ्च-ताश्रितसहितानि वा षट् तेषां बन्धवे परमुपकर्त्रे तेभ्यस्तत्तदैश्वर्यप्रदात्रे ॥२७॥

महामोहात्मकमल से व्याप्त जीववर्ग को ज्ञानदान के द्वारा प्रबुद्ध बनानेवाले तथा प्राणिमात्र के अकारण-बन्धु अथवा जगत् के कारणरूप, ब्रह्मादि-शिवान्त सभी को विभिन्न ऐश्वर्य प्रदान करके उनका परम उपकार करनेवाले महेश्वर— शिव के लिए नमस्कार हो ॥२७॥

स्तेनोन्मूलनदक्षैक-स्मृतये विश्वमूर्तये ।
नमस्तेऽस्तु महादेवनाम्ने पर-स्वधात्मने ॥२८॥

(क) स्तेनानां मोहकानां प्रत्यवायानां चौराणां यदुन्मूलनं तत्र दक्षैका स्मृतिर्यस्य तस्मै परामृतरूपाय शिवाय चन्द्रमसे ।

(ग) विश्वमूर्तये—स्वातन्त्र्याद् गृहीतविश्वाकाराय, महादेवनाम्ने, देवः सृष्ट्यादिक्रीडापरः विश्वोत्कर्षशालितया विजिगीषुः अशेषव्यवहारप्रवर्तकः द्योतमानः सर्वस्य स्तोतव्यो गन्तव्यश्च । दीव्यतेः क्रीडाद्यर्थत्वात्, स च महान् ब्रह्मादीनामपि, सर्गादिहेतुत्वात् विश्वस्य च । अत एव महादेवनामा — चिदानन्दघनत्वात् परस्वधात्मने ॥२८॥

केवल स्मरण से ही विघ्नरूप चोरों का उन्मूलन करनेवाले, परामृतरूप एवं विश्वमूर्ति भगवान् महादेव के लिए नमस्कार है ॥२८॥

रुग्द्राविणे महावीर्यरुरुवंश-विनाशिने ।
रुद्राय द्रावितशेषबन्धनाय नमो नमः ॥२९॥

(क) रुजां मलानां द्राविणे, रुरवो विकल्पास्तेषां वंशः उत्पत्तिस्थानं मनः । अत एव विद्रावितान्यशेषाणि बन्धनानि येनेति । रुद्रनाम निरुक्तम् ।

---

१. तमः कारणबन्धवे—इत्यपि पाठः ।

(घ) चित्पदे रोदनाद् द्रावणाच्च रुद्रः ॥२६॥

रोगों अथवा मलों के निवारक, महान् पराक्रमी, विकल्पों के वंश के विनाशक तथा अशेष बन्धनों को नष्ट करनेवाले भगवान् रुद्र के लिये बार-बार नमस्कार हो ॥२६॥

द्रवत्पररसास्वाद-चर्वणोद्यतशक्तये ।
नमस्त्रिदशपूज्याय सर्वकारणहेतवे ॥३०॥

(क) द्रवत्याऽसौ परमरसो मूर्धन्यं परामृतं तस्यास्वादश्चर्वणं तत्र नित्योद्यता शक्तिर्यस्य, त्रिदशपूज्याय त्रिदशा अमरा इति स्पष्टोऽर्थः, त्रिभिरुपलक्षिता दश त्रिदश, त्रिदशत्वेन पूज्यः । **श्रीमहद्दर्शने :—"द्वादशोत्तीर्णदेवीधामरूपत्रयोदशमपररूपत्वेन पूज्यः"** इत्यर्थः । यदि वा त्रयोदश शब्दादयः । अयमर्थः :—

भूजलाम्बरचराः सखेचरा यो नवामृतचरुः स पञ्चमः ।
ते च पञ्च मिलितास्त्रयोदश, प्राशिताः खचरयोगिनीगणै"रिति—उक्त्या त्रयोदशभिश्चरुभिः पूज्यते भगवान् इति शब्दादीनामेव रहस्यद्रव्यैः प्रतिनिधित्वमामनन्त्याम्नायज्ञाः सर्वेषां कारणानां ब्रह्मादीनां कुलगतानां पञ्च-पञ्चानां हेतुः ॥३०॥

द्रवित होते हुए परमरस-परामृत के आस्वादन में सदा तत्पर ऐसी शक्ति-वाले, त्रि-दश-विध चरुरूप रहस्यद्रव्यों से पूज्य अथवा देवताओं से पूज्य तथा समस्त कारणों के भी कारणभूत उस परमात्मा के लिये नमस्कार हो ॥३०॥

रूपातीत नमस्तुभ्यं नमस्ते बहुरूपिणे ।
त्र्यम्बकाय त्रिधामान्तश्चारिणे चित्रचक्षुषे[1] ॥३१॥

(क) तिस्रोऽम्बिका ज्ञानादयः शक्तयो यस्य, यदुक्तम्—

"तिस्रो देव्यो यदा चैनं नित्यमेवाभ्युपासते । त्र्यम्बकस्तु ततो ज्ञेय" इति ।

"सूर्याचन्द्रमसौ वह्निस्त्रिधाम-परिकल्पिता"

इति नीत्या त्रयाणां रविशशिशिखिनां जगत्प्रकाशकानामन्तश्चारिणेऽधिष्ठात्रे—

"त्रिनेत्रकल्पना मह्यं तदर्थमिह चोद्यत"

इति नीत्या चित्राणि धामत्रयधारित्वादाश्चर्यरूपाणि त्रीणि च चक्षूंषि यस्य तस्मै ।

(घ) बहुरूपिणे—परमेश्वरः स्वच्छन्दो निष्कलोऽनाहतध्वनिपरमार्थमहामन्त्रवीर्यरूपोऽपि शिरोरूपाकारकलया षष्ठयेन सकारेण च घोरतरशक्तिचक्ररूपेण ब्रह्मविष्णुरुद्रान् ब्रह्मप्रकृतिमायाण्डानि जागरस्वप्नसुषुप्तानि प्रमेयप्रमाणप्रमातॄंश्चेति सृष्टिस्थितिसंहारविलयमात्रं

---

१. "चारिणे च त्रिचक्षुषे" इत्यपि पाठः ।

भेदमयं जगद् दर्शयति। व्याख्यास्यमानसतत्त्वतया बिन्द्वादिप्रमेयपरिपाट्या च घोर-रूपतया भेदाभेदमयेश्वर-सदाशिवानाश्रितादीन् विद्याशक्ति-अण्डद्वयवर्तिनस्तुर्यपदा-वस्थितान् क्रमात्क्रमं सातिशयात् सर्गस्थितिसंहारशक्त्याक्रान्तानाऽभासयति, उन्मना-शक्त्या तु घोररूपशक्तिचक्रपरमार्थतयाऽशेषतुर्यातीतपदारोहितया स्वात्ममयीकुर्वन् मोचयति-इति भगवतो बहुरूपस्य पदार्थद्वारेणेयान् स्फारो व्याख्यातः ॥३१॥

हे रूपातीत ! आपके लिये नमस्कार हो। ज्ञानादि तीन अम्बिकाशक्तियों से उपास्य, सूर्य, चन्द्र और अग्निरूप धामत्रय के अधिष्ठाता एवं आश्चर्यरूप नेत्रोंवाले भगवान् बहुरूप के लिये नमस्कार हो ।३१॥

पेशलोपायलभ्याय भक्तिभाजां महात्मनाम् ।
दुर्लभाय मलाक्रान्तचेतसां तु नमो नमः ॥३२॥

(क) गतार्थमेतत् ।

(ख) भक्तिभाजां महापुरुषाणां कृते परमेश्वरः प्राणायामादिकष्टराहित्येनैव पेशलैरुपायैः सरलैः सुखमयैः शाम्भवशक्त्यादिभिरुपायैर्लभ्यः साक्षात्कार्यः आणवमायीयात्मकघोरमला-क्रान्तचेतसां पुनर्दुर्लभः ॥३२॥

भक्तियुक्त महापुरुषों के लिये प्राणायामादि कष्टसाध्य उपायों के बिना ही, सरल शाम्भवशक्त्यादि उपायों से साक्षात्करणीय तथा आणव-मायीय स्वरूप घोर मलों से आक्रान्त चित्तवाले मनुष्यों के लिये दुर्लभ उस परमात्मा के लिये बार-बार नमस्कार हो ॥३२॥

भव-प्रदाय दुष्टानां भवाय भवभेदिने ।
भव्यानां त्वन्मयानां[1] तु सर्वदाय नमो नमः ॥३३॥

(क) भवति सर्वमस्मादिति भवः। भवञ्च भिनत्ति इति, सृष्टि-संहारकर्ता। भवं भूतिं भवन-मर्हन्तीति भव्याः। आरुरुक्षवस्त्वन्मया आरूढा विश्रान्तिजुषः। दुष्टानां भवं संसारं ददाति। भव्यानां कुशलमार्गप्रतिपन्नत्वेनारुरुक्षूणां भवं भिनत्ति, तदेवंरूपाणां च सर्वज्ञत्व-सर्वकर्तृत्वलक्षणपारमैश्वर्याभिव्यक्त्या सर्वप्रदस्तस्मै। भवत्यस्मात्सर्वमिति कृत्वा भवाय नमः ॥३३॥

दुष्टों को सांसारिक बन्धनों से कष्ट भोगने के लिये जन्म देने वाले, भव्य-जनों को बन्धन-मुक्त कराने के लिए जन्म-मरण से मुक्त करनेवाले तथा भगवद्-भक्ति परायण, उत्तममार्गानुगामी, मुमुक्षुओं को सर्वज्ञत्व एवं सर्वकर्तृत्वरूप पारमैश्वर्य की अभिव्यक्ति से सर्वस्व प्रदान करनेवाले भगवान् बहुरूप के लिये बार-बार नमस्कार हो ॥३३॥

---

१. 'तन्मयानाम्'—इत्यपि पाठः

अणूनां मुक्तये घोर-घोर-संसारदायिने।
घोरातिघोरमूढानां तिरस्कर्त्रे नमो नमः ॥३४॥

(क) अणूनां बद्धात्मनां मुक्तिहेतुमलपरिपाकाद्यर्थमतिघोरसंसारप्रदाय। यद्वा मुक्त्यर्थं संसार-खण्डयित्रे, घोरातिघोरमूढानां राजसातिराजसतामसानां, तिरस्कर्त्रे तिरोधायकाय। एतेन पूर्वं शान्तास्तथात्वे च सत्त्वोद्रेकान्मुक्त्यर्हा इति प्रतिपादितम्। इति शम्।

"इति बहुरूपगर्भस्तोत्रे श्रीमदनन्तशक्तेः कृतिः विषमपदसङ्केतः सम्पूर्णः।"

(ख) दो अवखण्डने, इत्यस्माद् धातोर्दायिने इति शब्दः।
इति श्रीबहुरूपगर्भस्तोत्रे श्रीमद्बलजिन्नाथपण्डितविरचिता टिप्पणी सम्पूर्णा।

(ग) इति श्रीबहुरूपगर्भस्तोत्रस्य श्रीगोविन्दभट्टकृतौ टिप्पणी सम्पूर्णा।

(घ) आणवं मायीयं देहाद्यभिमानरूपमज्ञानं तेषामणूनां घोराणाम् परचित्प्रथाभित्त्या भासिताहन्तेदन्ताभासकात्मकस्व-शक्तिदर्पणोट्टङ्कितमायादिक्षित्यन्तभेदप्रथाप्रदानाम्। उक्तञ्च 'श्रीमालिनीविजये' :—

विषयेष्वेव संलीनानधोधः पातयन्त्यणून्।
रुद्राणून् याः समालिङ्ग्य घोरतर्योऽपराः स्मृताः ॥
मिश्रकर्म-फलासक्ति पूर्ववज्जनयन्ति याः।
मुक्तिमार्गतिरोधिन्यस्ताः स्युः घोराः परापराः ॥

"श्रीपञ्चार्थप्रमाणे" तु :—

प्रोक्ता गोपतिपूर्वा ये रुद्रास्तु गहनान्तगाः।
ते तु घोराः समाख्याता नानाभुवनवासिनः ॥
विद्येश्वराद्यनन्तान्ता महामाहेश्वराश्च ये।
घोरघोरतरास्त्वन्ये विज्ञेयास्त्वध आश्रिताः ॥
मलं कर्म च मायीयमाणवमखिलं च यत्।
सर्वं हेयमिति प्रोक्तमिति··· ॥

इति श्रीबहुरूपगर्भस्तोत्रे श्रीमत्-शम्भुनाथ-राजवानविरचिता
टिप्पणी सम्पूर्णा।

वद्ध आत्माओं की मुक्ति के लिये अत्यन्त घोर संसार को देनेवाले अथवा मुक्ति हेतु संसार का खण्डन करनेवाले तथा घोर, अतिघोर एवं मूढ अथवा राजस, अतिराजस तथा तामसभाव के विनाशक परमात्मा के लिए बार-बार नमस्कार हो। ३४॥

उपसंहारः

सर्वकारण-कलापकल्पितोल्लास-सङ्कुलसमाधिविष्टराम् ।
हार्दकोकनदसंस्थितामपि, तां प्रणौमि शिववल्लभामजाम् ॥

(क) हार्दकोकनदे साधकानां हृदयकमले संस्थितामपि सर्वेषां ब्रह्मादीनां कारणानां यः कलापः समूहः तेन कल्पितः प्रादुर्भावितो य उल्लासः स्वात्मचमत्कारानन्दस्तेन सङ्कुलो भरितो यस्तेषां समाधिः परः शिवसमावेशः, स एव विष्टरः आसनं विश्रान्तिधाम यस्यास्तामजामुत्पत्तिरहितां नित्याम् अ-इति अनुत्तरतो जायमानां वाऽऽनन्दाख्यामिच्छाख्यां वा त्वां स्वसंवेदनसाक्षात्कार्यां शिववल्लभां शक्तिसुन्दरीं प्रणमामि ।

साधकों के हृदयकमल में स्थित होते हुए भी ब्रह्मादि सर्व कारण समूह से प्रकटित उल्लासजन्य स्वात्म-चमत्काररूप आनन्द से परिपूर्ण समाधिवाले शिव का आसन ही जिसका विश्रामस्थान है, उस उत्पत्तिरहित-अजा, आनन्दरूपा, शिविवल्लभा, शक्तिसुन्दरी को मैं प्रणाम करता हूँ ।

सर्वजन्तुहृदयाब्जमण्डलोद्भूतभावमधुपान-लम्पटाम् ।
वर्णभेदविभवान्तरस्थितां, तां प्रणौमि शिववल्लभामजाम् ॥

सर्वे ब्रह्मादयः स्थावरान्ता जन्तवः प्राणिनस्तेषां हृदयकमलमण्डलेषु सततं स्पन्दनिर्भरे समुद्भूता ये विविधविचित्र-विकल्पात्मका भावास्तद्रूपं यन्मधु मद्यं तस्य पाने लम्पटां विविध-विकल्पकल्पनास्वादनव्यसनिनीम् ।

यथोक्तं स्पन्दशास्त्रे :—

शब्दराशि-समुत्थस्य, शक्तिवर्गस्य भोग्यताम् ।
कला-विलुप्तविभवो, गतः सन् स पशुः स्मृतः ॥ इति ।

अकारादि-हकारान्तानां वर्णानां यो भेदः स एव विभव ऐश्वर्यं विसर्गानन्दात्मकं तदनन्तरवस्थितामोतप्रोतत्वेन व्यापिनीं, त्वां मातृकारूपिणीं शक्तिसुन्दरीं प्रणमामीति ।

समस्त ब्रह्मादि-स्थावरान्त जन्तु जिसके हृदय-कमल मण्डलों में निरन्तर स्पन्दन होने से उत्पन्न विविध, विचित्र विकल्पात्मक भावरूप मधु—मद्य के पान में तत्पर तथा अकारादि हकारान्त वर्णों के भेदरूप ऐश्वर्य में व्याप्त रहनेवाली मातृकारूपिणि उस शिववल्लभा भगवती अजा को मैं प्रणाम करता हूँ ।

[फलश्रुतः]

इत्येवं स्तोत्रराजेशं, महाभैरवभाषितम् ।
तन संशयेति। तनुः=शरीरं संशयरूपम्। मनः शुनहा=श्वान इव चेष्टते। शरीरं प्रतिदिनं याति। काल आयुर्हरति। डाँग=एकाविद्यायां सर्वे वसन्ति जीवाः। मित्र=प्रिय, केषां कुशलं पृच्छसीति भावः ।।१५३।।

शरीर संशय रूप हैं और मन की प्रवृत्ति कुत्ते जैसी है। शरीर प्रतिदिन नष्ट होता रहता है और काल आयुष्य का हरण करता है। अविद्या में सभी जीव रहते हैं; फिर किसकी कुशल पूछी जाय ? ।।१५३।।

साहु चोर चीन्हे नहीं अन्धा मति के हीन।
पारख बिना बिना सहे करि विचार हो भिन्न ।।१५४।।

साहु इति। साहुचौरयोः किं न जानासि ? साहुः=चिदात्माहम्; चौरः=देहोऽहमिदमेव निर्णयज्ञानं विना, अन्धा=बुद्धिहीनः, आत्मैवाहमिति पारखं बिना विनाशो भवति। अतो विचारं कुरु। एभ्यो भिन्नोऽहमिति जानीहीति भावः ।।१५४।।

'मैं चिदात्मा हूं' यह विचार स्तुत्य है, और 'मैं देह हूं' यह विचार गर्हित है। इन दोनों के अन्तर का निर्णय किए बिना मनुष्य अन्धा और बुद्धि-हीन है। उसका विनाश निश्चित है। यह सोचने योग्य है ।।१५४।।

गुरु सिकलीगर करि लेहु मन हि मसकला देइ।
शब्द बोलना छोलिके चित्त दर्पण करि लेइ ।।१५५।।

गुरु इति। सद्गुरुर्मुमुक्षो मलिनमानसं जीवत्वमुपनिषज्जन्यज्ञानमेव, मसकला[1], तेन मसकलेन पुनः पुनर्मोचयति। शब्द एव छोलना; छोलिके, चित्त दर्पण करि लेइ=आत्मैवाहमित्यभ्यासेन मुकुरवत् चित्तमुज्ज्वलं भवति, यथा सिकलीगर=असिमञ्जकः मसकलेनासिमुज्ज्वलं करोति तथा गुरुर्दयालुरात्मविद्यया मुमुक्षोरन्तः करणमलं मार्ज्जयति। परमानन्दं ददाति मुमुक्षवे इत्यर्थः ।।१५५।।

सिकलीगर को गुरु समझो जो मुमुक्षु के मलिन-मानस को उपनिषज्जन्य ज्ञान का माँजा देकर चमका देता है। शब्दों के फेर में पड़ना छोड़कर (अपने) चित्त को दर्पण बनाइए और उसमें आत्मा का प्रतिबिम्ब देखकर स्वयं को आत्म-स्वरूप समझिए। सिकलीगर के समान गुरु आत्मविद्या का उपदेश देकर अन्तःकरण का मैल धो डालता है और मुमुक्षु को परमात्मा का अनुभव कराता है ।।१५५।।

मूरख को समुझावते ज्ञान गाँठ का जाइ।
कोयला होय न ऊजरो नव मन साबुन लार ।।१५६।।

मूर्खेति। यदि गुरुर्मूर्खं ज्ञानोपदेशं ददाति=ज्ञापयति ततः स्वस्य ज्ञानं नश्यति। यद्वा, अज्ञानग्रन्थिः, अहंग्रन्थिः, कर्मग्रन्थिः, संशयग्रन्थिः। मूर्खस्य किं गतम् ? किमपि नैव नश्यति। स

---

१. तुलनीय—'मस्क्' गमने (जाना)।

ज्ञानी न भवति। यथा कोयला=कपटो यस्यान्तरे वर्तते, नवव्याकरणानि[1] शास्त्राणि पठित्वापि हृदयं शुद्धं न भवति ज्ञानं विनेति भावः ॥१५६॥

मूर्ख को ज्ञानोपदेश देना स्वयं का ज्ञान नष्ट करना है। मूर्ख के हृदय में चार प्रकार की गांठे रहती हैं, वे हैं—अज्ञान, अहंकार, कर्म और संशय की ग्रन्थियां। वह ज्ञानी नहीं हो सकता। चाहे जितना साबुन लगाने पर भी कोयला (अपना) रंग नहीं बदल सकता; उसी प्रकार मूर्ख का मन उज्ज्वल नहीं बन सकता। शास्त्र पढ़ने पर भी ज्ञान (अनुभव) के विना हृदय शुद्ध होना असम्भव ही है ॥१५६॥

गुरु बिचारा क्या करे जो शिष्य हि में है चूक।
शब्दबाण वेधे नहीं बाँस बजावे फूंक ॥१५७॥

गुरु इति। गुरुः शिष्यायोपनिषज्जन्यशब्दवाणेन विध्यति। बाणो= ब्रह्मशरः। स यस्मिन् न भिनत्ति, तर्हि गुरुः किं करोति? शिष्यस्य दोषः। यथा मुखेन शुष्कवंशं वादयति, पवनो बहिर्निष्क्रमति। स्थिरो न भवति, तद्वदिति भावः ॥१५७॥

यदि शिष्य ही गलती करता है तो बिचारे गुरु का क्या दोष? शब्दरूपी बाण यदि शिष्य को बींध नहीं सकता, उसका असर नहीं होता (तो गुरु तो निर्दोष ही है)। पोले बाँस में एक ओर से भरी फूंक दूसरी ओर निकल ही जाती है ॥१५७॥

मूढ़ कर्मिया नख शिख पाखर आहि[2]।
वाहनहारा का करे जो बाण न लागे ताहि ॥१५८॥

मूढेति। हे मूढ, अनेककर्म=सन्ध्योपासनादीनि करोषि त्वम्। अहं कर्मीत्यभिमानः? आनखाग्रशिखापर्यन्तं देहाभिमानो वर्तते। वाहनहारा=सद्गुरुर्वक्ति-'तत्त्वमसीति'। ब्रह्मैवाहमित्यस्मिन् लक्ष्ये यस्य मनो नैव तिष्ठति तस्य को दोषः; नैवेति भावः ॥१५८॥

मूर्ख मनुष्य सन्ध्योपासना आदि कर्मों के कारण कर्म-मार्ग में प्रवृत्त होता है। उसकी सारी देह में अभिमान व्याप्त रहता है। सद्गुरु द्वारा 'तू ब्रह्म ही है' इस उपदेश के देने पर भी उसका मन इसमें स्थिर नहीं होता, तो गुरु का कोई दोष नहीं। ॥१५८॥

सेमर का सुगना[3] छिहुले बैठा जाय।
चंचु सँवारे सिर धुनै वोए उसी का भाय ॥ १५९ ॥

सेमर इति। शाल्मलीव शरीरत्रयम्। तस्मिन् सुगना=शुकश्चिदाभासः पतितः। शरीरत्रयाभिमानी भवति; पुत्रकलत्रादीन् सेवमानः सत्यं मत्वा, चंचु=चित्तं, संसारे दीयते।

---

१. कदाचित् यहाँ 'न्यायव्याकरण' अभीष्ट है।

२. मूढ़ कर्मि माने नहीं नख-शिख पाखंड आदि (सं० बी० ब०)।

३. पा०- केश सूगना।

अहं कर्ताहं ज्ञातेति मन्यते। पुनरन्ते पश्चात्तापं करोति। किम् ? पुत्रकलत्रादयः सुखाय न भवन्ति। ततः शिरो धुनुते। परमानन्दमज्ञात्वा यथा शुकः शाल्मलिं बहुकालं फलेच्छया सेवते, पश्चान्निराशो भवति। किं यदा फले चञ्चुमार्दवतश्चञ्चुश्चूर्णतां गतः ? तूलं फलादुद्भवतीत्यभिप्रायः ॥१५९॥

शरीर-त्रय सेमर के फूल के समान है। उसके फूल देखने की अभिलाषा से तोता उसी के पास बैठा ही रहता है; ठीक उसी प्रकार मनुष्य अपना चित्त सदा संसार में देकर पुत्र, कलत्र आदि में मोहित हो जाता है, अन्त में उसे उसी तरह पश्चात्ताप करना पड़ता है, जैसे तोता उस फल में (बार-बार) प्रहार करके अपनी चोंच ही तोड़ डालता है ॥१५९॥

सुगना सेमर सेइया दुई ठेंठि की आस ।
ठेंठी फूटि चनाक दे सुगना चले निरास ॥१६०॥

सुगनेति। शुकः = जीवो देहोऽहमिति (विषयान्) सेवते। दुई ठेंठि = प्रवृत्तिः निवृत्तिश्च, यद्वा स्थूलसूक्ष्मशरीरे विनाशमाने । ठेंठी फूटीति। अन्ते देहो विनश्यति। शुको = देहाभिमानी जीवो निराशो भूत्वा गच्छति। शाल्मलिसेवी शुको यथा निराशो भवति, यद्वा देहभावं त्यक्त्वा ब्रह्मैवाहमिति विचारे निराशो भवेद् बुद्धिमानित्यर्थः ॥१६०॥

प्रवृत्ति और निवृत्ति मय अथवा विनाशशील स्थूल और सूक्ष्म शरीर की आशा में शुक रूपी मनुष्य सेमर-वृक्ष रूपी संसार में मग्न रहता है। शुक की भाँति देहाभिमानी जीव नष्ट हो ही जाता है ॥१६०॥

सुगना सेमर बेगि तजि धने विगूची पाँख ।
ऐसा सेमर सेइया जाके हृदय न आँख ॥१६१॥

सुगनेति। भोः शुक = जीव, वर्णाश्रमाभिमानं, शीघ्रं त्यज। ईदृशं देहाभिमानमज्ञानी सेवते। तस्य हृदये विज्ञानचक्षुर्न। अतः सावधानो भवेति भावः ॥१६१॥

अत एव हे शुकरूपी जीव, देह, वर्ण और आश्रम का अभिमान दूर कर के तू हृदय में अपने ज्ञान-नेत्र खोल। इस प्रकार के देहाभिमान के पीछे अज्ञानी ही पड़ता है। सावधान हो जा ॥१६१॥

चक्की चलती हौं देखा मेरे नयन आया रोय ।
दो पाटन के अन्तरे सालिम बचा न कोय ॥१६२॥

चक्कीति। भोः, संसारचक्रे कालवेगेन स्वस्वकर्म मार्गे सर्वे गच्छन्ति। दो पाटन = मायाऽविद्यान्तरे वर्तमाना जीवा अन्धेन नीयमाना यथान्धा गर्ते पतन्ति। सालिम इति। कालचक्रात्कश्चिन्न मुक्तः। अतो वैराग्यद्वाराऽभिमानं त्यज। आत्मैवाहमित्यभ्यासं कुर्वित्यर्थः ॥१६२॥

यह संसार-चक्र चलता देखकर मेरी आँखों में आँसू आ जाते हैं। माया और अविद्या इन दो पाटों के बीच जीव पिसे जा रहे हैं। काल-चक्र से कोई भी छूट नहीं सकता। अन्धे को ले जानावाला अन्धा भी उसके साथ गर्त में गिरता ही है।

अत: वैराग्य का आश्रय लेकर 'मैं आत्मा ही हूँ', यह अभ्यास कीजिए ॥१६२॥

लोग भरोसे कवन के बैठ रहे अरगाय ।
जियरहिं लूटत जम फिरे मेढ़हि लुटै कसाय ॥१६३॥

लोगेति। भो:, सर्वे जना: शृण्वन्तु। कस्याश्रयं कृत्वा स्थाणुरिव तिष्ठथ। पुत्रकलत्रादय: सत्यं नैव। यथा प्रपायामेकीभूत्वा, यम=कालस्वत्सहितान् सर्वान् लुटचति=भक्षयति। यथा पशुघ्नो वस्तमेषादीन्[1] मारयति, यद्वा, यम - रागद्वेषौ ज्ञानधनं मुष्णत इति भाव: ॥१६३॥

लोग किसके भरोसे चुपचाप बैठे हैं। पुत्र, कलत्र आदि का जमघट तो वैसा ही है जैसे प्याऊ पर सभी एकत्र होते हैं। काल तुम्हारे साथ ही सब का भक्षण करता ही है, जैसे कसाई बकरी-भेड़ों का अन्त कर डालता है। राग-द्वेष ज्ञान-धन का अन्त कर डालता है ॥१६३॥

जानि बूझि जड़ होय रहो बल तजि निर्बल होय ।
कहहिं कबिर तेहि सन्त के पला न पकरे कोय ॥१६४॥

जानि इति। सर्वशास्त्रं पठित्वा, ज्ञात्वा, मुहुर्मुहुर्विचार्य, पश्चाज्जडवत् भवति=तिष्ठति स्वात्मविचारे देहाभिमानं बलं त्यक्त्वा निर्बलो भवेति भाव:। कहेति। कबीर:=ब्रह्मरूप: साधु: को निषेधं करोति? न कोऽपीत्यर्थ:[2] ॥१६४॥

सभी शास्त्रों का मनन करने पर भी, जान बूझ कर चुप रहना ही श्रेयस्कर है। जिसने स्वात्म-विचार करके देहाभिमान का बल छोड़ दिया, उसका पल्ला कोई नहीं पकड़ सकता ॥१६४॥

हीरा सोइ सराहिये सहे जो घन का चोट ।
कपट कुरंगी मानवा परखत निकला खोट ॥१६५॥

हीरेति। सद्गुरो: समीपं वह्व आगच्छन्ति। स परीक्षां करोति। परीक्षणे कपटी वा निर्मलो वेति ज्ञायते। अयमात्मविद्याया ग्राहकोऽयं नेति। दृष्टान्तमाह हीरा इति। हीरापरि लोहघनस्य, चोट - उपरि आघातं ददाति। घनासक्त: स श्रेष्ठ:। स्फुटितस्स एव कुत्सित:। 'खोटा' इत्यर्थ: ॥१६५॥

सद्गुरु के समीप अनेक व्यक्ति जाते ही हैं। तब वह अपने परीक्षण से निश्चित करता है कि कौन योग्य है और कौन अयोग्य। घन की चोट से न फूटे वही सच्चा हीरा है ॥१६५॥

हाड़ जरत जैसे लाकरी केस जरे जैसे घास ।
कबिरा जरे रामरस कोठी जरे कपास ॥१६६॥

---

१. बस्त=बकरा (सं०)।

२. तुलनीय—भ० गी०, ३, १७।

हाड़ेति। भोः अस्थीन्यग्नाविन्धनं यथा, जरेति=दहति। तद्वच्च केशा जरन्ति शुष्कतृणवत् कबीराः=ज्ञानिनो रामरसमत्ताः विचाराग्नावन्तःकरणवासनां दहन्ति, मृण्मयकोष्ठचां कार्पासो यथा। भगवद्गीतासूक्तम्—'ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः[1]' इत्यर्थः ॥१६६॥

हड्डियां लकड़ी जैसी जल जाती हैं और केश कपास के समान आग पकड़ लेते हैं। कोठी के भीतर रखा कपास भी जलता ही है। उसी प्रकार सन्त लोग अन्तः-करण की वासना को भस्म कर डालते हैं। गीता में भी कहा ही है कि विद्वान् वही है जो ज्ञानाग्नि से अपने सभी कर्मों को भस्म कर देता है ॥१६६॥

पाँवहिं पहुनी नापते दरिया करते फाल।
हाथन्हि पर्वत तोलते तेहि धरि खायो काल ॥१६७॥

पाँवन्हि इति वैराग्यं ज्ञापयति। पृथ्वादिभिः राजभिः पृथिव्याभिमानः कृतः। तत्र पृथुना समीकृता; सगरात्मजैः सागराः कृताः; हिरण्याक्षादिभिः समुद्रास्फालनं कृतम्। स्वहस्तैः कैलासादिपर्वतोन्मानं कृतं रावणादिभिः। ते सर्वे कालेन भक्षिताः कथामात्रावशेषिता इति भावः॥१६७॥

सारी पृथ्वी अपने वश में करने वाले पृथु सरीखे राजा, सागरों का निर्माण करने वाले सगरात्मज और कैलास को अपने हाथों पर तौलने वाला रावण ये सभी काल के ग्रास बन ही गए ॥१६७॥

सन[2] कागद छूवो नहीं कलम धरो नहिं हाथ।
चारिहुँ युग के महातम मुखहिं जनाई बात ॥१६८॥

सनेति। ये पण्डिताः शास्त्रज्ञाः सर्वंशास्त्रं वेदं च पठित्वा चतुर्युगधर्म-नीतिवर्णाश्रम-मार्गं राजधर्म्मादि सर्वं पुराणेषु गायन्ति, यः कश्चिदनुभवानन्दी स्वहस्तेन पत्रं न, लेखनीं न, कस्यापि पुस्तकं गृह्णाति, चातुर्युगमाहात्म्यं धममार्गमनायासेन वाणीद्वारा वर्णयति, वर्णने विरोधो नैव, यथार्थं पठति। विद्याया अन्तोऽनुभवस्य (च) अन्तो नेति भाव.[3] ॥१६८॥

जिन्होंने स्याही, कागज और कलम का स्पर्श भी नहीं किया था ऐसे (उन) अनुभवी व्यक्तियों ने चारों युगों के धर्म, नीति, वर्णाश्रम आदि का वर्णन पुराण आदि ग्रन्थों में अपनी वाणी द्वारा कर दिया था। विद्या का अन्त है किन्तु अनुभव का नहीं ॥१६८॥

आपनि आपनि शीर की सभनि[4] लीनो मान।
हरि की बात दुरन्तरे परी न काहू जान ॥१६९॥

---

१. भ० गी०, ४, १९।

२. पा०—मसि।

३. इस साखी से जो निष्कर्ष निकाला है कि कबीर पढ़े लिखे नहीं थे, सिद्ध नहीं होता। व्याख्याकार की व्याख्या देखिए।

४, प०—सबहिन।

आपनि इति। लोके सर्वे जनाः स्वस्ववर्णाश्रमाभिमानं मन्यन्ते। अहं हरिरिति वार्त्तां दूरं वैकुण्ठदिषु ध्यायन्ति। हरिं न कश्चिज्जानातीत्यर्थः ॥१६६॥

वर्णाश्रम के सम्बन्ध में अपने-अपने विचार सबने कहे हैं किन्तु हरि के विषय में (निश्चित रूप से) कोई नहीं जानता। वे सभी (अग्रज) हरि का निवास वैकुण्ठ में मानकर उनका ध्यान करते हैं, किन्तु मैं स्वयं हरि हूं यह भूल ही जाते हैं ॥१६६॥

घाट भुलाना वाट बिनु वेष भुलानी कानि।
जाकी मांडी जगत महँ सो न परा पहिचानि ॥१७०॥

घाटेति। वाट=आत्मनि विचारं विना, घाट=देहोऽहमित्यभिमानेन गच्छन्ति सर्वे जनाः। वेषधारिणः सर्वे षट् दर्शनाः स्वस्ववेषपाषं(खं)डे सम्प्रदायपान्थमते महिताः। आब्रह्मस्तम्भपर्यन्तं जगन्मध्येऽनुस्यूतमेकं ब्रह्म सोऽहमिति यैर्न ज्ञायते इत्यर्थः ॥१७०॥

आत्म-विचार न करके स्वयं को देह मानने के भुलावे में सभी पड़े हैं। षट्-दर्शनों में रत सभी जन अपने अपने वेष धारण करके पाखण्ड और सम्प्रदाय-मतों में मोहित हैं. वे समस्त जगत् में व्याप्त 'सोऽहं' रूपी ब्रह्म को नहीं जानते ॥१७०॥

मूरख सों का कहिये शठ सों कहा बसाय।
पाहन में का मारना चोखे तीर नसाय ॥१७१॥

मूर्खेति। मूर्खं=देहाभिमानिनं प्रति गुरुः किं ब्रवीति? नैव। शठः=धूर्तो महान्; स कदाचिन्नैव मन्यते। यथा धनुर्धरः पाषाणे बाणं सन्धत्ते चेत्, बाणो भग्नो भवति। अतः पाषाण-वद्हृदये पुरुषे ज्ञानशरो न विद्ध्यतीति भावः ॥१७१॥

देहाभिमानी मूर्ख ही है; गुरु उसे क्या कहें। वह धूर्त है। कहा हुआ नहीं मानता; उसे (कुछ भी) कहना ही व्यर्थ ही है। जैसे पत्थर पर धनुर्धर के द्वारा छोड़ा हुआ तीर। पाषाण के समान (कठोर) जिसका हृदय है उसे ज्ञान-शर वेध नहीं कर सकता ॥१७१॥

जैसी गोली गुमज की नीच परे ठहराय।
ऐसा हृदया मूर्ख का शब्द नहीं ठहराय ॥१७२॥

जैसीति। गुम्भज=उच्चस्थानोपरि लोहस्य गोलाकारं सूक्ष्ममखण्डमारोपितम्, तन्न तिष्ठति, तद्वन्मूर्खस्य हृदयम्। तस्मिन्न शब्दज्ञानं तिष्ठतीत्यर्थः ॥१७२॥

जिस प्रकार किसी ऊँचे स्थल पर लोहे का गोला नहीं ठहर सकता, उसी भाँति मूर्ख के हृदय में शब्द (उपनिषद्) का ज्ञान घर नहीं कर सकता ॥१७२॥

ऊपर की दोऊ[1] गई हिय की गई हिराय।
कहहिं कबिर जाके चारों गईं तासो कहा बसाय ॥१७३॥

---

१. दीर्घ मात्रा का चिह्न इस अक्षर के ऊपर रेफ की तरह अंकित किया है।

ऊपरेति । उपरि=व्यवहारमार्गे नेत्रे उभे नष्टेति । हृदये विज्ञानमपि नष्टं यस्य स अन्ध एव । जाके इति । कबीरः=ज्ञानीत्थं ब्रवीति, यस्य चत्वार्यपि नेत्राणि स्फुटितानि-श्रुतिस्मृती, उभे नेत्रे[1]-गुरूपदेशो बुद्धिश्चेति, तस्यात्मज्ञानं कुतः स्यात् ? नैवेत्यर्थः ॥१७३॥

मूर्ख का ज्ञान उसी व्यक्ति के समान है जिसकी दोनों आँखें चली गई हों और हृदय का ज्ञान भी नष्ट हो गया हो । कबीर कहते हैं कि जिसकी बुद्धि ही नष्ट हो गई उसे वेद, स्मृति और गुरु के उपदेश से आत्मज्ञान कैसे हो सकता है ? ॥१७३॥

मैं रोवों एहि जगत को मोको रोवे न कोय ।
मोको रोवे सो जना जो शब्द-विवेकी होय ॥१७४॥

मैं रोवों इति । ज्ञात्रादिजगत्साक्षी अहम्, 'रु'=शब्दे, प्रेरकोऽहमेकः । मोको=मां ज्ञातारं जगन्न जानाति । कुतः ? जडत्वात् । मां=चैतन्यं यो जानाति स एव विवेकी । उपनिषद्वेत्ता=धीरो भवति ॥१७४॥

मैं जगत् का प्रेरक हूं पर मुझे कोई नहीं जानता। मुझे जो चैतन्य-रूप जानता है, वही सच्चा जानकार है। वही उपनिषदों का वेत्ता है ॥१७४॥

साहेब साहेब सब कहें मोहिं अँदेशा और ।
साहेब से परचा नहीं बैठहुगे केहि ठौर ॥१७५॥

साहेब इति । ये सर्वे शास्त्रज्ञा इतरे वा, साहेब=श्रेष्ठं नारायणं, रामं, कृष्णं, परोक्षं दूरे गायन्ति अन्यत्र वैकुण्ठादिषु । अँदेशा=आश्चर्यम्, । साहेब इति । अहं हरिरिदं सर्वमिति परिचयं विना कस्मिन् स्थाने तिष्ठति ? स्थिरो भवतीत्यर्थः ॥१७५॥

कोई तो नारायण को अपना स्वामी कहता है और कोई राम और कृष्ण को। किन्तु वे (भक्त) इन्हें परोक्ष ही समझ कर उनका गुण-गान करते हैं। यह आश्चर्य ही है। मैं स्वयं हो हरि हूँ, इस परिचय के बिना उनका कोई ठौर नहीं है। ॥१७५॥

केतिक दिन ए ही गए अनरूचे का नेह ।
ऊसर बोये नहिं जमे जो घन बरसे मेह ॥१७६॥

केतिक इति । भोः, ये सर्वे शालिग्रामार्च्चनं साधुब्राह्मणसेवादानपुण्यव्रतयोगयज्ञ-सन्ध्यादिकं सर्वं रुचि विना, स्वविचारं स्नेहं [च] विना कुर्वन्ति, बहवो दिवसा व्यतीताः ज्ञानं विना व्यर्थं गताः । यथोसरभूमौ बीजम्, उत्पन्न उत्पद्यते नैव । घनाः बहु वर्षन्ति तथापि नाङ्कुरोत्पत्तिरिति भावः ॥१७६॥

रुचि, सद्विचार और सच्चे स्नेह के बिना अर्चन, साधु और ब्राह्मणों की सेवा, दान-पुण्य, व्रत-योग, यज्ञ-याग और सन्ध्या आदि करने वाले अनेक व्यक्ति

---

१. दे०—श्रुतिस्मृती तु विप्राणां नयने द्वे प्रकीर्तिते (अत्रि-स्मृति, ३, ४५)।

हो गए, किन्तु ज्ञान के बिना (ना समझ से) यह सब व्यर्थ ही गया। यह ऊसर-भूमि में बीज बोने के समान है। वर्षा होने पर भी उस बीज में अंकुर उत्पन्न नहीं होता ॥१७६॥

हरि हीरा जन जोहरी सबनि पसारी हाट ।
जब आए जन पारखी तब हीरा की साट ॥१७७॥

हरि इति । वाचकज्ञाने दक्षा बहवः । सर्वशास्त्रज्ञैः, हाट=अनेकधर्मकर्मरुचिपूर्वकं व्यवहारमार्गो विस्तारितः । पुनः सभामध्येऽहं ब्रह्मज्ञानीति वदति । स्वान्तरे विचारो नैव । स तु किं ज्ञानी भवति ? नैव । अहं हरिः=प्रकाशरूपोऽहमिति यो वेत्ति स एव परीक्षकः, यथा शुकाचार्यो भगवान्, दत्तात्रेयादयश्च सर्वे, पारखीजनाः=ब्रह्मवेत्तारः । ततो हीरावदात्मज्ञानं मुमुक्षवे ददतीत्यर्थः ॥१७७॥

शास्त्रकारों ने अपनी-अपनी रुचि के अनुसार अनेक प्रकार के धर्म-कर्म आदि बतला कर व्यवहार-मार्ग का विस्तार किया है। उसके वाचक भी सभाओं में स्वयं को ब्रह्मज्ञानी बतलाते ही हैं। किन्तु उनके भीतर आत्म-विचार का अभाव ही है। शुकाचार्य और दत्तात्रेय आदि की भाँति जो स्वयं को प्रकाशमान हीरा जानने की अनुभूति रखते हैं, वे ही सच्चे पारखी हैं। उस प्रकार के साधु ही हीरे के समान आत्मज्ञान का उपदेश दे सकते हैं। ॥१७७॥

नहिं हीरा की बोरियां नहिं हंसन की पाँति ।
सिंघहु के लेहड़ा नहीं साधु न चले जमात ॥१७८॥

हीरेति । हीरा=वज्रक-नामकरत्नम् । तत्समूहः किं वृषभोष्ट्राश्वतरीष्वुपरि वाह्यते ? नैव । मानससरसि हंसानां पंक्तिः=समूहः कुत्र दृश्यते ? नैव। वने सिंहसमूहो मार्गे चलति ? नैव । सिंह एक एव तिष्ठति गच्छति वा । न द्वितीयः । एतत् सर्वं दृष्टान्तमुक्त्वा दार्ष्टान्तिकेन द्रढयति । साधुः=आत्मारामो ज्ञानी उष्ट्राश्वगजसेनयानकगोमुखसमाजैः सह बहुवेषपाषण(ख)ड-मध्ये न चलति। यश्चलति स साधुर्नैव । अत्र प्रमाणमात्मरहस्ये 'शैले शैले न माणिक्यं मौक्तिकं न गजे गजे । साधवो न हि सर्वत्र चन्दनं न वने वने'[1] ॥ इति प्रामाण्यात् सत्यम् ॥१७८॥

हीरे थैलों में नहीं रखे जाते, और हंसों की भी पंक्तियाँ नहीं होतीं। सिंह भी अकेला ही रहता है। सच्चे साधु एकाकी ही विचरते हैं; उनकी जमात नहीं होती। आत्माराम साधु के साथ हाथी, घोड़े, ऊँट, बाजे-गाजे आदि नहीं होते। कहा भी है कि माणिक, मोती, साधु और चन्दन के वन सब कहीं नहीं (विरले ही) होते हैं ॥१७८॥

---

१. चाणक्य-नीति, २, ९ ।

नव मन[1] दुग्ध बटोरिके टिपके भया विनास।
दूध फाटि काँजी भया भया घृतहु को नास ॥१७९॥

नव मनेति । नव मन=नवतत्त्ववासना मयोऽयं देहो,[1] दुग्धवत् बटोरि, बीजवत्=यत्र बीजे स्थूलो वसति । टिपके इति । आत्मैवाहमिति विचारे सा वासना विनश्यति, तदनन्तरं मलिनान्तःकरणचित्तं दुग्धं विनश्यति=भग्नं भवति । काँजी=विचारैकरूपो भवति । घृतहु= अन्तःकामनाऽविद्या विनश्यति, यथां पयसि विदीर्णे काँजी । ततो घृतं विनश्यतीति भावः । यद्वा, अज्ञस्याविद्यया दुग्धं=ज्ञानामृतं, घृतं=शान्तिर्विनश्यति ॥१७९॥

नव-तत्त्व-मय वासना का यह स्थूल शरीर दूध के समान है। इसमें आत्म-विचार का एक बिन्दु गिरने पर वासना नष्ट हो जाती है तब मलिन अन्तःकरण रूपी दूध फट जाता है और असद्विचार रूपी काँजी उत्पन्न होने पर (विद्यारूपी) घी नष्ट हो जाता है ॥१७९॥

जिव बिनु जीव जिवे नहीं जिव को जीव अधार।
जीव दया के पालिये पण्डित करहु विचार ॥१८०

जिव बिनु इति । जीवं विना जीवो न जीवति[2] । जीवस्याधारो जीवः । मनुष्याणां श्वासरहितमन्नादि प्रोक्तम् । पशूनां तृणं, तपस्विनां कन्दमूलादि, शिशूनां दुग्धं, पक्षिणां फल-कीटादि, सिंहस्य पशुभक्षणं, क्रव्यादानां क्रव्यमामिषं, देवानां हविः, पितृणां कव्यम्[3] । आत्म-नोऽन्नं मनःप्राणो ज्ञानिनामनुभवः । सर्वेषां भोजनं सकृदेव निर्मितं हरिणा । भोः पण्डित, जीव-दयां कुरु । मत्स्यमेषादीन् किं खादसि ? विचारं कुर्विति भावः ॥१८०॥

जीव का आधार जीव है; उसके बिना वह रह नहीं सकता। ईश्वर ने मनुष्य के लिए अन्न उत्पन्न किया है, और उसी प्रकार पशु, तपस्वी, शिशु, पक्षी, मांस-भोजी, देव, पितृ, ज्ञानी आदि के लिए क्रमशः तृण, कन्द-मूल, दूध, फल और कीड़े, पशु, हवि, कव्य और अनुभव आदि पैदा किए हैं। अतः हे पण्डित, जीवों पर दया कर, मछली बकरा आदि मत खा। विचार कर (देख) ॥१८०॥

हौं तो सब ही की[4] कही मो कहँ कोइ न जान ।
तब भी अच्छा अब भी अच्छा युग युग होउँ न आन ॥१८१॥

हौं तो इति । सर्वस्याहं साक्षी; ब्रह्मादीनां सर्गं विसर्गमहं कथयामि । बुद्धादिः कश्चिन्मां न जानाति । तब भी=भूतकाले, अक्षयरूपोऽहम् । वर्तमानकाले एकरसोऽहम् । भविष्य-

---

१. पंचतत्त्व (५), सात्त्विक, राजस, तामस मन (३) और अहंकार (१)=९ ।

२. जीवो जीवस्य जीवनम् (भागवत, १, १३, ४६) ।

३. देवान्नं हव्यम्; पित्रन्नं कव्यम् (अमरकोश) ।

४. ये दोनों अक्षर लिपिकार ने छोड़ दिए हैं, यद्यपि 'की' के पहले बाण-चिह्न अंकित है। यहाँ पूर्ति सं० बी० ब० से की गई है :

त्काले सर्वेषु व्यापी चिदहम्। 'सदेव सौम्येदमग्र आसीत्'।[१] युगे युगे भवामि-'धर्मसंस्थापनार्थाय सम्भवामि युगे युगे'[२] इति गीतोपनिषद्युक्तम्। कश्चिन्मत्तः परं न; 'एकोऽहं बहु स्याम्; बहव एको भवामी'ति श्रुतेः ॥१८१॥

मैं सब का साक्षी हूँ। ब्रह्म आदि के सर्ग-विसर्ग कहता हूँ। मैं भूत काल में अक्षय-स्वरूप, वर्तमान में एक-रस और भविष्यत् में सर्वव्यापी 'चित्' हूँ। मुझ से पर कोई नहीं है। मैं एक से अनेक और फिर अनेक से एक होता हूँ। यही गीता में भगवान् की उक्ति है ॥१८१॥

प्रकट कहौं तो मारिया परदा लखे न कोय।
सहना छपा पुवार तर को कह बैरी होय ॥१८२॥

प्रकटेति। कस्मैचिदहं ब्रह्मैवाहमिति साक्षात्कारं वदामि चेत्तर्ह्यज्ञो विषादं करोति कुप्यति च। परदा - अविद्यया स्वविचारो न दृश्यते। सहना=सच्चिदात्मा; पमार=अविद्यान्तरे देहाभिमाने विक्षिप्तो भवति। स्वसच्चिदानन्दं विस्मरति। तं प्रति 'तत्त्वमसी'ति कथनेन शत्रुः स भवति। तस्मान्न वदामीति भावः ॥१८२॥

'मैं ब्रह्म ही हूँ' यह कहने पर मूर्ख मनुष्य विषण्ण और क्रुद्ध हो जाता है। वह (अपनी) अविद्या के कारण सोच नहीं सकता। वह सच्चिदानन्द को भूल जाता है। उसे 'तत्त्वमसि' का उपदेश देकर शत्रुता क्यों की जाय? अतः (ऐसे प्रसंगों में) चुप रहना ही ठीक है ॥१८२॥

कलि खोटा जग आँधरा शब्द न माने कोय।
जाहि कहौं हित आपना सो उंठि बैरी होय। १८३॥

कलीति। भोः, अस्मिन् कलौ जनाः बहवः कुत्सिताः मन्दाः सुमन्दमतयो मन्दभाग्याः। जग आँधरा=विज्ञानचक्षूरहिताः। 'तत्त्वमसि' इति शब्दं कं प्रति वदामि तर्हि न मन्यते कश्चित्। आत्मैवाहमिति हितोपदेशं ब्रवीमि, तर्ह्यज्ञान्युत्थाय शत्रुवदाचरति। अतो मुमुक्षुं प्रति वक्तव्या ब्रह्मविद्येत्यर्थः ॥१८३॥

कलि-काल में जन कुत्सित होते हैं और जग अन्धा है। वह विज्ञान-चक्षु से हीन है। 'तत्त्वमसि' का उपदेश किसी को देने पर वह उसे मानने को तैयार नहीं होता। 'मैं आत्मा ही हूँ' यह हितावह उपदेश देने पर अज्ञानी उठकर शत्रु बन जाता है। अतः ब्रह्मविद्या का उपदेश मुमुक्षु को ही देना चाहिए ॥१८३॥

देश विदेश हम फिरे मन ई भरा सुकाल।
जाके ढूँढत मैं फिरौं ताके परा दुकाल ॥१८५(१८४)॥[३]

---

१. छां० उ०, ६, २, १ आदि।

२. भ० गी०, ४, ८।

३. लेखक ने प्रमाद-वश यहाँ १८४ के बदले १८५ लिखा है। यह जानने का कोई साधन नहीं

देशेति। भोः यत् पृथिव्यां सर्वत्र देशे विदेशेषु च भ्रमामि, अनन्तकोटिशो मनुष्य-समुदायो मया दृष्टः, शास्त्रज्ञा बहवः षड्जादिवेत्तारो[1] वाचनज्ञाने कुशलाः। ईदृशानां सुकाल=सुभिक्षमस्ति। आत्मारामं ज्ञानिनं तरणतारणरूपमेतद्गुणयुक्तमहं मृग्यामि सर्वत्र। तेषां दुकाल=दुर्भिक्षं वर्तते। 'वासुदेवः सर्वमिति स महात्मा सुदुर्लभः'[2] इति गीतोपनिषद्युक्तम् ॥१८५(१८४)॥

देश और विदेश में भ्रमण करने पर मैंने ऐसे करोड़ों (अनेक) व्यक्ति देखे, जिनमें अनेक शास्त्रज्ञ हैं और वाचन-ज्ञान (व्याख्यान) में भी पटु हैं। किन्तु जिस तरण-तारण, आत्माराम ज्ञानी की खोज में मैं हूँ, वह नहीं मिला। गीता में भी कहा है कि 'सब कुछ वासुदेव ही हैं'—यह जानने वाला व्यक्ति दुर्लभ ही है ॥१८५(१८४)॥

फहम आगे फहम पीछे फहम बायें डेरे।
फहम पर जो फहम करे सोइ फहम है मेरे ॥१८६॥

फहमेति। फहम=आत्मा सर्वत्र राजते— अग्रे, पृष्ठे, वामे, दक्षिणे, आसमन्तादधः, ऊर्ध्वं पिण्डब्रह्माण्डे व्यापकोऽहं स ब्रह्मैवाहमस्मीति मे मतिः। अतः श्रेष्ठोऽहमिति भावः ॥१८६॥

आत्मा सब कहीं विद्यमान है—आगे, पीछे, दाएँ, बाएँ, ऊपर और नीचे। पिण्ड और ब्रह्माण्ड व्यापक मैं ब्रह्म ही हूँ। अतः मैं सर्व-श्रेष्ठ हूँ ॥१८६॥

हद चले ते मानवा बेहद चले ते साधु।
हद बेहद दोनों तजे ताकी मती अगाधु ॥१८७॥

हदेति। हदे=शास्त्रप्रमाणे प्रवृत्तौ मनुजाश्चलन्ति ते श्रेष्ठाः। बेहदे=निवृत्तिमार्गे विधिनिषेधरहिते ये चलन्ति ते साधवः। हदं विहदमुभयं त्यक्त्वा ये, उपशमे - निर्विकल्पक-शान्तिरूपसमाधौ रमन्ति(न्ते) तेषामगाधा मतिः। सैव लोकवन्दनीया भवति। सर्वत्र त एव पूज्या भवन्तीति भावः ॥१८७॥

शास्त्र-प्रमाण के अनुसार, जो मनुष्य प्रवृत्ति-मार्ग पर चलते हैं, वे श्रेष्ठ हैं। निवृत्ति-मार्ग का अनुसरण करने वाले (आत्मानुभूति को महत्त्व देने वाले) साधु हैं। प्रवृत्ति और निवृत्ति इन दोनों मार्गों को छोड़ कर जो निर्विकल्प शान्त समाधि में रममाण हैं, उनकी मति अगाध है। वे संसार में वन्दनीय और पूजनीय हैं॥१८७॥

समुझे की गति एक है जिहि देखी सब ठौर।
कहँहि कबिर ये बीच के कहैं और की और[3] ॥१८८॥

कि एक साखी छोड़ दी है या केवल संख्या बढ़ा दी है। यहाँ लेखक का ही क्रम आगे जारी रखा है।

१. षड्शास्त्रवेत्तारः (?) २. भ० गी०, ७, १९।

३. पोथी में इन दोनों स्थानों पर 'अवर' लिखा है।

समुझे इति। भोः, निश्चयात्मिका मतिरेकैव, यथा सर्वं दृश्यते 'सर्वं खल्विदं ब्रह्मेति'। ब्रह्मैवाहमिति विचारं कुरुते। कहेति। कबीरः=आत्मारामो वदति— भोः, येऽन्तरिता जनास्तेऽन्यदन्यद्भ्रमात्कथयन्ति। अत्र प्रमाणं रामगीतासूपनिषत्सूक्तम्—यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः। असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्[१] ॥१८८॥

निश्चयात्मिका बुद्धि एक ही है जिससे सब कुछ दृष्टिगोचर होता है। अन्तरित जन भ्रम के कारण वस्तु को अवस्तु (अन्य) ही बतलाते हैं। जैसा कि रामगीता में भी कहा है, भ्रम के कारण जो वस्तु अन्य ही दिखाई देती है उसे 'अध्यास' कहते हैं, जैसे असर्पभूत रज्जु में सर्प की भावना। वैसा ही ईश्वर में जगत् है ॥१८८॥

राह बिचारी क्या करे जो पन्थि न चले सुधारि।
अपनी मारग छाँडि के फिरे उजारि उजारि ॥१८९॥

राहेति। राह=मार्गः; पन्थी=ब्रह्मपथमाहर्तुमिच्छुः। स ब्रह्मविद्यामार्गे न चलति चेत्तदा मार्गस्य को दोषः? अपनी=स्वविचारमार्गं विहाय देहाभिमानमार्गेऽन्यत्रान्यत्र भ्रमतीत्यर्थः ॥१८९॥

ब्रह्म-पद की प्राप्ति का इच्छुक यदि ब्रह्म-मार्ग पर न चले तो मार्ग का क्या दोष है? वह अपना (विचार-) मार्ग छोड़ कर देहाभिमान के मार्ग में भटकता रहता है ॥१८९॥

जो मोहि जाने ताहि मैं जानौं। लोक वेद का कहा न मानौं ॥१९०॥

जो मोहिं इति। यो मत्स्वरूपं जानाति तमहं जानामि। लोकवेदोक्तं न मन्ये। लोकवेदात्परोऽहम्। अत्र भगवद्गीतोपनिषद्युक्तम्—'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्'[२] इति भावः ॥१९०॥

जो मुझे जानता है उसे मैं जानता हूँ। मैं लोक और वेद से परे हूँ। गीता में भी कहा है—जो जिस रूप में मुझे भजता है मैं (भी) उसी रूप में उसे भजता हूँ ॥१९०॥

बोली हमारी पूर्व की हमें लखे नहिं कोय[३]।
हमें लखे सो जना जो धुर पूर्वीआ होय ॥१९१॥

---

१. रामगीता, श्लोक ३७।

२. भ० गी०, ४, ११।

३. इस साखी में 'पूरबी' शब्द को लेकर माना गया है कि कबीर 'पूर्व' दिशा के निवासी थे। किन्तु बोधानन्द की व्याख्या के अनुसार इस मत की पुष्टि नहीं होती। राघवदास (साखी सं० १९४) और पूरननास (साखी सं० १९४) से भी इस भ्रान्त मत की पुष्टि नहीं होती है।

बोली इति। यत्पूर्वं ब्रह्म तदहमिति सत्यम्। बोली हमारी 'तत्त्वमस्यादि' वाक्यं मम। अज्ञानी मे वाक्यं स्वरूपं च न जानाति। यादृशं तादृशमेव जानीते। य आत्मविद्याधुरीणः स मां वेत्ति स्वान्तरेण न त्वन्य इति भावः ॥१६१॥

हमारा कथन जैसा पहले था, वैसा ही (आज भी) है। वह यही कि 'तू वही है'। अज्ञानी मेरा वाक्य और मेरा असली स्वरूप नहीं जानता। जैसा वह (ऊपर से) देखता है, वैसा ही जानता है। आत्म-विद्या में पारंगत व्यक्ति ही मेरा यथार्थ स्वरूप जान सकता है ॥१६१॥

सब ही ते लघुता भली लघुता ते सब होय।
ज्यों द्वितीया के चन्द्रमा शीश नवावै सब कोय ॥१६२॥

सब इति। आब्रह्मतृणकीटमशकश्वानगोखराश्वगजपर्यन्तं सर्वं प्रणमेत्, ब्रह्मदृष्ट्येति। लघुता=नम्रता श्रेष्ठा। लघुतेति। लघोर्भावो लघुता। लघुतया सर्वं कार्यं भवति, नान्योपायेन। भगवद्गीतायामुक्तम्—'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः'।[1] इति प्रमाणम्। ज्यों इति दृष्टान्तमाह। यथा सर्वे जनाः द्वितीयायाश्चन्द्रमसं प्रति शिरोभिः प्रणमन्ति न तु पूर्णं चन्द्रम्। अतो लघुता कार्येति भावः ॥१६२॥

लघुता (नम्रता) सबसे बढ़ कर है, अतः स्वयं को लघु समझकर (नम्र बनाकर, ब्रह्म-दृष्टि से तृण, कीट-पतङ्ग और सभी पशुओं को भी नमस्कार करो (अपने समान समझो)। इसी से सब कार्य सिद्ध होता है; अन्य किसी उपाय से नहीं। नम्रता धारण करो। गीता में भी यही कहा है। सारा संसार द्वितीया के चन्द्र को सिर नमाता है। अतः स्व को लघु समझना सर्वश्रेष्ठ है ॥१६२॥

मानुष का गुण ही बड़ा माँस न आवे काज।
हाड़ न होते आभरण त्वचा न बाज नवाज ॥१६३॥

मानुषेति। मानुषतनुं प्राप्य यो ब्रह्मविचारं करोति स एव महान् गुणः[2]। अस्मिन्नेव सर्वमन्तर्गतम्। मांसेति। नरस्य मांसं शृगालादिना न भक्ष्यते। अन्य=मृगादिजीवानां मांसमामिषभोजिनोऽदन्ति। नरास्थीनामलङ्कारोऽपि नैव। गजदन्तस्यालङ्कारः। नरस्य त्वक्चर्मणा मृदङ्गादिवाद्यान्यपि न भवन्ति। पश्वादिचर्म वेष्टयित्वानकादीन् घ्नान्ति। भोः, अतो नरदेहेन सेवापूजासत्कारदानव्रततीर्थहरिस्मरणातिथिभोजनादि यः कारयति करोति च, स एव श्रेष्ठो नान्य इत्यर्थः ॥१६३॥

नर-देह पाकर ब्रह्म-विचार करना महान् गुण है; इसी के अन्तर्गत सब कुछ है। आमिष-भोजी मृग आदि जीवों का मांस तो भक्षण करते हैं, किन्तु नर-मांस किसी काम नहीं आता। न तो उसकी हड्डियों के अलंकार ही बनते हैं और न उसकी चमड़ी से वाद्य ही तैयार किये जाते हैं। अतः नर-देह से सेवा-पूजा अतिथि-

---

१. भ० गी०, ४, ३४।
२. ='गुणी' या 'गुणवान्' चाहिए।

सत्कार, दान, व्रत, तीर्थ, हरि-स्मरण और अतिथि-भोजन आदि का प्रबन्ध करने और कराने वाला सर्व-श्रेष्ठ है ।।१९३।।

मूवा है मरिजाहुगे बिनु सर थोथे भाल ।
परेहु करायल वृक्ष तल आज मरहु के काल ।।१९४।।

मूवेति । भोः, देहोऽहमित्यनेन भावेन पूर्वं मृत एव त्वम् । अन्तेऽयं स्थूलदेहोऽपि मरिष्यति । बिनु शर= स्वात्मविचारशरं विना, थोथे शल्यहीनेन धर्मकुलाचारबाणेन म्रियमाणो भवति । भाले=आत्मज्ञानं विना देहाभिमाने गर्त्ते प्रसभं पतिष्यसि । शल्यं विना यथा वाणः । वृक्षे=संसारे नानादुःखानि भुङ्क्ते, आर्तोऽहमिति वक्ति, ज्ञात्वापि संसारं न मुञ्चति । 'करतलभिक्षा तरुतलवासस्तदपि म मुञ्चत्याशापाशम्'[1] इति प्रमाणं सत्यम् । अतो देहाभिमानं त्यज । देहोऽद्य [श्वो]वा विनश्यतु । वहुकालं परमानन्दे रमस्वेति भावः ।।१९४।।

मैं देह हूँ यह विचार मनुष्य को पहले ही मार देता है। अन्त में यह स्थूल देह भी मर ही जायगा। आत्म-विचार-रूपी शर न लगने के कारण धर्म और कुलाचार के थोथे मार्ग का अनुसरण करके मनुष्य मरता है और आत्म-ज्ञान के बिना वह देहाभिमानरूपी गर्त्त में गिर जाता है। 'मैं त्रस्त हूँ' यह कहता जाता है पर संसार नहीं छोड़ता । अतः देहाभिमान छोड़ देना चाहिए । देह चाहे आज ही नष्ट हो जाय; हर व्यक्ति को परमानन्द में निरत होना चाहिए ।।१९४।।

झालि परे दिन आथये अन्तर परिगो साँझ ।
बहुत रसिक के लागते वेश्या रहि गइ बाँझ ।।१९५।।

झालि परे इति । यदा अविद्यान्तरे वर्तमानस्तर्हि, साँझ=सन्ध्या अज्ञानतामिस्रे प्राप्ते, दिन आथये=स्वात्मविचारभास्करोऽस्तं गतः । पुनः, बहुत रसिक=अनेकमतवादे विषयसेवने रताः । वेश्यावत् बुद्धिर्वन्ध्या भवति । विचारहीना तिष्ठति । यथा बहुपुरुषसेवनेन गणिका वन्ध्या, तद्वदिति भावः ।।१९५।।

अविद्या में रहते रहते शाम हो जाती है और आत्म-विचार का सूर्य अस्त हो जाता है। मत-वाद और विषय-सेवन के चक्कर में पड़ रहने के कारण बुद्धि भी काम नहीं करती, ठीक उसी प्रकार जैसे कि अनेक पुरुषों के सेवन से गणिका वन्ध्या रह जाती है ।।१९५।।

जाके चलते रवदे परा धरती होइ बेहाल ।
सो सावन्त घर में[1] जरे पण्डित करहु विचार ।।१९६।।

---

१. शंकराचार्यः -चर्पटपञ्जरी ।

१. रौंदे=पदमर्दन करना; या धमाका । पा०—घर्में=गर्मी में जलना । राघवदास और पूरणदास ने इस साखी का भिन्न ही अर्थ किया है। देखिए क्रमशः सं० १९५ और स० १९५ ।

जाके इति। भोः, अयं जीवः कर्ममार्गे कर्मैव भवति। रवदे=तस्मिन्नेव पतति। पुनः, धरती=धरित्री शरीरं बहुक्रियाभिः खिन्नं भवति। सामन्तपुरं घर्मे,=त्रिधातापेन[1], जरे=दह्यमानो भवति। अतः भोः पण्डित, स्वात्मविचारं कुर्वित्यर्थः ॥१९६॥

जीव कर्म-मार्ग में पड़कर कर्म ही हो जाता है। अनेक प्रकार की क्रियाओं से शरीर भी खिन्न हो जाता है। धर्म के ताप से त्रस्त होना भी स्वाभाविक ही है। अतः हे पण्डित, स्वात्म-विचार कर ॥१९६॥

सबकी उत्पति धरती जीवन को प्रतिपाल।
धरती न जाने आप गुण ऐसो गुरू विचार ॥१९७॥

सब की इति! धरित्र्यां सर्वे जायन्ते, तिष्ठन्ति, विनश्यन्ति। सर्वेषां जीवानां प्रतिपाल-रूपा भूमिः। पुनर्धरती। सा धरित्री स्वगुणाभिमानं न जाने=न मन्यते। अतोऽस्या नाम क्ष्मेति। ईदृग्गुरुर्महान् बहुभ्यो ज्ञानोपदेशं ददाति, परं त्वभिमानं न मन्यते। सद्गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति[2] श्रुतेरिति भावः ॥१९७॥

इस धरती पर सभी जन्म लेते हैं; इसी पर खड़े होते हैं और इसी पर विलीन भी होते हैं। यह सब का प्रतिपालन करती है, पर कभी भी अभिमान नहीं करती। वह स्वयं अपने गुणाभिमान (गुण की महत्ता) नहीं जानती। इसी कारण इसका नाम 'क्षमा' है। इसी प्रकार महान् सद्गुरु बहुतों को उपदेश देता है, किन्तु वह भी अभिमान नहीं करता। (इसका सम्बन्ध साखी सं० १९२ से है, जिसमें नम्रता के विषय में कहा है) ॥१९७॥

धरती जानति आप गुण कबहुँ न होती डोल।
तिल तिल बढ़ि गरहु होती ठीकहु के मोल[3] ॥१९८॥

धरित्री=धारणा स्वगुणं 'ब्रह्मैवाहम्' इति न जानाति। तदा बुद्धिरचला भवति, शनैः शनैरात्माभ्यासं वर्धयतीति। पुनः ठीक - सत्यस्वरूपोऽहम्, अमोल=मनोवाण्याः परं तिष्ठामि। अत्र प्रमाणं भगवद्गीतासूक्तम्—"शनैः शनैरुपरमेद् बुद्धया धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्"[4] इति प्रामाण्यात् सत्यम् ॥१९८॥

धारणा का गुण यही जानना है कि 'मैं ब्रह्म ही हूँ'। किन्तु स्वयं धारणा अपना यह गुण नहीं जानती। वह धीरे-धीरे अपना अभ्यास बढ़ाती है। तब अभ्यासी जानता है कि मैं सत्य-स्वरूप और मन तथा वाणी से परे हूँ। गीता में भी कहा है कि धैर्य से बुद्धि को वश में करके धीरे धीरे उपरामता प्राप्त करना योग्य है ॥१९८॥

---

१. त्रिधाताप=आध्यात्मिक, आधिभौतिक और आधिदैविक।
२. मुण्ड० उ० १, २, १२।
३. पा०—तीले तील गरुह होति ढिको की मोल (सं० बी० ब०)। ढीक=पराधीनता।
४. भ० गी०, ६, २५।

तहिया कृत्रिम न होता धरती होति न नीर।
उतपति परले नहिं होता तब की कही कबीर ।।१९९।।

तहिया इति। तदा काले पूर्वं न भूमिः, नापः, नाग्निः, न चाम्बरं, न सृष्टिः, न प्रलयः, न कृत्रिमं नानाकारमेतत्सर्वम्, नानेकप्रपञ्चमतवादोऽपि। एके=केवले शान्तिरूपे मय्येतत्सर्वं न भासते। तब की=कबीरः श्रुतिरित्थं वदति—'आद्यन्तमध्येष्वेकरसम्'। स्वरूपं ज्ञापयन्ति=सर्वेभ्यः श्रावयन्ति श्रुतयः—'सदेव सौम्येदमग्र आसीत्'[1] इति ।।१९९।।

कबीर पूर्वतम काल का वर्णन ईश्वर के मुख से करते हैं। उस समय न तो पृथ्वी थी और न जल, आकाश, सृष्टि और प्रलय। आजकल की कोई वस्तु नहीं थी—न यह सारा कृत्रिम नानाकार, और न अनेक प्रपञ्च और मतवाद। उस समय केवल शान्तिरूप मुझ (ईश्वर) में यह सब भासित नहीं होता था। यही बात वेद में भी कही गई है, जिसमें ईश्वर का स्वरूप आदि, अन्त और मध्य में एकरस (सदैव एक सरीखा) बतलाया गया है जो 'सत्' ही था और है ।।१९९।।

जब लगि तारा जगमगे तब लगि उगे न सूर।
जब लगि जीव कर्म बस डोले तब लगि ज्ञान न पूर ।।२००।।

जब इति। तावदेव मतवादाः प्रकाशन्ते यावत् ज्ञानभास्करो नोदेति। दृष्टान्तमाह—यथा तावत्तारागणा राजन्ते यावन्नोदेति सूर्यः। 'सूरसूर्यार्यमा पूषे'त्यमरे। जब लगि इति। यावज्जीवः कर्मवशगस्तावत्पूर्णज्ञानी नैव। 'कर्मभिर्भ्राम्यमाणोऽपि न विन्दति परं सुखम्'[1] इति भावः ।।२००।।

जब तक ज्ञानरूपी सूर्य का उदय नहीं होता तब तक ही मत-वाद का अँधेरा छाया रहता है। इसी प्रकार जब तक जीव कर्म के फेर में रहता है, तब तक वह पूर्ण ज्ञानी नहीं हो सकता ।।२००।।

नाम न जाने ग्राम को भूली मारग जाय।
काल्हि गड़ेगा कण्टक अगु मन कस न खुराय ।।२०१।।

नामेति। नाम=शुद्धबोधोऽहमिति विचारशान्ति न जानाति येन स एव मार्गे विस्मृतः। कुतः? यो वर्णाश्रमाभिमाने गच्छति, काल्हि कण्टकः, ब्रह्मादीनां सर्वेषां कालोऽपि[2] भक्षकः। तस्य गतिर्न ज्ञायते। कदागमिष्यत्यद्यैव, शीघ्रं वा, कतिवर्षान्तरे वेति। ततः अगुमन=भोः मनः, अस्माद्देहात्पूर्वं निराशो भव। आत्मानं ज्ञातुं सर्वथोत्सुको भव। देहान्ते विनश्यतीति भावः ।।२०१।।

जहाँ जाना है उस गाँव का नाम मालूम न करके चल देना और मार्ग में भटकते रहना (सचमुच) आश्चर्य है। मैं शुद्ध-बोध हूं, यह जान लेना ही शान्ति का

---

१. छान्दो० उ०, ६, २, १ आदि।
२. प०···सर्वेषामपि कालः।

मार्ग है। इसे भूल कर लोग कर्म-मार्ग पकड़ लेते हैं, वेभी काल के ग्रास बनते ही हैं। अतः हे मन, इस विनश्वर देह में आसक्ति छोड़कर आत्म-स्वरूप को समझने का प्रयत्न कर ॥२०१॥

तीनि लोक चोरी भया सर्वस सब का लीन्ह।
बिना मूँड का चोरवा परा न काहू चीन्ह ॥२०२॥

तीनि इति। त्रयो लोका उपरीति प्रसिद्धाः। शरीरत्रये जीवः प्रविश्य देहाभिमान्यभूदतो ज्ञानतस्करः। सर्वस—सर्वो देहोऽहमित्यज्ञानचौरेण सर्वेषां स्वात्मविचाराच्छ दनं करोति। बिना मूंड का=आत्मैवाहमिति ज्ञानं विना अज्ञानचौरश्चौर्यं=विचारद्रव्यमन्तराद्धरति तद(म)पि तस्करं कश्चिन्न जानातीत्यर्थः ॥२०२॥

जीव, शरीर में प्रवेश करते ही उसका अभिमान (ममत्व) करने लगता है। उसका ज्ञान लुप्त हो जाता है। यह अज्ञानरूपी चोर आत्म-विचार को आवृत कर दता है। इस ज्ञान के अभाव में अज्ञानरूपो चोर विचाररूपी द्रव्य को चुरा लेता है और इस चोर को कोई भी पहचान नहीं सकता ॥२०२॥

संगति ते सुख ऊपजे कुसंगति से दुख होय।
कहँहि कबिर तँह जाइये जँह अपनी संगति होय ॥२०३॥

संगति इति। सत्सङ्गात्सुखं जायते। अत्र प्रमाणं भागवते—'सत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः' इति।[1] कुसङ्गति=कुत्सितानां देहाभिमानिनां नीचानां सङ्गाद् दुःखं भवति, तत्र न गन्तव्यम् कदाचित्। कुतः ? अत्र ज्ञापकं धर्मशास्त्रे प्रोक्तम्—'न स्थातव्यं न गन्तव्यं क्षणमप्यधमैः सह। पयोऽपि शौण्डिनीहस्ते मदिरां मन्यते जनः'[2] इति। कहँहि कबीर=महानात्मारामो वदति। तत्र गन्तव्यं यत्र ज्ञानिनां समाजोऽष्टसु यामेषु हरिगुणानुवर्णनं स्वान्तरे मननं च कुर्वन्ति (कुर्वंति)। तत्र गन्तव्यमिति भावः ॥२०३॥

सत्सङ्ग से सुख और कुसङ्ग से दुःख होता है। धर्म-शास्त्र में भी यही कहा है। मदिरा बेचने वाली स्त्री के हाथ में दूध का लोटा देखकर उसे शराब ही कहेंगे। कबीर कहते हैं कि जहाँ ज्ञानियों का समाज आठों प्रहर हरि-कीर्तन और परमात्मा का वर्णन करता हो उसी स्थल पर जाना योग्य है ॥२०३॥

जैसी लागी पेड़ की तैसी निबहै छोर।
कोड़ी कोड़ी जोरि के कीन्हों लक्ष करोर ॥२०४॥

जैसी इति। भोः, यद्ब्रह्म परमात्मनि श्रीनारायणोऽहमिति विलगति, सा वृत्तिः शरीरावधिपर्यन्तं तिष्ठति। प्रतिदिनं नवीनो नवीनो विचारः कर्तव्यः। ततः पूर्णज्ञानी भवति। दृष्टान्तमाह—यथा कश्चिद्वणिक् प्रतिदिनं, कोड़ी=कपर्दिकानां सञ्चयेन ताम्रखण्डानि, पुनरेवं रजत-

---

१. तुलनीय—सत्सङ्गात् भवति हि साधुता खलानाम् (सुभाषित)।
२. म० भारत, शान्तिपर्व, ३२४।

खण्डानि शतसहस्रशः, पुनर्लक्षाधीशः, कोटिसंख्यको धनसञ्चयो भवति। अत्र प्रमाणं नीतिशास्त्रे—'जलबिन्दुनिपातेन क्रमशः पूर्यते घटः। स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च'[1] ।। इति प्रामाण्यात्सत्यमेवेत्यभिप्रायः ।।२०४।।

'मैं ब्रह्म ही हूं' यह वृत्ति (क्षणिक न होकर) शरीर के अन्त-समय तक सतत रहनी चाहिए। प्रतिदिन इसी सम्बन्ध में नवीन विचार करने से मनुष्य पूर्ण-ज्ञानी बन जाता है, जैसे एक-एक कौड़ी जोड़ने से वह धनवान् बन सकता है। पानी की एक-एक बूंद के सञ्चय से घड़ा पूरा भर जाता है ।।२०४।।

आजु काल दिन कइक में स्थिर नाहिं शरीर।
केतिक दिन नल(र) राखिहौ काचे वासन नीर ।।२०५।।

आजु इति। भोः, इदं शरीरं स्थिरं न। अद्यैव बहुकाले वा नाशवान् स्यात्। ...[2] शतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः। इति। यथा दृष्टान्तः —अपक्वमृण्मयभाजने नीरं कति दिनं तिष्ठति? क्षणमपि न। तद्वद्देहः। तस्मात्स्मरणं कुर्विति भावः ।।२०५।।

यह शरीर शाश्वत नहीं है। मृत्यु तो निश्चित ही है, आज ही या सौ वर्ष बाद—कभी वह होगी ही। मिट्टी के कच्चे घड़े में पानी कब तक रह सकता है? वही स्थिति देह की भी है। अत एव हरि का स्मरण करो ।।२०५।।

करु बहिया बल आपनी छाँडु बिरानी आस।
जे (घर) अँगना नदिया बहे सो कस मरत पियास ।।२०६।।

करु इति। भोः स्वसामर्थ्यं कुरु। त्वं चैतन्यमसि। अन्यत्राशां त्यज। तव हृदये परमानन्दो राजते। दृष्टान्तः —यस्याङ्गणे नदीधारा वहति स पिपासया कथं म्रियते? नैव। तथा प्राणघोषे स्मरणरूपात्मनदी सहस्रधारया वहति। तां पिब। त्वं बलवान् भूत्वा[3] तृषार्तः कथं स्या इति भावः ।।२०६।।

अरे, तू चैतन्य है। अन्य सब विचार छोड़कर यही ध्यान में रख। परम आनन्द तेरे हृदय में ही है। जिसके प्राङ्गण में नदी बहती है वह प्यास से कैसे मर सकता है? प्राण-घोष में स्मरण-रूप आत्म-नदी सहस्र-धार बनकर सदा बहती रहती है, तब तू प्यासा कैसे रह सकता है? ।।२०६।।

बहु बन्धन के बंधिया एक विचारा जीव।
के छूटे बल आपने के छूड़ावे पीव ।।२०७।।

बहु बन्धनेति। जीव एको बहुबन्धनैर्बद्धः। पञ्चकोशत्रिशरीरेषु बद्धः —अन्नादभ्यन्तरः

---

१. चाणक्यनीति, १२, १९।
२. यहाँ दो अक्षर अस्पष्ट लिले हैं। प० - 'अब्द' (भागवत, १०, १, ३८)।
३. 'भूत्वा' शब्द हिन्दी के मुहावरे के अनुसार प्रयुक्त किया है।

प्राणः प्राणादभ्यन्तरं मनः। ततः कर्ता ततो भोक्ता गुहा सेयं परम्परा'[1] इत्यादि ब्रह्मैवाहमिति स्वबलविचारेण मुञ्चति। अथवेश्वरोपासनया सद्गुरोः सेवनया वा मुच्यते। भोः स्वसामर्थ्यं विना न मुच्यसे। 'न शास्त्रैर्नापि गुरुणा दृश्यते परमेश्वरः। दृश्यते स्वात्मनैवात्मा स्वया सत्त्वस्थया धिया'[2] इत्युक्तेरिति भावः ॥२०७॥

शरीर के भीतर रहने वाला जीव अनेक (कल्पित) बन्धनों से बँधा है। उसका छुटकारा 'मैं ब्रह्म ही हूं' इस विचार से, अथवा सद्गुरु की कृपा से, अथवा ईश्वरोपासना से ही सम्भव है। किन्तु इन सब के होते हुए भी, अपने स्वयं के प्रयत्न के विना मुक्ति असम्भव ही है ॥२०७॥

जीव जनि मारहु बापुरा सब का एक हि प्राण।
हत्या कबहुं न छूटि है कोटिक सुनउ पुराण ॥२०८॥

जीवेति। भोः मृगमेषादिजीवान् किं हसि ? सर्वेषु प्राणरूपेणान्तर्यामी तिष्ठति। हत्यापापं कदापि न मुञ्चति। भोः कोटिशः पुराणानि शृण्वन्तु, तथापि न मुञ्चतीति भावः ॥२०८॥

अरे, हरिण और मछलियों सरीखे (दयनीय) जीव क्यों मारता है ? ईश्वर प्राण-रूप से सभी के भीतर विद्यमान है। वह अन्तर्यामी है। करोड़ों (बार) पुराण-श्रवण से हत्या दूर नहीं हो सकती ॥२०८॥

तीरथ गए द्वी जना चित चंचल मन चोर।
एको पाप न काटिया मन दस लादे और ॥२०९॥

तीर्थेति। तीर्थं=गङ्गादिसाधुसेवाश्रवणकीर्त्तनादिभक्तिव्रतनियमैतद्रूपं सर्वं तीर्थं सर्वे कुर्वन्ति तथापि चञ्चलं चित्तं परधनपरस्त्र्यादिषु गच्छति। मनश्चौरो विवेकं द्रव्यं मुष्णाति। किमिदं कर्मोचितम् ? नोचितम्। अतो विना विचारं सर्वं क्षीयते। आश्चर्यं यदेकपापनाशनार्थं तीर्थादिमहात्मभिरुक्तम्. तत्सेवनादेकोऽपि पापो न गतः, मनोद्वारान्यच्च बहुपापं गृह्णाति। सर्वपापं तीर्थे मुञ्चति, तीर्थकृतं वज्रलेपो भविष्यतीति भावः[3] ॥२०९॥

चञ्चल चित्त और चोर मन ये दोनों तीर्थ-यात्रा के लिए रवाना हुए। गंगादि-स्नान, साधु-सेवा, श्रवण-कीर्त्तन, भक्ति, व्रत और नियम आदि सब तीर्थ करने पर भी चंचल चित्त पर-धन और पर-स्त्री में ही अटका रहा और मनरूपी चोर ने विवेक का हरण कर लिया। यह सब विचार-रहित होने के कारण अनुचित ही है। तीर्थों आदि से पापों का नाश होता अवश्य है; किन्तु उपरि-वर्णित स्थिति में पापों का नाश नहीं होता, अतिरिक्त अनेक पाप लद गए, वे भी तीर्थ-स्थलों पर ॥२०९॥

---

१. द्रष्टव्य कठोपनिषद्, ३, ११।
२. अज्ञात।
३. तुलनीय—भर्तृहरि, नीतिशतक, 'शुचि मनो यद्यस्ति तीर्थेन किम् ?' श्लोक ५५।

तीर्थ भई विष बेलरी रही जुगन जुग छाय।
कबिरनि पेड़ निकंदिया क्यों न हलाहल खाय ॥२१०॥

तीर्थेति। विषयरूपा वल्ली स्त्रियादीन् तीर्थवत्सेवते। विषयान् प्रति मनो धावति युगे युगे। अतो वपुषि धारयन्ति। कबीराः=ज्ञानिनो मूलवासनां खनित्वा शुद्धान्तःकरणा भवन्ति। कवनेति। हलाहलविषवद्विषयं किमश्नाति? नैवेति भावः ॥२१०॥

स्त्री विषय-लता है। उसका तीर्थ की तरह सेवन करना और विषयों में मन दौड़ाना कहाँ तक उचित है? ज्ञानी-जन मूल वासना को नष्ट करके अपना अन्तःकरण शुद्ध करते हैं, हलाहल के समान विषय-सेवन वे नहीं करते ॥२१०॥

ए गुणवन्ती बेलरी तव गुण वर्णि न जाय।
जो काटे सो हरियरी सींचे ते कुम्हलाय ॥२११॥

ए गुणवन्ती इति। इन्द्रियगुणाः विषयाः, वल्ली कर्ममयो देहः। तेषां गुणस्यान्तो न येषां छिन्दनाद्विचारो हरितो=नवीनो भवति। पुनः सींचेति। विषयजलसिञ्चनेन ज्ञानं शुष्यतीत्यर्थः ॥२११॥

इन्द्रियों के गुण विषय हैं (इन्द्रियाँ विषयोन्मुख होती हैं)। कर्म-मय देह लता के समान है। उसे काटते ही (वह फैलती है और) नवीन विचार उत्पन्न होते हैं। उसे विषय-जल से सींचने पर ज्ञानरूपी पुष्प कुम्हला जाता है ॥२११॥

पाणी ते अति पातला धूम्र ते अति छीन।
पवनहु ते उतावला दोस्त कबीरनि कीनि ॥२१२॥

पाणी ते इति। सर्वकारणं मनः कीदृशम्? जलादति सूक्ष्मं, धूम्रादतिक्षीणतरं, पुनः पवनवेगादतिवेगवान्। कबीराः=केचिदाचार्या मन एवात्मानं वदन्ति—'मन एव मनुष्याणां कारणं बन्धमोक्षयोः। बन्धाय विषयासक्तं मोक्षे निर्विषयं स्मृतम्'[1] ॥२१२॥

इस सबका कारण मन है। (यही देखकर) कबीर ने उसे (अपना) मित्र बनाया है। वह जल से भी अधिक सूक्ष्म, धुएँ से भी अधिक क्षीण और पवन से भी अधिक वेगवान् है। (गीता में भी कहा है कि) मन ही बन्ध और मोक्ष का कारण है। विषयासक्त होने पर वह बन्धन का और निर्विषय होने पर मोक्ष का उत्पादक है ॥२१२॥

परदे पाणी दाधिया सन्तो करहु विचार।
सरमा सरमी पचि मुवा काल घसीटनि हार ॥२१३॥

परदे इति। अविद्यावशाद्देह आत्मा, इन्द्रियाण्यात्मा, प्राण आत्मा, मन आत्मा, बुद्धिरात्मा, आनन्द आत्मेत्यादिभिर्मतैः, पाणीयम्=आत्मज्ञानं शुष्यति। लज्जया बहुकर्तव्यतां

---

१. ब्रह्मविद्योपनिषद्, २, आदि।

(कर्तव्यं) करोति। पुनः पुनः कृत्वा पश्चात् कालो भक्षयति। अतः भोः साधो, चिदात्माहमिति विविच्यतामन्तरे इति भावः ॥२१३॥

अविद्या के कारण, देह, इन्द्रियाँ, प्राण, मन, बुद्धि और (सांसारिक) आनन्द को आत्मा मानने वाले व्यक्ति का आत्मज्ञान सूख जाता है। लज्जा के कारण कुछ करना ही पड़ता है। यह सब करते-करते काल ग्रस लेता है। अतः, हे साधु, 'मैं चिदात्मा हूँ' यही विचार कीजिए ॥२१३॥

आस्ति कहौं तो कोइ न पतीजे विआस्ति[1] का सिद्धा।
कहहिं कबीर सुनहु हे सन्तो हीरी हीरहिं विद्धा ॥२१४॥

आस्ति इति। आस्तीति='तत्त्वमसीति' वदामि कस्मैचित्तर्हि कश्चिन्न प्रतीयते। विना आस्तिकं ज्ञानरहिता जना वर्णाश्रम्यहमिति सिद्धं कुर्वन्ति। हीरी=अविद्या, हीरा=आत्मा, तया विद्धः। अतोऽज्ञः। ज्ञानी स्वरूपमाह। हीरो ब्रह्मविद्यया, हीरा=आत्मयुक्तो भवति। कबीरः=ज्ञानी ब्रवीति— भोः सन्त, मुमुक्षो, एवं जानीहि ॥२१४॥

'तू वही है (तत्त्वमसि)' इस कथन पर कोई विश्वास नहीं करता और ज्ञान-विहीन सभी लोग 'मैं वर्णी हूं, मैं आश्रमी हूं' यह सिद्ध करने के लिए कटि-बद्ध रहते हैं। (वस्तुतः) हीरा (आत्मा) हीरी (अविद्या) से ढका हुआ है। कोई भी व्यक्ति ब्रह्म-विद्या से ही आत्मयुक्त हो सकता है। कबीर कहते हैं कि यह जानो ॥२१४॥

सोना सज्जन साधुजन टूटि जुरहिं शत बार।
दुर्जन भाँड कुलाल का एकहिं धके दरार ॥२१५॥

सोना इति। यथा सुवर्णस्य शतखण्डानि कृत्वा स्वर्णकार ऐक्यं कृत्वा कटकाद्याभरणं करोति। कोमलत्वात्। दृष्टान्तमुक्त्वा दार्ष्टान्तिकेन द्रढयति। तथा सज्जनाः सद्वस्तुवेत्तारस्साधुजना जीवेश्वरावेके ब्रह्मणि योजयन्ति। तान्प्रति दुर्जना दुर्वाक्यं शतवारमपि ब्रुवन्ति; ते सहन्ते, नोद्वेगो भवति क्रोधश्च। सकामक्रोधोद्भवे वेगे यः सोढुं शक्नोति स एव योगी, स एव सुखी। दुर्जनानां सभासु न गन्तव्यम्। एक=अनहितवाक्ये भुजङ्गवत्कोपं कृत्वोत्तिष्ठन्ति यथा कुलालनिर्मितमृण्मयभाजनमेकेनैव प्रहारेण भग्नं भवतीत्यर्थः ॥२१५॥

सुवर्ण, सज्जन और साधु-जन सौ (अनेक) बार टूट कर (पृथक् होकर) भी फिर जुड़ जाते हैं। सोने के टुकड़े करके फिर उन्हें जोड़ कर सुनार आभूषण बनाता है; उसी प्रकार साधु-जन भी जीव और ईश्वर से केवल (निर्गुण-निर्विकार) ब्रह्म से जोड़ते हैं। अज्ञानी दुर्जन इस विचार से सहमत नहीं होते और क्रुद्ध होकर उठ खड़े होते हैं, जैसे कुम्हार का बनाया हुआ मिट्टी का घड़ा एक ही प्रहार में टूट जाता है ॥२१५॥

---

१. विनास्ति=विना अस्ति (अस्तित्व से रहित), सं० बी० ब०।

काजर की ही कोठरी काजर ही का कोट।
तोंदी कारी ना भई रही सो ओट हिं ओट ॥२१६॥

काजर की इति। कज्जलं=सूक्ष्मशरीरम्, कोठरी=कारणशरीरम्। पुनः, कज्जलस्य दुर्गं स्थूलशरीरं त्रिषु वर्तते, तथापि ज्ञानिनो बुद्धिः, तौंदी=गुणत्रयाणां शुक्लरक्तकृष्ण-स्वाभाविकी न भवति। कुतः? ओटहि=ब्रह्मविचारे तिष्ठति। अत्र प्रमाणं श्रीमद्भगवद्गीतोप-निषद्युक्तम्—कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि। योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्म-शुद्धये[1] इति ॥२१६॥

कज्जल (सूक्ष्म शरीर) की कोठरी (कारण शरीर) और कज्जल का किला (स्थूल शरीर) इन तीनों में ज्ञानी की बुद्धि का निवास है। फिर भी वह निर्गुण ही रहता है। ऐसी कोठरी में रखे वर्तन की तोंदी रंग पकड़ लेती है (सफेद, लाल या काला—जो तीनों गुणों के रंग हैं), पर ज्ञानी इन सबसे अलिप्त ही रहता है, क्योंकि वह ब्रह्म-विचार में ही मग्न है, और उस पर असर नहीं होता। भगवद्गीता में भी कहा है कि योगी निःसंग होकर अपने शरीर, मन, बुद्धि और इन्द्रियों से कार्य करता रहता है ॥२१६॥

काजर की ही कोठरी बुड़ता ई संसार।
बलिहारी ताहि पुरुष की पैठि जु निकल निहार ॥२१७॥

काजर इति। कज्जलकोष्ठी त्रिशरीरम् कारणं स्थूलसूक्ष्मे च। लयम्=इन्द्रियगण ज्ञात्रादि सर्वमात्मविचारे निमज्जति। यद्वा, वपुस्त्रयं पञ्चकोशाद् भिन्नं भवति। तदेव धन्यम्। अत्र श्रुतिः—'त्रिषु धामसु यद्भोग्यं भोक्ता भोग्यश्च यद्भवेत्। तेभ्यो विलक्षणः साक्षी चिन्मा-त्रोऽहं सदाशिवः'[2] इति ॥२१७॥

अन्त में, यही क जल की कोठरी—तीनों शरीर, इन्द्रियाँ और उनके साथ ही ज्ञाता आदि (ज्ञेय और ज्ञान), ये सभी आत्म-विचार में लीन हो जाते हैं। कहा भी है कि तीनों लोकों में भोक्ता, भोग्य आदि से विलक्षण मैं (ईश्वर) केवल चिन्मात्र हूँ, सदाशिव हूं ॥२१७॥

अर्ब खर्ब लौं द्रव्य हैं उदे अस्त लौं राज।
भक्ति महातम ना तुले ई सब कौने काज ॥२१८॥

अर्बेति। एकादशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशोऽर्बुदखर्वपद्मनिखर्वमहापद्मपर्यन्तं तस्य द्रव्यं=लक्ष्मीर्भवति। सूर्योदयास्तपते र.ज्यो[3]। तथापि किम्? हरिज्ञान बिना=भक्ति[4]

१. भ० गी०, ५, ११।

२. कैवल्योपनि०, १८।

३. अशुद्ध लेखन। पा०—सूर्योदयास्तपर्यन्तं राज्यम्=उदयाचल से अस्ताचल तक अर्थात् निःसीम।

४. शाङ्कर मत के अनुसार 'ज्ञान' और रामानुजीय मत के अनुसार 'भक्ति'।

विना सर्वं व्यर्थमतो भक्तिरेव गरीयसीति भावः ।।२१८।।

अर्व-खर्व तक गिनने योग्य (अतुल) सम्पत्ति और उदय से अस्ताचल तक (अपार) राज्य होने पर भी हरि के ध्यान और भक्ति के बिना सब व्यर्थ ही है। भक्ति ही (मोक्ष का) सर्वोत्कृष्ट साधन है ।।२१८।।

मच्छ बिकाने सब गये धीमर के दरबार।
अँखियाँ तेरी रतनारी तुम क्यों पैन्ही जाल ।।२१९।।

मच्छेति । मत्स्य=मीनवदिदं जगत्, अनात्माभिमानिनो, धीमर=कालवदने गच्छति । अंखियेति । अक्षि=बुद्धिः, सत्त्वरजोगुणेन रक्ताक्षी, देहाभिमानरूपे जाले त्वं किं पतसि, यथा धीमरजाले मत्स्याः पतन्तीति भावः ।।२१९।।

मत्स्य और मीन की तरह यह जगत् है; इसमें आत्म-विचार न करके जो अभिमानी (केवल शरीराभिमानी) मृत्यु के मुख में जाता है। तू बुद्धिमान् होकर भी इस देहाभिमान के जाल में क्यों गिरता है जैसे मछलियाँ स्वयं ही धीमर के जाल में फँस जाती हैं ? ।।२१९।।

पाणी भीतर घर किया सेज्या किया पताल।
पासा परा करीम का ते मे पेन्ही जाल ।।२२०।।

पाणी इति । पाणी=अविद्यान्तरे गृहासक्तः सन् देहाभिमानरूपायां शय्यायां, पाताले=अज्ञाने शेते । वर्तते इति शेषः । पाशा=कर्म,[1] त्वदीयं मदीयमिति मृषाजालेऽज्ञो बलात्पततीत्यर्थः ।।२२०।।

अविद्यारूपी पानी में, देहाभिमानरूपी शय्या पर तू, पाताल में ही सोया पड़ा है। कर्म-पाश में तू बँधा है ।।२२०।।

बिनु रसरी गृह खल बँधा तासू बँधा अलेख।
दीन्ह दर्पण हस्त मधे[2] चसम बिना का देख ।।२२१।।

बिनु रसरी इति । रसरी=विचारं विना गृहमेधादिसमस्तवर्णाश्रमाः (मैः) अविद्यामोह-बन्धनैर्बद्धाः । इदं सर्वं खलको यद्बन्धने सर्वे बद्धाः । लक्ष्यं[3] न ज्ञायते । भोः, ईश्वरेण हस्त-पादादिमान् मनुष्यदेहो दत्तः, तस्मिन्मुकुरवत् धीरपि । परं तु स विना स्वानुभवानन्दं=स्वविचारं

---

१. मूल साखी में 'करीम' लिखा है। व्याख्या में 'कर्म'।

२. छन्द की शुद्धि के लिए पढ़िए—'दीन्हो दर्पण हस्त में'। इसी प्रकार पूर्वार्ध में 'खल' के स्थान पर 'खर' पढ़ना उचित प्रतीत होता है। लिपिकार ने अनेक स्थलों पर 'र' के बदले 'ल' लिखा भी है।

३. लिपिकार ने प्रमादवश यहाँ 'अलक्ष्यं' लिखा है।

विना, का देख ? स्वरूपदृष्टिः कथं भवेत् ? यथा, यस्य नेत्रेऽल्पदृष्टिनी, हस्ते मुकुर=दर्पणं विना किं दृश्यते ? नैवेति भावः ॥२२१॥

वे सभी गृहस्थी और वर्णाश्रमी जो विचार नहीं करते, अविद्या-मोह के बन्धन से बँधे हैं। ईश्वर ने हाथ-पाँव वाला मनुष्य-शरीर दिया है और दर्पण के समान (निर्मल) बुद्धि भी। उससे विचार न किया तो स्वरूप-दर्शन कैसे होगा ? आँखों की ज्योति कम होने पर दर्पण में भी (स्वच्छ प्रतिबिम्ब) कैसे दिखाई देगा ? ॥२२१॥

तीरथ गए ते बहि मुये जूड़े पाणि नहाय।
कहहिं कबीर पुकारि के राक्षस होय पछताय ॥२२२॥

तीरथ इति। ये जनाः स्त्रीपुत्रबान्धवपश्वादीन् विषयाभिलाषेण सेवन्ते, तीर्थसेवी तीर्थं तद्वत्, ते बहि मुये, अतश्चतुराकरेषु[1] जायन्ते। जूड़े जडलतायां सज्जन्ते। कबीरः=श्रुतिर्ज्ञानी वा ब्रवीति—इत्थमुच्चैरात्मज्ञानं विना राक्षसबुद्धयस्ते मलिना भवन्ति। पश्चात्तापं कुर्वन्तीति भावः ॥२२२॥

स्त्री-पुत्र आदि में अभिमान करनेवालों की तरह तीर्थसेवी भी हैं, जो जल (जड़) में नहाते हैं। कबीर कहते हैं कि आत्म-ज्ञान के बिना ये सभी राक्षसबुद्धि-वाले और मलिन होते हैं और इन्हें चार योनियों में फिर जन्म लेना पड़ता है ॥२२२॥

बेलि कुढंगी फल निफरो[2] फुलवा कुबुधि गँधाय।
ओर विनष्टी तुंबिका सरो पात करुवाय ॥२२३॥

बेलि इति। बेली कुढंगी=कुत्सितवासना, तस्याः फलानि धर्मकामार्थानि जायन्ते, न तु मोक्षः। फुलवेति। पुष्पिता सकामा बुद्धिर्दुर्गन्धकारिणी भवति। पुनः कीदृशी ? तुम्बिकावन्महत्कटुकी। स्वर्गनरककारिणी भवतीत्यर्थः ॥२२३॥

कुत्सित वासना एक बेढंगी बेल है जिसके फल धर्म, अर्थ और काम हैं; मोक्ष नहीं। इसके पुष्प (सकाम अतः) दुर्गन्ध देने वाले होते हैं। यह तूम्बी के समान अत्यन्त कटु होती है और इसके फल स्वर्ग और नरक हैं। मलिन व्यक्ति ही इसका सेवन करते हैं ॥२२३॥

समुझाये समुझे नहीं पर हथ हाथ विकाय।
मैं खींचत हौं आपु को चला जमपुर जाय ॥२२४॥

समुझाये इति। अविज्ञातसखा ईश्वरो जीवं बोधयति। भोः हंस, श्रुतिस्मृतिद्वारा बहुविधं

---

१. चार योनियाँ। साखी ९६ पर पाद-टिप्पणी देखिए।

२. =निष्फल; बुरा।

त्वां बोधियामि, तदपि न बुध्यसे। पर हथेति। जीवोऽहमिति मन्यसे। मैं खीचेति। भोः, स्वस्मिन् त्वां ब्रह्मैवाहमित्यस्मिन् गृह्णामि[1] तथापि चला=यमे, द्वैतेऽज्ञाने गच्छसि; न मन्यसे त्वमतो मम को दोषः? न कोपीत्यभिप्रायः ॥२२४॥

ईश्वर जीव को कहता है :—हे हंस, तुझे वेद और स्मृतियों द्वारा मैं अनेक प्रकार के बोध देता हूं फिर भी तू नहीं चेतता। मैं कहता हूं कि तू 'ब्रह्म' है पर तू स्वयं को 'जीव' ही मानता है। इस प्रकार तू यमपुर (द्वैत के अज्ञान) की ओर जा रहा है। इसमें मेरा कोई दोष नहीं है ॥२२४॥

नित खरसान लोह धन फूटे।
नित के गुष्टि माया मोह टूटे ॥२२५॥

नितेति। दृष्टान्तमाह। यथा लोहशिल्पिनोऽन्योन्यं मिलित्वा प्रतिदिनं लोहधनं खरसान-मध्ये मोचयन्ति। विद्यास्फुरणार्थं दार्ष्टान्ते योजयति। नित्यमात्मविचारं वेदशास्त्रपुराण श्रवणाद्यन्योन्यं गायन्ति, कथयन्ति च, तदा नित्यज्ञानगोष्ठीविचारेणः मायायाः मृषामोहो विनश्यतीति भावः। 'यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं तदर्हण'मित्युक्तेरिति'[2] भावः ॥२२५॥

जैसे लोहे का घन भट्टी में डालने पर तेज पकड़ता है, उसी प्रकार आत्म-विचार, वेद-शास्त्र और पुराणों का पठन-पाठन और गायन तथा ज्ञान-चर्चा से माया का झूठा मोह छूट जाता है। परमात्मा का स्मरण, दर्शन आदि हितावह है ॥२२५॥

सज्जन तो दुर्ज्जन भयो सुनि काहू के बोल।
काँसा ताँबा होय रहा हता हिरण के मोल ॥२२६॥

सज्जनेति। सज्जनः=सुखप्रकाशरूपजनो ज्ञानरूपः तस्य सङ्गं त्यक्त्वा कस्यचित्सकामस्य वाक्यं श्रुत्वा गाढसङ्गात्तस्यापि, दुर्जना=दुर्बुद्धिर्भवेत्। हाटकः कांस्यं यथा ताम्रं भवति, स्वयं तु हीरा=प्रकाशरूपस्तथापि स्वस्य जीवत्वं मन्यते इत्यर्थः ॥२२६॥

सज्जन वह है जो प्रकाश-रूप और ज्ञानवान् हो। दुर्जन की संगति से वह भी दुर्जन बन जाता है। काँसा हीरा बनने के बजाय ताँबा हो जाता है। ऐसा व्यक्ति स्वयं को जीव मानने लगता है ॥२२६॥

लोहा केरी नावरी पाहन गरुहा भार।
सिर पर विष की पोटरी उतरन चाहे पार ॥२२७॥

लोहेति। लोहा=शरीरमयी नौका। पाहन=देहाभिमान एव भारः। विष की=

---

१. =यह विचार तेरे मस्तिष्क में भरता हूं सांसारिक व्यक्ति के प्रति कबीर की उक्ति।)
२. भागवत, २, ४, १५। उत्तरार्ध—'लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः' ॥

विषयासक्तः सन् भवार्णवपारमिच्छुः। स कथं तरति ? नैवेति भावः ॥२२७॥

शरीर लोहे की नाव है; उसमें देहाभिमान यह पत्थर का भार लदा है। विषयरूपी विष की गठरी तुम्हारे सिर पर रखी है। इस प्रकार भव-सागर पार उतरना चाहते हो ? यह कैसे सम्भव है ? ॥२२७॥

कृष्ण समीपे पाण्डवा गले हिमालय जाय।
लोहा के पारस मिले तो काहे काई खाय ॥२२८॥

कृष्णेति। कृष्णे=चिदात्मनि स्वनिकटे, पाण्डवाः=पञ्चमहाभूतानि, हिमालये=महत्यानन्दे लयं प्राप्ताः। गलिता भवन्तीत्यर्थः। लोहा=अन्तःकरणम्, पारस=पार्श्वं ब्रह्मैवाहम्, मिलिते सत्यहङ्कारेण सह कर्म तदेव काई=कं खादति ? नेवैति भावः ॥२२८॥

चिदात्मा (कृष्ण) में पंच महाभूत (पाण्डव) प्रचुर आनन्द (हिमालय) में गल जाते हैं। (किन्तु) लोहा (अन्तःकरण) और पारस मिलने पर (पार्श्व=पास पास होने पर) अहंकार और कर्म किसी को नहीं खा सकता) ॥२२८॥

पूर्व उगे पश्चिम विशवे भखे पवन को फूल।
ताको काल गरासे मानुष काहे भूल ॥२२९॥

पूर्वेति। पूर्वम्=आदौ ब्राह्मणादयो वर्णाः ब्रह्मचर्यादि च। उगे=स्वस्वधर्ममार्गेषु प्रवर्तन्ते। पश्चाद् गृहं विहाय विविदिशा मुमुक्षुर्भूत्वा, पश्चाद्विद्वत्परमहंसधर्मे, विशवे=विलीयन्ते। सर्वे, पवन=स्वभजने, फूल=प्रफुल्लिता भवन्ति। ते[1] निष्कामतयाऽमलिनाः; काल=समयं प्राप्य=ग्रसति, निजात्मनि विलीयन्ते। काहे=कस्मान्मनुष्योऽहमिति (बुद्धिः) ? ब्रह्माहमस्मीत्यनुभवादिति भावः ॥२२९॥

सबका उत्पत्ति-स्थान बीज रूप ब्रह्म है। ब्रह्मा आदि उसके अंकुर हैं। इस प्रकार बीज से अंकुर और अंकुर से (फिर) बीज उत्पन्न होता है। अतएव बीज ही सब का आधार है; वह ही परम आनन्द है। यह बात भली भाँति जानना योग्य है। देह से कर्म, कर्म से वासना और वासना से पुनर्जन्म होता है यह निष्कर्ष विरले ही जानते हैं। इसका प्रमाण भगवद्गीता में है, जहां कहा गया है कि हजारों मनुष्यो में बिरला हो व्यक्ति सिद्धि-प्राप्ति के लिए प्रयत्न करता है और उन प्रयत्नशील सिद्धों में भी मुझे (भगवान् को) वास्तविक रूप से कोई ही जानता है (जान सकता है) ॥३००॥

इति श्रीमत्सद्गुरुपूज्यकवीरचरणाब्जभृङ्गायमान बोधानन्देन विरचितायां विज्ञानबीजप्रदीपिकायां साखीव्याख्या सम्पूर्णं (सम्पूर्णा)। शुभं भवतु ॥

•

१. द्रष्टव्य—धर्मे तरौ तत्र पुनः शरीरकं, पुनः क्रियाश्चक्रवदीर्यते भवः ॥
धर्मेतरौ तौ = शरीरोद्भवः क्रिया (कर्म) च। (रामगीता, श्लो० ८)

२. तुलनीय—भ० गी०, ७,३; भागवत, ११,१४,२५ आदि।

कबीर-वाणी

(साखी-भागस्य संस्कृत-रूपान्तरम्)

□

प्राक्कथनम्

साहित्याकाशशीतांशोः कबीरस्यैष सङ्ग्रहः ।
विवृतो देववाण्यात्र विदुषां प्रीतये भवेत् ॥१॥

कबीररोपितोद्यानकुसुमामोदसञ्चयः ।
भवत्वेष सुपर्वाणवाणीमधुपतुष्टये ॥२॥

सकामकर्मविटपोच्छेदे परशुसन्निभा ।
ज्ञानमार्गोपदेशेन भक्तिमार्गप्रदर्शिनी ॥३॥

तत्त्वमस्यादिवाक्यार्थैर्मोक्ष-पीयूषवर्षिणी ।
गुरूपदेशसच्छास्त्र - साधुसेवावलम्बिनी ॥४॥

वेदत्रयोपदेशाढ्या ग्रथितैषा त्रिवेदिना ।
कबीर-त्रिशती रम्या भवेद् विद्वद्विभूषणम् ॥५॥

कबीरकृतीनामोजस्वितया महत्त्वेन च समाकृष्टः कविवरेण्यो रवीन्द्रनाथठक्कुरमहोदयोऽस्य कवेः कतिचित्पद्यान्याङ्गलभाषायामनूदितवान् । तदनुसारमेवास्माभिर्विरचितोऽस्य कवेः 'साक्षि' प्रकरणस्य समश्लोकी संस्कृतानुवादो विदुषां रसास्वादनायात्र प्रस्तूयते ।

वस्तुतस्तु एष न वाक्यानुवादो न च शब्दशोऽनुवादो वा, किन्तु भावानुवाद एव । यतः कबीरस्य विचारसरणिप्रदर्शनमेवास्माकमत्र प्रमुखं ध्येयम्, तच्च शब्दशोऽनुवादेन न सम्भवेत् । अनेकेषु च प्रसङ्गेषु, आवश्यकतानुसारं, व्याख्याकारस्य बोधानन्दस्यापि विचाराणां समावेशोऽत्र विहितः ।

'साखि'-प्रकरणेऽनेकानि पद्यानि 'मुक्तका'न्येव; अतस्तेषु क्रमभङ्गोऽप्यस्त्येव, यथान्येषु प्रसङ्गेष्वपि । अथ च —अत्रान्तर्गतानां प्रहेलिकानां (उलटबाँसियाँ) समश्लोकी अनुवादस्तात्पर्यं च श्लोकेनैकेन नावगम्यते स्पष्टतया, यथा षट्संख्याङ्किते पद्ये श्लोकेनैकेन स्पष्टो भवति; अतः श्लोकद्वयस्यावश्यकतात्र, यथा—

ज्ञानस्वरूपो जीवोऽसौ ब्रह्मैवेति न संशयः ।
मालिन्यं 'तत्त्वमस्यादि'वाक्यैस्तस्यापसार्यते ॥

पृथगेव जगज्जालैस्तिष्ठन् स न विलिप्यते ।
कुक्कुटी पद्मपत्रं वा यथा सलिल - सीकरैः ।।

एवमेव च, नवपञ्चाशत्संख्याकस्य पद्यस्यानुवादः श्लोकद्वयेनैव सुस्पष्टो भवति, विशेषां च कमनीयतामाधत्ते, यथा—

मनःखगस्य सङ्कल्पविकल्पात्मक-पक्षती ।
छिनत्ति ज्ञानबाणेन गुरुः शिष्योपदेशकः ।।

विचित्रं यद् गृहे नष्टे छादनं तु सुरक्षितम् ।
दग्ध्वाधरस्थमज्ञानं शश्वच्छान्ति दिशत्यसौ ।।

अत्र श्लोकानां क्रमश्च यथोपरि व्याख्यायां प्रदर्शितस्तदनुसारमेवात्रास्माकं प्रयत्नः, यद्यप्यन्यान्यैष्टीकाकारैर्विविधरूपेणास्य कवेः पद्यानां व्याख्या विहिता यया च ज्ञायत एव। कुत्रचिच्च पारस्परिकसम्बन्धस्योपयोगितामनुभूय भावानुवाद एव विहितः ।

एवमनेकविधकाठिन्यमनुभवद्भिरस्माभिर्विहित एष प्रयत्नो विदुषां मोदाय भवेदित्याशास्महे। वस्तुतस्तु, 'कबीर-सप्तशती'रचनयैवास्माकं परिपूर्णः स्यादेष सङ्कल्पः, तत्कार्यं चेश्वराधीनं, विदुषामभ्युपपत्त्यधीनं च ।

अन्ते च विभिन्नैः कारणैः विशेषतश्च वार्धक्येन यानि स्खलितान्यत्र सञ्जातानि, तेषां विषये क्षमां प्रार्थयन्तो वयं पूर्वैरुक्तामध्येषणामेवानुवच्मः, यथा—

'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।'

अथ च—

अद्वैतं निरुपाधि निर्गुणमजं सृष्टेः परं कारणं
चैतन्यं सचराचरेऽत्र भुवने प्रोक्तं कबीरादिभिः ।
निर्धूताखिलकल्मषैरवगतं रामाख्यमोजः परं,
ग्रन्थेऽस्मिन् प्रतिपादितं प्रजनयेत् शान्तिं धरित्रीतले ।।

३३, शंकरबाग,
इन्दौर-४५२००६ (म०प्र०)

विदुषां वशंवदः
हरिहरस्त्रिवेदी

॥ श्री ॥

कबीर-त्रिशती

कबीरस्य साक्षि-पद्यानां समश्लोकि-संस्कृतभाषात्मकं रूपान्तरम्

(बोधानन्दस्य व्याख्यायाः परिप्रेक्ष्ये)

□

पञ्चतत्त्वमये पिण्डेऽनुस्यूतं ब्रह्म चिन्मयम् ।
पृच्छामि विद्वंस्त्वां शब्द-जीवयोः को महत्तरः ॥१॥

पञ्चतत्त्वात्मको देहो, नामरूपे तु कल्पिते ।
चैतन्ये निर्गते चायं मृत एवेति निश्चितम् ॥२॥

एभ्यो भिन्नमदृश्यं च चित्तत्त्वं देहसंस्थितम् ।
विरलास्तस्य मर्मज्ञा गुरोरेव च सेवया ॥३॥

अहं तदेव चित्तत्वमिति ज्ञानं तु मोक्षदम् ।
एतद्बोधविहीनस्तु कर्ममार्गेऽनुधावति ॥४॥

जीवस्य रङ्गो द्विविधो मायाचैतन्यभेदतः ।
मायारङ्गाज्जडो नूनं चैतन्याच्चिन्मयस्त्वसौ ॥५॥

देहाद्भिन्नोऽस्ति जीवात्मा कमलं सलिलाद्यथा ।
मालिन्यं तत्त्वमस्यादिवाक्यैस्तस्यापसार्यते ॥६॥

एक एवाचलो नित्योऽखिलवस्तु-प्रकाशकः ।
आत्मा विगीयते शास्त्रैस्तेन सर्वमिदं ततम् ॥७॥

अतः प्रतिपलं सोऽहमिति ध्यानपरो भव ।
बाह्यमाडम्बरं मालातिलकादि-न मुक्तये ॥८॥

ब्रह्मैवाहमितिध्यानाद्वासना विपलायते ।
ततश्च हित्वा भोगेच्छां मुच्यते संसृतेर्नरः ॥९॥

तत्त्वमस्यादिवाक्येभ्यो न भेदो ब्रह्मजीवयोः ।
तस्मात्सोऽहमितिध्यानमेव मोक्षप्रदायकम् ॥१०॥

ब्रह्मैवाहमिति ज्ञानं विना जीवो न मुच्यते ।
श्रेयस्करं च तद् ज्ञानं लभ्यते गुरुसेवया ॥११॥

समष्टिव्यष्टिनगयोरुपर्यानन्दपादपः ।
निर्वासनमनोभृङ्ग-विषयः समवस्थितः ॥१२॥

जीवन्मुक्तो वसत्यत्र स्थाने दूरेऽतिलौकिके ।
निष्कामकर्मशीलानामेव तत्र मतिर्भवेत् ॥१३॥

अनात्मवादिनां सङ्गान्न तत्स्थानमवाप्यते ।
अतो निजोद्यमैरेव तत्स्थानं प्राप्तुमर्हसि ॥१४॥

जीवो बद्ध इति भ्रान्तेरविद्यैवास्ति कारणम् ।
अतो ह्यविद्यामुत्सार्य स्वयं पाथेयवान् भव ॥१५॥

उपाधिच्छन्न आत्मैव देहं स्वमिव भावयन् ।
आपातमधुरास्वादान् भोगान् मौर्ख्यात्समश्नुते ॥१६॥

इष्टं विस्मृत्य भोगेषु मग्नमेतत् जगत्त्रयम् ।
समुद्गृहीतेषु तिलेषूद्युक्तं तत् तुषग्रहे ॥१७॥

एवं - विधेषु दुष्कर्मरतेषु जडबुद्धिषु ।
सुधोपदेशः स्यादाशीविषेष्विव निरर्थकः ॥१८॥

स्रक्चन्दनादिविषयान् भोगतृष्णाविषं तथा ।
रुद्ध्वा जानीहि चिन्मात्रं व्याप्तं साधो स्वविग्रहे ॥१९॥

वेदस्मृतिपुराणेषु यद्यत्समुपदिश्यते ।
तस्य सर्वस्य निष्कर्षः सोऽहमस्मीति भावना ॥२०॥

निलीयते देहदर्पस्तत्त्वमस्यादिचिन्तनैः ।
माया चेयं तदा नश्येत् सिद्धिः स्याच्च समीपगा ॥२१॥

एवं ज्ञानी बुद्धियोगादुन्नतं गिरिमास्थितः ।
सद्गुरोरुपदेशेनाविद्यापारमवाप्नुयात् ॥२२॥

एवमुच्छ्रितपन्थानमारुह्य विमलाशयः ।
याहि पूर्वैरनुसृतं रामस्योच्छ्रितमास्पदम् ॥२३॥

लब्ध्वापि नरदेहं यः कुरुते नात्मचिन्तनम् ।
सम्यग्ज्ञानविहीनः सोऽनुगच्छेत् संसृतिं पुनः ॥२४॥

पाथेयवान् भवात्रैव पुरोमार्गस्तु दुस्तरः ।
नित्यशान्तिरलभ्या स्यादिन्द्रियार्थावृते पथि ॥२५॥

बाल्यात्प्रभृति शास्त्रादिपठने विहितश्रमम् ।
मनोऽवटे चेन्निपतेत् ततो नोद्धरणं क्षमम् ॥२६॥

यथा वनाद् विद्रुतोष्ट्रः कान्तारेष्वपचीयते ।
तथा ध्येयच्युतं चेतो विषयेष्ववसीदति ॥२७॥

तीव्रवैराग्यवानेव लभते स्वात्मदर्शनम् ।
देहबुद्धिं ततस्त्यक्त्वा पूर्णबोधो भवत्यसौ ॥२८॥

चैतन्यरूपोऽहमिति ज्ञानमेव हितं मतम् ।
न तथा शास्त्रपठनं न च तीर्थं न चार्चनम् ॥२९॥

ये ये स्वमतवादेषु विवदन्ते परस्परम् ।
वासनाविष्टमनसस्तेऽप्यक्षसुहृदो मताः ॥३०॥

इन्द्रियासक्तजीवस्तु स्वरूपं नैव बुद्ध्यति ।
नानाक्रियाभिश्च देहमांसं शोषयते वृथा ॥३१॥

छिन्नौ कर्णौ न युज्येते, छिन्नाम्रो नाङ्कुरायते ।
स्वर्णीभूतस्तथा लोहो न पुनर्लोहतां व्रजेत् ॥३२॥

जगद् ब्रह्ममयं बुद्ध्वा जीवन्मुक्तो भवेन्नरः ।
आशापाशं विमुच्यासौ ततो मोक्षामृतं पिबेत् ॥३३॥

जीवन्मुक्तिः शास्त्रसारस्तदभ्यासो हितावहः ।
दुर्लभो नरदेहोऽयं पुनः प्राप्यो न वाथ वा ॥३४॥

स्वच्छ - प्रज्ञादर्शतले विलोक्यात्मानमव्ययम् ।
ब्रह्मैवाहं सर्वमिदं चेति ज्ञानं सुखावहम् ॥३५॥

लोकेऽस्मिन् प्रसृतं जाड्यं श्मशाने दृषदो यथा ।
ब्रह्मैवास्मीति विज्ञानीमात्रको मोक्षमश्नुते ॥३६॥

अध्यात्मनिष्ठमनसं त्रिधा-तापो न बाधते ।
चकोरश्चन्द्रनिध्यानोऽङ्गारान् गिरति निर्व्यथः ॥३७॥

सन्त्येवात्र हि निर्बोधा आत्मज्ञानविवादिनः ।
मलयाद्रौ न सर्वेऽपि तरवश्चन्दनद्रुमाः ॥३८॥

चन्दनस्य सुगन्धेन वास्यन्ते विरला द्रुमाः ।
रोहन्ति मलयक्षोण्यां न कदापि हि वेणवः ॥३९॥

जीवेश्वरौ विभिन्नौ ये मन्यन्ते मूढचेतसः ।
प्रवसन्तोऽपि नित्यं ते न विन्दन्ति परं पदम् ॥४०॥

मनस्तु चिन्तयेदन्यच्चित्तमन्यद्विगाहते ।
षडूर्म्मिसंशये मग्नो देह एवं विनश्यति ॥४१॥

औदासीन्याद् गृहं त्यक्त्वा ये तपन्ति तपो वने ।
विनाशमुपयात्येव तेषामपि कलेवरम् ॥४२॥

रामोऽहमेतदखिलं जगच्चेत्यवबुध्यतः ।
न जातु बाधते निद्रा न च व्याधिः शरीरजा ॥४३॥

रामनामरसे मग्नो न हृष्यति न शोचति ।
आत्मैवाहमिति ज्ञानी समोऽस्ति सुखदुःखयोः ॥४४॥

जडोऽपीन्द्रियवर्गोऽसावात्मनैव प्रकाश्यते ।
लोहोऽपि भवति स्वर्णं यथा हेमलचालितः ॥४५॥

गृहे गृहे किं भ्रमथ ब्रह्मविद्योपदेशकाः ।
तृषार्त्तो हि नदीं याति न सा तस्य निकेतनम् ॥४६॥

उपधाय प्रेममयं वस्त्रं साधो, प्रनृत्यताम् ।
प्रेमस्वरूप आत्मा त्वं शरीराभ्यन्तरस्थितः ॥४७॥

आत्मा शरीरसंसर्गात् संश्रयत्यभिमानिताम् ।
प्रतिबिम्बं यथादर्शे दृष्ट्वा गर्ज्जति कुक्कुरः ॥४८॥

एक एव चिदात्माहं न द्वितीयस्तु दर्पणे ।
अहं तस्मिन् स च मयीत्येवं निर्णीयते पुनः ॥४९॥

स्वात्मरूपं तु विस्मृत्य पतन्ति विषयेषु ये ।
तेषां संसारसक्तानां नोद्धारोऽस्ति कदाचन ॥५०॥

देहाद्भिन्नोऽहमात्मेति जानतो न भवेद् व्यथा ।
चकोरो हि गिरत्येव दहद्वह्निकणान् मुदा ॥५१॥

स्वानन्दोऽहं चिदात्माहं सर्वदैकरसोऽव्ययः ।
एवं यो वेत्ति युक्तात्मा स विवेकी निगद्यते ॥५२॥

चैतन्यचन्दनतरोः शिखामाश्रित्य यः स्खलेत् ।
मोहलोभाकृष्टमना मूढयोनौ स जायते ॥५३॥

सच्चिदानन्दरूपोऽहमिति योऽवैति तत्त्वतः ।
मुक्तः स एव न त्वन्यो यज्ञतीर्थादिभावितः ॥५४॥

श्रुतिवाक्यमवज्ञाय स्वविचारं न कुर्वते ।
लोकैषणानिमग्नास्ते जायन्तेऽत्र पुनः पुनः ॥५५॥

यदान्तःकरणे ब्रह्मकृशानुर्ज्वलितो भवेत् ।
तदा निर्दग्धविषयः साधकोऽमृतमश्नुते ॥५६॥

त्रुटितैर्विस्फुलिङ्गैश्च देहगर्वोऽपि दह्यते ।
वादावादे ज्वलन्त्यन्ये स्वप्रकाशं तु मौक्तिकम् ॥५७॥

अविद्यां भस्मसात्कृत्वा ज्वलन्निर्धूमपावकः ।
ज्ञानाग्न्युद्दीपनाभ्यासात् पाशः सन्दह्यते बुधैः ॥५८॥

कुवासनामयं गेहं दग्ध्वा ब्रह्माग्निवर्चसा ।
शिष्यमाच्छादयेत् ज्ञानपटलेन गुरुर्महान् ॥५९॥

विन्दुरन्तर्विशत्यब्धावेतत्तु विदितं खलु ।
बिन्दावब्धेस्तु विलयो विरलैरेव बुद्ध्यते ॥६०॥

खलस्य हृदये बद्धमूलोऽस्ति विषपादपः ।
स रोहत्येव शास्त्रोक्त्या न कदापि तु शीर्यते ॥६१॥

वार्धक्ये जीर्णतामेति चिन्ताक्रान्तं कलेवरम् ।
ज्ञानाद्विना पुनर्मृत्युः पुनर्जन्मेति शृङ्खला ॥६२॥

निर्विकल्पो भवेत्तीव्रवैराग्यादेव नान्यथा ।
वैराग्यस्याप्यथोत्पत्तिर्वासनोन्मूलनाद् भवेत् ॥६३॥

परिपूर्णं समं ब्रह्म यो भावयति सर्वतः ।
पुनरावर्त्तते नासौ ब्रह्मभूयाय कल्पितः ॥६४॥

'सत्यं ज्ञानमनन्तं' यद् ब्रह्मणो वर्णनं श्रुतौ ।
तदेवाधार्यतां चित्ते तदेव च विचार्यताम् ॥६५॥

अमोघमेतद्वाणिज्यं कुरु त्वं सत्यनिष्ठितः ।
निर्मलं मानसं कृत्वा छिन्धि चाज्ञानमात्मनः ॥६६॥

जडदेहकृतं कर्म सन्दह्य ब्रह्मतेजसा ।
निरिन्धनाग्निरिवत् शान्ता भवन्त्यन्ते मुमुक्षवः ॥६७॥

एतज्जातु न शृण्वन्ति कुदर्पाध्मातचेतसः।
सद्गुरूपनिषद्वाक्ये श्रद्धाहीनाः कुबुद्धयः ॥६८॥

न मनुष्योऽहमात्मैवेति विज्ञाय स्वमुद्धर।
मोहक्षाराब्धिमुत्तीर्य जागृहि त्वं व्यथस्व मा ॥६९॥

व्याख्यानदक्षा बहवो वेदशास्त्रविचक्षणाः।
आत्मज्ञानं विना त्वेते लोभमोहवशं गताः ॥७०॥

वेदादिपठने ये च वाङ्मात्रविहितश्रमाः।
समाश्रयविहीनास्ते मज्जन्ति जगदर्णवे ॥७१॥

आत्मज्ञानं च दर्पश्च न जात्वेकत्र तिष्ठतः।
तत्त्वमस्यादिवाक्यानामर्थं सम्यग्विचिन्त्यताम् ॥७२॥

चिद्रूपः परमात्मासावेव जीवात्मतां गतः।
इत्यभेदस्य वेत्तारो ध्यायन्त्यात्मानमात्मनि ॥७३॥

न शरीरं नास्य कोशा नेन्द्रियाणि न वा मनः।
एतेभ्यो भिन्न एवात्मा सोऽद्वितीयश्च कथ्यते ॥७४॥

वादावादं पक्षहठं तथा च बहुभाषितम्।
हित्वा परमहंसस्य गुरोर्वाक्यं विचार्यताम् ॥७५॥

जिह्वासुखं मन्यमानो जल्पवादी क्षणे क्षणे।
आन्दोलवद् भ्रमन् देही शमनेनापनीयते ॥७६॥

अनादृत्येश्वरं कर्मबन्धनं वर्णयन्ति ये।
ताञ्छ्रुत्वा तैः सहैव त्वमन्धकूपे पतिष्यसि ॥७७॥

व्याप्तोऽस्ति देहे जीवात्मा, स विना योगचुम्बकम्।
नैवोद्धृतो भवेज्जातु तपोदानव्रतादिभिः ॥७८॥

अतः सूक्ष्मेण मार्गेण चित्तं ब्रह्मणि योजय।
अनासक्तः प्रवादेषु समुन्मूल्य च वासनम् ॥७९॥

ब्रह्मा विष्णुर्महेशश्च मुनयः सनकादयः।
आसन् मुक्ता येन पथा तमेव त्वमनुव्रज ॥८०॥

न भिन्नोऽस्तीश्वरो जीवान्न च स्वर्गे वसत्यसौ।
न चाप्यष्टाङ्गयोगेन सम्भवेत् तस्य दर्शनम् ॥८१॥

जगदुत्पत्तिविषये सन्ति वादास्त्वनेकशः।
सर्वेऽपि ते लयं यान्ति तस्मिन् दृष्टे परावरे ॥८२॥

षट्शास्त्रज्ञाः स्वस्वमतस्थापने पटुबुद्धयः।
किं तु सर्वगतं ब्रह्म जानाति शुचिमानसः ॥८३॥

अविद्याच्छन्नमनसामहङ्कारः प्रवर्धते ।
स्वस्यानुभवतः सारं यो वेत्ति स हि बुद्धिमान् ॥८४॥

स्वर्गादिप्राप्तिविषयामाविलां त्यज शेमुषीम् ।
मनोब्धिकल्पनावीच्यां मा पत, ध्वंस एव सः ॥८५॥

उद्याने गन्धलोभेन यथा भ्रमति षट्पदः।
तथा जीवोऽपि विषये भ्रमन् नैराश्यमश्नुते ॥८६॥

मतवादाब्धिजालेऽत्र निमज्जन्त्यल्पबुद्धयः।
बद्ध्या विविच्य त्वात्मानमुद्धरन्ति मनीषिणः ॥८७॥

सार्धं मनोविहङ्गेन त्रिदेहशलभा अपि।
डयन्ते हरिमज्ञात्वा पतन्ति त्वन्धतामसे ॥८८॥

मनसोऽनेकरङ्गस्य विषयाननुधावतः ।
अनुगामी भवत्येव जीवोऽपि प्रसभं हृतः ॥८९॥

मनःसङ्गाच्च जीवोऽपि भ्रमत्यज्ञानमोहितः।
यथा वानरपालेन सार्धं भ्रमति मर्कटः ॥९०॥

इदं मनश्चञ्चलं च तस्करश्च प्रवञ्चकः।
अनेन मोहिता देवा नराश्च मुनयोऽपि च ॥९१॥

अद्वैतवार्त्तां मा ब्रूहि मोहमग्नं जनं प्रति।
श्रुत्वैव यां तु युक्तात्मा समाधौ भवति स्थिरः ॥९२॥

देहदर्पभुजङ्गेन दष्टमेतज्जगत्त्रयम्।
तत्प्रभावात्स मुच्येत यो रामं भजतेऽनिशम् ॥९३॥

अनुबुद्ध्यस्व भो मित्र, कालः शिरसि नृत्यति।
कर्ममार्गे गृहं यस्य न तस्य शयने सुखम् ॥९४॥

देहाभिमानिनो देहेऽन्तकोऽपि वसति स्वयम्।
आयुर्हरणशीलं तं नैव जानाति मूढधीः ॥९५॥

वासनापरिखामध्ये मनोवेश्माधिवासिनः ।
अभिमानाहिदष्टस्य न मन्त्रं नाप्यथौषधम् ।।९६।।

मनोविलसितं त्वेतन्मायया कल्पितं जगत् ।
सभोक्तृदेहत्रितयं निर्विकल्पे विलीयते ।।९७।।

मनसो वृत्तयः क्षुब्धसिन्धुवीचिसमाः स्मृताः ।
मज्जन्ति बालिशास्तत्रोन्मज्जन्ति च विवेकिनः ।।९८।।

भोगेष्वभिनिविष्टानामसद्वर्त्तनचेतसाम् ।
स्वात्मनिश्चयहीनानां गतिरन्तेऽतिदुःखदा ।।९९।।

द्रव्योपार्जनसक्तान् यान् कामयन्तेऽनुजीविनः ।
त एव पुत्रदाराद्यैरुपेक्ष्यन्ते जरातुराः ।।१००।।

मानुषं वपुरासाद्य यो न स्यादात्मतत्त्ववित् ।
तस्यावृत्तिर्भवत्येव गजोष्ट्रादिषु योनिषु ।।१०१।।

दुर्बुद्धेर्मानसं नैवोपदेशेनापि शुद्धयति ।
गृहाङ्गणगतः श्वानः पिष्टं लेढि पुनः पुनः ।।१०२।।

अज्ञानावृतहृद्द्वारो गुरोर्वाक्यमपास्यति ।
पिष्टं लेढि यथा गेहोपविष्टो वक्रबालधिः ।।१०३।।

'त्वं तदेवेति' गुरोर्वाक्यं यो नावबुध्यते ।
बककुक्कुटयोनौ स जायतेऽत्र पुनर्भुवि ।।१०४।।

देहं मृद्भाण्डभिदुरमवबुद्धय विचक्षणः ।
आत्मबोधाय यततेऽसल्लोकान्मोक्षकांक्षया ।।१०५।।

प्रसारितः स्वर्णपात्रे रत्नानां दृश्यते चयः ।
यद्यस्य रोचते तत्तत् क्रेतुं पण्ये स उद्यतः ।।१०६।।

हंस, त्वं स्वर्णवर्णोऽपि श्लाघ्यो न हि मयाधुना ।
श्रेष्ठं पदं यदाप्नोषि कुर्वे ते संस्तुतिं तदा ।।१०७।।

बलवानपि हंस त्वमभवो निर्बलः कथम् ।
मायाप्रपञ्चसंसारे यस्मादेवं विमोहितः ।।१०८।।

वासनानिम्नगा यावच्चित्ते वहति हंस, ते ।
आत्मज्ञानं न जागर्त्ति तावत्परवशे त्वयि ।।१०९।।

निष्क्रामन्ति यदा प्राणास्तदा शून्यं कलेवरम् ।
श्रीकबीरो वदत्युच्चैः प्राणिनां गतिरीदृशी ॥११०॥

बकहंसावेकवर्णौ कासारे सहचारिणौ ।
नीरक्षीरविवेक्ष्येको यादांस्यत्त्यपरस्तयोः ॥१११॥

निर्बुद्धि शादहरिते चरन्तीं हरिणीं यथा ।
कालव्याधः क्षिणोत्याशु तस्मात्तूर्णं प्रबुद्ध्यताम् ॥११२॥

त्रिदेहपञ्जराविष्टं पापपुण्यवितंसगम् ।
देहाभिमानिनं जीवं कवलीकुरुतेऽन्तकः ॥११६॥

तीव्रवैराग्यवानेव समाधौ भवति स्थिरः ।
विकलेन्द्रियवर्गस्तु शास्त्रनाम्नैव सीदति ॥११४॥

लोभाद्याविष्टमनसां पापापहृतचेतसाम् ।
अज्ञानावृतबुद्धीनां पशुयोनौ भवेज्जनुः ॥११५॥

पञ्चकोशात् त्रिदेहाच्च भिन्नोऽहमिति वेदितुः ।
आविर्भवति चिद्रूपं, न शास्त्रैर्न च गायनैः ॥११६॥

दुर्लभं मानुषं जन्म पुनर्भवति वा न वा ।
न हि सञ्जयितुं शक्यं शाखाग्रात्पतितं फलम् ॥११७॥

तस्माद् गुरुमुपागच्छ ब्रह्मनिष्ठं जितेन्द्रियम् ।
देहाभिमाने विरसं सादरं मानपूर्वकम् ॥११८॥

अभिमानभुजङ्गेन स्वात्मबोधोऽस्ति दंशितः ।
तत्परित्यागतः श्रेयो ग्रहणात्तु निमज्जनम् ॥११९॥

नरदेहस्त्वयावाप्तो ज्ञानशीला मतिस्तथा ।
परित्यज्यान्यमार्गांस्त्वं स्वात्मध्यानपरो भव ॥१२०॥

द्वैत वाऽद्वैतमेवेति शास्त्रार्थान्न प्रयोजनम् ।
ब्रह्मस्वरूपमज्ञातं 'नेति नेतीति' वर्णनात् ॥१२१॥

निर्विकल्पानन्दमयं श्रुतिर्मूर्ध्नि प्रतिष्ठितम् ।
कैवल्यरूपं प्रथितं चतुर्विधमिति श्रुतिः ॥१२२॥

चौर्यकर्मप्रवृत्तान्तःकरणानां चतुष्टयम् ।
दुष्टेन मनसालोभ्य भोगगर्त्ते निपातितम् ॥१२३॥

यद्भावयन्ति मुनयस्तपोध्यानपरायणाः ।
'यतो वाचो निवर्त्तन्ते' इति वेदाः समुज्जगुः ।।१२४।।

स एकमात्रः प्रभवः सर्वेषां प्राणिनां मतः ।
तमेवाभिविशन्त्येते लोका इति च विश्रुतम् ।।१२५।।

'तत्त्वमस्यादी'ति गुरोरुपदेशो हितावहः ।
मुनिभिः शास्त्रवाण्या वा यस्य पारो न बुद्धचते ।।१२६।।

अकारादिक्रमेणाथ नाभि-हृत्-कण्ठ-मस्तके ।
ब्रह्मध्यानं ध्वंसयति सर्वं कर्म शुभाशुभम् ।।१२७।।

यदाप्तये ज्ञानकर्मभक्तिमार्गा निरूपिताः ।
अपरोक्षश्चिदात्मासौ हृद्येव वसति स्वयम् ।।१२८।।

दुग्धवन्निर्मले स्वान्ते साक्षादात्मा प्रकाशते ।
आत्मैवाहमिति ज्ञानविद्भिरेतन्निगद्यते ।।१२९।।

स्वात्मारामेणाप्यथैवं बोधितो यो न बुध्यते ।
अबुद्धिः स पिबन् क्षारं नाप्नोति परमां गतिम् ।।१३०।।

वर्णाश्रमसजम्बाले वासनावागुरावृते ।
अहङ्कारोच्छ्रिताभोगे विषपादपकोटरे ।।१३१।।

निवसन्तमविद्यायाः प्राङ्गणे साध्वसाकुलम् ।
अनुरुध्येद् गुरुः शिष्यं सत्यसम्बोधसम्पदा ।।१३२।।

कुलाचारे सम्प्रदाये च मृषागर्वमुत्सृज ।
मिथ्यादर्पे च न भवान् कालयापनमर्हति ।।१३३।।

उप्त्वा प्रभूतं बीजं चेत् स्वल्पमेवाप्स्यसे फलम् ।
अवमान्योपदेशं मे कथं यास्यसि निर्वृतिम् ।।१३४।।

त्यक्त्वा जात्यादिदर्पं यो निश्छलो भजते हरिम् ।
निर्वैरः सर्वसत्त्वेषु स साधुस्तत्त्वतो मतः ।।१३५।।

प्रवृत्तैर्मतवादैश्च सर्वं सम्मोहितं जगत् ।
भजते निरपेक्षो यो हरिं साधुः स वस्तुतः ।।१३६।।

अहं तपस्व्यहं योगीत्यहङ्कृतिविमोहिताः ।
श्रेयस्तत्त्वं न जानन्ति ये तेषां हि वृथा श्रमः ।।१३७।।

मायया मोहितो लोकः कामिन्या कनकेन च।
विनाशमुपयात्येव तूलवत् कृष्णवर्त्मना ॥१३८॥

मायेयं सर्पिणीवास्ते विषयेषु प्रलोभिनी।
यस्या आकुञ्चिते पाशे धीर एव न बद्धचते ॥१३९॥

सर्पस्य वृश्चिकस्यापि मन्त्रो दंशस्य विद्यते।
वासनाजालबद्धस्य न मन्त्रो नाप्यथौषधम् ॥१४०॥

न मनागपि भेदोऽस्ति जीवात्मपरमात्मनोः।
एकोऽभोक्ताऽपरो भोक्ता देहपञ्जरमास्थितः ॥१४१॥

शरीरान्तर्गतो जीवस्तैनैक्यं स्वस्य भावयन्।
सुखदुःखे देहधर्मौ स्वकीयावेव मन्यते ॥१४२॥

तस्माद्गुरुमुपागच्छेद् ब्रह्मनिष्ठं समित्करः।
अन्यथा विषयाम्बोधौ जीवो मज्जत्यसंशयम् ॥१४३॥

ज्ञात्वापि चतुरो वेदान् योऽभिमानाहिदंशितः।
कदाप्यन्तर्विचारेऽस्य ब्रह्मत्वं नोपजायते ॥१४४॥

अविद्योपाधिविच्छिन्नो जीव उद्विजतेऽन्तकात्।
अज्ञानं कारणं चात्र, देहोऽयं तु विनश्वरः ॥१४५॥

सत्त्वं रजस्तमश्चेति मायाविद्यागुणास्त्रयः।
फलानि च तयोर्विश्वतेजसौ प्राज्ञ इत्यपि ॥१४६॥

अनात्मवादिनामात्मविषयेऽल्पधियां तथा।
सङ्गं मा कुरु, ते सर्वे व्याघ्रगर्दभगोसमाः ॥१४७॥

भोगोन्मुखं चञ्चलं च मनो मत्तेभसन्निभम्।
ज्ञानाङ्कुशेनैव हस्तिचारिणेव निगृह्यते ॥१४८॥

आप्तवाक्यमनादृत्य विषयाननुधावतः।
मनोविहङ्गस्य रोधः कर्त्तव्यो हि मनीषिणा ॥१४९॥

अपि सृजन्ती विद्वेषं पितृपुत्रात्मबन्धुषु।
मायापिशाचिका सेयं न केनापि समं गता ॥१५०॥

संयोगश्च वियोगश्च देहस्यैवानुषङ्गिणौ।
तौ हित्वा भव निर्मुक्तो भुजङ्गः कञ्चुकं यथा ॥१५१॥

मायया मोहिताश्चैते ब्रह्मविष्णुशिवादयः ।
देवगन्धर्वमनुजाः साधवश्च तपस्विनः ।।१५२।।

कुक्कुरेणेव मनसा देहोऽयं भ्राम्यतेऽनिशम् ।
कालव्याधः समासन्नो विषमेयं परिस्थितिः ।।१५३।।

अतो मुमुक्षुणा ज्ञेयो भेदो देहाच्चिदात्मनः ।
यस्य ज्ञानाद्विना लोके विनाशो भवति ध्रुवम् ।।१५४।।

सद्गुरोरुपदेशेन मनो भवति निर्मलम् ।
यथा पांशुपरिष्कारादृर्पणो दीप्तिमाप्नुते ।।१५५।।

मूर्खं बोधयितुः स्वस्याप्यात्मज्ञानं विशीर्यते ।
शिष्यः स्वयं प्रमादी चेत् सद्गुरुः किं करिष्यति ।।१५६।।

व्यभिचारिणि शिष्ये तु गुरोर्वाक्यं न तिष्ठति ।
शून्यगर्भे यथा वेणौ श्वसनं न भवेत् स्थिरम् ।।१५७।।

तत्त्वमस्यादिवाक्यार्थं दर्पाविष्टो विगर्हते ।
शिष्यस्यैव प्रमादोऽसौ न दोषः कोऽपि सद्गुरोः ।।१५८।।

रसेच्छया शाल्मलिस्थो चञ्चवाघातैर्यथा शुकः ।
कार्पासमेव लभते तद्वत् संसारिणः स्थितिः ।।१५९।।

सोऽपि पुत्रकलत्राप्तवर्गप्रहितमानसः ।
नैराश्यमवलम्ब्यान्ते विसृजत्येव विग्रहम् ।।१६०।।

वर्णाश्रमे यथा देहे दर्पमुत्स्रष्टुमर्हसि ।
ज्ञात्वा कीरस्य नैराश्यं शाल्मलिद्रुमसेवने ।।१६१।।

संसारचक्रं दृष्ट्वा मे नेत्रे बाष्पाम्बुसम्भृते ।
प्रस्तरद्वयमध्यस्थो न हि कोऽप्यपरिक्षतः ।।१६२।।

कस्य प्रत्ययमालम्ब्य जनास्तु निभृतं स्थिताः ।
घातयत्यन्तकः प्राणान् शौनिकश्छगलान् यथा ।।१६३।।

शास्त्रदक्षश्च यो लोकसामान्य इव चेष्टते ।
स वितृष्णो महाप्राज्ञो न केनाप्युपरुद्धयते ।।१६४।।

घनप्रहारं सहते वज्र एवेति विश्रुतम् ।
परीक्षणे यो दीर्येत कपटी मानवस्तु सः ।।१६५।।

ज्वलन्ति केशास्तृणवत् अस्थीनि च यथेन्धनम्।
तूलवच्च शवस्तद्वद् रामाग्नौ दह वासनाम् ।।१६६।।

पद्भ्यां पृथ्वीं मापयन्त उत्खानितधरास्तथा।
तुलितक्ष्माभृतश्चाद्य हन्त नामावशेषिताः ।।१६७।।

न लेखनं न वा पत्रं स्पृशन्तोऽपि कदाचन।
चतुर्युगस्य माहात्म्यमग्रे शंसन्ति साधवः ।।१६८।।

वर्णाश्रमाभिमानेनाध्माताः सर्वेऽपि मानवाः।
हरेर्निवासं वैकुण्ठे मन्यन्ते, ते त्वबुद्धयः ।।१६९।।

अपथेन न तीर्थेषु गमनं जातु सम्भवेत्।
पाखण्डे जगति व्याप्ते ब्रह्मावाप्तिर्दु रासदा ।।१७०।।

देहाभिमानी दुर्बुद्धिर्नोपदेश्यः कदाचन।
पाषाणकृतसन्धानो ज्ञानबाणो विनश्यति ।।१७१।।

लोहखण्डं न तिष्ठेत मन्दिरामलके यथा।
तथा मूर्खस्य हृदये शब्दज्ञानं न तिष्ठति ।।१७२।।

गुरूपदेशो बुद्धिश्च श्रुतिस्मृतिविलोचने।
न सन्ति यस्य तेनात्मज्ञानं कर्तुं न शक्यते ।।१७३।।

ज्ञाता, ज्ञानं तथा ज्ञेयं सर्वमेव स ईश्वरः।
चिद्रूपं तं विजानाति स एव हि महामतिः ।।१७४।।

ये ध्यायन्ति विदूरस्थं मत्वा नारायणं जनाः।
उपेक्ष्य हृत्स्थं चैतन्यं तेषां गतिरनिश्चिताः ।।१७५।।

अर्चनं यजनं चैव श्रद्धाहीनं तु निष्फलम्।
ऊषरे वापितं बीजं न कदाप्यङ्कुरायते ।।१७६।।

विस्तारितो धर्ममार्गः शास्त्रविद्भिरनेकधा।
ब्रह्मज्ञानविहीनस्तु सर्व एष निरर्थकः ।।१७७।।

न मौक्तिकानां वाहीका, हंसानां न च पङ्क्तयः।
एकाक्येव तथा सिंहो, न साधूनां च मण्डलम् ।।१७८।।

तृष्णापूर्णं देहदुग्धं शातयत्यात्मचिन्तनम्।
तदा मोहघृतस्यापि नाशात् संशुद्धिराप्यते ।।१७९।।

जीवस्य जीवनं जीव इति सर्वत्र दृश्यते।
मा हिंस्याद् भूतजातानीत्युपदेशो हितावहः ॥१८०॥

सर्वेषां साक्षिणं नित्यं जगत्सर्गादिकारणम्।
चित्स्वरूपं चिदाभासं ब्रह्म ज्ञातुं त्वमर्हसि ॥१८१॥

ब्रह्मैवाहमिति श्रुत्वा वाचं मेऽज्ञः प्रकुप्यति।
अबुद्धि किमपि ख्यातुं न विद्वान् जातु चेष्टते ॥१८२॥

कलौ दोषौघसङ्कीर्णे जनाः कुत्सितबुद्धयः।
अतः पात्रायैव देयं ब्रह्मविद्यावबोधनम् ॥१८३॥

देशे विदेशे च तथानेकाः सन्ति बहुश्रुताः।
आत्मारामो ब्रह्मवेत्ता तेष्वस्ति ननु दुर्लभः ॥१८४/१८५॥

अग्रे पृष्ठे तथा वामे दक्षिणेऽथ समन्ततः।
अध ऊर्ध्वं च सर्वत्र व्यापकं ब्रह्म संस्मृतम् ॥१८६॥

प्रवृत्तिमार्गगाः सर्वे निवृत्तौ तु तपस्विनः।
निर्विकल्पे रमन्ते ये ते हि नः साधवो मताः ॥१८७॥

सर्वमेतत् खलु ब्रह्मेत्याचार्यैः स्थापितं पुराः।
विवदन्ते कुतर्केण तथाप्यन्तरिता जनाः ॥१८८॥

देहाभिमानिनो येऽथ ज्ञानमार्गप्रमादिनः।
इतश्चेतश्च धावन्ति, मार्गः स्याद्दोषभाक् कथम् ॥१८९॥

लोकत्रयाच्च वेदाच्च परो यश्च प्रकीर्तितः।
तं यः सुधीर्विजानाति ब्रह्मज्ञानी स उच्यते ॥१९०॥

तत्त्वमस्यादिवाक्यानामर्थं यो वेत्ति तत्त्वतः।
आत्मविद्याप्रवीणोऽसौ ब्रह्मवेत्ता सतां मतः ॥१९१॥

विनम्रव्यवहारोऽस्ति सर्वकार्यार्थसाधकः।
द्वितीयायाश्चन्द्रमसं नमन्ति शिरसा जनाः ॥१९२॥

गुणैरेवाभिपूज्यन्ते मानवा जातु नान्यथा।
तेषां मांसत्वगस्थीनि नोपयोगीनि कर्हिचित् ॥१९३॥

देहाभिमानकुहरेऽज्ञानध्वान्तसमाकुले।
कुलाचारातिगहने पतितानां ध्रुवा मृतिः ॥१९४॥

अविद्यासान्ध्यतामिस्त्रेऽस्तं गच्छति भास्करः।
अनेकमतवादे च धर्मे वेश्यायते मनः ॥१९५॥

कर्ममार्गे नैकविधक्रियाभिः खिद्यते वपुः।
पुनर्जन्म पुनर्मृत्युश्चैवं चक्रः प्रवर्त्तते ॥१९६॥

अखिलाधारभूतापि न क्षमा दर्पगर्व्विता।
तद्रूपः सद्गुरुः सेव्यो विहायावेशमात्मनः ॥१९७॥

अहं ब्रह्मास्मीति मन्त्रे बुद्धिमाधाय निश्चलाम्।
मनोवाण्योः परं सत्यस्वरूपं ज्ञायते बुधैः ॥१९८॥

न यत्र पञ्चतत्त्वानि नोत्पत्तिप्रलयौ तथा।
स एव शान्तिरूपोऽस्ति निर्विकल्पः सनातनः ॥१९९॥

मतवादा न भासन्ते ज्ञानपूते हि मानसे।
निष्प्रभाः स्युर्यथा तारा उदिते व्योम्नि भास्करे ॥२००॥

वर्णाश्रमानुबद्धानां देहासक्तिर्विशेषतः।
देहे नष्टे निराशैव, ततः शान्तिर्दुरासदा ॥२०१॥

जीवः शरीरमाविश्य तत्तु स्वमिव मन्यते।
एषा भ्रान्तिर्मनश्चेष्टां शिथिलीकुरुते ध्रुवम् ॥२०२॥

सत्सङ्गाज्जायते सौख्यं, कुसङ्गः क्लेशकारकः।
अतस्तत्रैव गन्तव्यं यत्र साधुसमागमः ॥२०३॥

पोष्या वृत्तिर्ब्रह्मपरा विचारैर्नित्यनूतनैः।
कपर्दिकासञ्चयेन दरिद्रोऽपि धनी भवेत् ॥२०४॥

अद्यैव वा शतान्ते वा नश्यत्येव कलेवरम्।
अपक्वमृत्तिकाभाण्डे नीरं तिष्ठेत् कियच्चिरम् ॥२०५॥

हृदिस्थं सच्चिदानन्दं स्वप्रयत्नैस्त्वमाप्नुहि।
यस्याङ्गणेऽस्ति चित्स्रोतः स तृषा म्रियते न हि ॥२०६॥

न शास्त्रैर्नापि गुरुणा दृश्यते परमेश्वरः।
दृश्यते स प्रयत्नैः स्वैर्जनस्य हृदि संस्थितः ॥२०७॥

जीवरूपेण सर्वेषां हृदये स विराजते।
एतस्मात्कारणादेव जीवहत्या निषिध्यते ॥२०८॥

तीर्थं मनश्च चित्तं च कुत्रचित्पापहेतुके ।
एकं विवेकहरणाद्वासनोपचयात्परम् ॥२०९॥

तीर्थं च कटुवल्लीव जनयत्यशुभं फलम् ।
प्रसज्ज्येत मनो यत्र विषयेषु विशेषतः ॥२१०॥

गुणत्रयमयी वल्ली कर्मवृक्षावलम्बिनी ।
सेवनात् क्षीयते तस्या उच्छेदस्तु हितावहः ॥२११॥

जलादपि श्लक्ष्णतरं क्षीणं धूमावलेस्तथा ।
वेगवत्पवनाच्चाथ मन आत्मेति केचन ॥२१२॥

अन्ये देहेन्द्रियप्राणान्, मनो बुद्धि तथा परे ।
वदन्त्यानन्दमात्मानमेवं वादस्तु वर्धते ॥२१३॥

'तत्त्वमस्यादि' वाक्यानामभिधेयं तु तत्त्वतः ।
जानाति ज्ञानयोगस्थ एव तस्मिन् सुनिष्ठितः ॥२१४॥

सन्धीयन्ते कनकवत् साधवस्त्रुटिता अपि ।
कुलालभाण्डं त्वेकेनैवाघातेन तु भज्यते ॥२१५॥

कज्जले हि कृतावासः कज्जलाखातवेष्टितः ।
कज्जलस्यैव कुल्याया जले लोको निमज्जति ॥२१६॥

देहाभिमानी लोकोऽयमिन्द्रियार्थेषु मज्जति ।
धन्यः स एव योऽवारपारीणोऽस्य महोदधेः ॥२१७॥

न कुबेरस्य सम्पत्तिर्न वा राज्यं सुविस्तृतम् ।
अतिशेते दृढासक्ति, तस्माद् भक्तिर्गरीयसी ॥२१८॥

स्वयं पतन्ति कैवर्त्तजाले यादांसि लोलुपाः ।
ज्ञात्वैतद्देहदर्पेस्मिन् मा पत त्वमधोमुखः ॥२१९॥

देहाभिमानशय्यायामविद्यासदनान्तरे ।
कर्मजालैर्वेष्टितस्त्वं भवाब्धि तर्तुं मोहसे ? ॥२२०॥

अलक्ष्यरज्ज्वा बद्धस्त्वं दर्पणस्वच्छधीरपि ।
स्वानुभूतिविहीनश्चेद्, दुर्गतिं समवाप्स्यसि ॥२२१॥

ये मित्रसुतदारादीन् सेवन्ते विषयेच्छया ।
आत्मज्ञानविहीनास्ते जायन्तेऽत्र पुनः पुनः ॥२२२॥

वासना तुम्बवल्लीव लोकैकफलदायिनी।
सकामकर्मपुष्पाढ्या कटुस्वादात्र कारणम् ॥२२३॥

एवं सद्भिर्बोधितोऽपि शास्त्रवाक्यैर्मुहुर्मुहुः।
अज्ञानबुद्धिं नोज्झेद् यः स ज्ञेयो नूनमात्महा ॥२२४॥

मलं त्यजति लोहोऽपि यथा सततघर्षणैः।
विनश्यति वपुर्मोहस्तथैव ब्रह्मचर्चया ॥२२५॥

दुर्जनस्य हि संसर्गात् सज्जनोऽपि तथा भवेत्।
तेजो विस्मृत्य कनकं कांस्यं स्वं मनुते यथा ॥२२६॥

देहरूपां लौहनौकां दम्भप्रस्तरसम्भृताम्।
शीर्षक्ष्वेडस्त्वमारुह्य तर्त्तुमिच्छुर्भवार्णवम् ॥२२७॥

महाभूतानि विलयं यान्त्यानन्दचिदात्मनि।
मनसि ब्रह्मलीने च नश्यत्येवाभिमानिता ॥२२८॥

वर्णाश्रमाभिमान्यादौ धर्माचारानुगस्तदा।
शास्त्रानुगतिकोऽप्यन्ते त्यजत्येव कलेवरम् ॥२२९॥

इन्द्रियाणां नियन्तुश्च नेत्राग्रे वसतस्तथा।
अनवस्थस्य मनसो निरोधो हितकारकः ॥२३०॥

यदा भवति निश्चेष्टमात्मध्यानपरं मनः।
इन्द्रियाणि निवर्त्तन्ते विषयेभ्यस्तदा स्वयम् ॥२३१॥

ब्रह्मानन्दः स्वसंवेद्य एवास्ति न तु वर्ण्यते।
व्यावरीतुं स्वानुभवं न कोऽप्यत्र निवर्त्तते ॥२३२॥

मनसैवेन्द्रियग्रामो विषयेष्ववसाद्यते।
तस्मात्समाधौ बाधैव भवतीति न संशयः ॥२३३॥

देहाभिमानसंसर्गात्तथा शान्तिर्विनश्यति।
बदरीपत्रहलने पार्श्वस्था कदली यथा ॥२३४॥

ज्ञानी स्वसहजानन्दे रमते ज्ञानसङ्गतौ।
अलीकपण्यशालायां हीरको न प्रकाश्यते ॥२३५॥

सङ्गृह्यते वस्तु किञ्चित् सुनिरीक्ष्यैव, नान्यथा।
ज्ञानी स एव योऽन्विष्येच्छान्तिं हृद्यन्तरे तथा ॥२३६॥

आचार्याणां मतं ज्ञात्वा स्वधियैकं स्थिरीकुरु।
आच्छादयेद् ज्ञानशक्तिं रजसा वेष्टिता मतिः ॥२३७॥

शास्त्रेषु निर्गुणं प्रोक्तं तदेव सगुणं ननु।
व्योम्नाति चित् तदा तस्मिन् वनमाली स उच्यते ॥२३८॥

उच्चैर्गानं च चर्चा च स्वविचारमृते वृथा।
विशिष्टोपलसंसर्गादेवायो रुक्मतां व्रजेत् ॥२३९॥

आलम्ब्याप्यखिलान् मार्गान् यः स्याद् गुरुविवर्जितः।
आनन्दमयमात्मानं ज्ञातुं स न भवेत् क्षमः ॥२४०॥

चिदात्मा एक एवेति केषाञ्चन न सम्मतम्।
जल्पवादास्तु भिद्यन्ते कषोपलपरीक्षणे ॥२४१॥

आत्मनस्तु स्वरूपं यो न जानात्यज्ञ एव सः।
वादावादे नष्टबुद्धिः पश्चात्तापं करोत्यसौ ॥२४२॥

प्रस्तरार्चनतो यैश्च भक्तिमार्गः प्रदूषितः।
विषयाविष्टमनसां तेषां दुर्लभममृतम् ॥२४३॥

एक एवाभ्यर्चनीयो देवोऽनन्यधिया बुधैः।
द्रव्यार्थं गणिकायास्तु बहुसेवा मताधमा ॥२४४॥

तनुनौकाविष्टमिदं मनः काकवदस्थिरम्।
क्षणं तूत्पतति व्योम्नि क्षणं दिक्षु च धावति ॥२४५॥

बदरीकण्टकैर्विद्धः पार्श्वस्थः कदलो यथा।
आदौ निरवधानस्त्वमधुना मोक्षमिच्छसि ॥२४६॥

आत्मैवाहमिति ज्ञानरत्नमस्ति त्वदन्तरे।
तन्मूल्यं जानतामेवाग्रे योग्यं तत्प्रदर्शनम् ॥२४७॥

ये च शास्त्रोक्तमार्गेण यापयन्ति स्वजीवनम्।
ते विद्यार्णवमुत्तीर्य भवन्ति ब्रह्मवित्तमाः ॥२४८॥

काकरावनिभां द्वैतवाणीं मा शृणु कस्यचित्।
अद्वैतज्ञानयज्ञेन हंसवन्नय जीवनम् ॥२४९॥

स्वर्गात्पातालपर्यन्तं निबद्धं तुम्बिकाद्वयम्।
जीवरूपं वर्ण्यते तच्छास्त्रविद्भिरनेकधा ॥२५०॥

अथ जानीहि रामं त्वं चिद्रूपं हृदि संस्थितम् ।
विषयासक्तमनसां नैव तद्दर्शनं भवेत् ॥२५१॥

यावन्ति तरुपत्राणि गङ्गायाश्च रजांसि वा ।
तावन्त्यनेकशास्त्राणि को भवेत् पठितुं क्षमः ॥२५२॥

अद्वैते ब्रह्मणि द्वैतभावना भ्रम एव हि ।
यथा रज्ज्वामहिभ्रान्तिः शुक्तौ वा रजतभ्रमः ॥२५३॥

देहोऽयं सिकतासङ्घ आत्मरत्नेन दीप्यते ।
तं निजं मन्यमानस्य बुद्धिस्तु सिकतामयी ॥२५४॥

कुलहंसं परिज्ञाय मया तेऽभ्यर्हणा कृता ।
बकस्त्वमिति चेद् ज्ञातमत्यजं स्पर्शमेव ते ॥२५५॥

मद्वाक्यं शृणु तद्वच्च वेदोपनिषदां वचः ।
ईश्वरस्य निवासं त्वं जानीहि स्वहृदन्तरे ॥२५६॥

एकमात्रं यथा सिंहो गाहतेऽखिलकाननम् ।
तथैवात्माप्यद्वितीयो जगद्व्यापीति निश्चितम् ॥२५७॥

मन्दवैराग्ययुक्तस्य जातुचित्सम्भवेत् च्युतिः ।
अष्टाङ्गयोगसक्तोऽपि कर्ममार्गे पुनः स्खलेत् ॥२५८॥

क्षेत्रवन्मानुषे देहे बीजमुप्तं चिदात्मकम् ।
सत्सङ्गतोयसिक्तं तद्यच्छेत् ज्ञानफलोच्चयम् ॥२५९॥

विवेकिनः सदा सेव्या न तु पाखण्डदर्पिताः ।
तेषां मुधैव सेवा स्याद् येभ्यो ज्ञानं न लभ्यते ॥२६०॥

नो चेद् ब्रह्ममयी बुद्धिः किमुच्चकुलजन्मना ।
वृथैव तानि पुष्पाणि यैर्न देवार्चनं भवेत् ॥२६१॥
अथवा—(यैर्न देवार्चनं शक्यं तैः पुष्पैः किं प्रयोजनम् ।)

गुरवो बहवो दृष्टाः शिष्यस्तु न हि दृश्यते ।
कियन्ति सन्ति शास्त्राणि जीवस्यैकस्य मुक्तये ॥२६२॥

अन्तर्यामी संस्थितोऽसौ प्राणिनां हृदयान्तरे ।
मायया भ्रामयन् सर्वान् प्रेरयँश्च मतिं नृणाम् ॥२६३॥

सम्भाषणेन जानीयादयं साधुर्नवेति च ।
जिह्वाध्वना बहिर्याति यदस्ति हृदि कस्यचित् ॥२६४॥

अहमात्मैवेति तथ्यं विस्मृतं किं त्वयाधुना ।
श्रुतिज्ञानकृपाणेन संशयाँश्छेत्तुमर्हसि ॥२६५॥

परिप्रश्नेन सन्देहनिरासः स्याद्धितावहः ।
सद्गुरुर्ज्ञानमार्गेण शिष्यमेवं प्रबोधयेत् ॥२६६॥

स्वमतस्थापने दक्षैर्वाग्जालं हि प्रसारितम् ।
यच्छेद्: यः परमानन्दं तस्यावाप्तिः सुदुर्लभा ॥२६७॥

न यत्र सिंहसञ्चारो न वा स्पन्दोऽपि पक्षिणः ।
तद्वनं हि कबीरेण वृतं शान्तसमाधये ॥२६८॥

अहङ्कारविनिर्मुक्तमवाङ्मनस - गोचरम् ।
स्वरूपमात्मनो ज्ञातुं यतन्ते मुनयोऽनिशम् ॥२६९॥

वदन्तो मधुरां वाचं हृद्यन्यच्चिन्तयन्ति ये ।
सञ्चारोऽस्त्येव रामस्य तेषामपि कलेवरे ॥२७०॥

यावत्प्राणाः शरीरस्थास्तावदेव हि संसृतिः ।
प्राणस्पन्दे गते कोऽपि न द्वारमपि वीक्षते ॥२७१॥

हे राम, दर्शनं दत्त्वा जीवन्मुक्तं कुरुष्व माम् ।
देहत्यागस्य पश्चात्ते दर्शनात् किं भवेद्धितम् ॥२७२॥

दर्शनीयाकृतिरपि बुद्धेर्हीनो नरः पशुः ।
मनोहराणि पुष्पाणि निर्गन्धानि यथा वने ॥२७३॥

साधुसङ्गविहीनस्य स्वात्मतत्त्वाविवेकिनः ।
विषयासक्तमनसो धिङ् नरस्य हि जीवनम् ॥२७४॥

ध्यायस्वामलया बुद्ध्या चिन्मात्रमविनाशिनम् ।
पुनरावर्त्तनकरीमतिसृज्य कुवासनाम् ॥२७५॥

विषयाभिनिविष्टस्य क्षणभङ्गुरवर्ष्मणः ।
करोति सादनं कालः श्येनकस्तित्तिरेर्यथा ॥२७६॥

शिरासु च स्वनन्तं त्वं प्राणघोषं शृणु स्वकम् ।
परिहृत्य विषादांश्च स्वात्मतत्त्वं विचिन्तय ॥२७७॥

ब्रह्मामृतं समास्वाद्य देहदर्पं समुत्सृज ।
गुरोः सेवा साधुसङ्गश्च विधेयस्त्वयाधुना ॥२७८॥

आत्मैवास्मीति विज्ञाय कृत्वा च दृढनिश्चयम् ।
जीवन्मुक्तः शरीराच्च तत्कोशेभ्यश्च मुच्यते ॥२७९॥

एकेन साध्यते सर्वं सर्ववादो विनाशकृत् ।
विपर्यासेन मूलस्य सेचनं तुष्टिदं मतम् ॥२८०॥

ध्यानात्सन्दीप्यते ज्ञानं, वासना दह्यते ततः ।
ततो बुद्धौ निर्मलायां समुदेत्यात्मभावना ॥२८१॥

इन्द्रियार्थैरनाकृष्टो योगाभ्यासं समाचर ।
अहङ्कारान्न मुच्यन्ते शास्त्रवादरता अपि ॥२८२॥

स्वप्नतुल्येऽत्र संसारे प्रसुप्ताः किन्तु मानवाः ।
सम्मोहिता भृशं चैते मतवादप्रवर्त्तकैः ॥२८३॥

प्राणतन्त्रीं ध्वनत्त्येको जीवानां परमेश्वरः ।
तन्तुषु प्रविभग्नेषु निष्क्रियैव तु सा भवेत् ॥२८४॥

'तत्त्वमस्यादि'-वाक्यं च प्रभुर्णव समीरितम् ।
तस्य सारं समालोच्य श्रेय आप्नुहि शाश्वतम् ॥२८५॥

ज्ञानमार्गोपदेष्टारो ये च कर्मसु निष्ठिताः ।
आत्मज्ञानविहीनास्ते न हि तत्त्वार्थबोधकाः ॥२८६॥

निर्गुणं वर्णयन्त्येके सगुणं च तथापरे ।
जानन्ति ते नात्मरूपं फलास्वादं यथा वृषः ॥२८७॥

गुरुवाक्येऽश्रद्दधाना ये च शास्त्रावमानिनः ।
कालेनाकृष्यमाणास्ते पच्यन्ते चतुराकरे ॥२८८॥

यं मार्गन्ति चिदात्मानं बहिः कुत्रापि संस्थितम् ।
तं हृद्येव स्थितं नैव जानन्ति मतवादिनः ॥२८९॥

बाल्यकैशोर्यतारुण्यजरावस्थागतां तनुम् ।
यमो ग्रसत्यवस्कन्द्य मार्जारो मूषकं यथा ॥२९०॥

गुरूपदिष्टमार्गेण ताम्रं भवति काञ्चनम् ।
मलयाचलगन्धेन पलाशश्चन्दनं यथा ॥२९१॥

ईक्षते न बहिः किञ्चिद्यथा रत्नपरीक्षकः ।
देहस्यूतं तथात्मानं मुमुक्षुर्वेत्ति तत्त्वतः ॥२९२॥

यथा लोकेऽवकीर्णानि रत्नानि प्रस्तराणि च ।
तथैव पात्रापात्राणि, दुष्करं तत्परीक्षणम् ॥२९३॥

पृथग्विधो यश्चित्तेन न च शास्त्रपरिष्कृतः ।
ज्ञानिनः सङ्गतिस्तेन स्याद् हंसबकसङ्गमः ॥२९४॥

सकामकर्माभ्यासी च न हि सत्यपरीक्षकः ।
'सोऽहमस्मीति यः पश्येत् स यथार्थपरीक्षकः ॥२९५॥

मा जीवहत्यां कुरुथ पातकोऽयं भयावहः ।
तीर्थस्नानैर्दानपुण्यादिभिश्च न निवार्यते ॥२९६॥

क्षणभङ्गुरदेहस्य प्रत्ययो न कदाचन ।
अतोऽन्तश्चेतनब्रह्मध्यानमग्नो भवानिशम् ॥२९७॥

निष्प्रभं नयनद्वन्द्वं बुद्धिश्च विलयं गता ।
अभिध्याने तदा नष्टे सद्गुरुः किं करिष्यति ॥२९८॥

रामस्य भक्तिरतिमात्रसुखं करोति,
दुर्वासनाशिशिरशीतहरः कृशानुः ।
भस्मीकरोति सकलं कुविचारजातं,
ज्ञात्वैतदाप्तवचनाद्भव रामभक्तः ॥२९९॥

अस्य त्रिलोकविटपस्य चिदेव बीजं,
यस्याङ्कुराश्च विधिविष्णुमहेशरूपाः
भूयः स एष तरुरञ्चति बीजरूपम्,
एष क्रमोऽनवरतं परिवर्त्ततेऽत्र ॥३००॥

तद्वद्देहाच्च कर्माणि, तेभ्यो भूयश्च वासना ।
ततः पुनश्च देहोऽसौ जायतेऽत्र न संशयः ॥३०१॥

□

कबीर-वाणी

लघु-कृति-सङ्ग्रह

[वसन्त, चर्चरी, हिन्दोला, वल्ली और विरहुली]

अथ वसन्तः —

(१)

जाके बारह मास बसंत होय । ताके परमार्थ बूझे बिरला कोय ॥
बरिसे अग्नि अखंड धार । हरियर भो वन अढहर[1] भार ॥
पनिया[2] आदर धरे न लोय । पवन गहे कस मलिन धोय ॥
बिनु तरुवर फूले आकाश । शिव विरंचि तहाँ लेहिं वास ॥
सनकादिक भूले भँवर बोय । लक्ष चौराशी जीव जोय ॥
जो तोहिं सद्‌गुरु सत[3] लखाव । ताते न छूटे चरण भाव[4] ॥
अमर लोक फल लावे चाहि । कहहिं कबीर बूझे सो खाय[5] ॥१॥

श्रीगुरवे नमः । अथ द्वादशवसन्तव्याख्या वर्ण्यते । जाके इति । ब्रह्मैवाहमित्यानन्दसुखं सर्वदैकरसो वर्त्तते यस्यान्तरे तस्य सदा वसन्तो भवति इत्यर्थः । ताके इति । परमश्चासावर्थश्च परमार्थः । ब्रह्मैवाहमित्युत्कृष्टार्थः । तस्य महात्मनः तत्त्वं कश्चिद्विरलो जानाति इत्यर्थः । अत्र गीतासूक्तं— यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः[6] इति । बरिसे इति । आत्मैवाहमित्यग्निरखण्डधाराभिरमृतस्रावीभिर्ज्ञानिन उपरि वर्षति । हरियरेति । यदा यस्याखण्डवृत्तिरुत्पद्यते तदा अढार=रोमरोमस्वानन्दो भवति । अत्र श्रुतिः— सर्वं खल्विदं ब्रह्मेति[7] । पनियेति ।

---

१. अठारह । (१-२); चार वर्ण, चार आश्रम, छः दर्शन, चार सम्प्रदाय (२) ।
२. पानिया (२) ।
३. सत्त (१-२) ।
४. चाव (१-२) ।
५. पाव (१-२) ।
६. भ० गी०, ७,३ ।
७. छा० उ०, ३,१४,१ ।

भो यं चिदात्मानं जल=द्रावयितुं न शक्यम्-अत्र गीता प्रमाणम्—अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति[1]। यं गृ(ग्र)हीतुं चित्तादि न शक्नोति इत्यर्थः। पवनेति। पवनः=प्राणः। तस्यारूपस्य चिदात्मनः शुद्धस्य गृ(ग्र)हीतुं कथं समर्थो भवति? प्राणायामः मलिनचित्तस्य शुभं करोतीत्यर्थः। बिनु इति। ब्रह्मैवाहमिति आनन्दवृक्षं विना देहोऽहमित्याकाशो (शः) प्रफुल्लति। मलिना वासना जायते। यद्वा तरुवरः=देहाभिमानः, तेन विना, आकाश=ब्रह्मैवाहमित्यानन्दं नरवरिया[2]=न प्रकाशः प्रफुल्लितो भवति इत्यर्थः। शिवेति। तस्मिन्नेव ब्रह्मानन्दसुखे शिवादयः रमन्ति(ते)। वसन्तीत्यर्थः। सनकेति। सनकादयः सर्वे भ्रमराः मनः, तज्जगद्वासनां द्वैतं ब्रह्मैवाहमित्यस्मिन्विलयं कृताः स्युः। लक्षेति। प्रबुद्धः इमानि चतुरशीतिलक्षाणि सर्वजीवान् ब्रह्मणि योज्यते[3] इति भावः। जो तो इति। यदि सद्गुरुः, तव=त्वां, सत=आत्मस्वरूपं दर्शयति। ताते इति। ततः ईश्वरस्य गुरोश्चरणकमलयोर्भावं(वः) कदाचिन्न मुच्यते। यद्वा चरण=ब्रह्मभावना। अमरेति। देहमरणात्परं भवेदित्यमरं मोक्षफलमिच्छति। कहेति। कबीरः=जीवन्मुक्तो जीवितं मोक्षं ज्ञानामृतं लभते=अश्नातीति सत्यमेवाभिप्रायः ॥१॥

'मैं ब्रह्म हो हूँ' यह धारणा हो जाना उत्कृष्ट आनन्द है और जिसके हृदय में यह विचार स्थिर हो जाता है, उसके लिए सदैव वसन्त है। ऐसे महात्मा बिरले ही होते हैं। 'मैं आत्मा ही हूँ' यह अग्नि उसके हृदय में (निरन्तर) प्रज्वलित होती रहती है। सब कुछ ब्रह्म ही होने के कारण उसके रोम-रोम में यह आनन्द व्याप्त रहता है। गीता में भी कहा है कि—आत्मा न कटनेवाला, न जलनेवाला, न गलने और सूखने वाला है। उस शुद्ध आत्मा को कोई भी कष्ट नहीं पहुंचा सकता। इस वृत्ति के अभाव में देह-बुद्धि (स्वभावतः) होती रहती है, जो मलिन वासना को उत्पन्न करती है।

उसी ब्रह्मानन्द में शिव आदि (देव) रमते रहते हैं और सनक आदि (ऋषियों) ने इसी में अपनी वासना विलीन कर दी है। इस प्रकार के सद्विचार गुरु से ही प्राप्त होते हैं, यद्यपि इसे प्राप्त करने की अभिलाषा सभी को होती है।

कबीर कहते हैं कि इस ज्ञानामृत का आस्वाद जीवन्मुक्त अपनी जीवितावस्था में भी ले सकता है ॥१॥

(२)[4]

शिव कैसी काशी भई तोहार। अजहूँ हो शिव देखि विचार ॥

---

१. भ० गी०, २,२४।

२. यह शब्द मूल में नहीं है।

३. =योजयति।

४. उपर्युक्त दोनों ग्रन्थों में इस पद्य-समूह की संख्या ११ है। व्याख्या में भी अन्तर है।

चोवा चंदन अग्र[1] पान । घर घर सुमृत[2] होय पुराण ॥
बहु विधि भवनन लागु भोग । ऐसे नग्र कोलाहल करत लोग ॥
बहु विधि परजा लोग तोर । तेहि कारण चित्त ढीट मोर ॥
हम खलक[3] के इहे ज्ञान । तोहिं हर के समुझावे आन ॥
जे जाहि मन से रहल आय । जीव के मरण कहु कहाँ समाय ॥
ताकर जो किछु होय अकाज । ताहि दोस नाहिं साहब लाज ॥
हर हरखित से कहल भेव । जहाँ हम तहाँ दोसर[4] केव ॥
दिन चारि मन धरहु धरी । जस देखहि तस कहहिं कबीर ॥

शिवेति । हे शिव, सर्वदैकरसः कल्याणस्वरूपोऽसि, स्वात्मारामोऽसि, नित्योऽसि । काशी=शरीरमिदं तव कथं स्यात्? जडमिदम्, अनित्यमिदम् । त्वं चिदात्मासि । अजहू[5] इति । अद्य साक्षात्कारः । हे शिव, ब्रह्मैवाहमिति विविच्यताम् । स्वानन्दं स्वयं पश्यताम् । चोवेति । भोः, चोवा=मनः स्यात् । चन्दनं चित्तं स्यात् । तवाशनः प्राणः स्यात् । एतेषामग्रे = प्रथमोऽसि त्वमेको भाससे । घरेति । आत्मा सर्वशरीरेषु स्मृतिं ददाति । स्मारयति । अनुभवरूपोऽसि । प्रकाशोऽसि । पुराण=अनादि-कारणात्मासि । बहु विधि इति । ब्रह्मादिसर्वभूतगणपिपीलिकापर्य्यन्तभुवनेषु नानाविधि(ध) भोगैर्भुञ्जति (भुनक्ति) चिदात्मा । ऐसे इति । भोः नगरेषु — त्रिदेहेषु आत्मा प्रविश्य कोलाहलं=केलिं करोति । लोकाः=त्रिभोक्तारः विश्वादयः तव सत्तया प्रकाशन्ते इत्यर्थः । बहु इति । भो भगवन् तोर=बहुविधाः प्रजाः त्वया रचिताः । किं स्थूलतत्त्वानि सूक्ष्मतत्त्वानि त्रिशरीराणि भोक्तृत्रयं पञ्चकोशाश्च[6] त्वयैव निर्मिताः कल्पिता इत्यर्थः । तेहि इति । तस्मात्कारणादेकविज्ञानान्मे मनो, ढीट[7]=निर्भयं स्यात् । हमेति । मम चित्तस्य । अहं ब्रह्मेति । इहैव ज्ञानं स्यात् । तोहि इति । भवान्=त्वमेव हरः । अन्यः कः हरः त्वां बोधयति स्वस्य? सर्वज्ञानं किन्न हरसि? वेदो ज्ञापयति, ये इति । ये नराः स्वमानसं समतायां निरुध्यन्ते[8] । जीवकेति । जीवत्वं मरणत्वं कुतः स्यात्? ताकरेति । अकार्य्यः निरहङ्कारेण कर्मक्रियाव्यवहारे कृते सति यत्कुरुते, वा न कुरुते, स्वेच्छाचारी स्यात् ताहि, साहब=ज्ञानसमर्थो यदि भवेत् तर्हि, लाज=स्वविचारे निमग्नः अनात्मधर्मात् ह्रियं

---

१. अगर (१-२) ।
२. सुमृति (१-२) ।
३. बलकवा (१-२) । अक्षर 'ल' जो पहले प्रमाद-वश लेखक ने छोड़ दिया था, रेखा के ऊपर लिखा है ।
४. दूसरा न (१-२) ।
५. देखें (२) ।
६. 'पंच' शब्द भ्रमवश दो बार लिखा गया है ।
७. मूल और व्याख्या में यह शब्द 'डीढ' लिखा गया है ।
८. प०—निरुन्धन्ति ।

कुरुते । पुनः तस्य दोषादोषौ नैव स्यात् (स्याताम्) इत्यर्थः । हरेति । हरो=आनन्देन हर्षितः सन् गुरुः मुमुक्षुं प्रति, भेदम्=एकत्वं वदेत् । जहेति । यत्रैकोऽहं तत्र द्वैतं कोऽपि[१] नास्ति । दिनेति । भोः स्वमनसि धैर्य्यं धारय; दीनो मा भव; त्वमाचारी, शन्ति गम । जसेति । कबीरः=ज्ञानी इत्थं ब्रवीति, यथा दृष्ट=दृष्टस्तथा वदति इत्यर्थः ।।२।।

हे शिव (प्राणी), तू सदैव एक-रस और कल्याण-स्वरूप है । तू स्वात्मबोध और निर्मल है । तू चिदात्मा है । यह जड़ शरीर तू कैसे हो सकता है ? मन और चित्त भी तेरे नहीं हो सकते । तू अनुभव-स्वरूप और प्रकाशरूप है । चिदात्मा इस देह में प्रविष्ट होकर (ही) केलि करता है और सब भोग भोगता है । इस शरीर और उसके पंचकोशों का निर्माता और प्रकाशक तू ही है । जो व्यक्ति अपने मन का समता में निरुन्धन करते हैं (जीवात्मा को परमात्मा से अभिन्न समझते हैं) उनके लिए जन्म-मरण कुछ भी नहीं है । ईश्वर (चिदात्मा और परमात्मा) एक ही है । दो नहीं । गुरु का उपदेश भी कहता है । तू धैर्य से शान्ति को प्राप्त कर । कबीर कहते हैं कि मैंने (अपने अनुभव से) जो देखा, वही कहा है ।।२।।

(३)[२]

हमरा कहला के नहिं पतियार । आपु बूझे[३] तल सलिल धार ।।
अंध कहे अंधे पतियाय । जस वि(वे)श्या के लगन जाय[४] ।।
सो तो कहिये ऐसो अबूझ । खसम ठाढ़ ढिग नाहीं सूझ ।।
अपनी अपनो करहि मान[५] । झूठ प्रपंच साँच के[६] जान ।।
झूठा कबहुँ न करिहि कज्ज[७] । मे बर्ज्यो ते सुनु निलज्ज[८] ।।
छोड़हु[९] पाषं(खं)ड मानहु बात । नहिं तो परबहु जम[१०] के हाथ ।।
कहहिं कबीर मल(र) कियो न खोज । भटकि मुवल[११] जस बन के रोझ ।।

---

१. प० किमपि ।
२. (१-२) में इस पद्यांश की संख्या १२ है ।
३. बुड़े (१-२) ।
४. धराय (१-२) ।
५. आपन आपन चाहैं नान (मान)—(१-२) ।
६. केर (१) ।
७. करिहैं काज (१-२) ।
८. हौं बरजौं तोहि सुनु निलजि (१-२) ।
९. छांडहु (१-२) ।
१०. यम (१-२) ।
११. मुवा (१-२) ।

हमरेति। भोः, सर्वे अस्मद्वाक्यं श्रुतिस्मृतिवाक्यं गुरुवाक्यं यदि वदामि तर्हि न प्रतीयते (न्ते)। आपु इति। भो नराः शास्त्रज्ञाः सर्वे वेषधारिणः यूयं विषयनद्यां धारायां निमज्जिताः। अंधेति। अन्धाः=ज्ञानहीनाः, ये विषयवार्त्तां ब्रुवन् (ब्रुवन्तः) तद्वाक्यं प्रतीयन्ते=मन्यन्ते तेऽपि अन्धाः गर्त्ते पतन्ति। जसेति। यथा वेश्यायां रताः ते विषयान्न मुक्ताः तद्वत्[1]। सोतो इति। ईदृशम्, अबूझ=मूर्खं प्रति ब्रह्मविद्यां कः वदेत्? न कोऽपि। खसमेति। भोः ख= आकाशवत्, सम=तुल्यः, तवांत्ति(ति)के वर्त्तते तथापि यूयं न जानीथ। अपनी इति। स्वस्ववेषपाषं(खं)डे मते च सर्वे मन्यते(न्ते)। झूठेति। इदं सर्वं जगत्प्रपञ्चं मृषारूपं तं सत्यं जानन्ति। झूठेति। देहोऽहमिति मृषाभावात् क्वचित् कार्यं न भवति। मे बर्ज्यो इति। भो निर्लज्ज देह(हः) जड(डः)। मृषाभावात्। त्वां मोचये। भोः शृणु। तर्हि न मन्यसे। छाँडि इति। भोः, पाष(खं)डवार्त्तां त्यज। बात=उपनिषज्जन्यज्ञानं त्वं मन्यसे तव श्रेयो भविष्यति। नहिं तो इति। भोः, यदि न मन्यसे तर्हि यमराजहस्ते त्वं पतसि पुनः संसृतेः बन्धनान्न मुच्यते (से) इति। कहेति (कथयति) कबीरः ज्ञानी इत्थं वदति—ये सर्वे शास्त्रज्ञाः वेषधारिणः च, श्रुतावुक्तम् 'आत्मैवाहमिति विचारं न मार्गंति अतोऽज्ञाः। कहेति। कबीरः=ज्ञानी ब्रवीति—भटेति। यथा वने, रोझा=गवयाः इतस्ततः भ्रमन्ति=धावन्ति, तद्वत् सर्वे सम्प्रदायिनः पान्थिनः पण्डिताः शिष्यप्रशिष्यै(ष्यैः) सह सम्राजैः सह एको=महान् भूत्वा उच्चासने आसीनः तस्याग्रे इतरे आसीनाः झल्लरीझर्झरीत्यादि वादयन्ते गायन्ति च। अस्मिल्लोके द्रव्योपार्ज्जनेच्छया गवयवद् भ्रमन्ति सर्वत्र ज्ञानं विनेति भावः॥३॥

हे शास्त्रज्ञो, अरे वेष-धारियों, आप सभी विषयरूपी नदी की धारा में बह रहे हो। ज्ञान-हीन जन विषयों की ही चर्चा करते हैं और उनकी बातों में विश्वास करनेवाले, उनके साथ ही गर्त में गिरते हैं। ईश्वर निकट ही है, यह वे नहीं जानते। आप लोग भी वेष-धारण के पाखण्ड में निमग्न हैं। यह सब केवल जगत् का प्रपञ्च है, जो झूठा है, (किन्तु) उसे तुम देह-भावना से सत्य मानते हो। इस पाखण्ड को तज कर उपनिषदों के परामर्श से,व्यवहार करने में तुम्हारा हित है। मेरा कहना न मानने पर तुम यमराज के बन्धन से मुक्त नहीं हो सकते।

कबीर (ज्ञानी लोगों) का कहना है कि मैं आत्मा ही हूँ (शरीर नहीं)—यह सोचो। अरण्य-पशु की भांति मत घूमो। (जैसा कि देखा जाता है), कभी किसी सम्प्रदाय का एक विशिष्ट व्यक्ति उच्चासन पर बैठा है और उसके सन्मुख अनेक व्यक्ति बैठे हैं; वे सभी उच्च स्वर में गाते हैं और वाद्य भी बजाते हैं। यह सब द्रव्योपार्जन के हेतु किया जाता है। (वास्तव में) वे सभी ज्ञान-हीन हैं॥३॥

---

१. तुलनीय—'अन्धेनैव नीयमाना यथान्धाः' (कठ० उ०)। राघवदास की व्याख्या में 'जस बेश्या के लगन धराय' इसे उपमालंकार मानकर इसे व्याघात-वाक्य बतलाया है, जैसे 'खपुष्प', जो असम्भव ही है।

(४)

बढ़िया हँसि बोली मैं नितहु[१] बारि। मो अस[२] तरुणी कहु कबनी[३] नारि॥
दत गेल[४] मोर पान खात। केस गेल मोर गंग नहात॥
नयन गेल मोर कज्जल[५] देन। वेस गेल पर पुरुष लेत॥
जान पुरुषवा मोर अहार। अनजाने के करों सिंगार॥
कहहिं कबीर बुढ़िया आनंद गाय। पू [त*] भर्त्तारहिं वेंटी(ठी) खाय॥

बुढ़ियेति। अनाद्यविद्या। हँसि इति। स्वस्ववर्णाश्रमधर्मान् हास्येन ब्रवीति। यस्य बुद्धिः विषये आनन्दयतीत्यर्थः। मे=मामकं मदीयं, तावकं=त्वदीयम् इत्यविद्या, नितहि= नित्यं, वारी=नित्यं वारी कुरुते इयमेव मूर्खता स्यात्। मो असेति। अविद्या ब्रवीति—मम सदृशी अन्या का नारी? न को(का)पि। किं सर्वावस्थायां तरुणी स्यात्। अज्ञस्वरूपं दर्शयति दाँतेति। मोर=मम, दाँत—शान्तम्, इन्द्रियदमनादयः[६] पान= विषयास्वादनेन गलिताः। गतेत्यर्थः (गता इत्यर्थः)। अविद्या विषयसुखं खादति, केसेति। कश्च इ(ई)शश्च, तयोरीशोपनिषद्ब्रह्मविचारः, मोर=मम, गेल=मार्गः=विचारो गतः। आत्मविचारमयी गङ्गा तस्यां स्नानं कुरु इति भावो गतः। नयन इति। मारस्वदेहे[७] स्वबुद्धिममत्वे विज्ञानदृष्टिर्गता। कीदृशी ममता? कज्जल=तमोरूपा। तस्मिन्नेव (तस्यामेव)—ममत्वे चित्तं दीयते। वेसेति। पर पुरुषा=देवाद्युपासनायां भोगेच्छां[७] कुर्वन् सन् सर्वावस्था गतः (ता) ज्ञानी निश्चयः। जानेति। यदा ब्रह्मैवाहमिति ज्ञानं भवति तदा, मोर=देहाभिमानमज्ञानं गतम्[८]। पुरुष एवेदं सर्वं, पुरुषोऽहं पुनः पुरुषोऽहङ्कारो[९] गतः। अनेति। आत्मज्ञानस्य=ब्रह्मविद्याया[:*] शृङ्गारम्= अलङ्कारमुपदेशं करोमि। कहहीति। कबीरः श्रुतयः साधवः इत्थं ब्रुवन्ति ब्रह्मैवाहमिति ब्रह्मविद्यया बुद्धिः=बुढिया, सनातना(न)तां प्रति ब्रवीति आनन्दं गायस्व= परमानन्दसुखे तिष्ठ। पूतेति। पूत=जीवे लघुत्वं; भर्त्तार=ईश्वरे महत्त्वम्; इत्युभयोर्विकल्पयोर्ब्रह्मैवाहमस्मिन् लयं कृत्वा[१०] ब्रह्मविद्यया इत्यर्थः॥४॥

---

१. नितहिं (१-२)।
२. सों (१); से (२)।
३. कौन (१)।
४. गये (१-२)—इस पद्य में सर्वत्र यही प्रयोग है (१-२)।
५. कजरा (१-२)।
६. प०—'य':।
७. अर्थ अस्पष्ट।
८. देहाभिमानः=अज्ञानम्।
९. अर्थ सुसंगत नहीं है।
१०. प०—ब्रह्मैवाहमिति विचारे। 'अस्मिन्' में दीर्घ 'ई' की मात्रा त्रुटिपूर्ण लिखी है। इस वाक्य में क्रिया का अभाव है। प०—कुरु।

अविद्या अनादि है। वह एक वृद्धा स्त्री के समान है। वह वर्णाश्रम के हठ-धर्मियों का स्मितपूर्वक उपहास करती है और उन्हें कहती है कि तुम्हारी मूर्खता यही है कि तुम अपनी बुद्धि को विषयों में तथा अहंकार में प्रवृत्त करते रहते हो। (देखो), मेरे समान सदा तरुण नारी कोई नहीं है विषयों के आस्वादन से मेरे दाँत ढीले हो गए (शांति नष्ट हो गयी)। मेरे केश (आत्म-विचार) ईश्वर-ध्यान से दूर होने के कारण पलित हो गये। विज्ञान-बुद्धि के अभाव में मेरी आंखें चली गयीं, और परपुरुष (अनेक देवों) की उपासना से मेरी आँखों का काजल भी नष्ट हो गया। किन्तु फिर भी जब यह भावना होती है कि मैं ब्रह्म ही हूँ, मेरा अहंकार छूट जाता है। साथ ही देहाभिमान भी नष्ट हो जाता है।

कबीर (श्रुति और साधुजन) कहते हैं कि ब्रह्मविद्या का विचार करने पर बुद्धि सनातनता पर पहुँच जाती है। वही परमानन्द की उपलब्धि है और ईश्वर का महत्त्व प्रकट होकर साधक ब्रह्म में लीन हो जाता है ॥४॥

(५)

तुम बूझहु[१] पंडित कवनि[२] नारि। केहू न विवाहलि[३] हे (है) कुमारि ॥
सर्व देवतनि मिलि हरि ही दीन्ह। चारि जुग हरि सँग लीन्ह ॥
प्रथम पद्मिनी[४] रूप आहि। है सापिनी जग खेदि खाय[५] ॥
ईवर जुवति बो[६] ए वर नाहिं। अतिरे तेज त्रिया रैनि ताहि ॥
कहहिं कबीर ई जग पियारि। आपन बालक[७] रहली मारे ॥

तुमेति। भोः पण्डित, ज्ञानिनं प्रति पृच्छताम्। इयं नारी का? अव्याकृतमाया स्यात्। केहु इति। कीदृशी सा? केनापि न विवाहिता। सर्वदेव कुमारी स्यात्। सर्वदेव = पुनः सर्वदेवैः मिलित्वा हरये समर्पिता योगनिद्रा शुद्धसत्त्वसम्बन्धिनी या विद्याचैतन्याश्रये स्यात् चिछक्तिः[८]। चारि जुगेति। जाग्रदवस्थायां हरिरूपौ विश्ववैश्वानरौ, स्वप्नावस्थायां हरिरूपस्तैजसः तैजस-हिरण्यगर्भौ, सुषुप्त्यवस्थायां हरिरूपः प्राज्ञः प्राज्ञाव्याकृतौ तुर्यावस्थायां हरिरूपः सर्वसाक्षी अव्याकृतप्रधानः जीवसङ्गे अविद्या, ईश्वरसङ्गे माया, ब्रह्मसङ्गे चिच्छक्तिः स्यात्। प्रथमेति। पुनः

---

१. बुझ बुझ (१-२)।
२. कौन (१)।
३. काहु न व्याहलि।
४. पदुमिनी (१); पदमिनी (२)।
५. खाहिं (१-२)।
६. ई वर जोवत ऊ वर नाहिं (१-२)।
७. बलकवहिं (१-२)।
८. पं०—चिच्छक्तिः।

आद्युत्पत्तिस्थानबीजरूपा माया स्यात् । पद्मिनी च सत्काररूपा पद्मा, लक्ष्मी(क्ष्मीः), ब्रह्मविद्या इत्यर्थः । है इति । पुनः सर्वजगत्प्रलयकारिणी माया सर्पिणीवत् स्यात् । ई वरेति । पुनः ई= माया, वरा=श्रेष्ठा जु(यु)वती । अत्र श्रुतिः—'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजां जनयन्ती स्वरूपाः' । ईदृशी माया, बोए वरेति । 'अजो ह्येको जुषमानो(णो)नुशेते जहात्येनां भुक्तभोगामजोन्यः' ।।[1] वरीयान् - नाह(?)द्वयोः प्रकाशक इत्यर्थः । अतिरेति । पुनः अतिशय-प्रकारेण सा माया तेज(जो)रूपा त्रिधा । स्थानं स्थूलसूक्ष्मकारणेषु क्वचिद्रात्रिः, अन्धकाररूपां तां ज्ञातव्यम् इत्यर्थः[2] । कहेति । कबीराः श्रुतयः ब्रुवन्ति—ई माया जगत्प्रिया मोहिनी स्यात् । अपनेति । 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजां जनयन्ती स्वरूपाः' पुनः स्वनिर्मितानां स्वस्मिल्लयं करोति सर्वान् ऊर्णनाभीवत्[3] ।।५।।

हे पण्डित, (किसी) ज्ञानी से पूछो कि यह अविवाहित कुमारी कौन हो सकती है और उसका स्वरूप कैसा है। वह यही कहेगा कि यह हरि की योग-निद्रा है, जिसका सम्बन्ध शुद्ध सत्त्व से है और जिसका आश्रय विद्या और चैतन्य है। उसे चित् शक्ति भी कहते हैं। वही जाग्रत् अवस्था में विश्व और वैश्वानर, सुषुप्ति अवस्था में प्राज्ञ और अव्याकृत तथा स्वप्नावस्था में तैजस और हिरण्यगर्भ है। वही तूर्यावस्था में सर्वसाक्षी अव्याकृत प्रधान है। वही जीव के साथ अविद्या, ईश्वर के साथ माया और ब्रह्म के साथ चित् शक्ति है। इन (भेदों) में (संसार की) उत्पत्ति का मूल माया, लक्ष्मी या ब्रह्मविद्या है, और प्रलय-कारिणी माया सर्पिणी है। वही यह युवती है। इसका सम्बन्ध तीनों प्रकार के शरीर से है। वेदों में कहा है कि यही माया अन्धकार-स्वरूप है और अपना सारा निर्माण यही स्वयं में लीन कर लेती है।।५।।

(६)[4]

मैं आयेउ मेहतरि[5] मिलन तोहिं। रितु बसंत पहिराउ[6] मोहिं ।।
ल(लं)बी पुरिया पाई छीन। सूत पुराना खूँटा तीन ।।
सर लागे तेहि तीन सै साठ। कसनी बहत्तर लागु ताहि[7] ।

---

१. श्वेताश्व० उ०, २,५।
२. प०—अन्धकाररूपा सा ज्ञातव्येत्यर्थः।
३. तुलनीय—'यथोर्णनाभिः सृजते गृह्णते च (मुण्डकोपनिषद्, १,१,७)।
४. (१-२) में इस पद्य की संख्या ३ है।
५. आयो मेस्तर (१-२)।
मेस्तर=बड़ा सर्दार या मालिक (फारसी)। तुलनीय-महत्तर (संस्कृत)।
६. पहिरावहु (१-२)।
७. गाँठ (१-२)।

खुर खुर खुर खुर चले नारि । बैठि जोलाहिनि पलथी मारि ।।
ऊपर नचनी करे कोड़ । करिगह महँ दुई चले[1] गा (गो) ड़ ।।
पाँच पचीस दस दुबार[2] । सखी पाँच तहाँ रचे धमार ।।
रंग बिरंगी पहिरे चीर । हरि के चरण धेय[3] गावे कबीर ।।

मे (मैं) आ इति। ब्रह्मैवाहमस्मीत्यभासो वदन्ति[4]—भो महत्तरि=चाण्डालि, देहाभिमानाविद्ये, त्वां मिलितुं=लयं कर्तुमागतोऽस्मीत्यर्थः। रितु इति। ऋतु=ब्रह्मैवाहमिति, स्नेहो वसन्तेत्यानन्दधारणे मय्येकत्वं भवे[दि]त्यर्थः। लंबी इति। लंबी=बहुकालं जीवितुमिच्छति। पाई=आयुः प्रतिदिनं क्षीणं भवति। सूतेति। सूत=अनादिवासनाऽविद्या पुरातनी वामा, या खूंटा, तस्याः गुणत्रयमेव बन्धनम्। सरेति। षष्टयधिकशतत्रयदिवसाः शराः सर्वेषामायुः क्षपयन्ति। कसनी इति। देहाभिमानी जीवः स्वदेहे द्विसप्ततिसहस्राणि नाड्यः स्युः इत्यर्थः। खुरेति। पुनः पुनः स्वासानाडीरूपा नारी चलति। घुर्घुरायते इति भावः। बैठी जुलाहिनीवत् इयं का या जडरूपा, बैठीति। पलथी=स्वस्थवृक्षवत्। उपरेति। उपरनचनी=कालकन्या जरावस्था सर्वदेहोपरि नृत्यति! करे कोल(ड़)=देहान्तं विज्ञापयति। करि इति। अन्तःकरणे मनसि दुई=सङ्कल्पविकल्पौ भवतः। पाँचेति। अपञ्चीकृतभूतेभ्यो(भ्यः) पञ्चविंशतिधा पञ्चीकृतभूताः जाताः। मुखादीनि दश छिद्राणि स्युः। सखी इति। पञ्च ज्ञानेन्द्रियाणि सख्यः। तहाँ—स्वस्वविषयार्थे बहिर्धावति (न्ति)। रंगी इति। रंग बिरंगी=बुद्धिः। चीर=शुभाशुभं कर्म; पहिरे=परिधानं करोतीत्यर्थः। कबीरः=ज्ञानवान् देहाभिमानं विहाय हरिरहमिति पदं ध्यायतीत्यर्थः ।।६।।

हे चाण्डालिनी, देहाभिमानिनि अविद्ये, मैं तेरा लय करने (तुझे छोड़ने, को उद्यत हूँ। मैं ब्रह्म ही हूँ, वसन्त हूँ, (ब्रह्म से) ऐक्य धारण करता हूँ, (ऐसी स्थिति में) तू प्रलम्ब काल तक जीवित रहने की इच्छुक है? अनादि वासना का कारण अविद्या (ही) है, जो गुणत्रयरूपी तीन खूँटों से बँधी है। उसके तीन सौ साठ शर (धागे ?) हैं, जो आयुष्य को व्यतीत करते हैं। देहाभिमानी जीव की देह में बहत्तर हजार नाड़ियाँ हैं, जिनसे श्वास चलता रहता है।

तू जड़ है और जुलाहिन की तरह पलथी लगाकर बैठी है! जरावस्था (तेरी) सारी देह के ऊपर नाच रही है। वह देह के अन्त को सूचित करती है। अन्तःकरण में भी संकल्प-विकल्प होते ही रहते हैं। अपञ्चीकृत भूतों से पचीस प्रकार से पंचीकृत भूतों की उत्पत्ति होती है। मुख आदि दस छिद्र (इन्द्रियाँ) हैं ही। पाँचों ज्ञानेन्द्रियाँ उनकी सखियाँ हैं। ये सभी अपने अपने बाह्य विषयों की ओर दौड़ती हैं। बुद्धि

---

१. चलत (१)।
२. पचीसो दशहू द्वार (१-२)।
३. धै (धै)—(१-२)।
४. प०—अवभासो वदति।

भी शुभ और अशुभ कर्म का परिधान करती है। (ऐसी स्थिति में) ज्ञानी (मनुष्य) देहाभिमान को दूर कर "मैं हरि ही हूं" यह ध्यान रहता है ॥६॥

(७)[१]

माई मोर मनुवाँ[२] अति सुजान। धंधकूटि कूटि करे[३] बिहान ॥
बड़ेरे[४] भोर उठि आँगन बाटू। बड़रे खाँचले गोबर काटू[५] ॥
बासी भात मनुसे ली हल खाय। बड़ेरे घेरी लले पानी के[६] जाय ॥
अपने सैयाँ के बांधो[७] पाट। ले बेचोंगि हाट[८] हाट ॥
कहहिं कबीर ई[९] हरि के काज। जोइया के डि(ढि)ग रहि कहु कवन लाज ॥

माईति। मायी=ईश्वरः, तस्योपासना मम स्यात्। बाह्ये वैकुण्ठादिषु ईश्वरं वदन्ति। मनुवा=पाण्डित्ये अतिनिपुणः स्वपरमानन्दशब्दध्वनौ क्षणेऽपि न मरते अज्ञमनः[१०]। धंधेति। कूटि=स्थूलशरीरेण प्रारब्धकर्मयोगाद् भोगा न भुज्यते सुखदुःखादीन्[११]। कूटि पुनः। आगामि-पापपुण्योः(ण्ययोः) कर्म करोति। ज्ञात्वापि, विहान=सर्वायुर्गतं एवं तेषामित्यर्थः। बड़रेति। भोः, महति कुले जन्म गृहीत्वा, भोर=प्रारब्धकर्मवशात् कुलाभिमानी बभूव। पुनः आँगन=स्वर्गादि-भोगेच्छया यज्ञादिर्ना(ना)नाक्रियां करोति। कर्मैव वर्द्धते इत्यर्थः। बड़रेति=देव-योनौ गत्वा, खाँच=खे अञ्चति=विचारयति। ले=विमाने आरुह्य, गो=इन्द्रियाणां श्रेष्ठ-भोगानश्नाति। काठः—कः=ब्रह्म; आठ=उच्चपदं मनसा वाण्या गच्छेत्कदाचिदित्यर्थः। बासी इति। अनादिवासनानुसारेण मनः शुभाशुभयोः, भातः=प्रकाशते। मनुसे=पुनर्मनो यत्पुण्यं पापं करोति तत्स्वयं खादति, सुखदुःखयोरित्यर्थः। बड़ेरेति। महत्त्वमनुष्योत्तमकुलं लब्ध्वा पानीयविषयेषु चित्तं जायते। अपनेति। अत्र स्वसिद्धान्ते अपनसे=ब्रह्मैवाहमस्मीत्य-स्याध्यासे, पाट=प्राप्ते सति, बाँधो=मानसं वशीभूतं करोमीत्यर्थः। ले बेंचो इति। महा-वाक्य-प्रामाण्यात्, स्मृतिप्रामाण्यात्, सतां वाक्यप्रामाण्यात्; गुरुवाक्यप्रामाण्यात्, अनुभव-प्रामाण्यात्, मनसो नानाविकल्पं क्रीणामि, स्वचिदात्मनि लयं करोमीत्यर्थः। कहेति। कबीरः=

---

१. (१-२) में इस पद्य की संख्या ६ है।
२. मनुसा (१); मनसा (२)।
३. करत (१-२)।
४. बड़े (१); वड़ी (२)।
अतएव हे मुमुक्षुओं, शान्तिरूप साधुओं की सेवा करो। परमात्मा से एकरूप होने का यही एक मार्ग है। उस ब्रह्मानन्द में न तो चन्द्र है, न सूर्य, न दिन और रात्रि, न पंच-तत्त्व, न काल, अकाल, और जन्म-मरण-कुछ भी नहीं है। वहाँ बिरले ही पहुंचते हैं। वहीं से जन्म लेकर (संसार में आकर) सभी जीव बिछुड़ गए हैं। प्रलम्ब समय व्यतीत हो गया और स्वयं के विचार के बिना सभी मोहित हो गए।

अतः, हे मुमुक्षुओं आत्माराम साधुओं का संग करो। उनके संग में भृङ्गी-कीट बन जाओ (भँवरा जो पकड़े हुए कीड़े को अपने रंग का बना लेता है)। इससे जन्म-मरण के फन्दे से मुक्ति मिलेगी।

कबीर (विज्ञानी) कहते हैं कि सन्त के मिलने से शुभाचरण की प्रवृत्ति होती है और उससे आवागमन से छुटकारा होता है ॥१॥

(२)

बहु विधि चित्र बनाय के हरि रचो क्रीड़ा रास ।
जाहि न इच्छा झूलवे की ऐसी बुद्धि केहि पास ॥
झूलत झूलत बहु कल्प बीते मन न छोड़े[1] आस ।
रचो हिंडोला अहोनिशि चारि जुग चतुर्मास[2] ॥
कबहुँक ऊँच से नीच[3] कबहुँ स्वर्ग भूमि ले जाय ।
अति भर्मित भर्म हिंडोला[4] नेक नहीं ठहराय ॥
डरपत हो एहि झूलवे को राखु जादवराय ।
कहहिं कबीर गोपाल विनती शरण हरि तव पास[5] ॥

बहु विधि इति। हरिर्भगवान् आब्रह्माद्यखिलदेवतिर्यङ्नरादिकीटमशकपतंगपर्य्यन्तान्बहु-प्रकारेण चित्राणि[6] रचयति क्रीडार्थं, यथा श्रीकृष्णो गोपीभिः सह रासमण्डले क्रीडां चकार,

---

१. मन नहिं छाँड़े (१-२)।
२. रच्यो रहस; चौमास (१-२)। शुद्ध-अहर्निशि।
३. कबहुंक ऊँचे कबहुँक नीचे (१-२)।
४. अति भरमित भरम हिंडोला (हिंडोरवा) (१-२)।
५. तुम आय (१-२)।
६. प०—'चित्ररूपेण रचयति'; या, 'पर्यन्तानां'।

ताभ्योऽलिप्तो भवति। जाहि=यस्येच्छा व्यवहारे क्रीडितुं न भवति, ईदृशी कस्य बुद्धिर्भवति? न कस्य [अपि*]। व्यवहारं मृषा मत्वा यो (यः) क्रीडति, स कश्चिद्विरल इत्यर्थः। झूलेदेव-तिर्यङ्नरादिदेहेषु पुनः पुनः क्रीडन् सन् जीवः (जीवस्य) बहूनि कल्पानि व्यतीतानि तथापि, मानसं=वासनां[1].न मुञ्चति।

रचो इति। भ्रमरचिते आन्दोले कर्ममये आरुह्य इमे सर्वे[2] चतुर्युगानां चातुर्मासो; अहर्निसि(शि) सुत्र(सुत)कलत्रादिषु ममतां बद्ध्वा गच्छन्ति। कुत्र तदाह कबहुँ इति। कदा-चिदुत्तमयोनौ देवादिषु, क्वचिन्मनुष्ययोनौ, श्वानशूकरादिषु [च*] जायते। क्वचित् स्वर्गे क्वचिद् भूमौ क्वचित्पाताले गच्छति, इति अतिशय-भ्रमेण भ्रमान्दोले मुहुर्मुहुर्जन्ममरणं भवति जीवानाम्। कुत्रापि स्थितिर्न स्यात् यत्ज्ञानं विनेति भावः।

डरपतेति भक्तवाक्यम्। हे यदुश्रेष्ठ भगवन्, भ्रमान्दोल=जन्ममरणाद्भयभीतोऽस्मि। मां त्राहि शरणागतवत्सल। कहेति। कबीरः=विष्णुभक्त इत्थं प्रार्थयति—हे गोपाल, हे हरे, तव पार्श्वं मां नयेति। विज्ञापना मम वा—अहं हरिः, गोपालोऽहमिति भावयामि अन्तिके[3] इत्यर्थः ॥२॥

भगवान् ने देव, मनुष्य और पशु-पक्षी से कीट-मशक पर्यन्त विविध चित्रों का क्रीड़ा के लिए निर्माण किया है और वे स्वयं भी गोपियों के साथ रास-मण्डल की क्रीड़ा में रत थे। किन्तु निर्लिप्त ही रहे। किसकी इच्छा होती है कि इस व्यवहार में न खेला जाय? किन्तु इस व्यापार को मृषा जान कर जो क्रीड़ा करता है, ऐसा व्यक्ति बिरला ही है। देव, मनुष्य पशु-पक्षी आदि की योनियों में झूलते झूलते कल्प व्यतीत हो गए, किन्तु जीव की वासना नहीं छूटी।

भ्रम से रचित कर्म-मार्ग के झूले में झूलते झूलते लम्बा समय व्यतीत हो गया और युग बीत गए।

कभी उत्तम देव-योनि में, कभी मनुष्य-योनि में और कभी श्वान-शूकर की योनि में भी जन्म हुआ। कभी स्वर्ग, कभी मृत्युलोक और कभी पाताल में भी निवास किया; किन्तु भ्रम के झूले में जन्म लेकर जीव झूलता ही रहता है। (बात यह है कि) आत्म-ज्ञान के बिना कहीं भी स्थिति नहीं हो सकती।

(इस परिस्थिति से त्रस्त होकर भक्त भगवान् से प्रार्थना करता है कि) हे यदुश्रेष्ठ, हे भगवान्, इस जन्म-मरण के भ्रमान्दोल से मैं भयाक्रान्त हो गया हूं। हे शरणागत-वत्सल, मेरी रक्षा कीजिए। विष्णुभक्त कबीर प्रार्थना करते हैं:—हे गोपाल, हे हरे, मुझे अपने पास ले जा। मेरी यही विज्ञापना है कि मैं स्वयं हरि हूं, गोपाल हूँ। यह (प्रार्थना) स्वीकार कीजिए ॥२॥

---

१. यहाँ मन का पर्याय वासना बतलाया है।

२. यहाँ विभक्ति की त्रुटि है।

३. =तवान्तिके, ममान्तिके वा।

(३)

लोभ मोह के खंभ दो मन से रचो हिंडोल ।
झूलहिं जीवाज(ज)हान जहाँ ले कतहु न देखा थिति ठौर[१] ।।
चतुर झूलहिं चतुराइया झूलहिं राजा शेष[२] ।
चाँद सूरज[३] दोउ झूलहीं उनहुँ न आज्ञा भेष ।।
लक्ष चौरासी जीव झूलहिं रवि-सुत धरिया ध्यान ।
कोटि कल्प जुग बीतल[४] अजहुँ न माने हारि ।।
धरति अकाश दोउ झूलहीं झूलहिं पवना[५] नीर ।
देह धरे हरि झूलहीं देखहिं हंस कबीर ।।

लोभेति । भोः, मनसा, हिंडोल=आन्दोलभ्रममात्रं रचितम् । तस्य लोभमोहौ द्वौ स्तम्भौ भवतः[६] । झूलेति । तस्मिन्नेव भ्रमान्दोले मोहमये मृषाव्यवहारे सकलजन्तवः आब्रह्माद्यखिल-भूतगणाः सर्वे स्वस्वमार्गे, झूलहिं=आन्दोले भ्रमन्ति । सत्यं मत्वा चलचित्ताः भवन्ति। दोला-चलचित्तवृत्तिर्भवति तेषाम् । स्थिति=स्थानं कुत्रापि न दृश्यते, परमात्मनो ज्ञानं विनेति भावः ।

चतुरेति । सर्वशास्त्रव्याख्याने चतुराः स्वस्वशास्त्राभिमाने अन्योन्यं युध्यन्ते । राजा राजकार्य्ये प्रजासंरक्षणदण्डकरादाने, शेष=अन्ये जनाः सर्वे स्वस्वव्यवहारमार्गे भ्रमन्ति । चाँदेति । चन्द्रसूर्याविभौ दिनरात्रिविभागकरणे भ्रमितौ स्तः । किं परमात्मनः आज्ञा पालयतः ? अत्र श्रुतिः-भीषास्माद्वातः पवते भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम[७] इति । लक्षेति । चतुरशीतिलक्षजीवाः-स्वस्वकर्ममार्गे जन्ममरणे भ्रमन्ति । झूलति इति । रविसुतः= रविर्ब्रह्म, तद्भासो जीवत्वं मन्यन्ते । ब्रह्मैवाहमिति विहाय अत्र परोक्षं ध्यायन्तीत्यज्ञमतं वा, ब्रह्मध्यानाद् ब्रह्मरूपाः भवन्ति वा । रविसुतो धर्मराजः, यद्भयात् प्रजाः म्रियन्ति (ते) इत्यर्थः ।

कोटि इति । भोः, इमे सर्वे कोटिकल्पानि=कोटयवधियुगानि जन्ममरणसंसृतौ व्य-तीयुः, तथापि कर्मरहिताः न भवन्ति । अद्यापि भवाटव्यां खेलन्तीत्यर्थः । धरतीति । धरित्री यद्भयान्न मज्जति, आकाशः यद्भयात्सावकाशं ददाति, पवनो यद्भयाद्वहति, नीर=बुद्धिः, यद्भयान्न प्रसर्पति, इत्यर्थः । देहेति । हरिरामकृष्णाद्यवतारं धृत्वा भूभारं क्षपयति, धर्ममर्यादां

---

१. तुलनीय—लोभः पापस्य कारणम्; और मोह एव महामृत्युः । जहाँ लगि । जैसा अन्यत्र, उसी प्रकार यहां भी लिपिकार ने 'ठवर' लिखा है ।
२. पोथी में प्रमाद-वश 'शेव' लिखा है ।
३. सूर्य (१-२) ।
४. बीतिया (१-२) । हारि अतुकान्त ।
५. पौना (१) ।
६. तुलनीय—ध्यायतो विषयान्पुंसः संगस्तेषूपजायते,……गीता, २,६२, आदि ।
७. तैत्तिरीयोपनिषद्, २,८ ।

स्थापयति कार्यार्थम्। झूलेति=भ्रमति। देखहिं इति। कबीरः=ब्रह्म हंसः साक्षी द्रष्टा भूत्वा दृश्यते, अलक्ष्यः सन्नित्यर्थः ॥३॥ इति हिंडोलाव्याख्या संपूर्ण(र्णा)।

सत्संग-विमुख व्यक्ति ने भी लोभ और मोह के दो स्तम्भों पर अपने मन से झूला खड़ा किया है। इसमें संसार में जीव झूलते हैं; किन्तु अपने अपने शास्त्र के अभिमान के कारण परमात्मा के ज्ञान के बिना वे निश्चित स्थिति पाने में असमर्थ ही हैं।

राजा, प्रजा आदि सभी व्यक्ति अपने अपने (सांसारिक) कामों में झूलते रहते हैं। चन्द्र और सूर्य दिन और रात्रि को पृथक् पृथक् करने में झूलते हैं। धर्मराज का भय भी बना ही है। किन्तु फिर भी चौरासी लाख योनियों के जीव अपना अपना कर्म करके जन्म-मरण का झूला झूलते रहते हैं। वे सभी भगवान् का ध्यान परोक्ष मानकर करते हैं।

करोड़ों युग बीत गए, किन्तु फिर भी ये लोग कर्म से छुटकारा नहीं पाते। अतः संसार में उनका पुनरावर्तन होता है। जिसके आतंक से पृथ्वी नहीं डूबती, आकाश अवकाश देता है, वायु प्रवाहित होती है और बुद्धि प्रवृत्तमान होती है, वही (परमात्मा) राम और कृष्ण आदि के अवतार धारण कर धर्म-मर्यादा की स्थापना करता है।

कबीर साक्षी (हंस) बनकर यह सब (खेल) देखते हैं ॥३॥

—०—

वल्ली

अथ वल्ली—

(१)

हंसा सरवर शरीर माँहि[१] रमैया राम
जगत चोर घर मूसेहु[२] " " ।
ज जागल से(सो) भागल " " ॥
सोवत गैल विगोय " " ।
आजु बसेड़ा (रा) नियरे " " ॥
कालिह[३] बसेड़ बड़ि दूरि " " ।
परेहु[४] बिराने देशवा " " ।

१. में (१-२)।
२. जागत; मूसेहि (१-२)।
३. काल (१-२)।
४. जइहो (जैहो) (१-२)।

नयन मरहुगे[1] दूरि " " ।
त्रास मथन दधि मथन कियेहु " " ॥
भवन मथेहु भरि पूरि " " ।
फिरि के हंसा पाहन भेस[2] " " ॥
बोधिनि पद निर्वाण " " ।
तुम हंसा मन मानिक " " ॥
हठल न मानहु मोर " " ।
जसरे किये तस पायेहु " " ॥
हमर[3] दोस जनि देहु " " ।
अगस काढ़ि(टि) गमि कियेहु " " ॥
सहज कियेहु व्यौपार[4] " " ।
राम नाम धन बनिज कियेहु " " ॥
लादेहु वस्तु अमोल " " ।
पाँच लदनुवा लादि चलल " " ॥
नव बहियाँ दश गोनि " " ।
पाँच लदनुवा खागि परल " " ॥
खाँखरि डारिनि फिरि(फोर) " " ।
शिर धुनि हंसा उड़ि चले " " ॥
सरवर मीत जुहार " " ।
आगि जो लागी सरवर मँह " " ॥
सरवर जरि भो दूर[5] " " ।
कहहिं कबीर सुनु संतो हो " " ॥
परखि लेहु खरा खोट " " ॥

हंसेति। भो मुमुक्षो, शरीरान्तरे अन्तःकरणसरोवरे,[6] हंसः=परमात्मा राजते। अतः राम एवेदं सर्वम्। रामोऽसि त्वम्। जानीहि। यद्वा, हंस=श्वास; सोऽहं हंसेति। जगतेति। भोः, जगत्-ज्ञाताद्यहमिति चौरः ग्र(गृ)ह=अन्तःकरणादात्मविचारं मुष्णाति। स्वरशब्दं

---

१. नैन मरोगे (१-२)।
२. भयो (१-२)। क्रिया के अन्त में पोथी में विशेषकर जो 'लकार' का पयो उपलब्ध है, वह दूसरी दोनों पुस्तकों में नहीं है। वह यहाँ सर्वत्र नहीं बतलाया।
३. हमरे (१-२)।
४. विश्वास (१-२)।
५. धूरि (१-२)।
६. जैसा अन्य सब स्थलों पर, यहाँ भी लिपिकार ने 'करण' के स्थान पर 'कर्ण' लिखा है।

विना, इत्यर्थः। जे जागेति। ये स्वरूपविचारे रताः ते एव जागरिताः। ये देहाभिमाने रतास्ते सुप्ताः इत्यर्थः। आजु इति। अद्य, भोः, मानुषदेहे दुर्ल्लभे स्वविचारो भवति, अत एव निकटं स्यात्। काल्हि इति। अन्यदेहेषु विचारो न भवतीत्यर्थः। परेति। बिराने=वर्णाश्रम्यहम्-इति परदेशं; ब्रह्मैवाहमिति स्वदेशे रमस्वेति सत्यम्। नयनेति। भोः, नयन=परमात्मानं दूरं किं ध्यायसे? मृतेऽपि न मिलति। अतः स्वान्तरे रामः इति पश्यतामिति भावः।

त्रासेति। भोः, त्वं त्रासमथनोऽसि (मथितोऽसि)। आत्मानुभवं विना कालभयात् त्रससि त्रिशरीरेभ्यः; परमहमिति मथनं विविच्यताम्। हृदयविलोडनाद्रामं प्र(प्रा)प्स्यसि, दधिमथनात् घृतं यथा। भवनेति। भवनं=स्वान्तःकरणं मथतां तर्हि परमानन्दं लभसे, रोम-रोमपरिपूर्णमित्यर्थः। फिरि के इति। भोः, हंस=प्रकाशरूपोऽसि त्वम्। यदि[1] देहभावादा-त्मविचारे आगत्य, पाहन=अचलो भव, निर्विषयपदारूढो भवेत्यर्थः।

वेधि इति। रामोऽहमित्यभ्यासेन निर्वाणपदं वेध्यताम्। मथ्यताम् तुम इति। भोः त्वं हंसोऽसि। मननशीलो भव। माणिक्यवत् प्रकाशकोऽसि। हठल इति। अविज्ञातसखा वाक्यं ब्रवीति, इति मे वाक्यं कथं न मन्यसे इति। यादृशी तव कर्त्तव्यता, तादृक् फलमाप्नुहि। हमर इति। भो रमैया, विषयेषु मा रमस्व। मम दोषं मा देहि। कर्मानुसारेण फलं भवतीत्यर्थः।

अगम इति। अगम=अज्ञानं, देहोऽहमिति छित्वा 'सोऽहं' [इति*] ज्ञानं कुरु इति भावः। सहज इति। सहजानन्दे व्यापारं कुरु। सहजानन्दोऽहम्, इत्यध्यासमित्यर्थः[2]। रामेति। रामनामैव धनं-वाणिज्यमपि त्वया कृतम्। लादेहु=अमौलिकवस्तु त्वया गृहीतम्। चित्स्वरूप-वानसि, तथाप्यात्मसुखं न प्राप्यते।

पाँच इति। पञ्चीकृतपञ्चभूतरचितः (तं) स्थूलशरीरं, तेन यत्कृतं पुण्यपापं,[3] लादि=गृहीत्वा गच्छन्ति। नवेति। नवसूक्ष्मतत्त्वानि=पञ्च विषयाः चतुरन्तःकरणाः,[4] दशेन्द्रियाणि एभिः सह गच्छन्नित्यर्थः। पाँचेति पुनः। पञ्च लदनुवा=पञ्च प्राणवृत्तयोऽपिस्थगिताः, जीर्णतां प्राप्ता इत्यर्थः। खाँखरि इति। खाँखरि=प्रारब्धं देहं विहाय, फिरि=पुनः अन्यशरीरे गच्छति।

शिरेति। भोगविषयकर्मसु यः शिरो धुनुते, देहपातपर्य्यन्तं यहि (यो हि) काल आगतः तदा देहान्निर्गत्य हंसः प्राणोड्डानं कृत्वा गच्छति, ततः सरवरेति। जीवः प्रयाणसमये वदति, किं भो मित्र शरीर, त्वयि प्रविश्य बहुभोगं भुनज्मि, त्वां त्यक्त्वा परवशात् गच्छामि इत्यर्थः। आगि इति। मृतं शवं कुटुम्बिनः अग्नौ दाहयन्ति। शरीरमित्यर्थः। शरे(सरे)ति। सरोवरं=शरीरमग्निदाहेन भस्म=धूलिः अभवत्।

---

१. इस शब्द की यहाँ आवश्यकता नहीं है।

२. कदाचित् 'ध्या' के स्थान पर 'भ्या' अभीष्ट है।

३. =पापकर्म।

४. —करणानि। पंच विषय=शब्द, स्पर्श, रूप, रस, गन्ध; चतुरन्तः करण=मन, बुद्धि, चित्त, अहंकार; दशेन्द्रिय=पञ्च प्राणेन्द्रिय और पञ्च कर्मेन्द्रिय।

कह इति। कबीरः=महान्तः साधवो ब्रुवन्ति-भोः सन्त=मुमुक्षो, शृणु। खरा=शुद्ध आत्मा, खोट=अशुद्धो देहः। सदसतोर्विभागं कुरु, ज्ञायतामित्यर्थः ॥१॥

हे मुमुक्षो, परमात्मा शरीर के भीतर अन्तःकरण में (ही) विराजमान है। अतः यह सब (दृश्यमान जगत्) राम है और तुम भी राम हो—यह भलो भाँति समझो। अथवा, यहाँ हंस (का) तात्पर्य श्वास (श्वासः सोऽहम्) से भी है। ज्ञाता, कर्ता, भोक्ता आदि मैं (ही) हूँ—यह विचार चोर का (अनुचित) है, जो आत्म-विचार का हरण कर लेता है। स्वरूप-विचार करने वाला जागता रहता है और जो देहाभिमान में निरत है वे सोते रहते हैं। आत्म-विचार मनुष्य-योनि में ही सम्भव है, जो दुर्लभ है। अन्य योनियों में यह विचार नहीं हो सकता। 'मैं ब्रह्म ही हूँ'—यह विचार 'स्वदेश' के समान है और मैं वर्णी और आश्रमी हूँ यह विचार पराये देश के समान है। परमात्मा स्वयं में ही है; उसे दूर क्यों समझते हो ? अपने ही भीतर राम के दर्शन करो।

तुम (सांसारिक व्यवहार में) मत्त हो, किन्तु आत्मानुभव के बिना भयभीत हो ? तीनों शरीरों का मथन करके और अपने हृदय का विलोड़न करके देखो, तब परमानन्द (स्वयं) प्राप्त होगा। हे हंस, तुम प्रकाश-रूप हो। ऐहिक विचार छोड़ कर आत्म-विचार करो। 'मैं राम ही हूँ' इस अभ्यास से निर्वाण प्राप्त होगा। तुम मननशील हो; माणिक्य की तरह प्रकाशमान होकर मेरा कहना क्यों नहीं मानते ? करोगे वैसा भरोगे। विषयों में (के फेर में) मत पड़ो। मैं 'देह हूँ' इस (यह बतलाने वाले) अज्ञान का उच्छेद करके सहजानन्द का अभ्यास करो। राम-नाम ही (सच्चा) धन है। चित्स्वरूप बन कर इसी का विचार करो।

पंचीकृत पंचभूतों से निर्मित स्थूल शरीर से किया हुआ पाप लाद कर सब (संसार से) चले जाते हैं। शरीर (यहीं) छूट जाता है। पंच-प्राण-वृत्तियाँ भी जीर्ण हो जाती हैं।

भोग और विषय-कर्मों में अन्त तक सिर धुनने वाले के लिए वह समय भी आता ही है जब हंस शरीर से निकल कर प्राणों का उड्डान करता हुआ चला जाता है। तब जीव अपने प्रयाण के समय कहता है :—हे मित्र शरीर, तुझ में प्रवेश करके मैंने प्रभूत भोग भोगे; अब मैं प्रस्थान करता हूँ। तब शरीर को जलाकर भस्म कर देते हैं।

कबीर (साधुजन) कहते हैं कि (इन दोनों में) शुद्ध तो आत्मा ही है; शरीर अशुद्ध। सत् और असत् का भेद जानो ॥१॥

(२)

भल सुम्रति[1] जहड़ाये हो रमैया राम ।
धोख के लहु[2] विश्वास ,, ,, ॥
सो तो हे वनसीकसी[3] (?) ,, ,, ।
शिर के लहु विश्वास[4] ,, ,, ॥
ई तो हे वेद भागवत[5] ,, ,, ।
गुरु दीहल माहि थापि ,, ,, ॥
गोबर कोट उचाये[6] हो ,, ,, ।
परिहरि जे बहु खेत ,, ,, ॥
बुद्धि बल[7] तहाँ न पहुँचे ,, ,, ।
खोज कहाँ के होय ,, ,, ॥
से सुनि मन महँ धीरज भयल[8] ,, ,, ।
मन बढ़ि रहल लजाय ,, ,, ॥
फेरि पाछे जनि हेरहु ,, ,, ।
कालवूत सब आह ,, ,, ॥
कहँहि कबीर सुनु संतो हो ,, ,, ।
जनि[9] ढीगहु फैलाय ,, ,, ॥

भलेति। नरतनुं श्रेष्ठां लब्ध्वा स्मृतिज्ञानं सोऽहमिति विसार्य्यताम् इत्यर्थः। धोखेति। भोः, सुतकलत्रादिषु ममत्वं विश्वासं मन्यसे तत् सर्वं मृषा; नैव सत्यम्। सो तोइति। यथा मत्स्य-भेदिनः लोहकण्टकमयी, वनसी(वंशी)ति भाषाप्रसिद्धास्ति, तस्यां स्वादलोभेन विध्यन्ति मीनं, तद्वत् स्त्रियादिभोगसुखें बध्यते इत्यर्थः। सीरेति। भोः त्वं स्वशिरस उपरि बृहद्भारं मम स्त्री, मम पुत्रः, इत्यादि विश्वासं वहसि। किमिति। राम, स्वात्मनिश्चयम्? वेदे 'तत्त्व-मस्यादि' वाक्यैः प्रोक्तम्; भागवते एकादशस्कन्धे उद्धवं प्रति श्रीकृष्णेन, तद्वस्तु जानीहीत्यर्थः: गुरु इति। गुरुभिर्दत्तात्रेयादिभिर्महात्मभिः स्वमते श्रेष्ठं स्थापितं, तस्मिन्नेव ये रमन्ति(ते),

१. सुमृति (१-२) स्मृति।
२. धोखे कियेहु विश्वास (१-२)।
३. है वन्सीकसी (कँसी) (१-२)।
४. सोरे कियेहु विश्वास (१-२)।
५. शांस्त्र (१-२)।
६. उंठायहु (उ) (१-२)।
७. —मन बुद्धि (१-२)।
८. धरहु (१-२)।
९. मन (१-२)।

ते रामरूपा भवन्ति।

गोबरेति। गो=श्रुतीनां, वर=श्रेष्ठं ज्ञानदुर्गं ब्रह्मविद्यामयमुच्चपदं, 'सोऽहमस्मीति' निश्चयं कुरुत। यद्वा, गोबरेति=गोमय, महिषीमयपूरिषमवासनामयं[1] दुर्गं स्वशिरस उपरि भारं वहते—'पापोऽहं पापकर्माहं पापात्मा पापसम्भव इति परिहरे'ति। भोः बहुक्षेत्राणि देव-तिर्य्यग् नरादीन् उद्धारयन् अथैव(वं ?) सुचेतो भव[2]। तेषां परिहारं कुरु; निष्कामो भवेत्यर्थः। 'शुद्धोऽहं शुद्धकर्माहं शुद्धात्मा शुद्धसम्भवः।' एवमन्तरं विविच्यतामभ्यासं कुरु।

बुद्धिरिति। भोः तत्परमात्मनि बुद्धिरपि न चलति। कुतः ? बुद्धेः परः=परतस्तु सः। योगयज्ञादिकैः बल-पराक्रमोऽपि यत्र न चलति। कुतः ? बलिनां बलीत्यर्थः। खोजि इति। यत्र मनो बुद्धिर्न गम्यते[3], तम् अन्यत्र मार्गितुं (मार्गयितुम्) इच्छसि। अतः स्वान्तरे दृश्यताम्। से सुनि इति। भो मनः, श्रृणु। स्वस्मिन् स्वयं तु धैर्यवान् भव। आत्मवान्भवेत्यर्थः।

मन इति। गुरुमुखात् स्वयं विचारं श्रुत्वा मुमुक्षोर्मनसो वृत्तिर्वर्द्धमानं(ना) पुनः धैर्यमागतः(ता) सन् (सती) क्षीणतां गतः=गता=गच्छति[4]। पश्चात् [स*] लज्जितो भवेत् फेरि इति। पुनः आदौ अशुभं कृतम्; अन्ते पश्चात्तापं करोति। तत्तापह्लिया किं, नैव कालेति। आब्रह्माद्यखिलभूतगणाः सर्वे कालग्रसिता इत्यर्थः। कहेति। कबीरः=वैराग्यवान् इत्थं ब्रवीति, भोः सन्त= मुमुक्षो, श्रृणु। अहो पश्यत। जनि=ब्रह्मैवाहमस्मीत्यभ्यासे सावधानो भव। ढीग=आलस्यं न कर्त्तव्यमित्यर्थः॥२॥

श्रेष्ठ नर-तनु को पाकर 'सोऽहं' (मैं वही हूँ) यह भूल गए। सुत, कलत्र आदि में ममत्व (विश्वास) करना मृषा है। भोग-सुख तो (स्वयं) उसी प्रकार आकर्षित करते हैं जैसे काँटा मछली को। स्त्री-पुत्रादि में ममता छोड़ कर और स्वात्मनिश्चय करके 'तत्त्वमस्यादि' का तात्पर्य समझो और उसका भी मनन करो जो भागवत में उद्धव को श्रीकृष्ण ने कहा है। गुरु दत्तात्रेय आदि महात्माओं की उक्तियों में रममाण होओ।

वेदों के ज्ञान-दुर्ग (में प्रवेश करके और) उच्च पद के अनुसार मैं वही (परमात्मा से अभिन्न) हूँ यह निश्चय करो। अनेक योनियों में जन्म लेने के पश्चात् अब तो चेतो।

उस परमात्मा में बुद्धि का भी सञ्चार नहीं होता; वहाँ तक बुद्धि की पहुँच नहीं है। योग, यज्ञ, बल-पराक्रम आदि भी वहाँ तक नहीं पहुँच सकते। उसे तुम अन्य स्थलों पर खोजते हो ? धैर्यवान् बनकर उसकी खोज (अभिज्ञान) अपने हृदय में ही करो॥२॥

---

१. शुद्ध=महिषीपुरीषसमवासना—।

२. इस वाक्य का अर्थ स्पष्ट नहीं होता।

३. शुद्ध—'मनोबुद्धी न गच्छतः'।

४. इस वाक्य में अनेक अशुद्धियाँ हैं जिन्हें कोष्ठक में शुद्ध कर दिया गया है।

विरहुली

अथ विरहुली–

आदि अंत म(न)हिं होते बिरहुली । नहिं जर पल्लव पेढ़(ड़)[१]बिरहुली ।।
निस(सि) वासर नहिं होते बिरहुली । पवण(न) पाणि[२] नहिं मूल बिरहुली ।।
ब्रह्मादिक सनकादिक बिरहुली । कथिगेल जोग अपार बिरहुली[३]
मास असाढ़े सीतल बिरहुली । बोइनि सातों बीज बिरहुली ।।
निति को(गो)ड़े निति सींचे बिरहुली । निति नव[४] पल्लव पेड़ बिरहुली ।।

छिछिनी[५] बिरहुली छिछिनी[५] बिरहुली ।
छिछिनी[५] रहल तीनि लोक बिरहुली ।।

फूल एक भल फूलल बिरहुली । फूलि रहल संसार बिरहुली ।।
सो फूल बंदहि भक्त[६]जना बिरहुली । बंदि के राउर जाहि बिरहुली ।।
सो फूल लोंड़हि सन्त जना बिरहुली । डसिगेल वयेतर[७] साँप बिरहुली ।।
विषहर मन्त्र न माने बिरहुली । गारुड़ बोले अपार विरहुली ।।
विष की क्यारी तुम[८] वोयेहु विरहुली । लोटत का पछतातहु बिरहुली ।।
जन्म जन्म जम अन्तर बिरहुली । फल एक कनैल[९] डार बिरहुली ।।
कहहि कबीर सच पाख[१०] बिरहुली । जो फल चाखहु मोर बिरहुली ।।

श्रीसद्गुरुं वन्दे । अथ बिरहुलीव्याख्यामाह । आदि इति । विरहरूपा बुद्धिः, सा बिरहुली । सा केवले परमात्मनि आद्यन्तमध्येऽपि नास्ति । तर्हि विरहधीः कुतः ? का(क्वा)पि नेत्यर्थः । न हि इति । जर = मूलप्रकृतिः, पेड़ = महत्तत्त्वपल्लवः, विषयाः - एते आत्मनि नास्तीतीत्यर्थ[११] । निस इति । तत्र परमात्मनि रात्र्यहनी नैव । कुतः ? देशकालवस्तुरहितः । पवनेति ।

---

१. डार (१-२) ।
२. पानि (१-२) ।
३. सनकादि, कथि गये, योग (१-२) ।
४. नौ (१) ।
५. छिछिली(लि) (१-२) ।
६. सन्त (१) ।
७. डँसिगौ बैतल (१-२) ।
८. यह शब्द नहीं है (१) ।
९. यम, कनयर (१-२) ।
१०. पाव (१-२) । पोथी में यह शब्द 'पारव' लिखा है । दूसरे और तीसरे अक्षर स्पष्टतः अलग अलग हैं ।
११. अशुद्ध । प०—न सन्तीत्यर्थः ।

यस्मिन् सुखे न पवनः, नापः, नाग्निः, न भासते[१]।

ब्रह्मेति । ब्रह्मादिभिः, सनन्दनाद्यैः, कथिगेल=ब्रह्मैवाहमिति योगः, तस्य मार्गः, अपार अगाधः; सत्यं ज्ञानमनन्तोऽहमहमात्मा[२] इति साक्षात्कारो वर्णितः। मासेति। मासः= मनः। स्वस्य स्वं मीमांसते। असाढे=सूक्ष्मशरीरे, शीतली=सकामबुद्धौ विषयरूपधारा वर्षति, वृष्टिकाले मेघो यथा। बोइनि इति। तया सकामवासनया सप्तबीजानि वापितानि। तत् किं तदाह । चर्ममांसरुधिरम(मे)दोमज्जावसेतिसप्तधातुरचितं शरीरं भवति । यद्वा, सप्ताग्नेस्सर्गानि भवति[३]।

बिरहुली=दुःखस्वरूपम्। निति इति। अज्ञस्य धीः=बुद्धिः विरहिणी। नित=प्रतिदिनं विषयान् (विषय)क्रोडे आसक्ता भवति। विषयासक्तो भवति। नित्यं मुहुर्मुहुः विषयधाराभिः सिञ्चति। अतः स्वरूपाद्विक्षिप्ता मतिर्भवति येषामित्यर्थः। निति इति। पेड़= आत्मा, तत्सकाशान्नवपल्लवानि=पञ्चविषयानि (विषयाः)। अज्ञस्य बुद्धिर्नवीनं विषयमिच्छतीत्यर्थं। छिछिनीति। आत्मस्वरूपाद्विरहिणी बुद्धिः पुरं जनी (?) छिछिनी=चंचला; 'क्षणे रुष्टा क्षणे क्रुष्टा रुष्टा क्रुष्टा क्षणे क्षणे'। भो बुद्धे, विषयसुखे किं रतो(ता)सि ? सर्वं विषयं छिन्नं=नाशमानं स्यात्। छिछिनी इति। भोः, त्रिदेहाः नाशमानाः स्युः, बहिर्लोकाः त्रयः नाशमानाः स्युः।

फूलेति। भो मुमुक्षो, वासना एका सम्यक् प्रफुल्लिता; विषयपुष्पैर्विकसिता इत्यर्थः। फूलि इति। अयं सर्वसंसारः संसृतिमार्गे, स्वस्वमार्गे सुतकलत्रादिषु प्रफुल्लतीत्यर्थः। सो फूलेति। भक्तजनाः परमहंसाः ज्ञानिनः यत्परमात्मनो(नः) पदं सोऽहमिति वदन्ति श्रेष्ठम्। येषां बुद्धिरित्यर्थः। बन्दि के इति। भो मुमुक्षो, तत्पदं[४] वन्दनां कुरु-सोऽहमस्मीति। राउर=तव स्वरूपं स्यात्, यस्मात् संसारतपनरूपा या बुद्धिः सा नाशिता इत्यर्थः।

सो फूलेति। सन्तजनाः आत्मारामाः अन्तःकर्ण(करण)-कुसुमलोडनाविचाराभ्यासेन ब्रह्मस्वरूपं जानन्ति, तिलमध्ये यथा तैलं, काष्ठमध्ये हुताशनः, देहमध्ये तथा ज्ञानं यो जानाति स पण्डितः इति। डसि इति। इतरजनानां विषयिनां(णां) पञ्चविषयफणो महान् सर्प्पो दंशति स्वात्मविचारमित्यर्थः (शेषः)। विषेति। विषयविषं हरतीति विषहरः=मद्गुरुरुपनिषच्च येषां मन्त्रतत्त्वमुपदिशति(तः), न मन्यतेऽज्ञः।

गारुड़ेति। गारुड़=श्रुतिस्मृति(ती), बहवः, गुरवः, आदि(इत्यादि)गुरवः सर्वेषां बोधयन्ति, तथापि न मन्यन्ते। अतः न मुक्ताः। शिष्यवित्तापहारकाः गुरवः बहवः सन्ति। सन्ताप-

---

१. =एते न भासन्ते। सम्भवतः यहाँ लिपिकार ने 'स' के ऊपर का अनुस्वार छोड़ दिया हो, क्योंकि सारी पोथी में परसवर्ण का प्रयोग कहीं नहीं है, जो सम्पादन में भी नहीं किया गया है लिपिकार द्वारा अनुस्वार की ओर दुर्लक्ष्य करने के अनेक स्थल पाए जाते हैं।

२. तैत्तिरीयोपनिषद् २,११।

३. प०—सप्ताग्निषु (भिः ?) सर्गाः भवन्ति।

४. =तत्पदस्य, अथवा तस्य पदस्य।

हारकः गुरुर्दुर्लभः । स कश्चित् विरल इत्यर्थः ।

भोः कर्मिणः,[1] त्वया विषवत् क्रियाकर्म रचितं=वापितम् । लोड़तेति । विषकर्मणः फलं दुःखम् । अशुभस्याशुभफलं नानादुःखम् । त्रिधातापं भुनक्षि, सहसे । अतः पश्चात्तापेन किं भवति ? न किंचित् । जन्मेति । अतः वासनावशात्पुनः पुनः जन्ममरणे भवतः इत्यर्थः । फलेति । करवीरवृक्षवद्देहः । तस्य पाणिपादादि(दयः) शाखाः । ताभिः शाख(खा)भिः दानादानगमनागमनं शुभाशुभं करोति तद्विषयफलं दुःखसुखे स्तः—अहं दुःखी, अहं सुखी । अतः बन्धनान्न मुच्यते, यथा करवीरवृक्षमूलं यः कश्चित् खादति, शीघ्रं म्रियते सः । कहेति । श्रीसद्गुरुः स्वामी इत्थं ब्रवीति भो बुद्धे, 'सत्यं ज्ञानमनन्तोऽहम्'[2] इत्यभ्यासेन दृढेन स्वपरमानन्दं प्राप्स्यसि इत्यर्थः । जो फलेति । सोऽहं विज्ञानानन्दानुभवमोक्षफलम् इति । मम स्वरूपं परमानन्दरूपं । रसं पिब हे सद्बुद्धे, ज्ञानानन्दो मोक्षफलाधिकारी भवति, न त्वितरे इत्यभिप्रायः सत्यः ।

हरिः ॐ तत्सदिती(ति) श्रीमत्सद्गुरुपूज्यकबीरचर्णा(रणा)ब्जभृङ्गायमानबोधानन्देन विरचितायां विज्ञानबीजप्रदीपिकायां बिरहुलीव्याख्या स(सं)पूर्णा समात्पि(प्ति)मगमत् । श्रीसद्गुरुचर्णा(चरणा,र्पणमस्तु । स(सं)वत् १९३४ जे(ज्ये)ष्ठशुक्ल १२ द्वादश्यां शुक्रौ विष्णवेन दाक्षिणात्यचित्पावनब्राह्मणेन इमं(दं) पुस्तकं लिखितं(तम्) । श्रीगुरवे परमात्मने नमो नमः । श्री राम [।।*]

विरह रूप बुद्धि विरहुली कही जाती है । वह केवल परमात्मा में नहीं है—आदि, मध्य या अन्त में भी नहीं । परमात्मा में न तो मूल प्रकृति(जड़)है, न महत्तत्त्व के पल्लव हैं और न विषय ही हैं । उसमें रात और दिन भी नहीं होते । वह देश, काल और वस्तु से रहित है । उसमें पवन, जल और अग्नि भी नहीं है ।

सनन्दन आदि ने कहा है कि 'मैं ब्रह्म ही हूँ' यह जानने का मार्ग अगाध है (आसान नहीं), किन्तु उन्होंने ब्रह्म-साक्षात्कार का वर्णन भी किया है । स्वयं मन ने इस बात का गहन विचार किया है । सूक्ष्म शरीर में सकाम बुद्धि होने पर विषय-की धारा बरसती है, जैसे वर्षाकाल में मेघ बरसते हैं । उस सकाम वासना में सात बीज बोये जाते हैं । वे हैं—चर्म, मांस, रुधिर, मेद, मज्जा, अस्थि और वसा । इन सप्त-धातुओं से शरीर की रचना होती है । अथवा सप्ताग्नि (?) से सृष्टि (की) उत्पत्ति होती है । [यह सब वासना से पुनर्जन्म का विवरण है] ।

अज्ञ जन की बुद्धि विरहिणी (के समान) है । ऐसा व्यक्ति प्रतिदिन विषयों में मग्न रहता है । विषय-धारा स्वयं उसे आकर्षित करती है और इस कारण उसकी बुद्धि विक्षिप्त हो जाती है । पाँचों इन्द्रियों (ज्ञानेन्द्रियों) के पाँच विषय हैं और अज्ञ जन की बुद्धि नए नए विषय की अभिलाषा करती है । आत्म स्वरूप से

---

१. यहाँ 'कार्मिक' का प्रयोग सम्भव है ।

२. ऊपर संख्या १३ देखिए ।

विरहिणी बुद्धि चंचल होती (ही) है। किन्तु तू विषयों में मग्न क्यों होता है ? वे सभी नाशवान हैं।

हे मुमुक्षो, वासना प्रफुल्लित होते ही विषय रूपी पुष्पों से विकसित होती है। (इस) संसार में भी व्यक्ति सुत, कलत्र आदि से प्रफुल्लित (प्रसन्न) होता है। प्रत्युत, भक्तजन परमहंस, ज्ञानी के 'सोऽहं' पद को श्रेष्ठ बतलाते हैं। हे मुमुक्षो, उस पद की वन्दना करो; तब तेरा भी वही स्वरूप होगा जिससे संसार का ताप नष्ट हो जायगा।

आत्माराम सन्त-जन अन्तःकरण के आलोड़न और सद्विचार तथा अभ्यास के द्वारा (स्वयं के भीतर विद्यमान) ब्रह्म-स्वरूप को जान लेते हैं। तिल में तेल और लकड़ी में आग रहती ही है। देह में रहने वाले ज्ञान के अस्तित्व का भान जिसे हो जाता है वही पण्डित है। विषयी जन को पाँच विषय रूपी फण वाला बड़ा साँप डसता है। विषय-विष को दूर करने वाला (विषहर) सद्‌गुरु और उपनिषद् (ही) है. जो मन्त्रोपदेश देता है। किन्तु मूर्ख उसे नहीं मानता। इसी कारण वह मुक्त नहीं होता। शिष्य का सन्ताप हरण करने वाला गुरु दुर्लभ ही है।

हे कर्ममार्गी, तूने विष की भाँति कर्म का बीज बोया है; इसका फल दुःख ही है। अशुभ का अशुभ और दुःखदायी होता है। अतः त्रिताप सहन करना पड़ता है। अब पश्चात्ताप करने पर भी वासना के कारण पुनर्जन्म निश्चित है। देह कनैर के वृक्ष के समान है और हाथ-पाँव उसकी शाखाएँ हैं। उनसे शुभाशुभ दानादान या गमनागमन जैसा करोगे, वैसा ही फल मिलेगा। कनैर की जड़ खाने वाले की मृत्यु होती ही है।

श्रीसद्‌गुरु स्वामी ने कहा है—हे बुद्धि, 'सत्य ज्ञानमनन्तं ब्रह्म इस अभ्यास को दृढ़ करो; इससे परमानन्द की प्राप्ति होगी। इसका फल विज्ञानानन्द का अनुभव, अर्थात् मोक्ष है। यह जानो कि तुम्हारा स्वरूप परमानन्द है। हे सद्‌बुद्धे, ज्ञानानन्द को प्राप्त करने वाले हो मोक्ष के अधिकारी होते हैं; अन्य नहीं।

(इसके अन्त में व्याख्याकार और लिपिकार के नाम, तिथि-सहित; परमात्मा को नमस्कार, आदि)।

—०—

॥ श्री ॥

अन्यासु लघुकृतिषु समाविष्टानां सूक्तीनां संस्कृतरूपान्तरम्

१. वसन्तः

ब्रह्मध्यानपरोऽभीक्ष्णं निर्विकल्पो निरामयः ।
वसन्तामोदसन्तुष्टो भवत्येवेति वर्ण्यते ॥१॥

(१)

जगद्ब्रह्मैवेति तथ्यं यो जानाति विचक्षणः ।
स हि द्वादशमासीनं वसन्त इस मोदते ॥१॥

अङ्गारवर्षे चण्डे वा वाति वा प्रलयानिले ।
ज्ञेयोऽसौ विरलैरेव भुङ्क्ते वासन्तिकं सुखम् ॥२॥

उत्पद्यतेऽखण्डवृत्तिः क्षीयतेऽस्य च विभ्रमः ।
प्रतिरोमाखण्डधारमानन्दश्चास्य वर्षति ॥३॥

चतुरशीतिलक्षाणि जीवानां बीजमेव तत् ।
न यद् द्रावयितुं शक्यं नापि शुष्येच्च वायुना ॥४॥

तस्मिन्नेवानन्दसुखे मग्नौ शिवपितामहौ ।
भ्रमद्भ्रमरवच्चेतो नियम्य सनकादयः ॥५॥

ब्रह्मानन्दविहीनस्तु वासनाग्रस्तमानसः ।
अभिमानविमूढान्तो भ्रमेद् भुवनदत्तधीः ॥६॥

अमृतफलं निःश्रेयः सद्गुरुकृपयैव लभ्यते नूनम् ।
यद्रसपाने मत्तः, साधो, जगतो विमुच्यते जीवः ॥७॥

(२)

पूर्णानन्दमयं ब्रह्म नित्यं चाव्ययमेव च ।
भिन्नोऽस्ति तज्जडाद्देहाच्चित्ताच्च मनसस्तथा ॥८॥

प्राणेभ्योऽप्यस्ति भिन्नं तत्सर्वैदैकरसं शिवम् ।
कल्याणरूपं चिन्मात्रं, लोकोऽयं जनितस्ततः ॥९॥

स्पन्दयन्प्राणिजातं तत् स्वात्मानुभवदर्शनम् ।
अनादिकारणं सृष्टेस्तस्या लयकरं तथा ॥१०॥

तत्संयमितचित्तानामेकत्वमनुपश्यताम् ।
न जन्ममरणं दुःखं न च व्याधिः शरीरजा ॥११॥

अवगम्याद्वैतं सम्यग् तद्वच्चिदात्मकं रूपम् ।
जीवः स्वस्थो भवतीत्येतच्छास्त्रैः पुरा समाख्यातम् ॥१२॥

(३)

मद्वाणीं य उपेक्षेत श्रुतिस्मृत्यनुसारिणीम् ।
शास्त्रज्ञो वेषधारी वा विषयासक्त एव सः ॥१३॥

उपदेशं पथ्यमिदमज्ञानाद् योऽवमन्यते ।
भवलुब्धं तमुद्धर्त्तुं न कोऽपि हि भवेत्क्षमः ॥१४॥

स्वच्छाकाशसमो रामो वस्तुतो हृदि संस्थितः ।
लोकप्रपञ्चमग्नस्तद्दर्शनं कर्तुमक्षमः ॥१५॥

जगत्स्पन्दनहेतुः स भिन्नोऽस्ति वपुषो जडात् ।
मृषार्थकं तयोरैक्यं प्रकाशतमसोर्यथा ॥१६॥

विद्यावन्तोऽज्ञा वा ये मन्यन्ते शरीरमात्मानम् ।
विषयाविलमनसस्ते भ्रमन्ति गवया इवाटवीप्रान्ते ॥१७॥

(४)

अज्ञातकालाल्लोकेऽस्मिन्नविद्या विलसत्यलम् ।
व्यतीतेष्वपि कल्पेषु तरुणीवाचरत्यसौ ॥१८॥

जितेन्द्रियानपि च सा करोति विषयोन्मुखान् ।
उद्दीप्य तेषां भोगेच्छां तथा देहाभिमानिताम् ॥१९॥

जगतीजालमालासु प्रलोभ्य विविधास्वपि ।
अहम्भावोपदेशेन पातयत्यन्धचेतसः ॥२०॥

नानाविधोल्लासवतीमविद्यां दोषमूर्च्छिताम् ।
स्वविवेकप्रयत्नैस्त्वं त्यक्त्वा भव निरामयः ॥२१॥

नानाविकल्पपूर्णामुत्सार्यैनां त्रिलोककटुवल्लीम् ।
स्वात्मारामो भूत्वा परमां भूमिं लभस्व निजयत्नैः ॥२२॥

(५)

आद्यस्वरूपं मायाया अव्याकृतमिति स्मृतम् ।
न च केनापि सम्बद्धा सा शुद्धेत्यभिधीयते ॥२३॥

सा शुद्धसत्त्वसम्बद्धा शक्तिपर्यायवाचिनी ।
जगत्यर्णवरूपे च योगनिद्रेति गीयते ॥२४॥

विविधैर्नामधेयैस्तु जाग्रत्स्वप्नसुषुप्तिषु ।
सर्वदेवानुमत्या सा हरयेऽभूत्समर्पिता ॥२५॥

समष्टिव्यष्टिरूपेण व्याख्याता सा महर्षिभिः ।
अविद्या च तथा माया सदसद्विवृतेः परा ॥२६॥

तुर्यावस्थां प्रविष्टस्य हरेः सा ब्रह्मरूपिणी ।
त्रिजगन्मोहिनी माया श्रेष्ठरूपा भवेत्पुनः ॥२७॥

एवं सैव हि माया विविधं कृत्वा प्रपञ्चविस्तारम् ।
उत्पादनपोषणलयहेतुर्जगतो निरूप्यते शास्त्रैः ॥२८॥

(६)

अस्याः पिशाच्या विलयं विधातुं यः समुत्सुकः ।
ब्रह्मैवाहमिति ध्यानं कार्यं तेन हि सन्ततम् ॥२९॥

त्रैगुण्यविषयाऽविद्या वासनैव तु बन्धनम् ।
तस्याः त्रिषष्टिसूत्राभैर्दिवसैः क्षीयते वयः ॥३०॥

देहाभिमानी जीवश्च जरायां क्लिश्यते भृशम् ।
सङ्कल्पैश्च विकल्पैश्च मनस्तस्य च मुह्यति ॥३१॥

द्विसप्ततिसहस्राणां नाडीनां बन्धनैर्वृतः ।
तथापि तन्तुवायीव सुखासीनः स दृश्यते ॥३२॥

पञ्चभूतमयो देहः कर्मोद्युक्तः सदैव हि ।
कर्मबुद्धीन्द्रियाण्यस्य विषयेभ्यश्च धावति ॥३३॥

एवंविधे शरीरे विहाय दर्पं कुवासनामूलम् ।
सम्यङ्नियुक्तचेता हरिचरणेषु प्रवर्तते ज्ञानी ॥३४॥

(७)

आनन्दमय ईशोऽसौ हृद्येव ननु संस्थितः ।
न तु स्वर्गे न वैकुण्ठे यथा कश्चिद्धि मन्यते ॥३५॥

आविश्यासौ स्थूलदेहे भोगाँस्तेनैव भुञ्जते ।
तेनैव सकलं कर्म करोति च शुभाशुभम् ॥३६॥

दैवादुच्चकुले जन्म यदि तेन च लभ्यते ।
स्वर्गसौख्याभिलाषश्च तं कुर्याद्यज्ञभावितम् ॥३७॥

एवं सकामकर्माणि कुर्वन्स हि निरन्तरम् ।
वासनावलितो भूत्वा जगत्यावर्त्तते पुनः ॥३८॥

आप्त्वा मानुषवपुषं हरिरूपं स्वं यदा स जानीयात् ।
ब्रह्माद्वय-प्रमोदौषधिना तदा गतज्वरो भवति ॥३९॥

(८)

देहे प्रविष्टं जीवांशं परितः सुप्तवासना
आवृणोति, ततः सोऽपि यतते निजमुक्तये ॥४०॥

अस्मिन्प्रवर्त्तिते द्वन्द्वे परस्परजिगीषया ।
वासना जयमाप्नोति भूरिविभ्रमकारिणी ॥४१॥

मोहयन्ती जगज्जीवानक्षाणां सेनयाऽऽवृता ।
देहाभिमानगर्त्ते च ततो जीवं क्षिपत्यसौ ॥४२॥

हताशोऽसौ ततो भूत्वा मतवादे च मोहितः ।
हृदिस्थं परमात्मानं दूरस्थं मन्यते ध्रुवम् ॥४३॥

अभेदमेवं विस्मृत्य जीवात्मपरमात्मनोः ।
सुसमाहितचित्तानामुपहास्यो भवत्यसौ ॥४४॥

एवं विचार्य सम्यग्स्वात्मारामाः भवन्ति धीमन्तः ।
अन्तर्ध्याननिमग्नाः परमां सिद्धिं ततो लभन्ते ते ॥४५॥

(९)

दुर्लभो मानुषो देहो तडिदुन्मेषवच्चलः ।
रामनामजपेनातः कुरु लक्ष्यस्य वेधनम् ॥४६॥

नपतिः शास्त्रकारो वा मनीष्यथ मुनिस्तथा ।
नश्यन्ति देहाः सर्वेषां नियमः प्रकृतेरयम् ॥४७॥

यथा दानी बलिस्तद्वत्कंसदुर्योधनौ पृथुः ।
हनुमान्कश्यपो बाली जनकश्चाथ तत्त्वविद् ॥४८॥

गोपीचन्द्रप्रभृतयो ये चासन् पृथिवीतले ।
केचित्कुकर्मणान्ये च सत्कार्येणात्र विश्रुताः ॥४९॥

एषु कस्यापि देहस्य न किञ्चिदवशिष्यते ।
तस्मात्त्वं योगयुक्तात्मा कुर्वात्मारामचिन्तनम् ॥५०॥

कथावशेषाः सर्वेप्येतेऽधुना तु सन्ति विज्ञाताः ।
एवं नश्वरमेतद्वपुषं ज्ञात्वा भजस्व साधो हृदि स्थितं रामम् ॥५१॥

(१०)

स्वे स्वे कार्ये जगत्यत्र व्यस्ताः सर्वेऽपि मानवाः ।
तैरर्जितं त्वनुभवं नित्यं हरति वासना ॥५२॥

योगिनः पण्डिताश्चापि राजानो मुनयस्तथा ।
मीमांसका न्यायविदः सर्वे कार्यपरायणाः ॥५३॥

अन्ये नरास्त्वविद्याया व्यापारेणाकुलीकृताः ।
रागद्वेषमदाध्माता दृश्यन्तेऽत्र महीतले ॥५४॥

धन्यस्तु हनुमान् शूरः शुकाक्रूरोद्धवास्तथा ।
यैर्भक्तिप्रेरितस्वान्तैरीश्वरः समुपास्यते ॥५५॥

हरिरेवेदमखिलमस्त्यहं च तथा हरिः ।
इति भावयतः स्वान्तेऽनुरक्तिः स्फुटति स्वयम् ॥५६॥

यथादौ च शिवः साक्षान्नामदेवस्तथा कलौ ।
जयदेवस्तथाऽभूवन् रामप्रहितमानसाः ॥५७॥

चित्तैकाग्र्यविभीषणयोगं कृत्वा शरीरसञ्जातम् ।
रावणरूपं दर्पं मारय रामप्रपत्तिमार्गेण ॥५८॥

(११)

तस्माच्छृणुत मे वाक्यं भो भोः शास्त्रविशारदाः ।
पश्यथात्मानमन्तःस्थं योगग्राह्यमतीन्द्रियम् ॥५९॥

'समं कायशिरोग्रीवम्' इति गीतोक्तबोधनम् ।
अनुसृत्य ध्यानशीलो योगी सिद्धिमवाप्नुयात् ॥६०॥

अभ्यासेनाष्टपद्मानि साधिष्ठानानि साधकः ।
नीत्वोर्ध्वमुखतां ब्रह्मैवाहमित्यभिचिन्तयेत् ॥६१॥

तदा छिद्रेषु नवसु रकारध्वनिरुद्भवेत् ।
आत्मानन्दपरामर्शादक्षवर्गोऽपि शाम्यति ॥६२॥

तदा नाभिसमुद्भूते घोषे चित्तं नियोजयेत् ।
द्विसप्ततिसहस्राणां नाडीनां प्रभवो हि सः ॥६३॥

मायारचिते लोके मा भव मुग्धो विचारशील, त्वम् ।
सगुणोपासकभक्तः परतो वैकुण्ठवाससन्तुष्टः ॥६४॥

ज्ञानी स्वानुभवेनैवं रागद्वेषविवर्जितः ।
अहम्भावोपशमनान्निर्मले हृदि खेलति ॥६५॥

मायाऽविद्याविमुक्तोऽसौ देहेऽपि विगतस्पृहः ।
समदर्शी वीतशोको निगृहीतमनास्तथा ॥६६॥

सदा विवेकसम्पन्नश्चिदात्मानं च भावयन् ।
आत्मध्यानेन लभते परमात्मनि निर्वृतिम् ॥६७॥

अज्ञानी तु जगज्जाले भ्रमत्येव मुहुर्मुहुः ।
अविद्याग्रसितश्चासौ मज्जत्येव भवार्णवे ॥६८॥

ये तीर्थव्रतदानकर्मनिरताः स्वात्मावबोधं विना
तेषामाशयशुद्धिरेव न पुनर्निर्वाणलाभो भवेत् ।
योग्यायोग्यविचारपूर्वकमिदं लाभप्रदं जायते
दृष्टान्तोऽत्र हि पाण्डवक्षितिभुजां तीर्थाटनं निर्मलम् ॥

॥ इति वसन्तः ॥

२. चर्चरी-१

(१)

सन्दिश्येन्द्रियशास्तारं विषयप्रवणं मनः ।
त्रिजगन्मोहिनीमायावृत्तमत्र निरूप्यते ॥

(१)

माययाधिष्ठितं सर्वं भुवनं सचराचरम् ।
अस्याः प्रपञ्चसौन्दर्येऽज्ञजनः परिमुह्यति ॥१॥

असत्येवेति वेत्तात्र धीरस्तु न विचाल्यते।
न कोऽपि प्रभवेद्वक्तुमस्या रूपमथाद्भुतम् ॥२॥

ललनास्तत्प्रातिनिध्यं कुर्वन्ति मृगलोचनाः।
विविधाभिनयैर्मन्दान् मोहयन्त्यः स्वकांक्षितान् ॥३॥

(२)

जितेन्द्रियः शास्त्रवेत्ता जातु ब्रह्मरतोऽपि च।
अस्याः कुञ्जरगामिन्यः प्रसरान्न बहिःसृतः ॥४॥

मर्कटास्यं चकारैषा नारदं ब्रह्मवित्तमम्।
सान्यांश्च वशमानीय स्मितेन परिवृप्यति ॥५॥

शङ्करो मोहिनीरूपे तथा च सनकादयः।
आत्मभूश्च स्वदुहितुः सौन्दर्ये वञ्चितास्तया ॥६॥

(३)

आकृष्य व्यपदेशैः स्वैश्चेतांसि ज्ञानिनामपि।
अधिक्षिपति तान्येव माया स्वबलगर्विता ॥७॥

आकारोऽस्यास्ति निःसीमो यथा शास्त्रेषु वर्ण्यते।
तेष्वेवापि तु शास्त्रेषु वितर्काः सन्त्यनेकशः ॥८॥

आत्मतुष्टस्तत्त्वदर्शी मायया न विचाल्यते।
मूढस्त्वस्या वागुरायां विशत्येव च सत्वरम् ॥९॥

(४)

जीवन्मुक्तस्तु मायायाश्छद्मभिर्नं हि मुह्यति।
अस्या विविधरूपस्याभिज्ञोऽसौ वर्तते यतः ॥१०॥

सुरा नराश्च मुनयो गोरक्षः सनकादिकाः।
योगयुक्ताः साधवोऽस्याः क्रीडां जानन्ति तत्त्वतः ॥११॥

अवगम्यैतदखिलं रतो यस्तु कुटुम्बिषु।
पोषयन् पुत्रदारादीन् विकलः स हि मूढधीः ॥१२॥

(५)

जनानाक्रम्य मायैवं कटाक्षैस्तान् निरीक्षते।
शास्त्रवादरतैस्त्वस्यास्त्रिगुणत्वमुदाहृतम् ॥१३॥

देवेष्वपि प्रभावोऽस्याः किमुत प्राकृते जने।
विशिष्टाद्वैतवादे तु मायाभासो बहिष्कृतः ॥१४॥

न तत्र माया नाविद्या, यतः सा वितथैव हि।
भ्रमात्तथापि मायाया अस्तित्वं ख्यापयन्ति ये ॥१५॥

त एवास्याः प्रपञ्चेषु पतन्त्यज्ञानिनो जनाः।
तैरेव भावरूपासौ स्वमते परिगीयते ॥१६॥

(६)

ज्ञानावरणमज्ञानं येषां चेतसि वर्तते।
त एव सुतदारादीन् पुष्णन्ति स्नेहभाविताः ॥१७॥

येऽथाज्ञाने न मज्जन्ति ये च लोभविवर्जिताः।
आत्मन्येकाग्रचित्तास्ते मुच्यन्ते भवबन्धनात् ॥१८॥

पुनश्च—

एकाग्रचित्तश्च यदात्मनिष्ठो,
जीवस्तदा ब्रह्मविदुच्यतेऽसौ।
निरुध्य चेतोऽचलदीपतुल्यो,
भवेदसौ ब्रह्मविदां वरीयान् ॥१९॥

निस्तैलदीपेन समो मुमुक्षु—
र्ध्यानादिचिन्तारहितो यदास्ते।
समाधिलीनः स तदाऽविकल्पो
नूनं भवेद् ब्रह्मविदां वरिष्ठः ॥२०॥

चर्चरी-२

(१)

हित्वाज्ञतामतः प्राज्ञः शोकसन्तापकारिणीम्।
वासनां भस्मसात्कृत्वा स्वरूपं वेत्तुमर्हति ॥२१॥

विना कुड्यं यथा चित्रं निर्मातुं न हि शक्यते।
इष्टिकाणां च निर्माणे मृत्तिकावश्यकी यथा ॥२२॥

अवगच्छ तथात्मानं जगतो मूलकारणम्।
दृष्ट्वात्मन्यात्मनात्मानं त्यक्त्वा च निजचापलम् ॥२३॥

निजं विविच्य चिद्रूपं तदेकप्रणतो भव।
द्वैताभावे तदाऽद्वैतं चिद्रूपमवशिष्यते ।।२४।।

(२)

चित्रवच्च जगत्सर्वमीश्वरेणैव निर्मितम्।
न विश्वसन्ति तथ्येऽस्मिन् नूनमज्ञानगर्विताः ।।२५।।

ज्ञात्वैतत्स्वविवेकेन, स्वदेहे वैभवे तथा।
वृथा-गर्वं त्वमुत्सृज्य प्रज्ञामान्द्यं विनाशय ।।२६।।

तथैवाज्ञानसम्भूतं कलत्रसुतबन्धुषु।
मोहबन्धं परित्यज्य चिन्मयं भव भो मनः ।।२७।।

(३)

व्याधप्रपञ्चरचिते खाते कामेन मोहितः।
कृत्रिमाकरिणीगात्रे भ्रमात्पतति कुञ्जरः ।।२८।।

ततः परवशो भूत्वा सहतेऽङ्कुशयातनाम्।
यथा वा खाद्यलोभातं कपिं वानरपालकः ।।२९।।

वशमानीय सर्वत्र नर्तयत्याधिपीडितम्।
एवं कामश्च लोभश्च भवतोऽन्ते दुरन्तकौ ।।३०।।

एतत् ज्ञात्वा, मन्दबुद्धे, भो मनः स्वविचारतः।
प्रसारितभुजाभ्यां त्वं प्रत्युद्गच्छ तमीश्वरम् ।।३१।।

(४)

द्वारे द्वारे नृत्यकारी यथा परवशः कपिः।
स्वस्य मोक्षस्य विषये नैव जानाति किञ्चन ।।३२।।

तद्वदेव हि पश्यामि मूढस्य मनसः स्थितिम्।
वर्णाश्रमाभिमानेन केचिद् दृप्ताः कुबुद्धयः ।।३३।।

अन्ये तु वासनाविद्धास्तथान्ये विषयाविलाः।
उत्पत्स्यन्ते सर्व इमे पशुपक्ष्यादियोनिषु ।।३४।।

अज्ञानेतरनाम्न्यत्र वासनैव हि कारणम्।
विवेकेन विचार्यैतवात्मनि स्थातुमर्हसि ।।३५।।

(५)

स्वच्छन्दं सञ्चरन् भृङ्गो यथाब्जे विनिबध्यते।
देहे तथैव जीवोऽपि बध्यतेऽज्ञानभावतः ॥३६॥

स एवाविद्ययानेकजन्मतावशतां गतः।
पुनः पुनश्च सहते योनियन्त्रप्रपीडनम् ॥३७॥

अधीतवेदवेदाङ्गैर्व्याख्याने चतुरैरपि ।
अन्तःशुद्धिं विना जातु संसिद्धिर्नैव लभ्यते ॥३८॥

एवं भ्रान्तान् बुद्धिहीनानात्मज्ञानविवर्जितान्।
वैवस्वतो ग्रसत्याशु मार्जारो मूषकं यथा ॥३९॥

(६)

स्वयमात्मज्ञानहीनाः सभाव्याख्यानकोविदाः।
प्रभवन्ति न सन्धातुं श्रोतॄणां ज्ञानसम्पदः ॥४०॥

तथैवात्मज्ञाननदीतीर्थं संसृतिमोचनम्।
अवगाह्यैव संसारसन्तापात् शान्तिराप्यते ॥४१॥

तद्वदेव च हृद्देशे व्याप्तः स परमेश्वरः।
पूजनीयः सदा भक्त्या सत्यदेवः स एव हि ॥४२॥

अविवेकेन किं तीर्थैः किञ्च पाषाणपूजनैः।
विवेकेन वयं तस्माच्चिदात्मानमुपास्महे ॥४३॥

(७)

भो भो मनस्त्वमधुनैव विधूय जाड्यं,
जानीहि लोकजलधिं भ्रमनक्रपूर्णम्।
तीर्त्वैनमाशु यदि वाञ्छसि निर्वृतिं त्वं,
रामस्य भक्तिरचला सुभगास्ति नौका ॥४४॥

मरीचिकेव भ्रमजालमेतद्,
बध्नाति जीवान् विषयप्रमुग्धान्।
संत्यज्य तस्माच्च विकल्पजालं,
मनः प्रसादो हि सुखस्य मूलम् ॥४५॥

॥ इति चचँरी ॥

३. हिन्दोलनम्

प्राणिनां कान्दिशीकानां भ्रमतां लोकदोलने।
भक्तिमार्गोऽगदो नित्यस्थायीत्यत्र निगद्यते॥

(१)

रोदसीपृथुलाभोगे मायातिमिरसङ्कुले।
विष्वग्भ्रमः प्ररूढोऽस्ति दोलेत्यपरनामकः॥१॥

लोभगर्त्तकृताधारे मोहशृङ्गविशोभिते।
प्रसारिते पापपुण्यस्तम्भद्वितयमन्तरा॥२॥

तृष्णारज्जुनिबद्धेऽस्मिन् मायादोले सुविस्तृते।
कर्ममय्यां पट्टिकायामासीनानज्ञचेतसः॥३॥

शुभाशुभौ वेणुदण्डावादधानान् स्वमुष्टिना।
भ्रामयत्यखिलान् लोके चेतनान् परमेश्वरः॥४॥

काचिता अत्र गन्धर्वकिन्नराः सुरपन्नगाः।
नारदः शारदा चापि व्यासः शेषश्च सर्पराट्॥५॥

सुरज्येष्ठो महेशश्च रविचन्द्रमसौ तथा।
निर्गुणं ब्रह्म सगुणः कृष्णोऽपि प्रेङ्खति स्वयम्॥६॥

वेदशास्त्रपुराणेषु यदुक्तं मुनिसत्तमैः।
तत्तत्त्वान्वेषणोद्युक्ताः प्रेङ्खयन्त्येव सूरयः॥७॥

अस्यां त्रिलोक्यां नैकोऽपि स्थिरतामवलम्बते।
चित्स्वरूपानवज्ञानं तेषां च भ्रमकारणम्॥८॥

निर्वर्ण्य पीडामथ भारभूतां प्रेङ्खाभ्रमाद्वाञ्छसि चेत् स्वमुक्तिम्।
सत्सङ्गशास्त्राध्ययनाद्युपायैर्निरूपितं मार्गमनुव्रज त्वम्॥९॥

(२)

अस्मिन् मायामये दोले रागद्वेषैषणाकुलाः।
नरतिर्यक्चतुष्पादपतङ्गमशकादयः॥१०॥

सर्वं एव भ्रमन्त्यज्ञा ज्ञानिनश्च यथेच्छया।
केचिद्भोगरसापूर्णा अन्ये दुःखघुणक्षताः॥११॥

पुत्रमित्रकलत्रेषु विसरन्ममतावृताः।
एतन्मृषेति विज्ञाय नैवास्थात्र तु धीमताम्॥१२॥

अस्माद्विषण्णचेता यदुपतिमुपसृत्य याचते दीनः।
हे गोपाल, द्राङ् मामुत्तारय भवप्रेङ्खणादस्मात् ॥१३॥

(३)

प्राणिभिश्चान्यदोलोऽत्र रचितोऽथ भुवि स्वयम्।
लोभमोहस्तम्भयुग्ममन्तरा कर्मसङ्कुलः ॥१४॥

भ्रमन्तोऽविरतं तस्मिन् दोले संसारिणो जनाः।
नाप्नुवन्त्यपरं पारं न चापि स्थिरमाश्रयम् ॥१५॥

यथा षट्शास्त्रवेत्तारो विवदन्तः परस्परम्।
नृपाः प्रजाहितरताः कार्ये स्वे च मानवाः ॥१६॥

अपि सूर्याचन्द्रमसौ भूवारिव्योमवायवः।
एते सर्वेऽपि दृश्यन्ते तस्मिन्प्रेङ्खितचेतसः ॥१७॥

देहस्पन्देन भूभारहरणार्थं मुहुर्मुहुः।
धर्मसंस्थापनार्थं च क्रीडत्यत्र हरिः स्वयम् ॥१८॥

उदयति तरणिर्मरुच्च वाति,
ज्वलति कृशानुरथेन्द्रधर्मराजौ।
निजनियमरतौ यतश्च भीतौ,
स तु परिपश्यति साक्षिवच्च सर्वम् ॥१९॥

कल्पावधिर्व्यतीतोऽत्र भ्रमतां चैव दोलने।
यावत्कालमहाव्यालस्तान् गिरत्यात्मवञ्चकान् ॥२०॥

॥ इति हिन्दोलनम् ॥

४. वल्ली

जगन्मयो जगत्स्पन्दकारणं राम ईश्वरः।
हृद्येव विहितावासो ध्यातव्य इह बोध्यते ॥

१ (अ)

विवेकमिह जीवानां मुष्णात्यज्ञानतस्करः।
तस्माद् हृदि कृतावासं प्रभुं वेत्तुं न ते क्षमाः ॥१॥

शुद्धान्तःकरणे, साधो नित्यं रामो विराजते।
स एवैतज्जगत्स्वीयमहिम्ना व्याप्य तिष्ठति ॥२॥

तस्मादवेहि भुवनं त्वं च राममयं तथा ।
स एव रामः सर्वत्र स्पन्दतेऽत्र चराचरे ॥३॥

अविरलसंयमनिरता ये ये मुनयस्त एव जागरिताः ।
देहाभिमानलिप्ता ये च नरास्तानवेहि निद्राणान् ॥४॥

आत्मविचारः शक्यो नरतनुमात्रे न चान्यदेहेषु ।
वर्णाश्रमाभिमानं विधूय तस्माद्विचिन्तयात्मानम् ॥५॥

१ (ब)

जीर्णेऽस्मिन् दग्धसंसारे कुतोऽप्युपरिपातिनः ।
कृतान्तस्य भिया चित्तं मथितं तव चेत्, शृणु ॥६॥

चलत्पत्रसमे देहे प्रविहायात्मभावनाम् ।
विषयासङ्गमुन्मुच्य त्वमात्मप्रणतो भव ॥७॥

यथा हि दध्नो मथनात् घृतं शुद्धमवाप्यते ।
तथान्तःकरणोन्माथात् रामं त्वं द्रष्टुमर्हसि ॥८॥

विषयावेशितमनसः करणैः सह ते शरीरमपि जीर्णम् ।
जाने न हि कस्यां वा योनौ भविता पुनश्च ते जन्म ॥९॥

श्लथमोहोऽस्मिन् देहे त्वं रामं प्रति समर्पितः सुतराम् ।
सदसद्विवेकपूर्णस्यैतद् ऽयनं सुखाय ते भूयात् ॥१०॥

(२)

या या ज्ञानगिरः प्रोक्ताः श्रुतिस्मृतिसमुच्चये ।
तथा भागवते, ताभिर्गुरुणाऽसि प्रबोधितः ॥११॥

तास्ताः सर्वास्त्वमुज्झित्य दुर्मोहमिहिकावृतः ।
पुत्रमित्रकलत्रादिष्वनुरक्तोऽभवः कथम् ? ॥१२॥

साधो, भवार्णवे मत्स्यजीविभिर्लोभवेष्टितैः ।
बडिशेनेव विद्धस्त्वं मीनवत् परिकम्पसे ॥१३॥

एतद्गोमयभारं दूरं क्षिप्त्वा भव प्रबुद्धस्त्वम् ।
ध्यातव्यस्तव रामो दुस्तरभुवनोदधौ महापोतः ॥१४॥

बुद्ध्याप्यगम्यमेनं पूरितविश्वं प्रभुं चिदात्मानम् ।
जाग्रद्ज्ञानविवेकः परिपश्य त्वं हृदन्तरे रामम् ॥१५॥

॥ इति वल्ली ॥

५. विरहुली

विरहार्त्तस्य जीवस्य पुनः सन्धानकांक्षिणः।
आलम्बनमिहामुत्र भक्तिरित्यत्र वर्ण्यते॥

(१)

सत्यं तथा ज्ञानमयं पदं यद्वेदैश्च शास्त्रैश्च निरुक्तपूर्वम्।
गतिर्न तत्रास्ति पृथग्जनानां, सम्प्राप्यते तत्कठिनैः प्रयत्नैः॥१॥

न मूलमस्यास्ति न चावसानं, न चादिरन्तो न च मध्य एव।
अदर्शनीयाङ्कुरपल्लवोऽसौ वृक्षो जगद्व्यापितयाऽद्वितीयः॥२॥

कथितमेव पुरा परमेष्ठिना तदनु च प्रवरैः सनकादिभिः।
यदतिदुर्गममार्गनिषेवणात् पदमिदं परमं समवाप्यते॥३॥

(२)

सूक्ष्मे शरीरेऽथ सकामबुद्धेर्यस्मिन्निमेषे भवति प्रवेशः।
दुर्वासनायाश्च तदाङ्कुराणि स्फुटन्ति बीजस्य यथाभ्रकाले॥४॥

तैरङ्कुरैरेव च सप्तधातुमयं भवेच्चेतनवर्ष्मपिण्डम्।
ततः प्रलम्बे समये व्यतीते नैव स्मरेद्देहभृदात्मरूपम्॥५॥

सुतकलत्रधनादिषु वासनातलिरनन्तरमेव च वर्द्धते।
भवति जन्म ततो मरणं पुनर्भ्रमवशाद्विपदं सहते नरः॥६॥

(३)

नवैर्नवैरिन्द्रियभोग्यवर्गैस्ततः स आकृष्यत एव लोके।
अज्ञस्य बुद्धिर्विषयप्रणाल्या तं प्रक्षिपत्येव भवाब्धिपङ्के॥७॥

तृष्णालतायां विषयप्रसूनेष्वापातरम्येषु तदा च लुब्धः।
विस्मृत्य रामं सुतमित्रदाराधनादिषु भ्राम्यति तस्य चित्तम्॥८॥

परम एव पदे सततं रता मतिविवेकयुताः परमार्थिनः।
प्रणम तच्चरणाब्जयुगे सखे, स हि नयत्यचलं परमास्पदम्॥९॥

(४)

तिलेषु तैलं, समिधौ यथाग्निर्ज्ञानं तथा गाहत एव देहम्।
समाधियोगाद् हृदयप्रसूने जितेन्द्रियाणामनुभूतिरेषा॥१०॥

करोति या स्वामनुभूतिमेनां द्रागेव सोऽपास्यति देहपाशम्।
दशत्यशिष्टं विषयप्रसक्तं महाविषः पञ्चफणस्तु भोगी॥११॥

न हि गुरुं न च शास्त्रवचोऽपि यः समनुतिष्ठति पापविसंष्ठुलः ।
दुरभिमानवशात् स तु मूढधीर्न हि कदापि भवात् परिमुच्यते ।।१२।।

(५)

यतस्त्वयोप्तं भुवि कर्मबीजं,
फलं तु कमव हि भाव्यमस्य ।
तस्मात्पुनर्जन्म पुनश्च कर्मा—
ण्यावृत्तिमार्गे पतितो भवेथाः ।।१३।।

ततोऽनिवार्यस्त्रिविधोऽपि तापो,
दुर्वासनासक्तमना यतस्त्वम् ।
विषद्रुमः कर्म हि कर्णिकारो—
पमोऽथ हेतुर्भविताऽपमृत्योः ।।१४।।

तस्मादात्मरतः शुभेन मनसा कृत्वा प्रयत्नं दृढं,
सत्यं ज्ञानमनन्तमव्ययमजं बुध्यस्व रूपं निजम् ।
तस्माद् ब्रह्ममयत्वमाप्नुहि फलं, साधो, सुधासम्मतं,
सम्प्राप्याभिमतं च किञ्चिदिह ते कार्यं धरित्रीतले ।।१५।।

।। इति बिरहुली समाप्ता ।।

परिशिष्ट १

वृत्त-विचार

इस भाग में जितनी साखियों का समुद्धरण किया गया है उन सभी में केवल छः बिरले उदाहरणों को छोड़कर[1] दोहा छन्द का उपयोग किया गया है, यद्यपि छन्द-शास्त्र की दृष्टि से इन दोहों का रूप अनेक स्थलों पर विकृत और अव्यवस्थित हो गया है। तथापि उनमें दोहों की सामान्य विशेषताएँ उपलब्ध होती हैं।

सन्त कबीर भक्ति-सम्प्रदाय के आदि-प्रवर्त्तक और हिन्दी-साहित्य के आदि-कवि माने जाते हैं, अतः उनके द्वारा प्रयुक्त किए इस छन्द के विषय में कतिपय विचार यहाँ प्रस्तुत किए जाते हैं।

कुछ विशेषज्ञ इस छन्द की उत्पत्ति संस्कृत के 'दोधक' वृत्त से मानते हैं, किन्तु 'दोधक' वर्णिक वृत्त है और 'दोहा' मात्रिक अर्धसम छन्द है। इन दोनों नामों के अक्षरों में भी पूर्ण साम्य का अभाव ही है। सम्भव है कि कुछ अक्षर कम करने पर और वर्णिक का मात्रिक करने पर दोधक का ही विकृत रूप दोहा बन गया हो, यद्यपि निश्चित रूप से इस सम्बन्ध में कुछ भी कहना असम्भव ही है। 'प्राकृत पैंगल' की टीका में इस छन्द को 'द्विपदी' बतलाया है।

इस छन्द का सर्वप्रथम प्रयोग अपभ्रंश भाषा की कविता में उपलब्ध होता है। हेमचन्द्र के प्राकृत-व्याकरण में इसके अनेक उदाहरण पाये जाते हैं। जैन और बौद्ध साहित्य में भी इस छन्द का प्रचुर उपयोग, विशेषकर शृङ्गार और रहस्य-वाद की कविता में किया जाता था, जिसका समय ईसा की पाँचवी-छठी सदी से प्रारम्भ हुआ। पुरातन-प्रबन्ध-संग्रह के प्रबन्धों और प्रबन्धचिन्तामणि में भी इसके उदाहरण आए हैं।

यह मुक्तक छन्द है, और प्राकृत-साहित्य में जो स्थान 'गाथा' का है, उपयोग की दृष्टि से वही स्थान हिन्दी-साहित्य में 'दोहा' का है। संगीत में यह सङ्कीर्ण राग का एक भेद माना गया है। सम्भव है कि मध्यकाल के सन्त अपने मत के प्रचार के हेतु इसका उपयोग करते रहते थे।

कबीर ने अपनी दो साखियों में 'दोहरा' शब्द का उपयोग किया है (साखी-संख्या ५२ और ६४); किन्तु इन दोनों स्थलों पर इसका अर्थ 'स्वानन्द, परिपूर्ण या परमात्मा' है। वहाँ इस छन्द से कोई तात्पर्य नहीं है। गोरख-पन्थियों की कविता में इस छन्द का उपयोग हुआ है, और यह मत मान्य होना सम्भव है कि गोरख-पन्थियों से प्रभावित होकर कबीर ने भी इस छन्द को अपनाया और बाद के साहित्य में 'दोहा' शब्द साखी के ही अर्थ में प्रचलित हो गया।[2]

---

१. साखी-संख्या ७३, १२५, २२५, २३८-३९, २७५।

२. देखिए—हिन्दी-साहित्य-कोश, ज्ञानमण्डल, वाराणसी, पृ० ३४३।

परिशिष्ट २

सप्तपदा ज्ञानभूमि

सप्तपदा ज्ञानभूमि, जिसे 'योग-भूमिका' भी कहा जाता है, योग-शास्त्र की सुविख्यात प्रक्रिया है। इसी शास्त्र में प्रतिपादित यम-नियमासन आदि की अष्ट-भूमिका इससे निकृष्ट श्रेणी की है। कबीर-कृति के व्याख्याकार स्वामी बोधानन्द ने चर्चरी' की व्याख्या में सप्तपदा ज्ञानभूमि की चर्चा की है, जिसमें इसे मोक्ष का साधन मानकर बतलाया है कि यही अन्त में मोक्ष में परिणत हो जाती है। इस ज्ञानभूमि का विवरण हमारे अन्य शास्त्रों में भी पाया जाता है; इन सब में 'योगवासिष्ठ' में दिया हुआ विवरण विस्तृत है; अतः उसी के अनुसार इन भूमिकाओं के नाम और उनमें से प्रत्येक का संक्षिप्त लक्षण देना उचित प्रतीत होता है। वह इस प्रकार है—

भूमिका का नाम	संक्षिप्त विवरण
१. शुभेच्छा	···विवेक जागृति; संसार से उद्विग्न होकर भोग की अनपेक्षा; भोग में अनास्था; आत्म-साक्षात्कार की उत्कट इच्छा का प्रादुर्भाव।
२. विचारणा	···स्वार्थ-त्याग; शास्त्र और सज्जनों के सम्पर्क से सदाचार में प्रवृत्ति।
३. तनुमानसा (असंसर्ग)	···विषय-भोग में पूर्ण अनासक्ति (सविकल्पक समाधि); साधु-संग; शास्त्राभ्यास; सन्तोष; सत्कर्म।
४. सत्त्वापत्ति	···अज्ञान-क्षय; संसार में असंसर्ग; समभाव; इन्द्रिय-भोग में आत्यन्तिक विरक्ति; सर्वाधिष्ठान सत्यात्मा में स्थिति; द्वैत-भावना की निवृत्ति।
५. असंसक्ति	···अविद्या-नाश; उसके कार्यों में संसक्ति का अभाव; केवल अद्वैत में चित्त; अन्तर्मुखी प्रवृत्ति; वासना का पूर्णतः त्याग।
६. पदार्थों की अभावना	पदार्थों (वस्तुओं) की पूर्ण विस्मृति; पाँचवीं भूमिका का परिपाक; किसी अन्य व्यक्ति द्वारा संकेत होने पर ही आभ्यन्तर और बाह्य वस्तुओं की भावना का प्रादुर्भाव; पूर्णतया अन्तर्मुख भावना।
७. तुर्यगा (शिव या ब्रह्मस्वरूप)	···छठी भूमिका का पूर्ण परिपाक; पदार्थों के भेद-ज्ञान का सर्वथा अभाव; स्वभावैकनिष्ठत्व; जीवन्मुक्तावस्था; निर्विकल्प; विदेह-मुक्ति। मतान्तर के अनुसार विदेह-मुक्ति तुर्यावस्था के अनन्तर होती है। बोधानन्द ने अपनी व्याख्या में भूमिका ५ और ६ में क्रम-व्यत्यय बतलाया है (देखिए चर्चरी १-२ की व्याख्या)। इन्हीं भूमिकाओं के निरन्तर अभ्यास से साधक की मानसिक स्वस्थ स्थिति सतत बढ़ती रहती है और वह क्रमशः 'ब्रह्मविद्',

'ब्रह्मविद्वरीयान्' और 'ब्रह्म विद्वरिष्ठ' की श्रेणी में पहुँच जाता है। चतुर्थ भूमिका में पहुंचने पर साधक 'ब्रह्मविद्' बनता है। इसी भूमिका के अन्त तथा पंचम भूमिका के प्रारम्भ में वह 'ब्रह्मविद्वरीयान्' हो जाता है, यद्यपि अन्य मत के अनुसार उसकी यह संज्ञा छठी भूमिका में प्रवेश के साथ बतलाई है। और, अन्त में सातवीं भूमिका में पहुंच जाने के बाद वह ब्रह्मविद्वरिष्ठ बन जाता है। इन संज्ञाओं का प्रयोग भी हमारे टीकाकार ने 'बचंरी' की अपनी व्याख्या में किया है।[१]

□

१. विस्तृत विवरण के लिए देखिए—योगवासिष्ठ और उसकी व्याख्या (वासिष्ठ-महारामायण, तात्पर्यप्रकाश), भाग १, उत्पत्ति प्रकरण, सर्ग ३, अध्याय ११८, श्लोक १-१५; और वही, भाग २, प्रकरण ६, सर्ग १२२, श्लोक १-८, तथा सर्ग १२६। (निर्णय सागर प्रेस, बम्बई, सन् १९३७ ई० में प्रकाशित)।

परिशिष्ट ३

व्याख्या में आये हुए उद्धरणों की ग्रन्थ-सूची

(अकारानुक्रम से)

अमरकोश
अमृतोपनिषद्
कठोपनिषद्
कालाग्निरुद्रोपनिषद्
कैवल्योपनिषद्
चाणक्यनीति
छान्दोग्योपनिषद्
तेजोबिन्दूपनिषद्
तैत्तिरीयोपनिषद्
नारदपरिव्राजकोपनिषद्
निरालम्बोपनिषद्
बृहदारण्यकोपनिषद्
ब्रह्मबिन्दूपनिषद्
ब्रह्मविद्योपनिषद्
माण्डूक्योपनिषद्
भगवद्गीता
महाभारत
मुण्डकोपनिषद्
रामगीता (अध्यात्म रामायण, उत्तर काण्ड, पंचम अध्याय)
रामोत्तरतापिन्युपनिषद्
विष्णुपुराण
वेद (ऋक्, यजुः, साम)
शरीरतापिन्युपनिषद्
शाण्डिल्योपनिषद्
श्रीमद्भागवत

—o—

परिशिष्ट ४

अनुक्रमणिका (साखी)

—०—

श्लोक-सूची

प

ब

भ

म